श्री स्वामिनारायणो विजयतेतराम् ।

# श्रीमद् सत्सङ्गिजीवन शास्त्रम् ।

श्रीशतानन्दमुनि विरचितम्-गुर्जरानुवाद सहितम् ।

**શ્રી શતાનંદમુનિ વિરચિતમ્ ।**

# શ્રીમદ્ સત્સંગિજીવન શાસ્ત્રમ્

પ.પૂ. સનાતન ધ.ધુ. શ્રી લક્ષ્મીનારાયણ દેવ પીઠાધિપતિ આચાર્યશ્રી ૧૦૦૮ શ્રી અજેન્દ્રપ્રસાદજી શ્રી નરેન્દ્રપ્રસાદજી મહારાજશ્રી (વડતાલ)ની આજ્ઞાથી સાધુ આનન્દસ્વરૂપદાસ (વેદાન્તાચાર્ય) સંશોધિત

## द्वितीय प्रकरणम् ।

**ગુજરાતી અનુવાદ સહિત**

## દ્વિતીય-પ્રકરણ

सुव्रत उवाच -

स्नातःकृताह्निकः सोऽथ चतुर्दशदिने सभाम् ।
कारयामास महतीं न्यषीदत्तत्र च स्वयम् ।।१।।

### અધ્યાય : ૧

### ધર્મપ્રશંસા નિરૂપણ

**ચૌદમાની સભામાં શ્રીહરિનો ધર્મોપદેશ :-**

સુવ્રત મુનિ પ્રતાપસિંહ રાજાને કહે છે - હે રાજન્ ! શ્રી રામાનંદ સ્વામીના અન્તર્ધાન થયા પછી ચૌદમે દિવસે સવારમાં સ્નાન તથા સંધ્યા-વંદનાદિ કરીને નારાયણ મુનિ  મોટી સભા કરાવતા હતા તે સભામાં શ્રીહરિ રમણીય સિંહાસનમાં બેઠા. (૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तस्याग्रतो निषेदुश्च नैष्ठिका ब्रह्मचारिणः । मुकुन्दानन्दप्रमुखाः स्वामिनः सहयायिनः ॥२॥ ततः सन्तो निषेदुश्च मुक्तानन्दादयोऽखिलाः । विप्राश्च मयरामाद्याः क्षत्रिया मूलजिन्मुखाः ॥३॥ पर्वताद्या विशः शूद्रा निषेदुः कालजिन्मुखाः। तत्र पुंसोऽस्पृशन्त्यश्च लाडिनीप्रमुखाः स्त्रियः ॥४॥ उद्धवस्याश्रिता येऽन्ये निषेदुस्तत्र तेऽखिलाः । मुकुन्दाद्याः प्राञ्जलयो नत्वाऽथोचुरिदं हरिम् ॥५॥ नमः श्रीसहजानन्दस्वामिने गुरुमूर्तये । नारायणमुने ! तुभ्यं नानासद्गुणशालिने ॥६॥ महाराज ! त्वमेवासि स्थाने श्रीस्वामिनोऽद्य वै । अतः स्वामी त्वमस्माकं वयं शिष्यास्तवाखिलाः ॥७॥ वर्तिष्यामह आज्ञायां तवैव वयमादरात् । अतः शाधि यथार्हं नः कार्याकार्येऽखिलार्थवित् ॥८॥ सुव्रत उवाच-निर्व्याजवाचस्तान्भक्तान् स्वामी प्राहाथ मानदः । तेषां धर्मस्थितिं वाक्यैर्द्रढयन्धर्मशास्त्रगैः ॥९॥ श्रीनारायणमुनिरुवाच-मुकुन्द ! शृणु सद्बुद्धे ! भक्ताः ! शृणुत चेतरे । यूयं मदाश्रयाः स्थेति जानाम्यत्र न संशयः ॥१०॥ नृदेहं प्राप्य यत्किञ्चित्कर्तव्यं सर्वथा जनैः । तदेव क्रियते नूनं भवद्भिर्हि मुमुक्षुभिः ॥११॥ अधिकारानुसारेण पूर्वं श्रीस्वामिना यथा । ये ये यत्र नियुक्ताः स्युः स्थातव्यं तत्र तैस्तथा ॥१२॥ तदुक्तान्येव सद्धर्मवाक्यानि नियतव्रतैः । सर्वैश्च पालनीयानि गृहस्थैस्त्यागिभिस्तथा ॥१३॥ धर्मादपेतं यत्कर्म यद्यपि स्यान्महाफलम्। न तत्सेवेत मेधावी शुचिः कुसलिलं यथा ॥१४॥

---

શ્રી રામાનંદ મુનિની સાથે રહેનારા મુકુંદાનંદ વગેરે બ્રહ્મચારીઓ તે શ્રીહરિની આગળ બેઠા. (૨) તેમની પાછળ મુક્તાનંદ વગેરે સમગ્ર સંતો બેઠા. તેમની પાછળ મયારામ વગેરે બ્રાહ્મણો બેઠા. તેમની પાછળ મૂળજી વગેરે ક્ષત્રિયો બેઠા. (૩) તેમની પાછળ પર્વત નામના ભક્ત વગેરે વૈશ્યો બેઠા. તેમની પાછળ કાળજીત = કૃષ્ણદાસ ભક્ત વગેરે શૂદ્રો બેઠા અને લાડકી વગેરે સ્ત્રીભક્તો પુરુષોને સ્પર્શ નહિ કરતી સતી તે સભામાં (એક સ્થાનમાં) બેઠાં. (૪) ઉદ્ધવના અવતાર શ્રી રામાનંદ મુનિનો આશ્રય કરીને ભગવાનને ભજતા ચાર વર્ણથી ઈતર જે બીજા સમગ્ર જનો તે પણ સભામાં સહુથી પાછળ બેઠા. (આવી રીતે વ્યવસ્થિત સભામાં બેઠા) પછી મુકુંદાનંદ બ્રહ્મચારી વગેરે સર્વજનો બન્ને હાથ જોડીને શ્રીહરિને (શરીર-વાણી અને મનથી) પ્રણામ કરીને આગળ કહેવાશે તેવું વચન બોલ્યા : (૫)

હે નારાયણ મુનિ ! સદ્‌ગુરુરૂપ, નાના પ્રકારના શ્રેષ્ઠ ગુણોથી શોભાયમાન શ્રી સહજાનંદ સ્વામી તમોને અમો નમસ્કાર કરીએ છીએ. (૬) મહાઐશ્વર્ય-પ્રતાપના અતિશયથી શોભતા હે શ્રીહરિ ! આ સમયે શ્રી રામાનંદ સ્વામીના સ્થાનમાં તમો જ છો. માટે અમારા ગુરુના સ્થાનમાં પૂજનીય તમો જ છો. અમો (રામાનંદ સ્વામીના દીક્ષિત ભક્તજનો) તમારા શિષ્યો છીએ. (૭) અમો સર્વે તમારી આજ્ઞામાં આદરપૂર્વક વર્તીશું માટે અમોને કરવા યોગ્ય અને ન કરવા યોગ્ય કાર્યમાં યોગ્યતા પ્રમાણે ઉપદેશ આપો; કારણ કે તમો અમારા કલ્યાણના કારણભૂત સર્વ અર્થોને જાણનારા છો. (૮)

**સુવ્રત મુનિ પ્રતાપસિંહ રાજાને કહે છે -** હે રાજન્ ! આવી રીતે મુકુન્દાનંદ વગેરેની વાણી સાંભળીને યથાયોગ્ય સત્કાર કરનાર શ્રી નારાયણ મુનિ ધર્મશાસ્ત્રને અનુસરનારાં વચનોથી તે ભક્તજનોની ધર્મ મર્યાદા દૃઢ કરવા માટે કપટ રહિત વચનોવાળા ભક્તોને કહેવા લાગ્યા : (૯)

**શ્રીનારાયણમુનિ બોલ્યા :** હે મુકુંદાનંદ વર્ણી ! હે સુંદર બુદ્ધિવાળા તમો સાંભળો. બીજા પણ હે ભક્તજનો ! તમો સાંભળો. તમો સર્વે મારા આશ્રિતો છો એમ હું જાણું છું. એમાં સંશય નથી. (૧૦) જનોએ મનુષ્યદેહ પામીને પોતાના કલ્યાણમાં કારણભૂત જે કંઈ પણ કરવા યોગ્ય હોય છે તે જ કર્મ મુમુક્ષુ એવા તમો સર્વ પ્રકારે સંપાદન કરો છો જ. (૧૧)

હે ભક્તો ! શ્રી રામાનંદ મુનિએ જે જે ભક્તજનોને પોતપોતાના અધિકાર પ્રમાણે જે જે ક્રિયામાં જે પ્રકારે પ્રેરણા કરી હોય તે જનોએ તે કર્મમાં તે પ્રકારે જ વર્તવું. (૧૨) શ્રી રામાનંદ મુનિએ કહેલાં સદ્ધર્મનાં વાક્યોને જ નિયમ પૂર્વક તમો સર્વ ગૃહસ્થો તથા ત્યાગીઓએ પાલન કરવાં. (૧૩)

ધર્મે રહિત જે કર્મ, જો કે ધનનો લાભ વગેરે મહાફળ આપનારું હોય તો પણ ગટરના જળને જ જેમ તેમ બુદ્ધિશાળી પુરુષ તે કર્મનું આચરણ ન કરે. (૧૪)

यमार्याः क्रियमाणं हि स्तुवन्त्यागमवेदिनः । स धर्मो यं च निन्दन्ति तमधर्मं प्रचक्षते ॥१५॥ विद्या वित्तं वपुः शौर्यं कुले जन्म विरोगिता । संसारसङ्कटोद्धारो धर्मादेव प्रवर्तते ॥१६॥ शब्दे स्पर्शे च रूपे च रसे गन्धे च देहिनाम् । प्रभुत्वं जायते यत्तद्धर्मस्यैव फलं विदुः ॥१७॥ धर्मं चिन्तयमानोऽपि यदि प्राणैर्वियुज्यते । तर्हि स्वर्गमवाप्नोति किं पुनस्तमिहाऽऽचरन् ॥१८॥ येऽर्था धर्मेण ते सत्या येऽधर्मेण धिगस्तु तान् । धर्मो वै शाश्वतो लोके न हेयो धनकाङ्क्षया ॥१९॥ उत्सवादुत्सवं यान्ति स्वर्गात्स्वर्गं सुखात्सुखम् । श्रद्दधानाश्च शान्ताश्च धनाढ्या धर्मकारिणः ॥२०॥ धर्मः प्रजां वर्धयति क्रियमाणः पुनः पुनः । धर्मादर्थश्च कामश्च सुखं ज्ञानं च जायते ॥२१॥ अर्थकामौ लिप्समानो धर्ममेवादितश्चरेत् । न हि धर्माद्धवेत्किञ्चिद्दुष्प्रापमिति मे मतिः ॥२२॥ निपानमिव मण्डूकाः सरः पूर्णमिवाण्डजाः । शुभकर्माणमायान्ति विवशाः सर्वसम्पदः ॥२३॥ धर्माद्राज्यं धनं सौख्यं प्राप्यन्ते सर्वसिद्धयः । लोकद्वयेऽपि यत्सौख्यं तद्धर्मात्प्राप्यते नृभिः ॥२४॥ धर्मे वृद्धे विवर्धन्ते सर्वभूतानि सर्वदा । तस्मिन् ह्रसति हीयन्ते तस्माद्धर्मो निषेव्यताम् ॥२५॥ श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः । इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥२६॥ एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः । शरीरेण समं नाशं सर्वमन्यद्धि गच्छति ॥२७॥ धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः । कर्मणा मनसा वाचा ततो धर्मं

**ધર્મ અને અધર્મનું સ્વરૂપ :-** સત્શાસ્ત્રોને જાણનારા પુરુષો આરંભ કરાયેલા ધર્મરૂપ જે કાર્યની પ્રશંસા કરે છે તે સત્ય ધર્મ છે - જે કાર્યરૂપ ધર્મની તેઓ નિંદા કરે છે તેને અધર્મ કહેવાય છે. (૧૫) સદ્વિદ્યા-પુષ્કળ દ્રવ્ય, શરીરની સુંદરતા, શૂરવીરપણું, સારા કુળમાં જન્મ, રોગે રહિતપણું, સંસારસાગરમાંથી ઉદ્ધાર (જન્મમરણ રહિતપણું) આ બધું સદ્ધર્મથી જ થાય છે. (૧૬)

**ધર્મનો પ્રભાવ :-** શબ્દ-સ્પર્શ-રૂપ-રસ અને ગંધમાં મનુષ્યોને તે તે શબ્દાદિ ભોગો અધિક પ્રાપ્ત થાય છે તે ધર્મનું જ ફળ શાસ્ત્રજ્ઞો જાણે છે. (૧૭) (મારે આ ધર્માચરણ જરૂર કરવું છે એવા) ધર્મનું ચિંતન કરનારો માણસ જ્યારે પોતાના પ્રાણ ત્યાગ કરે છે તો પણ સ્વર્ગ-સુખને પામે છે તો આ લોકમાં ધર્મનું સેવન કરનાર સ્વર્ગસુખને પામે તેમાં કહેવું જ શું? તે તો પામે જ. (૧૮)

જે ધન પોતાના ધર્મપૂર્વક સંપાદન કરેલું હોય તે આ લોકમાં અને પરલોકમાં સુખ કરનારું છે. જે ધન અધર્મથી સંપાદન કરેલું હોય તે ધનને ધિક્કાર છે; કારણ કે આ લોક ને પરલોકમાં દુઃખનું કારણ છે. ધર્મ લોકમાં અખંડ સુખનું કારણ છે. તે ધર્મનો અધર્મથી ધનપ્રાપ્તિની ઈચ્છાથી ત્યાગ કરવો જ નહિ. (૧૯)

સત્શાસ્ત્રના અર્થમાં વિશ્વાસવાળા, શાંત, (સંયમી) યજ્ઞ-દાનાદિ ધર્મ કરનારા ધનવાન પુરુષો વારંવાર આનંદોત્સવોનો અનુભવ કરે છે અને વારંવાર સ્વર્ગસુખોનો અનુભવ કરે છે. ( અર્થાત્ આ લોકમાં અને પરલોકમાં સદા સુખોને જ અનુભવે છે. ) (૨૦) વારંવાર આચરણ કરાયેલો ધર્મ પ્રજા (સારી સંતતિ)ની વૃદ્ધિ પમાડે છે. ધર્મના આચરણથી સંપત્તિ પ્રાપ્ત થાય છે. સર્વે ઈન્દ્રિયોના વિષયોની પ્રાપ્તિ, દેહ સંબંધી સુખ અને આત્મા-પરમાત્માનું જ્ઞાન થાય છે. (૨૧)

ધન અને સુખની પ્રાપ્તિની ઈચ્છાવાળો પુરુષ પ્રથમ ધર્મનું આચરણ કરે કારણકે ધર્મથી કંઈ પણ અપ્રાપ્ય નથી. આ પ્રમાણે મારી બુદ્ધિ છે અર્થાત્ એમ હું જાણું છું. (૨૨)

દેડકાંઓ પરાધીન થઈને જળથી ભરેલા કૂવા પ્રત્યે જાય તથા પક્ષીઓ પરાધીન થઈને પૂર્ણ સરોવર પ્રત્યે જાય છે તેમ સર્વ સંપત્તિઓ સદ્ધર્મનું પાલન કરનાર પુરુષને પ્રાપ્ત થાય છે. (૨૩) મનુષ્યોને ધર્મના આચરણથી રાજ્ય, ધન, આરોગ્ય તથા અણિમાદિ સિદ્ધિઓ પ્રાપ્ત થાય છે. આ લોકમાં અને પરલોકમાં જે સુખ છે તે પણ ધર્મથી પ્રાપ્ત થાય છે. (૨૪)

હે ભક્તો ! ધર્મની વૃદ્ધિ કરે તો સર્વ મનુષ્યો હંમેશાં વૃદ્ધિ પામે છે. ને ધર્મ નાશ પામે તો સર્વ પ્રાણીઓ નાશ પામે છે. (અર્થાત્ પોતપોતાનાં સ્થાનોથી પોતે જ નાશ પામે છે.) તેથી ધર્મનું તમોએ આચરણ કરવું. (૨૫) શ્રુતિ અને સ્મૃતિઓએ કહેલા ધર્મનું અનુષ્ઠાન કરનાર મનુષ્ય આ લોકમાં કીર્તિ પામે છે અને મરણ બાદ સર્વોપરિ સુખ પામે છે. (૨૬)

કેવળ એક ધર્મ જ સત્ય હિત કરનારો છે. (બીજાં સ્ત્રી-પુત્રાદિ નથી) માટે શરીર નાશ પામે તો પણ ધર્મ પોતાનું આચરણ કરનારની પાછળ જાય છે જ્યારે બીજું બધું શરીરની સાથે નાશ પામે છે. (૨૭) પુરુષે ત્યાગ કરાયેલો ધર્મ પોતાને



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

चरेत्पुमान् ॥२८॥ न कामान्न च संरम्भान्नोद्वेगान्न भयादपि । न हेतोर्जीवितस्यापि धर्मस्त्याज्यो न लोभतः ॥२९॥ सीदन्नपि हि धर्मेण नाधर्मे योजयेन्मनः । अधार्मिकाणां पापानामाशु पश्यन् विपर्ययम् ॥३०॥ तृणपत्राग्रगाम्यम्बु-बिन्दुवच्चञ्चलं नृणाम् । जीवितं वर्तते तस्मात्साधनीयः स सत्वरम् ॥३१॥ अजरामरवत्प्राज्ञो विद्यामर्थं च साधयेत् । गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥३२॥ एकस्मिन्नप्यतिक्रान्ते दिवसे धर्मवर्जिते । यो जीवति स भस्त्रेव श्वसितीति विदुर्बुधाः ॥३३॥ नावसीदति चेद्धर्मः कपालेनापि जीवता । आढ्योऽस्मीत्येव मन्तव्यं धर्मवित्ता हि साधवः ॥३४॥ अर्थसिद्धिं परामिच्छन्नपि धर्मपरो भवेत् । न हि धर्मादपैत्यर्थः स्वर्गलोकादिवामृतम् ॥३५॥ तस्माद्धर्मं सहायार्थं नित्यं सञ्चिनुयाच्छनैः । धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥३६॥ स षड्विधो वर्णधर्मो धर्म आश्रमिणां तथा । धर्मो वर्णाश्रमाणां च गौणो नैमित्तिकस्तथा ॥३७॥ साधारण इति प्रोक्तः षोढा तद्भेदवेदिभिः । तत्र साधारणो धर्मो यस्तं भक्ता ! ब्रवीमि वः ॥३८॥ क्षमा दयाऽनसूया च शौचानायासमङ्गलम्। अकार्पण्यं निःस्पृहत्वं धर्मः साधारणो मतः ॥३९॥ बाह्ये वाऽध्यात्मिके दुःखे केनाप्युत्पादिते सति । न कुप्यति न वा हन्ति सा क्षमा परिकीर्तिता ॥४०॥

---

ત્યાગ કરનાર પુરુષનો નાશ કરે છે. રક્ષણ કરાયેલો ધર્મ પોતાનું આચરણ કરનાર પુરુષનું સર્વ પ્રકારે રક્ષણ કરે છે. માટે પુરુષ શરીર, મન અને વાણીથી ધર્મનું આચરણ કરે. (૨૮)

(પુરુષે) સ્ત્રીસંગ વગેરેની ઈચ્છા(કામ)થી તથા ક્રોધના વેગથી કે કોઈ કારણથી થતાં મનના સંતાપથી ધર્મનો ત્યાગ કરવો નહિ તથા કોઈકે પોતાને અર્પણ કરેલી જીવિકા-વૃત્તિ વગેરે લઈ લેવાના ભયથી તથા જીવતા રહેવાના કારણથી અને ધન વગેરેની પ્રાપ્તિનાં લોભથી પણ ધર્મનો ત્યાગ કરવો નહિ. (૨૯) અધર્મમાં પ્રીતિવાળા, માટેજ પ્રાણિ હિંસાદિ પાપકર્મ કરનારાઓને તત્કાળ (અવિલંબથી) મહાસંપત્તિનો નાશ થાય છે એ આદિકથી અતિ દુઃખની પ્રાપ્તિ વગેરે વિપરીતપણાને જોનારો પુરુષ ધર્માચરણથી પોતે અન્નવસ્ત્રાદિથી દુઃખ પામતો હોય તોપણ અધર્મના આચરણનો સંકલ્પ ના કરે. (૩૦) કારણ કે મનુષ્યોનું જીવન તણખલાના અગ્રભાગ ઉપર રહેલા જળના બિંદુ સમાન અસ્થિર છે. માટે ધર્મ તત્કાળ જ સંપાદન કરવો. (આયુષ્યના વિશ્વાસથી વિલંબ કરવો નહિ.) (૩૧)

સુજ્ઞ પુરુષે વિદ્યાભ્યાસ અને ધન મેળવવામાં હું વૃદ્ધ થવાનો નથી તેમજ મરવાનો પણ નથી એમ માનીને વિદ્યા અને ધન ઉપાર્જન કરવું. ( એમ ના સમજે તો તેમાં પ્રવૃત્તિ થાય નહિ. ) પરંતુ ધર્મના આચરણમાં તો પોતાના આત્માને મૃત્યુએ ગ્રહણ કરેલો માનીને વાર લગાડવી નહિ. (૩૨) એક દિવસ પણ ધર્મના આચરણ વગરનો જાય ને તે પુરુષ જીવે છે તે પુરુષ ધમણની માફક શ્વાસ લે છે. આ પ્રમાણે સત્ અને અસત્ના વિવેકવાળા પુરુષો જાણે છે. (૩૩) જો પોતાનો ધર્મ નાશ ના પામે તો રામપાત્ર લઈને ભિક્ષાવૃત્તિથી પ્રાણ ધારણ કરનારાએ હું ધનસંપન્ન જ છું : આ પ્રમાણે પોતાના મનમાં જાણવું કારણ કે ધર્મવાળા પુરુષોને પોતાનો ધર્મ એ જ ધનસંપત્તિ હોય છે. (૩૪)

સર્વથી શ્રેષ્ઠ અર્થપ્રાપ્તિને ઈચ્છનાર પુરૂષ ધર્મપરાયણ થાય કારણ કે સ્વર્ગલોકથી અમૃત જ જેમ તેમ ધર્મથી અર્થસિદ્ધિ નાશ પામતી નથી.(અર્થાત્ જુદી રહેતી નથી.) (૩૫) તે કારણથી પરલોકમાં સહાય માટે ધીમે ધીમે દરરોજ ધર્મ પ્રાપ્ત કરે. કારણકે સહાયભૂત ધર્મથી અપાર સંસારરૂપી દુસ્તર અંધકારને તરી જાય છે. (૩૬)

**તે ધર્મ છ પ્રકારનો છે** : ૧. વર્ણધર્મ (પ્રયત્નપૂર્વક હંમેશાં મદ્યપાનનો ત્યાગ કરે એ આદિક) તથા ૨. આશ્રમધર્મ (અગ્નિહોત્ર તથા ભિક્ષાદિ રૂપ) ૩. વર્ણાશ્રમધર્મ (બ્રાહ્મણને પલાશનો દંડ વગેરે) ૪. ગૌણધર્મ (જેમકે અભિષિક્ત રાજાએ પ્રજાનું પાલન કરવું.) ૫. નિમિત્તથી પાલન કરવાનો ધર્મ (શાસ્ત્રે નિષેધ કરાયેલ કર્મનું સેવન કરેલું હોય તે નિમિત્તે પ્રાયશ્ચિત્ત કરવું તે. ) ૬. સાધારણ ધર્મ (સર્વ જનોને સમાન પણે પાલન કરવા યોગ્ય) : આ છ પ્રકારના ધર્મને તેનું સ્વરૂપ જાણનારા મુનિઓએ કહેલો છે. હે ભક્તજનો ! છ પ્રકારના ધર્મોમાં જે સાધારણ ધર્મ છે તે તમોને હું કહું છું. (૩૭-૩૮) ક્ષમા, દયા, અનસૂયા, શૌચ, અનાયાસ, મંગળ, અકાર્પણ્ય અને નિઃસ્પૃહપણું : આ બધા **સાધારણ ધર્મો** માનેલા છે. (૩૯)

કોઈ પણ માણસે દેહસંબંધી દુઃખ (લાકડી વગેરેના પ્રહારથી ઉત્પન્ન કર્યું હોય ) અથવા અન્તઃકરણને પીડા કરનારું દુઃખ (આજીવિકા લઈ લીધી હોય, ગાળો દીધી હોય વગેરેથી) ઉત્પન્ન કર્યું હોય તોપણ ક્રોધ કરે નહિ અથવા શસ્ત્રાદિકથી મારે પણ નહિ તે **ક્ષમા** કહેલી છે. (૪૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**परो वा बन्धुवर्गो वा मित्रं द्वेष्टापि वा सदा । आपन्नः सर्वथा रक्ष्यो दयैषा परिकीर्तिता ॥४१॥ न गुणान् गुणिनां हन्ति स्तौति मन्दगुणानपि । नान्यदोषेषु रमते साऽनसूया प्रकीर्तिता ॥४२॥ अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः । स्वधर्मे च व्यवस्थानं शौचमेतत्प्रकीर्तितम् ॥४३॥ शरीरं पीड्यते येन सुशुभेनापि कर्मणा । अत्यन्तं तन्न कर्तव्यमनायासः स उच्यते ॥४४॥ अद्रोहः प्राणिमात्रस्य वर्जनं चानृतस्य च । प्रशस्ताचरणं नित्यं यत्तन्मङ्गलमुच्यते ॥४५॥ स्तोकादपि प्रदातव्य-मदीनेनान्तरात्मना । अहन्यहनि यत्किञ्चिदकार्पण्यं हि तत्स्मृतम् ॥४६॥ यथालब्धेन सन्तोषः परद्रव्याद्यचिन्तनम् । अनासक्तिश्च देहादौ निःस्पृहत्वं तदुच्यते ॥४७॥ धर्मस्य धर्तुर्जगतां हि भक्ताः ! सङ्क्षेपतो लक्षणमेतदुक्तम् । मया यथावत्कथयाम्यथो वस्तत्प्राप्त्युपायं च मुमुक्षुवेद्यम् ॥४८॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे नारायणमुनिमुकुन्दानन्दादिसंवादे धर्मप्रशंसानिरूपणनामा प्रथमोऽध्यायः ॥१॥

श्रीनारायणमुनिरुवाच-**कायक्लेशैर्न बहुभिर्न चैवार्थस्य राशिभिः । धर्मः सम्प्राप्यते ह्येष श्रद्धाहीनैः सुरैरपि ॥१॥ सर्वस्वं जीवितं वापि दद्यादश्रद्धया यदि । नाप्नुयात्स फलं किञ्चिच्छ्रद्दधानस्ततो भवेत् ॥२॥**

---

પારકો માણસ હોય અથવા પોતાના સંબંધી હોય અથવા મિત્ર હોય અથવા શત્રુ હોય તે જો આપત્તિમાં આવેલો હોય તો સર્વ પ્રકારે પોતાની શક્તિ પ્રમાણે રક્ષણ કરવું તે **દયા** કહેલી છે. (૪૧)

વિદ્યાદિ ગુણવાળાના વિદ્યાદિ ગુણોમાં દોષનો અપવાદ મૂકે નહિ. બીજાના અલ્પ ગુણોની પણ પ્રશંસા કરે, બીજાના દોષોને જોઈને રાજી થાય નહિ તે **અનસૂયા** કહેલી છે. (૪૨)

સત્શાસ્ત્રમાં નિષેધ કરાયેલાં લસણ-ડુંગળી વગેરે અભક્ષ્યનો ત્યાગ કરવો તેમજ નિંદા નહિ પામેલા સત્પુરુષોનો સમાગમ કરવો તે **શૌચ** કહેલું છે. (૪૩)

જે શુભ કર્મ કરવાથી (કૃચ્છ્ર-ચાંદ્રાયણાદિ વ્રતના આચરણથી) પોતાનું શરીર પીડા પામે તે કર્મ અત્યંત કરવું નહિ તે **અનાયાસ** ધર્મ કહેવાય છે. (જેમ શરીર ગ્લાનિ પામે નહિ અને મૃત્યુ પામે નહિ તેવી ક્રિયા કરવી. શક્તિમાન બધું કરી શકે, તેવી સ્મૃતિ છે). (૪૪)

પ્રાણીમાત્રની (શરીર-વાણી અને મનથી) હિંસા કરવી નહિ, અસત્ય બોલવું નહિ. (પોતાનો અને પારકો દ્રોહ થાય તેવું સત્ય વચન બોલવું નહિ તે જાણી લેવું. ) હંમેશાં પ્રશંસનીય આચરણ કરવું. તે **મંગલ** ધર્મ કહેલો છે. (૪૫)

રોજ ઉદારતા વાળા મનથી અલ્પ વસ્તુમાંથી પણ લગાર સત્પાત્રમાં દાન કરવું તે **અકાર્પણ્ય** ધર્મ કહેલો છે. (૪૬)

પોતાના પ્રારબ્ધાનુસાર પ્રાપ્ત થયેલાં ધન વગેરેથી સંતોષ અને પારકા ધન વગેરેને મનથી પણ લેવાનું ચિંતવન કરે નહિ. તેમજ દેહ અને દેહના સંબંધીઓમાં આસક્તિરહિત રહેવું તે **નિઃસ્પૃહપણું** કહેવાય છે. (૪૭)

શ્રીહરિ કહે છે કે હે ભક્તજનો ! ભુવનોને ધારણ કરનાર ધર્મનું લક્ષણ મેં તમોને સંક્ષેપથી યથાર્થ કહ્યું. હવે પછી મુમુક્ષુઓએ જાણવા યોગ્ય ધર્મ પ્રાપ્તિનું સાધન કહું છું. (૪૮) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે નારાયણ-મુકુંદાનંદાદિસંવાદે ધર્મપ્રશંસાનિરૂપણનામા પ્રથમોऽધ્યાય. (૧)*

## અધ્યાય : ૨

## શ્રદ્ધાદિ ગુણોની પ્રશંસા.

**ધર્મપાલનમાં શ્રદ્ધાનું મહત્ત્વ** :- શ્રી નારાયણ મુનિ બોલ્યા, (સદ્‌ગુરુ અને સત્‌શાસ્ત્રનાં વચનોમાં શ્રદ્ધા રહિત એવા દેવતાઓને પણ ઘણા પ્રકારની શરીર પીડાઓથી પણ આ (પૂર્વે કહેલા મહિમાવાળો) ધર્મ પમાતો નથી અને ઘણાને દ્રવ્યસમુદાયોથી આ ધર્મ પમાતો નથી (પરંતુ શ્રદ્ધાથી જ પમાય છે. ) (૧) શ્રદ્ધારહિત પોતાનું સમગ્ર ધન અથવા પોતાના જીવનમાં કારણભૂત ક્ષેત્ર (ભૂમિ) પણ કોઈને અર્પણ કરે તોપણ તે પુરુષ કંઈ પણ ફળ પામે નહિ માટે શ્રદ્ધાવાળા થવું (૨)

श्रुतिमात्ररसाः सूक्ष्माः प्रधानपुरुषेश्वराः । श्रद्धामात्रेण गृह्यन्ते न करेण न चक्षुषा ॥३॥ श्रद्धा मातेव सर्वेषां ज्ञानवैराग्ययोः प्रसूः । श्रद्धया साध्यते धर्मो नान्योपायेन केनचित् ॥४॥ अपि निष्किञ्चना विप्राः श्रद्धावन्तो दिवं गताः । धर्मार्थकाममोक्षाणां श्रद्धा परमसाधनम् ॥५॥ क्रियावान् श्रद्दधानश्च दाता प्राज्ञोऽनसूयकः । धर्माधर्मविशेषज्ञस्तमस्तरति दुस्तरम् ॥६॥ श्रद्धयाऽऽचर्यमाणोऽपि धर्मः शिथिलचेतसाम् । यथावत्फलदो न स्यात्कर्तव्यो नियमस्ततः ॥७॥ असिधाराव्रतं ह्येतत्पुंसां नियमशीलनम् । दुष्करो नियमः पुम्भी रागलोभाकुलात्मभिः ॥८॥ देवत्वं देवताः प्राप्ताः प्रकाशन्ते च तारकाः । नियमाचरणादेव वेलां नाक्रमतेऽर्णवः ॥९॥ नियमाद्दीप्यते वह्निर्नियमात्तप्यते रविः । नियमाद्वाति पवनो नियमाद्ध्रियते जगत् ॥१०॥ नियमानां हि दृश्यन्ते समृद्धाः फलसिद्धयः । तथा विनियमानां च घोरा व्यापत्तयो भुवि ॥११॥ श्रद्दधानैस्ततः पुम्भिर्धर्मो नियमपूर्वकम् । वर्धनीयः प्रतिदिनं परलोकसहायकृत् ॥१२॥ देशः काल उपायश्च द्रव्यं श्रद्धा तथैव च । पात्रं त्याग इति प्रोक्तं धर्ममूलं हि सप्तकम् ॥१३॥ शुद्धैरेतैर्भवेद्धर्मो विशुद्धः फलदायकः । अशुद्धैर्विपरीतः स्यादिति ज्ञेयं विचक्षणैः ॥१४॥ पुंसां गुणाश्च दोषाश्च सदसत्सङ्गतोऽपि हि । स्युस्तत्सङ्गः सतां कार्यो नासतां तु मुमुक्षुभिः ॥१५॥ दोषजालस्य वै योनिरसतां तु समागमः । अहन्यहनि धर्मादेर्योनिः साधुसमागमः ॥१६॥

કેવળ શ્રવણ માત્રથી જ રસયુક્ત (ભગવત્ સ્વરૂપના જ્ઞાન અને તેમના માહાત્મ્યજ્ઞાનના રસાસ્વાદવાળા) તથા સૂક્ષ્મ = શ્રદ્ધાથી જ (બીજા કોઈ પણ ઉપાયથી, નહિ) ગ્રહણ કરવા યોગ્ય પ્રકૃતિ-પુરુષ અને તેના ઈશ્વર = કાર્યે સહિત પ્રકૃતિ-પુરુષના નિયંતા અને સ્વરૂપ-સ્વભાવથી તેમના થકી વિલક્ષણ એવા પરમેશ્વર તે કેવળ શ્રદ્ધાથી જ ગ્રહણ થાય છે. હાથથી ગ્રહણ થતા નથી. તેમ જ ચક્ષુથી પણ ગ્રહણ થતા નથી. (૩)

સર્વ જનોની શ્રદ્ધા પોતાની માતાની માફક જ્ઞાન અને વૈરાગ્યને ઉત્પન્ન કરનારી છે. ધર્મ શ્રદ્ધાથી જ સિદ્ધ થાય છે. બીજા કોઈ ઉપાયથી સિદ્ધ થતો નથી. (૪) દ્રવ્યે રહિત શ્રદ્ધાવાળા બ્રાહ્મણો પણ સ્વર્ગમાં ગયેલા છે. ધર્મ, અર્થ, કામ અને મોક્ષ તેમનું સર્વોત્તમ સાધન શ્રદ્ધા છે. (૫) પોતાના મોક્ષના ઉપાયમાં શ્રદ્ધાવાળો, સત્પાત્રમાં દાન કરનારો, ઈર્ષ્યા નહિ કરનારો, ધર્મ અને અધર્મના ભેદને જાણનાર વિવેકી દુસ્તર = ન તરી શકાય એવા સંસારરૂપી અંધકારને તરી જાય છે. (૬)

શ્રદ્ધાથી પાલન કરાયેલો ધર્મ જો નિયમપૂર્વક આચરણ ના કરે તો યથાર્થ ફળને આપનારો થતો નથી; માટે નિયમપૂર્વક પાલન કરવો. (૭) પુરુષોને નિયમનું પરિપાલન કરવું તે તલવારની ધાર ઉપર રહેવા જેવું કઠિન છે. જે માટે વિષયોમાં પ્રીતિવાળા અને પૈસા વગેરેમાં લોભી મનવાળા પુરુષોએ નિયમ પાળવો અતિ કઠિન છે. (૮) દેવો નિયમપાલન કરવાથી દેવભાવને પામેલા છે. નક્ષત્રાદિ તારાઓ નિયમના આચરણથી પ્રકાશે છે. અને સમુદ્ર પણ નિયમના આચરણથી કાંઠાનું ઉલ્લંઘન કરતો નથી. (૯) અગ્નિ નિયમથી પ્રકાશે છે. સૂર્યનારાયણ નિયમથી તપે છે. પવન નિયમથી વાય છે. વિશ્વ નિયમથી ધારણ કરાય છે. (૧૦)

નિયમવાળાઓને પોતે આરંભ કરેલા કર્મના ફળની સિદ્ધિઓ જણાય છે અને નિયમ વગરનાઓને પૃથ્વીમાં ચોક્કસ ઘોર વિપત્તિઓ દેખાય છે. (૧૧) માટે નિયમપૂર્વક જેમ હોય તેમ શ્રદ્ધાવાળા પુરુષોએ પરલોકમાં સહાય કરનાર, ધર્મ દરરોજ વૃદ્ધિ પમાડવો. (૧૨)

**ધર્મ-પ્રાપ્તિનાં મૂળભૂત સાત ઉપાયો** :- ૧. દેશ = (કાશી, પ્રયાગ-વૃત્તાલય-ગઢપુર વગેરે) ૨. કાળ = (મકરસંક્રાંતિ-એકાદશી-રામનવમી-હરિજયંતિ વગેરે) ૩. ઉપાય = (શાસ્ત્રમાં કહેલા વિધિ પ્રમાણે વર્તવું) ૪. દ્રવ્ય = (પોતપોતાની વૃત્તિથી ઉત્પન્ન કરેલું) ૫. શ્રદ્ધા = આસ્તિક્ય બુદ્ધિ, ૬. પાત્ર = (વિદ્યા-તપ-વ્રતથી યુક્ત, ભગવદ્ધર્મોવાળા, બ્રાહ્મણ-સાધુ વગેરે) તે પ્રકારે ૭. ત્યાગ = શક્તિ પ્રમાણે દાન : આ સાત ધર્મનાં મૂળ છે. (૧૩)

શુદ્ધ કહેલા દેશ-કાળાદિ સાતથી નિર્મલ ફળ આપનારો ધર્મ થાય છે. અશુદ્ધ દેશકાળાદિ સાતથી અશુદ્ધ ફળ આપનારો થાય છે : આ પ્રમાણે સત્ અને અસત્‌નો વિવેક જાણનારા પુરુષોએ જાણવું. (૧૪) પુરુષોના ધર્માદિ ગુણો અને અધર્માદિ દોષો પણ સાધુઓ અને અસાધુઓના સમાગમથી થાય છે. (ગુણો સાધુઓના સંગથી અને દોષો અસત્પુરુષોના સંગથી થાય છે.) માટે મુમુક્ષુઓએ સત્પુરુષોનો સમાગમ કરવો. અસત્પુરુષોનો સંગ તો કરવો નહિ. (૧૫) દરરોજ અસત્પુરુષોનો સમાગમ, અધર્માદિ દોષ સમૂહોની ઉત્પત્તિનું કારણ છે અને સત્પુરુષોનો સમાગમ; ધર્માદિ ગુણસમૂહોની ઉત્પત્તિનું ચોક્કસ કારણ છે. (૧૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

येषां त्रीण्यवदातानि विद्या योनिश्च कर्म च । सततस्तानेव सेवेत परीक्ष्य मतिमान्नरः ॥१७॥ निरारम्भा ह्यपि नराः पुण्यशीलोपसेवनात् । पुण्यमेवाप्नुवन्तीह पापं पापोपसेवनात् ॥१८॥ असतां दर्शनात्स्पर्शात्सञ्जल्पाच्च सहासनात् । धर्माचारात्प्रहीयन्ते न च सिध्यन्ति मानवाः ॥१९॥ बुद्धिश्च हीयते पुंसां नीचैः सह समागमात् । मध्यमैर्मध्यतां याति श्रेष्ठतां याति चोत्तमैः ॥२०॥ तस्मात्प्राज्ञैश्च वृद्धैश्च सुस्वभावैस्तपस्विभिः । सद्भिश्च सह संसर्गः कार्यः शमपरायणैः ॥२१॥ कर्तव्यस्य हि धर्मस्य यथावल्लक्षणं ततः । अधर्मस्याप्यकार्यस्य ज्ञायते सद्भ्य एव हि ॥२२॥ यूयं सर्वे ततो भक्ताः ! सतामेव समागमम् । कुर्वन्त एवाऽऽचरत स्वस्वधर्मं यथोचितम् ॥२३॥ श्रीवासुदेवमाहात्म्यात्स तु ज्ञेय इति स्वयम् । स्वाम्येवोचे ततस्तस्माद्बोद्धव्यस्तत्त्वतश्च सः ॥२४॥ तमास्थिता भगवतो राधाकृष्णस्य नित्यदा । एकान्तभक्तिं कुरुत स्वाभीष्टफलदायिनीम् ॥२५॥ धर्माधर्मौ साध्वसाधू न्यायान्यायौ च तत्त्वतः । कृष्णस्वरूपतद्भक्ती बुध्यन्ते शास्त्रतः सतः ॥२६॥ अवश्यमेव तत्कार्यः सच्छास्त्राभ्यास आदरात् । स्वस्वबुद्ध्यनुसारेण भवद्भिर्मदुपाश्रयैः ॥२७॥ नैर्गुण्यस्थितिमाप्यापि न सच्छास्त्राणि सन्त्यजेत् । सद्ग्रन्थवर्जनात्सिद्धा अपि जाड्यं व्रजन्ति यत् ॥२८॥ उत्साहशक्तिभङ्गश्च कृष्णभक्तौ ततो भवेत् । बुद्धिमोहश्च शैथिल्यं श्रद्धाया अपि जायते ॥२९॥ स्थापिते येषु कृष्णस्य साकारत्वविशुद्धते । सच्छास्त्राणि तु तान्येव वेदार्थानुसृतानि हि ॥३०॥ बहूनि सन्ति तानीह तेष्वभीष्टानि यानि मे । भवन्ति तानि कथये

---

જેમની વિદ્યા, યોનિ (ઉત્પતિ) અને ક્રિયા એ ત્રણ શુદ્ધ હોય (શુદ્ધ સંપ્રદાયથી પ્રાપ્ત વિદ્યાવાળા ગુરુથી વિદ્યાની પ્રાપ્તિ તે વિદ્યા શુદ્ધિ છે. સ્વધર્મવાળાં માતા-પિતાથી ઉત્પત્તિ તે યોનિશુદ્ધિ છે. સત્શાસ્ત્રમાં કહેલા બ્રહ્મચર્ય, અહિંસાદિનું આચરણ કરવું તે કર્મશુદ્ધિ છે. ) બુદ્ધિમાન પુરુષે કહેલાં લક્ષણવાળા સાધુઓની પરીક્ષા કરીને જ સેવા કરવી. (સમાગમ કરવો.) (૧૭) આ લોકમાં સારી રીતે ધર્મનું પાલન નહિ કરનારા પણ પુરુષો, સદ્ધર્મોનું આચરણ કરનાર એવા સાધુજનોનું સેવન કરે, તો તેઓ સદ્ધર્મનું આચરણ કરનારા થાય છે. અધર્મના આચરણે રહિત પુરુષો પણ પાપઆચરણ કરનારા પુરુષોનું સેવન કરવાથી પાપનું આચરણ કરનારા થાય છે. (૧૮)

અસત્ પુરુષોનાં દર્શન-સ્પર્શ, તેમની સાથે વાતો કરવાથી; અને સાથે આસન કરવાથી મનુષ્યો સ્વધર્મથી પતિત થાય છે કહેતાં મનુષ્યદેહની સિદ્ધિ પામતા નથી. (૧૯)

પુરુષોની બુદ્ધિ નીચ (અધમ) પુરુષોના સમાગમથી નીચ થાય છે; મધ્યમ પુરુષોના સમાગમથી મધ્યમ ભાવને પામે છે; ઉત્તમ પુરુષોના સમાગમથી શ્રેષ્ઠ થાય છે. (૨૦) માટે સદ્‌બુદ્ધિવાળા - જ્ઞાન-વૈરાગ્યાદિથી વૃદ્ધ, સદ્ધર્માચરણ યુક્ત તપસ્વીઓ તથા જિતેન્દ્રિય એવા સત્પુરુષોનો સમાગમ કરવો. (૨૧) પોતાને પાલન કરવા યોગ્ય ધર્મનું યથાર્થ લક્ષણ અને ન પાલન કરવા યોગ્ય અધર્મનું પણ યથાર્થ લક્ષણ પૂર્વે કહેલા સાધુઓથી જ જાણવું. (૨૨)

તે માટે હે ભક્તજનો ! તમો સર્વે પણ સાધુઓનો જ સમાગમ કરતા થકા યથાયોગ્ય પોતપોતાના ધર્મનું જ આચરણ કરો. (૨૩) વર્ણાશ્રમને યોગ્ય પોતપોતાનો ધર્મ તો શ્રી વાસુદેવમાહાત્મ્યથી જાણવો : આ પ્રમાણે પોતે શ્રી રામાનંદ સ્વામી જ મને કહેતા હતા માટે તેમાંથી યથાર્થપણે જાણવો. (૨૪) ધર્મમાં રહેલા આશ્રિતો તમો પોતાનાં ઇચ્છિત ફળને આપનારી ભગવાનની એકાંતિકી ભક્તિ હંમેશાં કરો. (૨૫)

**સત્શાસ્ત્રોની આવશ્યકતા** :- હે ભક્તો ! ધર્મ અને અધર્મ, સાધુ અને અસાધુ, ન્યાય અને અન્યાય, શ્રી ભગવત્ સ્વરૂપ તથા તેમની ભક્તિ : આ સર્વે સત્શાસ્ત્રોથી યથાર્થપણે મુમુક્ષુઓ જાણે છે. (૨૬) માટે મારા આશ્રિત તમોએ પોતપોતાની બુદ્ધિને અનુસરીને સત્શાસ્ત્રોનો અભ્યાસ અવશ્ય કરવો. (૨૭)

બ્રહ્મસ્થિતિને પામીને પણ સત્શાસ્ત્રોનો ત્યાગ કરે નહિ, જે માટે બ્રહ્મસ્થિતિને પામેલા હોય તો પણ સત્શાસ્ત્રોના અભ્યાસ વિના જડતા પામે છે; (૨૮) સત્શાસ્ત્રોનો ત્યાગ કરવાથી શ્રીકૃષ્ણની ભક્તિમાં ઉત્સાહ-શક્તિનો નાશ થાય, બુદ્ધિમાં વિપરીત જ્ઞાન અને આસ્તિક બુદ્ધિમાં શિથિલતા પણ આવે છે. (૨૯)

**સત્શાસ્ત્રોનું સર્વોત્કૃષ્ટ લક્ષણ** :- જે શાસ્ત્રોમાં શ્રી વાસુદેવ ભગવાનનું સદા દિવ્ય આકૃતિપણું અને સદા નિર્દોષપણું પ્રતિપાદન કરેલું હોય અને વેદના અર્થોનું અનુસરણ કરનારાં હોય તેને જ સત્શાસ્ત્રો જાણવાં. (૩૦) આ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

शृणुतात्महितानि वः ॥३१॥ वेदाश्च व्याससूत्राणि गीता भगवतोदिता । नाम्नां विष्णोश्च श्रीमद्भागवतं तथा ॥३२॥ श्रीवासुदेवमाहात्म्यं नीतिर्विदुरकीर्तिता । याज्ञवल्क्यस्मृतिश्चेति सन्त्यभीष्टानि मेऽष्ट वै ॥३३॥ तत्रापि भगवद्गीता तथा शारीरकाणि च । इति रामानुजाचार्यभाष्योपेतं मतं द्वयम् ॥३४॥ एतदभ्यासतो बुद्धिः कृष्णभक्त्यैव वासिता । भवेत्ततोऽन्यशास्त्राद्यैर्न पतेदौद्धवाध्वतः ॥३५॥ अशक्तो द्वाविमौ ग्रन्थावध्येतुं यः स सर्वथा । गीतां रामानुजाचार्यभाष्योपेतां पठेन्नरः ॥३६॥ स्मृतिस्तु याज्ञवल्क्यस्य विज्ञानेश्वरक्लृप्तया । युक्ता मिताक्षरानाम्न्या टीकयैव मता मया ॥३७॥ आचारव्यवहाराणां प्रायश्चित्तस्य चाघिनाम् । एतया निर्णयः कार्यः सम्प्रदायानुसारतः ॥३८॥ ग्रन्थेष्वेष्वप्यतीष्टा मे त्रयो भागवतस्य यौ । दशमः पञ्चमः स्कन्धौ याज्ञवल्क्यस्य च स्मृतिः ॥३९॥ कर्तव्या नित्यपाठादावेते ग्रन्थोत्तमास्ततः । विचार्याः स्वस्थमनसा मदीयैः श्रेयसे जनैः ॥४०॥ इत्याज्ञा पालनीया मे भवद्भिर्मामुपाश्रितैः । शोकस्तु स्वामिनो नैव कार्यः प्राकृतजीववत् ॥४१॥ अखण्डं स्वस्वरूपस्था महान्तो ये तु पूरुषाः । कल्याणार्थं हि जगतां ज्ञेयं तज्जन्म भूतले ॥४२॥ आविर्भावतिरोभावौ तेषां स्वातन्त्र्यतः किल । भवतो न त्वितरवन्निजकर्मवशात् क्वचित् ॥४३॥ तद्देहत्यागमालोक्य मुह्यन्त्यसुभृतोऽसुराः । दैवास्तु तत्स्वरूपज्ञास्तेषां लीलां विदन्ति ताम् ॥४४॥ अतः शोकं विहायैव सेव्यमूर्तेर्गुरोः प्रभोः । स्वदेशान्प्रयाताद्य याम्यहं धीरजित्पुरम् ॥४५॥

---

લોકમાં સત્શાસ્ત્રો ઘણાં છે, તે સત્શાસ્ત્રોમાં મને પ્રિય છે તે અને તમોને હિત કરનારા શાસ્ત્રો કહું છું તે તમો સાંભળો. (૩૧)

ઋગ્વેદ વગેરે વેદો, વ્યાસસૂત્ર, શ્રીકૃષ્ણ ભગવાને કહેલી ગીતા, વિષ્ણુસહસ્રનામ તથા શ્રીમદ્ ભાગવત પુરાણ; (૩૨) શ્રી વાસુદેવ માહાત્મ્ય, વિદુરનીતિ, યાજ્ઞવલ્ક્યસ્મૃતિ : આ આઠ સત્શાસ્ત્રો મને અભીષ્ટ છે. (૩૩)

તે આઠ શાસ્ત્રોમાં પણ ભગવદ્ગીતા તથા વ્યાસસૂત્રો આ બંને રામાનુજાચાર્યે કરેલાં ભાષ્યો સહિત મેં અભીષ્ટરૂપે માનેલાં છે. (૩૪) ભગવદ્ગીતા તથા વ્યાસસૂત્રો શ્રી રામાનુજાચાર્યના કરેલા ભાષ્યે સહિત પઠન-પાઠન અને વિચારવાથી બુદ્ધિ શ્રીકૃષ્ણની ઉપાસનાથી જ ભાવના યુક્ત સંસ્કારપ્રાપ્ત થાય છે, ત્યાર બાદ બીજાં શાસ્ત્રો વગેરેથી શ્રીકૃષ્ણની એકાંતિક ઉપાસના સ્વરૂપ ઉદ્ધવસંપ્રદાયના માર્ગથી પડે નહિ. (૩૫)

જે માણસ આ બે ગ્રન્થો ભણવા માટે શક્તિમાન ના હોય તે માણસ રામાનુજાચાર્યના ભાષ્યે સહિત ગીતાનું અધ્યયન કરે. (૩૬) યાજ્ઞવલ્કય સ્મૃતિ, વિજ્ઞાનેશ્વર પંડિતે કરેલી મિતાક્ષરા નામની ટીકાએ સહિત જ મેં માનેલી છે. (૩૭) આચાર વ્યવહાર અને પાપી જનોના પ્રાયશ્ચિત્તનો નિર્ણય યાજ્ઞવલ્કયસ્મૃતિની મિતાક્ષરા ટીકાથી કરવો; પરંતુ સંપ્રદાય અનુસારે કરવો. (૩૮) શ્રીમદ્ ભાગવતના દશમ સ્કંધ અને પંચમ સ્કંધ તથા યાજ્ઞવલ્કયની સ્મૃતિ એ ત્રણ ગ્રંથો મને અત્યંત પ્રિય છે. (૩૯) માટે એ શ્રેષ્ઠ ગ્રંથો મારાં આશ્રિત જનોએ પોતાના કલ્યાણ માટે હંમેશાં ભણવા ભણાવવા અને પારાયણાદિ કરવું. (૪૦) હે ભક્તજનો ! મારા આશ્રિત તમોએ મેં કહેલી ધર્માદિકની આજ્ઞા પાલન કરવી પરંતુ શ્રી રામાનંદ સ્વામીનો શોક અજ્ઞાની જીવોની માફક કરવો નહિ. (૪૧)

**મહાપુરુષોના અવતારનું પ્રયોજન** :- હે ભક્તો ! અખંડ = નિત્ય સ્વસ્વરૂપમાં રહેલા (બ્રહ્માત્મક ભાવથી શ્રીકૃષ્ણભગવાનની એકાંતિકી ભક્તિ કરતા) જે મહાપુરુષો છે તેમનો જન્મ આ પૃથ્વીમાં જગતના (જગતમાં રહેલા જનોના) કલ્યાણ માટે જાણવો. (૪૨) મહાપુરુષોનો આવિર્ભાવ અને તિરોભાવ સ્વતંત્રપણે હોય છે. ક્યારેય પણ બીજા જીવની માફક પોતાના કર્માધીન પણે હોતો નથી જ. (૪૩)

તેમના દેહત્યાગની રીતિ જોઈને અસુરજનો મોહ પામે છે અને તેમનાં સ્વરૂપ જાણનારા દૈવીજનો તો મહાપુરુષોની તિરોધાનલીલા જાણે છે. (૪૪) માટે હંમેશાં સેવ્યમૂર્તિ અતિ સમર્થ શ્રી રામાનંદ મુનિનો શોક ત્યાગ કરીને જ પોતપોતાના દેશો પ્રત્યે તમો હે ગૃહસ્થ-ભક્તજનો ! જાઓ. હું પણ આજે જ ધોરાજીપુરમાં જાઉં છું. (૪૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

सुव्रत उवाच-**एवं सुबोधितास्तेन विशोका इव तेऽखिलाः । स्वस्वदेशं ययुर्नत्वा भक्तास्तं च गुरुं विदुः ॥४६॥ सकलनिगमधर्मशास्त्रसारं समुपदिशन् विशदं सुनिश्चितं सः । हरिरखिलसतीर्थ्यशोकमीशः क्षितिप ! हरन्नभिधां चकार सार्थाम् ॥४७॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे नारायणमुनि-मुकुन्दानन्दादिसंवादे श्रद्धादिप्रशंसा-सच्छास्त्रोपदेशनिरूपणनामा द्वितीयोऽध्यायः ॥२॥

सुव्रत उवाच-**ततः शिष्यैरनुगतः कतिभिश्चित्स भूपते ! । धर्मप्रवृत्त्येकमना धीरजित्पुरमभ्यगात् ॥१॥ भक्तैः स बहुभिर्मार्गे पूज्यमानोऽतिभावतः । भाण्डीरपुरमागत्य मणिभद्रपुरं ययौ ॥२॥ ग्रामं पिप्पलसंज्ञं च ततोऽगतरयाभिधम्। कालवाणीं ततः प्रायाद्भक्तानानन्दयन्निजान् ॥३॥ क्वचिदेकं दिनं द्वे वा क्वचित्त्रीणि वसन् स च । बोधयित्वा निजान्भक्तान्स्वस्वधर्मेष्ववतिष्ठिपत् ॥४॥ आज्ञया स्वगुरोरेव यानमारोहति स्म सः । दधौ क्वचिदलङ्कारान्नूतनान्यंशुकानि च ॥५॥ धर्माध्वनि स्थापयितुं योषितो भाषते स्म च । तथापि क्वापि नासक्तः स बभूवात्मशक्तितः ॥६॥ स्थापनायैव धर्मस्य विचरन्स धरापते ! । प्रायात्समुद्रतीरस्थं मकरालयपत्तनम् ॥७॥ उपकण्ठे तत्र सिन्धोर्नातिदूरे पुराद्बहिः। वटचिञ्चाद्रुमच्छाये स्थाने स्वावासमाचरत् ॥८॥ मुमुक्षवः पुरे तत्र तद्दर्शनमहामुदः । धनिनो वणिजस्तस्य भक्ताः सेवामकुर्वत ॥९॥ गोवर्धनस्तेषु मुख्यस्तथा दामोदराह्वयः । रामचन्द्रः सूरचन्द्रो वणिजो रत्नजिन्मुखाः ॥१०॥**

---

સુવ્રત મુનિ પ્રતાપસિંહ રાજાને કહે છે : હે રાજન્, શ્રી નારાયણ મુનિએ આ પ્રમાણે સારી રીતે ઉપદેશ આપેલા તે સમગ્ર ભક્તજનો શોકથી રહિત થઈને નારાયણ મુનિને નમસ્કાર કરીને, પોતપોતાના દેશમાં ગયા અને શ્રીહરિની સાથે રહેનારા મુકુંદાનંદ વગેરે સર્વે શિષ્યો, તે પણ શ્રીહરિને પોતાના ગુરુ માનતા હતા. (૪૬)

હે રાજન્ ! પરમેશ્વર શ્રીહરિ અતિ શુદ્ધ સારી રીતે નિશ્ચય કરેલો સમગ્ર વેદ-ધર્મશાસ્ત્રના સારનો ઉપદેશ આપતા સમગ્ર મુકુંદાનંદાદિના શોકને હરણ કરતા **'હરિ'** આ પ્રકારની પોતાના નામની સાર્થકતા કરતા હતા. (૪૭)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે નારાયણમુનિ- મુકુંદાનંદાદિસંવાદે શ્રદ્ધાદિપ્રશંસા સત્શાસ્ત્રોપદેશ નિરૂપણનામા દ્વિતીયોऽધ્યાયઃ (૨)*

## અધ્યાય : ૩ - વિષ્ણુસ્વરૂપનો આવિષ્કાર.

**માંગરોળ પુરમાં શ્રીહરિનું આગમન :-** સુવ્રત મુનિ કહે છે : હે રાજન્ ! ફણેણી ગામથી કેટલાક શિષ્યો સાથે ધર્મની પ્રવૃત્તિમાં એકમનવાળા શ્રીહરિ ધોરાજીમાં ગયા. (૧) ધોરાજીથી નીકળીને માર્ગમાં ઘણા ભક્તોએ અતિ પ્રેમપૂર્વક પૂજાયેલા શ્રીહરિ ભાડેરપુરમાં ગયા. ત્યાંથી માણાવદર નગરમાં ગયા. (૨) ત્યાંથી પોતાના ભક્તોને આનંદ આપતા શ્રીહરિ પીપલાણા ગામમાં ગયા, ત્યાંથી અગત્રાઈ ગામ ગયા, ત્યાંથી કાલવાણી ગયા. (૩)

કોઈ ગામમાં એક દિવસ, કોઈ ગામમાં બે દિવસ, કોઈ ગામમાં ત્રણ દિવસ રહેતા શ્રીહરિ પોતાના ભક્તોને (સત્શાસ્ત્રનાં વાક્યોથી ધર્મમાર્ગમાં સ્થિતિ કરવાના મહિમાનો) ઉપદેશ આપીને પોત-પોતાના ધર્મોમાં સ્થિતિ કરાવતા હતા. (૪) શ્રીહરિ પોતાના ગુરુ શ્રીરામાનંદ સ્વામીની આજ્ઞાથી જ રથ, ઘોડા વગેરે વાહનોમાં બેસતા હતા. ક્યારેક કડાં, બાજુબંધ વગેરે અલંકારો તથા નવીન મહાવસ્ત્રો ધારણ કરતા હતા. (૫) શ્રી હરિ સ્ત્રીઓને પોતપોતાના ધર્મમાર્ગમાં સ્થાપન કરવા માટે તેમની સાથે બોલતા હતા તોપણ પોતાના અતિ સામર્થ્યથી કોઈ પણ વસ્તુમાં આસક્ત થતા ન હતા. (૬)

હે નૃપ ! ધર્મના સ્થાપન માટે જ ફરતા શ્રીહરિ સમુદ્રની સમીપે માંગરોલપુરમાં ગયા. (પોષ સુદી પૂર્ણિમાને દિવસે ગયા એમ જાણવું. આગળ ખટ્વાંગ રાજાએ અભય રાજાને તેવું કહેલું છે) (૭) ત્યાં સમુદ્ર સમીપ પ્રદેશમાં નગરથી બહુ દૂર નહિ અર્થાત્ ગામથી બહાર વડ, આમલીઓનાં વૃક્ષોની છાયાવાળા સ્થાનમાં શ્રીહરિએ પોતાનો નિવાસ કર્યો. (૮) પુરમાં શ્રીહરિનાં દર્શનથી મહાઆનંદિત મુમુક્ષુ ભક્ત ધનવાન વાણિયાઓ શ્રીહરિની સેવા કરવા લાગ્યા. (૯) તે વણિક ભક્તોમાં મુખ્ય ગોવર્ધનભાઈ તથા દામોદર, રામચંદ્ર, સૂરચંદ્ર, રતનજી તથા મૂલચંદ્ર વગેરે ભક્તો સેવા કરતા હતા. (૧૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

क्षत्रं च मानसारामः शूद्राश्च धनजिन्मधुः । आनन्दजित्त्रिक्रमाद्यास्तमसेवन्त भक्तितः ॥११॥ राजनीभानुमुख्याश्च योषितः शुद्धचेतसः । यथोचितं विदधिरे परिचर्यां हरेर्नृप ! ॥१२॥ महतीं खनयामास मिष्टोदां तत्र वापिकाम् । तत्प्रतिष्ठाविधिं चक्रे ततः शास्त्रानुसारतः ॥१३॥ पूर्तकर्मविधौ तस्मिन्सनरेशाः पुरौकसः । चित्रं यथाऽऽपुः स तथा महोत्सवमकारयत् ॥१४॥ ब्राह्मणांस्तर्पयामास सद्भिर्भोज्यैः सहस्रशः । हविर्भिर्वह्निवदनान्देवांश्चेन्द्रपुरोगमान् ॥१५॥ वर्णिस्वामी यदा तत्र विष्णुं पूजयितुं स्वयम् । न्यषीददासने तर्हि बभूवाद्भुतमीदृशम् ॥१६॥ मयरामादयो विप्राः कुर्वन्तं देवतार्चनम् । तमीक्षमाणा ददृशुः सद्य एव चतुर्भुजम् ॥१७॥ गदाब्जशङ्खचक्राढ्यं किरीटेन विराजितम् । पीताम्बरं घनश्यामं श्रीवत्साङ्कितवक्षसम् ॥१८॥ वामे भगवतस्तस्य श्वेताङ्गं ददृशुर्वृषम् । चतुर्वक्त्रं चतुष्पादमष्टनेत्रं चतुर्भुजम् ॥१९॥ बद्धाञ्जलिपुटं द्वाभ्यां दोर्भ्यामेकेन बिभ्रतम् । पूजाद्रव्याणि हस्तेन धर्मशास्त्रं परेण च ॥२०॥ वसानं वाससी श्वेते नानालङ्कारभूषितम् । सद्रत्नसारमुकुटमतिशान्ताकृतिं नृप ! ॥२१॥ विष्णोर्दक्षिणभागेऽथ द्विभुजां ददृशुश्च ते । वासोभूषणशोभाढ्यां भक्तिं गौरतनुं स्थिताम् ॥२२॥ पूजोपचारैर्विविधैर्भृतं कनकपात्रकम् । बिभ्रतीं पाणिनैकेन परेण कुसुमस्रजम् ॥२३॥ भक्तिधर्मयुतं विष्णुमित्थं ते ददृशुर्नृप ! । इच्छयैव हरेस्तस्य दधतो नरनाटनम् ॥२४॥ मुहूर्तमेवं ते सर्वे विप्रा वीक्ष्य सविस्मयाः । तमेव मेनिरे विष्णुं स्वेच्छया मानुषाकृतिम् ॥२५॥ मुहूर्तान्ते यथापूर्वं दृष्ट्वा तं च प्रणम्य ते । पौर्तं विधिं समाप्यास्य चक्रुः

---

ક્ષત્રિય ભક્ત માનસારામ, તથા ધનજી, મધુ, આનંદજી, ત્રિકમ વગેરે શૂદ્ર ભક્તો પણ શ્રીહરિની અત્યંત પ્રેમથી સેવા કરતા હતા. (૧૧) હે રાજન્ ! શુદ્ધ અન્તઃકરણવાળાં રાજની-ભાનુ તથા કેસરા વગેરે સ્ત્રીઓ યથાયોગ્ય શ્રીહરિકૃષ્ણ ભગવાનની સેવા કરતી હતી. (૧૨)

**વાવનો પૂર્ત કર્મવિધિ મહોત્સવ :-** શ્રીહરિ પોતાના નિવાસની સમીપમાં મધુર જળવાળી મોટી વાવ્ય ખોદાવતા હતા, ત્યાર પછી શાસ્ત્રમાં કહેલા વિધિ અનુસારે તેની પ્રતિષ્ઠાવિધિ કરતા હતા. (૧૩) શ્રીહરિ, પૂર્તકર્મની વિધિમાં તે પુરના રાજાએ સહિત પુરનાં નિવાસીજનો આશ્ચર્ય પામ્યાં તેવો મહોત્સવ કરાવતા હતા. (૧૪) શ્રીહરિ સુંદર જમવા યોગ્ય લાડુ, શીરો વગેરે ભોજનોથી હજારો બ્રાહ્મણોને તૃપ્તિ પમાડતા હતા અને ઘી, દૂધપાક વગેરે હુતદ્રવ્યોથી અગ્નિમુખવાળા ઈન્દ્રાદિ દેવોને તૃપ્ત કરતા હતા. (૧૫) વર્ણીન્દ્ર શ્રીનારાયણ મુનિ જ્યારે પૂર્તવિધિમાં વિષ્ણુને પૂજવા માટે પાટલા ઉપર પોતે બેઠા ત્યારે આગળ કહેશે તેવું આશ્ચર્ય થયું (૧૬)

**પૂજન કરતા શ્રીહરિનું વિષ્ણુરૂપે દર્શન :-** મયારામ વગેરે બ્રાહ્મણો સ્થાપન કરાયેલા વિષ્ણુપૂજન કરતા શ્રીહરિને જોતા હતા તે સમયે તત્કાળ શ્રીહરિને જ ચાર ભુજાવાળા વિષ્ણુરૂપે જોતા હતા. (૧૭) ગદા, કમળ, શંખ અને સુદર્શનચક્રે સહિત મુગટથી શોભાયમાન પીતાંબર જેમણે ધારણ કર્યું છે; નવીન મેઘની માફક શ્યામ વર્ણવાળા શ્રી વત્સના ચિહ્નથી યુક્ત વક્ષઃસ્થળવાળા એવા શ્રીહરિને જોતા હતા. (૧૮) તે વિષ્ણુ રૂપવાળા શ્રીહરિકૃષ્ણ ભગવાનના ડાબા ભાગમાં શ્વેત અંગવાળા સાક્ષાત્ ધર્મદેવને બ્રાહ્મણો જોતા હતા; ચાર મુખવાળા, ચાર પાદવાળા, આઠ નેત્રવાળા, ચાર હાથવાળા, બે હાથથી હાથ જોડેલા, પૂજાની સામગ્રી એક હાથમાં ધારણ કરતા અને બીજા હાથથી ધર્મશાસ્ત્ર ધારણ કરતા જોતા હતા. (૧૯-૨૦) હે રાજન્ ! શ્વેત વસ્ત્રોને ધારણ કરનાર, વિવિધ પ્રકારનાં અલંકારોથી સમલંકૃત, શ્રેષ્ઠ મણીન્દ્રોથી જડેલા મુગટધારી, અતિશાંત આકૃતિવાળા ધર્મદેવને જોતા હતા. (૨૧) ત્યાર પછી તે બ્રાહ્મણો વિષ્ણુરૂપે જોવાયેલા શ્રીહરિકૃષ્ણભગવાનના જમણા ભાગમાં રહેલાં બે ભુજાવાળાં સુંદર વસ્ત્રો તથા ભૂષણોથી અત્યંત શોભતાં, ગૌર શરીરવાળાં ધર્મનાં પત્ની શ્રી ભક્તિદેવીને નાના પ્રકારના પૂજાના ઉપચારોથી ભરેલું સોનાનું પાત્ર ડાબા હાથથી ધારણ કરતાં અને જમણા હાથથી પુષ્પની માળા ધારણ કરતા જોતા હતા. (૨૨-૨૩)

હે રાજન્ ! આ પ્રમાણે મનુષ્યનાટ્યધારી શ્રીહરિની ઈચ્છાથી જ બ્રાહ્મણો ભક્તિ અને ધર્મે સહિત વિષ્ણુને જોતા હતા. (૨૪) મયારામ વગેરે બ્રાહ્મણો આ પ્રમાણે બે ઘડી સુધી જોઈને અત્યંત આશ્ચર્ય પામેલા સતા પોતાની ઈચ્છાથી મનુષ્યાકૃતિવાળા શ્રીહરિને જ વિષ્ણુ માનતા હતા. ( આ શ્રીહરિ જ સાક્ષાત્ વિષ્ણુ છે એમ જાણતા હતા.) (૨૫) તે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुदृढमाश्रयम् ॥२६॥ चक्रुश्च महतीं पूजां तस्य वेदोक्तवर्त्मना। वेदघोषं प्रकुर्वन्तो ब्राह्मणा दृढनिश्चयाः ॥२७॥ तमाश्रित्य तदाज्ञायां स्थित्वान्योपासनं द्रुतम् । विहाय सर्वभावेन तमेवैकमुपासत ॥२८॥ स्वरूपमित्थं कृपया द्विजेभ्यः सोऽ दीदृशत्स्वेश्वरतावबुद्ध्यै । उवास तत्र प्रथयन्प्रतापं पुरे स्वकीयं हरिरावसन्तात् ॥२९॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे विष्णुस्वरूपाविष्कारनामा तृतीयोऽध्यायः ॥३॥

सुव्रत उवाच-आसीत्तस्मिन्पुरेऽथैको मेघजित्संज्ञको वणिक् । प्राचीनोऽस्य सतीर्थ्यो वै हरेः सिद्धाभिमानवान्॥१॥ प्राप्तः समाधौ स्वातन्त्र्यं जह्यात्स्वां तनुमिच्छया । इच्छया भगवद्धाम गच्छेद्वा पुनराव्रजेत् ॥२॥ अन्तर्हिते तूद्धवेऽसौ स्वात्मानं सर्वतोऽधिकम् । मन्यमानो मुकुन्दादीनवमेने प्रभुं च तम् ॥३॥ कृष्णभक्तांस्त्यागिजनांस्तिरस्कुर्वन्तमेकदा । सद्भिर्विवदमानं च स्वामी प्राह सदःस्थितः ॥४॥ कथं सतोऽ वजानासि माननीयान्सुरैरपि । जानामि तव सामर्थ्यं करिष्ये निर्मदं क्षणात् ॥५॥ स्वसुखेच्छा यदि भवेदाज्ञायां तर्हि तिष्ठ मे । नो चेत्समाधौ स्वातन्त्र्यं तवाद्यैव गमिष्यति ॥६॥ स उवाच तदा वर्णिन्नधुनातन एव हि । त्वं किं कर्तासि मे रामानन्दशिष्योऽस्मि निर्भयः ॥७॥ आज्ञायां मम वर्तध्वं यूयं ज्येष्ठस्य सर्वशः । स्वाज्ञायां मामपि कथं वर्तयन्नैव लज्जसे ॥८॥ सामर्थ्यं दर्शयेऽद्यैव मम तुभ्यं विलोकय । इत्युक्त्वा

---

બ્રાહ્મણો બે ઘડી પછી શ્રીહરિને પૂર્વની માફક વિષ્ણુનું પૂજન કરતા જોઈને પ્રણામ કરી પૂર્તકર્મવિધિ સમાપ્ત કરાવીને શ્રીહરિનો અતિ દૃઢ આશ્રય કરતા હતા. (૨૬) શ્રીહરિના સ્વરૂપમાં દૃઢ નિશ્ચયવાળા મયારામ ભટ્ટ વગેરે બ્રાહ્મણો વેદ મંત્રના ધ્વનિ કરતા થકા શ્રીહરિની મહાપૂજા કરતા હતા. (૨૭) બ્રાહ્મણો શ્રીહરિનો આશ્રય કરી શ્રીહરિની આજ્ઞામાં રહીને તત્કાળ બીજા દેવતાની ઉપાસનાનો ત્યાગ કરીને એક શ્રીહરિની જ શરીર વાણી અને મનથી ઉપાસના કરતા હતા. (૨૮)

હે રાજન્, શ્રીહરિ પોતાના આશ્રિતોને પોતાનું સર્વકારણરૂપ પરમૈશ્વર્યભાવ બોધ કરવા માટે પરમ કૃપાથી મયારામ આદિ બ્રાહ્મણોને પોતાનું વિષ્ણુસ્વરૂપ બતાવતા હતા. આવી રીતે ઐશ્વર્યનો પ્રભાવ વિસ્તારતા માંગરોળ પુરમાં વસંત ઋતુ સુધી નિવાસ કરતા હતા. (૨૯) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે વિષ્ણુસ્વરૂપાવિષ્કારનામા તૃતીયોઽધ્યાયઃ (૩)*

## અધ્યાય : ૪ - સમાધિનિષ્ઠ મેઘજીતનો પરાજય.

**મેઘજીત વણિકનું માનભંગ :-** સુવ્રત મુનિ કહે છે, હે રાજન્ ! પછી તે માંગરોળ પુરમાં શ્રીહરિનો જૂનો ગુરુભાઈ (શ્રી રામાનંદ સ્વામીનો શિષ્ય) સિદ્ધપણાના અભિમાનવાળો એક મેઘજીત નામનો વણિક હતો. (૧) તે જેમ પોતાની ઈચ્છાથી પોતાના દેહનો ત્યાગ કરે અને સ્વેચ્છાથી ભગવાનના ધામમાં જાય અને પાછો આવે તેવા પ્રકારની સમાધિમાં શ્રી રામાનંદ સ્વામીની કૃપાથી સ્વતંત્રપણાને પામ્યો હતો. (૨)

આ મેઘજીત તો શ્રી રામાનંદ મુનિ અન્તર્ધાન થયા પછી પોતાને શ્રી રામાનંદ સ્વામીના શિષ્યોથી શ્રેષ્ઠ માનીને મુકુંદાનંદવર્ણી વગેરે અને સાક્ષાત્ શ્રીહરિકૃષ્ણ ભગવાનની પણ અવજ્ઞા (તિરસ્કાર) કરતો હતો. (૩) એક સમયે સભામાં બેઠેલા શ્રીહરિએ શ્રીકૃષ્ણના ભક્ત એવા ત્યાગી જે મુકુંદાનંદ-મુક્તાનંદ વગેરેનો તિરસ્કાર કરતા અને સાધુજનોની સાથે બ્રહ્મવિદ્યા સંબંધી વિવાદ કરતા મેઘજીતને કહ્યું. (૪) અરે મેઘજીત ! દેવોના પણ પૂજનીય સાધુઓનો કેમ તિરસ્કાર કરો છો ? તમારું સામર્થ્ય હું જાણું છું. ક્ષણમાત્રમાં જ અભિમાને રહિત કરીશ. (૫) જો પોતાના સુખની ઈચ્છા હોય તો મારી આજ્ઞામાં રહો. એમ નહિ કરો તો તમારી સમાધિમાં જે સ્વતંત્રપણું છે તે હાલમાં જ નાશ પામશે. (૬)

હે રાજન્ ! તે વખતે મેઘજીત વણિક શ્રીહરિ પ્રત્યે બોલ્યો, હે વર્ણિન્ ! તમો તો આજકાલના છો માટે મને શું કરનારા છો ? હું તો ભય રહિત, શ્રી રામાનંદ મુનિનો પરમ કૃપાપાત્ર શિષ્ય-મહાસિદ્ધ છું. (૭) તમો સર્વે વય અને ગુણો વગેરેથી તમારાથી શ્રેષ્ઠ એવા મારી આજ્ઞામાં રહો. તમોને વયોવૃદ્ધ-તપોવૃદ્ધ અને જ્ઞાનવૃદ્ધ એવા મને પોતાની આજ્ઞામાં વર્તાવવા ઈચ્છતાં કેમ લજ્જા આવતી નથી ? (૮) હાલમાં મારું સામર્થ્ય તમોને બતાવું છું. તે તમો જુઓ. આ પ્રમાણે કહીને તપેલા

तप्ततैले स्वौ कटाहे न्यक्षिपत्करौ ॥९॥ करौ फुल्लत्वचौ दग्धौ तथापि स न विव्यथे । वादं कुर्वन्नपि वणिक् देहस्यात्यन्तविस्मृतेः ॥१०॥ आश्चर्यमेतद्दृष्ट्वैव पौरास्तं सिद्धपूरुषम् । मेनिरे स उवाचाथ सर्वेषां शृण्वतां वचः ॥११॥ इतश्चतुर्थे दिवसे चतुर्थे क्षण एव च । सद्यः कलेवरं स्वीयं हास्याम्यत्र न संशयः ॥१२॥ स्वामी तमाह यद्येवं त्वया स्यात्तर्हि ते वयम् । शिष्या भवेम सर्वेऽपि शिष्यो मे स्यास्त्वमन्यथा ॥१३॥ देहस्य च हरेर्धाम्नो मध्ये त्वां तु त्रिशङ्कुवत् । स्थापयिष्ये न सन्देहो यतस्व त्वं यथाबलम् ॥१४॥ तदा स प्राह मे वश्याः सिद्धयोऽप्यणिमादयः । भवन्तीति न सामर्थ्यं मयि ते प्रचरिष्यति ॥१५॥ इत्युक्त्वा स गृहं गत्वा जिहासुर्देहमात्मनः । ददौ दानानि बहुधा ब्राह्मणेभ्यः सहस्रशः ॥१६॥ पक्वान्नानि च भूरीणि विधाप्य ब्राह्मणान्स च । साधून्सहस्रशश्चान्यान्भोजयामास तद्दिनात् ॥१७॥ जीवान् यवनचण्डालपर्यन्तं समभोजयत् । नीलकण्ठाश्रितान्साधून्वर्जयित्वैव मत्सरात् ॥१८॥ कृत्वा त्रीणि दिनानीत्थं चतुर्थेऽपि दिने प्रगे । बहुशो भोजयामास साधून्विप्रांश्च सत्वरम् ॥१९॥ अह्नो मुहूर्ते तुर्येऽथ बध्वा पद्मासनं वणिक् । समाधिमकरोत्तं च द्रष्टुं पौरा उपाययुः ॥२०॥ सर्वाङ्गेभ्यः समाकृष्य प्राणवायुं हृदम्बरे । वाहयामास विच्छिन्ननाडीबन्धः स्थिरेक्षणः ॥२१॥ ऊर्ध्वं नेतुं हृदः प्राणान्ब्रह्मरन्ध्रं विभिद्य च । गन्तुं तु नैव शेकेऽसौ यतमानो भृशं बलात् ॥२२॥ बहुवेलं च बहुधा कृते यत्नेऽप्यसून्निजान् । नोर्ध्वं न चाप्यधो नेतुं स शशाक कथञ्चन ॥२३॥ अष्टभिः स्ववशाभिश्च सिद्धिभिः सोऽणिमादिभिः। अपि सञ्चालनेऽसूनां न क्षमोऽभून्नराधिप! ॥२४॥ नभोलम्बदधःशीर्षत्रिशङ्कुनृपतेर्दशाम् । प्राप्तो निश्चेष्ट

---

તેલવાળા કઢાયામાં પોતાના બંને હાથ નાખ્યા. (૯) કઢાયામાં નાખેલા બંને હાથ દાઝી ગયા, ફોલ્લા પડ્યા. તોપણ પોતાના શરીરની અત્યંત વિસ્મૃતિથી શ્રીહરિ સાથે વાદ કરતો હોવા છતાં તે વણિક તેની પીડા જાણી શક્યો નહિ. (૧૦)

પુરનાં જનો આ આશ્ચર્ય જોઈને જ તેને સિદ્ધ પુરુષ જાણતાં હતાં. પછી તે મેઘજીત સર્વ પુરનાં જનોને સાંભળતા વચન બોલ્યો, (૧૧) આ દિવસથી ચોથા દિવસે ચોથા ક્ષણમાં (મુહૂર્તમાં) મારું આ શરીર તત્કાળ જ ત્યાગ કરીશ : આ મારા વચનમાં સંશય કરવો નહિ. (૧૨) ત્યારે સમગ્ર ઐશ્વર્યના સમુદ્ર શ્રીહરિએ મેઘજીતને કહ્યું, જો તમો આ પ્રમાણે સ્વતંત્રતાથી દેહત્યાગ કરશો તો અમો સર્વે તમારા શિષ્યો થઈશું. જો સ્વતંત્રતાથી દેહનો ત્યાગ નહિ કરો તો તમે મારા શિષ્ય થાઓ. (૧૩) અરે વણિક ! તમારા શરીર અને શ્રીહરિના ધામની વચ્ચે તમને તો ત્રિશંકુ નામના રાજાની માફક રાખીશ એમાં તમોએ સંશય કરવો નહિ. તમે પોતાની શક્તિ પ્રમાણે બળ કરો. (૧૪)

હે રાજન્, તે સમયે મેઘજીત કહેવા લાગ્યો : હે વર્ણી ! અણિમા વગેરે સિદ્ધિઓ પણ મારે વશ વર્તે છે. માટે તમારું સામર્થ્ય મારામાં ચાલશે નહિ. આ પ્રકારે કહીને પોતાને ઘેર જઈને પોતાનું શરીર ત્યાગ કરવા ઈચ્છતો હજારો બ્રાહ્મણોને ઘણા પ્રકારનાં દાન આપવા લાગ્યો. (૧૫-૧૬) તે મેઘજીત જલેબી, મોતિયા લાડુ વગેરે પકવાનો કરાવીને હજારો બ્રાહ્મણોને તથા શ્રીહરિના આશ્રિત સાધુઓનો ત્યાગ કરી બીજા સાધુઓને દેહત્યાગની પ્રતિજ્ઞાના દિવસથી જમાડતો હતો. (૧૭) શ્રીહરિનો ઉત્કર્ષ નહિ સહન કરવાથી શ્રીહરિના આશ્રિત સાધુઓનો ત્યાગ કરીને જ મુસલમાન તથા ભંગી વગેરે સર્વ દેહધારીઓને સારી રીતે ભોજન કરાવતો હતો. (૧૮)

આ પ્રમાણે ત્રણ દિવસ સુધી કરીને પોતાના દેહત્યાગ કરવાને ચોથે દિવસે પણ પ્રાતઃકાળમાં ઘણા સાધુ તથા બ્રાહ્મણોને તત્કાળ ભોજન કરાવતો હતો. (૧૯) ભોજન કરાવ્યા પછી મેઘજીત તે દિવસે ચોથા મુહૂર્તમાં પદ્માસન કરીને સમાધિ કરતો હતો. પુરનાં જનો સમાધિમાં બેઠેલા મેઘજીતને જોવા માટે આવવા લાગ્યાં. (૨૦) મેઘજીતે પ્રાણવાયુને હાથ-પગ વગેરે પોતાનાં સર્વ અંગોથી સારી રીતે આકર્ષણ કરીને નાડીઓના બંધો તોડી નાખ્યા અને પછી સ્થિર નેત્રોવાળો થઈને મેઘજીત પોતાના હૃદયાકાશમાં પ્રાણવાયુને ચલાવવા લાગ્યો. (૨૧)

મેઘજીત પોતાના સામર્થ્યનું અવલંબન કરીને અત્યંત પ્રયત્ન કરતો હતો પણ પોતાના હૃદયાકાશથી પ્રાણોને ઊંચે લઈ જવા માટે અને બ્રહ્મરંધ્ર ભેદીને ભગવાનના ધામમાં જવા માટે શક્તિમાન થયો નહિ. (૨૨) મેઘજીતે ઘણા સમય સુધી ઘણા પ્રકારે પ્રયત્ન કર્યો તો પણ પોતાના પ્રાણોને ઊંચે લઈ જવા માટે શક્તિમાન થયો નહિ તેમ જ નીચે લાવવા માટે પણ શક્તિમાન થયો નહિ. (૨૩) તે મેઘજીત પોતાને વશ વર્તતી અણિમાદિ આઠ સિદ્ધિઓથી પોતાના પ્રાણોને ઉપર અને નીચેની નાડીઓમાં ચલાયમાન કરવા માટે સમર્થ ના થયો. (૨૪) આ વણિક આકાશમાં નીચે લટકતા મસ્તકવાળા ત્રિશંકુ

एवासावेकस्मिन्न्यपतत्स्थले ॥२५॥ हतप्रतिज्ञं तं चातिव्याकुलं सिद्धमानिनम् । प्राहुः पौरा द्वितीयेऽह्नि विप्राश्च वणिजोऽपि च ॥२६॥ वर्णिराजस्य च सतामपमानस्त्वया कृतः । न पूर्णा ते प्रतिज्ञाऽतः प्राप्तोऽस्येतां त्वमापदम् ॥२७॥ तस्मात्तं मानयाऽऽशु त्वं स तु युक्तं करिष्यति । त्याजयिष्यति देहं वा भवन्तं जीवयिष्यति ॥२८॥ इति नागरिकैः प्रोक्तां वाचं स स्वहितामपि । प्राप्तोऽपि तादृशं कष्टं न मेने माननष्टधीः ॥२९॥ निश्चेष्ट इत्थं पतितः स आसीद्दिनपञ्चकम् । ततो गलितमानोऽभूत्तं हृदा शरणं ययौ ॥३०॥ अस्फुटाक्षरया वाचा संज्ञया चान्तिकस्थितान् । नरान्स प्राह वर्णीन्द्रमिहानयत मा चिरम् ॥३१॥ जनैः सम्प्रार्थ्यमानोऽथ नीलकण्ठः कृपानिधिः । सद्भिः सहैव तत्रैत्य तद्दृष्टिं स्वदृशैक्षत ॥३२॥ यथास्थानगतप्राणनाडिः सद्योऽभवत्तदा । स्वस्थ उत्थाय स स्वेशं ज्ञात्वा कृष्णं तमानमत्॥३३॥ प्राह चाद्यदिनात् स्वामिंस्त्वद्दासोऽस्मि कृपां कुरु। क्षान्त्वा ममापराधांस्त्वमाज्ञापयितुमर्हसि ॥३४॥ स ऊचे मेघजिद्भक्त! त्वया देहो न साम्प्रतम्। त्यक्तव्यो भगवद्वार्ताः कुर्वन् जीव सुखं भुवि ॥३५॥ इत्युक्त्वा भगवांस्तेन सह स्वावासमाययौ। ततोऽतिविस्मयं प्रापुः सर्वेऽपि पुरवासिनः ॥३६॥ निशाम्याश्चर्यं तन्नगरमनुजा ऐशमतुलं हरेस्तस्मिन्नापुर्जगदधिपसम्भ्रान्तिमनिशम् । ततस्तेषामेके तदुपसदनायोत्सुकहृदो बभूवुः केचित्तं प्रभुरिति परीक्ष्योपससृपुः ॥३७॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे स्वतन्त्रसमाधिनिष्ठमेघजित्पराजयनामा चतुर्थोऽध्यायः ॥४॥

રાજાની દશાને પામેલો ચેષ્ટાએ રહિત જ એક સ્થાનમાં પડ્યો રહ્યો. (૨૫)

બીજે દિવસે પુરના માણસો, બ્રાહ્મણો અને વણિકો પણ તેની સમીપમાં આવીને નષ્ટ પ્રતિજ્ઞાવાળા પોતાના પ્રાણોને ઊંચે તેમ જ નીચે લાવવા માટે દુઃખી-અંતઃકરણવાળા સિદ્ધના અભિમાનવાળા મેઘજીતને કહેવા લાગ્યા : (૨૬) હે મેઘજીત! તમોએ વર્ણીન્દ્ર શ્રીહરિ અને તેમના સાધુઓનું અપમાન કરેલું છે. માટે તમારી પ્રતિજ્ઞા સંપૂર્ણ થઈ નહિ અને આ (અનુભવ કરાતી) આપત્તિને પામેલા છો. (૨૭) માટે તમો તત્કાળ શ્રીહરિનો સત્કાર કરો. તે શ્રીહરિ તમારો દેહત્યાગ કરાવશે અથવા જીવાડશે. આ પ્રમાણે જે યોગ્ય હશે તેજ કરશે. (૨૮)

આ પ્રમાણે પુરનાં જનો, બ્રાહ્મણો તથા વણિકોએ કહેલી વાણી પોતાને હિત કરનારી હોવા છતાં પણ માનથી નષ્ટ બુદ્ધિવાળા હોવાથી તેવા દુઃખને પામેલો છે તોપણ તેણે માની નહિ. (૨૯) આવી રીતે તે મેઘજીત ચેષ્ટાએ રહિત પાંચ દિવસ સુધી પડ્યો રહ્યો. ત્યાર પછી સિદ્ધપણાનું અભિમાન જેનું નાશ પામ્યું છે એવો મેઘજીત પોતાના મનથી શ્રીહરિને શરણે ગયો. (૩૦) તે વણિક પોતાની સમીપમાં બેઠેલા પુરુષોને અસ્પષ્ટ વાણીથી અને ભ્રૃકુટિ વગેરેની સૂચનાથી શ્રીહરિને મારી સમીપમાં લાવો, વાર લગાડશો નહિ : આ પ્રમાણે કહેવા લાગ્યો. (૩૧)

પછી પ્રેરણા કરેલા મનુષ્યોએ સારી રીતે પ્રાર્થના કરાયેલા ( હે શ્રીહરે ! તમો કારણ વિના કરુણાવાળા છો. મેઘજીતનો અપરાધ નહિ ગણીને ત્યાં આવીને સુખી કરો એવી પ્રાર્થના કરાયેલા) શ્રીહરિકૃષ્ણ ભગવાન મુક્તાનંદાદિ સાધુઓની સાથે જ મેઘજીતની સમીપે આવીને મેઘજીતની દૃષ્ટિ સામે પોતાની દૃષ્ટિથી જોતા હતા. (૩૨) મેઘજીત તે સમયે તત્કાળ જ પોતપોતાના સ્થાનમાં પ્રાપ્ત થયેલા પ્રાણોવાળી નાડીઓ જેને છે એવો થયો - જેમ પહેલાં હતો તેવો થયો. તત્કાળ ઊઠીને શ્રીહરિને પોતાના ઈષ્ટદેવ શ્રીવાસુદેવ જાણીને પ્રણામ કરતો હતો. (૩૩) તે વણિક વિનયથી કહેવા લાગ્યો : હે સ્વામિન્ ! આજથી હું તમારો સેવક છું. તમે દયા કરો. મારા અપરાધોને સહન કરીને આજ્ઞા કરવા માટે યોગ્ય છો. (૩૪)

આ પ્રમાણે કહેવાયેલા શ્રીહરિએ મેઘજીતને કહ્યું, હે ભક્ત ! તમોએ હાલમાં દેહનો ત્યાગ કરવો નહિ. પૃથ્વીમાં ભગવાનની વાર્તાઓ કરતા સતા સુખેથી જીવો. (૩૫) આ પ્રમાણે કહીને ભગવાન મેઘજીતની સાથે પોતાના નિવાસસ્થાનમાં પધાર્યા. પછી પુરવાસી સર્વ જનો અતિ વિસ્મય પામ્યાં. (૩૬)

હે રાજન્, માંગરોલપુરનાં જનો શ્રીહરિકૃષ્ણ ભગવાનનું આશ્ચર્યજનક, જેની ઉપમા ન આપી શકાય તેવું પૂર્વોક્ત ઐશ્વર્ય જોઈને શ્રીહરિમાં નિરંતર બ્રહ્માંડોની ઉત્પત્ત્યાદિ કરનાર સર્વેશ્વરની ભ્રાંતિવાળા થયા. પછી તેમનામાંથી કેટલાક શ્રીહરિનો સમાશ્રય કરવા માટે ઉત્સાહી મનવાળા થયા. કેટલાક માણસો શ્રીહરિને આ જ પરમેશ્વર છે આવી રીતે નિશ્ચય કરીને તેમના શરણને પામ્યા. (૩૭) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે સ્વતંત્રસમાધિનિષ્ઠમેઘજીતપરાજયનામા ચતુર્થોઽધ્યાયઃ (૪)*

सुव्रत उवाच-**वणिजः श्रावकास्तत्र समवेताः सहस्त्रशः । तदाश्रयं कर्तुकामास्तं प्रणम्यैवमूचिरे ॥१॥ अस्मत्तीर्थंकरान्द्रष्टुमिच्छामो वर्णिराड्वयम् । स्थातुं ततस्त्वदाज्ञायां तत्पराः स्मो न संशयः ॥२॥ उपावेश्याथ तान्स्वामी कृपावीक्षणकारिते । समाधौ दर्शयामास तेभ्यस्तीर्थङ्करान्बहून् ॥३॥ विलीननाडीप्राणास्ते बहिः काष्ठवदासत । तीर्थङ्करांस्तु हृदये ददृशुः श्रुतलक्षणान् ॥४॥ इत्थं यामत्रयं तस्थुः समाधौ ते तु भूपते ! । ऋषभप्रमुखांस्तांश्च दृष्ट्वा मुमुदिरे भृशम् ॥५॥ उद्घोषोऽभून्महान् पुर्यां ते मृताः श्रावका इति । तदा सम्बन्धिनस्तेषां तत्राजग्मुस्त्वरान्विताः ॥६॥ मृतकानिव तान्वीक्ष्य निश्चेष्टान् पतितान्भुवि । रुदन्तः प्रार्थयामासुस्ते त्वमूञ्जीवयेति तम् ॥७॥ सद्य उत्थापयामास तदा तान्वीक्ष्यैव सः । तीर्थङ्करा दर्शिता नः स्वामिनेत्यूचुरुत्थिताः ॥८॥ ततो नारायणमुनिं विदित्वेश्वरमेव ते । समाश्रित्य दृढं भेजुर्देहदैहिकनिःस्पृहाः ॥९॥ आसंस्तस्मिन्पुरेऽन्ये च श्रीवल्लभकुलाश्रिताः । निम्बार्कीयाश्च माध्वाश्च श्रीमद्रामानुजाश्रिताः ॥१०॥ रामानन्दाश्रिताः केचिच्छङ्कराचार्यसंश्रिताः । सौराः शाक्ता गाणपत्याः शैवास्त्रैवर्णिकास्तथा ॥११॥ शूद्रा योषाश्च संन्यस्ता वर्णिनो वीतरागिणः । अतीताख्याश्च संहत्य तत्राजग्मुः सहस्त्रशः ॥१२॥ ते सर्वे वर्णिराजस्य क्रियां वीक्ष्यातिमानुषीम् । नत्वोचुरिष्टदेवान्नस्त्वं दर्शयितुमर्हसि ॥१३॥**

## અધ્યાય : ૫ - માંગરોળમાં સમાધિપ્રકરણ.

**સમાધિમાં ઈષ્ટ સ્વરૂપોનાં આશ્ચર્યદર્શન :-** સુવ્રત મુનિ બોલ્યા : હે રાજન્ ! માંગરોલનાં જનોમાં જૈન મતના હજારો શ્રાવક વાણિયાઓ શ્રીહરિનો આશ્રય કરવાની ઈચ્છાવાળા હતા તે ભેગા થઈ શ્રીહરિને પ્રણામ કરી આ પ્રમાણે કહેવા લાગ્યા : (૧) હે વર્ણીન્દ્ર ! અમો સર્વ શ્રાવકો અમારા તીર્થંકરોને જોવા માટે ઈચ્છીએ છીએ. પછી તમારી આજ્ઞામાં રહેવા માટે તત્પર છીએ એમાં સંશય નથી. (૨)

તેમનું વચન સાંભળીને શ્રીહરિએ તે વણિકોને ધ્યાનમાં બેસાડીને કૃપાદષ્ટિથી જોવા માત્રથી જ કરાવેલી સમાધિમાં તેમને ઋષભ વગેરે ચોવીસ તીર્થંકરો બતાવ્યા. (૩) સમાધિમાં અંતર્લીન છે નાડીમાં રહેલા પ્રાણો જેમના એવા તે બહાર ભાગમાં (શરીરથી) કાષ્ટની માફક બેઠા રહ્યા. પોતાના હૃદયકમળમાં તો શાસ્ત્રોમાં સાંભળેલા લક્ષણવાળા તીર્થંકરોને જોતા હતા. (૪) હે રાજન્ ! વાણિયાઓ આ પ્રમાણે સમાધિમાં ત્રણ પ્રહર (નવ કલાક) સુધી બેઠા. ઋષભ વગેરે તીર્થંકરોને જોઈને અત્યંત આનંદિત થયા. (૫)

શ્રી નીલકંઠનાં દર્શન માટે આવેલા શ્રાવકો (વાણિયાઓ) મરી ગયા : આ પ્રમાણે મહાઉદ્ઘોષ માંગરોલપુરમાં થયો, તે સમયે જેમને સમાધિ થઈ છે તેમનાં સંબંધીઓ (પિતા-ભાઈ વગેરે) એકદમ ત્યાં આવ્યા. (૬) સમાધિમાં રહેલા જનોનાં સંબંધીઓ, મરેલાં હોય ને શું ? એમ ચેષ્ટાએ રહિત પૃથ્વી ઉપર પડેલા સ્વજનોને જોઈ અત્યંત રુદન કરતા સતા હે હરે ! અમારાં સંબંધીઓને તમો જીવતાં કરો. આવી રીતે શ્રીહરિની પ્રાર્થના કરવા લાગ્યા. (૭) તે સમયે શ્રીહરિએ જોવા માત્રથી જ તે ક્ષણમાં જ તેમને સમાધિમાંથી જગાડ્યા. જાગૃત થયેલા તે વાણિયાઓ શ્રીહરિએ અમોને તીર્થંકરો બતાવ્યા આ પ્રમાણે બોલ્યા. (૮) પછી જેમણે તીર્થંકરો સમાધિમાં જોયા છે તે વાણિયાઓ નારાયણ મુનિને જ પરમેશ્વર જાણી દઢ પણે શ્રીહરિનો આશ્રય કરી દેહ અને દેહનાં સંબંધીઓમાં આસક્તિ રહિત થઈને શ્રીહરિનું ભજન કરવા લાગ્યા. (૯) તે પુરમાં બીજા શ્રી વલ્લભકુળના આશ્રિત તથા નિમ્બાદિત્ય સંપ્રદાયમાં રહેલા તથા મધ્વ સંપ્રદાયમાં રહેલા તથા શ્રીમદ્ રામાનુજાચાર્યના સંપ્રદાયમાં રહેલા તથા રામાનંદના આશ્રિત, કેટલાક શંકરાચાર્યના આશ્રિતજનો તથા સૂર્યના ઉપાસકો, શક્તિના ઉપાસકો, ગણપતિના ઉપાસકો તથા શિવના ઉપાસકો, એવા બ્રાહ્મણાદિ ત્રણ વર્ણમાં રહેલા વલ્લભાચાર્યાદિના આશ્રિતો પુરમાં હતા. (૧૦-૧૧) તેમજ શૂદ્રો તથા સ્ત્રીઓ, સંન્યાસીઓ, વર્ણીઓ, વૈરાગીઓ અને અતીતો હજારોહજાર તે પુરમાં પૂર્વોક્ત મતોના આશ્રિત હતા તે બધા ભેગા થઈને શ્રી નીલકંઠના સમીપમાં આવ્યા. (૧૨)

તે સર્વે મતવાદી જનો શ્રીહરિની મનુષ્યોમાં ન હોઈ શકે એવી યમ-નિયમાદિ સાધન વિના તત્કાળ સમાધિ કરાવવારૂપ ક્રિયા જોઈને નમસ્કાર કરી, હે સ્વામિન્ ! તમો અમારા ઈષ્ટદેવોને બતાવવા યોગ્ય છો : આ પ્રમાણે બોલ્યા. (૧૩) તે સમયે ધર્મસ્થાપનના ઉદ્યમવાળા સમગ્ર ઐશ્વર્યસંપન્ન શ્રીહરિ હસતા સતા તે સર્વેનું અભીષ્ટ પૂર્ણ કરતા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तदा स प्रहसन्स्वामी धर्मस्थापन उद्यतः । तदभीष्टं पूरयिष्यन्मनसेत्थमचिन्तयत् ॥१४॥ इष्टदेवान्दर्शयेयं हृद्येवैतेभ्य आत्मनः। योगैश्वर्येण चेदद्य तर्हि मां विद्युरीश्वरम् ॥१५॥ ततो ममाश्रयं कुर्युर्ज्ञात्वा सर्वात्मकं हि माम् । धर्माभासांश्च हित्वैते कुर्युर्मद्भक्तिमिष्टदाम् ॥१६॥ इत्थं विचार्य भगवान्कृपयैवाखिलानपि । उपावेश्यौजसा सद्यः समाधिं तानचीकरत् ॥१७॥ तस्य वीक्षणमात्रेण ते सङ्कुचितनाडिकाः । लीनप्राणाश्च ददृशुः स्वस्वदेवं निजान्तरे ॥१८॥ श्रीकृष्णं वल्लभीयाद्यास्त्रयो गोपीगणावृतम् । वृन्दावनस्थं ददृशुर्बाललीलामनोहरम् ॥१९॥ रामानुजपथस्थाश्च सुनन्दगरुडादिभिः । विष्वक्सेनेन चैक्षन्त लक्ष्मीनारायणं युतम् ॥२०॥ रामानन्दाश्रिता रामं सीतया लक्ष्मणेन च । युक्तं मारुतिनाऽपश्यन्दिव्यसिंहासनस्थितम् ॥२१॥ शङ्कराचार्यवर्त्मस्था ब्रह्मज्योतिर्व्यचक्षत । उमाप्रमथसंयुक्तं शैवा ऐक्षन्त शङ्करम् ॥२२॥ सौरा हिरण्मयं साक्षात्पुरुषं सूर्यमण्डले। ददृशुर्गाणपत्याश्च महागणपतिं हृदि ॥२३॥ शक्तिभक्ता निजां देवीं ददृशुश्च निजान्तरे । इत्थं सर्वेऽपीष्ट-देवांस्तत्प्रतापाद्व्यचक्षत ॥२४॥ स्वस्वेष्टदेवांस्ते वीक्ष्य स्वस्वैश्वर्यसमन्वितान् । आनन्दं परमं प्रापुर्जाताः पूर्णमनोरथाः ॥२५॥ लब्धेष्टदर्शनांस्तांश्च ततः स्वामी स्ववीक्षया । पुनरुत्थापयामास मृतकानिव तत्क्षणम् ॥२६॥ ते चातिविस्मिताः स्वे स्वे हृदि दृष्टं परस्परम् । वदन्तो नीलकण्ठं स्म सर्वरूपधरं विदुः ॥२७॥ नारायणं विदित्वा तं प्रत्यक्षं परमेश्वरम् । मतं च देशिकान् हित्वा चक्रुस्तदाश्रयम् ॥२८॥ मुकुन्दमुक्तानन्दाद्या औद्धवा अपि तस्य तत् । ऐश्वर्यमद्भुतं दृष्ट्वा निश्चिक्युः कृष्णमेव तम् ॥२९॥ ततस्तस्यैव ते भक्तिं चक्रुः प्राप्ता मुदं पराम् । तदाज्ञायामवर्तन्त नित्यदा च नराधिप ! ॥३०॥

મનથી વિચાર કરવા લાગ્યા : (૧૪) જો હું મારા યોગૈશ્વર્યથી એ જનોને તેમનાં તેમનાં હૃદયકમળોમાં તેમના તેમના ઈષ્ટદેવોને બતાવું તો મને પરમેશ્વર જાણે. તેથી (મારા સ્વરૂપનું જ્ઞાન થવાથી) સર્વ જનો મને સર્વ ઈષ્ટદેવોના નિયંતા જાણીને મારો આશ્રય કરે અને બીજા ધર્માભાસ રૂપ (ઉપરથી ધર્મની માફક જણાતા એવા) શક્તિપંથ વગેરેના આશ્રિતો પોતપોતાના મત-પંથોનો ત્યાગ કરી આત્યંતિક કલ્યાણ કરનારી મારી ભક્તિ કરે. (૧૫-૧૬)

હે રાજન્ ! શ્રીહરિએ આવો વિચાર કરી સર્વજનોને બેસાડી મહાકૃપાપૂર્વક પોતાના સામર્થ્યથી તત્કાળ સમાધિ કરાવી. (૧૭) શ્રીહરિના જોવા માત્રથી તે બધા સંકુચિત નાડીવાળા અને પ્રાણો જેમના લીન થયા છે એવા તે જનોએ પોતપોતાના હૃદયમાં પોતપોતાના ઈષ્ટદેવોને જોયા. (૧૮) તેમાં જે વલ્લભાશ્રિત-નિમ્બાર્કના આશ્રિત અને મધ્વ સંપ્રદાયનાં જનો હતા તે ગોપીઓના સમુદાયોથી વિંટાયેલા વૃંદાવનમાં રહેલા બાળલીલાથી મનોહર શ્રીકૃષ્ણને જોતા હતા. (૧૯) રામાનુજાચાર્યના મતનાં જનોએ સુનન્દન અને ગરુડ વગેરે તથા વિષ્વક્સેન આદિક પાર્ષદોથી યુક્ત શ્રી લક્ષ્મીનારાયણને જોયા. (૨૦)

રામાનંદનાં આશ્રિતજનો સીતા-લક્ષ્મણ અને હનુમાનજી સહિત દિવ્ય સિંહાસનમાં બેઠેલા શ્રી રામચંદ્રજીને જોતા હતાં. (૨૧) શંકરાચાર્યના મતનાં જનો બ્રહ્મપ્રકાશ જોતાં હતાં. શિવનાં ભક્તજનો પાર્વતી અને પ્રમથ નામના ગણોએ સહિત શિવને જોતાં હતાં. (૨૨) સૂર્યના ભક્તો પોતાના હૃદયમાં પ્રકાશમાન સૂર્યમંડળમાં પ્રત્યક્ષ હિરણ્યમય પુરુષને જોતા હતા. ગણપતિના ભક્તોએ હૃદયમાં મહાગણપતિ જોયા. (૨૩) શક્તિના ભક્તો પોતાના હૃદયમાં પોતાની ઈષ્ટદેવી શક્તિને જોતા હતા. આવી રીતે સર્વ જનોએ પણ શ્રીહરિના પ્રતાપથી પોતપોતાના ઈષ્ટદેવોને જોયા. (૨૪) તે સર્વે જનો પોતપોતાના ઐશ્વર્યયુક્ત પોતપોતાના ઈષ્ટદેવોને જોઈને પરમ આનંદ પામ્યા અને પૂર્ણ મનોરથવાળા થયા. (૨૫) પછી શ્રી નારાયણમુનિએ જેમને સમાધિ થયેલી છે અને જેમને પોતપોતાના ઈષ્ટદેવનાં દર્શન થયાં છે એવા સર્વ જનો જે મરેલાની માફક હતા તેમને પોતાના દર્શન માત્રથી તત્કાળ ઉઠાડ્યા. (૨૬)

પછી અતિ વિસ્મય પામેલાં સર્વે જનોએ પોતાના હૃદયમાં જોયેલા આશ્ચર્યને પરસ્પર કહેતા થકા શ્રી સહજાનંદ સ્વામીને પોતાના યોગના ઐશ્વર્યથી પોતપોતાના ઈષ્ટદેવનાં રૂપ ધરનારા જાણ્યા. (૨૭) તે જનોએ શ્રી નારાયણ મુનિને પરમેશ્વર જાણીને પોતાનો સંપ્રદાય અને પોતાના ગુરુઓનો ત્યાગ કરીને શ્રીહરિનો આશ્રય કર્યો. (૨૮) મુકુંદાનંદ વર્ણી અને મુક્તાનંદ સ્વામી વગેરે ઉદ્ધવાવતાર શ્રી રામાનંદ મુનિના સર્વ શિષ્યોએ પણ શ્રીહરિનું અત્યંત આશ્ચર્યકારી ઐશ્વર્ય જોઈને શ્રીહરિ જ પોતાના ઈષ્ટદેવ પરમેશ્વર છે એવો નિશ્ચય કર્યો. (૨૯) હે રાજન્ ! ત્યાર બાદ પરમ હર્ષ પામેલા તે મુકુંદાનંદાદિ સર્વે શ્રીહરિકૃષ્ણ ભગવાનની જ નવ પ્રકારે ભક્તિ કરતા હતા અને શ્રીહરિની આજ્ઞામાં જ વર્તતા હતા. (૩૦)

यवनस्तत्र राजासीद्वज्रदीन इति श्रुतः । शालकस्तस्य शुश्राव काजिनामेदमद्भुतम् ।।३१।। आज्ञया भगिनीभर्तुर्यवनैः सोऽभिवेष्टितः । स्वामिनः पार्श्वमागत्य तं प्रणम्य वचोऽब्रवीत् ।।३२।। इष्टदेवाः प्रदर्श्यन्ते जनानां वर्णिराट् ! त्वया । पिगाम्बरानस्मदिष्टान्दर्शय स्याम तेऽनुगाः ।।३३।। तदा तमप्युपावेश्य स स्वामी प्राह पश्य माम् । यावत्पश्येत्स तं तावदासील्लीनासुनाडिकः ।।३४।। निश्चेष्टदेहः सोऽपश्यन्निजान्महमदादिकान् । पिगाम्बरान्स्वहृदये श्रुतपूर्वांस्ततोऽहृषत् ।।३५।। स्वामिना वीक्षितोऽथासौ व्युत्तस्थे विस्मयान्वितः समाधौ वीक्षितं यत्तत्प्राह तत्रागतान्निजान् ।।३६।। ततः स स्वामिनं ज्ञात्वा प्रभुं तस्याश्रयं दृढम् । चकार च तदाज्ञायामवर्तत निरन्तरम् ।।३७।। एतदाश्चर्यमालोक्य राजापि दृढनिश्चयः । तमाश्रित्यानन्यभक्त्या भजति स्म निरन्तरम् ।।३८।। एवं तत्र च यो यस्तमुपागच्छच्छ्रुतैश्वरः । स स निश्चित्य तं साक्षादीशं साश्चर्यमाश्रयत् ।।३९।। मद्यमांसपरस्त्र्यादिसेवनं स्वस्वमार्गगम् । अधर्ममेव निश्चित्य ते जहुस्तत्प्रतापतः ।।४०।। मद्यं पारदार्यं स्तेयं स्वपरहिंसनम्। जातिभ्रंशककर्मादि जहुः सर्वे तदाश्रिताः ।।४१।। अष्टधा पालयामासुर्ब्रह्मचर्यं गृहीतराः। गृहिणो विधवाः स्त्रीश्च नास्पृशन्बान्धवीतराः ।।४२।। नार्यः पतिव्रताधर्मं सुवासिन्यः सिषेविरे। त्यागिवत् पालयामासुर्ब्रह्मचर्यं विभर्तृकाः ।।४३।। स्वधर्मज्ञानवैराग्यैर्भक्त्या माहात्म्ययुक्तया । आसन्सर्वे च सम्पन्नास्तद्भक्तास्तत्प्रतापतः ।।४४।। नारायणमुनेः शिष्या इत्थं लोकविलक्षणाः । लोकस्था अप्यवर्तन्त श्वेतद्वीपो यथा भुवि ।।४५।।

---

ત્યાં **વજદીન** એ નામથી પ્રસિદ્ધ મુસલમાન રાજા હતો. તેનો કાજી નામનો સાળો આ શ્રીહરિનું પૂર્વોક્ત આશ્ચર્ય સાંભળતો હતો. (૩૧) બહેનના પતિ વજદીન રાજાની આજ્ઞાથી કાજી શ્રી સહજાનંદ સ્વામીની સમીપમાં આવી નમસ્કાર કરીને વચન બોલ્યા : (૩૨) હે વર્ણિરાજ ! તમો જનોને ઈષ્ટદેવોનું દર્શન કરાવો છો એમ અમે સાંભળ્યું છે માટે તમો અમને અમારા ઈષ્ટ પેગમ્બર, મહમદાદિનાં દર્શન કરાવો અમો પણ તમારા શિષ્યો થઈશું. (૩૩)

તે સમયે ઐશ્વર્યના મહાસાગર શ્રીહરિએ તે કાજીને બેસાડીને મને જુઓ એમ કહ્યું. તે કાજીએ જે સમયે શ્રીહરિને જોયા તે સમયે લીન થયેલા પ્રાણવાળી નાડીઓ જેની છે એવો તે કાજી સમાધિસ્થિતિને પામ્યો. (૩૪) ચેષ્ટા રહિત શરીરવાળા કાજીએ પૂર્વે સાંભળેલા પોતાના ઈષ્ટ મહમદાદિ પેગમ્બરોને પોતાના હૃદયમાં જોયા. પછી તે અતિ હર્ષ પામ્યો. (૩૫) પછી શ્રીહરિએ કૃપા દૃષ્ટિથી જોવાયેલો કાજી અતિ આશ્ચર્ય પામીને સમાધિથી જાગ્રત થયો અને સમાધિમાં જે જોયું તે ત્યાં શ્રી નારાયણ મુનિની સમીપમાં આવેલા પોતાના સંબંધી મુસલમાનોને કહેવા લાગ્યો. (૩૬) પછી કાજીએ શ્રીહરિને સર્વેશ્વર જાણીને શ્રીહરિનો દૃઢ આશ્રય કર્યો અને નિરંતર તેમની આજ્ઞામાં રહેવા લાગ્યો. (૩૭) વજદીન રાજા પણ પ્રથમ પોતાના સાળાના મુખથી સાંભળીને શ્રીહરિની સમીપમાં આવીને દૃઢ નિશ્ચયવાળો, શ્રીહરિનો આશ્રય કરી અનન્ય ભક્તિથી ભજતો હતો. (૩૮) તે પુરમાં આવી રીતે શ્રીહરિનું પરમૈશ્વર્ય જેણે જેણે સાંભળ્યું તે તે માણસ શ્રીહરિની સમીપમાં આવી પ્રત્યક્ષ પરમેશ્વરનો નિશ્ચય કરી આશ્ચર્યપૂર્વક સમાશ્રય કરતો હતો. (૩૯)

તે જનો પોતપોતાના સંપ્રદાયમાં રહેલું મદ્યપાન-માંસભક્ષણ-પરસ્ત્રી વગેરે સેવનને અધર્મ જ છે એમ નિશ્ચય કરી તે શ્રીહરિનાં પ્રતાપથી ત્યાગ કરતા હતા. (૪૦) મદ્યપાન-માંસભક્ષણ-પરસ્ત્રીનો સંગ-પ્રત્યક્ષ અથવા પરોક્ષ ચોરી-પોતાની અથવા બીજાની હિંસા-જેનું ન ખપતું હોય તેનું અન્ન-જળપાન-મિથ્યાપવાદ વગેરેનો શ્રીહરિના આશ્રિતો ત્યાગ કરતા હતા. (૪૧) બ્રહ્મચારી-સાધુ વગેરે આઠ પ્રકારનું બ્રહ્મચર્ય પાળતા હતા. પોતાના આશ્રિત ગૃહસ્થ જનો પોતાના સમીપ સંબંધ વિનાની વિધવા સ્ત્રીઓનો સ્પર્શ કરતા નહોતા. (૪૨) શ્રીહરિની આશ્રિત સધવા સ્ત્રીઓ પતિવ્રતાનો ધર્મ પાળતી હતી અને વિધવા સ્ત્રીઓ ત્યાગી સાધુઓની માફક આઠ પ્રકારે પુરુષના ત્યાગવાળું બ્રહ્મચર્ય પાલન કરતી હતી. (૪૩)

શ્રીહરિના સર્વે ભક્તો સ્વધર્મ-જ્ઞાન-વૈરાગ્ય અને ભગવાનના માહાત્મ્યજ્ઞાન સહિત ભક્તિથી યુક્ત તેમના પ્રતાપથી હતા. (૪૪) આવી રીતે વર્તતા નારાયણ મુનિના શિષ્યો પૃથ્વીમાં રહેલા હોવા છતાં જાણે શ્વેતદ્વીપમાં રહેલા હોય ને શું ? તેમ વર્તતા હતા. (૪૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

इत्थं स्वीयं प्रतापं सुरनरदितिजैर्ब्रह्मरुद्रादिभिर्वा दुःसाध्यं चेतसाऽपि क्षितितल उरुधा श्रेयसे मानवानाम् । भूयोभूयो वितन्वन् धृतनरवपुषा दिव्यलीलाविदग्धः पापिष्ठाधर्मवंशं गुरुजननिलयं वर्णिराडुच्चखान ॥४६॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे आश्चर्यसमाधिलीलानिरूपणनामा पञ्चमोऽध्यायः ॥५॥

सुव्रत उवाच-एवं तत्र प्रतापं स्वं दर्शयित्वा सहस्रशः । जनान्निजाश्रितान् कृत्वा गन्तुमैच्छत्पुरान्तरम् ॥१॥ ततो राज्ञा विनीतेन पौरैश्च बहुधार्थितः । चातुर्मास्यमुवासासौ तत्र तत्प्रियकाम्यया ॥२॥ प्रतापो व्यानशे तस्य राजन्दिक्षु विदिक्षु च। आश्चर्यजनको नृणां वृद्धैरप्यश्रुतः पुरा ॥३॥ तं शुश्रुवुस्तत्र तत्र दुर्वासःशापतो भुवि । जाता नृष्वृषयः सर्वे दिदृक्षन्ति स्म तं ततः ॥४॥ यूथशस्त उपाजग्मुर्नगरं तद्द्विजातयः । यथार्हं मानयित्वा तांस्तत्रावासयदीशिता ॥५॥ शृण्वन्त ईक्षमाणाश्च प्रतापं तस्य ते मुहुः । निश्चिक्युस्तं कृष्णमेव केचित्संशिश्यिरे द्विजाः ॥६॥ महोत्सवं कर्तुमना जन्माष्टम्यामथ प्रभुः । दूतैरजूहवत्सर्वान्भक्तांस्तत्र निजाश्रितान् ॥७॥ यूथशस्तेऽपि तत्राऽऽयन् गृहिणस्त्यागिनोऽपि च । सन्मानं विदधे तेषां यथार्हं धर्मनन्दनः ॥८॥ उत्थायोषसि चाष्टम्यां प्रातःकृत्यं विधाय सः । उद्धवस्वामिनश्चक्रे समर्चनमहोत्सवम् ॥९॥ ततः स कारयामास मण्डपं सुमनोहरम् । विचित्रवस्त्रपुष्पस्रक्कदलीस्तम्भमण्डितम् ॥१०॥ तत्राकरोद्यथाशास्त्रं निशीथे कृष्णपूजनम्। उपहारैर्महद्भिश्च गीतवादित्रपूर्वकम् ॥११॥ मृदङ्गझर्झरादीनि वादयन्तश्च साधवः । पद्यैर्नानाविधैश्चक्रुः

---

હે રાજન્ ! આ પ્રમાણે દેવો-મનુષ્યો અને દૈત્યોએ તથા બ્રહ્મા-શિવ અથવા વિષ્ણુ-વૈરાજ પુરુષ વગેરેએ ચિંતવનથી પણ સિદ્ધ ન થઈ શકે એવો પોતાનો પ્રતાપ પૃથ્વીમાં મનુષ્યોના કલ્યાણ માટે વારંવાર ઘણા પ્રકારે વિસ્તારતા, ધારણ કરેલી મનુષ્યાકૃતિથી અલૌકિક લીલાનિપુણ વર્ણીન્દ્રે અસુર ગુરુજનોમાં રહેલા અધર્મવંશને ઉખેડી નાખ્યો. (૪૬)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીયપ્રકરણે આશ્ચર્યલીલાનિરૂપણનામા પંચમોઽધ્યાયઃ (૫)*

## અધ્યાય : ૬ - જન્માષ્ટમીનાં ઉત્સવમાં શ્રીકૃષ્ણસ્વરૂપે દર્શન.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! શ્રીહરિએ માંગરોલપુરમાં (પૂર્વાધ્યાયમાં કહ્યા પ્રમાણે) પોતાનો દિવ્ય પ્રતાપ બતાવી ઘણાં જનોને પોતાનાં આશ્રિત કરી બીજા પુરમાં જવા માટે ઈચ્છા કરી. (૧) પછી વિનયવાળા વજદીન રાજાએ તથા પુરના ભક્તજનોએ પુરમાં રહેવા પ્રાર્થના કરાયેલા શ્રીહરિ તેમનું પ્રિય કરવાની ઈચ્છાથી માંગરોલપુરમાં ચાતુર્માસ (અષાઢ-શ્રાવણ-ભાદરવો અને આસો આ ચાર માસ) રહ્યા. (૨) હે રાજન્ ! મનુષ્યોને, શ્રી હરિના પ્રતાપનાં દર્શન કરનાર તથા શ્રવણ કરનાર જનોને આશ્ચર્યકારી પૂર્વે વૃદ્ધજનોએ પણ નહિ સાંભળેલો; શ્રીહરિનો પ્રતાપ દશે દિશાઓમાં વ્યાપી ગયો. (૩)

બદરિકાશ્રમમાં દુર્વાસાના શાપથી પૃથ્વીમાં તે તે દેશોમાં ત્રણ વર્ણના મનુષ્યોમાં ઉત્પન્ન થયેલા મરીચ્યાદિ મુનિઓ શ્રીહરિનો પ્રતાપ સાંભળતા હતા પછી તેમનો પ્રતાપ જોવાની ઈચ્છા રાખતા હતા. (૪) ત્રણ વર્ણના ઋષિઓ બધા ભેગા થઈને માંગરોલપુરમાં આવ્યા. પરમેશ્વર શ્રીહરિએ મુનિઓને યથાયોગ્ય સન્માન આપીને ત્યાં પોતાના નિવાસમાં રાખ્યા. (૫) તે મુનિઓ શ્રીહરિનો પ્રતાપ વારંવાર સાંભળતા અને જોતા સતા આ શ્રીહરિ શ્રીકૃષ્ણ જ છે એવો નિશ્ચય કરતા હતા. કેટલાક દ્વિજો સંશય કરતા હતા. (૬) પછી શ્રી હરિ સંવત્ ૧૮૫૯ના શ્રાવણ વદી અષ્ટમી (જન્માષ્ટમી) ને દિવસે મહોત્સવ કરવા ઈચ્છતા સતા પોતાના આશ્રિત સર્વ ભક્તોને દૂતો દ્વારા માંગરોલમાં બોલાવતા હતા. (૭) ગૃહસ્થો તથા સાધુ બ્રહ્મચારીઓ વગેરે ભક્તો પણ ભેગા થઈને ત્યાં આવ્યા. ધર્મનંદન શ્રીહરિએ આવેલા પોતાના ભક્તોનો યથાયોગ્ય સત્કાર કર્યો. (૮) શ્રીહરિ અષ્ટમીને દિવસે પ્રાતઃકાળમાં યોગનિદ્રાનો ત્યાગ કરી સ્નાન-હોમ વગેરે નિત્યકર્મ કરી શ્રી રામાનંદ મુનિનો જન્મ નિમિત્તે પૂજન-મહોત્સવ કરતા હતા. (૯)

ત્યાર બાદ શ્રીહરિએ નાના પ્રકારના ફૂલના હારો અને કેળના સ્તંભોથી શોભાયમાન માટે જ મનોહર મંડપ કરાવ્યો. (૧૦) તે મંડપમાં મધ્યરાત્રીએ ભગવાનનાં કીર્તનોનું ગાન તથા દુંદુભિ વગેરે નાના પ્રકારનાં વાજિંત્રો વગાડવા પૂર્વક મહાપૂજાની સામગ્રીઓથી શાસ્ત્ર પ્રમાણે વેદોક્તમંત્રોથી શ્રીકૃષ્ણનું પૂજન સ્વયં શ્રીહરિએ કર્યું. (૧૧) મૃદંગ-કાંસીજોડાં-મંજીરા વગેરે વાજિંત્રો વગાડતા સાધુજનો વિવિધ પ્રકારનાં સંસ્કૃત અને પ્રાકૃત ભાષાનાં પદોથી શ્રીકૃષ્ણનાં ગુણકીર્તનો



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीकृष्णगुणकीर्तनम् ॥१२॥ कृष्णमान्दोलयामास दोलायां च निधाय सः । तत्कथाकीर्तनैश्चक्रे जागरं च निजैः सह ॥१३॥ निशस्तृतीययामान्ते भक्तमण्डलसंसदि । उपाविशत् पट्टकेऽसौ सर्वानानन्दयन्निजान् ॥१४॥ त्यागिनो गृहिणोऽन्ये च योषितश्चातिभावतः । तन्मुखाम्बुजमेवैकं पश्यन्ति स्म स्थिरेक्षणाः ॥१५॥ तदा प्रभुः स कृपयैवैच्छज्ज्ञानं ममाञ्जसा । एतेषां स्यादिति ततस्ते तमित्थं व्यलोकयन् ॥१६॥ एकैकाङ्गस्रवत्कोटिकोटिभास्करतेजसम् । घनश्यामं पीतपटं बर्हिबर्हकिरीटिनम् ॥१७॥ कौस्तुभं वैजयन्तीं च मालिकां बिभ्रतं गले । सद्रत्नहेमरशनं मकरश्रुतिभूषणम् ॥१८॥ पदोर्नूपुरशोभाढ्यं कटकाङ्गदभूषितम् । गन्धपुष्पाञ्चिततनुं किशोरवयसं प्रभुम् ॥१९॥ दोर्भ्यां वेणुं वादयन्तमधरोष्ठधृतं तथा । नटवेषं तमालक्ष्य श्रीकृष्णं ते मुदं ययुः ॥२०॥ तत्र केचिन्निर्निमेषदृशस्तस्मिंश्च लेभिरे । समाधिमन्तरे केचिदित्थं तस्थुर्घटीद्वयम् ॥२१॥ ततस्तमेव तेऽपश्यन् यथापूर्वमवस्थितम्। वर्णिवेषं चाल्पजटं श्यामं विशदवाससम् ॥२२॥ एणाजिनधरं शान्तं करात्तजपमालिकम् । नारायणमुनिं वीक्ष्य नेमुः साष्टाङ्गमाशु ते ॥२३॥ परमेश्वर एवायं नारायणमुनिः स्वयम् । श्रीकृष्णोऽस्तीति साश्चर्यं वदन्ति स्म समुत्सुकाः ॥२४॥ औद्धवीयाश्च ऋषयः पौराश्चान्ये च तत्र ये । जना आसन्सभायां ते सर्वे चक्रुस्तदाश्रयम् ॥२५॥ ततो वयं त्वदीयाः स्म इति प्राञ्जलयोऽवदन् । तावज्जातमुषः स्वामी स्नात्वा कृष्णं समार्चयत् ॥२६॥

---

ગાવા લાગ્યા. (૧૨) શ્રીહરિએ હિંડોળામાં બાલમુકુંદને પધરાવી હીંચકો નાખ્યો અને પોતાના ભક્તોની સાથે શ્રીકૃષ્ણની કથા-કીર્તનોથી જાગરણ કર્યું. (૧૩)

રાત્રિનો ત્રીજો પહોર વીતી ગયા બાદ શ્રીહરિ પોતાના ભક્તોને આનંદ આપતા ભક્તમંડળની સભામાં પાટ ઉપર બેઠા. (૧૪) સાધુ-બ્રહ્મચારી અને ગૃહસ્થો અને બીજા આવેલા મુનિઓ અને સધવા-વિધવા સ્ત્રીઓ સ્થિર નેત્રોવાળાં થઈને અત્યંત સ્નેહપૂર્વક શ્રીહરિના મુખારવિંદને જ જોતાં હતાં. (૧૫) તે સમયે સર્વેશ્વર શ્રીહરિએ 'આ સર્વ મારા આશ્રિતજનોને મારા સ્વરૂપ સંબંધી યથાર્થ જ્ઞાન થાઓ' આ પ્રમાણે કૃપાથી જ ઈચ્છા કરી. પછી તે જનો શ્રીહરિને આગળ કહેશે તે પ્રમાણે જોવા લાગ્યા. (૧૬)

એક એક શરીરના અવયવોથી નીકળતા કોટાનકોટિ સૂર્યોના તેજવાળા, નૂતન મેઘની માફક શ્યામ, પીતાંબરધારી, મોરનાં પીંછાંના મુગટ વાળા; (૧૭) કૌસ્તુભમણિ અને વૈજયંતીમાળાને કંઠમાં ધારણ કરતા, શ્રેષ્ઠ શોભાયમાન રત્નોથી જડેલો સોનાનો કંદોરો જેમને છે, મકરાકાર કુંડળ કર્ણમાં જેમને છે; (૧૮) ઝાંઝરની શોભાવાળાં ચરણકમળ જેમનાં છે, શ્રેષ્ઠ સુવર્ણનાં કડાં તથા રત્નજડિત બાજુબંધથી અલંકૃત છે હસ્તકમળ જેમના, સુગંધીમાન કેશરાદિથી યુક્ત ચંદન-મોગરો, જૂઈ વગેરે પુષ્પોના હારોથી પૂજાયેલા કિશોર અવસ્થાવાળા, અક્ષર-કાળ-માયાદિના નિયંતા તથા પોતાનાં બંને હસ્તકમળોથી અધરોષ્ઠમાં ધારણ કરેલી વાંસળીને વગાડતા નટવરના જેવા વેશવાળા શ્રીહરિકૃષ્ણમહારાજને શ્રીકૃષ્ણના સ્વરૂપમાં જોઈને તે જનો અતિ હર્ષ પામ્યાં. (૧૯-૨૦)

તેમાં કેટલાક માણસો મટકારહિત દૃષ્ટિવાળા શ્રીહરિકૃષ્ણ ભગવાનમાં સમાધિ પામ્યા. કેટલાક જનો પોતાના હૃદયકમળમાં જ નેત્રો મીંચીને સમાધિ પામ્યા. આ પ્રમાણે સમાધિ પામેલા જનો બે ઘડી સુધી દર્શન કરતા રહ્યા. (૨૧) ત્યાર પછી તે જનો પૂર્વની માફક રહેલા શ્રીહરિને જોતા હતા. (પહેલાં જોયેલા શ્રીહરિનું વર્ણન કરે છે.) વર્ણી વેશવાળા, સૂક્ષ્મ જટાવાળા, શ્યામ સુંદર આકૃતિવાળા, શ્વેત વસ્ત્ર ધારણ કરનારા, કૃષ્ણમૃગનું ચર્મ ધારણ કરનારા, સૌમ્ય આકૃતિવાળા, જમણા હાથમાં તુલસીમાળા ધારણ કરનારા એવા શ્રીનારાયણ મુનિને જોઈને તે જનો તત્કાળ સાષ્ટાંગ પ્રણામ સહિત નમસ્કાર કરતા હતા. (૨૨-૨૩) આ નારાયણ મુનિ જ પોતે પરમેશ્વર છે : આ પ્રમાણે ઉત્સાહવાળા તે જનો આશ્ચર્યપૂર્વક પરસ્પર કહેવા લાગ્યા. (૨૪) ઉદ્ધવાવતાર શ્રી રામાનંદ મુનિના શિષ્યો જે સ્ત્રીઓ અને પુરુષો અને દેશાંતરથી આવેલા મુનિઓ, પુરનાં નિવાસીજનો અને બીજાં પણ જે જનો તે સભામાં હતાં તે સર્વે શ્રીહરિનો આશ્રય કરતાં હતાં. (૨૫) પછી, અમો સર્વે તમારા સેવકો છીએ : આ પ્રમાણે તેઓ બંને હાથ જોડીને બોલ્યા. તેટલા સમયમાં પ્રાતઃકાળ થયું. પછી શ્રીહરિએ સ્નાન કરી શ્રીકૃષ્ણનું પૂજન કર્યું. (૨૬) હે રાજન્ ! શ્રીહરિએ હજારોહજાર સાધુ અને બ્રાહ્મણોને સુંદર

तर्पयामास सद्भोज्यैः साधून् विप्रान्सहस्त्रशः । पारणां स ततश्चक्रे जनाश्चान्ये ततो नृप ! ॥२७॥ देशान्तरागताः सर्व ऋषयो दृढनिश्चयाः। स्वधर्मज्ञानवैराग्ययुजा भक्त्याऽभजंश्च तम् ॥२८॥ तेषां तु केचिदृषयो ब्रह्मचर्याश्रमे नृप ! । अवर्तन्ताथ केऽप्यासंस्त्यागिभक्ता हि साधवः ॥२९॥ भूयोऽ पराह्णेऽथ सभां कारयामास सत्पतिः । यथार्हं तत्र पुरुषा निषेदुश्च स्त्रियो नृप ! ॥३०॥ न्यषीदत्तत्र भगवान् पट्टके स्वास्तृते हरिः । बभौ स तारकामध्ये शशाङ्क इव पार्वणः ॥३१॥ तं चन्दनेनोत्तमपुष्प-हारैर्वस्त्रैर्विचित्रैश्च धनैर्नरेन्द्र ! । सम्पूजयामासुरनन्यभावाः सर्वेऽपि भक्ताश्च ततः प्रणेमुः ॥३२॥ तस्माद्विशुद्धं निजधर्मवर्त्म शुश्रूषवः सन्मुखमेव तस्य । सर्वे निषेदुर्मुखपद्मशोभामवेक्षमाणा विनयानतांसाः ॥३३॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे जन्माष्टम्युत्सवे श्रीकृष्णस्वरूपदर्शननामा षष्ठोऽध्यायः ॥६॥

सुव्रत उवाच-नारायणमुनिं नत्वा बद्धाञ्जलिपुटद्वयाः । शिष्या मुकुन्दप्रमुखाः पप्रच्छुरिदमादरात् ॥१॥ शिष्या ऊचुः- भगवन्सर्वभूतानां त्वमेव परमा गतिः । स्वाश्रितानां विशेषेण त्वं गुरुश्चेश्वरो ह्यसि ॥२॥ अतस्त्वामाश्रितानां नस्त्यागिनां गृहिणां तथा । स्त्रीणां चापि प्रभो ! ब्रूहि धर्माञ्छ्रेयःप्रसाधकान् ॥३॥ सुव्रत उवाच-इति पृष्टः स भगवान्निजशिष्यैः कृपानिधिः । वेदादीनां सारभूतान्धर्मानाह सनातनान् ॥४॥ श्रीनारायणमुनिरुवाच-शृण्वन्तु मामकाः सर्वे पुरुषा योषितस्तथा। सच्छास्त्रानुसृतान्धर्मान्वच्मि भागवतान् हि वः ॥५॥ ब्राह्मे मुहूर्त उत्थाय निशायाः प्रहरेऽन्तिमे । मदीयैः कीर्तनीयानि

ભોજનોથી તૃપ્ત કર્યા પછી પોતે પારણાં કર્યાં. પછી બીજાં જનોને પણ પારણાં કરાવ્યાં. (૨૭)

દેશાંતરથી આવેલા મરીચ્યાદિ ઋષિઓ સર્વે ' શ્રીહરિ પોતે અક્ષરાતીત પરમેશ્વર છે' એવી દૃઢ નિષ્ઠાવાળા સ્વધર્મ -જ્ઞાન-વૈરાગ્યે યુક્ત નવ પ્રકારની ભક્તિથી શ્રીહરિને જ ભજતા હતા. (૨૮) હે રાજન્ ! તે ઋષિઓમાં કેટલાક ઋષિઓ તો બ્રહ્મચર્યાશ્રમમાં વર્તતા હતા અને કેટલાક ઋષિઓ, ત્યાગી ભક્તો (સાધુઓ) હતા. (૨૯) હે નૃપ ! પછી સર્વ સાધુ જનોના સ્વામી શ્રીહરિએ ફરીથી પણ બપોર પછી સભા કરાવી. તે સભામાં પુરુષો અને સ્ત્રીઓ યથાયોગ્ય (પોતપોતાના વિભાગમાં) બેઠાં. (૩૦) અપરિમિત ઐશ્વર્યવાળા શ્રીહરિ સભામાં ગાદીતકિયા અને ઓછાડે સહિત મહાસિંહાસનમાં બેઠા. શ્રીહરિ શરદપૂર્ણિમામાં ઉદય પામેલો ચંદ્ર તારાઓની મધ્યે જેમ શોભે તેમ પોતાના ભક્તમંડળમાં શોભતા હતા. (૩૧) હે રાજેન્દ્ર ! અનન્ય ભાવવાળા સર્વભક્તોએ ચંદન, શ્રેષ્ઠ પુષ્પની માળાઓ, વિવિધ પ્રકારનાં ઉત્તમ વસ્ત્રો અને સુવર્ણમુદ્રાઓથી શ્રીહરિનું પૂજન કર્યું. પછી નમસ્કાર કર્યા. (૩૨)

શ્રીહરિથકી પોતાના વિશુદ્ધ ધર્મમાર્ગને સાંભળવા ઈચ્છતા સર્વે ભક્તો શ્રીહરિના મુખકમળની શોભા જોતા થકા અને વિનયથી નમેલા ખભાવાળા થકા શ્રીહરિની સન્મુખ જ યથાયોગ્ય બેઠા. (૩૩) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે જન્માષ્ટમ્યુત્સવે શ્રીકૃષ્ણસ્વરૂપદર્શનનામા ષષ્ઠોઽધ્યાયઃ (૬)*

## અધ્યાય : ૭ - શ્રીનારાયણગીતા

**સર્વ શાસ્ત્રના સારરૂપ-ધર્મનિરૂપક શ્રીનારાયણ ગીતા :-** સુવ્રત મુનિ બોલ્યા : હે રાજન્ ! (સભામાં બેઠેલા) મુકુંદાનંદ વર્ણી વગેરે શિષ્યો હાથ જોડી નારાયણ મુનિને નમસ્કાર કરી આદરપૂર્વક આ પ્રમાણે પૂછવા લાગ્યા. (૧) **મુકુંદાનંદાદિ શિષ્યો પુછે છે :** હે ભગવન્ ! તમો જ સર્વભૂત-પ્રાણીમાત્રના સર્વોત્તમ આશ્રય છો. સ્વાશ્રિત મનુષ્યોના તો તમો વિશેષપણે ગુરુ અને ઉપાસ્ય પરમેશ્વર છો. (૨) માટે હે પ્રભો ! તમારા આશ્રિત એવા જે અમો ત્યાગી, સાધુ-બ્રહ્મચારી તથા ગૃહસ્થો અને સધવા-વિધવા સ્ત્રીઓના પણ આત્યંતિક શ્રેયને સંપાદન કરનારા ધર્મો અમોને કહો.(૩)

**સુવ્રતમુનિ કહે છે :** હે રાજન્ ! આ પ્રમાણે પોતાના શિષ્યોએ પુછાયેલા નિષ્કારણ કૃપાસાગર ભગવાન શ્રીહરિ વેદાદિ સર્વ સત્શાસ્ત્રોના સારભૂત સનાતન ધર્મો કહેતા હતા. (૪) **શ્રીનારાયણમુનિ કહે છે :** હે ભક્તો ! હું સત્શાસ્ત્રોને અનુસરનારા ભાગવત ધર્મો તમોને કહું છું. મારાં આશ્રિતજનો સર્વ પુરુષો તથા સ્ત્રીઓ સાંભળો. (૫) હે ભક્તો ! રાત્રિના છેલ્લા મુહૂર્તમાં નિદ્રાનો ત્યાગ કરી મારા જનોએ દરરોજ શ્રીકૃષ્ણનાં નામો - નારાયણ, વાસુદેવ, વિષ્ણુ, ગોવિંદ, માધવ વગેરે

हरेर्नामानि नित्यदा ॥६॥ तद्भक्तानां च नामानि कीर्तनीयानि तैः स च । अव्यग्रमानसैर्ध्येयो मुहूर्तं वैकनाडिकाम् ॥७॥ श्रीकृष्णं राधिकाकान्तं तमेव हृदयाम्बुजे । स्मरद्भिः शुद्धहृदयैः कर्तव्या दैहिकी क्रिया ॥८॥ स्नानं सन्ध्या जपो होमः स्वाध्यायः पितृतर्पणम् । देवतापूजनादीनि नित्यं कार्याणि च द्विजैः॥९॥ स्नानं च द्विविधां पूजामकृत्वा प्रत्यहं हरेः । सर्वैरन्नं न भोक्तव्यं विना रोगादिपीडितान् ॥१०॥ उपचारैर्यथालब्धैर्विशुद्धैः प्रतिमा हरेः । यथाधिकारं विहितैः पूजामन्त्रैर्यथाविधि ॥११॥ रसासक्तिर्न कर्तव्या सर्वैः सर्वत्र सर्वदा । यथाकालं यथालब्धं भोज्यमन्नं फलादि वा ॥१२॥ यो यत्र मुख्यो हि भवेद्भोजयित्वा स चापरान् । स्वयं भुञ्जीतानुदिनं पङ्क्तिभेदं च नाचरेत् ॥१३॥ एकादशीषु सर्वासु कृष्णजन्मदिनेषु च । शिवरात्र्यां च नैवान्नं भोक्तव्यं मदुपाश्रितैः ॥१४॥ मदीयैर्मद्यमांसस्य तन्मिश्रस्य च वस्तुनः । भङ्गागञ्जतमालादेः कार्यः स्पर्शोऽपि न क्वचित् ॥१५॥ यत्र स्युरवताराश्च शास्त्रेषु स्थापिता हरेः । तद्भक्त्या सह च ज्ञानमध्येतव्यानि तानि वै ॥१६॥ सच्छास्त्राणि च सर्वाणि श्रव्याणि सुधियो मुखात् । न त्वन्तःशत्रुदग्धस्य हर्यभक्तस्य कर्हिचित् ॥१७॥ ज्ञानशास्त्रेऽपि यत्र स्यान्नैव नारायणस्य च। स्थापनं दिव्यरूपस्य तन्न श्रव्यं कदाचन ॥१८॥ युक्ताया नियमैः सर्वैः प्राप्ताया ब्रह्मणि स्थितिम् । अपि स्त्रिया मुखान्नैव ज्ञानं श्रव्यं हि पूरुषैः ॥१९॥ गेयं यशः सदा विष्णोस्तदीयानां च भक्तितः । सङ्गः सतां सदा कार्यो हर्यभक्तस्य न क्वचित्॥२०॥ निर्मानैर्दासवत्सर्वैर्वर्तितव्यं सतां पुरः । अवधार्याणि

---

નામો ઉચ્ચારણ કરવાં. (૬) મારા જનોએ શ્રીકૃષ્ણભગવાનના ભક્તો ઉદ્ધવ, શ્રુતદેવ, સુદામાદિનાં નામો શુદ્ધ અંતઃકરણોથી ઉચ્ચારણ કરવાં. મારા ભક્તોએ એક મુહૂર્ત (બેઘડી) અથવા એક ઘડી પર્યંત ભગવાનનું ચિંતવન કરવું. (૭)

શ્રીરાધિકાપતિ  શ્રીકૃષ્ણને જ પોતાના હૃદયકમળમાં ચિંતવન કરતા થકા શુદ્ધ હૃદયવાળા મારા જનોએ દેહસંબંધી (મળમૂત્રત્યાગ વગેરે) ક્રિયા કરવી. (૮) સ્નાન, સંધ્યા, જપ, હોમ, સ્વાધ્યાય, પિતૃતર્પણ, વિષ્ણુપૂજન વગેરે કર્મો બ્રાહ્મણ, ક્ષત્રિય અને વૈશ્ય ભક્તોએ હંમેશાં કરવાં. (૯)

સ્નાન અને શ્રીહરિની માનસી પૂજા તથા બાહ્યપૂજા દરરોજ કર્યા વિના,રોગાદિની પીડા વગર મારા આશ્રિત સર્વે જનોએ અન્ન જમવું નહિ, (૧૦) દેશકાળ પ્રમાણે પ્રાપ્ત થયેલાં શુદ્ધ ચંદન-પુષ્પાદિથી અધિકાર પ્રમાણે શાસ્ત્રોમાં કહેલા મંત્રોથી શ્રીકૃષ્ણની પ્રતિમા યથાશાસ્ત્ર વિધિ પ્રમાણે પૂજવી. (૧૧)

મારાં આશ્રિતજનોએ સર્વ (કોઈપણ) દેશમાં અને કાળમાં નાના પ્રકારનો રસાસ્વાદ કરવો નહિ, જે સમયે જે પ્રાપ્ત થયું હોય એવું અન્ન અથવા ફળાદિ જમવું. (૧૨) જે ગૃહસ્થમાં અથવા ત્યાગીમાં જે મુખ્ય હોય તે બીજા જમનારા જનોને જમાડીને દરરોજ પોતે જમે. ભોજન કરનારાઓમાં પંક્તિભેદ કરે નહિ. (૧૩) શુક્લપક્ષની અને કૃષ્ણપક્ષની સર્વ એકાદશીઓ તથા જન્માષ્ટમી, રામનવમી, હરિજયન્તિ અને શિવરાત્રિમાં મારાં આશ્રિતજનોએ અન્ન જમવું નહિ. (૧૪) મારાં આશ્રિતજનોએ  મદ્ય-માંસ અને તેનાથી મિશ્રિત ઔષધાદિ તથા ભાંગ, ગાંજો અને તમાકુ એ આદિક માદક વસ્તુઓનો સ્પર્શ પણ કરવો નહિ. [અહીં જે ભાંગ વગેરેનો સ્પર્શનિષેધ કહ્યો તે ભક્ષણાદિ નિમિત્તે સ્પર્શ પરત્ત્વે છે તેથી જે વૈશ્યવૃત્તિવાળાને વેપાર હોય તેને સ્પર્શનો નિષેધ નથી : આ પ્રમાણે **હેતુ**વ્યાખ્યામાં શુકાનંદમુનિનું વચન છે.] (૧૫)

જે શાસ્ત્રોમાં શ્રીહરિના અવતારો વરાહાદિ પ્રતિપાદન કરેલા હોય અને શ્રીકૃષ્ણ ભગવાનની ભક્તિએ સહિત જ્ઞાન સ્થાપન કરેલું હોય તે શાસ્ત્રો નિશ્ચે ભણવાં. (૧૬) શ્રીમદ્ ભાગવતાદિ આઠ શાસ્ત્રો પણ સ્વધર્મવાળા ભગવાનની ભક્તિનિષ્ઠ બુદ્ધિશાળી વકતાના મુખથી સાંભળવાં પરંતુ પોતાના ધર્મથી રહિત તેમજ શ્રીકૃષ્ણની ભક્તિરહિત વક્તાના મુખથી ક્યારેય પણ સાંભળવાં નહિ. (૧૭) જે અધ્યાત્મશાસ્ત્રમાં દિવ્યમૂર્તિ  શ્રીકૃષ્ણ ભગવાનનું પ્રતિપાદન ના હોય તે જ્ઞાનશાસ્ત્રનું ક્યારેય શ્રવણ કરવું નહિ. (૧૮) પતિવ્રતાદિ સર્વ નિયમોથી યુક્ત અને બ્રહ્મસ્થિતિને પામેલી આવા પ્રકારની સ્ત્રીના મુખથી પણ ધર્મભક્તિ વગેરે જ્ઞાનવાર્તા પણ પુરુષોએ સાંભળવી નહિ. (૧૯) વિષ્ણુ = સર્વત્ર વ્યાપક પરમેશ્વરનું તથા તેમના ભક્તોનું ભક્તિપૂર્વક હંમેશાં ગાન કરવું અને સાંભળવું. શાસ્ત્રમાં કહેલા લક્ષણોવાળા સાધુઓનો સંગ નિરંતર જ કરવો. ક્યારેય પણ શ્રીકૃષ્ણ ભગવાનની ભક્તિરહિતનો સંગ કરવો નહિ. (૨૦) સમગ્ર મારા ભક્તોએ સાધુઓની

वाक्यानि तेषां चैकाग्रचेतसा ॥२१॥ वृथावादो न कर्तव्यः श्रव्या ग्राम्यकथा न च । अपशब्दा न वक्तव्या नानृतं चापदं विना ॥२२॥ स्वव्रतानां दृढत्वं स्यात्कृष्णे च प्रेम निर्भरम् । यत्समागमतःस्यात्तत्सङ्गो हेयो न कर्हिचित् ॥२३॥ स्थितप्रज्ञोऽपि यः सङ्गं तादृशं विजहाति सः । कामलोभाद्यरिग्रस्तो भ्रश्यत्येव न संशयः ॥२४॥ सत्सङ्गं स्वं विदधतं यदि कोऽप्यत्र निर्वदेत् । तावन्मात्रेण न क्षोभः प्राप्तव्यो मनसा क्वचित् ॥२५॥ वैष्णवस्यापि मत्तस्य स्वव्रतेभ्यश्च्युतस्य च । सङ्गो नैवात्र कर्तव्यः पापिनोऽन्यस्य च क्वचित् ॥२६॥ प्राप्तब्रह्मात्मविज्ञानोऽप्यवमन्ता जगत्प्रभोः । तस्यावतारे चाश्रद्धो यः स्याद्धेयः स दूरतः ॥२७॥ मत्सम्प्रदायलिङ्गं च बिभ्रद्यो बहिरुत्तमम् । प्रच्छन्नं स्त्र्यादिसंसक्तः परित्याज्यः स दूरतः ॥२८॥ शान्त्या दान्त्या चोपरत्या तितिक्षास्तिकतादिभिः । गुणैर्देवादिदुष्प्राप्यैर्युक्तैर्भाव्यं च मच्छ्रितैः ॥२९॥ जातेऽत्र साक्षात्कारेऽपि स्वपरब्रह्मरूपयोः । लोब्धव्यं मामकैर्नैव शब्दादिविषये क्वचित् ॥३०॥ महद्भिः पूर्वजैः सिद्धैर्यद्धर्माचरणं कृतम् । भवेत्तदेव हि ग्राह्यं नाधर्माचरणं क्वचित् ॥३१॥ ब्रह्मचर्यप्रधानानि साधनानि विनैव चेत् । सद्यो महाफलां भक्तिं स्वस्मै कश्चिदुपादिशेत् ॥३२॥ तर्हि भक्त्या तया साकमुपदेष्टारमेव तम् । सद्यो जह्याद्धि सद्भक्तो न तु स्वनियमान्क्वचित् ॥३३॥

---

આગળ દાસની માફક (વિદ્યાદિ ગુણના માન રહિત) વર્તવું. સત્પુરુષોનાં વાક્યો એકાગ્ર મનથી ધારણ કરવાં. (ગ્રહણ કરવાં) (૨૧) પ્રયોજન વિનાનો વિવાદ કરવો નહિ. કામાદિ શાસ્ત્રની કથાઓ સાંભળવી નહિ તેમ જ કહેવી પણ નહિ. અપશબ્દો અને કઠોર વાણી બોલવી નહિ. પોતાના તથા બીજાના પ્રાણની આપત્તિ વિના અસત્ય ભાષણ કરવું નહીં. (૨૨)

જેના સંગથી બ્રહ્મચર્યાદિ નિયમોનું દઢપણું થાય અને શ્રીવાસુદેવ ભગવાનમાં અત્યંત પ્રેમ થાય તેવા ભગવાનના ભકતનો સમાગમ કરવો અને તેમનો સંગ ક્યારેય ત્યાગ કરવો નહિ. (૨૩) સમાધિનિષ્ઠ પણ જો પૂર્વોક્ત ભગવાનના ભક્તના સંગનો ત્યાગ કરે છે તો તે પુરુષ કામક્રોધાદિ શત્રુઓથી પરાભવ પામીને ભ્રષ્ટ થાય; તેમાં સંશય નથી. (૨૪) આ લોકમાં પોતાને સાધુસમાગમ કરતાં, જો કોઈ પણ દુષ્ટ જન નિંદા કરે તો તેટલા માત્રથી ક્યારેય પણ મનથી ક્ષોભ પામવો નહિ. (દુર્જને કરેલી નિંદાને નહિ ગણીને સંસારની નિવૃત્તિમાં કારણભૂત સત્સંગ; ઉત્સાહપૂર્વક કરવો.) (૨૫)

પોતાની ઈચ્છા પ્રમાણે વર્તનાર તેમ જ અહિંસા-બ્રહ્મચર્યાદિ નિયમોથી ભ્રષ્ટ થયેલા ભગવાનના ભક્તનો પણ આ લોકમાં સમાગમ કરવો નહિ. બીજાં પંચ મહાપાપ કરનાર જે કોઈ હોય તેનો સંગ ક્યારેય પણ કરવો નહિ. (૨૬) બ્રહ્મ અને આત્માનો સાક્ષાત્કાર જેણે પ્રાપ્ત કર્યો છે એવો પણ જે પુરુષ જગતના સ્વામી શ્રીકૃષ્ણનું અપમાન કરનાર હોય અને શ્રીકૃષ્ણના વરાહાદિ અવતારમાં શ્રદ્ધા ના હોય તે પુરુષનો દૂરથી જ ત્યાગ કરવો. (૨૭) જે પુરુષ બહારથી ચાંલ્લા સહિત ઊર્ધ્વપુંડ્ર તિલક અમારા સંપ્રદાયનું ચિહ્ન ધારણ કરનારો, ગુપ્તપણે સ્ત્રી આદિકમાં આસક્તિવાળો હોય; તે પુરુષનો દૂરથી ત્યાગ કરવો. (૨૮) બાહ્ય ઈન્દ્રિયોના જયરૂપી શાંતિ, અંતઃકરણના જયરૂપી દાંતિ, ઉપરતિ-વાસનાનો ક્ષય, શીત-ઉષ્ણાદિકની સહનશીલતારૂપી તિતિક્ષા અને આસ્તિકતા વગેરે દેવાદિકોને પણ દુર્લભ એવા સદ્ગુણોએ યુક્ત થવું. (૨૯) પોતાના જીવાત્માનો તથા પરમાત્માનો પ્રત્યક્ષ અનુભવ થયો હોય તો પણ મારાં આશ્રિતજનોએ આ લોકમાં માયિક પદાર્થોમાં ક્યારેય પણ લોભાવું નહિ. (૩૦)

પૂર્વે થયેલા, યોગસિદ્ધિને પામેલા મોટા પુરુષોએ જે ધર્માચરણ કર્યું હોય તે ગ્રહણ કરવું અને દેશકાળાદિના વિષમપણાથી અથવા આપત્કાળના વશપણાથી મોટા પુરુષોએ અધર્માચરણ કર્યું હોય તે ગ્રહણ કરવું નહિ. (૩૧) આશ્રમીઓને શાસ્ત્રવિહિત બ્રહ્મચર્યવ્રત મુખ્ય જેમાં છે એવા, ભક્તિની સિદ્ધિમાં ઉપકારક સાધનો વિના જ તત્કાળ જ મહાફળવાળી ભક્તિનો જો કોઈ (મૂર્ખ માણસ) ઉપદેશ આપે (ભક્તિથી જ તો સર્વ ફળ પ્રાપ્ત થાય છે, બ્રહ્મચર્યાદિ ધર્માચરણથી શું ? એમ કહે) તો તેણે ઉપદેશ આપેલી ભક્તિએ સહિત તે ઉપદેશ કરનારને મારો ભક્ત ત્યાગ કરે પરંતુ પોતાના નિયમનો ત્યાગ કરે નહિ. (૩૨-૩૩) ધર્મ = અધિકાર પ્રમાણે સત્શાસ્ત્રમાં કહેલો સદાચાર, જ્ઞાન=જીવ-માયા અને પરમાત્માના સ્વરૂપનું સત્શાસ્ત્ર અને સદ્ગુરુથી યથાર્થ જાણવું, વૈરાગ્ય = પરમાત્મા વિના બીજા રમણીય વિષયોમાં પ્રીતિના અભાવરૂપ; એ ત્રણ ભગવાનની સપ્રેમ નવ પ્રકારના ભેદવાળી ભક્તિના અંગો છે. અનુક્રમથી ધર્મ તે ભક્તિનું મસ્તક છે.



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

धर्मो ज्ञानं च वैराग्यं भक्तेर्वेद्यानि तत्त्वतः। अङ्गानि त्रीण्युत्तमाङ्गहृत्पादाख्यान्यनुक्रमात् ॥३४॥ धर्मप्रतिज्ञां कृत्वादौ न पालयति यस्तु ताम् । स तु श्वपचवज्ज्ञेयः पुमान् योषिच्च तादृशी ॥३५॥ लोभकामक्रुधादीनां वशे भाव्यं न वैरिणाम् । द्वाराणि निरयस्येति वेदितव्याश्च तेऽखिलैः ॥३६॥ सम्प्राप्तस्तीव्रवैराग्यं परं ज्ञानं च धर्मवान् । कृष्णं भजेत् प्रेम्णा यः सेव्यः स गुरुवत्पुमान् ॥३७॥ गोलोके चाथ वैकुण्ठे श्वेतद्वीपे मनोहरे । यच्चैश्वर्यं ब्रह्मपुरे श्रव्यं श्राव्यं च तद्भृशम् ॥३८॥ सपार्षदा ईश्वरा ये तत्तद्धामसु संस्थिताः । राधिकाद्याः शक्तयश्च तेषु मुक्ताश्च ये स्थिताः ॥३९॥ एतत्सर्वं स्वहृदये चिन्तनीयं निरन्तरम् । येनान्तकालेऽपि भवेत्तत्स्मृतिर्मुक्तिदायिनी ॥४०॥ ब्रह्मभूतैरपि प्राज्ञैः कृष्णस्य श्रवणादिका । भक्तिरेव विधातव्या नित्यदाऽत्र शुकादिवत् ॥४१॥ पादोदकं च नैवेद्यं ग्राह्यं स्याद्यच्च सत्पतेः । स्वजातिधर्मानुगुणं तद्ग्राह्यं नान्यथा क्वचित् ॥४२॥ अयाचते ह्यभक्ताय नैवेद्यं चरणाम्बु च । तदीयं नैव दातव्यं देयं भक्त्या तु याचते ॥४३॥ रङ्का अपि हरेर्भक्ता नावमान्या हि कर्हिचित् । अवमानात्तादृशानां भवत्येव महद्भयम् ॥४४॥ वैष्णवस्य रुजार्तस्य सेवा कार्या यथा हरेः । अन्नादि देयं तस्मै च तद्रुच्यनुसृतं तु यत् ॥४५॥ सतां च महतामग्रे दोषा वाच्या य आत्मनः । स्वमुखेन न कर्तव्यं स्वगुणानां प्रशंसनम् ॥४६॥ देवस्य च गुरो राज्ञो विष्णुभक्तस्य चाग्रतः । पादौ प्रसार्य मत्पुम्भिर्नोपवेश्यं च संसदि ॥४७॥ तेषामग्रे विचार्यैव वाच्यं सत्यं च तत्प्रियम् । तेषां गुह्यं च यत्किञ्चित्तत्प्रकाश्यं न कुत्रचित् ॥४८॥ द्रोहः

---

જ્ઞાન ભક્તિનું હૃદય છે. વૈરાગ્ય તે ભક્તિનાં ચરણ છે. (૩૪) જે પુરુષ પ્રથમ ધર્મની પ્રતિજ્ઞા (= હું આટલા જપ કરીશ વગેરે) કરી પાલન કરતો નથી તે પુરુષ તો શ્વપચ (ભંગી) તુલ્ય જાણવો. અને સ્ત્રી પણ તેવી જાણવી. (૩૫) સર્વે મારા આશ્રિતજનોએ લોભ-કામ-ક્રોધ વગેરે અંતઃશત્રુઓના આધીનપણે થવું નહિ. તે લોભાદિ શત્રુઓ નરકનાં દ્વાર છે. (બારણાની માફક પ્રવેશનાં સ્થાન છે.) (૩૬) જે પુરુષ દૃઢ વૈરાગ્યવાળો તથા કહેલા શ્રેષ્ઠ જ્ઞાનવાળો અને પોતાના ધર્મમાં નિષ્ઠાવાળો અત્યંત સ્નેહથી નવ પ્રકારની ભક્તિથી પરબ્રહ્મની સેવા કરતો હોય તે પુરુષ સર્વ પ્રકારે ગુરુની માફક સેવા કરવા યોગ્ય છે. (૩૭)

મનોહર એવા ગોલોક-વૈકુંઠ-શ્વેતદ્વીપ અને બ્રહ્મપુરમાં જે અત્યંત ઐશ્વર્ય છે તે વારંવાર સાંભળવું અને સંભળાવવું. (૩૮) તે તે ધામોમાં પોતપોતાના પાર્ષદોએ સહિત શ્રી વાસુદેવાદિ મૂર્તિઓ નિત્ય રહેલી છે તેમજ રાધિકાદિ શક્તિઓ શ્રી વાસુદેવની અંગનાઓ રહેલી છે અને જે ત્યાંના મુક્તો રહેલા છે. (૩૯) તે ગોલોકાદિ ધામો અને તેમાં રહેલા શ્રી વાસુદેવાદિ ઈશ્વરો વગેરે સર્વનું પોતાના અંતઃકરણમાં નિરંતર ચિંતવન કરવું. જે ચિંતનથી અંતકાળમાં પણ પોતાને મોક્ષ આપનારી તેમની સ્મૃતિ થાય. (૪૦) આ લોકમાં બ્રહ્મભાવને પામેલા પણ જ્ઞાનીજનોએ શ્રીકૃષ્ણ ભગવાનની શ્રવણાદિ નવ પ્રકારની ભક્તિ શુકાદિની માફક નિરંતર કરવી. (૪૧)

સત્પુરુષોના સ્વામી શ્રીકૃષ્ણનું જે ચરણામૃત અને નિવેદન કરાયેલું અન્ન તે ગ્રહણ કરવું. તે ચરણોદક અને નૈવેદ્ય પોતાની જાતિના ધર્મને અનુસરી ગ્રહણ કરવું. ક્યારેય પણ ભગવાનના માહાત્મ્યનું અવલંબન કરી અન્યથા ગ્રહણ કરવું નહિ. (૪૨) શ્રીકૃષ્ણના સંબંધવાળુ નૈવેદ્ય (પ્રસાદ) અને ચરણોદક 'મને આપો' એવી પ્રાર્થના નહિ કરનાર ભક્ત હોય તો પણ આપવું નહિ. પ્રાર્થના કરનાર ભક્તને તો આપવું. શ્રીકૃષ્ણ ભગવાનની ભક્તિ રહિત હોય તે યાચના કરતો હોય તો પણ આપવું નહિ. (૪૩)

ભગવાનના ભક્તજનો રાંક હોય તો પણ તેનું ક્યારેય પણ અપમાન કરવું નહિ. કારણ કે તેવા ભક્તોના અપમાનથી મોટો ભય ઉત્પન્ન થાય છે. (૪૪) રોગથી પીડા પામેલા ભગવાનના ભક્તની સેવા પરમાત્માની જ જેમ કરવી. તેમની રુચિ અનુગુણ અન્નાદિ આપવું. (૪૫)

સ્વધર્માદિનિષ્ઠ સાધુઓની આગળ પોતાના દોષો કહેવા પરંતુ પોતાને મુખે પોતાના ગુણોની પ્રશંસા કરવી નહિ. (૪૬) દેવ-ગુરુ-રાજા અને ભગવાનના ભક્તોની આગળ તેમજ સભામાં લાંબા પગ કરીને મારા આશ્રિતોએ બેસવું નહિ. (૪૭) તેમની આગળ દેશ-કાળાદિકનો વિચાર કરી સત્ય અને તેમનું પ્રિય થાય તેમ બોલવું. અને તેમની જે કંઈ ગુહ્ય વાર્તા હોય તે કોઈની આગળ પ્રકાશ કરવી નહિ. (૪૮) કોઈ પણ પ્રાણીનો દ્રોહ શરીર-વાણી અને મનથી કોઈ પણ પ્રકારે

कार्यो न कस्यापि स्तेयं वर्ज्यं च सर्वथा । हितावहं परेषां च कर्तव्यं सत्यभाषणम् ।।४९।। न कार्यं वर्णसाङ्कर्यं न च स्वपरहिंसनम् । नान्योद्वेगकरं वाच्यं नापवादवचस्तथा ।।५०।। अभिव्रजेन्निजाचार्यं श्रुत्वाऽऽयान्तं मदाश्रितः । प्रतिगच्छति तस्मिंश्चाऽऽग्रामान्तं तमनुव्रजेत् ।।५१।। वैष्णवे वीक्षमाणे च नैष्ठिकव्रतशालिनि । ईर्ष्यां परस्यापमानं गालिदानं च नाचरेत् ।।५२।। एकान्तिकानां भक्तानामन्येषां महतामपि । गुणोत्कर्षं सभायां हि कीर्तयेन्नागुणं क्वचित् ।।५३।। ब्राह्मणान् भगवत्प्रेष्ठान्विदित्वा मानयेत्सदा । दृष्ट्वा देवालयं दूरान्नमस्कुर्यात्कृताञ्जलिः ।।५४।। नास्तिकापाश्रयं नैव मदीयः प्रविशेत्क्वचित् । तदाचार्यैर्न भाषेत तद्ग्रन्थाञ्छृणुयान्न च ।।५५।। साधारणा मदीयानां त्यागिनां गृहिणामपि । धर्मा एते मया प्रोक्ता विशेषान् कथयाम्यथ ।।५६।। वेदपाठो गुरोः सेवा कर्तव्या ब्रह्मचारिभिः । वानप्रस्थैस्तपः कार्यमहिंसाश्च मखा अपि ।।५७।। संन्यासिभिश्च नियतं स्थातव्यमपरिग्रहैः । विष्णुपूजौंकारजपौ कर्तव्यौ तैश्च नित्यदा ।।५८।। द्रव्यस्य हेमरूप्यादेर्गृहिवर्जं मदाश्रितैः । त्याग आश्रमिभिः कार्यस्त्यागिभक्तैश्च सर्वथा ।।५९।। त्याज्यः सङ्गोऽष्टधा स्त्रीणामेतैस्तत्प्रतिमाऽपि च । नेक्ष्या न कार्या न स्पृश्या देवताप्रतिमां विना ।।६०।। स्त्रीभ्यो धनुःप्रमाणेन गम्यं दूरेण सर्वथा । हर्युत्सवाल्पमार्गादौ रक्ष्यं स्त्रीस्पर्शतो वपुः ।।६१।। यत्र यत्र स्थले स्त्रीणां या या काचित्क्रिया भवेत् । तत्र तत्र क्रिया सा सा न कार्या नैष्ठिकैर्मम ।।६२।।

---

કરવો નહિ. અને ચોરીનું કાર્ય કોઈપણ પ્રકારે કરવું નહિ. બીજાઓનું પ્રાણ રક્ષણ થાય તેવું સત્ય ભાષણ કરવું. (પૂર્વશ્લોકમાં કહેલું હોવા છતાં અહીં અસત્ય બોલવાથી પણ પ્રાણ રક્ષણની આવશ્યકતા છે એમ બતાવે છે : જે પોતાના સત્ય વચન બોલવાથી પારકો અથવા પોતાનો દ્રોહ થાય તેવું સત્ય વચન બોલવું નહિ.) (૪૯) જાતિથી ભ્રષ્ટ કરનાર, જેનું ખપતું ના હોય તેનું અન્ન-જળ ગ્રહણ કરવા રૂપ કર્મ કરવું નહિ. પોતાની અને પારકી હિંસા કરવી નહિ. બીજાને ઉદ્વેગ કરનારું વચન ઉચ્ચારણ કરવું નહિ તથા મિથ્યાપવાદનું વચન બોલવું નહિ. (૫૦)

મારા આશ્રિતજને પોતાના ગામમાં આવતા પોતાના આચાર્યને સાંભળીને ગામની સીમા પર્યંત સન્મુખ જવું અને પોતાના આચાર્ય બીજે ગામ જાય ત્યારે ગામની સીમાપર્યંત પાછળ (વળાવવા) જવું. (૫૧) નૈષ્ઠિક બ્રહ્મચર્યવ્રતથી શોભાયમાન ભગવાનના ભક્તની દૃષ્ટિ આગળ બીજા કોઈ પણ માણસની ઈર્ષ્યા કરવી નહિ. પારકાનું અપમાન તેમ જ ગાળો દેવી વગેરે કરવું નહિ. (૫૨) એકાંતિક ત્યાગી અથવા ગૃહસ્થ ભક્તજનો તથા રાજ્યના અધિકારી વગેરે જે કોઈ વિદ્યા-ધનાદિ ગુણોથી મોટા હોય તેમના ગુણોની પ્રશંસા સભામાં કરવી પણ દોષ ક્યારેય કહેવા નહિ. (૫૩) ભગવાનને બ્રાહ્મણો અતિ પ્રિય છે એમ જાણીને નિરંતર સન્માન કરવું. વિષ્ણુ, શિવ વગેરેનાં દેવમંદિરો દૂરથી જોઈને હાથ જોડીને મારા ભક્તોએ નમસ્કાર કરવા. (૫૪)

મારા ભક્તે ક્યારેય પણ નાસ્તિકના અપાસરામાં (જૈન મંદિરમાં) પ્રવેશ કરવો નહિ. તેમના આચાર્યોની સાથે ભાષણ કરવું નહિ. નાસ્તિકના ગ્રંથો સાંભળવા નહિ. (૫૫) આ ધર્મો મારા આશ્રિત ત્યાગી અને ગૃહસ્થોએ પણ સામાન્યપણે પાલન કરવાના મેં કહ્યા છે. હવે વિશેષ ધર્મો કહું છું. (૫૬) **પ્રથમ બ્રહ્મચારીના ધર્મો કહે છે :** મારા આશ્રિત બ્રહ્મચારીઓએ વેદનો પાઠ તથા ગુરુની સેવા કરવી. વાનપ્રસ્થોએ ટાઢ-તડકો અને વરસાદ વગેરેનું સહન કરવા રૂપ તપ કરવું. હિંસાએ રહિત યજ્ઞો પણ કરવા. (૫૭) સંન્યાસીઓએ નિયમ પૂર્વક શાસ્ત્રવિહિત વિના પદાર્થનો સંગ્રહ કરવો નહિ, એમ વર્તવું. તેમણે વિષ્ણુની પૂજા અને ૐકારનો જપ હંમેશાં કરવો. (૫૮)

**હવે બ્રહ્મચારી આદિ ચાર પ્રકારના ત્યાગીઓના મિશ્રિત ધર્મો કહે છે :** ગૃહસ્થ સિવાયના મારા આશ્રિત બ્રહ્મચારી આદિ ત્રણ આશ્રમીઓએ તથા સાધુઓએ સુવર્ણ, ચાંદી વગેરે ધનનો સર્વ પ્રકારે ત્યાગ કરવો. (પોતાની પાસે દ્રવ્ય રાખવું નહિ તેમજ રખાવવું પણ નહિ.) (૫૯) આશ્રમીઓએ તથા સાધુઓએ આઠ પ્રકારે સ્ત્રીઓનો ત્યાગ કરવો. શ્રી રાધા-લક્ષ્મી વગેરે દેવતાની પ્રતિમા વિના, સ્ત્રીઓની પ્રતિમા જોવી નહિ. પોતે ચીતરવી નહિ. તેનો સ્પર્શ પણ કરવો નહિ. (૬૦) એમણે સ્ત્રીઓથી ચાર હાથ દૂર માર્ગમાં ચાલવું. જન્માષ્ટમી-પ્રબોધિની વગેરે પરમાત્માના ઉત્સવોમાં ઘણા જનસમૂહ હોય ત્યારે અને સાંકડો માર્ગ હોય તેમાં સ્ત્રીના સ્પર્શથી પોતાના શરીરનું રક્ષણ કરવું. (તેનો સ્પર્શ ન થાય તેમ વર્તવું.) (૬૧) જે જે સ્થાનમાં સ્ત્રીઓની જે જે ક્રિયા થતી હોય તે તે સ્થાનમાં તે ક્રિયા મારા આશ્રિત નૈષ્ઠિક બ્રહ્મચારી વગેરેએ કરવી નહિ. (૬૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

गृहद्वयान्तरस्थेन कुड्येनैकेन यत्र च । स्यात्स्त्रीपुंसान्तरं तत्र न स्वप्यं निश्यनापदि ।।६३।। स्त्रीभिः कृष्णस्य भक्ताभिरपि पूजितमच्युतम् । नैष्ठिकव्रतिभिर्नैव गन्तव्यं वीक्षितुं क्वचित् ।।६४।। विना भैक्षं सभां वाऽपि गृहस्थानां गृहाणि च । गन्तव्यानि क्वचिन्नैव त्यागिभिर्यैर्मदाश्रितैः ।।६५।। एकाकिभिर्न गन्तव्यं तैः कदाचन कुत्रचित् । शयितव्यं न खट्वायां विना रोगादिमापदम् ।।६६।। अनापदि न गन्तव्यं निशि वर्त्म च तैः क्वचित् । तथैव च निजस्थानाद्गन्तव्यं न बहिर्निशि ।।६७।। आपद्धर्मश्च विपदि ग्राह्योऽन्यत्र बृहद्व्रतात् । प्राणात्ययेऽपि न त्याज्यं ब्रह्मचर्याङ्गमष्टमम् ।।६८।। ऋषभार्षभवन्मानस्त्यक्तव्यस्त्यागिभिर्नरैः । ब्रह्मात्मधीभिर्मच्छिष्यैर्देहासक्तिस्तथैव च ।।६९।। निवृत्तिधर्मनिरतैरीश्वरस्य गुरोरपि । प्रवृत्त्यध्वपरं वाक्यं ग्रहीतव्यं न कर्हिचित् ।।७०।। विधवानां तु नारीणां चातुर्मास्ये विशेषतः । धारणापारणादीनि व्रतानि विहितानि वै ।।७१।। ताभिः पाल्यं ब्रह्मचर्यमप्रस्खलितमष्टधा । पुमांस्तत्प्रतिमा वापि न स्प्रष्टव्या विनाऽऽमरीम् ।।७२।। धर्मकार्येऽपि न द्रव्यं स्वनिर्वाहोपयोगि यत् । ताभिर्देयं कदापीति मदाज्ञाऽस्ति जनाः ! खलु ।।७३।। बाला युवत्यो वृद्धा वा सधवा विधवास्तथा । स्त्रियः स्वतन्त्रा नैव स्युः पित्रादेः स्युर्वशे सदा ।।७४।। स्वातन्त्र्येण न कर्तव्यं स्वसम्बन्धिजनान्विना। तीर्थक्षेत्राटनं स्त्रीभिः सर्वाभिरपि कर्हिचित् ।।७५।। सुवासिनीभिर्नारीभिराश्रिताभिस्तु मां निजः। अन्धो रुग्णो जरन्वापि सेव्य ईश्वरवत्पतिः ।।७६।। शीलमेव सदा रक्ष्यं ताभिः सन्त्यज्य चापलम् । श्वाशुर्यं च कुलं पित्र्यं लाञ्छनीयं न तु क्वचित् ।।७७।।

---

બે ઘરોની વચ્ચે એક જ ભીંત હોય અને તે (પાસેના ઘરમાં એક જ સ્ત્રી રહેતી હોય તેવા) બીજા ખાલી ઘરમાં આપત્કાળ પડ્યા વિના નૈષ્ઠિક વ્રતધારીઓએ રાત્રીમાં સૂવું નહિ અર્થાત્ તેવા ઘરમાં નિવાસ કરવો નહિ. (તેવા સ્થાનમાં સ્ત્રી-સ્મરણથી નૈષ્ઠિક વ્રતનો ભંગ થાય એવું તાત્પર્ય છે. ) (૬૩) શ્રીકૃષ્ણનાં ભક્ત એવા પણ સ્ત્રીઓએ પૂજેલા વિષ્ણુ(શાલિગ્રામ)નાં દર્શન માટે નૈષ્ઠિક વ્રતધારીઓએ ક્યારેય જવું નહિ. (૬૪) મારા આશ્રિત ત્યાગીઓએ ભિક્ષા અથવા સભાપ્રસંગ વિના ગૃહસ્થોનાં ઘરો પ્રત્યે ક્યારેય પણ જવું નહિ. (૬૫) બ્રહ્મચારી આદિક ત્યાગીઓએ કોઈ સમયે પણ કોઈ સ્થાનમાં એકલા જવું નહિ. રોગાદિ આપત્કાળ પડ્યા વિના ખાટલા ઉપર સૂવું નહિ. (૬૬) ત્યાગીજનોએ આપત્કાલ વિના ક્યારેય પણ રાત્રીમાં માર્ગે જવું નહિ. તેવી જ રીતે રાત્રીમાં પોતાના સ્થાનથી બહાર જવું નહિ. (૬૭) બ્રહ્મચર્ય-વ્રતથી બીજે આપદ્ધર્મ ગ્રહણ કરવો. બ્રહ્મચર્યમાં આપત્કાળ ગ્રહણ કરવો નહિ, અર્થાત્ બ્રહ્મચર્યવ્રતનો આપત્કાળમાં પણ ત્યાગ કરવો નહિ. (આઠમું બ્રહ્મચર્યવ્રત તો પોતાના પ્રાણનો ત્યાગ થાય તો પણ તજવું નહિ.) (૬૮) બ્રહ્મનિષ્ઠ મારા ત્યાગી શિષ્યોએ ઋષભદેવ, જડભરત વગેરેની માફક માનનો ત્યાગ કરવો તથા દેહમાં આસક્તિ રાખવી નહિ. (૬૯) નિવૃત્તિધર્મમાં પ્રીતિવાળા પુરુષોએ પ્રવૃત્તિધર્મપરાયણ વાક્ય ઈશ્વરનું અથવા ગુરુનું હોય તોપણ ક્યારેય ગ્રહણ કરવું નહિ. (૭૦)

**હવે વિધવા સ્ત્રીઓના ધર્મો કહે છે :** મારા આશ્રિત વિધવા સ્ત્રીઓને ચાતુર્માસમાં વિશેષપણે ધારણા પારણા વગેરે વ્રતો કરવા પણે નિશ્ચે કહેલાં છે. (૭૧) વિધવા સ્ત્રીઓએ કોઈ પણ પ્રકારે ખામી વિનાનું અષ્ટ પ્રકારે બ્રહ્મચર્યવ્રત પાલન કરવું. દેવતાની પ્રતિમા વિના પુરુષ તેમજ પુરુષની પ્રતિમાનો પણ સ્પર્શ કરવો નહિ. (૭૨)

હે જનો ! વિધવા સ્ત્રીઓએ પોતાના દેહના નિર્વાહમાં ઉપયોગી દ્રવ્ય હોય તો તે ધર્મકાર્યમાં પણ આપવું નહિ. આ પ્રમાણે મારી આજ્ઞા છે. (૭૩) **સધવા-વિધવા સ્ત્રીઓના મિશ્રિત ધર્મો કહે છે :** બાલિકા, યુવતી, વૃદ્ધા, વિધવા અને સધવા સ્ત્રીઓએ સ્વતંત્રપણે વર્તવું નહિ. હમેશાં પિતા વગેરેની આજ્ઞામાં રહેવું. (૭૪) સર્વ સધવા અને વિધવા સ્ત્રીઓએ પોતાના સમીપ સંબંધીજનો વિના સ્વતંત્રપણે તીર્થક્ષેત્રમાં ક્યારેય ગમન કરવું નહિ. (પરંતુ પોતાનાં સંબંધીજનોની સાથે જવું.) (૭૫)

**હવે બે શ્લોકોથી સુવાસિનીના ધર્મો કહે છે :** મારા આશ્રિત સુવાસિની નારીઓએ પોતાનો પતિ અંધ, રોગી, વૃદ્ધ હોય તોપણ ઈશ્વરની માફક પરિચર્યા કરવી. (૭૬) સુવાસિની સ્ત્રીઓએ ઈન્દ્રિયોની ચંચળતાનો ત્યાગ કરીને પાતિવ્રત્યરૂપ સદ્‌વૃત્તાંત રાખવું. પોતાના સસરાનું કુળ તેમજ પોતાના પિતાના કુળને ક્યારેય લાંછન લગાડવું નહિ. (૭૭)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

उद्वाहितेतरा नार्यो गृहिभिः स्वप्रसूसमाः । द्रष्टव्या व्यवहार्यं च सम्बद्धासु यथोचितम् ॥७८॥ स्त्रीसम्बन्धस्य नैकट्ये कृष्णस्य गृहिभिः कथा । कर्तव्या दूरतः स्थित्वा न तु सर्वत्र सर्वदा ॥७९॥ रहःस्थाने तु मात्रा वा भगिन्या कन्ययाऽपि वा। सहासितव्यं न क्वापि गृहस्थैरप्यनापदि ॥८०॥ बुद्धिपूर्वं तु विधवा न स्पृश्या गृहिभिः क्वचित् । आसन्नसम्बन्धहीना योषाऽऽपत्कालमन्तरा ॥८१॥ नित्यं पञ्च महायज्ञाः कर्तव्या गृहिभिर्जनाः! । पूज्याश्च साधवो भक्त्या दानं कार्यं च शक्तितः ॥८२॥ स्वातिप्रियपदार्थस्य पात्रे यत्स्त्रीं विनाऽर्पणम् । मानेर्ष्यादम्भरुड्हीनं तद्दानं चावबुध्यताम् ॥८३॥ अहिंसयज्ञाः पूर्तं च कार्यमाढ्यैर्गृहस्थितैः । पुण्यक्षेत्रेषु दानानि विप्रसन्तर्पणादि च ॥८४॥ उपायानां चतुष्केण विना प्राणिवधं नृपैः । स्वकार्यसिद्धिः कर्तव्या राजनीत्या मदाश्रितैः ॥८५॥ राजधर्मेष्वपि प्रोक्तं प्राणिघातवचस्तु तैः । युद्धादन्यत्र न ग्राह्यं रक्ष्याश्च पितृवत्प्रजाः ॥८६॥ नियमेषु मदुक्तेषु यस्य यस्य च्युतिर्भवेत् । तस्य तस्य विधातव्यं प्रायश्चित्तं यथोचितम्॥८७॥ एतैर्मदुक्तैः सद्धर्मैर्ज्ञानवैराग्यसंयुतैः । स्वाधिकारानुसारेण दम्भहीनं स्वनुष्ठितैः ॥८८॥ निश्छद्म सेवया विष्णोस्तदीयानां च भक्तितः । दयया सर्वभूतेषु लोभादेर्वर्जनेन च ॥८९॥ तत्सम्मुखीकरणतो यस्य कस्यापि देहिनः । प्रसीदत्याशु स इति ज्ञातव्यं नात्र संशयः ॥९०॥ नृदेहं दुर्लभं लब्ध्वा जीवाः सदुपदेशतः । हर्युन्मुखा ये जायन्ते ते तरन्ति भवाम्बुधिम् ॥९१॥ चिन्तामणिसमो ज्ञेयो नृदेहोऽयं विचक्षणैः । स्वर्गो मोक्षस्तदन्यद्वा स्वेप्सितं प्राप्यतेऽमुना ॥९२॥

**સાત શ્લોકોથી ગૃહસ્થના ધર્મો કહે છે :** મારા આશ્રિત ગૃહસ્થ ભક્તોએ પરણેલી સ્ત્રી વિના, સ્ત્રીઓને પોતાની માતાની બુદ્ધિથી જોવી. પોતાની સંબંધી સ્ત્રીઓમાં (માતા, બહેન, દીકરી, ભાર્યા વગેરે સાથે) યથાયોગ્ય વ્યવહાર કરવો. (૭૮) માતા, બહેન વગેરે સમીપ સંબંધીમાં ગૃહસ્થોએ દૂર રહીને ભગવાનની કથા સમય પ્રમાણે કરવી. પરંતુ સર્વ ઠેકાણે સર્વદા કરવી નહિ. (૭૯) ગૃહસ્થોએ પણ આપત્કાળ પડ્યા વિના એકાંત સ્થળમાં તો મા-બહેન અને દીકરી સાથે પણ ક્યારેય બેસવું નહિ. (યુવાન અવસ્થામાં રહેલા મા-બહેન વગેરે જાણવાં.) (૮૦) ગૃહસ્થોએ આપત્કાળ વિના સમીપ સંબંધે રહિત વિધવા સ્ત્રીનો ક્યારેય પણ જાણીને સ્પર્શ કરવો નહિ. (૮૧) હે જનો ! ગૃહસ્થોએ દરરોજ પાંચ મહાયજ્ઞો (ભૂતયજ્ઞ-પિતૃયજ્ઞ-દેવયજ્ઞ-મનુષ્યયજ્ઞ-બ્રહ્મયજ્ઞ) કરવા, પોતાના ધર્મમાં નિષ્ઠાવાળા સાધુઓ ભક્તિપૂર્વક પૂજવા, અને શક્તિ પ્રમાણે દાન આપવું. (૮૨) માન, ઈર્ષ્યા, દંભ અને ક્રોધે રહિત પોતાની સ્ત્રી વિના પોતાને અતિ પ્રિય પદાર્થનું સત્પાત્રમાં જે અર્પણ કરવું તે દાન કહેવાય છે. (૮૩) ધનવાન ગૃહસ્થોએ પ્રાણી હિંસા રહિત યજ્ઞો કરવા અને વાવ્ય, કૂવા, બગીચા, દેવસ્થાન વગેરે પૂર્ત કર્મ કરવાં અને પુણ્ય ક્ષેત્રોમાં દાન કરવાં અને બ્રાહ્મણભોજનાદિ યુક્ત મહોત્સવો કરવા. (૮૪)

**હવે બે શ્લોકોથી રાજધર્મો કહે છે :** મારા આશ્રિત રાજાઓએ પ્રાણીના વધ વિના સામ, દામ, ભેદ, દંડ એ ચાર ઉપાયોથી વિદુરાદિએ કહેલી નીતિને અનુસરી પોતાના કાર્યની સિદ્ધિ કરવી. (૮૫) રાજાઓએ રાજધર્મોમાં કહેલું પ્રાણીવધનું વચન યુદ્ધ વિના બીજે ગ્રહણ કરવું નહિ. (યુદ્ધમાં જ પ્રાણીવધ, બીજે નહિ.) પિતાની માફક, પિતા જેમ પોતાના પુત્રાદિકનું રક્ષણ કરે છે તેમ પ્રજાનું પાલન કરવું. (૮૬)

મેં કહેલા નિયમોમાં (બ્રાહ્મમુહૂર્તમાં ઊઠવું વગેરેમાં) જે જે નિયમનો ભંગ થાય તે તે નિયમનું યથાયોગ્ય પ્રાયશ્ચિત્ત કરવું. (૮૭) હાલમાં જે સાધનોથી ભગવાન તત્કાળ પ્રસન્ન થાય છે તે (ત્રણ શ્લોકથી) બતાવે છે : જ્ઞાન = જીવ, માયા અને પરમાત્માના સ્વરૂપને સારી રીતે જાણવું તથા વૈરાગ્ય = ભગવાન વિના બીજા પદાર્થમાં પ્રીતિ નહિ, તે બંનેથી યુક્ત દંભે રહિત પોતાના અધિકાર પ્રમાણે મેં કહેલા સદ્ધર્મોથી તથા શ્રીકૃષ્ણ અને તેમના ભક્તોની પ્રીતિપૂર્વક કપટે રહિત સેવાથી-સર્વ પ્રાણીઓમાં શક્તિ પ્રમાણે હિતના આચરણરૂપ દયાથી-લોભ, કામ, ક્રોધ, માન વગેરેનો ત્યાગ કરવાથી અને જે કોઈ પણ મનુષ્યને શ્રીકૃષ્ણનો આશ્રય કરાવવાથી : આ સાધનોથી શ્રીકૃષ્ણ ભગવાન તત્કાળ પ્રસન્ન થાય છે. (૮૮-૮૯-૯૦)

જે જીવો દુર્લભ મનુષ્યદેહ પામીને સાધુજનોના ઉપદેશથી શ્રીકૃષ્ણ પરમાત્માના આશ્રયવાળા થાય છે તે જીવો સંસારસાગર તરે છે. (૯૧) સત્‌અસત્‌ના વિવેકીજનોએ આ મનુષ્યદેહ ચિન્તામણિ સમાન જાણવો, કારણ કે મનુષ્યદેહથી સ્વર્ગ-મોક્ષ અને બીજું પણ પોતાને ઈચ્છિત પ્રાપ્ત થાય છે. (૯૨) આ મનુષ્યદેહ સંસાર-સાગરમાં નૌકા જ છે. જે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

भवाब्धौ प्लव एवासौ गुरुर्यस्यास्ति नाविकः। अनुकूलो मरुत्कृष्णस्तेनार्थं को न साधयेत् ॥९३॥ सुखं वैषयिकं यत्तद्देहेषु निखिलेष्वपि । सामान्यमस्तीति बुधो नृदेहस्थो हरिं भजेत् ॥९४॥ कालाहितुण्डपतितं देहं च क्षणभङ्गुरम् । विदित्वा बुद्धिमानत्र स्वार्थं संसाधयेद्द्रुतम् ॥९५॥ स्वस्य या नरदेहस्य प्राप्तिर्देवार्थितस्य वै । इयमेव कृपा ज्ञेया तदीया तु विचक्षणैः ॥९६॥ लब्ध्वाऽपि तं च तद्भक्तौ नियमैर्धर्मपालने। हेतुं वदन्ति ये कालं प्रारब्धं वा कृपां हरेः ॥९७॥ अपौरुषास्तु ते मूढा असङ्ख्यैरपि जन्मभिः । लभन्ते नैव तं क्वापि बम्भ्रम्यन्ते च संसृतौ ॥९८॥ तस्माद्भवद्भिः सततं स्वधर्मनियतस्थितैः। उत्साहेनैव कर्तव्या तद्भक्तिः श्रद्धयान्वितैः ॥९९॥ स्नानं ध्यानं हरेः पूजा जपश्च गुणकीर्तनम् । सत्सङ्गश्चेति सर्वेषां षट्कर्माणि दिनेदिने ॥१००॥ यावद्देहस्मृतिर्वः स्यात्स्वस्वधर्मा मयोदिताः । तावन्नैते क्वचित्त्याज्या इत्याज्ञा मेऽस्ति सत्तमाः ! ॥१०१॥ सुव्रत उवाच-जगद्गुरोर्भगवतः साक्षात्तस्येति भारतीम् । सच्छास्त्रसम्मतां श्रुत्वा ते सर्वे मुदमाप्नुवन् ॥१०२॥ एवमेवाचरिष्यामो वयं सर्वेऽपि सत्पते ! । इत्युक्त्वा ते भगवते तस्मै प्रीत्या ववन्दिरे ॥१०३॥ तदाज्ञायां वर्तमानाः साक्षाच्छ्रीकृष्णमेव तम् । जानन्तस्ते दृढं श्रित्वा सर्वभावेन भेजिरे ॥१०४॥ नारायणमुनेर्गीतामेतां जनहितावहाम् । यः पठेच्छृणुयाद्वापि प्राप्नुयात्स निजेप्सितम् ॥१०५॥ एषा महाकल्पलता मनोवाञ्छितपूरणी । सर्वेषां प्राणिनां सेव्या सर्वथा स्वहितार्थिनाम् ॥१०६॥ एषा हि सर्वशास्त्रेभ्यो गीता ज्ञेया गरीयसी । यन्निःसृता स्वयं साक्षान्नारायणमुखाम्बुजात् ॥१०७॥

---

મનુષ્યદેહરૂપી નૌકાના ભગવત્પ્રાપ્તિ-માર્ગના ઉપદેષ્ટા ગુરુ કર્ણધાર છે. સાક્ષાત્ શ્રીકૃષ્ણ ભગવાન અનુકૂળ વાયુ છે તે મનુષ્યદેહથી કયો પરમ પુરુષાર્થ સિદ્ધ ના થાય ? અર્થાત્ બધાય સિદ્ધ થાય. (૯૩) વિષય સંબંધી જે સુખ છે તે સમગ્ર વરાહાદિ પશુશરીરોમાં સાધારણપણે વર્તે છે. માટે વિવેકી માણસ શ્રીકૃષ્ણને ભજે, (જેનાથી મુક્તિ મળે; તે માટે શ્રીહરિની ઉપાસના જ કરે.) (૯૪) આ લોકમાં બુદ્ધિમાન પુરુષ કાળરૂપી મહાસર્પના મુખમાં પડેલા દેહને ક્ષણમાં નાશ પામનારો જાણીને પોતાનાં આત્યંતિક મોક્ષમાં કારણભૂત સ્વધર્મે યુક્ત ભગવાનનું ભજન તત્કાળ કરે. આમાં વાર લગાડવી નહિ. (૯૫) દેવોને પણ પ્રાર્થનીય મનુષ્યદેહની જે પોતાને પ્રાપ્તિ, આ જ ભગવાનની અપાર કરુણા; વિચક્ષણ પુરુષોએ જાણવી. (૯૬) જે પુરુષો નરદેહ પામીને પણ શ્રીહરિની ભક્તિમાં તથા નિયમોથી ધર્મ પાળવામાં સત્યયુગાદિકાળ તથા પ્રારબ્ધમાં હોય તો પ્રભુ ભજાય અથવા ભગવાનની કૃપા હોય તો થાય વગેરે હેતુ બોલે છે. (૯૭) તે પુરુષો પુરુષાર્થ રહિત હોવાથી નપુંસક સમાન છે તે મૂઢ પુરુષો તો અસંખ્ય જન્મોથી પણ ક્યારેય પણ શ્રીહરિને પામતા નથી અને સંસારમાં વારંવાર ભમે છે. (૯૮)

માટે નિરંતર પોતાના ધર્મમાં નિયમપૂર્વક રહીને શ્રદ્ધાપૂર્વક ત્વરા યુક્ત થઈ, તમો મારા આશ્રિતોએ ઉત્સાહપૂર્વક જ શ્રીહરિની નવધા ભક્તિ કરવી. (૯૯) **સર્વ સત્સંગી વૈષ્ણવોને પ્રતિદિન કરવાનાં છ કર્મો કહે છે :** ૧. સ્નાન-પવિત્ર જળથી સ્નાન, ૨. સવારમાં ઊઠીને શ્રીહરિના સ્વરૂપના ચિંતનરૂપી ધ્યાન, ૩. આચાર્યે ઉપદેશ કરાયેલો શ્રીકૃષ્ણના અષ્ટાક્ષર મંત્રનો જપ, નિયમપૂર્વક માળા ફેરવવી તે, ૪. શ્રીહરિની માનસી પૂજા અને બાહ્યપૂજા, ૫. શ્રીકૃષ્ણની લીલાના ગુણોનું કીર્તન, અને ૬. શાસ્ત્રોક્ત લક્ષણવાળા સાધુનો સમાગમ રૂપી સત્સંગ : આ છ કર્મો સર્વ મારાં આશ્રિતોએ પ્રતિદિન કરવાં. (૧૦૦) હે સત્તમો-અતિશય શુદ્ધ મારા ભક્તો ! તમોએ જ્યાં સુધી દેહનું અનુસંધાન હોય ત્યાં સુધી મેં કહેલા પોતપોતાના ધર્મો ક્યારેય પણ ત્યાગ કરવા નહિ; પરંતુ પાલન જ કરવા : આ પ્રમાણે મારી આજ્ઞા છે. (૧૦૧) **સુવ્રતમુનિ કહે છે :** હે રાજન્ ! જગત્ગુરુ સર્વૈશ્વર્ય-સંપન્ન પ્રત્યક્ષ શ્રીહરિની સત્શાસ્ત્રસંમત આવી વાણી સાંભળીને મુકુંદાનંદ વર્ણી વગેરે સર્વ ભક્તો મહા આનંદ પામ્યા. (૧૦૨) હે સત્પતે ! અમો સર્વે તમોએ કહ્યા પ્રમાણે આચરણ કરીશું : આ પ્રમાણે કહીને તે ભક્તો ભગવાન શ્રીહરિને પરમ પ્રેમથી પ્રણામ કરવા લાગ્યા. (૧૦૩) તે શ્રીહરિને જ પ્રત્યક્ષ શ્રીકૃષ્ણ જાણનારા મુકુંદાનંદ વગેરે ભક્તો દઢ આશરો કરી તેમની આજ્ઞામાં વર્તતા થકા મન-શરીર અને વાણીથી શ્રીહરિની સેવા કરતા હતા. (૧૦૪)

**શ્રીનારાયણ ગીતાની ફલશ્રુતિ** :- જનોને હિત કરનારી આ નારાયણ મુનિએ પોતે પોતાના મુખારવિન્દથી કહેલી 'નારાયણગીતા'નો જે પાઠ કરે અથવા સાંભળે તે મનુષ્ય પણ પોતાનું ઈચ્છિત પ્રાપ્ત કરે. (૧૦૫) મનની ઈચ્છાઓને પૂર્ણ કરનારી કલ્પતરુની શાખા રૂપ આ શ્રી 'નારાયણગીતા' પોતાનું શ્રેય ઈચ્છનારાં સર્વ મનુષ્યોએ સેવા કરવા યોગ્ય છે. (૧૦૬) આ ગીતા સર્વ શાસ્ત્રોથી અતિશય મોટી નિશ્ચે જાણવી. જે માટે આ ગીતા પ્રત્યક્ષ શ્રીહરિકૃષ્ણ ભગવાનના મુખકમળથી નીકળેલી છે. (૧૦૭)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

य आचरन्तीह सनातनं श्रीनारायणेन स्वयमेव गीतम् । यथाधिकारं सततं स्वधर्मं प्राप्तं हि तैरेव फलं नृजातेः ॥१०८॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे श्रीनारायणगीतानिरूपणनामा सप्तमोऽध्यायः ॥७॥

सुव्रत उवाच-स्वस्वस्थानं ततो गन्तुं गृहिणो हरिरादिशत् । सयोषास्ते प्रयान्ति स्म निजदेशान्प्रणम्य तम् ॥१॥ मुकुन्दमुक्तानन्दादींस्त्यागिनः कतिचित्तु सः । अरक्षत्स्वान्तिके स्वामी मानयन् गौरवेण च ॥२॥ अन्यांस्तु त्यागिनो भूमावज्ञबोधाय यूथशः । गन्तुमाज्ञापयामास नानादेशान्नराधिप ! ॥३॥ ततः पौरांश्च भूपालं स्थातुं धर्माध्वनि प्रभुः । आज्ञाप्यानुगतः शिष्यैः कालवाणीं पुनर्ययौ ॥४॥ स्वावासमकरोत्तत्र गृहे जीवनशर्मणः । तत्रत्या बहवो भक्ताश्चक्रुस्तत्सेवनं नृप ! ॥५॥ मेघलक्ष्मणभीमाश्च रघुनाथाम्बयादवाः । जयरामादयो विप्रास्तमसेवन्त भक्तितः ॥६॥ वैश्याश्च भक्ता धनिनस्तमसेवन्त सानुगम् । पर्वताख्यस्तत्र मुख्यस्तथा राजभयाभिधः ॥७॥ जीवराजस्तथोन्मत्तो ज्येष्ठौ द्वौ मूलजित् हृदः । खञ्जो वास्तुर्नृसिंहश्च ज्येष्ठजुष्टौ सहोदरौ ॥८॥ कृष्णो द्वौ माधवावम्बः केशवो लक्ष्मणस्तथा । विश्रामप्रमुखाश्चान्ये बहवस्तं सिषेविरे ॥९॥ तेजस्वी मघा फुल्ला हीरुजीवन्तिकादयः । योषितो भक्तिमत्यस्तं भगवन्तमुपासत ॥१०॥ एते सहस्रशोऽन्ये च तस्यैव कृपया विभोः । समाधिनिष्ठास्तत्रासन् सर्वयोगकलाविदः ॥११॥ क्रमसाधितयोगाङ्गा योगिनः

---

હે રાજન્ ! આ લોકમાં જે જનો પોતે શ્રી નારાયણે જ કહેલો સનાતન સ્વધર્મ પોતપોતાના અધિકારને અનુસરી નિરંતર આચરણ કરે છે તે જનો જ મનુષ્યદેહનું ફળ પામેલા છે. એ નિશ્ચિત છે. [ શ્રી ભક્તિધર્મના પુત્ર અનવધિકાતિશય શોભાવિશિષ્ટ શ્રીહરિકૃષ્ણ પોતાના ભક્તોને જે આ ગીતા કહેતા હતા તેમને હું ભજું છું.] (૧૦૮)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે શ્રીનારાયણગીતા નિરૂપણનામા સપ્તમોऽધ્યાયઃ (૭)*

### અધ્યાય : ૮

**અતિકરુણાથી પોતાની ભક્તિની વૃદ્ધિ માટે શુભ વિવિધ પ્રકારની યોગકળાઓ શ્રીહરિએ પ્રગટ કરી તે કહેલી છે.**

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પછી શ્રી સહજાનંદ સ્વામીએ પોતાના ગૃહસ્થ ભક્તોને પોતપોતાના દેશમાં જવા માટે આજ્ઞા આપી. (૧) તે નારાયણ મુનિએ, મુકુંદાનંદવર્ણી તથા મુક્તાનંદાદિ કેટલાક ત્યાગીઓને મહત્ત્વપણાથી માન આપતા થકા પોતાની સમીપે રાખ્યા. (૨)

હે રાજન્ ! શ્રીહરિએ બીજા ત્યાગીઓ, વર્ણી અને સાધુઓને પૃથ્વીમાં પોતાના સ્વરૂપના અજ્ઞાનવાળા જનોને બોધ આપવા માટે વિવિધ દેશોમાં જવા માટે આજ્ઞા આપી. (૩) પછી અતિ સમર્થ શ્રીહરિકૃષ્ણ, માંગરોલનાં નિવાસી જનોને અને તે પુરના અધિપતિ રાજાને પોતપોતાના ધર્મમાં રહેવા માટે આજ્ઞા આપીને પોતાના શિષ્યોએ અનુગમન કરાયેલા ફરીથી કાલવાણી ગામમાં ગયા. (૪) હે રાજન્ ! ત્યાં જીવનશર્મા બ્રાહ્મણના ભવનમાં પોતાનો નિવાસ કર્યો. તે ગામના ઘણા ભક્તો સંતમંડળે સહિત શ્રીહરિની પરિચર્યા કરતા હતા. (૫)

તે ભક્તોના નામો કહે છે : મેઘજી, લક્ષ્મણજી, ભીમો, રઘુનાથ, આંબો, જાદવ, જયરામ, જેઠો વગેરે બ્રાહ્મણો તે શ્રીહરિની ભક્તિપૂર્વક સેવા કરતા હતા. (૬) હવે ધનવાન વૈશ્ય ભક્તોનાં નામો કહે છે : ત્યાં વૈશ્ય ભક્તોમાં પર્વતભાઈ નામના અગ્રેસર ભક્ત તથા રાજાભાઈ (૭) તથા જીવરાજ, ઘેલાશા નામે પ્રસિદ્ધ વણિક, જેઠા નામના ભક્ત, મૂળજી, હદો નામે ભક્ત, ખોડો, વાસ્તુ, નૃસિંહ, જેઠો અને જૂઠો બે ભાઈઓ; (૮) કૃષ્ણજી, બે માધવ, આંબો, કેશવ તથા લક્ષ્મણ, વિશ્રામ વગેરે અને બીજા ઘણા વૈશ્યો શ્રીહરિને સેવતા હતા. (૯)

તેજી, મોંઘી, ફુલ્લી, હીરા, જીવી વગેરે-ઝવેરબા આદિ શ્રેષ્ઠ ભક્તિવાળી સ્ત્રીઓ ભગવાન શ્રીહરિની પરિચર્યા કરતાં હતાં. (૧૦) કાલવાણીમાં આ કહેલા ભક્તો તથા બીજા પણ હજારો ભક્તજનો, જે શ્રીહરિની કૃપાથી જ સદા સમાધિસ્થિતિ પામેલા અને સર્વ યોગની કળાઓ જે અષ્ટાંગ યોગની આચરણ-યુક્તિઓ તેને જાણનારા હતા. (૧૧) અનુક્રમથી જેમણે સિદ્ધ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

प्राप्तसिद्धयः । यथा स्युस्तादृशा ह्येते सद्यस्तत्कृपयाऽभवन् ॥१२॥ प्राणसंयमने देहधारणे त्यजनेऽपि च । स्वातन्त्र्यं लेभिरे ह्येते बालकाश्चापि केचन ॥१३॥ स्वस्वरूपे समाधिं तान् सङ्घशोऽकारयद्यदा । स्वतन्त्रः स जनस्वामी तदाश्चर्यमजीजनत् ॥१४॥ सद्यः समाधिमाप्तानां पुंसां स्त्रीणां तथा पृथक् । बभूवुः पङ्क्तयस्तत्र शतशश्च सहस्रशः ॥१५॥ केचित्सिद्धासनस्थाश्च केचित्पद्मासनस्थिताः । जनाः केचित्तु वीराख्यमासनं तत्र चाश्रिताः॥१६॥ केचिद्वज्रासनं केचित्स्वस्तिकासनमास्थिताः। केचिच्छवासनस्थाश्च तत्राऽऽसन्नृपते ! जनाः ॥१७॥ काष्ठानामश्मनां वापि प्रतिमा इव तेऽखिलाः। निश्चेष्टाः समजायन्त समाधेः परमत्वतः ॥१८॥ तत्र कांश्चित्तु यामान्ते समुत्थापयति स्म सः। कांश्चिद्यामद्वयान्ते च दिनान्तेऽपि च कांश्चन ॥१९॥ कांश्चिद्दिनद्वयान्ते च पक्षान्तेऽपि च कांश्चन । मासान्ते वा द्विमासान्ते त्रिमासान्तेऽपि कांश्चन ॥२०॥ कांश्चिन्मासचतुष्कान्ते व्युदस्थापयदीश्वरः । कांश्चित्तु दृष्टिमात्रेण कांश्चिच्छब्देन वा हृदा ॥२१॥ यः समाधिपरानन्दास्वादलोभेन कश्चन । पुनर्बहिर्निजं देहं तेनाऽऽहूतोऽपि नाऽऽययौ ॥२२॥ तादात्म्येनैव योगेन तमपि प्रसभं प्रभुः । आनिनाय पुनः शीघ्रं महायोगेश्वरत्वतः ॥२३॥ यो योऽभूद्व्युत्थितो भक्तो यद्यत्स्वेन समीक्षितम् । समाधौ तत्तदखिलं सदःस्थान् स स ऊचिवान् ॥२४॥ वार्तां ब्रह्मपुरस्यैके भक्ताश्चक्रुरलौकिकीम् । श्वेतद्वीपस्य केचिच्च वैकुण्ठस्य च केचन ॥२५॥ गोलोकस्योचिरे केचिद्दिव्यमैश्वर्यवैभवम् । त्रिलोक्यां देवदैत्यादिस्थानवार्ताश्च केचन ॥२६॥ समाधिदृष्टं प्रकृतिपुंसो लोकं च केचन । ऐश्वर्यवैभवं चापि कथयामासुरञ्जसा ॥२७॥ लोकैश्वर्यप्रतापादि केचित्सङ्कर्षणस्य च ।

કર્યાં છે યોગના આઠ અંગો (અર્થાત્ યમ-નિયમ-આસન-પ્રાણાયામ-પ્રત્યાહાર-ધારણા-ધ્યાન-સમાધિ આ આઠ અંગથી યુક્ત) અને પ્રાપ્ત થયેલા છે અણિમા લઘિમા વગેરે યોગનાં ઐશ્વર્યો જેમને એવા યોગીઓ જે પ્રમાણે હોય, તેવા જ આ પૂર્વે કહેલા ભક્તો શ્રીહરિની કૃપાથી તત્કાળ જ (યોગીઓ જેવા) થયા. (૧૨) ભક્તજનો પ્રાણને રોકવામાં તથા દેહધારણમાં તથા ત્યાગ કરવામાં કેટલાક બાળકો (કુમારો) પણ સ્વતંત્રપણાને પામતા હતા. (૧૩) સ્વતંત્ર સર્વલોકના નિયન્તા શ્રી હરિ જ્યારે એકી સાથે ઘણા ભક્તજનોને પોતાના સ્વરૂપમાં સમાધિ કરાવતા હતા તે સમયે આશ્ચર્ય ઉત્પન્ન કરાવતા હતા. (૧૪)

શ્રીહરિનાં દર્શન સમયે જ સમાધિ પામેલા હજારો પુરુષો તથા સ્ત્રીઓની જુદી પંક્તિઓ ત્યાં થતી હતી. (૧૫) હે રાજન્ ! ત્યાં કેટલાંક જનો સિદ્ધાસનમાં બેઠેલાં હતાં, કેટલાંક પદ્‌માસનમાં રહેલાં, કેટલાંક વીરાસનમાં બેઠેલાં. (૧૬) હે રાજન્ ! કેટલાંક જનો વજ્રાસન, કેટલાંક સ્વસ્તિકાસનમાં રહેલાં અને કેટલાંક શબાસનમાં રહેલાં હતાં. (૧૭) સમગ્ર તે જનો પોતાની સમાધિની અતિ ઉત્તમ દશા હોવાથી કાષ્ટ અથવા પથ્થરની પ્રતિમાઓની માફક અંગની ચેષ્ટા રહિત થયાં. (૧૮) શ્રીહરિએ સમાધિમાં રહેલા જનોમાં કેટલાકને એક પહોરને અંતે ઉઠાડ્યા, કેટલાકને બે પહોરને અંતે અને કેટલાકને ચાર પહોરને અંતે પણ ઉઠાડતા હતા. (૧૯) કેટલાકને બે દિવસે, કેટલાકને પંદર દિવસે, કેટલાકને માસના અંતમાં, કેટલાકને બે માસે, કેટલાકને ત્રણ માસે, કેટલાકને ચાર માસના અંતમાં પરમેશ્વર ઉઠાડતા હતા. કેટલાકને તો જોવા માત્રથી અને શબ્દથી અથવા મનના સંકલ્પ માત્રથી ઉઠાડતા હતા. (૨૦-૨૧)

જે કોઈ સમાધિમાં રહેલો માણસ સમાધિમાં પરમાત્માના આનંદના અનુભવના આનંદના લોભવાળો શ્રીહરિએ દેહમાં લાવવા માટે બોલાવ્યો તોપણ પોતાના દેહમાં ફરીથી આવ્યો નહિ. (૨૨) સર્વ શક્તિમાન શ્રીહરિ મહાયોગેશ્વરપણાથી તેના આત્માની સાથે પોતાના આત્માનો એકભાવ રૂપ યોગૈશ્વર્યથી જ બલાત્કારે તેને ફરીથી તત્કાળ લાવતા હતા. (૨૩) જે જે ભક્તજન સમાધિથી ઊઠેલા હતા તે તે ભક્ત પોતે જે જે ઐશ્વર્ય જોયેલું તે સમગ્ર ઐશ્વર્ય સભામાં બેઠેલા જનોને કહેતા હતા. (૨૪)

કેટલાંક ભક્તો અલૌકિક અક્ષરધામની વાર્તા કહેતાં હતાં, કેટલાંક શ્વેતદ્વીપની વાર્તા અને કેટલાંક વૈકુંઠની વાર્તા કરતાં હતાં. (૨૫) કેટલાંક ભક્તો ગોલોકનું દિવ્ય ઐશ્વર્ય અને વૈભવ કહેતાં હતાં. કેટલાંક ત્રિલોકમાં દેવો-દૈત્યો વગેરેના સ્થાનો તથા ગાંધર્વાદિનાં જે સ્થાનો તેની વાર્તા કહેવા લાગ્યાં. (૨૬) કેટલાંક સમાધિમાં જોયેલા પ્રકૃતિ-પુરુષના લોક અને ઐશ્વર્યસુખ યથાર્થ કહેવા લાગ્યા. (૨૭) કેટલાંક સંકર્ષણનો લોક તથા ઐશ્વર્ય-પ્રતાપ-વૈભવાદિ કહેવા લાગ્યાં. કેટલાંક



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**प्रद्युम्नस्योचिरे केचिदनिरुद्धस्य केऽपि च ॥२८॥ चतुर्विंशतितत्त्वानां लोकैश्वर्यादि केचन । प्राहुः पृथक् पृथग्दृष्टं यथावत्तत्र संसदि ॥२९॥ त्रिलोकीस्थहरिस्थानवार्ताश्चक्रुश्च केचन । केचिल्लोकालोकबहिःस्थानवार्ताश्च चक्रिरे ॥३०॥ केचित्त्वनन्तब्रह्माण्डब्रह्मविष्णुशिवक्रियाः । उत्पत्त्याद्याः क्रमेणाहुस्तत्रत्यं चातिवैभवम् ॥३१॥ देवदैत्यनरादीनां तत्र तत्र च याः क्रियाः । आश्चर्यरूपास्ताः सर्वाः कथयामासुरीक्षिताः ॥३२॥ ब्रह्माण्डरचनां सर्वां यथादृष्टां च केचन । वर्णयामासुरेके च स्वदेहरचनामपि ॥३३॥ भूगोलस्य च संस्थानं खगोलस्याखिलस्य च । यथावत्कथयामासुः केचित्तत्र नराधिप ! ॥३४॥ तेषां तथाविधा वाचः शृण्वन्नारायणो मुनिः । चक्रे तत्तद्योगवतां पक्वापक्वत्वनिश्चयम् ॥३५॥ यस्य यस्य च तत्राभूदपक्वा योगधारणा । तं तं पुनस्तदुचितां कारयामास धारणाम् ॥३६॥ प्राणानामथ नाडीनां स्वातन्त्र्येण पुनः पुनः । सङ्कोचनं विकासं च शिक्षयामास कांश्चन ॥३७॥ सर्वाङ्गेभ्यस्तथाकृष्य दृशि प्राणात्मनां धृतिम् । कांश्चिच्चाशिक्षयत्स्वामी तथाऽङ्गुल्यादिमात्रके ॥३८॥ तादृश्यां धारणायां तु प्राणात्मरहितेऽखिले । छेद्यमाने दह्यमाने देहेऽपि स्यान्न वै व्यथा ॥३९॥ परावृत्त्यैकमक्ष्यस्य स्वान्तर्वृत्त्यैव धारणम् । निर्निमेषं द्वितीयस्य बहिर्वृत्त्या च धारणम् ॥४०॥ एतयोर्वैपरीत्येन धारणं च पुनस्तथा । अक्षियोगमिमं स्वामी कारयामास कांश्चन ॥४१॥ उभे नेत्रे परावृत्त्य कृत्वा च स्वान्तरं प्रति । नाडीप्राणाकर्षणं च शिक्षयामास कांश्चन ॥४२॥**

---

પ્રદ્યુમ્નના લોક-ઐશ્વર્ય, તથા કેટલાંક અનિરુદ્ધના લોક-ઐશ્વર્યાદિ કહેતા હતા. (૨૮) કેટલાંક ચોવીશ તત્ત્વોના જુદા જુદા સમાધિમાં જોયેલા લોકો અને ઐશ્વર્ય-ભોગો વગેરે તે સભામાં યથાર્થ કહેતા હતા. (૨૯) કેટલાંક ભક્તો ત્રિલોકીમાં રહેલાં પરમાત્માનાં બદરિકાશ્રમ વગેરે સ્થાનોની વાર્તા કહેતાં હતાં. કેટલાક લોકાલોક પર્વતથી બહાર રહેલાં સ્થાનોની વાર્તા કહેતાં હતાં. (૩૦) કેટલાંક ભક્તો જગતની ઉત્પત્તિ-સ્થિતિ અને પ્રલયની વાર્તા અને ત્યાં ત્યાં અનંત બ્રહ્માંડોમાં રહેલા જે બ્રહ્મા-વિષ્ણુ અને શિવની ક્રિયાઓ અને ઐશ્વર્યસુખો તે અનુક્રમથી કહેતા હતા. (૩૧) તે તે બ્રહ્માંડોમાં દેવ-દૈત્ય-મનુષ્ય વગેરેની આશ્ચર્ય રૂપ જે ક્રિયાઓ સમાધિમાં જોયેલી તે સર્વ ક્રિયાઓ કેટલાંક સભામાં કહેવા લાગ્યાં. (૩૨) કેટલાંક ભક્તો સમાધિમાં જે પ્રકારે જોયેલી તેવી સમગ્ર બ્રહ્માંડની રચનાનું વર્ણન કરતાં હતાં, બીજા પોતાના દેહની રચના (નાડીઓ-હાડકાં વગેરેથી ગુંથાયેલા શરીરના નિર્માણની રીત) પણ વર્ણન કરતા હતા. (૩૩) હે રાજન્ ! કેટલાંક ભક્તો સમગ્ર ભૂગોળના દ્વીપ-ખંડાદિ ભેદથી રહેલી સ્થિતિ તથા કેટલાંક જ્યોતિશ્ચક્રનાં સૂર્ય-ચંદ્ર-નક્ષત્રાદિ અનુક્રમથી રહેલાંની રીતિ સભામાં યથાર્થ કહેતાં હતાં. (૩૪)

સમાધિમાંથી ઊઠેલા ભક્તજનોની તેવા પ્રકારની વાણીઓ સાંભળતા શ્રીહરિ પોતે તે તે યોગવાળા ભક્તજનોનો ‘આ ભક્ત સમાધિમાં પરિપક્વ છે અને આ અપરિપક્વ છે’ એમ નિર્ણય કરતા હતા. (૩૫) ત્યાં જે જે સમાધિવાળા ભક્તની પરિપક્વ યોગધારણા ના થઈ હોય તે તે ભક્તને ફરીથી તેને યોગ્ય ધારણા કરાવતા હતા. (૩૬) કેટલાંક સમાધિવાળાં ભક્તજનોને પ્રાણવાયુઓ તથા પ્રાણના પ્રવેશસ્થાનવાળી નાડીઓનું સ્વતંત્રપણાથી વારંવાર સંકોચ અને વિકાસ શીખવાડતા હતા. (૩૭) શ્રીહરિ કેટલાંકને સર્વ અંગોથી પ્રાણે સહિત આત્માને ખેંચીને નેત્રમાં જ જીવની ધારણાને શીખવતા હતા, તે પ્રકારે આંગળી વગેરે એક જ અંગમાં જીવની ધારણાને શીખવતા હતા. (૩૮) તેવા પ્રકારની ધારણામાં (સમાધિમાં) પ્રાણાત્મા રહિત દેહને કોઈ અગ્નિથી દાહ કરે અથવા શસ્ત્રોથી છેદે તોપણ પીડા થાય નહિ. (૩૯) ડાબું અથવા જમણું નેત્ર, બેમાંથી ગમે તે એક નેત્રને પોતાના અંતઃકરણની સન્મુખ વૃત્તિથી ધારણા કરે તેમ જ બીજા નેત્રમાં મટકું માર્યા વિના બહાર વૃત્તિથી ધારણા કરે. (૪૦) એ બંને નેત્રોમાં વારાફરતી વારંવાર તેવી રીતે ધારણા કરાવે. (પ્રથમ જે નેત્રને અંતઃકરણ સન્મુખ કરેલું હોય તેને બહાર વૃત્તિથી નિર્નિમેષપણે સ્થાપન કરે અને જે નેત્રને પ્રથમ નિર્નિમેષપણે બહાર ધારણ કર્યું હોય તેને અંતઃકરણ સન્મુખ કરે : આ પ્રકારે આવો અક્ષિયોગ શ્રી નારાયણ મુનિ સમાધિવાળા જનોને શીખવતા હતા. (૪૧)

કેટલાંક ભક્તોને બંને નેત્રો બહાર વ્યાપારથી પાછાં વાળી અંતરસન્મુખ વૃત્તિવાળાં કરી બહાર (યોગમ) નાડીઓમાં ફરતા પ્રાણોને આકર્ષણ કરવાની ક્રિયા શીખવતા હતા. (૪૨) બંને નેત્રોને મટકાંએ રહિત બહાર વૃત્તિથી ધારણ અને તેને



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**उभे अपि बहिः कृत्वा निर्निमेषे स्वलोचने । नाडीप्राणाकर्षणं च कांश्चिद्भक्तानशिक्षयत् ॥४३॥ षट्सु चक्रेष्वन्यतमे रोधयित्वा ह्यसूंस्ततः । नानानादश्रुतिं कांश्चित्कारयामास स प्रभुः ॥४४॥ चक्र एकतमे रुद्धप्राणान्कांश्चन पूरुषान् । अजीगणत्स प्रणवान् व्युत्थितैस्तानवीवदत् ॥४५॥ इडायाः पिङ्गलायाश्च सुषुम्णादेश्च वर्त्मना। चन्द्रसूर्यादिलोकांश्च गमयामास कांश्चन ॥४६॥ प्रेषयित्वा संयमनीं समाधौ कांश्चन स्वकम् । श्रावयित्वा नाम सद्यो नारकानुद्दधार च ॥४७॥ यथा राज्यासनं प्राप्तो नैगडान् मोचयेन्नृपः । तथा गुरुपदारूढः सोऽपि नारकिणो नृप ! ॥४८॥ एवंविधा योगकलाः समग्रा अपि सोऽनघ ! । प्रापयामास भक्तान्स्वान्विना साधनसम्पदम् ॥४९॥ तत्प्रतापेन ते सद्यः सिद्धयोगाः सुमेधसः । देहान् परेषामाविश्य विविदुस्तन्मनोगतम् ॥५०॥ स्थित्वा परेषां देहेषु तत्प्राणांश्चावरुध्य ते । अदीदृशंश्च भगवद्धामान्यपि यथा हरिः ॥५१॥ तेनाज्ञप्तश्च यः कोऽपि पुरुषः स परं नरम् । अकारयत्समाधिं च समाधिस्थं त्वबोधयत् ॥५२॥ इत्थं स कृपया स्वामी स्वप्रतापं प्रदर्शयन् । कालनष्टा योगकलाः प्रावर्तयत भूतले ॥५३॥ प्रतिगेहं योगकलायुक्तिवार्ताः पुरे पुरे । ग्रामे ग्रामे च राजर्षे ! बभूवुः श्रोतृमङ्गलाः ॥५४॥ तिष्ठन्नैव बहिर्निजानुपदिशन्बह्वीः कला योगगा हृत्स्वाविश्य च तत्करान्निजकरेणादाय तैर्वाञ्छितान् । द्रष्टुं तत्तदमर्त्यलोकविभवानग्रेचरो दर्शयन्नङ्गुल्या निजयाऽऽपितान्विजयते श्रीभक्तिधर्मात्मजः ॥५५॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे विचित्रयोगकला-विष्कारनामाष्टमोऽध्यायः ॥८॥

અનુસારે નાડી-પ્રાણનું આકર્ષણ કેટલાંક ભક્તોને શીખવતા હતા. (૪૩) શ્રીહરિ કેટલાંક ભક્તોને આધારાદિ છ ચક્રોમાંના કોઈ પણ એક ચક્રમાં પ્રાણોને રોકીને પછી વિવિધ પ્રકારના નાદનું શ્રવણ કરાવતા હતા. (૪૪)

શ્રીહરિ છ ચક્રોમાંથી એક ચક્રમાં પ્રાણોને રોકનાર કેટલાંક ભક્તોને ૐકાર શબ્દોને (પ્રણવને) ગણાવતા હતા. અને સમાધિમાંથી ઉઠાડેલા પુરુષોએ ગણેલા પ્રણવોની સંખ્યા કહેવડાવતા હતા. (૪૫) કેટલાંક ભક્તોને ડાબી નાસિકાની નાડી, ઈડા અને જમણી નાસિકાની નાડી પિંગલા એ બેની મધ્યમાં સુષુમ્ણા નાડીના માર્ગથી ચંદ્ર અને સૂર્ય અને અગ્નિના લોકોને પહોંચાડતા હતા. (૪૬) શ્રીહરિએ કેટલાંક ભક્તોને યમપુરીમાં મોકલીને અનંત જીવોના કલ્યાણ માટે પ્રાદુર્ભાવ પામેલા એવા પોતાનું 'શ્રીસ્વામિનારાયણ' નામ નારકીઓને સંભળાવીને તત્કાળ જ ઉદ્ધાર કર્યો. (૪૭) હે રાજન્ ! રાજ્યાસનને પ્રાપ્ત થયેલા ચક્રવર્તી રાજા બંદીજનોને બંધનથી મુક્ત કરે છે તેવી રીતે શ્રીહરિ પણ ગુરુની ગાદી ઉપર બેઠેલા હોવાથી નરકમાં પડેલા જીવોને મુકાવતા હતા. (૪૮) હે અનઘ ! શ્રીહરિ આવા પ્રકારની યોગકળાઓ સાધન-સંપત્તિ વિના પણ પોતાના ભક્તોને પમાડતા હતા. (૪૯) શ્રીહરિના પ્રતાપથી તત્કાળ જ સિદ્ધદશાને પામેલા તે બુદ્ધિશાળી ભક્તો પણ બીજાંનાં શરીરોમાં પ્રવેશ કરીને તેમના મનમાં રહેલા સંકલ્પને જાણતા હતા. (૫૦)

તે સમાધિવાળા ભક્તો બીજાં જનોનાં શરીરોમાં પ્રવેશપૂર્વક રહીને તેમના પ્રાણોને રોકીને સ્વયં શ્રીહરિ જ જેમ તેમ ભગવાનનાં અક્ષરધામ-ગોલોકધામ વગેરેને પણ દેખાડતા હતા. (૫૧) શ્રીહરિએ આજ્ઞા કરાયેલો જે કોઈ પુરુષ હોય તે પુરુષ બીજાને સમાધિ કરાવતો હતો અને સમાધિમાંથી જગાડતો હતો. (૫૨)

ઐશ્વર્યશાળી શ્રીહરિએ કૃપાથી આ પ્રમાણે અસાધારણ પોતાનો પ્રતાપ બતાવતા થકા કાળબળથી નાશ પામેલી યોગકળાઓ પૃથ્વીમાં સારી રીતે પ્રવર્તાવી. (૫૩) હે રાજર્ષે ! દરેક નગરમાં અને દરેક ગામમાં ને દરેક ઘરમાં તેનું શ્રવણ કરનાર જનોને મંગલકારી, યોગકળાઓની યુક્તિઓની જે વાર્તાઓ તે થતી હતી. (૫૪)

હે રાજન્ ! સમગ્રજનોને બહાર (પોતાના ભક્તજનોની સભામાં અમૂલ્ય ગાદીતકિયા યુક્ત સિંહાસનમાં બેઠેલા થકા જ) સાક્ષાત્ પોતાના ભક્તોને યોગમાં રહેલી અનેક યુક્તિઓનો ઉપદેશ આપતા, પોતાના ભક્તોનાં હૃદયકમળોમાં પોતાના યોગના ઐશ્વર્યથી પ્રવેશ કરી પોતાના ભક્તોના હાથને પોતાના હાથથી પકડીને તે ભક્તોએ જોવા ઈચ્છેલા માટે જ પોતે પ્રાપ્ત કરાવેલા જે બ્રહ્મપુરાદિ લોકો અને તેનાં અલૌકિક ઐશ્વર્ય ભોગસુખો વગેરે ભક્તોની આગળ ચાલતા પોતાની આંગળીએથી બતાવતા શ્રી ભક્તિધર્માત્મજ શ્રીહરિકૃષ્ણ ભગવાન સર્વોત્કૃષ્ટપણે વર્તે છે. (૫૫) *ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીયપ્રકરણે વિચિત્ર યોગકલાવિષ્કારનામાષ્ટમોઽધ્યાયઃ (૮)*

सुव्रत उवाच-दिग्व्याप्तभूरिसत्कीर्तिरित्थं नारायणो नृप ! । तत्र मासद्वयं भक्तानुवासानन्दयन् भृशम् ॥१॥ पिप्पलग्रामतस्तत्र नरसिंहो द्विजस्तथा । नारायणोऽक्षयग्रामादुभावाजग्मतुः समम् ॥२॥ प्रार्थयामासतुस्तं च स्वग्रामागमनाय तौ । ताभ्यां प्रसन्नो वर्णीन्द्रः प्रतिजज्ञे तथैव तत् ॥३॥ कृत्वोत्सवं प्रबोधन्या महान्तं स ततो ययौ । सहानुगोऽक्षयग्राममादावोजस्वतीतटे ॥४॥ ततः स पिप्पलग्रामं तस्मिन्नेव दिने ययौ । उभयोर्ग्रामयोस्तत्र षण्मासानवसत्प्रभुः ॥५॥ नारायणो रामजिच्च गोविन्दश्च कुमारजित् । नृसिंहः परमानन्दः कल्याणश्च कलो रघुः ॥६॥ इत्याद्यास्तमसेवन्त विप्राश्चान्येऽपि भक्तितः । जीवा च लाडिनी मिठ्ठी रुक्मा लाडुमुखाः स्त्रियः ॥७॥ प्रापुः समाधौ स्वातन्त्र्यं सर्वे ते कृपया हरेः । कालकर्मयमत्रासविमोचनपटीयसः ॥८॥ उत्सवस्तत्र कार्तिक्यां पौर्णमास्यां महानभूत् । पुपूजुस्तं जनाः सर्वे वासोभूषाधनादिभिः ॥९॥ उदारो नरसिंहस्तु कृष्णस्याग्रे धनोच्चयम् । महान्तमकरोत्तेन प्रापुः सर्वेऽपि विस्मयम् ॥१०॥ विष्णुयागं तेन चक्रे हरिरोजस्वतीतटे । देशान्तरेभ्य आजग्मुर्जनास्तत्र सहस्रशः ॥११॥ विधाप्य विधिवत्कुण्डमण्डपादि द्विजोत्तमैः । उपहारैर्महद्भिः श्रीविष्णुमार्चयदुत्तमैः ॥१२॥ सहस्रशो द्विजास्तत्र तेनाहूता उपाययुः । वेदशास्त्रपुराणज्ञाः श्रौतस्मार्तक्रियाविदः ॥१३॥ गायत्रीं वैष्णवीं तत्र कांश्चिद्विप्रानजापयत् । द्वादशाक्षरमन्त्रं च कांश्चिद्विष्णोः षडक्षरम् ॥१४॥

---

## અધ્યાય : ૯

### શ્રીહરિએ ઓઝત નદીને તીરે અત્યંત આશ્ચર્યકારી શ્રીવિષ્ણુયાગનો મહોત્સવ કર્યો તેનું વર્ણન છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! દશે દિશાઓમાં વ્યાપેલી છે ઘણી સત્કીર્તિ જેમની એવા શ્રી સહજાનંદ સ્વામી પોતાના ભક્તજનોને અત્યંત આનંદ આપતા, ત્યાં (કાલવાણીમાં) બે માસ રહ્યા. (૧) નરસિંહ વિપ્ર-પિપલાણા ગામથી અને આખા ગામથી નારાયણ વિપ્ર; બંને ભક્તજન એક જ સમયમાં ત્યાં આવ્યા. (૨)

નરસિંહ અને નારાયણ બંને વિપ્રો પોતપોતાના ગામમાં લઈ જવા પ્રાર્થના કરવા લાગ્યા. શ્રી નારાયણ મુનિએ તે બંને ભક્ત ઉપર પ્રસન્ન થઈને કહ્યું કે 'તમો કહો છો તે પ્રમાણે કરીશું.' એવી પ્રતિજ્ઞા કરી. (૩) શ્રીહરિ કારતક સુદી એકાદશીને દિવસે મહોત્સવ કરી, મુકુંદાનંદ -મુક્તાનંદ વગેરે શિષ્યમંડળની સાથે કાલવાણી ગામથી પ્રથમ ઓજસ્વતી નદીને કિનારે આવેલા આખા ગામમાં શ્રીહરિ ગયા. (૪) ત્યાંથી શ્રીહરિ તે જ દિવસે પિપલાણા ગામ ગયા. શ્રીહરિએ બંને ગામોમાં છ માસ સુધી નિવાસ કર્યો. (૫)

( તે બંને ગામોમાં રહેલા ભક્તોનાં નામ કહે છે :) નારાયણ, રામજી, ગોવિંદ, કુમારજીત, નરસિંહ, પરમાનંદ, કલ્યાણ, કલો, રઘુ એ આદિ બ્રાહ્મણો અને બીજા પણ ક્ષત્રિય, વૈશ્ય, શૂદ્ર જાતિના ભક્તો ભક્તિપૂર્વક શ્રીહરિની સેવા કરતા હતા. તથા જીવા, લાડિની, મીઠી, રૂક્ષ્મણી, લાડુ અને શ્યામા વગેરે સ્ત્રીઓ પણ અતિસ્નેહથી સેવા કરતી હતી. (૬-૭) તે સર્વે ભક્તો અને તે સર્વ સ્ત્રીઓ કાળ-કર્મ અને યમના ભયથી મુકાવવામાં અતિચતુર શ્રી નારાયણ મુનિની અપાર દયાથી સમાધિમાં સ્વતંત્રપણું પામ્યાં હતા. (૮)

પિપલાણા ગામમાં કારતક સુદી પૂનમને દિવસે શ્રી ભક્તિમાતાના પ્રાદુર્ભાવ નિમિત્તે મહાન ઉત્સવ થયો. તેમાં સર્વે ભક્તજનો વસ્ત્ર-અલંકારો અને ધન, ચંદન, પુષ્પના હારો વગેરેથી શ્રીહરિને પૂજતા હતા. (૯) ઉદાર નરસિંહ ભક્તે તો શ્રીહરિની આગળ ધનનો ઢગલો કર્યો. તેનાથી સર્વે જનો પણ આશ્ચર્ય પામ્યા. (૧૦)

શ્રીહરિએ તે ધનથી ઓજસ્વતીને કિનારે વિષ્ણુયાગ કર્યો. તેમાં દેશાંતરથી હજારો લોકો આવ્યા. (૧૧) શ્રીહરિએ વિધિ જાણનાર ઉત્તમ બ્રાહ્મણો પાસે શાસ્ત્ર પ્રમાણે કુંડ અને મંડપ વગેરે દેવસ્થાપનના ઓટા કરાવીને ઉત્તમ મહામૂલ્યવાળી પૂજાની સામગ્રીઓથી શ્રીવિષ્ણુનું પૂજન કર્યું. (૧૨) શ્રીહરિએ આમંત્રણથી બોલાવેલા, ઋગાદિ વેદો-મીમાંસાદિ શાસ્ત્રો, તથા શ્રીમદ્ ભાગવતાદિ પુરાણોને જાણનારા, શ્રૌત અને સ્માર્ત ક્રિયાઓને જાણનારા બ્રાહ્મણો ત્યાં વિષ્ણુયાગમાં આવ્યા. (૧૩) શ્રીહરિએ યજ્ઞમાં કેટલાક બ્રાહ્મણો પાસે વિષ્ણુગાયત્રીના 'नारायणाय विद्महे...' ઈત્યાદિ ચોવીશ અક્ષરવાળા મંત્રનો જપ કરાવ્યો. કેટલાક બ્રાહ્મણો પાસે શ્રીહરિ દ્વાદશાક્ષર મંત્ર "ॐ नमो भगवते वासुदेवाय" આ બાર અક્ષરના



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

विष्णोश्चाष्टाक्षरं मन्त्रं कांश्चित्सूक्तं च वैष्णवम् । लक्ष्मीसूक्तं तथा कांश्चिद्ब्राह्मणान्स ह्यजापयत् ॥१५॥ विष्णोर्नामसहस्रं च कांश्चिन्नारायणात्मकम् । वर्म कांश्चिच्च भगवद्गीतां स समपाठयत् ॥१६॥ श्रीमद्भागवतं कांश्चित्पुराणं ब्राह्मणान्हरिः । अपाठयच्च दशमं स्कन्धमेकं च कांश्चन ॥१७॥ श्रीवासुदेवमाहात्म्यं विप्रान्कांश्चिदपाठयत् । तथोपनिषदौ कांश्चित्कठवल्लीं च मुण्डकम् ॥१८॥ पारायणं स्ववेदस्य कैश्चिद्विप्रैरचीकरत् । स्वयं कृष्णाष्टाक्षरस्य चकार च जपं प्रभुः ॥१९॥ होमं पूर्णाहुतिं कृत्वा बहूनविप्रानभोजयत् । तेभ्यो वासांसि भूषाश्च ददौ वित्तं यथेप्सितम् ॥२०॥ विप्रेभ्यः शतशः कन्यादानार्थं द्रविणं महत् । ददौ स द्विजबालानामुपनीत्यै च भूरिशः ॥२१॥ पयस्विनीश्च शतशो धेनूः प्रादाद्यथाविधि । रथाश्वादीनि यानानि ददौ च स्वर्णमुद्रिकाः ॥२२॥ ततः सौराष्ट्रदेशीयानन्यांश्चागन्तुकान् द्विजान् । षण्मासान् भोजयामास यथेष्टं स सहस्रशः ॥२३॥ अतिमर्त्यचरित्रोऽसावेवमानन्दयन् निजान् । ततो मेघपुरं प्रायात्कृत्वा दशहरोत्सवम् ॥२४॥ अनुयातो निजान् भक्तान्नृसिंहादीन्निवार्य सः । सम्मुखागतभक्तौघैः स्तूयमानस्तदागमत् ॥२५॥ तं ज्येष्ठरघुनाथाद्या विप्रा भक्त्या सिषेविरे । तत्र चामरसिंहाख्यो भाट्टो निजसुतैः सह ॥२६॥ स्वर्णकारा रामजिच्च जीवो नारायणादयः । लाडकीवल्लिमुख्याश्च सेवन्ते स्म च तं स्त्रियः ॥२७॥ नारायणस्य कृपया नानायोगकलाविधौ । स्वातन्त्र्यं लेभिरे चैते भक्तास्तत्र जनाधिप! ॥२८॥ तत्रैव रवजित्संज्ञमृणदुःखार्दितं द्विजम् । दृष्ट्वा भूरि धनं तस्मै दत्त्वाऽमोचयदापदः ॥२९॥

---

મંત્રનો જપ કરાવતા હતા, કેટલાક બ્રાહ્મણો શ્રીહરિની આજ્ઞાથી વિષ્ણુનો 'ॐ विष्णवे नमः ।' આ છ અક્ષરના મંત્રનો જપ કરવા લાગ્યા. (૧૪) શ્રીહરિ કેટલાક બ્રાહ્મણો દ્વારા વિષ્ણુના અષ્ટાક્ષર 'ॐ नमो नारायणाय' આ અષ્ટાક્ષર મંત્રનો જપ કરાવતા હતા. કેટલાક બ્રાહ્મણો દ્વારા વિષ્ણુ સંબંધી સૂક્ત ''अतो देवा अवन्तु नः' તથા કેટલાક બ્રાહ્મણો દ્વારા લક્ષ્મીસૂક્ત ''हिरण्यवर्णां हरिणीम्'' નો જપ કરાવતા હતા. (૧૫) શ્રીહરિ કેટલાક બ્રાહ્મણો પાસે વિષ્ણુસહસ્ર નામ સ્તોત્રનો પાઠ કરાવતા હતા. કેટલાકની પાસે નારાયણકવચનો પાઠ કરાવતા હતા, કેટલાકની પાસે ભગવદ્‌ગીતાનો પાઠ કરાવતા હતા. (૧૬) શ્રીહરિ કેટલાક બ્રાહ્મણો પાસે શ્રીમદ્‌ભાગવત પુરાણનો પાઠ કરાવતા હતા. કેટલાંક બ્રાહ્મણો પાસે કેવળ દશમસ્કંધનો પાઠ કરાવતા હતા. (૧૭) શ્રીહરિ કેટલાક વિપ્રો પાસે શ્રી વાસુદેવમાહાત્મ્ય તથા કેટલાકની પાસે કઠવલ્લી અને મુંડક આ બે ઉપનિષદોનો પાઠ કરાવતા હતા. (૧૮) શ્રીહરિ કેટલાક બ્રાહ્મણો પાસે પોતાના સામવેદનું પારાયણ કરાવતા હતા. સ્વયં શ્રીહરિ શ્રીકૃષ્ણના અષ્ટાક્ષર મંત્રનો જપ કરતા હતા. (૧૯)

યજ્ઞને અંતે શ્રીહરિ હોમ અને પૂર્ણાહુતિ કરીને ઘણા બ્રાહ્મણોને જમાડતા હતા અને તેમને યથેપ્સિત વસ્ત્રો-આભૂષણો અને ઈચ્છિત દ્રવ્ય આપતા હતા. (૨૦) શ્રીહરિએ હજારો બ્રાહ્મણોને કન્યાદાન માટે અને ઘણા બ્રાહ્મણનાં બાળકોને ઉપનયન-સંસ્કાર કરાવવા માટે ઘણું દ્રવ્ય આપ્યું. (૨૧) શ્રીહરિએ ઘણા દૂધવાળી હજારો ગાયો શાસ્ત્રમાં કહેલા વિધિ પ્રમાણે આપી અને રથો, ઘોડા તથા પાલખી વગેરે વાહનો અને સોનામહોરો, વિધિ પ્રમાણે પાત્ર બ્રાહ્મણોને આપ્યા. (૨૨)

આ પ્રમાણે યજ્ઞની સમાપ્તિ પછી શ્રીહરિ સોરઠ દેશના વાસી તથા બીજા આવેલા હજારો બ્રાહ્મણોને છ માસ સુધી ઈચ્છા પ્રમાણે ભોજન કરાવતા હતા. (૨૩) મનુષ્યોથી ન થઈ શકે તેવા (દિવ્ય ચરિત્રોવાળા) શ્રીહરિ આ પ્રમાણે પોતાના ભક્તોને આનંદ આપતા ગંગા દશહરાનો (જેઠ સુદી દશમમાં કરવા યોગ્ય) ઉત્સવ કરી આખા અને પિપલાણા ગામથી મેઘપુર પધારતા હતા. (૨૪) શ્રીહરિ પોતાની પાછળ આવતા નરસિંહ વગેરે ભક્તોને પાછા વાળીને પોતાની સન્મુખ આવેલા મેઘપુરના ભક્તસમૂહોએ સ્તુતિ કરાયેલા થકા મેઘપુરમાં પધાર્યા. (૨૫)

ત્યાં જેઠો, રઘુનાથ વગેરે બ્રાહ્મણો ભક્તિપૂર્વક શ્રીહરિની સેવા કરતા હતા અને ભાટ જ્ઞાતિનાં અમરસિંહ નામનાં ભક્ત પોતાના પુત્ર રણછોડ-નંદ અને કૃષ્ણ એ ત્રણની સાથે શ્રીહરિને સેવતા હતા. (૨૬) રામજીત-નારાયણ વગેરે સોની ભક્તો શ્રીહરિની સેવા કરતા હતા અને લાડકી-વલ્લી-ઝવેર વગેરે સ્ત્રીઓ શ્રીહરિની સેવા કરતી હતી. (૨૭)

હે નરપતિ ! મેઘપુરમાં પૂર્વે કહેલા ભક્તો શ્રી સહજાનંદ સ્વામીની નિરતિશય કૃપાથી નાના પ્રકારની યોગકળાના વિધાનમાં સ્વતંત્રપણાને પામ્યા હતા. (૨૮) ત્યાં મેઘપુરમાં ઋણનાં દુઃખથી પીડા પામેલા રવજી નામના બ્રાહ્મણને જોઈને તે બ્રાહ્મણને ઘણું દ્રવ્ય આપીને શ્રીહરિએ તેને ઋણના દુઃખથી મુકાવ્યો હતો. (૨૯)

**प्रतापं प्रथयन्नैवं स्वस्य मासद्वयं नृप ! । तत्रोषित्वा ततः प्रायान्मणिभद्रपुरं हरिः ॥३०॥ मयरामाख्यविप्रस्य गृहे स्वावासमाचरत् । भ्रात्रा गोविन्दरामेण साकं स तमसेवत ॥३१॥ वैश्याश्च तत्राम्बजीवश्यामकल्याणलक्ष्मणाः । जसुमुखा मुदा तस्य परिचर्यामकुर्वत ॥३२॥ मिष्टारत्नवतीमुख्या योषितश्चातिभावतः । परिचर्यां भगवतो भक्त्या विदधिरेऽन्वहम् ॥३३॥ नारायणमुनिस्तत्र जन्माष्टम्यां महोत्सवम् । चकारानन्दयन्भक्तान्पूर्ववत्प्रथयन् यशः ॥३४॥ देशान्तरेभ्यस्तत्राऽऽयन् गृहिणः सस्त्रियो जनाः । भक्ताश्च त्यागिनः सर्वे हरीक्षणसमुत्सुकाः ॥३५॥ उपवासं जागरं च निशीथे कृष्णपूजनम् । साकं भक्तैर्हरिश्चक्रे विधिना च सदर्चनम् ॥३६॥ विप्रसंतर्पणं कृत्वा परेद्युः कृतपारणः । अपराह्णे सभां चक्रे महतीं नृपते ! स च ॥३७॥ आकारितास्तत्र तेन भक्ताः सर्व उपेत्य ते । यथोचितं निषेदुश्च योषितोऽप्येकतोऽखिलाः ॥३८॥ ततः सभायां निषसाद दिव्ये सिंहासने सर्वजनैकसेव्यः सम्पूज्यमानो निजभक्तसङ्घैर्नारायणः स्मेरमुखः स तत्र ॥३९॥ तं पूजितं रुचिरचन्दनपुष्पवस्त्रैर्भक्तव्रजैः सदसि तत्र विराजमानम् । देशान्तरागतजनैर्मुनिभिश्च जुष्टं नत्वाऽब्रवीत्सविनयं मयरामविप्रः ॥४०॥** इति सत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे विष्णुयागविधान–मणिभद्रपुरागमननामा नवमोऽध्यायः॥९॥

---

હે રાજન્ ! શ્રીહરિ આ પ્રમાણે પોતાનો પ્રતાપ વિસ્તારતા, મેઘપુરમાં બે માસ સુધી નિવાસ કરીને ત્યાંથી માણાવદર નામના નગરમાં પધાર્યા. (૩૦) શ્રીહરિએ ત્યાં મયારામ વિપ્રના ભવનમાં પોતાનો નિવાસ કર્યો. મયારામ વિપ્ર, ગોવિંદરામ નામે પોતાના ભાઈની સાથે શ્રીહરિનું સેવન કરતા હતા. (૩૧) ત્યાં આંબો-જીવો-શ્યામો-કલ્યાણ-લક્ષ્મણ અને જસુ-ભાનુ વગેરે વૈશ્ય જ્ઞાતિના ભક્તો શ્રીહરિની હર્ષથી પરિચર્યા કરતા હતા. (૩૨) મીઠી-રત્ના તથા ધનકુમારી આદિ સ્ત્રીભક્તો શ્રીહરિકૃષ્ણ ભગવાનની સેવા દરરોજ અતિ પ્રેમથી કરતા હતા. (૩૩)

નારાયણ મુનિએ સાંભળનાર જનોને કલ્યાણકારી, પોતાની કીર્તિ વિસ્તારતા તેમજ પોતાના ભક્તોને આનંદ આપતા પ્રથમ માંગરોળમાં જ જેમ તેમ અહીં (માણાવદરમાં) સંવત્ ૧૮૬૦ ની સાલમાં શ્રાવણ વદી ૮ જન્માષ્ટમીનો મહોત્સવ કર્યો. (૩૪) શ્રીહરિકૃષ્ણ ભગવાનનાં દર્શનમાં ઉત્સાહવાળા પત્નીએ સહિત ગૃહસ્થ જનો તથા સર્વે ત્યાગી સાધુઓ નાના દેશોથી તે ઉત્સવમાં આવ્યા હતા. (૩૫) શ્રીહરિએ ભક્તો સાથે જન્માષ્ટમી વ્રત નિમિત્તે ઉપવાસ અને જાગરણ, તથા શ્રી બાલકૃષ્ણપૂજન અને સાધુપૂજન શાસ્ત્ર પ્રમાણે કર્યું. (૩૬) હે નરપતે ! બીજે દિવસે બ્રહ્મભોજન કરાવીને પોતે પારણાં કરી સાંજે મોટી સભા કરી. (૩૭) શ્રી હરિએ બોલાવેલા તે સર્વે ભક્તો સભામાં આવીને યથાયોગ્ય બેસતા હતા. સમગ્ર સધવા-વિધવા સ્ત્રીઓ પણ એક બાજુ બેસતી હતી. (૩૮) ત્યાર બાદ સર્વે પોતાના ભક્તજનોને એક ઉપાસ્ય, મંદ હાસ્યવાળા શ્રી સહજાનંદ સ્વામી પોતાના ભક્તસમૂહોએ અતિ સુંદર ચંદન-પુષ્પ-વસ્ત્ર- અલંકારાદિથી પૂજા કર્યા થકા સભામાં દિવ્ય સિંહાસનમાં બેઠા. (૩૯)

આ સમયે વિશાળ સભામાં વિરાજમાન, ભક્તોસમૂહોએ અતિરમણીય ચંદન, નાના પ્રકારનાં પુષ્પોથી ગૂંથેલા હારો અને સોનેરી સુંદર વસ્ત્રોથી પૂજાયેલા અને દેશાંતરથી આવેલા પોતાનાં ભક્તજનો તથા પોતાના સમીપમાં રહેનારા અને દેશાંતરથી આવેલા સાધુઓથી વિંટળાયેલા શ્રીહરિને મયારામ વિપ્ર વિનયપૂર્વક નમસ્કાર કરી કહેવા લાગ્યા. (૪૦)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે વિષ્ણુયાગવિધાન–મણિભદ્રપુરાગમનનામા નવમોઽધ્યાયઃ (૯)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

मयराम उवाच-**कारुण्यपूर्णमखिलाश्रितजीवजाततापत्रयोपशमनप्रथितप्रतापम् । आनन्दमूर्तिममलं सुखकारिशीलं नारायणं गुरुवरं प्रणमाम्यहं त्वाम् ॥१॥ हरे ! सर्वज्ञ ! भगवन् ! भक्तकल्पमहीरुह ! । हिताय सर्वभूतानां धृतमानुषविग्रह! ॥२॥ त्वद्भक्तिरेव सर्वेषां जीवानां भुवि सर्वथा । श्रेयस्करीति जानेऽहं प्रसादात्तव निश्चितम् ॥३॥ सा येन पुष्टिमासाद्य भवेदिष्टफलप्रदा । तमुपायं महाराज ! वक्तुमर्हसि मेऽञ्जसा ॥४॥** श्रीनारायणमुनिरुवाच-**अभिभूता न चेद्भक्तिर्भवेद्विघ्नेन भूयसा । तर्हीष्टफलदा नृणां साध्यमाना भवेद्तम् ॥५॥ अस्ति तस्यामन्तरायो महान्सर्गो ह्यधार्मिकः। सर्गेण धार्मिकेणैव स जेतव्यः प्रयत्नतः ॥६॥ आसुरी सम्पदाद्यो वै सर्गो दोषात्मको मतः । दैवी सम्पदिति प्रोक्तो द्वितीयस्तु गुणात्मकः ॥७॥ जयेनाधर्मसर्गस्य भक्तिः पुष्टेष्टदा भवेत् । धर्मसर्गाश्रयादेव स तु स्याद्द्विजसत्तम ! ॥८॥** सुव्रत उवाच-**इति तद्वाक्यममृतं निपीय स पुनर्द्विजः । पप्रच्छ स्वामिनं प्रीतः सर्वसंशयनाशनम् ॥९॥** मयराम उवाच-**सम्भवं व्यक्तिसंज्ञाश्च सर्गयोरेतयोर्द्वयोः । पृथक्पृथग्मुनिपते ! वद मे तद्बुभुत्सवे॥१०॥** सुव्रत उवाच-**धर्मप्रियेण विप्रेण पृष्ट इत्थं स संसदि । उवाच भगवान्वाचं भक्तसङ्घमनोहराम् ॥११॥** श्रीनारायणमुनिरुवाच-**जज्ञे ब्रह्मन्पुरा ब्रह्मा विष्णोर्नाभिसरोरुहात् । वैराजधारणां कृत्वा स सर्गायोपचक्रमे ॥१२॥ देवान् दैत्यान्नरान्नागान्सर्वांश्च पशुपक्षिणः ।**

## અધ્યાય : ૧૦

**મયારામ વિપ્રે સુખ અને દુઃખ આપનારા ધર્મ અને અધર્મના સર્ગો પુછાયેલા શ્રીહરિએ બંને સર્ગનું ઉત્પત્તિ સહિત નિરૂપણ કર્યું છે.**

**મયારામ બોલ્યા :** હે કરુણાથી પરિપૂર્ણ, આશ્રિત જીવોના ઉત્પન્ન થયેલા આધ્યાત્મિક, અધિભૂત અને આધિદૈવ આ ત્રણ તાપોને શમાવનાર, પ્રસિદ્ધ પ્રતાપવાળા, સદા આનંદસ્વરૂપ, શુદ્ધ, પોતાના ભક્તોને સુખ આપવાના સ્વભાવવાળા શ્રેષ્ઠ ગુરુ નારાયણ મુનિ ! તમોને હું પ્રણામ કરું છું. (૧) હે હરે ! હે સર્વજ્ઞ ! હે ભગવન્ ! હે પોતાના ભક્તોના મનોરથ પૂર્ણ કરવામાં કલ્પતરુ, હે સમગ્ર જીવોના આત્યંતિક શ્રેયરૂપ હિત કરવા માટે મનુષ્યવિગ્રહ ધારણ કરનાર, પૃથ્વીમાં સર્વ પ્રાણીઓનું સર્વ પ્રકારે શ્રેયસ્ કરનારી તમારી ભક્તિ છે. આ પ્રમાણે તમારા અનુગ્રહથી હું નિશ્ચે જાણું છું. (૨-૩) હે મહારાજ ! તે તમારી ભક્તિ જે ઉપાયથી વૃદ્ધિ પામીને ઈચ્છિત ફળ આપનારી થાય, તે ઉપાય આપ મને યથાર્થ કહેવાને યોગ્ય છો. (૪)

**શ્રી નારાયણ મુનિ બોલ્યા :** હે વિપ્ર ! ભક્તિ જો ઘણાં વિઘ્નોથી પરાભવ પામેલી ના હોય તો તે સાધનોથી સિદ્ધ કરાતી ભક્તિ, વૃદ્ધિ પામીને મનુષ્યોને ઈષ્ટ ફળ આપનારી થાય. (૫) ભગવાનની ભક્તિમાં અધર્મથી ઉત્પન્ન થયેલો સર્ગ = (અધર્મની પ્રજાસંતતિરૂપ સૃષ્ટિ) મહાવિઘ્નરૂપ છે. તે અધર્મ સર્ગને ધર્મથી ઉત્પન્ન થયેલા સર્ગથી જ પ્રયત્નપૂર્વક જીતવો. (૬) દોષસ્વરૂપવાળો પ્રથમ-અધર્મસર્ગ આસુરી સંપત્તિવાળો આ પ્રકારે (શાસ્ત્ર જાણનારાઓએ) માનેલો છે. અને ગુણસ્વરૂપવાળો બીજો ધર્મસર્ગ દૈવી સંપત્તિવાળો શાસ્ત્ર જાણનારાઓએ માનેલો છે. (૭)

હે દ્વિજોત્તમ ! અધર્મસર્ગના પરાભવથી વૃદ્ધિ પામેલી ભક્તિ ઈષ્ટ ફળ આપનારી થાય, અધર્મસર્ગનો જય તો ધર્મસર્ગના આશ્રયથી જ થાય. (૮) હે રાજન્ ! આ પ્રમાણે સુધા સમાન શ્રી નારાયણ મુનિના વચનનું પાન કરીને પ્રસન્ન થયેલા મયારામ વિપ્ર સમગ્ર સંશય નાશ કરનાર શ્રી સહજાનંદ પ્રભુને ફરીથી પૂછવા લાગ્યા. (૯) **મયારામ બોલ્યા :** હે મુનિપતે! આ બંને અધર્મસર્ગ અને ધર્મસર્ગનો ઉત્પત્તિપ્રકાર અને સજાતીય દરેકના પૃથક્ પૃથક્ વિવેચને સહિત નામો સાંભળવા ઈચ્છતા મને તેના ઉત્પતિ-વ્યક્તિ (પૃથક્ વિવેક) અને નામો જુદા જુદા કહો. (૧૦) હે રાજન્ ! ધર્મપ્રિય મયારામ વિપ્રે આ પ્રકારે સભામાં પુછાયેલા શ્રીહરિ ભક્તોના સમુદાયોના ચિત્તને હરણ કરનારી વાણી બોલ્યા : (૧૧)

**અધર્મસર્ગની ઉત્પતિઃ-** શ્રીનારાયણ મુનિ કહે છે : હે બ્રહ્મન્ ! પૂર્વે વૈરાજ નારાયણની નાભિમાં ઉત્પન્ન થયેલા કમળથી બ્રહ્મા પ્રાદુર્ભાવ પામ્યા. તે બ્રહ્માએ વૈરાજ પુરુષની સાથે એકાત્મ-ભાવરૂપી સમાધિ કરીને જગતની સૃષ્ટિ કરવા માટે આરંભ કર્યો. (૧૨) જગતસ્રષ્ટાએ સર્વ દેવો-દૈત્યો-નરો-સર્પો-પશુઓ-પક્ષીઓ તથા સ્થાવર (ગતિ રહિત સ્થિર)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

स्थावराञ्जङ्गमान्धाता ससर्ज स यथापुरा ।।१३।। पृष्ठदेशादधर्मोऽभूत्तस्याविद्यात्मको विधेः । स स्ववर्गेण सकलांल्लोकान्व्याप्यावसद्बली ।।१४।। प्रजाभ्यो दुःखदश्चाभूज्जन्ममृत्युप्रदस्तथा । संसृतिभ्रामकश्चासौ निरयप्रापको नृणाम् ।।१५।। मृषाऽसूया च चिन्तेर्ष्या तृष्णाऽऽशा ममतादयः । शक्तयस्तस्य कथिता दुर्जेयस्याल्पपौरुषैः ।।१६।। दम्भो लोभो मत्सरश्च कामः क्रोधो रसो मदः । दर्पो मोहश्च पारुष्यं स्नेहो मानोऽनृतं कलिः ।।१७।। द्रोहोऽशौचमविश्वासश्चौर्यं पानं च निर्ऋतिः । द्यूतं गर्वश्च नास्तिक्यं प्रमादः पैशुनं स्पृहा ।।१८।। रागद्वेषौ भयं दुःखमज्ञानं व्यसनं तथा । दुरुक्तिर्निकृतिर्हिंसा पापं मृत्युश्च यातना ।।१९।। इत्यधर्मस्यान्ववायः प्राधान्येनोपवर्णितः । असुराणामतिप्रेष्ठो वर्जनीयः सदा सताम् ।।२०।। अत्रैकैकोऽप्यधर्मेण समवीर्यपराक्रमः । अस्तीत्येकमपि क्वापि न स्वीकुर्याद्धरिश्रितः ।।२१।। अनेनाधर्मवर्गेण पीड्यमाना निजाः प्रजाः । वीक्ष्य तासां हितं ब्रह्मा चिन्तयामास चेतसा ।।२२।। कथं प्रजानां सर्वासां सुखं स्यात्स्वाभिवाञ्छितम् । इति चिन्तयतस्तस्य प्रकाशोऽभून्महान् हृदि ।।२३।। अथ सत्त्वतनोस्तस्य हृदयाद्वेधसोऽभवत् । ऋष्याकृतिः स्वयं धर्मो यत्र नारायणस्थितिः ।।२४।। पद्मपादः पद्मबाहुः पद्मास्यः पद्मलोचनः । श्वेतः श्वेतपटः श्वेतगन्धपुष्पादिशोभनः ।।२५।।

પર્વત-વૃક્ષો વગેરે અને જંગમ-ગતિ કરનારાં પ્રાણીઓને જેમ પૂર્વકલ્પમાં હતાં તેવાં નિર્માણ કર્યાં. 'બ્રહ્માએ પૂર્વકલ્પમાં હતા તેવા સૂર્ય અને ચંદ્રમાને કર્યાં' : આવી શ્રુતિ છે. (૧૩) બ્રહ્માના કટિ-પશ્ચાત્ ભાગથી અવિદ્યા સ્વરૂપવાળો અધર્મ ઉત્પન્ન થયો. બળવાન અધર્મ પોતાના વર્ગની સાથે સમગ્ર લોકોમાં પ્રવેશ કરી રહેતો હતો. (૧૪)

**અધર્મની શક્તિઓ :-** આ અધર્મસર્ગ પ્રજાઓને દુઃખ આપનારો તથા વારંવાર જન્મમરણ પમાડનારો માટે જ જનોને ચોરાશી લાખ યોનિઓમાં ભ્રમણ કરાવનારો નરકને પમાડતો થયો. (૧૫) (હવે તેનો વંશ કહેવા માટે તેની પત્નીઓને કહે છે.) **મૃષા**-અનૃત ભાષણરૂપ, **અસૂયા**-બીજાના ગુણોમાં દોષારોપણરૂપ, **ચિન્તા**-દુઃખનાં કારણોની સ્મરણરૂપ, **ઈર્ષ્યા**-પોતાના સમાનનો ઉત્કર્ષ ન સહન કરવારૂપ, **તૃષ્ણા** - જેમ જેમ પ્રાપ્ત થાય તેમ તેમ વધારે ઈચ્છે તે રૂપા, **આશા** - આ મારે થશે એમ વાટ જોવારૂપ, **મમતા**-દેહના સંબંધવાળા પદાર્થોમાં મારાપણાની બુદ્ધિ વગેરે અલ્પ પુરુષાતનવાળા જનોએ દુર્જેય અધર્મસર્ગની પત્નીઓ (શક્તિઓ) કહેલી છે. (૧૬)

**અધર્મસર્ગના દોષો :-** દંભ, લોભ, મત્સર, કામ, ક્રોધ, રસ, મદ, દર્પ, મોહ, પારૂષ્ય, સ્નેહ, માન, અનૃત, કલિ (આ ચૌદ.) (૧૭) દ્રૌહ, અશૌચ, અવિશ્વાસ, ચોરનું કર્મ, મદ્યપાન, નિર્ઋતિ (દયારહિતપણું), જૂગટું-પાસા રમવા તે, નાસ્તિકપણું, ગર્વ, પ્રમાદ, પૈશૂન-ચાડિયાપણું, સ્પૃહા (એ બાર છે.) (૧૮) રાગ, દ્વેષ, ભય, દુઃખ, અજ્ઞાન, વ્યસન તથા દુરૂક્તિ, નિકૃતિ - પારકાને ઠગવારૂપ શઠપણું, હિંસા, પાપ, મૃત્યુ, યાતના (આ બાર છે.) (૧૯) આ પ્રમાણે આડત્રીસ સંખ્યાવાળો અધર્મસર્ગ અસુરોને અતિ પ્રિય છે. દૈવી સંપત્તિયુક્ત સાધુઓને હંમેશાં ત્યાગ કરવા યોગ્ય છે : આ અધર્મનો વંશ મુખ્યપણે મેં કહેલો છે. (૨૦)

આ કહેલા દંભાદિમાં એક એક પણ મૃષા વગેરે પોતાની પત્નીઓએ સહિત પોતાના પિતા અધર્મની સમાન પરાક્રમવાળા છે. માટે ભક્તિની વૃદ્ધિ ઈચ્છનાર ભગવાનનો ભક્ત એ કહેલામાંથી એકનો પણ ક્યારેય પણ આશ્રય કરે નહિ. (૨૧) બ્રહ્મા, પહેલા કહેલા અધર્મ-સમૂહથી પીડા પામેલી પોતાની પ્રજાને જોઈ તે પ્રજાનું હિત પોતાના મનથી વિચારવા લાગ્યા. (૨૨) સર્વ પ્રજાઓને પોતાને ઈચ્છિત સુખ ક્યા ઉપાયથી થાય ? હે વિપ્ર ! આવી રીતે ચિંતવન કરતા બ્રહ્માના હૃદયકમળમાં અતિશય પ્રકાશ થયો. (૨૩)

**ધર્મસર્ગની ઉત્પત્તિ:-** પછી શુદ્ધ સત્ત્વમય શરીરવાળા બ્રહ્માના હૃદયથી (હૃદયમાં રહેલા જમણા સ્તનથી) ઋષિના જેવી આકૃતિવાળા પોતે ધર્મ પ્રાદુર્ભાવ પામ્યા, જે ધર્મમાં નારાયણની સ્થિતિ છે. (૨૪)

પદ્મની માફક કોમળ ચરણવાળા, પદ્મની માફક લાલ હથેળીવાળા, પ્રફુલ્લિત કમળ સમાન મુખવાળા, પદ્મના પાંદડા સમાન દીર્ઘ નેત્રવાળા, શ્વેત અંગવાળા, શ્વેત વસ્ત્રવાળા, શ્વેત ચંદન, પુષ્પમાળા, તોરા વગેરેથી શોભાયમાન અંગવાળા : આવા ધર્મદેવ ઉત્પન્ન થયા. (૨૫)

विद्याशक्तिप्रधानोऽसौ प्रजाभ्यः सुखदायकः । स्वर्गमोक्षप्रदो जेतुमधर्मं सानुगं क्षमः ॥२६॥ श्रद्धा शान्तिर्दया मेधा तुष्टिःपुष्टिस्तथा गतिः । मैत्री तितिक्षा लज्जा च बुद्धिर्मूर्तिः क्रियोन्नतिः ॥२७॥ इत्याद्याः शक्तयस्तस्य नित्यं तत्सेवने रताः। प्रोक्तास्तत्सर्गमुख्यानामभिधाश्चाधुना ब्रुवे ॥२८॥ ज्ञानं वैराग्यमैश्वर्यमभयं चार्जवं तपः । सत्यं शौचं सुखं क्षेमः स्थैर्यं धैर्यं च मार्दवम् ॥२९॥ सन्तोषो निग्रहस्त्यागो योगो यज्ञः शमो दमः । उपासना चोपरतिरास्तिक्यं च क्षमा

---

**ધર્મની શક્તિઓ :-** આ ધર્મ, જ્ઞાન-શક્તિ મુખ્ય જેને છે એવા છે, અને પોતાના આશ્રિત જનોને પરમ સુખ આપનાર, પોતાને ઈચ્છિત સ્વર્ગ અને મોક્ષ આપનાર, પરિવારે સહિત અધર્મને જીતવા માટે સમર્થ છે. (૨૬) (હવે ધર્મવંશ કહેવા માટે પ્રથમ તેમની પત્નીઓનાં નામો કહે છે : ) **શ્રદ્ધા** -(વિશ્વાસપૂર્વક એકાંતિક ધર્મમાં પરમ આદર), **શાંતિ**- (જ્ઞાનેન્દ્રિયો અને અંતઃકરણોનું ભગવત્સ્વરૂપમાં એકાગ્રતાજન્ય સુખાનુભવથી શાંત સ્વભાવતા), **દયા**- (પરદુઃખના શ્રવણ અને દર્શનથી સહન ન થવાથી યથાશક્તિ તેના નિવારણનો ઉપાય), **મેધા**-પોતાના મોક્ષમાં ઉપયોગી ઉપાયને ધારણ કરવારૂપ, **તુષ્ટિ**-ધર્માચરણજન્ય આનંદથી શોભારૂપ, **પુષ્ટિ**-ભગવાનની પ્રસન્નતામાં કારણભૂત વ્રતાદિનું વારંવાર આચરણરૂપ પોષણ કરવારૂપ, **ગતિ**- પોતાને જેમ ઉત્તમ લોકની પ્રાપ્તિ થાય તેવા પ્રકારે પોતાનું ગમનરૂપ, **મૈત્રી**-સ્વાભાવિકપણે સર્વ જીવોના હિતનું આચરણ થાય તેવી પ્રવૃત્તિ, **તિતિક્ષા**- પોતાના પ્રારબ્ધાનુસારે પ્રાપ્ત થયેલા રોગાદિ દુઃખને સહન કરવારૂપ, **લજ્જા**-સત્શાસ્ત્રમાં નિષેધ કરેલાનું આચરણ કરવામાં શરમરૂપ, **બુદ્ધિ**-સત્શાસ્ત્રમાં કહેલા પ્રવૃત્તિ અને નિવૃત્તિરૂપ ધર્મ, તથા કરવા યોગ્ય અને ન કરવા યોગ્ય, બંધમોક્ષ વગેરેના જ્ઞાનરૂપ, **મૂર્તિ**-મોક્ષમાં કારણરૂપ ભગવાનની ભક્તિના સ્થાનભૂત તેમનું અર્ચાસ્વરૂપ, **ક્રિયા**-સત્શાસ્ત્રોમાં કહેલી સત્ક્રિયાના અનુષ્ઠાનરૂપ, **ઉન્નતિ**-પોતાના સદ્ધર્માચરણથી થયેલી મહત્તારૂપ (૨૭) એ આદિ નિરંતર પોતાના સ્વામી જે ધર્મની સેવામાં તત્પર, ધર્મની પત્નીઓ કહેલી છે. હાલમાં ધર્મવંશનાં મુખ્યનાં નામો હું કહું છું. (૨૮)

**ધર્મસર્ગના ગુણો :- જ્ઞાન** = સ્થૂળાદિ ત્રણ દેહ વિશિષ્ટ જીવો અને વિરાટાદિ ત્રણ શરીર વિશિષ્ટ વૈરાજપુરુષો તથા પ્રધાનપુરુષો તથા મૂળ પ્રકૃતિ અને પુરુષ, કાળ અને અક્ષર, તથા પુરુષોત્તમ શ્રી વાસુદેવનું લક્ષણથી યથાર્થ પણે જાણવું, **વૈરાગ્ય** = પ્રકૃતિ પુરુષથી ઉત્પન્ન થયેલા લોક-ભોગ અને દેહાદિનું ચાર પ્રકારના પ્રલયથી નાશપણાના જ્ઞાનપૂર્વક ભગવાન વિના બીજાઓમાં અરુચિ, **ઐશ્વર્ય** = પોતાને અને બીજાઓને દઢપણે સ્વધર્મમાં પ્રવૃત્તિ અને તેમાં સ્થાપવા રૂપ સામર્થ્ય, **અભય** = ઈષ્ટ અને અનિષ્ટના-વિયોગ અને સંયોગરૂપ દુઃખના કારણ દેશ-કાળ, મનુષ્ય વગેરેના દર્શનથી થનાર દુઃખ તે ભય છે. તેને સત્ અને અસત્‌ના વિવેકથી તેની નિવૃત્તિરૂપ, **આર્જવ** = બીજાઓમાં મન, વાણી અને શરીરના કર્મની પ્રવૃત્તિઓની એકનિષ્ઠાપણા રૂપ, **તપ** = ભગવાનની પ્રસન્નતામાં કારણરૂપ કૃચ્છ્ર-ચાંદ્રાયણ - એકાદશીના ઉપવાસ વગેરેનું આચરણ, **સત્ય** = જેવું જોયું હોય તેવા અર્થ વિષયક ભૂત પ્રાણીમાત્રના હિતનું વચન, **શૌચ** = શાસ્ત્ર પ્રમાણે બાહ્ય અને અંતઃકરણની શુદ્ધિના વિધાનથી આત્માનું ભગવાનના પૂજનમાં યોગ્યતા સંપાદનપણું, **સુખ** = માયિક પંચ વિષયની પ્રાપ્તિ માટે ક્લેશથી રહિતપણું, **ક્ષેમ** = જેમ પોતાના ધર્મમાં વિઘ્ન ના થાય તેવું વર્તવાપણું, **સ્થૈર્ય** = સચ્છાસ્ત્રોમાં કહેલા સ્વધર્મ - વૈરાગ્ય - જ્ઞાન - ભક્તિ વગેરે સદ્‌ગુણોમાં સ્થિર ભાવ, **ધૈર્ય** = પોતાના અંતઃકરણમાં ક્ષોભના કારણભૂત વિષમ દેશકાળાદિ પ્રાપ્ત હોય તોપણ તેની સહનતાપૂર્વક વ્યાકુળતાએ રહિતપણું, **માર્દવ** = કોમળપણું ( આ તેર છે.) (૨૯)

**સંતોષ** = પ્રારબ્ધને અનુસારે પોતાની વૃત્તિથી ઉપલબ્ધ અન્નવસ્ત્રાદિથી પૂર્ણતા, **નિગ્રહ** = માયિક વિષયોમાં સ્વાભાવિક પ્રવૃત્તિ સ્વભાવવાળાં ઈન્દ્રિયો અંતઃકરણોની શાસ્ત્રમાં કહેલા નિયમોથી તે તે વિષયોમાં પ્રવૃત્તિનું રોકાણ, **ત્યાગ** = આત્માના હિતના વિરોધી પરિગ્રહને મૂકી દેવો, **યોગ** = પોતાના કલ્યાણનાં સાધનોનો નિરંતર અભ્યાસ, **યજ્ઞ** = સ્વધર્મ - તપ, અષ્ટાંગયોગ, દાન, વ્રત, ભગવદ્‌ભક્તિ વગેરેનું અન્ય ફળ-ઈચ્છા રહિત કેવળ ભગવાનની પ્રસન્નતા માટે સારી રીતે આચરણ, **શમ** = પોતાનું અનર્થ કરનારા શબ્દાદિ અસત્ય પંચ વિષયોથી અંતઃકરણનું નિયમનથી ક્ષોભે રહિતપણું, **દમ** = પંચવિષયોમાંથી સત્શાસ્ત્રમાં કહેલા નિયમોથી બાહ્યેન્દ્રિયોનું પાછું વાળવું, **ઉપાસના** = બ્રહ્મભાવને પામેલા હોય



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

स्मृतिः ॥३०॥ तेजः प्रसादश्च शुभं स्वाध्यायः प्रश्रयश्च मुद् । ध्यानं साम्यं ब्रह्मविद्या लाभः सामाऽर्थ उद्यमः ॥३१॥ तथा सर्वे विरोध्यर्थनञ्पूर्वा बिभ्रतोऽभिधाः। प्रागुक्ताधर्मजाताः स्युरदम्भप्रमुखा अपि ॥३२॥ श्रवणप्रमुखा भक्तेर्भेदा नव गुणास्तथा । एते धर्मस्यान्ववाये प्रवराः कीर्तिता मया ॥३३॥ ऋषयः सर्वभावेन देवाश्चान्ये सुखार्थिनः । नराश्चैतानसेवन्त मुक्ताश्चैव मुमुक्षवः ॥३४॥ विश्वं निजौजसा व्याप्य जित्वा सर्गमधर्मजम् । सुखयामासुरखिलांल्लोकानेते निजाश्रितान् ॥३५॥ अत्रैकैकोऽपि धर्मेण समवीर्यपराक्रमः । अस्तीत्येकमपि क्वापि मुमुक्षुर्नैव सन्त्यजेत् ॥३६॥ धर्माधर्मावुभावेतौ स्वस्वसर्गे पृथक्पृथक् । एकैकस्मिंस्तिष्ठतो वै स्वयं ते च तयोरपि ॥३७॥ यथा वटः स्वबीजेषु बीजानि च वटे यथा । तिष्ठन्त्येव तथा तौ च स्वजातेष्वपि ते तयोः ॥३८॥ इत्युक्तो द्विविधः सर्गो गुणदोषात्मको महान् । तत्राधर्मभवा दोषा धर्मजास्त्वखिला गुणाः ॥३९॥

તો પણ પોતાના અંતરમાં શ્રીકૃષ્ણભગવાનની સદા સાકારપણાની દઢતા, **ઉપરતિ** = માયિક વિષયસુખની આશાથી વિરામ, **આસ્તિક્ય** = સદા દિવ્ય મૂર્તિ અક્ષરધામનિવાસી ભગવાન શ્રી સ્વામિનારાયણના અવતારો અને તેમની એકાંતિકી ભક્તિ તથા તેમના લોકની પ્રાપ્તિ એ સર્વનું સત્શાસ્ત્રોમાં કરેલા નિરૂપણ વિષે દઢ વિશ્વાસપૂર્વક સત્યતાબુદ્ધિ, **ક્ષમા** = પારકાના નિમિત્તથી પીડાનો અનુભવ હોવા છતાં પણ તેના પ્રત્યે ચિત્તના વિકારે રહિતપણું, **સ્મૃતિ** = સત્શાસ્ત્રોમાં કહેલા, પોતાને અવશ્ય કરવા યોગ્ય ભગવાનની પ્રસન્નતાનાં સાધનોનું મનમાં વિક્ષેપાદિમાં પણ વિસ્મરણ ન થવું તે. (આ બાર છે) (૩૦) **તેજ** = દુર્જનોથી પરાભવ નહિ પામવાપણું, **પ્રસાદ** = પોતાના અંતઃકરણનું નિર્મળપણું, **શુભ** = સદાચરણથી ઉપદ્રવનો અભાવ, **સ્વાધ્યાય** = સત્શાસ્ત્રોનું પઠન, પાઠન, સાંભળવું, સંભળાવવું વગેરેથી પોતાની બુદ્ધિને અનુસારે નિરંતર અભ્યાસ, **પ્રશ્રય** = પોતાનાથી મોટાઓની આગળ વિનયપૂર્વક નમ્રતાથી વર્તવું, **મુદ્** = ધર્માચરણની પુષ્ટતાજન્ય હર્ષ, **ધ્યાન** = પોતાના કલ્યાણમાં કારણભૂત ઉપાયનું ચિંતન, **સામ્ય** = પોતાની ઉપમાથી બીજાઓનાં સુખદુઃખનો સમભાવ, **બ્રહ્મવિદ્યા** = સેશ્વર સાંખ્ય, યોગ, ભગવાનની ભક્તિપ્રધાનવાળા ઉપનિષદ્ આદિનો વિચાર, **લાભ** = ભગવાનની એકાંતિકી ભક્તિ અને તેવા પ્રકારના ભગવાનના ભક્તની પ્રાપ્તિ, **સામ** = શાંત બુદ્ધિથી બીજાને પ્રીતિ ઉત્પન્ન કરનાર વચનોનું ઉચ્ચારણપણું, **અર્થ** = સર્વથી પોતાના કલ્યાણના સ્વરૂપવાળા હિતના પ્રયોજનનું જ્ઞાન, **ઉદ્યમ** = કલ્યાણના ઉપાયમાં હંમેશાં વર્તવું તે (આ તેર છે.) (૩૧) પહેલાં કહેલા જે અધર્મસર્ગથી થયેલાં દંભ વગેરે તેનો વિરોધી (નકારાત્મક) અર્થ તે પૂર્વમાં જેઓને છે એવા (અર્થાત્ દંભનો વિરોધી અદંભ વગેરે તે તે સંજ્ઞાઓ ધારણ કરતા) અદંભ વગેરે પણ સર્વે ધર્મસર્ગથી થયેલા (ગુણરૂપ) થાય. એવી રીતે અદંભાદિ પણ આડત્રીશ સંખ્યાવાળા થાય. (એવી રીતે ધર્મસર્ગથી ઉત્પન્ન થયેલા, જ્ઞાનવિરોધી અર્થવાળા અજ્ઞાનાદિ અધર્મસર્ગથી થયેલા (દોષરૂપ) થાય છે એમ પણ જાણવું. (૩૨) ગુણસંજ્ઞાવાળા શ્રવણ વગેરે ભક્તિના નવ સંખ્યાવાળા ભેદો તે પણ ધર્મથી ઉત્પન્ન થયેલા ગણાય છે. એ જ્ઞાન આદિ જેમાં છે અને ગુણ અંતમાં જેને છે એવા ૮૫-પંચ્યાસી સંખ્યાવાળા સર્વે ધર્મના વંશમાં મુખ્ય મેં કહ્યા છે. (૩૩)

સુખ ઈચ્છનારા, મુક્ત ભાવ પામેલા અને મુમુક્ષુઓ ઋષિઓ-દેવો-મનુષ્યો અને બીજા પણ; ધર્મસર્ગથી થયેલા જ્ઞાનાદિને સર્વ ભાવથી સેવતા હતા. (૩૪) એ ધર્મસર્ગથી થયેલા જ્ઞાનાદિ વિશ્વમાં વ્યાપીને અધર્મસર્ગ-દંભાદિને પોતાના સામર્થ્યથી પરાભવ પમાડીને પોતાના આશ્રિત સર્વજનોને સુખી કરતા હતા. (૩૫) જ્ઞાનાદિમાં એકએક પણ, શ્રદ્ધાદિ પત્નીએ સહિત ધર્મના સમાન પરાક્રમવાળા છે. માટે મુમુક્ષુ, ભગવાનની ભક્તિની વૃદ્ધિ ઈચ્છનાર ભક્તે એમાંથી કોઈ એકનો પણ ક્યારેય ત્યાગ કરવો નહિ. (૩૬) એ પૂર્વે કહેલા ધર્મ અને અધર્મ એ બંને પોતે એક એક પોતપોતાના સર્ગમાં જુદા જુદા રહેલા છે. જ્ઞાનાદિ ધર્મસર્ગ; અને દંભાદિ અધર્મસર્ગમાં પણ જુદા જુદા રહે છે. (૩૭) જેમ વડનું વૃક્ષ પોતાનાં બીજોમાં રહે છે અને જેમ વડનાં બીજો વડમાં રહે છે તેવી રીતે ધર્મ અને અધર્મ, પોતાનાથી ઉત્પન્ન થયેલા જ્ઞાનાદિમાં ધર્મ; અને પોતાનાથી ઉત્પન્ન થયેલા દંભાદિમાં અધર્મ રહે છે. જ્ઞાનાદિ અને દંભાદિ પણ તે બંનેમાં અર્થાત્ ધર્મમાં જ્ઞાનાદિ અને અધર્મમાં દંભાદિ રહે છે જ. (૩૮) આ પ્રમાણે ગુણ અને દોષસ્વરૂપ વિસ્તારવાળો બે પ્રકારનો સર્ગ કહ્યો. તે બંને સર્ગમાં અધર્મથી ઉત્પન્ન થયેલા સમગ્ર દંભાદિ, દોષ સંજ્ઞાથી પ્રસિદ્ધ છે. ધર્મથી ઉત્પન્ન થયેલા સમગ્ર જ્ઞાનાદિ તો ગુણ સંજ્ઞાથી પ્રસિદ્ધ છે. (૩૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

गुणैर्दोषान्विनिर्जित्य ये भक्तिं कुर्वते हरौ । स्वेप्सितं ते परं सौख्यं लभन्ते नापरे जनाः ॥४०॥ विजेतव्याः प्रयत्नेन दोषा एवारयस्ततः । गुणानाश्रित्य पुरुषैस्त्यक्तग्राम्यसुखेषणैः ॥४१॥ पञ्चैवावश्यजेतव्याः सन्ति दोषेष्वमीष्वपि । जितेषु येषु सर्वेऽपि जिताः स्युर्नात्र संशयः ॥४२॥ लोभः कामो रसास्वादः स्नेहो मानश्च पञ्चमः । अन्तःशत्रव एते हि विजेतव्याः प्रयत्नतः ॥४३॥ श्रेयोविघ्नकरा ह्येते मुमुक्षूणां निरन्तरम्। प्रमादिनोऽपि मुक्तस्य स्वपदच्युतिहेतवः ॥४४॥ एतेष्वेकतमो यर्हि मुख्यः पुंसि भवेत्तदा । चत्वारोऽन्ये तथा दोषाः सर्वेऽप्यनुचरन्ति तम् ॥४५॥ सर्वदोषाकरत्वं हि पुराणेषु प्रसङ्गतः । एकैकस्यात एवोक्तं दुर्जेयत्वं च सन्मते ! ॥४६॥ सर्वथैव विनिर्जित्य तत एतान्महाबलान् । कृष्णे भक्तिर्विधातव्या सावधानैर्मदाश्रितैः ॥४७॥ किं करिष्यन्ति सुस्वान्तानस्मान्भक्तजनानिमे । इति चेतसि न ज्ञेयं दुःखदोऽल्पोऽप्यरिर्यतः ॥४८॥ विस्रम्भादात्ममनसो ये प्रमादमकुर्वत । भक्तास्तेऽतिमहान्तोऽपि नीता एतैर्हि तुच्छताम् ॥४९॥ लोभाद्यैरभिभूतास्तु महान्तः सन्ति भूरिशः । तेषु नामानि केषाञ्चित्कथयामि समासतः ॥५०॥ महर्षिर्ब्रह्मनिष्ठोऽपि वसिष्ठोऽथ च धार्मिकः । कार्तवीर्यार्जुनश्चोभौ लोभेनैव पराहतौ ॥५१॥ ब्रह्मा सौभरिरिन्द्रश्च नहुषश्चातिधार्मिकाः । अप्येते च पराभूताः कामेनाऽऽपुर्हि दुर्दशाम् ॥५२॥ ऋष्यशृङ्गो मुनिवरस्तथाऽन्येऽपि द्विजा नृपाः । रसास्वादपराभूताश्चुच्युवुः श्रेयसोऽध्वनः ॥५३॥ आर्षभो भरतो राजा त्यक्तराज्यादिवैभवः। अपि मृगार्भस्नेहेन पराभूतिमुपागमत् ॥५४॥ दक्षप्रजापतिश्चाथ दुर्वासा अत्रिनन्दनः । पराभूतिं सुमहतीं मानेन प्रापतुर्द्रुतम् ॥५५॥ एवमन्येऽपि बहवो देवा भूपा महर्षयः । पराभूता हि लोभाद्यैरेतैः प्रापुर्महापदम् ॥५६॥

---

જે ભક્તજનો ગુણોથી દોષો જીતીને શ્રીહરિમાં ભક્તિ કરે છે તે પોતાને ઈચ્છિત સર્વોત્તમ સુખ પ્રાપ્ત કરે છે; બીજા પામતા નથી. (૪૦) માટે ત્યાગ કરી છે માયિક પંચ વિષયના સુખની ઈચ્છા જેમણે એવા મારા ભક્તોએ ગુણોનો આશ્રય કરી દોષરૂપી શત્રુઓ પ્રયત્નથી પણ જીતવા. (૪૧) પૂર્વે કહેલા દોષોમાં પણ પાંચ દોષો અવશ્ય જીતવા યોગ્ય છે. જેમને જીતવાથી સર્વે દોષો પણ જિતાયેલા થાય એમાં સંશય નથી. (૪૨) લોભ-કામ-રસાસ્વાદ-સ્નેહ અને પાંચમો માન એ અંતઃશત્રુઓ છે તેને પ્રયત્નપૂર્વક નિશ્ચે જીતવા. (૪૩) એ પાંચ દોષો મુમુક્ષુઓને હંમેશાં પોતાના શ્રેયમાં વિઘ્ન કરનારા છે જ, અને પ્રમાદ રાખનાર મુક્તભાવને પામેલા ભક્તને પણ પોતાના મુક્તપણારૂપ સ્થાનમાંથી પાડવામાં કારણરૂપ છે. (૪૪)

એ પાંચ દોષોમાં એક પણ દોષ જ્યારે પુરુષમાં મુખ્યપણે વર્તે ત્યારે બીજા ચાર દોષો પણ તેને અનુસરે છે. (૪૫) હે સન્મતે ! એ હેતુ માટે જ શ્રીમદ્ ભાગવતાદિ પુરાણોમાં તે તે કથાના પ્રસંગથી લોભ આદિક એકએક દોષનું સર્વ દોષોની ખાણપણું અને દુર્જેયપણું અર્થાત્ અતિ દુઃખથી પરાભવ પામવા પણું કહેલું છે. (૪૬) માટે સાવધાન - પ્રમાદે રહિત મારા આશ્રિતોએ મહાબળવાન એ દોષોને સર્વ પ્રકારે જીતીને જ શ્રી વાસુદેવમાં ભક્તિ કરવી. (૪૭)

વશ કર્યાં છે અંતઃકરણો જેમણે એવા ભગવાનને ભજતા અમોને આ દોષો શું કરવાના છે ? આ પ્રમાણે પોતાના મનમાં ન જાણવું કારણ કે નાનો પણ શત્રુ દુઃખ આપનારો છે. (૪૮) જે ભક્તો પોતાના મનના વિશ્વાસથી (અમોએ મન જીતેલું છે એવા વિશ્વાસથી) સાવધાન રહેલા નથી તે ભક્તો અતિ મોટા હતા તોપણ એ દોષોએ તુચ્છપણાને પમાડેલ છે જ. (૪૯) લોભાદિ દોષોએ પરાભવ પમાડેલા મહાગુણવાળા પણ ઘણા છે. તેમાં કેટલાંક ભક્તોનાં નામો સંક્ષેપથી કહું છું. (૫૦)

બ્રહ્મનિષ્ઠ એવા પણ મહાન ઋષિ વસિષ્ઠ અને સ્વધર્મનિષ્ઠ સહસ્ત્રાર્જુન એ બંને લોભે પરાભવ પમાડેલા છે. (૫૧) બ્રહ્મા, સૌભરિ મુનિ, ઈન્દ્ર, નહુષ રાજા એ અતિ ધાર્મિક હતા છતાં પણ કામે પરાભવ પમાડેલા હોવાથી દુર્દશાને પામેલા છે. (૫૨) મુનિઓમાં શ્રેષ્ઠ ઋષ્યશૃંગ તથા બીજા પણ બ્રાહ્મણો અને રાજાઓ રસાસ્વાદથી પરાભવ પામેલા સતા કલ્યાણના માર્ગથી ભ્રષ્ટ થયા હતા. (૫૩)

ઋષભદેવના પુત્ર ભરત રાજા, જેમણે રાજ્યવૈભવ ત્યાગ કર્યો હતો તો પણ મૃગના બાળકમાં પ્રીતિથી યોગભ્રષ્ટતાને પ્રાપ્ત થયા. (૫૪) બ્રહ્માના પુત્ર દક્ષ પ્રજાપતિ, અને અત્રિ મુનિના પુત્ર દુર્વાસામુનિ આ બંને માનથી અતિ મહાન પરાભવ તત્કાળ પામ્યા. (૫૫) આવી રીતે બીજા પણ દેવો-રાજાઓ અને મહર્ષિઓ લોભાદિ પાંચ દોષોથી પરાભવ પામ્યા સતા મહાન આપત્તિને પામેલા છે. (૫૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**दशा चेन्महतामीदृक्तर्हि त्वाधुनिका जनाः । स्वमनो विश्वसेयुर्ये भ्रश्येयुस्ते कथं न भो ! ॥५७॥ तस्मान्मनो नियम्यैव जयन्नैव रिपूनमून् । मदाश्रितः सर्वकालं सावधानो भजेद्धरिम् ॥५८॥ अधर्मसर्गस्य विवर्जनेन धर्मान्वयस्यैव समाश्रयेण। सम्पोष्य भक्तिं भुवि वर्धयन्ति ये ते लभन्ते सुखमीप्सितं वै ॥५९॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे धर्माधर्मसर्गनिरूपणनामा दशमोऽध्यायः ॥१०॥

सुव्रत उवाच-**इत्याकर्ण्य हरेर्वाक्यं नातितृप्तमना द्विजः । पुनः पप्रच्छ तं नत्वा स बद्धाञ्जलिरादरात् ॥१॥** मयराम उवाच-**हरे ! स्वामिन् ! दयासिन्धो ! सर्वजीवहितावह ! । पिता सुतानामिव नः कुरुषे सर्वथा हितम् ॥२॥ महदेव बलं स्वामिँल्लोभादीनां त्वयोदितम् । पञ्चानामतिदुष्टानां मुक्तस्याप्यस्ति यद्भयम् ॥३॥ लोभादिभिः पराभूता वसिष्ठाद्या यथा प्रभो ! । कथास्ताः श्रोतुमिच्छामो वयं सर्वाः पृथक् पृथक् ॥४॥** सुव्रत उवाच-**इति पृष्टो भक्तपतिर्विप्रवर्येण तेन सः। प्रीत्या मधुरया वाचा जगादानन्दयन्निजान् ॥५॥** श्रीनारायणमुनिरुवाच-**इतिहासपुराणेषु वसिष्ठादेः कथा द्विज ! । वर्णिता विस्तरात्सन्ति सङ्क्षेपेण वदाम्यहम् ॥६॥ तत्रादौ लोभवशतो वसिष्ठो मुनिसत्तमः । पराभवं यथा प्राप तां कथां कथयामि ते ॥७॥ आसीद्राजा निमिर्नाम्ना सूर्यवंशसमुद्भवः । यज्ञं करिष्यन्स गुरुं वसिष्ठमवृतर्त्विजम् ॥८॥ यज्ञमारम्भयित्वाऽथ वसिष्ठः प्राह भूपतिम् । वृत्तोऽस्मीन्द्रेण यज्ञार्थं प्रागहं नृपते ! किल ॥९॥ तं याजयित्वाऽऽयास्यामि शीघ्रमत्र न संशयः ।**

---

હે દ્વિજ ! જો મહાન મહિમાવાળા વસિષ્ઠાદિની પણ આવા પ્રકારની દશા થઈ, તો હાલના જે જનો અમોએ મન જીત્યું છે એવો વિશ્વાસ કરે, તે જનો કેમ ભ્રષ્ટપણાને ન પામે ? અર્થાત્ ભ્રષ્ટપણાને પામે જ. (૫૭) માટે મારો આશ્રિત મનને નિયમમાં કરીને જ લોભાદિ પાંચ શત્રુઓને જીતીને હંમેશાં સાવધાન થઈને શ્રીહરિને ભજે. (૫૮)

પૃથ્વીમાં જે ભક્તજનો અધર્મસર્ગનો ત્યાગ કરવાથી અને ધર્મસર્ગનો આશ્રય કરવાથી જ, ભક્તિનું પોષણ કરી વૃદ્ધિ પમાડે છે; તે ભક્તજનો ઈચ્છિત સુખ પામે છે જ. (૫૯) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે ધર્માધર્મસર્ગ નિરૂપણનામા દશમોઽધ્યાયઃ (૧૦)*

## અધ્યાય : ૧૧

### ઘણા લોભથી પરાભવ પામેલા વસિષ્ઠ અને સહસ્ત્રાર્જુનની પુરાણોમાં પ્રસિદ્ધ કથા શ્રીહરિએ કહી છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! તે મયારામ વિપ્ર શ્રી સહજાનંદ સ્વામીનું વચન સાંભળીને જેનું મન અતિ તૃપ્તિને પામ્યું નથી એવા થકા બંને હાથ જોડીને શ્રીહરિને નમસ્કાર કરી આદરપૂર્વક ફરીથી પૂછવા લાગ્યા. (૧) મયારામ બોલ્યા : હે સ્વામિન્ ! હે દયાસિંધો ! હે હરે ! હે સર્વ જીવોનું હિત કરનારા ! પોતાના પુત્રોનું હિત પિતા જેમ કરે તેમ અમારું સર્વ પ્રકારે હિત તમો કરો છો. (૨) હે સ્વામિન્ ! અતિદુષ્ટ લોભાદિ પાંચનું મહાન બળ તમોએ કહ્યું. જે લોભાદિથી મુક્તભાવને પામેલાને પણ ભય છે. (૩) હે પ્રભો ! વસિષ્ઠાદિ લોભાદિથી જે પ્રકારે પરાભવ પામ્યા તે સર્વે કથાઓ અમો સર્વે ભક્તો જુદી જુદી સાંભળવા ઈચ્છીએ છીએ. (૪) હે રાજન્ ! શ્રેષ્ઠ બ્રાહ્મણ મયારામે આ પ્રમાણે પુછાયેલા ભક્તપતિ શ્રી નારાયણમુનિ અમૃતની માફક માધુર્યતા યુક્ત પોતાની વાણીથી સ્વાશ્રિત જનોને આનંદ આપતા સ્નેહપૂર્વક કહેવા લાગ્યા. (૫)

**શ્રીનારાયણમુનિ બોલ્યા :** હે દ્વિજ ! ભારતાદિ ઈતિહાસો તથા પુરાણોમાં વસિષ્ઠાદિની કથાઓ વિસ્તારપૂર્વક વર્ણન કરેલી છે તે કથાઓ સંક્ષેપથી હું તમોને કહું છું. (૬) તે કથાઓમાં પ્રથમ મુનિશ્રેષ્ઠ વસિષ્ઠ લોભના વશથી જે પ્રકારે પરાભવ પામ્યા તે કથા તમોને કહું છું. (૭)

પૂર્વે સૂર્યવંશમાં ઉત્પન્ન થયેલા નિમિ રાજા હતા. તે નિમિ યજ્ઞ કરશે એવા સતા પોતાના ગુરુ વસિષ્ઠમુનિને ઋત્વિક્‌ની વરુણી વર્યા. (૮) વરુણીમાં વરેલા વસિષ્ઠમુનિ યજ્ઞનો આરંભ કરાવીને પછી નિમિ રાજાને કહેવા લાગ્યા : હે રાજન્ ! તમારા યજ્ઞના આરંભ પહેલાં યજ્ઞ કરાવવા માટે ઈન્દ્રે મારું વરણ કરેલું છે જ. (૯) તે ઈન્દ્રને યજ્ઞ કરાવીને તત્કાળ અહીંયાં

ततस्त्वां याजयिष्यामि तावन्मां प्रतिपालय ॥१०॥ इत्युक्त्वाऽगाद्वसिष्ठोऽथ निमिस्तु क्षणभङ्गुरम् । देहं जानन् द्विजैरन्यैश्चकार मखमुत्तमम् ॥११॥ अथागतो वसिष्ठोऽपि याजयित्वा सुरेश्वरम् । शिष्यव्यतिक्रमं दृष्ट्वा चुकोप धनलुब्धधीः ॥१२॥ शशाप च निमिं देहस्तव पण्डितमानिनः । पतत्वद्याथ नृपतिस्तं शशापातिकोपिनम् ॥१३॥ देहस्तेऽपि पतत्वद्य लोभाद्धर्ममजानतः । एवमन्योन्यशापेन तावुभौ मृत्युमापतुः ॥१४॥ निमिस्तु जीवितो विप्रैर्विदेहोऽभूच्च याज्ञिकैः । उन्मेषणनिमेषाभ्यां स नृणां चक्षुषीक्ष्यते ॥१५॥ उर्वश्याः पुत्रतां प्राप्य मित्रावरुणवीर्यतः । विख्यातोऽभूद्वसिष्ठस्तु वेश्यासूनुरिति ध्रुवम् ॥१६॥ इत्थं लोभवशादेव वसिष्ठोऽपि महामुनिः । सूर्यवंशनृपाचार्यः सम्प्रपेदे पराभवम् ॥१७॥ लोभेन हैहयस्याथ महायोगकलानिधेः । अपि श्रीदत्तशिष्यस्य कथयामि पराभवम् ॥१८॥ अर्जुनाख्योऽभवद्राजा कृतवीर्यात्मजो महान् । चन्द्रवंशसमुत्पन्नो महाबलपराक्रमः ॥१९॥ नारायणवतारं स दत्तात्रेयं महामुनिम् । आराध्य बाहुसाहस्त्रं युधि लेभे निजेप्सितम् ॥२०॥ योगैश्वर्यं च सम्प्राप्य तत्प्रसादेन सोऽर्जुनः । अव्याहतबलौजःश्रीः पृथिवीं बुभुजेऽखिलाम् ॥२१॥ स एकदा तु मृगयां विचरन् गहने वने । यदृच्छयाऽऽश्रमं प्रापज्जमदग्नेस्तपोनिधेः ॥२२॥ स तस्मै नरदेवाय मुनिरर्हणमाहरत् । ससैन्यामात्यवाहाय कामधेनोः प्रसादतः ॥२३॥ तदाऽभूद्विस्मितो राजा वीक्ष्य तन्मुनिवैभवम् । आत्मैश्वर्यातिशयितमदृष्टं चाश्रुतं क्वचित् ॥२४॥ ततः कामदुघामेव तद्धेतुमवगत्य सः । बलात्तां स्वपुरं निन्ये क्रन्दन्तीं च सवत्सकाम् ॥२५॥ अध्येतुं च गतो विद्यां रामस्तावदुपागतः । श्रुत्वाऽर्जुनस्य दौरात्म्यं चुक्रोधाहिरिवाहतः ॥२६॥ घोरमादाय परशुं ततो

---

આવીશ એમાં સંશય કરવો નહિ. પછી તમોને યજ્ઞ કરાવીશ ત્યાં સુધી મારી પ્રતીક્ષા કરો. (૧૦) હે દ્વિજ ! વસિષ્ઠ આ પ્રમાણે કહીને ગયા. પછી નિમિ રાજા તો પોતાનું શરીર ક્ષણભંગુર જાણીને બીજા બ્રાહ્મણો પાસે ઉત્તમ યજ્ઞ કરાવતા હતા. (૧૧) પછી સુરેશ્વરને યજ્ઞ કરાવીને આવેલા વસિષ્ઠ પણ પોતાના શિષ્ય જે નિમિ રાજાનો અન્યાય જોઈને યજ્ઞ કરાવવાથી પ્રાપ્ય ધનમાં લોભવાળી બુદ્ધિવાળા થઈને ક્રોધ પામતા હતા. (૧૨) વળી વસિષ્ઠે પંડિતના અભિમાનવાળા તમારો દેહ હાલમાં પડી જાઓ : આ પ્રમાણે નિમિ રાજાને શાપ આપ્યો. ત્યાર બાદ નિમિ રાજાએ પણ અતિ કોપાયમાન થયેલા વસિષ્ઠને શાપ આપ્યો; હે મુને ! લોભથી ધર્મને નહિ જાણતા તમારો પણ દેહ હાલમાં પડો. હે વિપ્ર, આ પ્રકારે નિમિ અને વસિષ્ઠ એ બંને પરસ્પર શાપથી મૃત્યુ પામ્યા. (૧૩/૧૪) યાજ્ઞિક બ્રાહ્મણોએ દેવોની પ્રાર્થના દ્વારા જીવતા કરાયેલા નિમિ રાજા તો દેહની અરુચિ હોવાથી દેવોના અનુગ્રહથી વિદેહ (દેહરહિત) થઈને જનોમાં રહ્યા. તે નિમિ જનોનાં નેત્રોમાં ઉન્મેષ અને નિમેષથી દેખાય છે. (૧૫) વસિષ્ઠમુનિ તો મિત્રાવરુણના વીર્યથી ઉર્વશીના પુત્રપણાને પામીને વેશ્યાપુત્ર આ પ્રમાણે પ્રસિદ્ધ થયા. (૧૬) આ પ્રકારે સૂર્યવંશના નૃપના આચાર્ય મહામુનિ વસિષ્ઠ પણ લોભના વશથી જ પરાભવ પામ્યા. (૧૭) પછી શ્રી દત્તાત્રેયના શિષ્યભાવને પામેલા માટે જ મહાયોગકળાના નિધિ સહસ્ત્રાર્જુનનો લોભથી પરાભવ થયો તે કહું છું. (૧૮)

કૃતવીર્યના પુત્ર ચંદ્રવંશમાં ઉત્પન્ન થયેલા મહાબળ અને પરાક્રમવાળા અર્જુન નામે મહાન રાજા હતા. (૧૯) અર્જુન રાજાએ નારાયણના અવતાર, મહામુનિ દત્તાત્રેયની ઉપાસના કરી યુદ્ધમાં પોતાને ઈચ્છિત હજાર હાથ પ્રાપ્ત કર્યા.(૨૦) તે અર્જુન શ્રીમત્ દત્તાત્રેયની પ્રસન્નતાથી અણિમાદિ યોગનાં ઐશ્વર્ય પામીને વિનાશને નહિ પામેલી શરીર- ઈન્દ્રિયના બળની સંપત્તિવાળો સમગ્ર પૃથ્વીને ભોગવતો હતો. (૨૧) તે અર્જુન એક સમયે ગાઢ વનમાં મૃગયા કરવા માટે વિચરતો સતો સ્વેચ્છાથી તપોનિધિ જમદગ્નિમુનિના આશ્રમને પામ્યો. (૨૨) જમદગ્નિ મુનિએ કામધેનુની પ્રસન્નતાથી સેના - મંત્રી- વાહનોએ સહિત રાજા અર્જુનનો આતિથ્યસત્કાર કર્યો.(૨૩)

તે સમયે રાજા સહસ્ત્રાર્જુન પોતાના ઐશ્વર્યથી અધિક ઐશ્વર્ય, ક્યારેય સાંભળ્યું ન હોય અને જોયું ના હોય તેવો મુનિનો વૈભવ જોઈને વિસ્મય પામ્યા. (૨૪) પછી તે અર્જુન તેવા મુનિના વૈભવનું કારણ કામધેનુ જ છે એમ જાણી બરાડા પાડતી, વાછરડીએ સહિત કામધેનુને બળપૂર્વક માહિષ્મતીમાં લઈ ગયો. (૨૫)

વિદ્યા ભણવા માટે ગયેલા રામ, ભગવાનના અવતારરૂપ તે સમયમાં પોતાના આશ્રમમાં આવ્યા. અને અર્જુનનું કામધેનુ લઈ જવારૂપ દુષ્ટતાપણું સાંભળીને દંડથી તાડન કરેલા સર્પની માફક ક્રોધ પામ્યા. (૨૬) પછી ઘોર ફરશી ગ્રહણ

माहिष्मतीं पुरीम् । गत्वा स तेन युयुधे कृतान्त इव दुर्जयः ॥२७॥ अक्षौहिणीभिः सहितं स सप्तदशभिर्नृपम् । तं निहत्य निजां धेनुं गृहीत्वाऽऽश्रममाययौ ॥२८॥ तस्य तत्कर्म विज्ञाय जमदग्निः क्षमानिधिः । प्राह पुत्र ! त्वया नैतत्कृतं ब्रह्मकुलोचितम् ॥२९॥ वयं हि ब्राह्मणास्तात ! क्षमया पूज्यतां गताः । पारमेष्ठ्यं पदं प्राप क्षमयैवाम्बुजासनः ॥३०॥ क्षमयैव हरिः साक्षात्प्रभुस्तुष्यति नान्यथा । पापमेव त्वया पुत्र ! कृतमेतन्न संशयः ॥३१॥ राज्ञो मूर्धाभिषिक्तस्य वधो ब्रह्मवधाद्गुरुः । तन्निष्कृतं कुरु ततः शीघ्रं त्वं तीर्थयात्रया ॥३२॥ इति वाक्यं पितुः श्रुत्वा तीर्थयात्रां स वत्सरम् । कृत्वा यथोक्तविधिना पुनः स्वाश्रममाययौ ॥३३॥ एकदाऽऽश्रमतो रामे सभ्रातरि वनं गते । अर्जुनस्य सुता आयल्लँब्धच्छिद्रास्तदाश्रमम् ॥३४॥ क्रन्दन्तीमप्यनादृत्य रेणुकां तेऽतिदारुणाः । छित्त्वा मुनेः शिरस्तूर्णं गृहीत्वा स्वपुरं ययुः ॥३५॥ मातुराक्रन्दमाकर्ण्य रामः शीघ्रमुपेत्य तत् । उन्मत्तक्षत्रदौरात्म्यं दृष्ट्वाऽतिक्रोधमाप सः ॥३६॥ ततो माहिष्मतीं गत्वा हत्वा तानर्जुनात्मजान् । तद्रक्तेन नदीं घोरां चक्रेऽद्रिं च स शीर्षभिः ॥३७॥ पितुः शिरः समानीय तमजीवयदीश्वरः । स रामः स्थापयामास तं च सप्तर्षिमण्डले ॥३८॥ एकविंशतिकृत्वोऽथ कृतान्त इव भीषणः । निःक्षत्रियां महीं चक्रे पर्शुहस्तः परिभ्रमन् ॥३९॥ इत्थं लोभेन नृपतिः सह पुत्रैर्ननाश सः । सकलक्षत्रसंहारे हेतुश्चासीद्विनष्टधीः ॥४०॥ एवमन्येऽपि बहवो मुक्ताः सिद्धा महर्षयः। राजानश्चापि लोभेन विनष्टिं महतीं ययुः ॥४१॥ लोभं हृदो न जहतोः सुमते ! मयेत्थमुक्ता

---

કરી માહિષ્મતીપુરીમાં જઈને યમરાજાની માફક કોઈનાથી ન જીતી શકાય એવા રામે અર્જુનની સાથે યુદ્ધ કર્યું. (૨૭) તે રામ સત્તર અક્ષૌહિણીએ સહિત અર્જુન-રાજાને મારી નાખીને પોતાની ગાયને લઈને પોતાના આશ્રમમાં આવ્યા. (૨૮) જમદગ્નિ (પોતાનું નામ સાર્થક એ છે કે સૂર્યાદિ સમગ્ર દેવોના ગણોને અગ્નિની માફક અતિ ભયંકર) સામર્થ્યવાળા છતાં પણ ક્ષમાનિધિવાળા અર્જુન રાજાના વધરૂપ કર્મ રામનું જાણીને બોલ્યા, હે પુત્ર ! તમોએ આ કર્મ બ્રાહ્મણ કુળને યોગ્ય આચરણ કર્યું નથી. (૨૯) હે પુત્ર ! હે તાત ! (તાત શબ્દ વાત્સલ્યતાથી કહ્યો છે) કારણ કે આપણે બ્રાહ્મણો તો ક્ષમાથી પૂજ્યપણાને પામેલા છીએ. બ્રહ્મા ક્ષમાથી જ સત્યલોકને પામેલા છે.(૩૦) અતિ સમર્થ પ્રત્યક્ષ શ્રીહરિ ક્ષમાથી જ પ્રસન્ન થાય છે. ક્ષમાને અભાવે પ્રસન્ન થતા જ નથી માટે હે પુત્ર ! તમોએ આ પાપ જ કરેલું છે એમાં સંશય નથી. (૩૧) રાજ્યગાદી ઉપર બેસવાના સમયમાં પ્રાપ્ત થયો છે અભિષેક જેને એવા અર્થાત્ મસ્તક ઉપર વેદમંત્રોથી જળનું અભિસિંચન કરાયેલા રાજાનો વધ બ્રાહ્મણના વધથી પણ અધિક છે. માટે તમો તીર્થયાત્રા કરવાથી તત્કાળ પ્રાયશ્ચિત્ત કરો. (૩૨) હે વિપ્ર ! તે રામ આ પ્રકારે પોતાના પિતા જમદગ્નિનું વચન સાંભળીને શાસ્ત્રવિધિ પ્રમાણે એક વર્ષ સુધી તીર્થયાત્રા કરી, ત્યાર પછી પોતાના આશ્રમમાં આવ્યા. (૩૩) એક સમયે આશ્રમથી વસુમાનાદિક ભાઈઓએ સહિત રામ વનમાં ગયા ત્યારે અર્જુનના પુત્રો અવકાશ જોઈને જમદગ્નિના આશ્રમમાં આવ્યા. (૩૪) અતિ ઘાતકી સ્વભાવવાળા અર્જુનના પુત્રો રોકકળ કરતી રેણુકા (જમદગ્નિની પત્ની) ને નહિ જાણીને જમદગ્નિનું મસ્તક કાપી ગ્રહણ કરીને તત્કાળ માહિષ્મતીમાં ગયા. (૩૫) રામે માતાનું રડવું સાંભળીને તત્કાળ આશ્રમમાં આવીને પોતાના પિતાના વધરૂપ મદોન્મત્ત ક્ષત્રિયોનો દુરાત્મભાવ જોયો તેથી અતિશય ક્રોધ પામ્યા. (૩૬) પછી રામે માહિષ્મતી નગરીમાં જઈ પાંચ હજાર સહસ્ત્રાર્જુનના પુત્રોને નાશ કરી તેના રુધિરથી ભયંકર નદી કરી અને પોતાના કુઠારથી છેદેલા તેઓનાં મસ્તકથી પર્વત કર્યો. (૩૭)

મહાસામર્થીવાળા રામે પોતાના પિતા જમદગ્નિનું મસ્તક લાવી તેમને જીવતા કર્યા. પોતાના પિતાને સપ્તઋષિના મંડળમાં સ્થાપ્યા. (૩૮) ત્યારબાદ જગતનો નાશ કરનાર કાળની માફક ભયંકર ફરસી હાથમાં જેને છે એવા ક્ષત્રિયોના વિનાશ માટે ફરતા રામે એકવીશ વાર પૃથ્વીને ક્ષત્રિય વિનાની કરી. (૩૯) આ પ્રમાણે લોભથી વિનષ્ટ બુદ્ધિવાળા સહસ્ત્રાર્જુન રાજા પુત્રોએ સહિત નાશ પામ્યો. અને સમગ્ર ક્ષત્રિયોના વિનાશમાં કારણ થયો. (૪૦) આ પ્રમાણે બીજા અનેક મુક્તો-સિદ્ધો-મહર્ષિઓ-રાજાઓ પણ લોભથી મોટા વિનાશને પામ્યા છે. (૪૧)

હે રૂડી બુદ્ધિવાળા મયારામ વિપ્ર ! આ પ્રમાણે પોતાના મનથી લોભને ત્યાગ નહિ કરતા વસિષ્ઠ અને સહસ્ત્રાર્જુન રાજા આ બંનેની દશા મેં તમોને કહી. હવે પછી કામના આધીનપણાથી થયેલી બ્રહ્મા-સૌભરિ વગેરેની શ્રીમદ્



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

वसिष्ठकृतवीर्यजयोर्दशा ते । वक्ष्येऽथ कामपरतन्त्रतयाऽब्जजादेस्तां त्वं शृणु स्थिरमनाः प्रथितां पुराणे ॥४२॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे लोभेन वसिष्ठादिपराभवनामैकादशोऽध्यायः ॥११॥

श्रीनारायणमुनिरुवाच–जगत्स्रष्टा पुरा ब्रह्मा स्वाङ्गजातां सरस्वतीम् । रूपलावण्यसम्पन्नां दृष्ट्वाऽभूत्कामविह्वलः ॥१॥ उत्थाय परिरब्धुं तां यावत्स्पृशति विश्वसृट् । तावत्सा कन्यका भीता मृगी भूत्वा पलायत ॥२॥ अकामामपि तां कन्यां कामयन् स प्रजापतिः । अन्वधावन्मृगो भूत्वा निस्त्रपः कामनष्टधीः ॥३॥ पितरं त्यक्तमर्यादं तमधर्ममतिं तदा । मरीचिमुख्या ऋषयो विलोक्य प्रत्यबोधयन् ॥४॥ नैतादृशं कृतं कर्म त्वत्पूर्वैर्ब्रह्मभिः पितः ! । कल्पान्तरेषु चाप्यन्ये न करिष्यन्ति केचन ॥५॥ न निगृह्य च कः कामं प्राकृतोऽपि पुमान्निजाम् । अनुगच्छेत्सुतां त्वद्वदकामां भयविद्रुताम् ॥६॥ तेजस्विनामपि पितर्नैतत्कर्मोचितं खलु । यतस्त एव लोकेषु धर्ममार्गप्रवर्तकाः ॥७॥ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥८॥ इति प्रबोधितः पुत्रैर्लज्जितः स प्रजापतिः । अधर्मापयशोभीतः सद्यस्तां विजहौ तनुम् ॥९॥ कामेनेत्थं पुरा ब्रह्मा जगद्धाताऽपि मोहितः । दुराचारे प्रवृत्तोऽभून्निस्त्रपः पशुवद्द्विज ! ॥१०॥ अद्यापि नीचोऽपि जनस्तस्य तत्कर्म गर्हितम् । श्रुत्वैव सशिरःकम्पं निन्दां तस्य करोति वै ॥११॥

---

ભાગવતાદિમાં પ્રસિદ્ધ દશાને હું તમોને કહીશ તે તમે સ્થિર મનવાળા થઈ સાંભળો. (૪૨) *ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે લોભેન વસિષ્ઠાદિપરાભવનામૈકાદશોઽધ્યાયઃ (૧૧)*

## અધ્યાય : ૧૨

### સ્વયં શ્રીહરિએ કામથી પરાભવ પામેલા બ્રહ્મા-સૌભરિ-ઈન્દ્ર અને નહુષ રાજાની કથાઓ કહી છે.

**શ્રી નારાયણ મુનિ બોલ્યા** : હે મયારામ વિપ્ર ! પૂર્વે જગત્સ્રષ્ટા બ્રહ્મા પોતે રૂપ અને તેમાં રહેલા લાવણ્યતા રૂપ સૌન્દર્યથી સંપન્ન પોતાના અંગથી ઉત્પન્ન થયેલી સરસ્વતી નામની પોતાની પુત્રીને જોઈને કામાતુર થયા. (૧) વિશ્વસ્રષ્ટા ઊભા થઈ જેટલામાં સરસ્વતીને આલિંગન કરવા જાય છે તેટલામાં કન્યા સરસ્વતી મૃગલી થઈ દોડતી હતી. (૨)

પોતાને નહિ ઈચ્છતી એવી કન્યા સરસ્વતીના અંગનો સ્પર્શ કરવા ઈચ્છતા બ્રહ્મા મૃગ થઈ લજ્જાએ રહિત, કામથી નષ્ટ બુદ્ધિવાળા પછવાડે દોડ્યા. (૩) તે સમયે મરીચિ વગેરે ઋષિઓ ત્યાગ કરી છે મર્યાદા જેમણે અને અધર્મમાં બુદ્ધિવાળા પોતાના પિતા બ્રહ્માને જોઈને સુંદર વાણીથી બોધ આપતા હતા. (૪) હે પિતા ! તમારાથી પૂર્વે થયેલા કોઈ બ્રહ્માએ આવું (તમોએ જેવું કર્યું તેવું) કર્મ કર્યું નથી. આથી પર થનારા કલ્પોમાં પણ કોઈ કરશે નહિ. (૫)

સાધારણ પણ કયો પુરુષ કામને વશ નહિ કરી તમારી માફક નહિ ઈચ્છતી ભયથી દોડતી પોતાની પુત્રીની પાછળ દોડે. અર્થાત્ કોઈ પણ પાછળ જાય નહિ.(૬) હે પિતા ! તેજસ્વી (શ્રેષ્ઠ પ્રતાપવાળા) મહાપુરુષોને આ કર્માચરણ યોગ્ય નિશ્ચે નથી જ, જે માટે તેજસ્વીઓ જ લોકમાં ધર્મમાર્ગના પ્રવર્તાવનારા છે. (૭)

શ્રેષ્ઠ-સમગ્ર સત્ શાસ્ત્રને જાણવાથી અને અનુષ્ઠાન કરવાથી પ્રસિદ્ધિ પામેલા તેજસ્વી પુરુષ, જે જે શુભ અથવા અશુભ આચરણ કરે છે તેનાથી બીજો માણસ તે કર્મ શુભ અથવા અશુભનું આચરણ કરે છે. શ્રેષ્ઠ પુરુષ જે જે શુભાશુભનું પ્રમાણ કરે છે; તેને અનુસરનાર લોક પણ તેમણે પ્રમાણ કરેલું શુભ અથવા અશુભનું આચરણ કરે છે. (૮) હે વિપ્ર ! આ પ્રકારે પુત્રોએ બોધ કરાયેલા માટે જ લજ્જા પામેલા બ્રહ્માએ અધર્મ અને અપયશથી ભય પામીને તે શરીરનો તત્કાળ જ ત્યાગ કર્યો.(૯)

હે દ્વિજ ! આ પ્રમાણે પૂર્વે જગતને રચનાર બ્રહ્મા પણ કામથી મોહ પામીને પશુની માફક નિર્લજ થઈને દુષ્ટાચરણમાં પ્રવૃત્ત થયા. (૧૦) હાલમાં સાધારણ માણસ પણ બ્રહ્માનું નિંદનીય કર્માચરણ સાંભળીને જ પોતાનું મસ્તક હલાવીને બ્રહ્માની નિંદા કરે છે જ.(૧૧)

पराभव इति प्रोक्तः कामेन ब्रह्मणो मया । सौभरेश्चाथ वक्ष्यामि नैष्ठिकस्य तपस्विनः ॥१२॥ एकदा सौभरिर्नाम्ना महर्षिस्तपतां वरः । तपश्चक्रेऽब्दसाहस्रं प्रविश्य यमुनोदके ॥१३॥ तत्रैकदा मैथुनिनं मीनराजं स ऐक्षत । निर्वृतिं परमां प्राप्तं स्त्रीसुखेनातिकामिनम् ॥१४॥ तद्दर्शनेन तस्याभूत्स्त्रीस्पृहा हृदये मुनेः । ततः स्वीयं तपो हित्वा चिन्तयामास योषितम् ॥१५॥ इच्छन्नथो राजकन्यां नृपतिं बहुकन्यकम् । मान्धतारमुपागत्य कन्यामेकामयाचत ॥१६॥ वार्धक्यवेपमानाङ्गं तपःकृशतनुं मुनिम् । वीक्ष्य प्राह नृपः कन्या या त्वामिच्छेद्वृणीहि ताम् ॥१७॥ ततस्तथेत्युक्तवन्तं मुनिमन्तःपुरं नृपः । क्षत्रा प्रवेशयामास सोऽनिच्छुरपि तद्भयात् ॥१८॥ वार्धक्यान्नृपतेः स्वस्मिन्नप्रीतिं स विदन्नृषिः । दिव्यरूपोऽभवत्सद्यो देवीनामपि मोहनः ॥१९॥ पञ्चाशत्कन्यका राज्ञस्तं दृष्ट्वा दिव्यरूपिणम् । तदैव सर्वा अपि तं वव्रिरे स्वेप्सितं पतिम् ॥२०॥ परिगृह्य ततस्ताः स्त्रीर्निजमाश्रममेत्य सः । दिव्यसौधादि तत्कालं ससर्ज तपसो बलात् ॥२१॥ ताभिर्भोगान्स भुञ्जानो न दिवा न निशामवैत् । सहस्रशश्च तनयान्मनोज्ञांस्तास्वजीजनत् ॥२२॥ तपःसिद्धः स मुनिराडित्थं कामेन मोहितः । बभूव तपसो भ्रष्टो भगवत्प्रीतिकारणात् ॥२३॥ आख्यानं सौभरेः प्रोक्तमिति ते द्विजसत्तम ! । कामेन देवराजस्य पराभवमथ ब्रुवे ॥२४॥ विमानमेकदाऽऽरुह्य सुरराट् विचरन् क्षितौ । गङ्गायां स्नातुमायातामपश्यद्गौतमस्त्रियम् ॥२५॥ रूपलावण्यसम्पन्नां तामहल्यामवेक्ष्य सः । कामनष्टमतिः सद्यस्तामेवाचिन्तयद्धृदि ॥२६॥ उपभोक्तुं छलेनेच्छन्मुनेर्भार्यां पतिव्रताम् । अदृश्यरूप एकाकी तामेवानुजगाम सः ॥२७॥ तदाश्रममुपेत्याथ गौतमं स तपस्विनम् । दृष्ट्वा बिभ्यद्रहस्तस्थौ छिद्रमेव

---

આ પ્રમાણે કામથી બ્રહ્માનો પરાભવ મેં કહ્યો. હવે તમને મહાનૈષ્ઠિક વ્રતધારી ઉત્કૃષ્ટ તપશ્ચર્યા કરનાર સૌભરિ મુનિનો કામથી પરાભવ કહું છું. (૧૨) પૂર્વે નૈષ્ઠિક તપસ્વીઓમાં શ્રેષ્ઠ સૌભરિ નામના મહર્ષિ યમુનાના જળમાં પ્રવેશ કરીને હજાર વર્ષ સુધી તપ કરતા હતા. (૧૩) તે સૌભરિ મુનિએ એક સમયમાં યમુનાના જળમાં અતિ કામી મૈથુનમાં આસક્ત મહામત્સ્યને સ્ત્રીસુખથી શ્રેષ્ઠ સુખ પામેલો જોયો. (૧૪) તેવા પ્રકારના મહામત્સ્યને જોઈ સૌભરિના મનમાં સ્ત્રીના ઉપભોગની ઈચ્છા થઈ, ત્યાર બાદ તપનો ત્યાગ કરી સ્ત્રીનું જ ચિંતવન કરવા લાગ્યા. (૧૫)

પછી રાજકન્યાને ઈચ્છતા સૌભરિ મુનિએ ઘણી કન્યાઓવાળા માંધાતા રાજા પાસે જઈ એક કન્યાની યાચના કરી. (૧૬) વૃદ્ધપણાથી કાંપતા અંગોવાળા, તપથી શુષ્ક શરીરવાળા મુનિને જોઈને રાજા બોલ્યા, હે મુને ! જે કન્યા તમોને ઈચ્છે તેને વરો (પરણો.) આ પ્રમાણે રાજાએ કહ્યું. (૧૭) ત્યારબાદ જેમ તમે કહો છો તેમ થાઓ આ પ્રમાણે બોલતા સૌભરિને, મુનિની સાથે પોતાની કન્યાનો વિવાહ નહિ ઈચ્છતા માંધાતા રાજાએ મુનિના ભયથી (શાપ આપશે એવા ભયથી) પ્રતિહાર (અંતઃપુરના સેવક)ની સાથે અંતઃપુરમાં પ્રવેશ કરાવ્યો. (૧૮) પોતે વૃદ્ધ હોવાથી પોતાનામાં રાજા માંધાતાનો પ્રેમ નથી એવું જાણતા સૌભરિ મુનિ તત્કાળ દેવાંગનાને પણ મોહ પમાડનાર સુંદર સ્વરૂપવાળા (તપના પ્રભાવથી) થયા.(૧૯) રાજા માંધાતાની પચાસ કન્યાઓ, દિવ્ય રૂપવાળા મુનિને જોઈને તત્કાળ જ સર્વ કન્યાઓ પોતાના મનથી પામવા ઈચ્છાયેલા મુનિને વરી. (પતિ તરીકે સ્વીકારી લીધા.) (૨૦) પછી સૌભરિ મુનિ તે પચાસેય સ્ત્રીઓને ગ્રહણ કરી પોતાના આશ્રમમાં આવ્યા. પછી તપના સામર્થ્યથી તત્કાળ અતિસુંદર મહોલો બનાવ્યા. (૨૧)

મુનિ તે સ્ત્રીઓની સાથે વિષયસુખોને ભોગવતા સતા દિવસો જાણતા નહોતા તેમ જ રાત્રિ પણ જાણતા નહોતા. તે સ્ત્રીઓમાં અતિસુંદર, એક એક સ્ત્રીમાં સો સો ( = પાંચ હજાર) પુત્રો ઉત્પન્ન કર્યા. (૨૨) તપની સિદ્ધિને પામેલા મુનીન્દ્ર આ પ્રકારે કામથી મોહ પામી ભગવાનની પ્રીતિમાં કારણભૂત તપથી ભ્રષ્ટ થયા. (૨૩) હે બ્રાહ્મણોત્તમ ! આ પ્રમાણે સૌભરિનું આખ્યાન તમોને કહ્યું. પછી દેવેન્દ્રનો કામથી પરાભવ તમોને કહું છું. (૨૪)

એક સમયે દેવેન્દ્રે વિમાનમાં બેસીને પૃથ્વીમાં ફરતા થકા ગંગામાં સ્નાન કરવા આવેલી ગૌતમની સ્ત્રી (અહલ્યા)ને જોઈ. (૨૫) રૂપ-લાવણ્યયુક્ત અહલ્યાને જોઈને તત્કાળ કામથી નાશ પામી છે વિવેકબુદ્ધિ જેની એવો ઈન્દ્ર પોતાના મનમાં અહલ્યાનું ચિંતવન કરતો હતો. (૨૬) પતિવ્રતા, ગૌતમ મુનિની ભાર્યાને કપટથી ઉપભોગ કરવા ઈચ્છતો ઈન્દ્ર કોઈ ના જોઈ શકે તેવી આકૃતિવાળો (અદૃશ્ય રૂપવાળો) એકલો જ અહલ્યાની પાછળ ગયો. (૨૭) પછી ઈન્દ્ર તેના પતિના આશ્રમમાં

गवेषयन् ॥२८॥ नित्यकर्मविधानार्थं गङ्गां यातेऽथ गौतमे । तद्रूपधृत्तया साकं रेमे पापमतिः स तु ॥२९॥ कृतनित्यविधिस्तावद्दृषिः स्वाश्रममाययौ । छलयन्तं निजां भार्यां ददर्श स्वाकृतिं हरिम् ॥३०॥ ज्ञात्वा तत्तस्य दौरात्म्यं मुनिः क्रोधारुणेक्षणः । निर्भर्त्स्य बहुधा तं च शशापाधर्मकारिणम् ॥३१॥ योनिलुब्ध ! दुरात्मंस्ते वपुष्येव भविष्यति । स्त्रवद्रुधिरदुर्गन्धि योनीनां हि सहस्त्रकम् ॥३२॥ इति शप्तः स मघवा सद्योऽभूत्तादृशाकृतिः । महतीं दुर्दशां प्राप लोकेऽप्यपयशो महत् ॥३३॥ अहल्याऽपि मुनेः शापात्सम्प्रापादृश्यतां वने । शपन्ती मनसा शक्रं स्वपातिव्रत्यदूषकम् ॥३४॥ इत्थं कामेन शक्रस्य मया प्रोक्तः पराभवः । नहुषस्याथ वक्ष्यामि प्राप्तस्येन्द्रपदं द्विज ! ॥३५॥ पुरा शक्रो वृत्रवधात्पीडितो ब्रह्महत्यया । नलिन्यामवसच्छन्नं मानसाख्यसरोवरे ॥३६॥ अनीश्वरेऽथ त्रैलोक्ये सर्वे देवाः सहर्षिभिः । ऐन्द्रे पदेऽभिषिषिचुर्नहुषाख्यं नराधिपम् ॥३७॥ विद्यातपोयोगबलः प्राप्त इन्द्रपदं स तु । धर्मेण पालयामास त्रिलोकीं धर्मवत्सलः ॥३८॥ इन्द्रस्य पार्षदाः सर्वे सकलाश्च समृद्धयः । उपतस्थुस्तमेवेन्द्रं गन्धर्वाश्चाप्सरोगणाः ॥३९॥ ऐन्द्रं स वैभवं लब्ध्वा सर्वमेकां शचीं विना । तामुपेत्याह मामिन्द्रं वृणीष्वाम्बुजलोचने ! ॥४०॥ साऽथ तं प्राह धर्मज्ञ ! परस्त्रीधर्षणं भवान् । कर्तुं नार्हति कल्याण ! मां विहाय सुखी भव ॥४१॥ इत्थं तया बोध्यमानो बहुधाऽपि मदोद्धतः । कामेन व्याकुलस्तस्या नैव मेने वचो नृपः ॥४२॥ ततस्तं प्राह सा भद्र ! किञ्चित्साम्प्रतमस्ति मे । व्रतं तदन्ते नूनं त्वां वरिष्याम्यधुना व्रज ॥४३॥ इत्युक्तः स ययौ स्थानं सा चापि गुरुशिक्षया । उपश्रुतिं समाराध्य शक्रं प्राप्य जगाद तत् ॥४४॥

---

જઈને તપસ્વી ગૌત્તમ મુનિને જોઈને ભય પામેલો અહલ્યાની પ્રાપ્તિનો સમય શોધતો સતો એકાંતમાં ઊભો રહ્યો. (૨૮) પછી ગૌતમ સ્નાનાદિ નિત્યકર્મ કરવા ગંગામાં ગયા ત્યારે પાપબુદ્ધિ ઈન્દ્ર તો ગૌતમના રૂપને ધારણ કરી અહલ્યાની સાથે ક્રીડા કરતો હતો. (૨૯) જેમણે નિત્યવિધિ કર્યો છે એવા ગૌતમમુનિ તે સમયમાં પોતાના આશ્રમમાં આવ્યા. ત્યાં પોતાની ભાર્યાને કપટથી ઉપભોગ કરતા પોતાની સમાન આકૃતિવાળા ઈન્દ્રને જોતા હતા. (૩૦) ગૌત્તમ મુનિએ ઈન્દ્રનું તેવા પ્રકારનું દુષ્ટ કર્મ જાણીને ક્રોધથી લાલ નેત્રવાળા થઈ અધર્મ કરનારા ઈન્દ્રને ઘણો તિરસ્કાર કરી શાપ આપ્યો. (૩૧) હે યોનિલુબ્ધ ! હે દુરાત્મન્! સ્ત્રવતા રૂધિરવાળી માટે જ દુર્ગંધયુક્ત હજાર યોનિઓ તારા શરીરમાં જ થશે. (૩૨)

હે વિપ્ર ! આ પ્રમાણે મુનિએ શાપ આપેલો ઈન્દ્ર હજાર યોનિવાળો થયો. મોટી દુર્દશા પામ્યો. લોકમાં મોટો અપયશ પણ પામ્યો. (૩૩) અહલ્યા પણ પોતાના પતિના શાપથી વનમાં અદૃશ્યપણાને પામેલી (આ ગૌતમની સ્ત્રી છે એમ કોઈનાથી જાણી ન શકાય તેવી) થઈ. પોતાના પતિવ્રતા ધર્મમાં દૂષણ પમાડનાર ઈન્દ્રને મનથી શાપ આપતી હતી. (૩૪)

હે દ્વિજ ! આ પ્રમાણે મેં કામથી ઈન્દ્રનો પરાભવ કહ્યો. પછી ઈન્દ્રાસનને પામેલા નહુષ રાજાનો કામથી પરાભવ કહું છું. (૩૫) પૂર્વે વૃત્રાસુરના વધરૂપી બ્રહ્મહત્યાથી પીડા પામેલા ઈન્દ્રે માનસ સરોવરમાં કમળના નાળના તંતુઓમાં ગુપ્ત પણે જેમ હોય તેમ નિવાસ કર્યો. (૩૬)

પછી ભૂરાદિ ત્રણ લોકનો કોઈ પાલક નહિ હોવાથી ઋષિઓએ સહિત સર્વે દેવોએ ઈન્દ્રાસનમાં નહુષ રાજાને અભિષેકપૂર્વક બેસાડ્યો. (૩૭) વિદ્યા-તપ અને યોગના જ્ઞાનથી સ્વર્ગપાલનના સામર્થ્યવાળો માટે જ ઈન્દ્રપદને પામેલો નહુષ તો ધર્મવત્સલ થઈને ધર્મથી ત્રિલોકીનું પાલન કરતો હતો. (૩૮) ઈન્દ્રના સર્વ પાર્ષદો અને સર્વ સમૃદ્ધિઓ, સર્વ ગાંધર્વો, અપ્સરાગણો નહુષને જ પ્રાપ્ત થયા. (૩૯)

નહુષે એક ઈન્દ્રાણી વિના સમગ્ર ઈન્દ્રપદ સંબંધી વૈભવ પામીને ઈન્દ્રાણી પાસે જઈને હે કમળનયને ! ઈન્દ્રપદમાં રહેલા મને પરણો : આ પ્રમાણે કહ્યું. (૪૦) પછી ઈન્દ્રાણીએ નહુષને કહ્યું,હે ધર્મજ્ઞ! તમો પરસ્ત્રીના ધર્મભંગરૂપી કર્મ આચરણ કરવા માટે યોગ્ય નથી. હે કલ્યાણ ! મારો ત્યાગ કરીને સુખી થાઓ. (૪૧)

હે વિપ્ર ! ઈન્દ્રાણીએ ઘણી યુક્તિઓથી જ્ઞાન આપવા છતાં પણ મદોદ્ધત, કામથી વ્યાકુળતાવાળા નહુષે ઈન્દ્રાણીનું વચન અંગીકાર કર્યું નહિ. (૪૨) પછી ઈન્દ્રાણીએ નહુષને કહ્યું, હે ભદ્ર ! મારે હાલમાં કોઈ પણ વ્રત છે, વ્રતને અંતે તમોને નિશ્ચે વરીશ; હાલમાં પોતાના સ્થાનમાં જાઓ. (૪૩) હે બ્રાહ્મણ ! આ પ્રમાણે કહેવાયેલો નહુષ પોતાના નિવાસસ્થાનમાં ગયો. ઈન્દ્રાણીએ પણ બૃહસ્પતિના ઉપદેશથી ઉપશ્રુતિ નામની દેવીની સમારાધના કરી ઈન્દ્રને પામી વૃત્તાંત કહ્યું. (૪૪)

इन्द्रेण शिक्षितां युक्तिं साऽथ प्राप्य शची । स्वसमीपागतं भूपं तं हसन्ती वचोऽब्रवीत् ॥४५॥ अपूर्वयानमारुह्य युक्तं मुख्यैर्महर्षिभिः । वरीतुं मामिहायाहि त्वां वरिष्यामि निश्चितम् ॥४६॥ इत्युक्तः सत्वरं सोऽपि नियोजितमहामुनिम् । आरुह्य शिबिकां प्रायात्कामाद्धर्मपथच्युतः ॥४७॥ तत्रागस्त्यं मन्दगतिं सर्प सर्पेत्युदीरयन् । लत्तया प्राहरत् क्रुद्धो विनष्टसुकृतो नृपः ॥४८॥ ततः क्रुद्धो मुनिस्तं च शशापोत्पथवर्तिनम् । सर्पो भव त्वमेवाद्य पापात्मन्भूतले चिरम् ॥४९॥ इत्यगस्त्येन शप्तोऽसौ सर्पो भूत्वैव तत्क्षणम् । पपात भूतले राजा महत्कष्टमवाप च ॥५०॥ एवमन्येऽपि बहवो महान्तो मुनयो नृपाः । मुक्ता अपि पराभूताः कामेन बलिना द्विज ! ॥५१॥ हेयस्य सुज्ञैर्मदनस्य दौष्ट्यमित्थं मया ते गदितं द्विजेन्द्र ! । तद्धारयित्वा हृदये स्ववैरी हेयः स तूर्णं पुरुषैर्मदीयैः ॥५२॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे कामेन ब्रह्मादिपराभवनामा द्वादशोऽध्यायः ॥१२॥

श्रीनारायणमुनिरुवाच–अथ ते रसलुब्धस्य ऋष्यशृङ्गमुनेः कथाम् । प्राप्तस्य दुर्दशां ब्रह्मन्कथयामि समासतः ॥१॥ पुराऽऽसीत्कौशिकीतीरे ऋषिर्नाम्ना विभाण्डकः । तस्य पुत्रो बभूवैक ऋष्यशृङ्गस्तपोनिधिः ॥२॥ वन एव वसन् बाल्यात् पितुरन्यं स मानुषम् । पुरुषं वा स्त्रियं काञ्चिन्नापश्यन्न विवेद च ॥३॥ पित्रा सह तपः कुर्वन् पञ्चेन्द्रियरसोज्झितः । नैष्ठिकब्रह्मचर्यस्थः स वन्द्योऽभूत्सुरेश्वरैः ॥४॥ स बाल एव तपसा सर्वेषां च तपस्विनाम् । महर्षीणां मानहरः

પછી ઈન્દ્રાણીએ ઈન્દ્રે શિખવાડેલી યુક્તિ પામીને ફરીથી પોતાના સમીપમાં આવેલા નહુષ રાજાને મંદહાસ્યપૂર્વક વચન કહ્યું : (૪૫) હે રાજન્ ! અતિ શ્રેષ્ઠ મહામુનિઓથી વહન કરાયેલી માટે જ અપૂર્વ શિબિકામાં બેસીને મને વરવા માટે આ સ્થાનમાં આવો. હું નિશ્ચે વરીશ. (૪૬) હે વિપ્ર ! આ પ્રમાણે કહેવાયેલો, કામથી ધર્મમાર્ગથી ભ્રષ્ટ થયેલો નહુષ પણ તત્કાળ મહામુનિઓ અગસ્ત્યાદિ જેમાં જોડેલા છે એવી શિબિકામાં બેસીને જવા લાગ્યો. (૪૭) જોડેલા મુનિઓમાં ધીમે ધીમે ચાલનારા અગસ્ત્ય મુનિને 'સર્પ સર્પ' ઉતાવળા ચાલો, ઉતાવળા ચાલો : આ પ્રમાણે બોલતાં જેનું પુણ્ય નાશ પામ્યું છે એવા નહુષ રાજાએ ક્રોધ પામીને લાતથી પ્રહાર કર્યો. (૪૮)

તેથી ક્રોધ પામેલા અગસ્ત્ય મુનિએ કુમાર્ગમાં ચાલનાર નહુષને શાપ આપ્યો : 'હે પાપાત્મન્, હાલમાં જ તું પૃથ્વીમાં લાંબા કાળ સુધી મહાસર્પ થા.' (૪૯) હે વિપ્ર ! આ પ્રમાણે અગસ્ત્ય મુનિએ શાપ આપેલો નહુષ રાજા તે ક્ષણમાં જ સર્પ થઈને જ પૃથ્વીમાં પડ્યો. અને અપાર દુઃખ પામ્યો. (૫૦) હે દ્વિજ ! આ પ્રકારે બીજા પણ ઘણા મહામુનિઓ, રાજાઓ, અને મુક્તોને પણ મહા બળવાન કામે પરાભવ પમાડેલા છે. (૫૧)

હે દ્વિજેન્દ્ર ! સારી બુદ્ધિવાળા ભગવાનના ભક્તોએ સર્વ પ્રકારે ત્યાગ કરવા યોગ્ય કામનું આ પ્રકારે દુષ્ટપણું મેં તમોને કહ્યું. મેં કહેલું દુષ્ટપણું પોતાના ચિત્તમાં ધારણ કરીને મારા આશ્રિતોએ પોતાનો અંતઃશત્રુ કામદેવ તત્કાળ ત્યાગ કરવા યોગ્ય છે. (૫૨) *ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે કામેન બ્રહ્માદિપરાભવનામા દ્વાદશોઽધ્યાયઃ (૧૨)*

## અધ્યાય : ૧૩

**ધર્મપુત્ર શ્રીહરિએ રસાસ્વાદને આધીન થયેલા ઋષ્યશૃંગ મુનિની કથા કહી છે.**

**શ્રીનારાયણ મુનિ બોલ્યા** : હે બ્રહ્મન્ ! હવે રસમાં આસક્તિવાળા અને રસથી દુર્દશાને પામેલા ઋષ્યશૃંગ મુનિની કથા તમોને સંક્ષેપથી કહું છું. (૧) પહેલાં કૌશિકી નામની નદીને કાંઠે વિભાંડક નામના ઋષિ રહેતા હતા. તેમને એક તપોનિધિ ઋષ્યશૃંગ નામે પુત્ર હતો. (૨) તેણે બાલ્યાવસ્થાથી આરંભીને વનમાં રહેવાથી પોતાના પિતા વિના બીજા કોઈ મનુષ્યજાતિ માત્રને જોયા નહોતા માટે કોઈ પુરુષ અથવા સ્ત્રીને જાણતો નહોતો. (૩)

પોતાના પિતાની સાથે તપ કરતો પાંચ ઈન્દ્રિયો શ્રોત્રાદિના જે રસો - શબ્દાદિ વિષયોથી રહિત, નૈષ્ઠિક બ્રહ્મચર્યમાં રહેલા ઋષ્યશૃંગ મુનિ ઈન્દ્રાદિ દેવોએ વંદન કરવા યોગ્ય હતા. (૪) ઋષ્યશૃંગ બાલ્યાવસ્થામાં જ તપ કરતા હોવાથી સર્વે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सेव्यश्चासीत्प्रतापवान् ॥५॥ एतस्मिन्नन्तरे राजा लोमपाद इति श्रुतः । अङ्गदेशाधिपो मित्रमासीद्दशरथस्य सः ॥६॥ विप्राय किञ्चित्कस्मैचित्प्रतिश्रुत्य पुरोधसा । निषिद्धो नेत्युवाचाथ पौरा विप्रास्तमत्यजन् ॥७॥ ब्राह्मणातिक्रमात्तस्य न देशे पाकशासनः । ववर्ष तेन सकला प्रजाऽऽसीददतिदुःखिता ॥८॥ ततो वृद्धैः सहामात्यैर्नृपोऽवग्रहकारणम् । पिप्रच्छिषुर्मुनीन्वृद्धानरण्यं प्रत्यपद्यत ॥९॥ तत्र कश्चिन्मुनिवरस्तेनातिप्रार्थितोऽब्रवीत् । ब्राह्मणातिक्रमाद्देशे तवेन्द्रो नैव वर्षति ॥१०॥ ततस्तन्निष्कृतं कृत्वा पुरे वासय वाडवान् । मानयित्वा यथावत्तान् यथापूर्वं समर्चय ॥११॥ नैष्ठिकव्रतिनां मुख्यमीतिमात्रहराङ्घ्रिकम् । केनाप्युपायेन मुनिमृष्यशृङ्गं समानय ॥१२॥ वृष्टिर्भविष्यति ततः प्रजानां च सुखं नृप ! । इत्युक्तः स प्रहृष्टस्तं नमस्कृत्याऽऽययौ पुरम् ॥१३॥ प्रायश्चित्तं ततः कृत्वा विप्रानावास्य पत्तने । ऋष्यशृङ्गं समानेतुं प्रैषयद्वारयोषितम् ॥१४॥ कौशिक्या अथ तीरे सा चकाराश्रममद्भुतम् । कृत्रिमैः पुष्पवृक्षाद्यैर्नावं चैकामशोभयत् ॥१५॥ विभाण्डकं गुप्तदूतैर्विदित्वाऽन्यत्र सा गतम् । एकाकिनं छलयितुं तदन्तिकमथाययौ ॥१६॥ रूपलावण्यसम्पन्ना वस्त्रालङ्कारभूषिता । प्रणम्य सा तं पप्रच्छ कुशलं तपआदिषु ॥१७॥ पुंस्त्रीभेदविहीनोऽसौ ज्ञात्वा तां ब्रह्मचारिणम् । आतिथ्यं कर्तुमारेभे तस्या दर्भासनादिभिः ॥१८॥ पप्रच्छ चासि कस्त्वं भोस्तपसाग्निरिव ज्वलन् । कस्य पुण्यवतः पुत्रः क्वाश्रमस्ते जटाधर ! ॥१९॥ वेश्योवाच-कौशिक्याः परतस्तीरे रम्यो नाव्याश्रमो मम । योजनत्रयदूरेऽस्ति

---

તપસ્વીઓ અને મહર્ષિઓનાં માન હરનારા સેવા કરવા યોગ્ય પ્રતાપવાળા હતા. (૫)

એ અવસરમાં અંગદેશનો અધિપતિ લોમપાદ નામથી પ્રસિદ્ધ રાજા હતો. તે રાજા અયોધ્યાના દશરથ રાજાનો મિત્ર હતો. (૬) તે લોમપાદ રાજાએ કોઈ બ્રાહ્મણને 'હું તને (કંઈક) આપીશ' એમ પ્રતિજ્ઞા કરીને પછી પોતાના પુરોહિત બ્રાહ્મણે નિવારણ કરાયેલો સતો 'હું તને આપીશ નહિ' એમ બોલ્યો. તેથી પુરવાસી બ્રાહ્મણોએ લોમપાદ રાજાનો ત્યાગ કર્યો. (તેના નગરનો ત્યાગ કરીને વનમાં રહ્યા). (૭)

બ્રાહ્મણના અપમાનથી તે રાજાના દેશમાં ઈન્દ્રે વૃષ્ટિ કરી નહિ.વૃષ્ટિના અભાવથી સમગ્ર પ્રજા અતિ દુઃખી થઈ. (૮) પછી વૃદ્ધ અમાત્યોની સાથે લોમપાદ રાજા વૃદ્ધ મુનિઓને વૃષ્ટિ ન થવામાં શું કારણ છે એમ પૂછવાની ઈચ્છાથી વનમાં ગયો. (૯) વનમાં લોમપાદ રાજાએ અતિ પ્રાર્થના કરેલા કોઈ મુનિવર બોલ્યા, હે રાજન્ ! બ્રાહ્મણોના અતિક્રમણથી તમારા દેશમાં ઈન્દ્ર વર્ષતો નથી. (૧૦)

માટે તેનું પ્રાયશ્ચિત્ત કરીને તમારા નગરમાં બ્રાહ્મણોને ફરી નિવાસ કરાવો. અને બ્રાહ્મણોને યથાયોગ્ય માન આપીને પૂર્વની માફક તેમની વૃત્તિ આપવા પૂર્વક પૂજન કરો. (૧૧) નૈષ્ઠિક વ્રતધારીઓમાં શ્રેષ્ઠ ઈતિમાત્રનો (અતિવૃષ્ટિ-અનાવૃષ્ટિ-મૂષક-શલભ-શુક અને અતિ સમીપમાં આવતા રાજાઓ : આ છ ઈતિઓ છે, તેનો) નાશ કરનાર, ચરણકમળવાળા ઋષ્યશૃંગ મુનિને કોઈ પણ ઉપાયથી લાવો. (૧૨) હે રાજન્ ! તેમના આગમનથી વૃષ્ટિ થશે અને પ્રજાઓ સુખી થશે. હે વિપ્ર ! આ પ્રમાણે મુનિએ કહેલો લોમપાદ રાજા પ્રસન્ન થઈ મુનિને નમસ્કાર કરી પોતાના નગરમાં આવ્યો. (૧૩) પછી બ્રાહ્મણોના અતિક્રમણ નિમિત્તે પ્રાયશ્ચિત્ત કરી બ્રાહ્મણોને નિવાસ કરાવી ઋષ્યશૃંગ મુનિને લાવવા માટે કોઈ વેશ્યાને મોકલતો હતો. (૧૪)

પછી વેશ્યાએ કૌશિકી નદીને કાંઠે સુંદર આશ્રમ કર્યો, અને **કૃત્રિમ**-કૂંડાં વગેરેમાં રોપ રોપીને જળ સિંચવા વગેરેથી નવાં કરેલાં પુષ્પવૃક્ષાદિથી એક નાવ શણગાર્યું. (૧૫) તે વેશ્યા ગુપ્તદૂતો દ્વારા ઋષ્યશૃંગના પિતાને સમિધા- પુષ્પાદિ લેવા બીજા વનમાં ગયેલા જાણીને તેમજ ઋષ્યશૃંગને એકલા જાણીને પછી છલથી તે મુનિને લાવવા માટે ઋષ્યશૃંગ મુનિના સમીપમાં ગઈ. (૧૬) રૂપલાવણ્યથી યુક્ત વસ્ત્રાલંકારોથી અલંકૃત વેશ્યાએ ઋષ્યશૃંગ મુનિને પ્રણામ કરી તપ આદિમાં કુશળતા પૂછી.(૧૭) આ પુરુષ છે કે સ્ત્રી છે એવા ભેદે રહિત ઋષ્યશૃંગ મુનિએ તેને કોઈ બ્રહ્મચારી જાણી દર્ભાસનથી તેનું આતિથ્ય કરવા માટે આરંભ કર્યો. (૧૮) વળી ઋષ્યશૃંગ મુનિ તેને પૂછવા લાગ્યા : હે જટાધર ! તપશ્ચર્યાથી અગ્નિની માફક પ્રકાશિત અંગવાળા તમો કોણ છો ? (તમારું ગોત્ર શું છે ?) મહાપુણ્યવાળા કયા મુનિના પુત્ર છો ? તમારો આશ્રમ કયા વનમાં છે ? (૧૯) આ પ્રમાણે સ્ત્રીપુરુષના વિવેકે રહિત તે મુનિએ પૂછેલી વેશ્યા બોલી : હે મુને ! કૌશિકી નદીને

**तवास्मादाश्रमान्मुने! ॥२०॥ भवता नाभिवाद्योऽहमभिवाद्यो भवान्मया । व्रतमेतादृशं ब्रह्मन् ! परिष्वज्यो भवान्मया ॥२१॥** ऋष्यशृङ्ग उवाच-**भल्लातकैङ्गुदादीनि फलान्येतानि भक्षय । अलाबूनिभृतं चैतत्पानीयं पातुमर्हसि ॥२२॥ इत्युक्ता तेन सा वेश्या तत्प्रदत्तं फलादि तु । त्यक्त्वा दूरे स्वपार्श्वस्थं ददौ तस्मै रसादिकम् ॥२३॥ रत्नपात्रस्थितं पेयं स्वर्णपात्रस्थितं तथा । भक्ष्यं चातिरसं सोऽपि पीत्वा चात्त्वा मुमोद ह ॥२४॥ प्रजहास भृशं प्रीतो रसक्षुब्धेन्द्रियस्तदा । सुगन्धिपुष्पाण्याघ्राय मुनिरन्य इवाभवत् ॥२५॥ ततः सा वञ्चनपटुर्ज्ञात्वा क्षुब्धेन्द्रियं तु तम् । पुनःपुनस्तदङ्गानि श्लिष्यन्ती मधुरं जगौ ॥२६॥ ततस्तं विकृतं ज्ञात्वा सम्यगालिङ्ग्य सा पुनः । स्वाधीनं तन्मनः कृत्वा मुदमाप परां हृदि ॥२७॥ विभाण्डकागमभयात्ततः सा छलधर्मिणी । अग्निहोत्रापदेशेन पश्यन्ती तं द्रुतं ययौ ॥२८॥ भ्रष्टः स्वधर्मात्स मुनी रसास्वादेन तां हृदि । चिन्तयन्विह्वलो ह्यासीद्ग्रहग्रस्त इवोन्मदः ॥२९॥ अथ स्वाश्रममायातो विभाण्डकमुनिः सुतम् । पप्रच्छ विह्वलं दृष्ट्वा दुर्विधोऽसि कथं सुत ! ॥३०॥** ऋष्यशृङ्ग उवाच-**अत्रैको वर्णिराडायात्स्वर्णवर्णः समाकृतिः । तेजस्वी चासितजटः पद्माक्षो मधुरस्वरः ॥३१॥ कण्ठादधस्तादद्वौ पिण्डौ दधच्चातिकृशोदरः । भास्वद्वल्कलसंवीतो देवपुत्र इवाद्भुतः ॥३२॥ मुखं मे स्वेन वक्त्रेण वपुषा च वपुर्दृढम् । आश्लिष्य मधुरं कूजन्स मामानन्दयद्भृशम् ॥३३॥ सोऽतिमिष्टरसैर्भक्ष्यैः पेयाद्यैर्मामतर्पयत् । विना**

---

સામે કાંઠે તમારા આશ્રમથી બાર કોશ દૂર દેશમાં મારો અતિ સુંદર નાવ્યાશ્રમ = (નાવ વિના જવા માટે અશક્ય એવો આશ્રમ) છે. (૨૦) હે બ્રહ્મન્, તમોએ હું નમસ્કાર કરવા યોગ્ય નથી. મારાથી તમો અભિવંદન કરવા યોગ્ય છો. મારાથી તમો આલિંગન કરવા યોગ્ય છો. હે મુને ! આવું મારે વ્રત છે. (૨૧)

આ પ્રકારે છેતરાયેલા ઋષ્યશૃંગ બોલ્યા : હે વર્ણી ! તમે કોઠાં, અને ઈંગોરાં વગેરે આ ફળો જમો અને તૂંબડામાં ભરેલું પાણી પીવા માટે યોગ્ય છો.(૨૨) હે વિપ્ર ! ઋષ્યશૃંગ મુનિએ આ પ્રમાણે કહેવાયેલી વેશ્યાએ તેમણે આપેલાં ફળો દૂર કરી પોતાની પાસે રહેલા ઘેબર-બરફી-પેંડા વગેરે રસવાળા પદાર્થો ઋષ્યશૃંગને આપ્યા. (૨૩) ઋષ્યશૃંગ મુનિ પણ રત્નપાત્રમાં રહેલું સાકર વગેરેનું પાન કરવા યોગ્ય જળપાન કરી અને સુવર્ણ પાત્રમાં રહેલું જલેબી-મોતિયા-લાડુ વગેરે રસયુક્ત ભોજન કરી અત્યંત પ્રસન્ન થયા. (૨૪) તે સમયે અત્યંત પ્રસન્ન અંતઃકરણવાળા રસથી ક્ષોભ પામેલા ઈન્દ્રિયોવાળા ઋષ્યશૃંગ મુનિ અત્યંત હસવા લાગ્યા. સુગંધીમાન પુષ્પો (પુષ્પોના હારો) સૂંઘીને જાણે કે બીજા મુનિ હોય ને શું એવા થયા. (અર્થાત્ ઋષિપુત્ર જણાતા ન હતા.) (૨૫)

પછી ઠગવામાં ચતુર વેશ્યા, જેની ઈન્દ્રિયો ક્ષોભ પામેલી છે એવા તે મુનિને જાણી વારંવાર તેમનાં અંગો સ્પર્શ કરતી મધુર ગાયન ગાવા લાગી. (૨૬) પછી વેશ્યા મુનિને વિકાર પ્રાપ્ત થયેલા જાણીને તેને ફરીથી પણ સારી રીતે આલિંગન કરી તેમનું મન પોતાને આધીન કરી પોતાના હૃદયમાં અત્યંત આનંદ પામી. (૨૭) છેતરવાના ધર્મમાં અતિ પ્રવીણ વેશ્યા મુનિના પિતા વિભાંડક મુનિના આગમનના ભયથી મારે અગ્નિહોત્રનો સમય થયો છે એમ કહીને ઋષ્યશૃંગ મુનિને જોતી સતી તત્કાળ ચાલી ગઈ. (૨૮)

રસાસ્વાદથી પોતાના ધર્મથી ભ્રષ્ટ થયેલા ઋષ્યશૃંગમુનિ વેશ્યાને પોતાના હૃદયમાં ચિંતવન કરતા કરતા ક્ષોભ પામેલા અંતઃકરણવાળા થયા માટે જ ભૂતે પ્રવેશ કર્યો હોય ને શું ? તેમ ઉન્મત્ત થયા. (૨૯) પછી પોતાના આશ્રમમાં આવેલા વિભાંડક મુનિએ પોતાના પુત્ર ઋષ્યશૃંગને વિહ્વળ જોઈને હે પુત્ર ! તું વિરુદ્ધ સ્વભાવવાળો કયા કારણથી થયો છું ? આ પ્રમાણે પૂછ્યું (૩૦)

આવી રીતે પોતાના પુત્રને જોઈને પૂછતા પોતાના પિતાને ઋષ્યશૃંગ કહેવા લાગ્યો : હે પિતાજી ! આશ્રમમાં સુવર્ણની માફક ગૌરવર્ણવાળા, સમાન આકૃતિવાળા, તેજસ્વી શ્યામ જટાવાળા, કમળના જેવાં નેત્રવાળા, મધુર કંઠવાળા એક પૂર્વે નહિ જોયેલા કોઈ વર્ણીન્દ્ર આવેલા હતા. (૩૧) કંઠથી નીચેના ભાગમાં માંસની બે ગાંઠોને ધારણ કરનાર અતિકૃશ ઉદરવાળા (સૂક્ષ્મ કેડવાળા) ઘણાં પ્રકાશિત વલ્કલોથી ઢંકાયેલા દેવના પુત્ર હોયને શું ? અદ્ભુત તે વર્ણીરાજ મારા મુખને પોતાના મુખની સાથે અને મારા શરીરને પોતાના શરીર સાથે દૃઢ સંયોગ પમાડીને મધુર ગાયન ગાતા સતા મને અત્યંત આનંદ પમાડતા હતા. (૩૨-૩૩) હે પિતાજી ! વર્ણીરાજે અતિ મિષ્ટ રસોવાળાં ભોજન અને જળોથી મને તૃપ્ત કર્યો. તેના



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तं मद्वपुः सर्वमिदं दन्दह्यते पितः ! ॥३४॥ ततस्तदाश्रमं तात ! गन्तुमिच्छामि सत्वरम् । वर्णिराजेन तेनैव साकं तपस्यामि तत्र च ॥३५॥ इत्युक्तवन्तं तं पुत्रं कयाचिच्छलयोषया । विज्ञाय भ्रामितं चित्ते विस्मितः स त्वबूबुधत् ॥३६॥ रक्षांसि बहुरूपाणि छलनाय तपस्विनाम्। चरन्त्यत्रेति तं विद्धि राक्षसं मुनिभक्षकम् ॥३७॥ इत्यादिभिः स वचनैर्बोधयित्वा सुतं मुनिः । दिनत्रयं विचिन्वंस्तामपि लेभे न कानने ॥३८॥ अथैकदाश्रमात्तस्मिन्वन्यार्थं निर्गते मुनौ । तत्रागच्छत्पुनः साऽपि शिञ्जन्नूपुरमेखला ॥३९॥ दूराद्विलोक्य तां वेश्यामृष्यशृङ्गोऽतिहर्षितः । तत्सम्मुखं प्रदुद्राव स्नेहाच्च परिषस्वजे ॥४०॥ ऋष्यशृङ्ग उवाच-यावत् पिताश्रममिमं नेयान्मे प्राणवल्लभ ! । तावत्त्वदाश्रमं रम्यं नेतुमर्हसि मामितः ॥४१॥ इत्युक्ता तेन सा हृष्टा नाव्यारोप्य तमाशु च । राज्ञोऽन्तःपुरमानीय प्राहायं ह्याश्रमो मम ॥४२॥ ततः शृङ्गारिकं दाक्ष्यं योषितस्तमशिक्षयन् । सोऽपि स्वधर्ममुत्सृज्य तच्छिक्षासु रतोऽभवत् ॥४३॥ राज्ञो देशेऽप्यभूद्वृष्टिस्तस्यैवागमनान्मुनेः । ततः स्वकन्यां शान्ताख्यां ददौ तस्मै नृपो मुदा ॥४४॥ इत्थं स वै जगत्पूज्यो नैष्ठिकोऽपि मुनिर्द्विज ! । रसास्वादादभूद्भ्रष्टः स्वकीयाद्धि बृहद्व्रतात् ॥४५॥ एवमन्येऽपि बहवो राजानश्च महर्षयः । रसास्वादपरिभ्रष्टाः प्रापुर्लोकेऽतिगर्ह्यताम् ॥४६॥ एवं रसास्वादवशेन ऋष्यशृङ्गस्य ते भ्रष्टबृहद्व्रतस्य । कथा मयोक्ताऽथ वदामि विप्र ! श्रव्यां नृभिस्तां भरतस्य राज्ञः ॥४७॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे रसास्वादेन ऋष्यशृङ्गपराभवनामा त्रयोदशोऽध्यायः ॥१३॥

---

વિના આ મારું શરીર બધું અતિશય બળે છે. (૩૪) હે પિતાજી, મારે તત્કાળ તેમના આશ્રમમાં જવાની ઈચ્છા છે. તે વર્ણીરાજની સાથે જ તેમના આશ્રમમાં જ તપ કરીશ.(૩૫) હે વિપ્ર ! તે વિભાંડક મુનિ તો આ પ્રમાણે કહેતા ઋષ્યશૃંગને કોઈ કપટમાં અતિ ચતુર સ્ત્રીએ ચિત્તભ્રમ કરાવેલો છે એમ મનમાં જાણીને વિસ્મય પામેલા સતા બોધ કરતા હતા. (૩૬) હે પુત્ર ! વિવિધ રૂપ ધરનાર મનુષ્યને ભક્ષણ કરનારા રાક્ષસો તપસ્વી મુનિઓને છેતરવા માટે વનમાં ફરે છે. માટે તારા સમીપમાં આવેલાને મુનિઓને ભક્ષણ કરનારો રાક્ષસ જાણ. (૩૭)

હે વિપ્ર ! વિભાંડક મુનિએ આવી રીતનાં વચનોથી પોતાના પુત્ર ઋષ્યશૃંગને બોધ આપી વનમાં ત્રણ દિવસ સુધી તે સ્ત્રીને ખોળી છતાં પ્રાપ્ત થઈ નહિ. (૩૮) પછી એક સમયે વિભાંડક મુનિ વનમાં થયેલા સમિધા-કુશ-ફળાદિક લેવા માટે આશ્રમથી ગયા ત્યારે શબ્દાયમાન (ખણખણ થતા) નૂપુર-કંદોરો જેને છે એવી વેશ્યા ફરીથી પણ ઋષ્યશૃંગ મુનિના આશ્રમમાં આવી. (૩૯) દૂરથી વેશ્યાને જોઈને અતિ હર્ષ પામેલા ઋષ્યશૃંગ મુનિ વેશ્યાની સન્મુખ દોડ્યા અને સ્નેહથી આલિંગન કરવા લાગ્યા. (૪૦) **ઋષ્યશૃંગ બોલ્યા** : હે પ્રાણવલ્લભ ! જેટલી વારમાં મારા પિતા આશ્રમમાં આવે નહિ તેટલામાં મને મારા આશ્રમથી રમણીય તમારા આશ્રમમાં લઈ જવા માટે યોગ્ય છો. (૪૧)

હે વિપ્ર ! ઋષ્યશૃંગે આ પ્રમાણે કહેવાથી વેશ્યાએ હર્ષ પામીને મુનિને તત્કાળ નૌકામાં બેસાડીને લોમપાદ રાજાના અંતઃપુરમાં લઈ જઈને 'આ મારો આશ્રમ છે' એમ કહ્યું. (૪૨) પછી સ્ત્રીઓએ તે મુનિને શૃંગારરસમાં ઉપયોગી દક્ષતા (ચાતુર્યતા) શીખવાડી. તે મુનિ પણ પોતાના નૈષ્ઠિકબ્રહ્મચારી ધર્મનો ત્યાગ કરી શૃંગારિક શિક્ષામાં આસક્ત થયા. (૪૩) તે મુનિના આવવાથી જ રાજાના દેશમાં વૃષ્ટિ પણ થઈ પછી રાજાએ શાંતા નામની કન્યા હર્ષપૂર્વક ઋષ્યશૃંગ મુનિને આપી. (૪૪) હે દ્વિજ ! આ પ્રમાણે જગત્પૂજ્ય નૈષ્ઠિક મુનિ પણ રસાસ્વાદથી પોતાના નૈષ્ઠિક બ્રહ્મચર્યથી ભ્રષ્ટ થયા. (૪૫) આ પ્રમાણે બીજા પણ ઘણા રાજાઓ અને મહર્ષિઓ રસાસ્વાદથી ભ્રષ્ટ થયેલા સતા જનસમૂહમાં અતિ નિંદ્યપણાને પામ્યા છે. (૪૬)

હે વિપ્ર ! રસાસ્વાદના વશપણાથી જેમનું બ્રહ્મચર્યવ્રત નાશ પામ્યું છે એવા ઋષ્યશૃંગ મુનિની કથા મેં તમોને કહી. હવે ભગવાનના ભક્તોએ સાંભળવા યોગ્ય ભરત રાજાનું આખ્યાન કહું છું. (૪૭) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે ઋષ્યશૃંગપરાભવનામા ત્રયોદશોઽધ્યાયઃ (૧૩)*



**પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર**

श्रीनारायणमुनिरुवाच–आर्षभो भरतो नाम्ना बभूव नृपतिः पुरा । जम्बूद्वीपस्य खण्डानां नवानामपि सोऽधिराट् ॥१॥ अजनाभमिति ख्यातं खण्डमेतत्पुरा द्विज ! । यदीयनाम्ना सर्वत्र भारताह्वयमुच्यते ॥२॥ स राज्यं भरतः कुर्वन्धर्ममेव प्रवर्तयन् । भगवन्तं वासुदेवमीजे बहुविधैर्मखैः ॥३॥ भक्तिः प्रववृधे तस्य भगवत्यनुवासरम् । ततोऽन्यत्र विरक्तिश्च राज्ययोषाधनादिषु ॥४॥ विभज्य दत्त्वा पुत्रेभ्यस्ततो राज्यं यथोचितम् । प्रार्थ्यां सुरैरपि निजां श्रियं स मलवज्जहौ ॥५॥ आरिराधयिषुर्भक्त्या हरिमेव महामतिः । स्त्रीपुत्रधनराज्यादि हित्वाऽगात् पुलहाश्रमम् ॥६॥ शान्तो मुमुक्षुरेकाकी वितृष्णो विषयेषु च । स गण्डकीतटे तत्र चकारोपासनं हरेः ॥७॥ फलमूलाम्बुतुलसीकन्दाद्यैः पूजयन्हरिम् । स प्रेमविवशो नैव बुबुधे पूजनक्रमम् ॥८॥ हिरण्मयं च पुरुषं सूर्यमण्डलमध्यगम् । पुरुषप्रकृतिपरं सूर्यर्चोपास्त शुद्धधीः ॥९॥ गण्डक्यामेकदा स्नात्वा जजाप प्रणवं हृदि । पिपासुर्हरिणी तावत्तत्रैकाऽऽयात्तु गर्भिणी ॥१०॥ यावत् पिबति सा तोयं तावत्कश्चन केसरी। उच्चैश्चकार निनदं सर्वलोकभयङ्करम् ॥११॥ तं श्रुत्वातिभयात्तस्या द्रवन्त्या गण्डकीतटे । गर्भः पपात सहसा स्त्रोतस्यथ ममार सा ॥१२॥ उह्यमान तरङ्गैस्तं कोमलाङ्गं मृगीसुतम् । विलोक्य स तु राजर्षिर्दययाश्रममानयत् ॥१३॥ तस्य तस्मिन्नतिस्नेहो ववृधेऽनुदिनं ततः । अनाथस्यास्य न त्राता मां विनेति दयावशात् ॥१४॥

## અધ્યાય : ૧૪

### જેમણે રાજ્યનો ત્યાગ કર્યો છે એવા-શ્રી ઋષભદેવના પુત્ર, જે મૃગના બાળકમાં સ્નેહથી યોગભ્રષ્ટ થયા તે ભરતની કથા કહેલી છે.

**શ્રી નારાયણ મુનિ બોલ્યા :** હે વિપ્ર ! પૂર્વે ભગવાન ઋષભદેવના પુત્ર ભરત નામના રાજા હતા. તે જમ્બુદ્વીપના નવ ખંડોના પણ સમ્રાટ રાજા હતા. (૧) હે દ્વિજ ! પહેલાં અજનાભ નામથી પ્રસિદ્ધ આ (ભારત વર્ષ) ખંડ જે ભરતના નામથી બધા ખંડોમાં પણ જેની 'ભારત' સંજ્ઞા પુરાણ જાણનારા મુનિઓએ કહેલી છે. (૨) તે ભરત રાજ્ય કરતા સતા ધર્મને જ પ્રવર્તાવતા થકા શ્રી વાસુદેવ ભગવાનને ઘણા પ્રકારના યજ્ઞોથી પૂજતા હતા. (૩)

ભરત રાજાને શ્રી વાસુદેવ ભગવાનમાં ભક્તિ પ્રતિદિન વૃદ્ધિ પામી તેમજ ભગવાન વિના બીજા-રાજ્ય-સ્ત્રીઓ-ધન અને પુત્રાદિકોમાં વૈરાગ્ય વૃદ્ધિ પામ્યો. (૪) પછી ભરતે રાજ્યનો સુમતિ વગેરે પોતાના પુત્રોને યથાયોગ્ય વિભાગ કરી આપીને દેવોએ પણ પ્રાર્થના કરવા યોગ્ય પોતાની રાજ્યલક્ષ્મીને મળની માફક ત્યાગ કરી. (૫)

મહાબુદ્ધિશાળી ભરત રાજા સપ્રેમ નવધા ભક્તિથી શ્રીવાસુદેવનું જ આરાધન કરવા ઈચ્છતા સતા સ્ત્રીઓ, પુત્રો, ધન અને રાજ્ય વગેરેનો ત્યાગ કરીને મુક્તનાથ ભગવાનના નિવાસસ્થાન રૂપ પુલહાશ્રમમાં ગયા. (૬) ઉપશમ અવસ્થામાં રહેલા-મુમુક્ષુ-એકાકી તેમજ શબ્દાદિ પંચ વિષયોમાં તૃષ્ણા રહિત તે ભરત પુલહાશ્રમમાં શ્રીહરિની ઉપાસના કરવા લાગ્યા. (૭) ફળ, મૂળ, જળ, તુલસી અને કંદ, ગંધ, પુષ્પાદિ વગેરેથી યથાસમય પૂજા કરતા ભરત પ્રેમથી વિવશ થઈને પૂજાનો અનુક્રમ ભૂલી જતા હતા. (૮)

ભગવાનની ઉપાસનાથી નિર્મળ બુદ્ધિવાળા ભરત સૂર્યમંડળના મધ્યમાં રહેલા પુરુષ પ્રકૃતિથી પર હિરણ્મય પુરુષની સૂર્યની ઋચાઓ- **'પરોરજઃ સવિતુઃ'** થી ઉપાસના કરતા હતા. (૯) એક સમયે ભરત ગંડકી નદીમાં સ્નાન કરી પોતાના મનમાં ૐકારનો જપ કરતા હતા. તે સમયે તરસી થયેલી એક ગર્ભિણી મૃગલી ત્યાં આવી. (૧૦) તે મૃગલી જેટલામાં જળ પીએ છે તેટલામાં કોઈ કેસરી સિંહે સર્વ લોકોને ભય પમાડનારો ઊંચો નાદ કર્યો. (૧૧)

કેસરી સિંહનો નાદ સાંભળી અતિ ભયથી ગંડકીના તટમાં દોડતી મૃગલીનો ગર્ભ ગંડકીના પ્રવાહમાં એકદમ પડી ગયો. પછી મૃગલીએ પ્રાણોનો ત્યાગ કર્યો. (૧૨) રાજર્ષિ ભરત જળતરંગોથી તણાતા કોમળ શરીરવાળા મૃગીસુતને જોઈને દયાથી આશ્રમમાં લાવ્યા. (૧૩) આશ્રમમાં લાવ્યા પછી માતાપિતાના અભાવથી દીન આ મૃગીસુતને મારા વિના બીજું કોઈ રક્ષા કરનાર છે જ નહિ : આ પ્રકારે દયાથી ભરતને દરરોજ તેમાં અતિસ્નેહ વૃદ્ધિ પામ્યો. (૧૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

नियमाः स्नानसन्ध्याद्या अहिंसाद्या यमास्तथा । मृगं लालयतस्तस्य सर्वे नष्टाः शनैः शनैः ॥१५॥ बालत्वात्कोमलतनुं तं सम्प्रीणयतो मुदा । तदेकबद्धचित्तस्य हर्यर्चाप्याऽऽस विस्मृता ॥१६॥ आसने शयने याने भोजनादौ च तं शिशुम् । दूरे कर्तुं क्षणमपि सोऽतिस्नेहान्न चाशकत् ॥१७॥ तस्मिंश्च स्वेच्छयाऽन्यत्र गते क्वापि क्षणं मृगे । राजर्षिर्नष्टधनवज्जायते स्मातिविह्वलः ॥१८॥ तृणानि चरतस्तस्य कदाचित्स्वाश्रमागमे । विलम्बो जायते यर्हि तदा विलपति स्म सः ॥१९॥ कामिनी कामुकस्येव राजर्षिः स मृगीशिशोः । शशाक विरहं सोढुं नैव स्नेहवशात्क्वचित् ॥२०॥ इत्थं मृगसुताकारमनसस्तस्य भूपतेः । स्वदेहारम्भकं कर्म समाप्तिमगमद्द्विज ! ॥२१॥ कालहाततनुः सोऽथ मृगदेहमवाप्तवान् । अन्तकालेऽपि तं ध्यायन्समीपस्थमिवात्मजम् ॥२२॥ इत्थं स राजा सन्त्यक्तराज्यस्त्रीपुत्रवैभवः । अपि मृगार्भस्नेहेन पशुत्वं स्वयमाप्तवान् ॥२३॥ एवमन्येऽपि बहवो मुनयश्च नृपा अपि । स्नेहेनैव पराभूता लेभिरे दुर्दशां भृशम् ॥२४॥ दययापि हरीतरे पदार्थे मनसा स्निह्यति यः स रूढयोगः । अपि संसृतिमेति हीनबुद्धिर्भरतोऽसाविव विप्रवर्य ! नूनम् ॥२५॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे स्नेहेन भरतपराभवनामा चतुर्दशोऽध्यायः ॥१४॥

श्रीनारायणमुनिरुवाच-दक्षदुर्वाससोर्विप्र ! कथां मानाभिभूतयोः । श्रव्यामवश्यं धार्यां च सद्भिर्वदाम्यथ ॥१॥ पुरा भागीरथीतीरे चक्रुर्विश्वसृजो मखम् । तत्र देवाश्च देव्यश्च मुनयोऽप्यासताखिलाः ॥२॥ दक्षः प्रजापतिस्तत्र सहसाऽर्क इवागमत् । योऽभिषिक्तः प्रजेशानामाधिपत्ये विरिञ्चिना ॥३॥

---

મૃગના બાળકને લાલનપાલન કરતા ભરતના સ્નાન-સંધ્યાદિ નિયમો તથા અહિંસાદિ યમો ધીરે ધીરે નાશ પામ્યા. (૧૫) બાળક હોવાથી કોમળ શરીરવાળા મૃગીસુતને પાલન કરતા તેમાં જ એક ચિત્તવાળા ભરત ભગવાનની પૂજા પણ ભૂલી ગયા.(૧૬) ભરત, બેસવું-સૂવું-જવું તથા ભોજનાદિ ક્રિયામાં મૃગના બાળકને અતિ સ્નેહથી ક્ષણ માત્ર પણ દૂર કરવામાં શક્તિમાન થયા નહિ. (૧૭) મૃગ કોઈ સમયે પોતાની ઈચ્છાથી ક્ષણવાર પણ બીજા સ્થાનમાં જાય તો રાજર્ષિ ભરત, ધન નાશ પામેલાની માફક અતિ વિહ્વળ થતા હતા. (૧૮)

ઘાસ ચરતું મૃગબાળક પોતાના આશ્રમમાં કોઈ દિવસ મોડું આવે ત્યારે ભરત વિલાપ કરતા હતા. (૧૯) ઘણા કામવાળી સ્ત્રી પોતાના અભિલાષી-કામી માણસના વિરહને જ જેમ તેમ રાજર્ષિ ભરત સ્નેહાધીન હોવાથી મૃગના બાળકનો વિરહ સહન કરવા ક્યારેય પણ સમર્થ થયા નહિ.(૨૦) હે દ્વિજ ! આ પ્રકારે મૃગના બાળકને અખંડ સંભારતા હોવાથી મૃગસુતના આકારવાળા મન યુક્ત ભરતના દેહનું આરંભક કર્મ સમાપ્ત થયું. (૨૧) પછી ભરત અંતઃકાળમાં પણ પુત્રની માફક સમીપમાં રહેલા મૃગબાળકનું ધ્યાન કરતાં, કાળથી ત્યાગ કર્યું છે શરીર જેમણે એવા સતા મૃગદેહને પામ્યા. (૨૨)

આ પ્રમાણે ત્યાગ કર્યા છે, સ્ત્રી-ધન-રાજ્ય-પુત્રો વગેરે જેમણે એવા ભરત રાજા મૃગના બાળકમાં પ્રીતિથી પોતે મૃગભાવરૂપ પશુપણું પામ્યા. (૨૩) આ પ્રકારે બીજા પણ ઘણા રાજાઓ અને મુનિઓ પણ સ્નેહથી પરાભવ પામ્યા સતા અત્યંત દુર્દશાને પામેલા છે. (૨૪)

હે વિપ્રવર્ય ! જે ભક્તજન દયાથી પણ શ્રીકૃષ્ણ ભગવાન વિના અન્ય પદાર્થમાં મનથી સ્નેહ કરે છે તો તે ભક્ત દઢ ભક્તિયોગમાં આરૂઢ હોય તોપણ આ પૂર્વે કહેલા ભરતજીની માફક બુદ્ધિરહિત થઈને સંસારને પામે છે. (૨૫)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે સ્નેહેન ભરતપરાભવનામા ચતુર્દશોऽધ્યાયઃ (૧૪)*

## અધ્યાય : ૧૫

**માનથી પરાભવ પામેલા દક્ષ પ્રજાપતિ અને દુર્વાસા મુનિની કથા કહેલી છે.**

**શ્રી નારાયણ મુનિ બોલ્યા :** હે વિપ્ર ! હવે ભગવાનના ભક્ત સાધુપુરુષોએ અવશ્ય સાંભળવા યોગ્ય અને પોતાના મનમાં ધારણ કરવા યોગ્ય એવી-માનથી પરાભવ પામેલા દક્ષ અને દુર્વાસાની કથા કહું છું. (૧) પૂર્વે વિશ્વની સૃષ્ટિ કરનારા પ્રજાપતિઓ ભાગીરથીને કિનારે યજ્ઞ કરતા હતા; તે યજ્ઞમાં સમગ્ર દેવો-દેવીઓ અને મુનિઓ પણ આવેલાં હતાં. (૨) સૂર્યની માફક તેજસ્વી દક્ષ પ્રજાપતિ પણ તત્કાળ તે યજ્ઞમાં આવ્યા, જે દક્ષની બ્રહ્માએ મરીચ્યાદિ પ્રજાપતિઓના અધિપતિપણામાં અભિષેકપૂર્વક સ્થાપના કરેલી હતી.(૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

ततोऽभिमन्यमानः स्वं सर्वतोऽधिकमेव सः । सभायां मानितो देवैर्नत्वा विधिमुपाविशत् ॥४॥ स पश्यन्नभितो देवानासीनं शिवमैक्षत । ऐकाग्र्यं ब्रह्मणि प्राप्तं वासुदेवे निजात्मनः ॥५॥ अकृतप्रणतिं तं च ज्ञात्वा दक्षोऽतिमानवान् । शपमानश्च कोपात्तं देवादीनिदमाह सः ॥६॥ न मत्सरान्न चाज्ञानात्किञ्चिद्देवा ! वदाम्यहम् । किन्तु सामान्यतो वृत्तं साधूनां कथयामि वः ॥७॥ इत्यादिमानिभाषाया युक्तिभिः स्वस्य साधुताम् । दर्शयित्वा सुरांश्चक्रे गर्हणां शङ्करस्य सः ॥८॥ लोकपालयशोहन्ता निर्लज्जः शङ्करो ह्ययम् । सन्मर्यादां समुल्लङ्घ्य स्तब्धोऽस्मानवमन्यते ॥९॥ जामातृत्वात्तु शिष्यो मे गुरुं वाचापि मामसौ। प्रत्युत्थानाभिवादार्हं सदस्यादृतवान्न वै ॥१०॥ मर्कटाक्षः क्रियाहीनो भूतसङ्गी दिगम्बरः । श्मशामवासी मुण्डस्त्रक् चिताभस्मानुलेपनः ॥११॥ अशिवाय शिवाख्याय नष्टशौचाय दुर्हृदे । दत्ता मयाऽनिच्छतापि कन्याऽस्मै विधिचोदनात् ॥१२॥ सोऽयं भूरिदुराचारो यज्ञे भागं न शङ्करः । प्राप्नोत्विति क्रुधा शप्त्वा दक्षस्तं स्वालयं ययौ ॥१३॥ शप्त्वा शिवं व्रजन्तं तं नन्दिकेशः शशाप च । दक्षोऽस्तु तत्त्वविमुखो बस्तास्यो वपुरात्मधीः ॥१४॥ इति शप्त्वा प्रजाध्यक्षं ततो नन्दी तदाश्रितान् । विप्रानपि क्रुधा सर्वाञ्छशापारुणलोचनः ॥१५॥ वेदवादेषु मुह्यन्तु सर्वभक्ष्या द्विजातयः । वृत्यै विद्याव्रतधरा याचका विचरन्त्विह ॥१६॥

---

પછી પોતાના આત્માને સર્વ પ્રજાપતિ વગેરેથી શ્રેષ્ઠ, અભિમાન પૂર્વક જાણતા દક્ષ સભામાં દેવોએ સત્કાર કરાયેલા થકા પોતાના પિતા બ્રહ્માને નમસ્કાર કરી પોતાને આસને બેઠા. (૪) દક્ષ પ્રજાપતિએ ચોતરફ ઈન્દ્રાદિ દેવોના સમૂહ જોતા સતા પોતાની આગળ બેઠેલા, જેમનું ચિત્ત ભગવાન વાસુદેવમાં એકાગ્રપણાને પામેલું છે એવા પોતાના જમાઈ શ્રી મહાદેવને જોયા. (૫)

અત્યંત માનવાળા તે દક્ષ, શિવજીને- જેણે પોતાને પ્રણામ નથી કર્યા એવા જાણીને ક્રોધથી શિવને શાપ આપતા સતા દેવાદિને આ પ્રમાણે કહેવા લાગ્યા : (૬) હે દેવો ! હું જે કાંઈ કહું છું તે મત્સરથી કહેતો નથી. તેમજ અજ્ઞાનથી પણ નથી જ કહેતો પરંતુ સાધારણભાવથી સત્પુરુષોનો સદાચાર તમોને કહું છું. (૭) હે વિપ્ર ! દક્ષે આ વગેરે (પૂર્વે કહ્યા પ્રમાણે) માની જનોની ભાષણની યુક્તિઓથી પોતાની સાધુતા દેવોને બતાવીને શિવની નિંદા કરવા લાગ્યા : (૮)

આ શંકર છે તે લોકપાલોના યશને હણનાર, લજ્જારહિત, અનમ્ર છે માટે જ સત્પુરુષોએ બાંધેલી મર્યાદા ઉલ્લંઘન કરી અમારું અપમાન કરે છે. (૯) આ શિવ મારી દીકરીના પતિ હોવાથી મારા શિષ્ય છે માટે હું ગુરુ હોવાથી તેણે ઊભા થઈને પ્રણામ કરવાને યોગ્ય એવા પણ મને સભામાં વાણીથી પણ મારો સત્કાર કર્યો નથી. (૧૦)

માંકડાના જેવા નેત્રવાળા, ક્રિયાથી રહિત, ભૂતપ્રેતાદિ પાર્ષદોથી વિંટાયેલા, દિગંબર, સ્મશાનવાસી, મુંડની માળાવાળા, ચિતાભસ્મ શરીરે લગાવનાર, અમંગલ સ્વરૂપ તોપણ શિવ નામવાળા, પવિત્રતા રહિત, દુષ્ટ મનવાળા આ શંકરને કન્યા આપવાની ઈચ્છા રહિત એવા મેં બ્રહ્માએ પ્રેરણા કરવાથી સતી નામની પુત્રી આપી. (૧૧-૧૨) ઘણા દુરાચારવાળા આ શંકર યજ્ઞમાં ભાગ પામો નહિ. હે વિપ્ર ! આ પ્રકારે દક્ષ પ્રજાપતિ ક્રોધથી શિવને શાપ આપી પોતાના ભવનમાં ગયા. (૧૩) શિવને શાપ આપીને જતા દક્ષને પણ શિવના ગણોમાં આગેવાન નંદિકેશ્વર શાપ આપવા લાગ્યાઃ 'દક્ષ આત્માપરમાત્માના જ્ઞાન રહિત થાઓ' (એવો એક શાપ,) બકરાના મુખ જેવા મુખવાળા થાઓ : આ પ્રમાણે બીજો શાપ, તથા દેહમાં આત્મબુદ્ધિવાળા થાઓ : આ પ્રમાણે ત્રીજો શાપ આપ્યો. (૧૪)

હે વિપ્ર ! આ પ્રમાણે નંદિકેશ્વરે પ્રજાપતિને શાપ આપીને પછી ઘણા ક્રોધથી લાલચોળ નેત્રવાળા થઈને દક્ષના આશ્રિત, જે શિવના અપમાનનું અનુમોદન આપનારા હતા તે સર્વ બ્રાહ્મણોને પણ શાપો આપ્યા. (૧૫) બ્રાહ્મણો વેદવાદોમાં કર્માત્મક અર્થવાદોમાં આસક્ત થાઓ : (આ પહેલો શાપ છે.) ભક્ષ્યાભક્ષ્યના વિચારથી રહિત થાઓ : (આ બીજો શાપ છે.) દેહાદિના પોષણ માટે વિદ્યાભ્યાસો અને કૃચ્છ્ર-ચાંદ્રાયણ વગેરે વ્રતોને ધારણ કરનારા થાઓ : (આ ત્રીજો શાપ) અને ભિક્ષુકો થઈ આ લોકમાં જ્યાં ત્યાં ભ્રમણ કરતા રહો : આ પ્રમાણે ચોથો શાપ આપ્યો. (૧૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

इति विप्राञ्छपन्तं तं वैदिकानपि नन्दिनम् । वीक्ष्य क्रुद्धो भृगुः शैवानशपद्दारुणो मुनिः ॥१७॥ भवव्रतधरा ये च ये च तान् समनुव्रताः । पाषण्डिनस्ते भवन्तु सच्छास्त्रपरिपन्थिनः ॥१८॥ नष्टशौचा मूढधियो जटाभस्मास्थिधारिणः । विशन्तु शिवदीक्षायां यत्र दैवं सुरासवम् ॥१९॥ शपत्येवं भृगौ शैवान्विमनाः शङ्करस्ततः । उत्थाय कैलासमगात् पार्षदैः सहितो निजैः ॥२०॥ अथ कोऽपि मखं कर्तुं रुद्रभागं विना भुवि । नाशकत्क्वापि देवोऽपि कालोऽयाद्विमखो महान् ॥२१॥ ततो दक्षः स्वयं यज्ञमारेभे माननष्टधीः । शिवमेकमनाहूय युक्तो देवैस्तथर्षिभिः ॥२२॥ अनादरं शङ्करस्य ज्ञात्वा ब्रह्मा तथाऽच्युतः। अप्यादरात्समाहूतौ तन्मखं नैव जग्मतुः ॥२३॥ दक्षेण कन्यापि निजा शङ्करद्वेषतः सती । नाऽऽहूता कन्यकास्त्वन्याः समाहूताः सभर्तृकाः ॥२४॥ विमानानि समारुह्य यान्तीर्गगनवर्त्मना । सुराङ्गनाः पितुर्यज्ञं वीक्ष्य हृष्टाऽभवत्सती ॥२५॥ अनाहूतापि सा पित्रा द्रष्टुं यज्ञमहोत्सवम् । अत्युत्सुकोद्यता गन्तुं बभूव स्त्रैणधीवशात् ॥२६॥ शङ्करेण निषिद्धापि युक्तिभिर्बहुधैव सा । गणैः कतिपयैर्युक्ता पितुर्यज्ञं हठाद्ययौ ॥२७॥ शिवद्वेषवशाद्दक्षो न तां दृष्ट्याऽप्यवैक्षत । अनादृता ततः सापि तस्मै चुक्रोध मानिनी ॥२८॥ अरुद्रभागं यज्ञं च वीक्ष्य दक्षं सती रुषा । निर्भर्त्स्य बहुधा देहं जहौ सद्यः समाधिना ॥२९॥ ततो रुद्रगणा दक्षं हन्तुमभ्यापतन् हि तान् । भृगुर्घातयितुं वह्नेर्देवान्समुदपादयत् ॥३०॥ तैरुल्मुकप्रहरणैर्ऋभुसंज्ञैरितस्ततः । हन्यमाना रुद्रगणाः पलायनमकुर्वत ॥३१॥

---

હે વિપ્ર ! આ પ્રકારે વૈદિક બ્રાહ્મણોને શાપ આપતા નંદિને જોઈ ક્રોધ પામેલા ભૃગુમુનિ શિવભક્તોને શાપ આપવા લાગ્યા. (૧૭) જે પુરુષો શંકરના વ્રતને (સ્મશાનમાં રહેવું, ચિતાભસ્મ ચોળવી વગેરેને) ધારણ કરનારા છે અને જે પુરુષો તેવાઓને અનુસરેલા છે તે સર્વે વેદમાર્ગથી બહાર વર્તનારા પાંખડી થાઓ; ભગવાનની ઉપાસના પ્રતિપાદન કરનારા તેમજ વેદને અનુસરનારા સત્શાસ્ત્રોનું ખંડન કરનારા થાઓ. (૧૮) અને તે પુરુષો વેદશાસ્ત્રોમાં કહેલા શૌચાચારથી રહિત - વિપરીત જ્ઞાનવાળા, જટા-ભસ્મ- અસ્થિ વગેરે ધારણ કરવાના સ્વભાવવાળા સતા શિવની દીક્ષાવાળા થાઓ; જે શિવ દીક્ષામાં સુરા (ગૌડી-પૈષ્ટી-માધવી) અને આસવો = તાડ વગેરેમાંથી ઉત્પન્ન, અગિયાર પ્રકારનું મદ્ય પૂજ્ય અથવા દેવતાની માફક આદરણીય થાય છે. (૧૯)

હે વિપ્ર ! ભૃગુ આ પ્રકારે શિવભક્તોને શાપ આપતા હતા ત્યારે ઉદાસીન થઈને શંકર સભામાંથી ઊઠીને પોતાના પાર્ષદોની સાથે કૈલાસમાં ગયા. (૨૦) પછી પૃથ્વીમાં કોઈ પણ દેશમાં કોઈ પણ માણસ કે દેવ = ઈન્દ્રાદિ દેવ પણ રુદ્રના ભાગ વિના યજ્ઞ કરવા સમર્થ થયા નહિ. આ પ્રમાણે યજ્ઞે રહિત મહાન્ કાળ = ઘણાં વર્ષો વીતી ગયાં. (૨૧) પછી માનથી નષ્ટબુદ્ધિવાળા સ્વયં દક્ષ પ્રજાપતિએ કેવળ શિવને બોલાવ્યા વિના દેવો તથા ઋષિઓએ સહિત યજ્ઞ આરંભ્યો.(૨૨)

બ્રહ્મા તથા વિષ્ણુ, આ બંનેને આદરપૂર્વક બોલાવ્યા છતાં પણ શિવનો અનાદર જાણીને દક્ષના યજ્ઞમાં ગયા જ નહિ. (૨૩) દક્ષે શંકરના દ્વેષથી પોતાની પુત્રી સતીને પણ બોલાવી નહિ.સતી વિના બીજી પોતાની પંદર પુત્રીઓને તો તેમના પતિઓ સહિત બોલાવી. (૨૪) વિમાનોમાં બેસીને આકાશમાર્ગથી પોતાના પિતા-દક્ષના યજ્ઞમાં જતી દેવપત્નીઓને જોઈને સતી પ્રસન્ન ચિત્તવાળી થઈ. (૨૫)

પોતાના પિતા દક્ષે બોલાવી નથી તો પણ સતી, યજ્ઞમહોત્સવ જોવા અતિ ઉત્સાહયુક્ત ચિત્તવાળી થઈને સ્ત્રીસહજ સાહસિક સ્વભાવયુક્ત બુદ્ધિના વશથી જવા ઉદ્યમવાળી થઈ. (૨૬) શિવે ઘણા પ્રકારની યુક્તિઓથી નિષેધ કર્યો છતાં પણ સતી કેટલાક પ્રમથાદિગણો સહિત હઠપૂર્વક જ પિતાના યજ્ઞમાં ગઈ. (૨૭)

દક્ષે શિવજીના દ્વેષથી પોતાની દીકરીને દૃષ્ટિથી જોઈ પણ નહિ. (તો વાણીથી સત્કારની તો વાત જ ક્યાં રહી ? ) પછી આદર-સત્કાર નહિ પામેલી શ્રેષ્ઠ માનવાળી સતીએ પણ દક્ષ ઉપર ક્રોધ કર્યો. (૨૮)

સતીએ રુદ્રના ભાગથી રહિત યજ્ઞ જોઈને ક્રોધથી દક્ષ ઉપર ઘણો તિરસ્કાર કરી, સમાધિથી ઉત્પન્ન થયેલા અગ્નિથી તત્કાળ શરીરનો ત્યાગ કર્યો. (૨૯) પછી સતીની સાથે આવેલા શિવના પાર્ષદો દક્ષનો નાશ કરવા માટે સન્મુખ દોડ્યા. તે રુદ્રગણોને નાશ કરવા ભૃગુએ દક્ષિણાગ્નિથી દેવોને ઉત્પન્ન કર્યા. (૩૦) સળગતાં ઉમાડિયાંના આયુધોવાળા ઋભુ નામના દેવોએ જ્યાં ત્યાંથી તાડન કરાયેલા રુદ્રગણો નાસી ગયા.(૩૧)

एतं वृत्तान्तमखिलं कैलासे नारदः शिवम् । समागत्याऽऽह तच्छ्रुत्वा भृशं क्रोधमवाप सः ॥३२॥ स्वजटायाः स उत्पाद्य वीरभद्रं गणाधिपम् । प्राह दक्षं सयज्ञं त्वं जह्यद्यैवाविचारयन् ॥३३॥ इत्याज्ञप्तो ययौ सद्यः सोऽपि दक्षमखं वृतः । गणैरन्यैर्धरां सर्वां कम्पयन् गिरिशाडिव ॥३४॥ तत्र गत्वा यज्ञकुण्डमुत्खन्य मण्डपादि च । दग्ध्वा दक्षस्य तु शिरश्छित्त्वा वह्नौ जुहाव सः ॥३५॥ तत्पक्षपातिनो देवानृषींश्चाप्युल्मुकादिभिः । शैवाः सन्ताडयामासुर्मणिमत्प्रमुखा अपि ॥३६॥ छिन्नभग्नप्रतीकास्ते चक्रुः सर्वे पलायनम् । कृतकार्या रुद्रगणाः कैलासं पुनराययुः ॥३७॥ ततः काले बहुतिथे व्यतीतेऽखिलनिर्जरैः । प्रार्थितेशानुग्रहेण छागास्यो जीवति स्म सः ॥३८॥ मानेनेत्थमनर्थोऽभूद्दक्षस्यापि प्रजापतेः । शङ्करावज्ञया लोके गर्हणा चापि भूयसी ॥३९॥ अथ दुर्वाससः साक्षाद्रौद्रस्य च तपोनिधेः । अपि मानात्पराभूतिं कथयामि शृणु द्विज ! ॥४०॥ अम्बरीषाभिधो राजा सूर्यवंशसमुद्भवः । सप्तद्वीपवतीं पृथ्वीं पुराऽशासीन्महामतिः ॥४१॥ हरिमीजे महायज्ञैः पितृवत्पालयन्प्रजाः । नानाव्रतानि दानानि सोऽकरोद्धरितुष्टये ॥४२॥ देवानामपि दुष्प्रापं स्वैश्वर्यं क्षणभङ्गुरम् । जानन्विरक्तस्तत्रासौ स्नेहं नारायणे व्यधात् ॥४३॥ सतां समागमं कुर्वन्भक्तिं नवविधां हरौ । चकारैकमनास्तेन सन्तुतोष स वै भृशम् ॥४४॥ तुष्टः स तस्य रक्षार्थं चक्रं स्वीयं सुदर्शनम् । तत्पार्श्वे स्थापयामास सर्वारिष्टविनाशनम् ॥४५॥ स एकदा तु नृपतिर्दधार द्वादशीव्रतम् । सांवत्सरं मधुवने सभार्यः कृष्णतुष्टये ॥४६॥

---

દેવર્ષિ નારદે કૈલાસમાં શિવને મળીને આ સમગ્ર વૃત્તાંત (સતીનું મરણ, ભૃગુએ ઉત્પન્ન કરેલા દેવોએ તાડન કરાયેલા ગણો નાસી ગયા વગેરે) કહ્યું. તે વાત સાંભળીને શિવ અત્યંત ક્રોધ પામ્યા. (૩૨) શિવે પોતાની જટાથી સમગ્ર ગણોના અધિપતિ વીરભદ્ર ગણને ઉત્પન્ન કરી, તેને કહ્યું : હે વીરભદ્ર ! તમે વિચાર કર્યા વિના જ, આ દિવસે જ યજ્ઞે સહિત દક્ષ પ્રજાપતિનો નાશ કરી નાખો. (૩૩) હે વિપ્ર ! આ પ્રમાણે શિવે આજ્ઞા કરાયેલો વીરભદ્ર પણ બીજા ગણોની સાથે વિંટાયેલો, પગથી ચાલનારો પર્વત હોય ને શું ? એમ સમગ્ર પૃથ્વીને કંપાવતો તત્કાળ જ દક્ષના યજ્ઞમાં ગયો.(૩૪) વીરભદ્રે દક્ષના યજ્ઞમાં જઈને યજ્ઞકુંડને ખોદી નાખી મંડપ વગેરે બાળી દઈ, દક્ષનું મસ્તક છેદીને વહ્નિમાં હોમ્યું. (૩૫) મણિમત્ વગેરે શિવગણો પણ દક્ષના સહાયભૂત દેવો અને ઋષિઓને પણ સળગતાં ઉમાડિયાં વગેરેથી તાડન કરતા હતા. (૩૬)

છિન્નભિન્ન કર્યા છે શરીરના અવયવો જેમના એવા તે સર્વે દેવો વગેરે નાસી ગયા. દક્ષના યજ્ઞનો નાશ કરવા રૂપ કાર્ય જેમણે સિદ્ધ કર્યું છે એવા વીરભદ્રાદિ ફરીથી કૈલાસમાં આવ્યા. (૩૭) પછી ઘણા દિવસો ગયા પછી સમગ્ર દેવોએ પ્રાર્થના કરાયેલા સદાશિવના અનુગ્રહથી દક્ષ-બકરાના મુખવાળા, જીવતા થયા હતા. (૩૮)

હે દ્વિજ ! આ પ્રકારે માનરૂપી દોષથી પ્રજાપતિ દક્ષને પણ અનર્થ થયો અને માનથી કરાયેલા શંકરના અપમાનથી લોકમાં ઘણી નિન્દા થઈ. (૩૯)

હે દ્વિજ ! પછી સાક્ષાત્ રુદ્રના અવતાર અને તપોનિધિ દુર્વાસા મુનિનો પણ માનથી પરાભવ તમોને કહું છું તે સાંભળો. (૪૦) પૂર્વે સૂર્યવંશમાં ઉત્પન્ન થયેલા મહાબુદ્ધિશાળી અંબરીષ નામના રાજા સાત દ્વીપવાળી પૃથ્વીનું પાલન કરતા હતા. (૪૧) અંબરીષ રાજા પિતાની માફક જનોનું પાલન કરતા સતા મહાયજ્ઞોથી શ્રી વાસુદેવ ભગવાનનું પૂજન કરતા હતા. ભગવાનની પ્રસન્નતા માટે નાના પ્રકારનાં વ્રતો કરતા હતા અને દાનો આપતા હતા. (૪૨) ઈન્દ્રાદિ દેવોને પણ દુર્લભ પોતાના રાજ્ય વૈભવને ક્ષણભંગુર જાણનાર અંબરીષ રાજા, તે પોતાનાં ઐશ્વર્યોમાં વૈરાગ્ય પામીને શ્રીકૃષ્ણમાં પ્રેમ કરતા હતા. (૪૩)

ભગવાનના એકાંતિક સાધુઓનો સમાગમ કરતા થકા ભગવાનના સ્વરૂપમાં એક ચિત્તવાળા રાજા પરમાત્મામાં નવ પ્રકારની ભક્તિ કરતા હતા. તેથી શ્રીહરિ રાજા ઉપર અત્યંત પ્રસન્ન થયા. (૪૪) પ્રસન્ન થયેલા શ્રીહરિએ રાજાની રક્ષા માટે સર્વ અનર્થોને નાશ કરનાર, પોતાના સુદર્શન ચક્રની અંબરીષ રાજાની પાસે સ્થાપના કરી. (૪૫) એક સમયે રાજાએ સ્ત્રીએ સહિત મધુવન-(મથુરા)માં જઈને વર્ષ દિવસથી સાધ્ય દ્વાદશી વ્રત શ્રીકૃષ્ણની પ્રસન્નતા માટે ધારણ કર્યું. (૪૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

व्रतान्ते कार्तिके मासि त्रिरात्रं समुपोषितः । हरेः कृत्वा महापूजां ददौ दानानि भूरिशः ।।४७।। द्वादश्यां ब्राह्मणान् सम्यक् तर्पयित्वेष्टभोजनैः । करोति पारणां यावद्दुर्वासास्तावदाययौ ।।४८।। अतिथिं तमुपायातं प्रत्युत्थानासनादिभिः । मानयित्वा भोजनार्थं प्रार्थयामास भूपतिः ।।४९।। तथेत्युक्त्वा मुनिः स्नातुं कालिन्दीमगमद्द्रुतम् । माध्याह्निकं कुर्वतोऽस्य विलम्बस्तत्र चाभवत् ।।५०।। द्वादश्यां पारयन् राजा मुनिं ज्ञात्वा विलम्बितम् । विप्राञ्छास्त्रविदोऽपृच्छत्कर्तव्यं स्वस्य सङ्कटे ।।५१।। ब्राह्मणातिक्रमे दोषो द्वादश्यां चाप्यपारणे । अतो मयाऽत्र किं कार्यमित्युक्तास्तेऽब्रुवन् द्विजाः ।।५२।। त्वं पारयाम्भसा यस्मादशितं नाशितं च तत् । इत्याज्ञप्तो द्विजैः सोऽपि पारणामम्भसा व्यधात् ।।५३।। अथागतो मुनिर्ज्ञात्वा नृपतिं कृतपारणम् । स्वाग्रपूज्यत्वमानोत्थं क्रोधं प्राप्याब्रवीच्च तम् ।।५४।। रे निर्दय ! श्रीमदान्ध ! विष्ण्वभक्तेशमानवन्!। निरङ्कुशः करोषि त्वं कामं धर्मव्यतिक्रमम् ।।५५।। त्वं मामतिथिमायातमातिथ्येन निमन्त्र्य तत् । अदत्वा भुक्तवांस्तस्य सद्यस्ते दर्शये फलम् ।।५६।। इत्युक्त्वा रोषताम्राक्षः कृत्यां कालानलोपमाम् । स्वजटायाः स उत्पाट्य प्राहिणोत्तद्वधाय ताम् ।।५७।। खड्गहस्तामापतन्तीं वीक्ष्य तां नृपतिः स तु । नश्वरं देहमात्मानं नित्यं जानन्न विव्यथे ।।५८।। तदा सुदर्शनं चक्रं स्थितं तदवनाय यत् । तत्तां कृत्यां पुरा दग्ध्वा पृष्ठलग्नं मुनेरभूत् ।।५९।। चक्राग्निना दह्यमानो मुनिश्चक्रे पलायनम्। प्राणान् रिरक्षिषुः स्वीयान् स बभ्राम दिशो दश ।।६०।। यत्र यत्र मुनिः प्रायात्तत्र तत्र सुदर्शनम् । तमन्वगच्छच्छायेव मृत्युर्वा देहिनं यथा ।।६१।।

---

તે વ્રતની સમાપ્તિમાં કારતક માસમાં ત્રણ દિવસ કર્યો છે ઉપવાસ જેણે એવા અંબરીષ રાજાએ પરમાત્માની મહાપૂજા કરી ઘણાં દાનો આપ્યાં. (૪૭) દ્વાદશીમાં બ્રાહ્મણોએ ઈચ્છેલાં ભોજનોથી બ્રાહ્મણોને સારી રીતે તૃપ્ત કરી જેટલામાં પારણાં કરે છે તેટલામાં દુર્વાસા મુનિ આવ્યા. (૪૮) અંબરીષ રાજાએ પોતાની સમીપમાં આવેલા અતિથિ દુર્વાસા મુનિને સન્મુખ જવું તથા આસન આપવું વગેરેથી સત્કાર કરી, ભોજન માટે પ્રાર્થના કરી. (૪૯) દુર્વાસા મુનિ 'બહુ સારું' આ પ્રમાણે કહીને સ્નાન કરવા તત્કાળ યમુનામાં ગયા. ત્યાં માધ્યાહ્નિક વિધિ કરતાં મુનિને વાર લાગી. (૫૦)

દ્વાદશીમાં પારણાં કરવા ઈચ્છતા રાજા અંબરીષે મુનિને વિલંબ થયેલો જાણી પોતાના સંકટમાં કરવા યોગ્ય કર્તવ્ય, શાસ્ત્રજ્ઞ વિપ્રોને પૂછયું. (૫૧) હે બ્રાહ્મણો ! બ્રાહ્મણના અતિક્રમણ અર્થાત્ અતિથિપણે આવેલા દુર્વાસાનો ત્યાગ કરી ભોજન કરવામાં દોષ અને દ્વાદશીતિથિમાં પારણાં ના કરીએ તો દોષ છે માટે આવા સંકટમાં શું કરવું ? હે વિપ્ર ! આ પ્રકારે કહેવાયેલા બ્રાહ્મણો રાજાને કહેવા લાગ્યા. (૫૨) હે રાજન્, તમો કેવળ જળથી પારણા કરો જેથી પારણાં નિમિત્તે ભોજન કરાયેલું અને ભોજન કરાયેલું નહિ એવું પણ થાય. (શ્રુતિ છે - 'अपोऽश्नाति तन्नैवाशितं नैवानशितम्') હે વિપ્ર ! બ્રાહ્મણોની આજ્ઞા પામીને અંબરીષે પણ કેવળ જળમાત્રથી પારણાં કર્યાં. (૫૩)

પછી મધ્યાહ્નિક કર્મ કરી આવેલા મુનિ દુર્વાસા અંબરીષ રાજાને પારણાં કરેલાં જાણી, પોતાના પહેલા પૂજ્યપણાના અભિમાનથી ઉત્પન્ન થયેલા ક્રોધને પામીને અંબરીષ રાજાને કહેવા લાગ્યા : (૫૪) અરે ! હે નિર્દય ! હે શ્રીમદાન્ધ ! હે વિષ્ણુના અભક્ત ! નિયંતાપણાના અભિમાન યુક્ત, તારો કોઈ નિયંતા નથી. તું ઈચ્છા પ્રમાણે ધર્મ મર્યાદાનું ઉલ્લંઘન કરે છે. (૫૫) તારા સમીપમાં આવેલા અતિથિ એવા મને અતિથિની સત્ક્રિયાથી નિમંત્રણ આપીને આતિથ્ય (ભોજન-સત્કાર) કર્યા વિના તું જમેલો છે, તે આતિથ્યના ઉલ્લંઘનનું ફળ હું તને તત્કાળ બતાવું છું. (૫૬)

હે વિપ્ર ! ક્રોધથી લાલચોળ નેત્રોવાળા થયેલા દુર્વાસાએ આ પ્રમાણે કહીને પોતાની જટાથી પ્રલયકાળના અગ્નિ જેવી કૃત્યાને પ્રગટ કરી અંબરીષ રાજાને મારવા માટે મોકલી. (૫૭) અંબરીષ રાજા, તરવાર હાથમાં જેને છે એવી કૃત્યાને સમીપે આવતી દેખીને પણ પોતાના શરીરને નાશવંત અને આત્માને નિત્ય જાણતા હોવાથી દુઃખ પામ્યા નહિ. (૫૮) તે સમયે રાજાના રક્ષણ માટે જે સુદર્શન ચક્ર હતું તે પ્રથમ કૃત્યાને બાળી દઈને દુર્વાસામુનિની પાછળ થયું. (૫૯)

ચક્રના અગ્નિથી અત્યંત તપાયમાન અંગવાળા દુર્વાસામુનિ પલાયમાન થયા. પોતાના પ્રાણોનું રક્ષણ કરવા ઈચ્છતા મુનિ દશે દિશાઓમાં ફરવા લાગ્યા. (૬૦) દુર્વાસામુનિ જે જે સ્થાનમાં જતા હતા ત્યાં ત્યાં સુદર્શન ચક્ર દેહધારીને છાયા જ જેમ તેમ અથવા દેહીને કાળ જ જેમ તેમ દુર્વાસાની પાછળ દોડતું હતું. (૬૧)

पाताले चान्तरिक्षेऽपि दिक्पालानां च धामसु । कश्चित्त्रातारमप्राप्तो ब्रह्माणं शरणं ययौ ॥६२॥ नाहं समर्थस्त्रातुं त्वामित्युक्तो ब्रह्मणापि सः । शङ्करं शरणं प्रायात्सोऽपि प्राह विरिञ्चिवत् ॥६३॥ त्रायस्वेत्यार्तनादेन ध्वनयन्नम्बरं ततः । वैकुण्ठे हरिमभ्येत्य प्रणम्य प्राह पाहि माम् ॥६४॥ त्वद्भक्तस्याप्यकरवमपराधमबुद्धितः । क्षान्त्वा तं कृपया नाथ ! चक्रान्मां पातुमर्हसि॥६५॥ इत्युक्तवन्तं तं प्राह हरिर्निर्मानवल्लभः । अहं भक्तपराधीनो न स्वन्त्रोऽस्मि निश्चितम् ॥६६॥ नाहं समर्थो मद्भक्तद्रोहिणां रक्षणे ततः । तमेव शरणं गच्छ स त्वां चक्रादविष्यति ॥६७॥ इत्युक्तः स महाकष्टं प्राप्तो मानवशान्मुनिः। सद्यो मानं विहायैव राजानं शरणं ययौ ॥६८॥ दूराद्विलोक्य स नृपं पाहि पाहीत्युदीरयन् । तं क्षत्रमपि साष्टाङ्गं प्रणनाम कृताञ्जलिः ॥६९॥ ततो राजा हरेश्चक्रं स्तुत्वा तद्भयतो मुनिम् । मोचयामास कृपया तमानर्च च सादरम् ॥७०॥ इत्थं मानेन सुमहत्कष्टं दुर्वाससा द्विज ! । प्राप्तं सर्वभयेनापि तं भक्तो दूरतस्त्यजेत् ॥७१॥ एवमन्येऽपि बहवो राजान ऋषयस्तथा । मानेन लेभिरे कष्टं महच्चापयशो भुवि ॥७२॥ लोभाद्यैरभिभूतानामित्थं ते कीर्तिता मया । कथा वसिष्ठमुख्यानां सङ्क्षेपेण द्विजोत्तम ! ॥७३॥ सावधानैरतो भक्तैर्दूरादेते महारयः । हातव्यास्तेन भक्तिः स्यान्निर्विघ्नेष्टफलप्रदा ॥७४॥ सुव्रत उवाच– इति तस्य वचो निशम्य हृष्टो द्विजवर्यः स बभूव भक्तसङ्घैः । सकलैः सह तं ततो ववन्दे हृदये तच्च दधत्स्वधर्मनिष्ठः ॥७५॥

इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे मानेन दक्षदुर्वाससोः पराभवनामा पञ्चदशोऽध्यायः ॥१५॥

---

પાતાળ-અંતરિક્ષ-ઈન્દ્રાદિ દેવોનાં સ્થાનોમાં પણ કોઈ પણ સુદર્શન ચક્રના ભયથી રક્ષણ કરનાર મળ્યો નહિ એવા મુનિ બ્રહ્માને શરણે ગયા. (૬૨) બ્રહ્માએ હે મુને ! હું તમારું સુદર્શન ચક્રથી રક્ષણ કરવા સમર્થ નથી : આ પ્રમાણે બ્રહ્માએ કહ્યું તેથી મુનિ શંકરને શરણે ગયા. શિવે પણ બ્રહ્માની માફક જ કહ્યું. (૬૩) પછી મારું રક્ષણ કરો,રક્ષણ કરો, ( पाहि मां पाहि माम् ) આ પ્રકારે દુઃખના શબ્દોથી આકાશને શબ્દાયમાન કરતા મુનિ વૈકુંઠલોકમાં શ્રી લક્ષ્મીનારાયણને સાષ્ટાંગ પ્રણામ કરી 'पाहि मां' 'पाहि माम्' મારું રક્ષણ કરો, મારું રક્ષણ કરો : આવી રીતે કહેતા હતા. (૬૪)

હે નાથ ! તમારા ભક્તનો અપરાધ મેં અજ્ઞાનથી કરેલો છે તેને તમો દયાથી સહન કરી સુદર્શન ચક્રથી મારું રક્ષણ કરવાને યોગ્ય છો. (૬૫) આ પ્રમાણે બોલતા દુર્વાસાને, જેમને માન રહિત ભક્તો પ્રિય છે એવા હરિએ કહ્યું : હે મુને ! હું ભક્ત પરાધીન છું. નિશ્ચે સ્વતંત્ર નથી. (૬૬) હું મારા ભક્તોના દ્રોહ કરનાર જનોના રક્ષણ કરવામાં સમર્થ નથી માટે અંબરીષ રાજાને શરણે જાઓ, તે રાજા સુદર્શન ચક્ર થકી તમારૂ રક્ષણ કરશે. (૬૭)

હે વિપ્ર ! આ પ્રમાણે શ્રીહરિએ કહેલા, માનના વશપણાથી મહાદુઃખ પામેલા દુર્વાસા મુનિ તત્કાળ જ માનનો ત્યાગ કરીને અંબરીષ રાજાને શરણે ગયા. (૬૮) અંબરીષ રાજાને દૂરથી જોઈને 'पाहि' 'पाहि' સુદર્શન ચક્રથી રક્ષણ કરો, રક્ષણ કરો : આ પ્રમાણે ઉચ્ચારણ કરતા મુનિએ બંને હાથ જોડી ક્ષત્રિય પોતાના વર્ણથી નીચા છે તોપણ અંબરીષ રાજાને સાષ્ટાંગ પ્રણામ કર્યા. (૬૯) પછી અંબરીષ રાજાએ હરિના ચક્રની સ્તુતિ કરી ચક્રના ભયથી દુર્વાસા મુનિને મુકાવ્યા અને આદર-સત્કારપૂર્વક સુંદર અન્નાદિ ભોજન કરાવી ચંદન વગેરેથી તે મુનિનું પૂજન કર્યું. (૭૦)

હે દ્વિજ ! આવી રીતે સર્વજનોને જેમનાથી ભય છે તેવા દુર્વાસા મુનિને પણ માનથી અત્યંત દુઃખ પ્રાપ્ત થયું. તેવા માનને ભગવાનનો ભક્ત દૂરથી ત્યાગ કરે. (૭૧) આ પ્રમાણે બીજા ઘણા રાજાઓ તથા ઋષિઓ, માનથી અતિશય દુઃખ અને પૃથ્વીમાં અપયશને પામેલા છે. (૭૨)

હે દ્વિજોત્તમ ! આ પ્રમાણે લોભાદિ પાંચ મુખ્ય દોષોથી પરાભવ પામેલા વસિષ્ઠાદિની કથાઓ મેં સંક્ષેપથી તમોને કહી.(૭૩) માટે પ્રમાદે રહિત મારા ભક્તોએ લોભાદિ મહાશત્રુઓ દૂરથી ત્યાગ કરવા. તેને ત્યાગ કરવાથી વિઘ્ન વિનાની ભક્તિ ઈષ્ટ ફળને આપનારી થાય. (૭૪)

હે રાજન્ ! આ પ્રકારે બ્રાહ્મણશ્રેષ્ઠ મયારામ ભટ્ટ શ્રીહરિનું વચન સાંભળીને ભક્તસમુદાયોએ સહિત પ્રસન્ન થયા. પછી સ્વધર્મનિષ્ઠ મયારામ બ્રાહ્મણે પોતાના મનમાં તેવા પ્રકારનું શ્રીહરિનું વચન માનીને શ્રીહરિની સ્તુતિ કરી અને નમસ્કાર કર્યા. (તેમ જ ભક્તસંઘોએ પણ શ્રીહરિનું વચન પોતાના મનમાં ધારણ કરી શ્રીહરિની સ્તુતિ કરી અને નમસ્કાર કર્યા એમ જાણવું.) (૭૫) *ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીયપ્રકરણે માનેન દક્ષદુર્વાસસોઃ પરાભવનામા પંચદશોऽધ્યાયઃ (૧૫)*

सुव्रत उवाच-**तत्रोत्सवे समायाता भाण्डीरपुरतो नृप ! प्रार्थयन्स्वपुरं नेतुं हरिं राजकुमारका: ॥१॥ भक्तैः परिवृतः सोऽथ तेषां प्रियचिकीर्षया । भाण्डीरपुरमभ्यायात्कपिलाषष्ठिकादिने ॥२॥ तं व्याघ्रजिद्राजपुत्रः श्रद्धावानतिशुद्धधीः । मूलजिद्देशजित्प्रीत्या परयैव सिषेविरे ॥३॥ देवरामादयो विप्रास्तं चासेवन्त भक्तितः । अन्ये च बहवो वैश्याः शूद्रा योषाश्च शक्तितः ॥४॥ तत्र भाद्रपदामायां ब्राह्मणान्स सहस्रशः । यथेष्टं भोजयामास पित्रुद्देशेन वर्णिराट् ॥५॥ अथापराह्णसमये सभा तत्राभवच्छुभा । दिव्यसिंहासने रेजे तन्मध्ये स सतां पतिः ॥६॥ प्रौढाकृतिः समवपुः पद्मच्छदसमेक्षणः । दीर्घबाहुर्घनश्यामः सस्मितास्यसरोरुहः ॥७॥ पीनांसः कम्बुकण्ठश्च सुनासश्च विशालहृत् । वलिवल्गूदरः सौम्यो निम्ननाभिरुदग्रपात् ॥८॥ ऊर्ध्वपुण्ड्रं ललाटे च तुलसीमालिके गले । दधत् सिताम्बरधरो वर्णिवेषमनोहरः ॥९॥ भक्तैश्चन्दनपुष्पस्रक् शेखरादिभिरर्चितः । दधद्दक्षिणपाणौ च तुलसीकाष्ठमालिकाम् ॥१०॥ करुणार्द्रदृशा भक्तान् पश्यन् स परितो निजान् । हर्षयामास भगवान्निजवक्त्रार्पितेक्षणान् ॥११॥ निषेदुस्तस्य पुरतस्त्यागिनो मुनयः प्रभोः । तांश्चाभितो नरा नार्यः स्वस्वमर्यादयाऽखिलाः ॥१२॥ तूष्णीं तेषूपविष्टेषु स्ववचोमृतलिप्सुषु । सर्वेषु भक्तसङ्घेषु स ऊचे मधुरं वचः ॥१३॥**

## અધ્યાય : ૧૬

### અહિંસાપ્રધાન પરમ એકાંતિક ધર્મની પુષ્ટિ માટે ભગવાન શ્રીહરિએ હિંસાપ્રિય દેવોનું વ્રત-પૂજન વગેરેનો ત્યાગ કરવાનું કહ્યું છે.

**ભાડેરમાં આગમન :-** સુવ્રત મુનિ બોલ્યા : હે રાજન્ ! માણાવદરમાં જન્માષ્ટમીના ઉત્સવમાં ભાડેરપુરથી આવેલા રાજકુમારો (વ્યાઘ્રજી, મૂળજી અને દેશજીત) શ્રી સહજાનંદ સ્વામી ભગવાનને પોતાના પુરમાં લઈ જવા પ્રાર્થના કરતા હતા. (૧) પછી પોતાના ભક્તજનોની સાથે શ્રીહરિ રાજકુમારોનું પ્રિય કરવાની ઈચ્છાથી કપિલાછઠને દિવસે (ભાદરવા વદી છઠને દિવસે) ભાડેરપુરમાં ગયા. (૨) અતિ શ્રદ્ધાવાળા, અત્યંત શુદ્ધ મતિવાળા રાજપુત્રો વાઘજી, મૂળજી (અક્ષયરાજજીના પુત્રો) અને દેશજીત (વાઘજીના પુત્ર) એ ત્રણ પરમ સ્નેહથી શ્રીહરિની સેવા કરતા હતા. (૩)

દેવરામ વગેરે બ્રાહ્મણો શ્રીહરિને ભક્તિથી સેવતા હતા. અને બીજા પણ ઘણા વૈશ્ય, શૂદ્ર તથા સ્ત્રીઓ શક્તિ પ્રમાણે ભક્તિપૂર્વક સેવા કરતા હતા. (૪) ભાડેરપુરમાં વર્ણીન્દ્ર શ્રીહરિ ભાદરવા માસની અમાસ તિથિમાં પોતાના પિતા શ્રીધર્મદેવના શ્રાદ્ધના નિમિત્તથી હજારો બ્રાહ્મણોને ઈચ્છા મુજબ ભોજન કરાવતા હતા. (૫) પછી અમાસને દિવસે સાંજના સમયે શુભ સભા થઈ, તે સભાના મધ્ય ભાગમાં દિવ્ય સિંહાસનમાં સત્પુરુષોના સ્વામી શ્રીહરિ અત્યંત શોભતા હતા. (૬)

**શ્રીહરિનાં અંગોની શોભા :-** પ્રૌઢ આકૃતિવાળા (યુવાવસ્થાથી મનોહર-પુષ્ટ શરીરવાળા) અતિ ઊંચું નહિ તેમજ અતિ નીચું નહિ એવા સમાન શરીરવાળા, કમળના પત્ર સમાન નેત્રવાળા, જાનુપર્યંત લાંબા હાથવાળા, મેઘસમાન શ્યામ શરીરવાળા, મંદ હાસ્યયુક્ત મુખારવિંદવાળા, પુષ્ટ અને સ્થૂલ ખભાવાળા, જેમનો કંઠ શંખની માફક ત્રણ રેખાથી અલંકૃત છે, જેમની નાસિકા તિલના પુષ્પ સમાન છે, જેમનું હૃદય વિસ્તારવાળું છે, ત્રણ રેખાઓથી શોભાયમાન ઉદર જેમનું છે, પોતાનાં દર્શન કરનાર ભક્તજનોને ચંદ્રની માફક શાંતિ આપનાર, ગોળાકાર ઊંડી નાભિવાળા, ચરણકમળના આગલા ભાગ જેમના ઊંચા (ઊપડતાં) છે. (૭-૮) વિશાળ લલાટમાં ચાંલ્લા સહિત ઊર્ધ્વપુંડ્ર તિલકને ધારણ કરનાર, શ્વેત વસ્ત્રને ધારણ કરનાર, નૈષ્ઠિક બ્રહ્મચારીના સમાન મનોહર, (૯) પોતાના ભક્તજનોએ ચંદન અને વિવિધ પ્રકારના પુષ્પના હારો-તોરાઓ અને વસ્ત્રાદિથી આદરપૂર્વક પૂજાયેલા, જમણા હાથમાં તુલસીના કાષ્ઠથી નિર્માણ કરેલી માળા જપ કરવા માટે ધારણ કરતા; (૧૦) સકળ ઐશ્વર્યસંપન્ન શ્રીહરિ પોતાના મુખારવિંદમાં જેમણે નેત્રો અર્પણ કર્યાં છે એવા પોતાના ભક્તોને કારુણ્યરસથી ભરપૂર નેત્રોથી ચોતરફ જોતા સતા તે ભક્તોને આનંદિત કરતા હતા. (૧૧)

અતિ સમર્થ શ્રીહરિની આગળ ત્યાગી એવા મુનિઓ, સાધુઓ તથા બ્રહ્મચારીઓ બેઠા. તે મુનિઓની ચોતરફ સમગ્ર ભક્ત પુરુષો બેઠા. અને સ્ત્રીઓ સભાની એક બાજુ પોતપોતાની મર્યાદા પ્રમાણે બેઠી. (૧૨) સર્વ ભક્ત સમુદાય સાવધાની પૂર્વક મૌન ભાવથી બેસીને પોતાના વચનરૂપી અમૃતની ઈચ્છાવાળા થયા ત્યારે શ્રીહરિ શ્રવણપ્રિય અને શ્રેયને ઉત્પન્ન કરનાર વચન બોલ્યા : (૧૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच–शृण्वन्तु सर्वे गृहिणस्त्यागिनश्च वचो मम । वदामि ननु युष्माकं श्रेयस्कृत्सर्वथा सदा ॥१४॥ अहिंसैव परो धर्म इति वेदानुशासनम् । अस्तीति सर्वथा वर्ज्या हिंसा सर्वैर्मदाश्रितैः ॥१५॥ वपुषा वचसा क्वापि मनसा वापि देहिनः । कस्यापि नैव कर्तव्यो द्रोहो निजहितेप्सुभिः ॥१६॥ देवोद्देशेन यज्ञेऽपि हिंसा कार्या न कर्हिचित् । सौत्रामण्यामपि सुराग्रहः कार्यो न मामकैः ॥१७॥ यस्मै देवाय देव्यै वा सुरामांसार्पणं भवेत् । यदग्रे जीवहिंसा च स्यात्स मान्यो न सा न च ॥१८॥ तयोर्व्रतं न कर्तव्यं न तन्मन्त्रजपस्तथा । अनापदि न कर्तव्या ताभ्यां नतिरपि क्वचित् ॥१९॥ न श्रव्या नैव पाठ्याश्च ग्रन्थाः कौलार्णवादयः । ऊर्ध्वाम्नायो वेदबाह्यो भवतीत्यवगम्यताम् ॥२०॥ मया निषिद्धमेतद्ये कुर्वीरन्भुवि मानवाः । तेषां हेयः प्रसङ्गोऽपि मदीयैरापदं विना ॥२१॥ अद्यप्रभृति ये केऽपि मन्निषिद्धमिदं नराः । आचरिष्यन्ति तेषां वै वंशोच्छेदो भविष्यति ॥२२॥ धननाशो राज्यनाशः प्रतिष्ठाहीनता तथा । भविष्यत्ययशो भूरि तेषां मामवजानताम् ॥२३॥ तेषां पुमर्थ एकोऽपि न सेत्स्यति कदाचन । मृत्वा ते निरयान्घोरान् यास्यन्त्यत्र न संशयः ॥२४॥ सुव्रत उवाच–इति श्रुत्वा हरेर्वाक्यं व्याघ्रजिन्नृपतिः सुधीः । नत्वा तं प्राञ्जलिः प्रोचे तत्पादैकदृढाश्रयः ॥२५॥ कुलाचारोपपन्नं नो नवरात्रव्रतं हरे ! । अस्ति देव्या वार्षिकं तत्प्रातरारभ्य सङ्गतम् ॥२६॥ कर्तव्यं वा न कार्यं तदस्माभिस्त्वदुपाश्रितैः । तत्र क्वचित्क्वचिद्धिंसा सुरापानं च दृश्यते ॥२७॥ यदत्र युक्तं तद्ब्रूहि त्वं हि धर्मप्रवर्तकः । इत्युक्तस्तेन भगवानिदं प्रोवाच युक्तकृत् ॥२८॥

હે ભક્તો ! સર્વ ગૃહસ્થો અને ત્યાગી એવા સાધુઓ અને બ્રહ્મચારીઓ, મારું વચન એકાગ્ર ચિત્તથી સાંભળો. જેથી તમારુ સર્વે ભક્તજનોનું સર્વ પ્રકારે સદા નિશ્ચે પરમ શ્રેય કરનારું વચન કહું છું : (૧૪) અહિંસા જ સર્વોત્તમ ધર્મ છે. ''अहिंसा परमो धर्मः'' આવું શ્રુતિશાસન છે. માટે મારા સર્વ આશ્રિતોએ હિંસા સર્વ પ્રકારે ત્યાગ કરવી. (૧૫) પોતાનું હિત ઈચ્છનારા ભક્તજનોએ શરીર, વાણી અને મનથી ક્યારેય પણ કોઈ પ્રાણીમાત્રનો દ્રોહ કરવો જ નહિ. (૧૬)

મારા આશ્રિત જનોએ સોમયાગાદિ યજ્ઞોમાં પણ દેવોને ઉદ્દેશીને પણ ક્યારેય બકરા વગેરેની હિંસા કરવી જ નહિ અને સૌત્રામણિ યાગમાં પણ સુરાપાન કરવું નહિ. (પ્રાણીની હિંસા અને સુરાપાન એ બંનેનો કળિયુગમાં નિષેધ કરેલો છે.) (૧૭) મારા આશ્રિતોએ જે દેવ અથવા દેવીને અગિયાર પ્રકારના મદ્ય સહિત ત્રણ પ્રકારની મદિરા અને માંસનું નિવેદન થતું હોય અને જે દેવ અને દેવીની આગળ જીવની હિંસા થાય તે દેવ તથા દેવીને માનવાં નહિ. (૧૮) તેવાં દેવ અને દેવીનું વ્રત તથા તેના મંત્રનો જપ કરવો નહિ. આપત્કાળ પડ્યા વિના ક્યારેય પણ તેવાં દેવદેવીને નમસ્કાર પણ કરવો નહિ. (૧૯)

કોઈ આધુનિક પંડિતે શક્તિપંથના રાજાની પ્રીતિ માટે કરેલા કૌલાર્ણવ વગેરે ગ્રંથો સાંભળવા નહિ અને વાંચવા પણ નહિ. કૌલાગમમાં કહેલો દેવી સંપ્રદાય વેદબાહ્ય છે એવી રીતે તમારે જાણવું. (૨૦) મેં નિષેધ કરેલું આ પૃથ્વીમાં જે મનુષ્યો કરે તે મનુષ્યોનો પ્રસંગ પણ મારા આશ્રિતોએ આપત્કાળ વિના કરવો નહિ. (૨૧)

આ દિવસથી આરંભીને જે કોઈ પણ માણસો મેં નિષેધ કરેલું આચરણ કરશે તે મનુષ્યોના વંશનો નિશ્ચે વિનાશ થશે. (૨૨) મારી આજ્ઞાનું ઉલ્લંઘન કરવાથી મારો અનાદર કરનાર મનુષ્યોના ધનનો નાશ થશે; રાજ્ય વિનાશ થશે. લોકમાં પ્રતિષ્ઠા રહિત થશે તથા ઘણો અપયશ થશે. (૨૩) નિષેધનું આચરણ કરનારાઓનો ધર્મ-અર્થ-કામ અને મોક્ષ પુરુષાર્થમાંથી એક પણ પુરુષાર્થ ક્યારેય પણ સિદ્ધ થશે નહિ. તે પુરુષો મરીને ઘોર નરકમાં પડશે. આ મારા વચનમાં સંશય કરવો નહિ. (૨૪)

**સુવ્રત મુનિ કહે છે** : હે રાજન્ ! આ પ્રકારે શ્રી નારાયણ મુનિનું વચન સાંભળીને શ્રેષ્ઠ બુદ્ધિશાળી, શ્રીહરિના ચરણકમળમાં પ્રીતિવાળા નૃપતિ વાઘજીભાઈ બંને હાથ જોડી શ્રીહરિને પ્રણામ કરી પૂછવા લાગ્યા : (૨૫)

હે હરે ! દરેક વર્ષે પ્રાપ્ત થતું દેવીનું નવરાત્ર વ્રત અમારી કુળપંરપરાથી ચાલી આવેલું છે તે આસો સુદી ૧ (પડવાના) પ્રાતઃકાળથી આરંભીને પ્રાપ્ત છે. (૨૬) તમારા આશ્રિત અમોએ વ્રત કરવું કે ના કરવું ? તે નવરાત્રના વ્રતમાં કોઈ કોઈ સ્થાનમાં અજાદિ પ્રાણીહિંસા તથા સુરાપાન દેખાય છે. (૨૭) હે હરે ! જે યોગ્ય હોય તે કહો, કારણ કે તમો ભાગવતધર્મના પ્રવર્તક છો. હે રાજન્, આ પ્રકારે વાઘજી રાજાએ પુછાયેલા; યથાયોગ્ય વિધાન કરનારા શ્રી નારાયણમુનિ કહેવા લાગ્યા : (૨૮)

श्रीनारायणमुनिरुवाच–राजसास्तामसा देवाः सुरामांसाशनं नृप ! । कुर्वते सात्त्विका नैव देवा देव्यश्च कर्हिचित् ॥२९॥ पार्वती सात्त्विकी देवी यथा लक्ष्मीश्च वेदसूः । धर्मज्ञानतपोयोगवैराग्यादिगुणोर्जिता ॥३०॥ अस्माकं सा तु पूज्याऽस्ति शङ्करप्राणवल्लभा । नवरात्रव्रतं तस्या भवतीत्यवगम्यताम् ॥३१॥ सात्त्विकानां तु देवानां देवीनां च नराधिप ! । व्रतार्चादि विधातव्यं नेतरेषां तु कर्हिचित् ॥३२॥ पार्वत्या न प्रिया हिंसा सह पत्या तपोरतेः । तदग्रेऽपि च तां ये तु कुर्युस्ते ह्यसुरा नराः ॥३३॥ अतस्तस्या व्रते राजन् ! मद्यमांसार्चनान्वितः । कुलाचारः क्वचित्स्याच्चेत्तं त्वधर्ममवेहि वै ॥३४॥ जीवहिंसा भवेद्यत्र सुरापानं च यत्र वा । व्यभिचारो भवेद्यत्र त्याज्यो धर्मः स दूरतः ॥३५॥ धर्माभासो ह्यधर्मोऽसौ तत्त्यागे नास्ति पातकम् । त्यागोऽस्य परमो धर्मः सच्छास्त्रप्रमितोऽनघ ! ॥३६॥ क्षुद्रा देवाश्च देव्यो वा ये स्युर्मद्यामिषप्रियाः । तामसानां न कर्तव्यं व्रतं तेषां च पूजनम् ॥३७॥ सात्त्विकानां वैष्णवानां भवतां मामुपेयुषाम् । हिंसाप्रियसुरार्चादि नोचितं हि मुमुक्षताम् ॥३८॥ अधर्मस्य प्रिया हिंसा ह्यहिंसा धर्मवल्लभा । अधार्मिकाणामाद्येष्टा धार्मिकाणां तथेतरा ॥३९॥ तामसेभ्यो न भेतव्यं भक्तैः कृष्णस्य कर्हिचित् । यतः स कालमायादेरप्यस्त्येव नियामकः ॥४०॥ निन्दा तु नैव कर्तव्या तेषां तत्सेविनां तथा । शाक्तैः साकं विवादश्च न कर्तव्यो हि मामकैः ॥४१॥ सुव्रत उवाच–श्रुत्वैतद्भगवद्वाक्यं नृपतिर्नष्टसंशयः। ओमिति प्रतिजग्राह तदाज्ञां शिरसा नृप ! ॥४२॥ ब्राह्मणास्तं तदा नत्वा प्रोचुर्नारायणं प्रभुम् । नवरात्रव्रते किञ्चित्प्रष्टव्यं नः शृणु प्रभो ! ॥४३॥ वयं हि वैष्णवाः सर्वे भवामस्त्वत्पदाश्रयाः । व्रतं तामसदेवानां प्रायशो नैव कुर्महे ॥४४॥

---

હે રાજન્ ! રજોગુણ પ્રકૃતિવાળાં અને તામસ પ્રકૃતિવાળાં દેવ અને દેવીઓ સુરામાંસનું ભક્ષણ આચરે છે. સાત્ત્વિક પ્રકૃતિવાળાં દેવદેવીઓ ક્યારેય પણ સુરામાંસનું ભક્ષણ કરતાં નથી. (૨૯) નવરાત્રિનું વ્રત જે દેવતા સંબંધી છે તે સાત્ત્વિકી દેવી પાર્વતી છે. ધર્મ-જ્ઞાન-વૈરાગ્ય-તપ-યોગ વગેરે ગુણોથી યુક્ત સાત્ત્વિકી દેવી પાર્વતી છે તે તો જેમ લક્ષ્મીજી અને વેદમાતા સાવિત્રી તેવી છે. (૩૦) જેના શંકર પ્રાણવલ્લભ છે એવી પાર્વતીદેવી તો અમારે પૂજ્ય છે. નવરાત્રવ્રત પાર્વતીનું છે : આ પ્રમાણે જાણો. (૩૧)

હે નરાધિપ ! સાત્ત્વિક દેવો અને દેવીઓનું વ્રત-પૂજન વગેરે કરવું પણ તામસ દેવદેવીઓનું ક્યારેય પણ કરવું નહિ. (૩૨) પોતાના પતિ જે શિવજીની સાથે તપમાં પ્રીતિવાળાં પાર્વતીને હિંસા પ્રિય નથી. જે મનુષ્યો તેમની આગળ હિંસા કરે છે તે મનુષ્યો તો અસુરો છે. (૩૩) માટે હે રાજન્, પાર્વતીના નવરાત્રવ્રતમાં મદ્ય અને માંસથી પૂજન વગેરે યુક્ત કુલાચાર કોઈ ઠેકાણે હોય તો તેવો કુલાચાર તો અધર્મ જ છે એમ નિશ્ચે જાણો. (૩૪) જે ધર્મમાં જીવહિંસા હોય અથવા જે ધર્મમાં સુરાપાન હોય, જે ધર્મમાં વ્યભિચાર (પરસ્ત્રી પ્રસંગ) હોય તે ધર્મ દૂરથી ત્યાગ કરવો. (૩૫) કારણ કે હે નિષ્પાપ ! આવા પ્રકારનો ધર્મ (ધર્માભાસ) આસુરજનોએ કલ્પેલો છે. માટે નિશ્ચે અધર્મ છે. તેના ત્યાગમાં પાપ નથી. આવા ધર્મનો ત્યાગ કરવો તે સત્શાસ્ત્રોથી પ્રમાણ કરાયેલો પરમ ધર્મ છે. (૩૬) જેમને મદ્ય-માંસ પ્રિય છે એવા ભૈરવાદિ તુચ્છ દેવતાઓ અને દેવીઓ હોય તે તામસ દેવ અને દેવીઓનું વ્રતપૂજન કરવું નહિ. (૩૭) મારા આશ્રિત, સાત્ત્વિક અને મોક્ષ ઈચ્છનારા વૈષ્ણવ એવા તમોએ હિંસાપ્રિય દેવતાઓનું પૂજન વગેરે કરવું તે યોગ્ય નથી. (૩૮)

હિંસા અધર્મની પત્ની છે. અને અહિંસા ધર્મની પત્ની છે. હિંસા અધર્મીજનોને પ્રિય છે તથા અહિંસા ધાર્મિક જનોને પ્રિય છે. (૩૯) શ્રીકૃષ્ણ ભગવાનના ભક્તોએ ક્યારેય પણ તામસ દેવતાઓથી ભય પામવો નહિ. કારણ કે પોતાના ઉપાસ્ય શ્રીકૃષ્ણ ભગવાન કાળ-માયાદિના નિયંતા છે. (૪૦) (તેમ છતાં) મારા આશ્રિતજનોએ તામસ દેવી અને દેવો તથા તેમના ઉપાસકોની નિંદા તો કરવી જ નહિ, તથા કાલિકાદિ-દેવીના ઉપાસકોની સાથે વિવાદ કરવો નહિ. (૪૧) હે નૃપ ! ભગવાન શ્રીહરિનું વચન સાંભળીને જેનો સંશય નાશ થયો છે એવા નૃપ વાઘજીભાઈએ શ્રીહરિની આજ્ઞાને 'તથાસ્તુ' અર્થાત્ 'આપ સત્ય જ કહો છો, અમો તેમજ કરીશું' એમ કહીને મસ્તકથી ગ્રહણ કરી. (૪૨)

તે સમયે સભામાં બેઠેલા શ્રીહરિના ભક્ત બ્રાહ્મણો હતા તેઓ ભક્તોનું રક્ષણ કરવામાં સમર્થ ભગવાન શ્રીહરિને નમસ્કાર કરીને કહેવા લાગ્યા : હે પ્રભો ! નવરાત્રવ્રતમાં અમારે લગારેક પૂછવાનું છે. તે તમો સાંભળો. (૪૩) અમો સર્વ બ્રાહ્મણો તમારા ચરણકમળના આશ્રિત વૈષ્ણવો છીએ. અમો સર્વે તામસ દેવતાઓનું વ્રત ઘણું કરીને નથી જ આચરતા. (૪૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

कुर्वन्ति बाह्यतः केचित्कुलधर्मवशाद्द्विजाः । तेऽप्यद्य दिनतः स्वामिन्न करिष्यन्ति तत्किल ॥४५॥ किन्त्वस्मज्जीविका तत्र भवतीति जगत्पते ! । पूजापाठस्थापनादि कारणीयं तु विद्यते ॥४६॥ तत्कुर्याम न वा देव ! ब्रूह्येतन्नो यथोचितम् । इति तान्वदतो विप्रान्नीलकण्ठोऽब्रवीद्वचः ॥४७॥ जीविकावृत्तये स्वस्य पारतन्त्र्येण वा द्विजाः ! । चण्ड्यर्चायाः पूजनादि कारणीयं च बाह्यतः ॥४८॥ आपद्यनन्यगतिकैः कृते वा तत्र कारिते । प्रायश्चित्तं विधातव्यं यथार्हं तस्य शुद्धये ॥४९॥ यजमानेनाविदितं व्रतं चान्द्रायणं तु तैः । निमित्तान्तरमुद्दिश्य कर्तव्यं स्वाघनुत्तये ॥५०॥ विद्याच्चेद्यजमानस्तत्तर्ह्यसौ माननष्टधीः । स्वाश्रितस्य हरेद्वृत्तिं तद्गुप्तं कार्यमेव तत् ॥५१॥ सुव्रत उवाच-श्रुत्वेति भगवद्वाक्यं प्राप्तापत्कालनिर्गमाः । प्रसन्ना ब्राह्मणा भूयः पप्रच्छुस्तं नरेश्वर ! ॥५२॥ ब्राह्मणा ऊचुः-महारोगैः पीडितानां भूतप्रेतादिभिस्तथा । बालवृद्धग्रहाद्यैश्च किं जप्यं तन्निवृत्तये ॥५३॥ देहावसानसमये किं च जप्यं जनैः प्रभो ! । उत्तमैव गतिर्यस्मिन् जप्ये स्यादपि पापिनाम् ॥५४॥ सकामैर्वापि निष्कामैर्यज्जप्तं स्तोत्रमीश्वर! । वाञ्छितार्थं प्रयच्छेत्तत्कृपया वक्तुमर्हसि ॥५५॥ सुव्रत उवाच-इत्थं नारायणमुनिः सम्पृष्टस्तैर्द्विजन्मभिः । अब्रवीन्नृपते ! वाचा हर्षयन्नखिलं सदः ॥५६॥ श्रीनारायणमुनिरुवाच-शृणुत ब्राह्मणाश्चान्ये सर्वे शृणवन्तु मद्वचः । स्तोत्रं श्रेयस्करं वच्मि सर्वस्तोत्रशिरोमणिम् ॥५७॥ भारते दानधर्मेषु विष्णोर्नामसहस्रकम् । भीष्मो युधिष्ठिरं प्राह जप्यं तदिति मे मतम् ॥५८॥

હે સ્વામિન્, કેટલાક બ્રાહ્મણો કુળધર્મના વશથી ઉપરથી વ્રતનું આચરણ કરે છે તે બ્રાહ્મણો પણ આજથી આરંભીને તે વ્રત નહીં જ કરે. (૪૫) હે જગત્પતે! પરંતુ તે વ્રતમાં અમારી સર્વેની જીવિકાવૃત્તિ છે. માટે ચંદનાદિથી દેવીની પૂજા, પાઠ, (સપ્તશતીનું વાંચન) દેવીનું સ્થાપન, હોમ વગેરે કરાવવાનું હોય છે. (૪૬) હે દિવ્યમૂર્તે ! તે પૂજાદિ કરીએ ? અથવા ન કરીએ ? એ યથાયોગ્ય જેમ હોય તેમ અમોને કહો. હે રાજન્ ! આવી રીતે કહેનારા પોતાના ભક્ત બ્રાહ્મણોને ભગવાન નીલકંઠ-શ્રીહરિ આ પ્રમાણે વચન કહેવા લાગ્યા : (૪૭)

હે બ્રાહ્મણો ! પોતાની જીવિકા માટે અથવા પરાધીનપણે ચંડિકાદિ દેવીની પ્રતિમાનું સ્થાપન-પૂજન-પાઠ વગેરે ઉપરથી કરાવવું. (અને એ રીતે) આપત્કાળમાં પોતાના નિર્વાહનો બીજો ઉપાય જેમને નથી તેવા બ્રાહ્મણોએ તામસ દેવ-દેવીઓનું પૂજનાદિ આચરણ કર્યું હોય અથવા બીજાને કરાવ્યું હોય તો તેની શુદ્ધિ માટે યથાયોગ્ય પ્રાયશ્ચિત્ત કરવું. (૪૮-૪૯)

તે બ્રાહ્મણોએ યજમાન ન જાણે તેવી રીતે અન્ય નિમિત્તને ઉદ્દેશીને પોતાના દોષની નિવૃત્તિ માટે ચાંદ્રાયણ વ્રત કરવું. (૫૦) જો યજમાન જાણે તો માનથી નષ્ટ બુદ્ધિવાળો યજમાન પોતાના આશ્રિત બ્રાહ્મણની જીવિકાવૃત્તિ આપેલી હોય તે પાછી લઈ લે. માટે ચાંદ્રાયણ વ્રત ગુપ્ત કરવું. (૫૧)

**સુવ્રતમુનિ કહે છે** : હે નરેશ્વર ! આવી રીતે શ્રીહરિનું વચન સાંભળીને જેઓએ આપત્કાળને ઉલ્લંઘન કરવાનો ઉપાય પ્રાપ્ત કર્યો છે એવા બ્રાહ્મણો પ્રસન્ન થઈને ફરીથી શ્રીહરિને પૂછવા લાગ્યા. (૫૨)

**કયા મંત્ર અને સ્તોત્રનો જપ કરવો :- બ્રાહ્મણો કહે છે** : હે હરે ! મહારોગો તથા ભૂત-પ્રેતાદિ અને બાલગ્રહ-વૃદ્ધગ્રહ વગેરેથી પીડા પામેલા જનોએ તે પીડાની નિવૃત્તિ માટે કયા સ્તોત્રાદિનો પાઠ કરવો ? (૫૩) હે પ્રભો ! જનોએ દેહના અંત સમયે કયા મંત્રનો જપ કરવો જે જપ કરવાથી પાપીજનોની પણ ઉત્તમ ગતિ થાય ? (૫૪) હે પરમેશ્વર ! કંઈપણ સાંસારિક કામનાવાળા સકામ, તથા સાંસારિક કામના રહિત નિષ્કામ ભક્તજનોએ પણ જપવા યોગ્ય જે સ્તોત્ર ઈચ્છિતાર્થને આપે તેવું હોય તે સ્તોત્ર કૃપાથી અમોને કહેવાને યોગ્ય છો. (૫૫)

સુવ્રત મુનિ કહે છે : હે રાજન્ ! આ પ્રમાણે પોતાના વિપ્ર ભક્તોએ પુછાયેલા નારાયણ મુનિ પોતાનાં વચનરૂપી અમૃતોથી સભામાં રહેલા સમગ્ર જનસમુદાયને આનંદ પમાડતા થકા બોલ્યા : (૫૬)

**જપ કરવા યોગ્ય સ્તોત્ર :-** શ્રી નારાયણ મુનિ કહે છે : હે બ્રાહ્મણો ! તમો મારું વચન સાંભળો. બીજા સર્વ ભક્તજનો પણ મારું વચન સાંભળો. સર્વ સ્તોત્રોમાં મુગટ માફક (શિરોમણિ) પરમ શ્રેય આપનારું સ્તોત્ર કહું છું. (૫૭) મહાભારતમાં દાન-ધર્મોમાં ભીષ્મે યુધિષ્ઠિરને વિષ્ણુસહસ્રનામ સ્તોત્ર કહ્યું હતું તે સ્તોત્રનો જપ કરવો. આ પ્રમાણે મારો મત છે. (૫૮)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**अर्थाः सर्वेऽपि सेत्स्यन्ति तावतैव द्विजोत्तमाः ! । तस्मात्सर्वेषु कार्येषु जप्यमेतज्जनैः सदा ॥५९॥ तथा श्रीमद्भागवतप्रोक्तं नारायणात्मकम् । कवचं जपनीयं च सर्वोपद्रवनाशनम् ॥६०॥ यथाकार्यं यथावित्तं पुरश्चरणमेतयोः । दृष्ट्वा विधानं कर्तव्यं पुरश्चरणपद्धतौ ॥६१॥ यथाविधि कृते तस्मिन्कार्यसिद्धिर्भवेन्नृणाम् । एतद्द्वयं ततो जप्यं सर्वैरेव द्विजातिभिः ॥६२॥ कस्मिंश्चिदपि कार्येऽत्र क्षुद्रमन्त्रास्तु कर्हिचित् । सद्यःफला अपि जनैर्न जप्तव्या मदाश्रितैः ॥६३॥ मद्यमांसप्रिया देवा राजसास्तामसाश्च ये । जप्या न तेषां मन्त्राश्च मोक्षाङ्कुरनिकृन्तनाः ॥६४॥ ये ताञ्जपन्ति ते नूनं भुक्त्वैव निरयान्बहून् । प्राप्नुवन्ति पिशाचत्वं डाकिनीत्वं च योषितः ॥६५॥ एतद्द्वयं ततः सर्वैः सर्वकार्येषु सर्वदा । सकामैर्वापि निष्कामैः पठनीयं द्विजोत्तमाः ! ॥६६॥ अथवा हनुमन्मन्त्रो जप्यः सद्यःफलप्रदः । यथाविधि यथाशक्ति ब्रह्मचर्यव्रतस्थितैः ॥६७॥** सुव्रत उवाच-**इति श्रुत्वा भगवतो वाक्यं ते ब्राह्मणा नृप ! । जनाश्चान्ये सभूपालास्तद्गृहीत्वा ववन्दिरे ॥६८॥ एवमानन्दयन्भक्तानन्नकूटोत्सवावधि । तत्रोषित्वा ततः प्रायान्मोडग्रामं हरिर्नृप ! ॥६९॥ पथि ग्रामेषु भक्तानामेकं द्वे वा दिने वसन् । दिनैः कतिपयैः प्राप ग्रामं तं सानुगो हरिः ॥७०॥ तत्रार्चितोऽसौ दलजित्प्रधानैः क्षत्रप्रवीरैर्दिनपञ्चकं च । विधाय वासं सुखदो जनानां ग्रामं ततोऽगादलयाभिधानम् ॥७१॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे तामसदेवव्रतादिनिषेधनामा षोडशोऽध्यायः ॥१६॥

---

હે દ્વિજોત્તમો ! કેવળ તે સ્તોત્રના જપથી જ સર્વ પુરુષાર્થો સિદ્ધ થશે. માટે સર્વ કાર્યોમાં મનુષ્યોએ આ સ્તોત્ર હંમેશાં જપવું; (૫૯) તથા તે પ્રકારથી શ્રીમદ્ ભાગવતમાં કહેલું સર્વ ઉપદ્રવોને નાશ કરનારું નારાયણ સ્વરૂપ કવચ (નારાયણ કવચ) નો જપ કરવો. (૬૦) જેવું કાર્ય હોય અને જેવી ધનસંપત્તિ હોય તેને અનુસરી વિષ્ણુસહસ્રનામ તથા નારાયણ કવચનું પુરશ્ચરણ, પુરશ્ચરણપદ્ધતિમાં જોઈને કરવું. (૬૧)

પુરશ્ચરણ શાસ્ત્ર પ્રમાણે કર્યું હોય તો મનુષ્યોને કાર્યસિદ્ધિ થાય, માટે સર્વ ત્રણ વર્ણના જનોએ આ બે સ્તોત્રો જપવાં. (૬૨) આ લોકમાં મારા આશ્રિત જનોએ, કોઈ પણ કાર્યમાં તત્કાળ ફળ આપનારા હોય; તો પણ ક્ષુદ્ર દેવના મંત્રો તો ક્યારેય પણ જપવા નહિ. (૬૩) જેમને મદ્ય-માંસ પ્રિય હોય એવા રાજસ અને તામસ દેવોનાં મંત્રો જપવા નહિ. કારણ કે તેવા મંત્રો તો મોક્ષના અંકુરોને છેદનારા છે, માટે રાજસ-તામસ દેવોના મંત્રો જપવા નહિ. (૬૪)

જે પુરુષો તે મંત્રો જપે છે તે પુરુષો નાના પ્રકારનાં નરકોને ભોગવીને પછી પિશાચપણાને નિશ્ચે પામે છે. જે સ્ત્રીઓ તે મંત્રો જપે છે તે ઘણાં નરકો ભોગવીને ડાકણપણાને પામે છે. (૬૫) માટે હે દ્વિજોત્તમો ! સકામ અને નિષ્કામ સર્વ જનોએ પણ સર્વ કાર્યમાં સર્વદા પૂર્વે કહેલાં બે સ્તોત્રોનો પાઠ કરવો; (૬૬) અથવા તત્કાળ ફળ આપનાર, હનુમાનજીના મંત્રનો બ્રહ્મચર્યવ્રતમાં રહેલા જનોએ શાસ્ત્ર પ્રમાણે પોતાની શક્તિ અનુસારે જપ કરવો. (૬૭)

હે રાજન્ ! આવું શ્રીહરિનું વચન સાંભળીને તે બ્રાહ્મણો તથા રાજાએ સહિત બીજા સભામાં બેઠેલા જનો, ભગવાનનું વાક્ય પોતાના મસ્તકથી ગ્રહણ કરી શ્રીહરિને નમસ્કાર કરતા હતા. (૬૮) હે રાજન્ ! શ્રી સહજાનંદ સ્વામી આવી રીતે ભક્તજનોને આનંદ આપતા ભાડેરપુરમાં અન્નકૂટોત્સવ સુધી નિવાસ કરી ત્યાંથી **મોડા** ગામ પ્રત્યે ગયા. (૬૯)

બ્રહ્મચારી-સાધુ વગેરે મંડળે સહિત શ્રી નારાયણ મુનિ, માર્ગમાં ભક્તોનાં ગામોમાં એક દિવસ-બે દિવસ નિવાસ કરતા કેટલાક દિવસે મોડા ગામમાં ગયા. (૭૦)

મોડા ગામમાં દલજીત નામના ભક્ત મુખ્ય જેમાં છે એવા દાજી વગેરે-ક્ષત્રિયોમાં શ્રેષ્ઠ ભક્તોએ પૂજાયેલા, સ્વભક્તોને આનંદ આપનારા શ્રીહરિ પાંચ દિવસ નિવાસ કરી મોડા ગામથી અલૈયા નામના પ્રસિદ્ધ ગામમાં ગયા. (૭૧)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે તામસદેવવ્રતાદિનિષેધનામા ષોડશોડધ્યાયઃ (૧૬)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

सुव्रत उवाच-**नारायणादिभिस्तत्र रथकारैः समर्चितः । शेषपाटमुपेयाय ग्रामं नरपते ! हरिः ॥१॥ लालजिद्रथकारेण साकं मात्रा सुतेन च । तत्रार्च्यमानः कतिचिद्दिनान्यवसदीश्वरः ॥२॥ ततो वसन्तपञ्चम्यां भाद्रग्राममुपागमत् । भगवान् सानुगस्तत्र महोत्सवमकारयत् ॥३॥ मूलसुन्दरशर्माद्याः समसेवन्त वाडवाः । तत्र वैश्या वृद्धरत्नलब्धदेवादयश्च तम् ॥४॥ रथकाराश्च विश्राममावरामजिदादयः। शूद्राश्च नाथमुख्यास्तमादरेण सिषेविरे ॥५॥ बहवो मिलितास्तत्र भक्ता देशान्तरागताः। पुपूजुस्ते च तं प्रीता गन्धपुष्पधनादिभिः ॥६॥ अपराह्ने सभा तत्र बभूव महती नृप ! । तन्मध्यपीठे भगवान्निषसाद सुखप्रदः ॥७॥ मर्यादयोपविष्टांस्तान्स्वाननार्पितलोचनान् । भक्तानानन्दयन्नूचे वर्णीन्द्रो वचनं हरिः ॥८॥ सर्वेषां देहिनां भक्ताः ! कृष्णभक्तिर्विमुक्तिदा । उदेति सा तु सत्सङ्गान्नश्यत्यसुरसङ्गतः ॥९॥ असुराणां ततः सङ्गो नैव कार्यो मुमुक्षुभिः । लक्षणैर्नृषु ते ज्ञेयास्तज्जातिर्नास्ति यत्पृथक् ॥१०॥ एतच्छ्रुत्वा भक्तपतेर्वचनं स्वहितावहम् । मूलशर्मा विप्रवरस्तं प्रणम्येदमब्रवीत् ॥११॥** मूलशर्मोवाच-**वर्ज्यसङ्गास्त्वया प्रोक्ता असुरा ये जगत्पते ! । लक्षणानि बुभुत्सामस्तेषां वयमिहाञ्जसा ॥१२॥ तानि त्वं कृपया स्वामिन्वक्तुमर्हसि सर्ववित् । इति सञ्चोदितस्तेन विप्रेण हरिरब्रवीत् ॥१३॥** श्रीनारायणमुनिरुवाच-**कृष्णकृष्णावताराणां तद्भक्तानां च वाडव ! । द्रोहाचरणमित्येतन्मुख्यं लक्षणमासुरम् ॥१४॥ तच्च**

---

## અધ્યાય : ૧૭

**જેમનો સંગ સર્વ પ્રકારે ત્યાગ કરવા યોગ્ય છે એવા અસુર પુરુષોનાં લક્ષણો સ્પષ્ટ કહ્યાં છે.**

**સુવ્રત મુનિ બોલ્યા** : હે નરપતે ! અલૈયા ગામમાં નારાયણ વગેરે સુથાર ભક્તોએ પૂજેલા શ્રી નારાયણમુનિ **શેખપાટ** ગામમાં ગયા. (૧) ત્યાં પોતાની માતા લાડુ નામનાં તથા પોતાના પુત્ર રામજી સાથે લાલજી સુથારે પૂજેલા પરમેશ્વર શ્રીહરિ કેટલાક દિવસો રહ્યા. (૨) વર્ણી-સાધુ વગેરે પોતાના સેવકોએ સહિત ભગવાન શેખપાટથી વસંતપંચમીને દિવસે **ભાદરા** ગામમાં ગયા. ત્યાં તે દિવસે વસંતના પૂજનપૂર્વક શ્રીકૃષ્ણના મહા અર્ચનનો મહોત્સવ શ્રીહરિએ કરાવ્યો. (૩)

ભાદરા ગામમાં મૂળજી શર્મા તથા સુંદરજી શર્મા આ બે બ્રાહ્મણ ભાઈઓ વગેરે બ્રાહ્મણો તથા વૃદ્ધ, રત્નો, લાધો તથા દેવજી વગેરે વૈશ્યભક્તો શ્રીહરિની સેવા કરતા હતા. (૪) વિશ્રામ-માવો-રામજી વગેરે રથકારો અને નાથો આદિ શૂદ્ર ભક્તો શ્રીહરિની પરમ શ્રદ્ધાથી સેવા કરતા હતા. (૫)

વસંતોત્સવમાં દેશાન્તરથી આવેલા ઘણા ભક્તો ભેગા થયા. તે ભક્તો પ્રસન્ન મનવાળા થઈ ચંદન અને પુષ્પોની માળાઓ, ધન તથા વસ્ત્રાદિથી શ્રીહરિની પૂજા કરતા હતા. (૬) હે રાજન્ ! વસંતપંચમીને દિવસે સાંજને વખતે અતિ વિશાળ સભા થઈ. પોતાના ભક્તોને સુખ આપનાર ભગવાન સભાના મધ્ય ભાગમાં રહેલા સિંહાસનમાં બેઠા. (૭)

વર્ણીન્દ્ર શ્રીહરિ, પોતપોતાના સ્થાનમાં મર્યાદાથી બેઠેલા પોતાના મુખારવિંદમાં અર્પણ કર્યાં છે નેત્રો જેમણે એવા ભક્તોને આનંદ આપતાં વચન બોલ્યા : (૮) હે ભક્તો ! શ્રીકૃષ્ણની ભક્તિ સર્વ જીવોને આત્યંતિક મોક્ષ આપનારી છે. તે કૃષ્ણભક્તિ તો સત્સંગથી ઉદય પામે છે. અસુરોના સંગથી વિનાશ પામે છે. (૯) માટે મુમુક્ષુજનોએ અસુરોનો સંગ કરવો જ નહિ. મનુષ્યોમાં વર્તતા અસુરોને તેના લક્ષણોથી જાણવા કારણ કે અસુરજાતિ મનુષ્યોથી જુદી નથી. મનુષ્યોમાં જ મનુષ્યના આકારવાળા વર્તે છે. (૧૦)

હે રાજન્ ! બ્રાહ્મણશ્રેષ્ઠ મૂળ શર્મા પોતાના હિતને કરનારું ભક્તપતિ શ્રીહરિનું આવું વચન સાંભળીને શ્રીહરિને સાષ્ટાંગ પ્રણામ કરી વચન બોલ્યા : (૧૧) હે જગત્પતે ! જેમનો સંગ તમોએ ત્યાગ કરવાનું કહ્યું, તેવા અસુરોનાં લક્ષણો આ સભામાં રહેલા અમો સર્વ ભકતો યથાર્થ જાણવા ઈચ્છીએ છીએ. (૧૨) હે સ્વામિન્ ! સર્વજ્ઞ તમો અમારા ઉપર કૃપા કરી અસુરોનાં લક્ષણો કહેવા માટે યોગ્ય છો. હે રાજન્, આવી રીતે મૂળ શર્મા બ્રાહ્મણે સમ્પ્રેરિત શ્રીહરિ બોલ્યા. (૧૩)

**અસુર જીવના લક્ષણો** :- શ્રી નારાયણમુનિ કહે છે : હે વિપ્ર ! સ્વયં શ્રીકૃષ્ણ ભગવાન અને કૃષ્ણના અવતારો વરાહાદિક અને તેમના ભક્તો (તથા અવતારોના ઉપાસકો) નો દ્રોહ આચરવો તે અસુરનું મુખ્ય લક્ષણ છે. (૧૪) તે અસુરોનું લક્ષણ સ્વાભાવિક જ છે એમ તમો જાણો. બહારથી ભક્તિનો આડંબર બીજા જનોને મહાભક્તપણે બતાવે : આ

स्वाभाविकं ह्येव तेषामित्यवधार्यताम् । ज्ञेयं चान्यद्बाह्यतस्तु भक्त्याटोपप्रदर्शनम् ॥१५॥ कृष्णतद्भक्तमाहात्म्य-चरित्रेष्वद्भुतेष्वपि । दोषदृष्टिरिति ज्ञेयमन्यच्चासुरलक्षणम् ॥१६॥ हिंसासुरापलप्रेष्ठदेवदेवीषु निश्चला । इष्टधीस्तन्मन्त्रजपस्तदर्चा तद्व्रतक्रिया ॥१७॥ तदीयग्रन्थपठनश्रवणादिप्रसक्तता । तद्दीक्षाधारणं चेति लक्ष्माण्यमरविद्विषाम् ॥१८॥ बुद्धिपूर्वं जीवहिंसा सुरापानं पलाशनम् । स्वीयेतरस्त्रीगमनं लक्षणं विद्धि चासुरम् ॥१९॥ उद्धतत्वं च कामेन रुषा लोभेन वा द्विज ! । मानेन वा मदेनापि लक्षणं ह्यासुरं हि तत् ॥२०॥ रसास्वादे लोलुपत्वं वर्णसङ्करकारिता । स्ववर्णाश्रमधर्मस्य बाह्यतश्च प्रदर्शनम् ॥२१॥ एवमादीनि लक्ष्माणि ज्ञातव्यानि सुरद्विषाम् । सङ्क्षेपेण मयोक्तानि येषु स्युस्तानि तेऽसुराः ॥२२॥ सङ्गस्तेषां न कर्तव्यः कृष्णभक्तैरनापदि । ये करिष्यन्ति ते भ्रष्टा भाव्याः स्वश्रेयसोऽध्वनः ॥२३॥ सुव्रत उवाच-इति शिक्षावचः श्रुत्वा मूलशर्मा हरेर्द्विजः । सदःस्थाश्चेतरे भक्ताः प्रत्यगृह्णंस्तथेति तत् ॥२४॥ एवं शिक्षावचोभिः स्वान्बोधयन् प्रत्यहं प्रभुः । दिनान्युषित्वा षट् तत्र ययावम्बुधिखाडिकाम् ॥२५॥ नौभिरुत्तीर्य तां प्रायादञ्जाराख्यं पुरं ततः । पुपूजुः कचराद्यास्तं तत्र विप्रा महामुदः ॥२६॥ दिनान्युषित्वा कतिचित्स तत्र स्वामी भुजङ्गाख्यपुरं ततोऽगात् । सद्धर्मसंस्थापन उद्यतोऽसावधर्ममूलोत्खनने पटीयान् ॥२७॥ सम्प्राप्तमाकर्ण्य च पौरभक्ता विचित्रवादित्ररवैः सहाशु । यानै रथाश्वादिभिरभ्युपेत्य दृष्ट्वा च साष्टाङ्गममुं प्रणेमुः ॥२८॥ तान्मानयित्वाऽनुगतान् यथार्हं विचित्रयानेषु निषादयित्वा । भक्तान् स्वयं सैन्धववर्यमीश आरुह्य तैः साकमुपाविशत्तत् ॥२९॥

---

બીજું આસુર લક્ષણ જાણવું. (૧૫) આશ્ચર્યકારક એવા પણ શ્રીકૃષ્ણ ભગવાન અને તેમના ભક્તોનાં માહાત્મ્ય-સભર ચરિત્રોમાં દોષોનું દર્શન તે પણ ત્રીજું અસુરનું લક્ષણ જાણવું. (૧૬)

પ્રાણીહિંસા અને સુરાપાન-માંસભક્ષણ જેમને પ્રિય છે એવાં દેવ-દેવીઓમાં ઈષ્ટ બુદ્ધિ તેના મંત્રનો જપ-તેનું પૂજન, તેના વ્રતની ક્રિયા-તેવાં દેવદેવીના ગ્રંથોનું પઠન, શ્રવણ વગેરેમાં આસક્તિ રાખવી અને તેમની દીક્ષા ધારણ કરવી વગેરે અસુરોનાં લક્ષણો છે. (૧૭-૧૮) જાણીને જીવહિંસા, સુરાપાન-માંસભક્ષણ, પોતાની સ્ત્રીથી બીજી સ્ત્રીમાં ગમન તે પણ અસુરનું લક્ષણ જાણવું. (૧૯) હે દ્વિજ ! કામ-ક્રોધ અને લોભથી અથવા માન અને મદથી ઉદ્ધતપણું તે નિશ્ચે અસુરનું જ લક્ષણ છે. (૨૦) રસાસ્વાદમાં લોલુપતા, જેનું અન્ન ખપતું ન હોય તેવા વર્ણનું અન્નપાનાદિ ગ્રહણ કરવારૂપ સંકરકારીપણું અને બહારથી પોતાના વર્ણાશ્રમ ધર્મનું બતાવવું એ આદિક અસુરોનાં જાણવાં યોગ્ય લક્ષણો મેં તમોને સંક્ષેપથી કહ્યાં છે, જે મનુષ્યોમાં તે લક્ષણો હોય તેને અસુરો જાણવા. (૨૧-૨૨) હે વિપ્ર ! તે અસુરોનો સંગ શ્રીકૃષ્ણના ભક્તોએ આપત્કાળ પડ્યા વિના કરવો નહિ. જે કૃષ્ણભક્તો તેમનો સંગ કરશે તે પોતાના કલ્યાણના માર્ગથી ભ્રષ્ટ થશે. (૨૩)

હે રાજન્ ! શ્રીહરિનાં ઉપદેશવચનો સાંભળીને મૂળજી શર્મા બ્રાહ્મણ અને સભામાં બેઠેલા બીજા ભક્તોએ શ્રીહરિકૃષ્ણ મહારાજનાં વચનોને હે પ્રભો ! તમો જેમ કહો છો તે પ્રમાણે અમો આચરણ કરીશું એમ મસ્તકથી ગ્રહણ કર્યાં. (૨૪) શ્રીહરિ આવી રીતે શિક્ષાવચનોથી પ્રતિદિન પોતાના ભક્તોને ભાગવતધર્મનો બોધ આપતા થકા તે ભાદરા ગામમાં છ દિવસ નિવાસ કરીને પછી ત્યાંથી (ભુજનગર પ્રત્યે જવા માટે) નીકળીને સમુદ્રની ખાડી પ્રત્યે ગયા. (૨૫) પછી શ્રીહરિ નૌકાથી સમુદ્રની ખાડીને સામે કાંઠે જઈ **અંજાર** નામના પુરમાં પધાર્યા. ત્યાં કચરા નામના બ્રાહ્મણ (''ભગવત્સ્વરૂપ-સુખં ચરતિ અનુભવતિ ઈતિ કચરઃ'' આ પોતાના નામને સાર્થક કરનાર) વગેરે અત્યંત હર્ષવાળા બ્રાહ્મણો શ્રીહરિનું પૂજન કરતા હતા. (૨૬)

ભાગવત ધર્મના સ્થાપનમાં ઉદ્યમવાળા, અધર્મનાં મૂળોને ઉખાડવામાં અતિચતુર શ્રી સહજાનંદ સ્વામી અંજારપુરમાં કેટલાક દિવસ રહીને ત્યાંથી ભુજ નગરમાં ગયા. (૨૭) ભુજપુરના નિવાસી ભક્તજનો પોતાના પુરમાં આ વાત (શ્રીહરિ પધાર્યાની વાત) સાંભળીને નાના પ્રકારનાં વાજિંત્રોના ધ્વનિની સાથે રથ, ઘોડા,પાલખી, મેના આદિકથી સન્મુખ જઈને શ્રીહરિને જોઈને સાષ્ટાંગ પ્રણામ કરતા હતા. (૨૮)

સકલેશ્વર શ્રીહરિ પોતાની સન્મુખ આવેલા ભક્તજનોને યથાયોગ્ય માન આપીને કુશળ પ્રશ્નોથી સંભાવના કરી પોતાની સાથે આવેલા બ્રહ્મચારી, સાધુ તથા હરિભક્તોને રથાદિ વાહનોમાં યથાયોગ્ય બેસાડી સ્વયં શ્રીહરિ શ્રેષ્ઠ અશ્વ ઉપર બેસીને સર્વ ભક્તોની સાથે ભુજનગરમાં પ્રવેશ કરતા હતા. (૨૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**तत्र सुन्दरजितो निकेतने त्वष्टुरात्मवसतिं चकार सः । स्वानुगांश्च समवासयत् पुरे भक्तवेश्मसु यथार्हमीशिता ॥३०॥**
इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे असुरलक्षण-भुजङ्गपुरागमननामा सप्तदशोऽध्यायः ॥१७॥

सुव्रत उवाच-**श्रुतात्यद्भुतचारित्रं प्रत्यक्षं वीक्ष्य तं प्रभुम् । पौरास्तद्वीक्षणोत्कण्ठा लेभिरे परमं सुखम् ॥१॥ परिचर्यां मुदा तस्य तेऽथ चक्रुरतन्द्रिताः । तेषां कतिपयानां ते नामानि नृपते ! ब्रुवे ॥२॥ आद्यः सुन्दरजित्तत्र हीरश्च भगवांस्ततः । जीवः प्रागो देवरामस्तथा नारायणः सुधीः ॥३॥ राघवप्रमुखाश्चान्ये तक्षाणस्तं सिषेविरे । तथा प्रयागजिन्मुख्या ब्राह्मणाश्चातिभावतः ॥४॥ शिवरामश्च हरजिदुत्करो वल्लभादयः । शूद्रा मल्लाश्च गाङ्गेयमुख्याः पर्यचरन्हरिम् ॥५॥ पुञ्जाऽमरी तथा लब्धा लहरी सूरजादयः । योषितोऽपि न्यषेवन्त तमतिप्रेमतो नृप ! ॥६॥ मधौ नवम्यां शुक्लायां तत्राभूत्सुमहोत्सवः। नानादेशपुरादिभ्यो जनास्तत्र समाययुः ॥७॥ महान्तं मण्डपं स्वामी कारयित्वा सुशोभनम् । तत्राऽऽर्चच्छ्रीरामचन्द्रं मध्याह्ने विधिवन्नृप ! ॥८॥ उपवासं दिने तस्मिन् गृहस्थास्त्यागिनस्तथा । स्वयं हरिर्जनाश्चान्ये चक्रुश्च निशि जागरम् ॥९॥ राममभ्यर्च्य वर्णीन्द्रः सतो विप्रांस्तथाऽऽर्चयत् । स्थापयन्धर्ममर्यादां पूर्णकामोऽपि भूतले ॥१०॥ अपराह्ने सभायां तं हेमपीठमधिष्ठितम् । नत्वा भक्तजनास्तस्य कर्तुमारेभिरेऽर्चनम् ॥११॥ प्रयागजिद्विप्रवरो वेदशास्त्रविशारदः। प्रणम्य तं गन्धपुष्पनूत्नवासोभिरार्चयत् ॥१२॥**

---

સર્વનિયંતા શ્રીહરિએ તે પુરમાં સુંદરજી નામના સુથારના ભવનમાં પોતાનો નિવાસ કર્યો. પોતાના અનુગામી ભક્તજનોને પુરમાં પોતાના ભક્તોના ઘરોમાં યથાયોગ્ય નિવાસ કરાવ્યો. (૩૦) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે અસુર લક્ષણ ભુજંગપુરાગમનનામા સપ્તદશોડધ્યાયઃ (૧૭)*

## અધ્યાય : ૧૮

**ભુજના નિવાસી ભક્તોએ આશ્ચર્યદર્શનવાળા શ્રીહરિની અતિ ભાવપૂર્વક સ્તુતિ કરી તે કહ્યું છે.**

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! શ્રીહરિના દર્શનમાં ઉત્સાહવાળા ભુજપુરના નિવાસી ભક્તજનો પૂર્વે જેમનાં અદ્‌ભુત ચરિત્રો સત્પુરુષોથી સાંભળ્યા છે એવા પ્રભુ શ્રી નારાયણ મુનિને પ્રત્યક્ષ જોઈને સર્વોત્તમ આનંદ પામ્યા. (૧)

હે નૃપતે ! પછી પુરના ભક્તો આળસે રહિત હર્ષથી શ્રીહરિની પરિચર્યા કરવા લાગ્યા. તે ભક્તોનાં કેટલાંક નામો તમોને કહું છું. (૨) તેમાં પ્રથમ પ્રયાગજી વગેરે વિપ્રો અને સુંદરજી, હીરજી, ભગવાનજી, જીવો, પ્રાગજી, દેવરામ, બુદ્ધિશાળી નારાયણજી, રાઘવજી આદિક સુતારો, શિવરામ, હરજી, ઉત્કર, વલ્લભજી આદિક શૂદ્રો, ગંગારામ વગેરે મલ્લો : આ સર્વે ભક્તો અતિ પ્રેમપૂર્વક શ્રીહરિની સેવા કરવા લાગ્યા, તથા હે નૃપ ! પૂજા, અમરી, લાધી, લહરી, સૂરજ વગેરે સ્ત્રીઓ પણ પરમ પ્રેમથી સેવા કરવા લાગી. (૩-૪-૫-૬) ભુજનગરમાં સંવત્ ૧૮૬૦ ના ચૈત્ર શુદી ૯ નવમીને દિવસે શોભાયમાન મહોત્સવ થયો, તે મહોત્સવમાં વિવિધ દેશો અને પુર-ગામો વગેરેથી હરિભક્તો આવ્યા. (૭)

હે રાજન્ ! શ્રી નારાયણમુનિએ શાસ્ત્ર પ્રમાણે બહુ શોભા યુક્ત અતિ વિશાળ મંડપ કરાવી તે મંડપમાં મધ્યાહ્ન સમયે શ્રી રામચંદ્રજી ભગવાનનું શાસ્ત્રોક્ત વિધિ પ્રમાણે પૂજન કર્યું. (૮) તે દિવસે સ્વયં શ્રીહરિ તથા ત્યાગી- બ્રહ્મચારી-સાધુઓ અને ગૃહસ્થો તથા બીજા જનો ઉપવાસ અને રાત્રિમાં જાગરણ કરતા હતા. (૯) શ્રીહરિ પૂર્ણકામ છે તો પણ પૃથ્વીમાં ધર્મમર્યાદા સ્થાપવા માટે રામચંદ્રજીનું પૂજન કરી સાધુઓ તથા બ્રાહ્મણોનું પૂજન કરવા લાગ્યા. (૧૦)

રામનવમીને દિવસે બપોર પછી સભામાં સુવર્ણ સિંહાસનમાં બેઠેલા શ્રીહરિને ભક્તજનો (આ તિથિમાં શ્રીહરિનો પ્રાદુર્ભાવ જાણનારા) નમસ્કાર કરીને શ્રીહરિનું પૂજન કરવા માટે આરંભ કરતા હતા. (૧૧) વેદશાસ્ત્રમાં નિપુણ બ્રાહ્મણોત્તમ પ્રયાગજીએ શ્રીહરિનું ચંદન અને વિવિધ પ્રકારનાં પુષ્પોની માળાઓ અને નવીન વસ્ત્રોથી શાસ્ત્રવિધિથી પૂજન કર્યું. (૧૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सम्पूज्य भक्त्या तं पश्यन् समाधिं प्राप तत्क्षणम् । ब्रह्मप्रकाशे तत्रामुं वर्णिवेषं ददर्श सः ॥१३॥ क्षणान्ते तं कृष्णमेव गोलोके धाम्न्यवैक्षत । वर्णिवेषं पुनः पश्यन् व्युत्तस्थौ तस्य हीच्छया ॥१४॥ ततस्तुष्टाव तं प्रीत्या बद्धाञ्जलिपुटः सुधीः । ब्राह्मणः स महाबुद्धिस्तत्पादाब्जदृढाश्रयः ॥१५॥ प्रयागजिदुवाच-नमो दिव्यगोलोकधाम्नि प्रकाशे समं राधिकागोपिकाभिर्विलासम् । सदा तन्वते वेणुवाद्याय तस्मै कृपानाथ ! तुभ्यं नमस्त्वं प्रसीद ॥१६॥ नमो वासुदेवाय कृष्णाय नित्यं नमस्तेऽस्तु शुद्धाय बुद्धिप्रदाय । हरे ! भक्तरक्षार्थनित्योद्यताय कृपानाथ !० ॥१७॥ नमो भक्तिधर्मात्मजायार्तिहन्त्रे महावर्णिवेषाय धर्मैकपात्रे । अधर्मान्ववायस्य मूलोत्खनित्रे कृपानाथ!० ॥१८॥ नमो देवदेवेन्द्रवन्द्याय तुभ्यं नमः पद्मयोनित्रिनेत्रार्चिताय । अनेकाण्डकोट्याश्रयैकैकरोम्णे कृपानाथ!०॥१९॥ त्वमेवासि लोकस्य धाता विधाता सुखप्रेप्सुभिः सर्वदा चिन्तनीयः । क्षरादक्षराच्चोत्तमः पूरुषस्त्वं कृपानाथ !० ॥२०॥ त्वमेवेश ! मत्स्यश्च वराहो नृसिंहस्तथा वामनः पर्शुरामः । अभूस्त्वं हि रामश्च कृष्णोऽवितुं स्वान् कृपानाथ !० ॥२१॥ त्वमेवावतारानधर्मस्य शान्त्यै प्रवृत्त्यै च धर्मस्य धत्सेऽनुकालम् । वशोऽसि स्वतन्त्रोऽपि भक्तस्य नूनं कृपानाथ !०॥२२॥ यथा बालकानां हितं स्वस्य कुर्यात् पिता वा सखा स्वस्य सख्युस्तथा त्वम् । हितं कर्तुमर्होऽसि चाप्रेरितं मे कृपानाथ !० ॥२३॥ सुव्रत उवाच-इति स्तुवन्तं तं ज्ञात्वा पुराणनिपुणं हरिः । वाचनार्थं पुराणादेः स्वान्तिके समतिष्ठिपत् ॥२४॥

---

પ્રયાગજી વિપ્ર પૂજા કરી શ્રીહરિને જોતા હતા તે સમયે જ સમાધિ થઈ. તે સમાધિમાં અક્ષરબ્રહ્મના તેજસમુદાયમાં બ્રહ્મચારી સમાન વેષવાળા આ શ્રીહરિને જોવા લાગ્યા. (૧૩) પ્રયાગજી વિપ્ર બીજી ક્ષણમાં ગોલોકના મધ્યમાં રહેલા મહાતેજોમય અક્ષરબ્રહ્મમાં શ્રીહરિને જોવા લાગ્યા. ફરી શ્રીહરિને વર્ણીવેશવાળા જોઈને શ્રીહરિના સંકલ્પથી સમાધિથી ઊભા થયા. (૧૪)

પછી બુદ્ધિમાન-શ્રીહરિના ચરણકમળમાં દૃઢ આશ્રયવાળા તે પ્રયાગજી વિપ્ર બંને હાથ જોડી અતિસ્નેહપૂર્વક શ્રીહરિની સ્તુતિ કરવા લાગ્યા. (૧૫) **પ્રયાગજી વિપ્ર બોલ્યા** : હે કૃપાનાથ ! (દીનજનોના સ્વામી અથવા કૃપાથી ભક્તજનોમાં પોતાનું નાથપણું પ્રસિદ્ધ કરતા) દિવ્ય જે ગોલોકધામમાં પ્રકાશમય અક્ષરધામમાં વર્તતા, રાધિકા અને ગોપિકાઓની સાથે (લક્ષ્મી વગેરેનું પણ ઉપલક્ષણપણે જાણી લેવું) હંમેશાં વિલાસ કરે છે, વાંસળી વગાડતા તમોને નમસ્કાર કરું છું. તમો પ્રસન્ન થાઓ. (૧૬)

હે હરે ! અક્ષરાદિ સર્વમાં અંતર્યામીપણે નિવાસ કરનારા દેવ (વાસુદેવ) અનવધિકાતિશય આનંદમૂર્તિ શ્રીકૃષ્ણ તમોને હંમેશાં નમસ્કાર થાઓ. શુદ્ધ બુદ્ધિ આપનાર, ભક્તોની રક્ષા માટે હંમેશા ઉદ્યમવાળા એવા તમોને નમસ્કાર. હે કૃપાનાથ ! પ્રસન્ન થાઓ. (૧૭) ભક્તિ અને ધર્મના પુત્ર, ભક્તજનોનાં દુઃખ હરનારા, મહાવર્ણીનો વેશ ધારણ કરનાર, ધર્મના એક પાત્રભૂત તેમજ દંભ - લોભાદિ અધર્મવંશને મૂળમાંથી ઉખેડી નાખનાર તમોને નમસ્કાર છે. (૧૮)

દેવો અને દેવેન્દ્રાદિથી વંદન કરાયેલા, બ્રહ્મા, શંકર અને વિષ્ણુથી પૂજાયેલા-અપરિમિત બ્રહ્માંડોની કોટિઓના આધાર ભૂત એક એક રોમ છે જેમના એવા તમોને નમસ્કાર છે. (૧૯)

લોકોનું પાલન કરનારા અને લોકોના સ્રષ્ટા પણ તમો જ છો. સુખ ઈચ્છનારાઓને સર્વદા ચિંતવન કરવા યોગ્ય છો. ભૂમિ વગેરે અપરા પ્રકૃતિથી અને પરાપ્રકૃતિ સંજ્ઞાવાળા અક્ષરપુરુષથી પર ઉત્તમ પુરુષ-પુરુષોત્તમ તમો જ છો. (૨૦) હે ઈશ! પોતાના ભક્તોનું રક્ષણ કરવા માટે મત્સ્ય-કૂર્મ-વરાહ-નૃસિંહ-વામન-પરશુરામ-રામચંદ્ર તથા કૃષ્ણાવતાર ધારણ કરનારા તમો જ છો. (ચકારથી, થઈ ગયેલા અને થનારા જે બુદ્ધ અને કલ્કિ તેનો સંગ્રહ કરી લેવો.) (૨૧)

હે હરે ! દરેક યુગમાં અધર્મના વિનાશ માટે અને ધર્મની પ્રવૃત્તિ માટે અસંખ્ય અવતારો ધારણ કરો છો. તમો સ્વતંત્ર છો તો પણ નિશ્ચે એકાંતિક ભક્તને આધીન છો. (૨૨) હે હરે ! જેમ પોતાનાં બાળકોનું અપ્રેરિત હિત તેના પિતા કરે અથવા પોતાના મિત્રનું અપ્રેરિત હિત મિત્ર કરે છે તે પ્રકારે મારું અપ્રેરિત હિત તમો જ કરવા યોગ્ય છો. હે કૃપાનાથ ! તમો મારા ઉપર પ્રસન્ન થાઓ. (૨૩) **સુવ્રત મુનિ કહે છે** : હે રાજન્ ! આવી રીતે સ્તુતિ કરતા પ્રયાગજી બ્રાહ્મણને તેમની સ્તુતિથી પ્રસન્ન થયેલા શ્રીહરિએ પુરાણમાં નિપુણ જાણીને પુરાણાદિ વાંચવા માટે પોતાની સમીપમાં રાખ્યા. (૨૪)

ततः सुन्दरजित्तं च नृपार्हगृहवैभवः । शिल्पे त्वष्टा नृपामात्योऽम्बरीषोपम आर्चयत् ॥२५॥ सुगन्धिना चन्दनेन पौष्पैर्हारैश्च शेखरैः । नानाविधैः सुवसनैस्तं पुपूज विभूषणैः ॥२६॥ सहस्रशो हेममुद्रा निधाय पुरतो हरेः । नीराजयामास साकं भार्यापुत्रसनाभिभिः ॥२७॥ ततः प्रणम्य साष्टाङ्गं बद्धाञ्जलिपुटः स तम् । दर्शनीयतमं पश्यन्बभूवानन्दनिर्भृतः ॥२८॥ पश्यंस्तं सहसा प्राप समाधिं स परं नृप ! । तत्रापश्यन्महत्तेजो वर्णिवेषं च तत्र तम् ॥२९॥ ततोऽपश्यत्स गोलोकं तत्र च ब्रह्मतेजसि । मुरलीं वादयन्तं तं श्रीकृष्णं रासमण्डले ॥३०॥ ततस्तमेव भूमानं धाम्न्यव्याकृत ऐक्षत । अष्टबाहुं दर्शनीयं शेषपर्यङ्कशायिनम् ॥३१॥ अमृताख्ये च तं धाम्नि महापुरुषरूपिणम् । निरन्नश्वेतमुक्तानां निकरैरुपसेवितम् ॥३२॥ विष्णुं वैकुण्ठलोके च रमया सेवितं ततः । तं चैक्षत क्षीरनिधौ योगेशं शेषशायिनम् ॥३३॥ यज्ञनारायणं चाग्नौ स्रुक्स्रुवाद्युपलक्षितम् । हिरण्मयं च पुरुषमर्कबिम्बे तमैक्षत ॥३४॥ तं चापश्यद्विशालायां नरनारायणं ततः । वर्णिवेषं यथापूर्वं ततस्तं हरिमैक्षत ॥३५॥ व्युत्थितोऽथेक्षया तस्य प्रभोस्तं सर्वकारणम् । विदित्वा स नमस्कृत्य तुष्टाव परया मुदा ॥३६॥ सुन्दरजिदुवाच–गोलोकेश ! परेश ! कृष्ण ! भगवंस्त्वं कालमायेश्वरः सर्वेषां च नियामकोऽक्षरपरो दिव्याकृतिः स्वप्रभः । सर्वात्मा पुरुषोत्तमोऽसि सकलैश्वर्याभिजुष्टः सदा वन्दे भक्तजनेष्टकल्पतरवे वर्णीन्द्रवेषाय ते ॥३७॥

---

પછી રાજાને યોગ્ય ઘરના વૈભવવાળા, શિલ્પકળામાં તો વિશ્વકર્મા સમાન, ભુજના રાજાના મંત્રી, શ્રીહરિની એકાંતિકી ભક્તિમાં અંબરીષની ઉપમાવાળા **સુંદરજીત** શ્રીહરિને પૂજતા હતા. (૨૫) સુગંધીમાન અગરુ-ચંદન, વિવિધ પ્રકારનાં સુંગધી પુષ્પોના હારો અને તોરાઓ, અમૂલ્ય વસ્ત્રો, કડાં, બાજુબંધ વગેરે સુવર્ણના અલંકારોથી શ્રીહરિની પૂજા કરતા હતા. (૨૬) હજારો સુવર્ણમુદ્રાઓ સુવર્ણના મોટા થાળમાં ભરી શ્રીહરિની આગળ મૂકીને સમર્પણ કરી અને પુંજા નામની પોતાની ભાર્યા અને રાઘવજી પોતાના પુત્ર તથા પોતાના સગા મોટાભાઈ હીરજીભાઈની સાથે સુંદરજીતે શ્રીહરિની આરતી કરી. (૨૭) પછી સુંદરજી સાષ્ટાંગ પ્રણામ કરી બંને હાથ જોડી દર્શન કરવા યોગ્ય શ્રીહરિને જોતા સતા મહાઆનંદ યુક્ત અંતઃકરણવાળા થયા. (૨૮)

હે રાજન્ ! સુંદરજીત શ્રીહરિને જોતા સતા એકદમ જ સર્વોત્તમ સમાધિ પામ્યા. સમાધિમાં મહાતેજ સમૂહ જોવા લાગ્યા. તે ધામમાં વર્ણીવેશવાળા શ્રીહરિકૃષ્ણને જોતા હતા. (૨૯) ત્યાર પછી સુંદરજીત ગોલોકને જોતા હતા. તે ગોલોકમાં બ્રહ્મતેજમાં રહેલા રાસમંડળમાં ભગવાનની સાથે ક્રીડામાં ઉદ્યમયુક્ત રાધા-લક્ષ્મી વગેરે પોતાના ભક્તમંડળમાં શ્રીહરિકૃષ્ણ ભગવાનને વાંસળી વગાડતા જોતા હતા. (૩૦)

ત્યાર બાદ અવ્યાકૃત ધામમાં આઠ હાથવાળા, દર્શનીય, શેષરૂપી પલંગ ઉપર સૂતેલા ભૂમાપુરુષ રૂપી શ્રીહરિને જ જોતા હતા. (૩૧) અમૃત નામના શ્વેતદ્વીપમાં નિરન્ન એવા શ્વેત મુક્તોના સમૂહોએ સેવા કરાયેલા મહાપુરુષ રૂપી શ્રીહરિને જોતા હતા. (૩૨) પછી વૈકુંઠલોકમાં લક્ષ્મીજીએ સેવાયેલા વિષ્ણુરૂપે શ્રીહરિને જોતા હતા તેમજ ક્ષીરસાગરમાં શેષશાયી યોગેશ્વરરૂપે શ્રીહરિને જોતા હતા. (૩૩)

વહ્નિમંડળમાં સ્રુક્ સ્રુવાદિ યજ્ઞોનાં ઉપકરણોથી જણાતા યજ્ઞનારાયણ રૂપે શ્રીહરિને સુંદરજીતે સમાધિમાં જોયા. સૂર્યના મંડળમાં હિરણ્યમય પુરુષરૂપે શ્રીહરિને જોયા. (૩૪) પછી બદરિકાશ્રમમાં નરનારાયણરૂપે શ્રીહરિને જોયા. ત્યાર પછી પહેલાંની માફક વર્ણીવેશવાળા શ્રીહરિને સુંદરજીતે જોયા. (૩૫) ત્યાર પછી આ કહેલું સમગ્ર ઐશ્વર્યયુક્તપણું હોવાથી મહાસમર્થ-પ્રભુ શ્રીહરિના જોવા માત્રથી સમાધિથી બહાર આવેલા સુંદરજીત શ્રીહરિને સર્વકારણ જાણીને સાષ્ટાંગ પ્રણામ કરી પરમ હર્ષપૂર્વક સ્તુતિ કરવા લાગ્યા. (૩૬)

**સુંદરજીત બોલ્યા** : હે સર્વથી પર અક્ષરધામાધિપતિ ! હે ગોલોકધામના અધિપતિ ! હે કૃષ્ણ ! હે ભગવન્ ! તમો કાળમાયાના નિયંતા છો માટે જ પ્રધાન પુરુષાદિક સર્વના નિયંતા, સર્વથી પર અક્ષરબ્રહ્મથી પણ પર, દિવ્યાકૃતિ, સ્વયંપ્રકાશ, સર્વાત્મા (સર્વના અંતર્યામી) અણિમાદિ સમગ્ર ઐશ્વર્યોએ સેવા કરાયેલાં છે ચરણકમળ જેમનાં એવા પુરુષોત્તમ (અપરિમિત બદ્ધ-મુક્ત સંજ્ઞાવાળા ક્ષર અને અક્ષર પુરુષોથી સર્વપ્રકારે ઉત્તમપુરુષ) છો. હે ભક્તજનોને ઈચ્છિત ફળ આપવામાં કલ્પતરુ સમાન વર્ણીવેશવાળા ! તમોને હું સર્વદા નમસ્કાર કરું છું. (૩૭)

**भूमाऽव्याकृतधाम्नि चामृतपदे त्वं वै महापूरुषो वैकुण्ठेऽपि च विष्णुरस्यथ पयोम्भोधौ च योगेश्वरः । वह्नौ यज्ञपतिर्हिरण्मयवपुश्चादित्यबिम्बान्तरे मेदिन्यां बदरीवनेऽपि च नरो नारायणो वर्तसे ॥३८॥ मायाकालयमादिभीतिशमन-प्रोढाश्रयः स स्वयं तत्तद्धामसमग्रशक्त्यनुचरस्वैश्वर्यवृन्दैः सह । जातो न्राकृतिरत्र वै करुणया कल्याणहेतोर्नृणां तत्तद्दिव्यवपुः समाधिषु नरान् सन्दर्शयन् राजसे ॥३९॥** सुव्रत उवाच-**एवं स्तुत्वा पुनर्नत्वा निजभ्रातृसुतादिभिः । तमार्चिचद्यथावच्च पृथक्पृथगुदारधीः ॥४०॥ उपहारैर्महद्भिस्ते तमभ्यर्च्यातिभावतः । पृथक् पृथक् स्तुवन्ति स्म साक्षाद्दृष्टतदोजसः ॥४१॥ विरुद्धद्धर्मखण्डनं विशुद्धबुद्धिमण्डनं सकोपलोभतण्डनं रसस्पृहावकण्डनम् । कुसङ्गसङ्गिदण्डनं सदाभिमानिभण्डनं कुवर्त्ममूलकुण्डनं सकाममोहमुण्डनम् ॥४२॥ सदीश ! विश्वकारणं प्रपन्नजीवतारणं निजान्तरारिमारणं समग्रधर्मधारणम्। भवन्तमूर्मिदारणं विकारहेतुवारणं कृपारसप्रसारणं नमामि दुःखहारणम् ॥४३॥ जय जय धर्मधुरन्धर ! सन्नतकन्धरवर्णिपुरन्दरसेवित ! सुन्दरमन्दिरवास ! सुखाधिपते ! । जयजय लोकविलक्षणबोधविचक्षण ! लक्षितलक्षण! भक्तसुरक्षण ! पद्मदलेक्षण ! कुम्भिगते ! ॥ जय जय निर्मदनन्दन ! शर्मदवन्दन ! नाशितबन्धन ! दुष्कृतरन्धन ! बोधसमिन्धननामतते ! । जय जय सन्मतिजोषण ! कापथरोषण ! सत्पथपूषण ! सज्जनभूषण ! दूषणमुक्त !**

---

હે હરે ! અવ્યાકૃત ધામમાં તમો ભૂમા પુરુષ છો, અમૃતપદ વાચ્ય શ્વેતદ્વીપમાં તમો મહાપુરુષ છો, વૈકુંઠમાં તમો વિષ્ણુ છો, ક્ષીરસાગરમાં તમો યોગેશ્વર છો, અગ્નિમંડળમાં તમો યજ્ઞનારાયણ છો, સૂર્યમંડળમાં તમો હિરણ્યમય પુરુષ છો અને ભારતભૂમિમાં બદરિકાશ્રમમાં તમો નરનારાયણ રૂપે બિરાજો છો. (૩૮)

માયા-કાળ-યમાદિના ભયને નાશ કરવામાં જેમનો આશ્રય મહાન છે એવા તમો તે તે ધામોમાં જે સમગ્ર શક્તિઓ રાધારમાદિ તથા અનુચરો જે શ્રીદામ-નંદ-સુનંદાદિ પાર્ષદો અને અણિમાદિ ઐશ્વર્યોના સમૂહોએ સહિત આ ભૂતળમાં સ્વાશ્રિત જનોને પોતાના નાના પ્રકારના દિવ્યાકાર બતાવતા થકા તમો સર્વોત્તમપણે શોભો છો. (૩૯)

**સુવ્રત મુનિ કહે છે :** હે રાજન્, ઉદાર બુદ્ધિવાળા સુંદરજીત શ્રીહરિની સ્તુતિ કરીને ફરીથી નમસ્કાર કરી પોતાના ભાઈ હીરજી તથા પોતાના પુત્ર રાઘવજી વગેરે પોતાનાં સંબંધીજનો પાસે જુદી જુદી, શાસ્ત્રવિધિ પ્રમાણે શ્રીહરિની પૂજા કરાવતા હતા. (૪૦) સુંદરજીતના ભાઈઓ વગેરે સાક્ષાત્ જોયું છે શ્રીહરિનું ઐશ્વર્ય જેમણે એવા સતા મહાઉપચારો જે ચંદન, પુષ્પના હારો, વસ્ત્રો અને આભૂષણો વડે અતિ પ્રેમપૂર્વક શ્રીહરિને પૂજીને ભિન્ન ભિન્ન સ્તુતિ કરતા હતા. (૪૧)

હે હરે ! સત્શાસ્ત્રથી વિરુદ્ધ-નાસ્તિક મતનું ખંડન કરનારા, આપના ભજનથી વિશુદ્ધ બુદ્ધિવાળાઓને ધર્મ-જ્ઞાન-વૈરાગ્ય-ભક્તિ આદિ સદ્‌ગુણોથી શોભાડતા, ક્રોધે સહિત લોભનો તાડનપૂર્વક નાશ કરનારા, રસમાં આસક્તિને છેદનારા, કુસંગીઓનો સંગ જેમને છે એવાને શિક્ષા કરનારા, હંમેશા અભિમાનીજનોને નિંદાએ સહિત ઠપકો આપનારા, વામ વગેરે અસત્‌માર્ગોને દાહ આપનારા, કામે સહિત મોહને મૂળે સહિત નાશ કરનારા; (૪૨) હે સત્પુરુષોના પતિ ! વિશ્વના કારણ, (અનેક બ્રહ્માંડોની ઉત્પત્તિ, સ્થિતિ અને લય કરનારા) પોતાને શરણે આવેલા જીવોને સંસારસાગરથી તારનારા, સ્વાશ્રિત જનોના અંતઃકરણના કામ-ક્રોધ-લોભાદિ શત્રુઓને મારનારા, સમગ્ર ધર્મને ધારણ કરનાર, સ્વાશ્રિતોની ભૂખ, તરસ, શોક, મોહ, જરા, મૃત્યુ : આ છ ઊર્મિઓજન્ય દુઃખને નિવારણ કરનારા, વિકારમાં કારણભૂત શબ્દાદિ પંચ ગ્રામ્ય વિષયોનું નિવારણ કરનારા, કૃપારસને વિસ્તારનારા, અધ્યાત્માદિ ત્રિવિધ તાપોને નાશ કરનારા એવા તમોને વારંવાર નમસ્કાર કરું છું. (૪૩) હે ધર્મકુંવર ! એકાંતિક ધર્મની ધુરાને ધારણ કરનાર, વિનયથી નમતી ડોકવાળા શ્રેષ્ઠ નૈષ્ઠિક બ્રહ્મચારીઓથી સેવાયેલા, સુંદરજીતના મંદિરમાં નિવાસ કરનારા અથવા રમણીય મંદિરમાં વાસ કરનારા, સુખના સ્વામી હે હરે ! તમો સર્વોત્કર્ષ આવિર્ભાવ પ્રગટ કરો. જનોને વિલક્ષણ બોધ આપવામાં નિપુણ, જેમનાં ચરણ કમળમાં પ્રત્યક્ષપણે જોવાયેલા પરમેશ્વરપણાના બોધક ઊર્ધ્વરેખાદિ સોળ ચિહ્નો છે એવા, એકાંતિક ભક્તોની રક્ષા કરનારા, કમળના પત્ર સમાન કર્ણપર્યંત નેત્રવાળા, ગજની માફક ગતિવાળા, વિદ્યાદિ ગુણજન્ય મદથી રહિત, સાધુજનોને આનંદ આપનારા,સુખને આપનારી વંદના (સ્તુતિ) જેમની છે એવા, નાશ પમાડ્યાં છે બંધનો જેમણે એવાં, પાપકર્મોને વિનાશ કરનારા, સન્માર્ગનું પોષણ કરનારા, સાધુપુરુષોને શોભાડનારા, દૂષણોથી હંમેશા રહિત, સાધુજનોમાં પોતાના મનની પ્રીતિવાળા અથવા



**પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર**

सदात्मरते! ॥४४॥ जयजय कष्टविभञ्जन ! नित्यनिरञ्जन ! मुक्तसुरञ्जन ! चारुविलोचन ! बद्धविमोचन ! मुक्तपते ! । जयजय जीवदयाकर ! बोधसुधाकर ! योगकलाधर ! भक्तमहादर ! काममनोहर ! भक्तपते ! ॥ जयजय मन्दविखेदन ! दम्भविभेदन ! पापविनाशन ! धर्मविकाशन ! कामितदाशन ! भुक्तिपते ! । जयजय सन्ततसङ्गतदिक्पतिसन्नत ! विश्वपवन्दित ! नन्दितपण्डित ! खण्डितसंशय ! मुक्तिपते ! ॥४५॥ पूर्णेन्दुबिम्बनखमण्डल-राजिराजच्छुभ्रांशुकान्तिहृतभक्तहृदन्धकारम् । निःश्रेयसैकनिलयं लसदूर्ध्वरेखं पादाम्बुजं तव नमामि हरे ! प्रसीद ॥४६॥ सुव्रत उवाच-इति स्तुत्वा हरिं भक्त्या निषेदुस्ते प्रणम्य तम् । भुक्तिं मुक्तिं च यच्छन्तं विना साधनसम्पदम् ॥४७॥ ततः सर्वेऽपि गृहिणः स्वस्वशक्त्यनुसारतः । पूजां विदधिरे तस्य वासोभूषाधनादिभिः ॥४८॥ पूजां विधाय तन्मूर्तिं पश्यन्तः सकला अपि । भक्ताः प्रपेदिरे सद्यः समाधिं तत्कृपाबलात् ॥४९॥ तत्र गोलोकमुख्येषु दिव्यधामसु संस्थितम् । तमेव ददृशुः साक्षात्सच्चिदानन्दविग्रहम् ॥५०॥ आनन्दं परमं सर्वे प्राप्य तं परमेश्वरम् । असंशयं च निश्चिक्युस्तत्पदृढसमाश्रयाः ॥५१॥ ततो बद्धाञ्जलिपुटा वीक्षमाणास्तदाननम् । सर्वे ते प्रार्थयामासुर्भक्तचिन्तामणिं प्रभुम् ॥५२॥

---

નિરંતર સ્વસ્વરૂપમાં પ્રીતિવાળા હે હરે ! તમો જયકારી પ્રવર્તો, જયકારી પ્રવર્તો. (૪૪) પોતાના ભક્તોની આપત્તિઓને નાશ કરનારા, હંમેશાં માયાના અંજનથી રહિત, (નિત્યમુક્ત) પોતાની ઉપાસનાથી મુક્તભાવને પામેલાઓને પોતાના આત્મામાં અનુરાગયુક્ત કરનારા, સુંદર નેત્રોવાળા, અનાદિ માયાનાં બંધનોથી મુકાવનારા, અક્ષરધામમાં રહેલા અનંત મુક્તોના સ્વામી, જીવોની ઉપર દયા કરનારા, જ્ઞાનોપદેશથી ચંદ્રની માફક આનંદ આપનારા, સાંખ્યયોગ-પાતંજલ યોગ અને ભક્તિયોગની નાના પ્રકારની યુક્તિઓને ધારણ કરનારા, પોતાના એકાંતિક ભક્તોમાં મહાપ્રીતિવાળા, પોતાના અતિશય લાવણ્યથી કામદેવના મનને હરનારા, સ્વાશ્રિત જનોના નિયામક, મૂર્ખજનોને અજ્ઞાનથી વિશેષપણે ખેદ કરનારા, દંભી જનોને ભેદનારા, પાપરૂપ અધર્મને વિનાશ કરનારા, વર્ણાશ્રમોના વેદમાં કહેલા ધર્મોને વિશેષપણે પ્રકાશ કરનારા, સ્વભક્તને ઈચ્છિત આપનારા, નાના પ્રકારના દિવ્ય ભોગોના પતિ એવા હે શ્રીહરે ! તમો જયકારી પ્રવર્તો, જયકારી પ્રવર્તો. હંમેશાં પોતાનું દુઃખ નાશ કરવા માટે આવેલા જે દિશાઓના અધિપતિઓએ પોતાના મુગટોની અણિઓથી ચરણના પીઠનો સ્પર્શપૂર્વક પ્રણામ કરાયેલા, વિશ્વનું રક્ષણ કરનાર બ્રહ્મા-વિષ્ણુ અને શંકર વગેરેથી વારંવાર સ્તુતિ કરાયેલા, શાસ્ત્રના સિદ્ધાંતોના ઉપદેશથી આનંદ પમાડ્યા છે પંડિતો જેમણે એવા, યથાર્થ જ્ઞાનોપદેશથી નાશ પમાડ્યાં છે પોતાના ભક્તોના હૃદયમાં રહેલા સંશયરૂપી શલ્યો જેમણે એવા, પોતાના ભક્તોની ઈચ્છાનુસારે સાલોક્યાદિ મુક્તિઓ અને તેથી અતિ ઉત્તમ-બ્રહ્મભાવથી પોતાની સેવારૂપ મુક્તિને આપનારા હે શ્રીહરે ! તમો જયકારી પ્રવર્તો, જયકારી પ્રવર્તો. (૪૫)

હે હરે ! શરદ ઋતુના પૂર્ણ ચંદ્રના બિંબની માફક જે નખનાં મંડળોની પંક્તિઓમાં શોભતી ચંદ્રની કાંતિથી નાશ કર્યો છે ધ્યાન કરનારા ભક્તોના હૃદયમાં રહેલો અંધકાર જેણે એવા કલ્યાણોના એકસ્થાનરૂપ, શોભાયમાન ઊર્ધ્વરેખા જેમાં છે એવા તમારા ચરણકમળને પ્રણામ કરું છું. તમો પ્રસન્ન થાઓ. (૪૬)

**સુવ્રત મુનિ કહે છે** : હે રાજન્ ! તપ આદિ સાધન સામગ્રી વિના ભુક્તિ = દિવ્યભોગનાં સુખો અને મુક્તિ = પોતાના દાસપણાનાં સુખો પોતાના ભક્તોને આપતા તે શ્રીહરિને ભક્તિથી આ પ્રમાણે સ્તુતિ કરીને સુંદરજીત તથા તેમના ભાઈઓ વગેરે શ્રીહરિને પ્રણામ કરી શ્રીહરિની સમીપમાં બેઠા. (૪૭)

પછી બીજા સર્વ ગૃહસ્થ ભક્તો પણ પોતપોતાની શક્તિ પ્રમાણે વસ્ત્રો, આભૂષણો અને ધન વગેરેથી શ્રીહરિની પૂજા કરતા હતા. (૪૮) સમગ્ર ગૃહસ્થ ભક્તો પણ પૂજા કરીને શ્રીહરિની મૂર્તિને આદરપૂર્વક જોતા સતા શ્રીહરિની કૃપાથી તત્કાળ સમાધિ પામ્યા. (૪૯)

સમાધિમાં ગોલોક-વૈકુંઠ વગેરે દિવ્ય ધામોમાં રહેલા સત્ ચિત્ અને આનંદમય મૂર્તિ પ્રત્યક્ષ શ્રીહરિને જ સર્વે ભક્તો જોતા હતા. (૫૦) સર્વે ભક્તો સર્વોત્તમ સમાધિમાં શ્રીહરિના દર્શનના સુખનો અનુભવ કરી સમાધિમાંથી ઊઠીને શ્રીહરિને વિષે સંશયે રહિત 'આ પરમેશ્વર જ છે' એવો નિશ્ચય કરતા હતા. પછી શ્રીહરિના ચરણ કમળમાં દૃઢ આશ્રયવાળા થયા. (૫૧) પછી સર્વે ભક્તો બંને હાથ જોડી શ્રીહરિના મુખકમળને જોઈને ચિન્તામણિની માફક ભક્તમનોરથોને પૂર્ણ કરનાર શ્રીહરિને પ્રાર્થના કરતા હતા. (૫૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

विभो ! भवाभिधाम्बुधौ धनादिगर्धनभ्रमभ्रमत्कलत्रपुत्रमित्रनक्रचक्रकर्षणे । षडन्तरङ्गदुर्हृदुत्तरङ्गपातमज्जने नृदेहनावि खिद्यतस्त्वमेव कर्णधारकः ॥५३॥ यदीयनाममात्रमुच्चरन्तमुद्भटा भटा यमस्य यान्त्युदस्य दूरतोऽन्तकाल एकदा । भवन्तमेव तं मतं सतां च सन्ततं नता वयं भजामहे हरे ! जय त्वमुद्धराधमान् ॥५४॥ सुव्रत उवाच-इति संस्तूय ते भक्ता निजस्वामिनमादरात् । नत्वोपविविशुः सर्वे प्राप्तानन्दभरा नृप ! ॥५५॥ भक्तैरर्थापितं स्वस्मै वासोभूषाधनादि यत् । विप्रेभ्यस्तत्सर्वमपि हरिः सद्यः प्रदत्तवान् ॥५६॥ तद्दृष्ट्वा विस्मयं प्रापुरसुरा अपि तद्द्विषः । वशेष्टदेवः कोऽप्येष महानिति च तेऽविदन् ॥५७॥ ततः प्रातर्हरिर्विप्रांस्त्यागिनश्च सहस्रशः । भोजयामास विप्रेभ्यो ददौ विपुलदक्षिणाः ॥५८॥ एवं हि पौराः पुरुषोत्तमस्य साक्षात्समीक्षार्चनसेवनैश्च । चक्रुः स्वकीयं सफलं नृजन्म क्षमादयानीरनिधेर्धरेश ! ॥५९॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे रामनवम्युत्सवे सुन्दरजिदादिकृतहरिस्तुतिनिरूपणनामाऽष्टादशोऽध्यायः ॥१८॥

सुव्रत उवाच-पुरे तत्र त्रयोऽमात्या राज्ञ आसन् द्विजातय : । कुबेरजिज्जगज्जीवो रामचन्द्र इति श्रुताः ॥१॥ सनाभयो महाशाक्ता एतेऽर्जितमहाधनाः । मदोद्धता मानिनश्च हिंस्रयज्ञप्रियाः खलाः ॥२॥

---

હે વિભો ! જેને વિષે ધન વગેરેની પ્રાપ્તિની અભિલાષારૂપી ઘણા ચક્રાકાર ભમરાઓ પડે છે અને સ્ત્રી, પુત્ર, મિત્રાદિ રૂપ બહુ મગર ચોતરફ આકર્ષણ કરનારા જેમાં છે; છ સંખ્યાવાળા (કામ, ક્રોધ, લોભ, મોહ, માન, મત્સર) અંતઃશત્રુરૂપ ઊછળતા તરંગોના ઉપર પડવાથી જેમાં બૂડી જવાય એવા સંસાર નામના સમુદ્રમાં વર્તમાન મનુષ્ય-શરીરરૂપી નૌકામાં હંમેશાં ફરવાથી ખેદ પામેલા જનને નાવિકની માફક સામે કિનારે લઈ જનાર તમો જ છો. અર્થાત્ સંસારસાગરમાંથી ઉદ્ધાર કરી પોતાના ભક્તજનોને અવિનાશી સુખ આપવા પૂર્વક પોતાના ધામને પમાડનાર તમો જ છો. (૫૩)

હે હરે ! અતિ કઠોર યમના કિંકરો, દેહના અવસાન સમયે એક વાર જેના નામ માત્ર કૃષ્ણ - હરિકૃષ્ણ - નારાયણ -સ્વામિન્ - સ્વામિનારાયણ વગેરે ઉચ્ચારણ કરતા જનને પરિત્યાગ કરી દૂર જાય છે. સત્પુરુષો, સત્શાસ્ત્રના અનુભવમાં પ્રવીણ મુક્તાનંદાદિ મહાબુદ્ધિશાળી સાધુપુરુષોએ પુરુષોત્તમ માનેલા તમોને અમો પ્રણામ કરવા પૂર્વક નિરંતર જ ભજીએ છીએ. તમો સર્વોત્કર્ષપણે જયકારી પ્રવર્તો. અધમજનોનો સંસારસાગરથી ઉદ્ધાર કરો. (૫૪) **સુવ્રત મુનિ કહે છે** : હે રાજન્ ! તે સર્વે ભક્તો આ પ્રમાણે પોતાના ઈષ્ટદેવ શ્રીહરિની આદરપૂર્વક સ્તુતિ કરી નમસ્કાર કરી જેમણે પ્રાપ્ત કર્યો છે આનંદસમુદાય એવા થકા શ્રીહરિની સમીપમાં બેઠા. (૫૫)

પછી શ્રીહરિએ સુંદરજીત વગેરે ભક્તોએ પોતાને પૂજામાં અર્પણ કરેલાં વસ્ત્ર, આભૂષણ, ધન વગેરે તત્કાળ જ બ્રાહ્મણોને આપ્યાં. (૫૬) શ્રીહરિનો દ્વેષ કરનારા અસુરો પણ આ પ્રમાણે શ્રીહરિએ બ્રાહ્મણોને પોતાની પૂજાની ભેટો સમગ્રપણે અર્પણ કરેલી જોઈને આશ્ચર્ય પામ્યા. તે અસુરો શ્રી નારાયણમુનિને 'આમને આધીન કોઈક ઈષ્ટદેવ વર્તતા હોય તેવા આ કોઈક મહાપુરુષ છે' એમ જાણતા હતા. (૫૭) પછી શ્રીહરિ દશમીના પ્રાતઃકાળમાં હજારો બ્રાહ્મણો અને ત્યાગી-બ્રહ્મચારી તથા સાધુઓને સુંદર ભોજનોથી તૃપ્ત કરતા હતા. અને બ્રાહ્મણોને ઘણી દક્ષિણા આપતા હતા. (૫૮)

હે પૃથ્વીપતિ ! આ પ્રમાણે ક્ષમા અને દયાના સાગર, જે પ્રત્યક્ષ પુરુષોત્તમ શ્રીહરિ તેમના સંદર્શન-અર્ચન અને પરિચર્યાથી ભુજનગરના નિવાસી ભક્તોએ પોતાનો મનુષ્યદેહ સાર્થક કર્યો. (૫૯) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે રામનવમ્યુત્સવે સુંદરજીતાદિકૃતહરિસ્તુતિ નિરૂપણનામાઽષ્ટાદશોઽધ્યાયઃ (૧૮)*

## અધ્યાય : ૧૯

**સત્શાસ્ત્રાનુસારી સત્પુરુષોનાં વાક્યોથી અહિંસામય સદ્ધર્મનું સંસ્થાપન તથા (જગજીવનાદિની માફક) શ્રીહરિના વાક્યના અતિક્રમણથી મનુષ્યોને સર્વનાશ કરનારો અત્યંત અનર્થ કહેલો છે.**

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! તે ભુજનગરમાં કુબેરજી, જગજીવન અને રામચંદ્ર નામે પ્રસિદ્ધ એવા ત્રણ બ્રાહ્મણો રાજાના કારભારીઓ હતા. (૧) કુબેરજી વગેરે ત્રણેય પણ સગા ભાઈઓ દેવી ભક્તોમાં અતિ મોટા, જેમણે ઘણું ધન સંપાદન કર્યું છે એવા અને વિદ્યાદિ મદથી ઉન્મત્ત થયેલા, મહા અભિમાનવાળા તથા પશુહિંસા પ્રધાન યજ્ઞો જેમને પ્રિય છે એવા અધમ હતા. (૨)

तत्र ज्येष्ठः सोमयागं कर्तुं सौत्रामणिं तथा । आरेभे भूरिसम्भारान्सम्पाद्य नृपदुर्लभान् ॥३॥ देशान्तरेभ्यो बहवो ब्राह्मणा यज्ञकोविदाः । शास्त्रज्ञाश्चागतास्तत्र तेनाहूता बहुश्रुताः ॥४॥ स च नारायणमुनिं वेदशास्त्रार्थपारगम् । जानन्भूरिप्रतापं च यज्ञमण्डप आह्वयत् ॥५॥ अनाहूतोऽध्वरं गच्छेदाहूतः किं पुनस्तदा । इति स्मृतेः स्वयं स्वामी सह शिष्यैस्तमभ्यगात् ॥६॥ यथार्हं मानयित्वा तं यजमानः शुभासने । उपवेश्याग्रतस्तस्य निषसाद प्रणम्य च ॥७॥ देशान्तरीया विद्वांसस्तद्देशीयाश्च सर्वशः । नत्वा तं चाग्रतो राजन्निषेदुर्वह्निवर्चसः ॥८॥ उपविष्टेषु सर्वेषु यथार्हं तत्र संसदि । कुबेरजित्तं प्रणम्य प्रोवाच प्राञ्जलिर्वचः ॥९॥ स्वामिंस्त्वं वेदशास्त्रार्थपारगोऽसि बृहद्व्रतः । समाप्त्यवधि यज्ञस्य स्थातुमत्र पुरेऽर्हसि ॥१०॥ सानुगस्य तवान्नाद्यैरहं तावच्च सेवनम् । करिष्यामि त्वादृशा हि महायज्ञस्य भूषणम् ॥११॥ इह हि ब्राह्मणा वर्णिन् ! नानादेशेभ्य आगताः । सन्त्येते वेदशास्त्रज्ञाः पात्रभूताः कुलोद्भवाः ॥१२॥ काश्याः केचिद्द्राविडाश्च महाराष्ट्राश्च केचन । केचिच्च गौडदेशीयाः सन्ति केचिच्च गौर्जराः ॥१३॥ अतस्त्वमपि सद्बुद्धे ! वसात्र स्थिरमानसः । एष एवास्ति सर्वेषामस्माकं हि मनोरथः ॥१४॥ सुव्रत उवाच-श्रुत्वेति तस्य वचनं तत्र बद्धानजान् बहून् । वध्यांश्च क्रोशतः पश्यन् दयालुर्हरिरब्रवीत् ॥१५॥ श्रीनारायणमुनिरुवाच-शृणु त्वं सानुजो विप्र ! शृण्वन्त्वन्ये च वाडवाः । हितं वदामि सर्वेषां युष्माकं धर्मचारिणाम् ॥१६॥ सज्जनो न सभां गच्छेद्गतश्चेत्प्रवदेदृतम् । अब्रुवन्विब्रुवन्वापि पापी स्यात्तद्ब्रवीम्यृतम् ॥१७॥ साक्षात्पशालम्भहीनः सर्वेषामुचितो मखः । ब्राह्मणानां विशेषेण सात्त्विकानां तथा नृणाम् ॥१८॥

તે ત્રણમાં મોટાભાઈ કુબેરજીએ રાજાઓને પણ પ્રાપ્ત ન થઈ શકે એવી પ્રચુર સામગ્રી સંપાદન કરી સોમયાગ તથા સૌત્રામણિ યજ્ઞ કરવા માટે આરંભ કર્યો. (૩) કુબેરજીએ બોલાવેલા, યજ્ઞવિધિમાં પ્રવીણ તથા સર્વ શાસ્ત્રોને જાણનારા અને સાંભળ્યા છે પુરાણાદિ ઘણા ગ્રંથો જેમણે એવા બહુશ્રુત ઘણા બ્રાહ્મણો નાના પ્રકારના દેશોથી યજ્ઞમાં આવ્યા. (૪) કુબેરજીએ નારાયણ મુનિને વેદશાસ્ત્રના અર્થોના પારંગત અને ખૂબજ પ્રતાપવાળા જાણીને યજ્ઞમાં બોલાવ્યા. (૫)

ન બોલાવે તોપણ યજ્ઞમાં જવું તો બોલાવવાથી યજ્ઞમાં જાય તેમાં શું કહેવું ? 'अनाहूतोऽध्वरं गच्छेदाहूतः किं पुनस्तदा' એવી સ્મૃતિ છે માટે સ્વયં શ્રીહરિ વર્ણીસાધુઓ વગેરે શિષ્યોની સાથે યજ્ઞમંડપમાં ગયા. (૬) યજમાન કુબેરજી બ્રાહ્મણ, આવેલા શ્રી નારાયણમુનિને યથાયોગ્ય સત્કાર કરી, તે શ્રીહરિને બેસવા યોગ્ય શુભ આસનમાં બેસાડી, નમસ્કાર કરીને શ્રીહરિની આગળના ભાગમાં બેઠા. (૭)

હે રાજન્ ! અગ્નિની માફક તેજસ્વી, અન્ય દેશોથી આવેલા અને કચ્છ દેશના સર્વ પંડિત બ્રાહ્મણો તે શ્રીનારાયણમુનિને નમસ્કાર કરી તેમની આગળ બેઠા (૮) સર્વ બ્રાહ્મણો યજ્ઞસભામાં યથાયોગ્ય બેઠા ત્યારે કુબેરજી બંને હાથ જોડી શ્રીહરિને પ્રણામ કરીને વચન બોલ્યા : (૯)

હે સ્વામિન્ ! તમો નૈષ્ઠિકેન્દ્ર, વેદશાસ્ત્રના અર્થોના પારંગત છો માટે યજ્ઞની સમાપ્તિ પર્યંત આ નગરમાં નિવાસ કરવા યોગ્ય છો. (૧૦) હું ત્યાં સુધી વર્ણી-સાધુ આદિ આપના સેવકમંડળે સહિત તમારી અન્નદાન વગેરેથી સેવા કરીશ. કારણ કે તમારા જેવા પુરુષો યજ્ઞના આભૂષણ રૂપ છે. (૧૧)

હે વર્ણિન્ ! વેદશાસ્ત્રજ્ઞ, યોગ્યતાયુક્ત, સત્કુળમાં ઉત્પન્ન થયેલા આ બ્રાહ્મણો વિવિધ દેશોથી આ યજ્ઞમાં આવેલા છે. (૧૨) હે હરે ! કેટલાક બ્રાહ્મણો કાશીનિવાસી છે, કેટલાક દ્રાવિડ દેશના, કેટલાક મહારાષ્ટ્રના નિવાસી, કેટલાક ગૌડ દેશના છે અને કેટલાક ગુજરાતના છે. (૧૩) હે સદ્બુદ્ધે ! માટે તમો પણ સ્થિર મનથી આ પુરમાં નિવાસ કરો. અમારા બધાંનો આ જ મનોરથ નિશ્ચે છે. (૧૪)

હે રાજન્ ! કુબેરજીનું આવું વચન સાંભળીને તે યજ્ઞમાં વધ કરવા માટે બાંધેલા, ઊંચેથી બૂમો પાડતા ઘણા બકરાઓને જોતા સતા દયાળુ શ્રીહરિ બોલ્યા : (૧૫) હે વિપ્ર કુબેરજી ! નાના ભાઈઓ સહિત તમો સાંભળો. બીજા વિદ્વાન બ્રાહ્મણો સાંભળો. યજ્ઞાદિ ધર્માચરણમાં પ્રીતિવાળા તમો સર્વેનું હિત કહું છું. (૧૬)

સજ્જન પુરુષ સભામાં ન જાય. જો સભામાં જાય તો સત્ય બોલે, જાણતાં છતાં ના બોલે અથવા વિપરીત બોલે તો પાપી થાય. માટે સત્ય કહીશ. (૧૭) સર્વ બ્રાહ્મણો તથા સાત્ત્વિક ક્ષત્રિયાદિ મનુષ્યોને પણ સાક્ષાત્ પશુની હિંસા રહિત યજ્ઞ કરવો તેજ વિશેષપણે યોગ્ય છે. (૧૮)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

यज्ञशेषामिषप्राशः सहिंसे हि मखे भवेत् । स नोचितो ब्राह्मणानां धार्मिकाणां द्विजोत्तम ! ॥१९॥ आक्रोशतः पशोर्हिंसा प्रसभं तद्विदारणम् । अशक्यं द्रष्टुमपि वै ब्राह्मणैस्तु दयालुभिः ॥२०॥ एते विप्राः पात्रभूता इति वक्षि कुबेरजित् ! । त एते तत्कथं कर्म करिष्यन्त्यस्त्रपा इव ॥२१॥ तत्कृतौ पात्रतैतेषां ब्राह्मणत्वं च नङ्क्ष्यति । वृत्तं विना तदद्वयं तु न स्याद्भूरिश्रुतादिभिः ॥२२॥ अत्रार्थे स्मृतिवाक्यानि विप्र ! हेमाद्रिसूरिणा । सन्त्युद्धृतानि भूरीणि तेषां ते कतिचिद्ब्रुवे ॥२३॥ न जातिर्न कुलं राजन्न स्वाध्यायः श्रुतं न च । कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् ॥२४॥ किं कुलं वृत्तहीनस्य करिष्यति दुरात्मनः । कृमयः किं न जायन्ते कुसुमेषु सुगन्धिषु ॥२५॥ नैकमेकान्ततो ग्राह्यं पठनं हि विशाम्पते ! । वृत्तमन्विष्यतां तात ! रक्षोभिः किं न पठ्यते ॥२६॥ बहुना किमधीतेन नटस्येव दुरात्मनः । तेनाधीतं श्रुतं वापि यः क्रियामनुतिष्ठति ॥२७॥ कपालस्थं यथा तोयं श्वदृतौ च यथा पयः। दूष्यं स्यात्स्थानदोषेण वृत्तहीनं तथा श्रुतम् ॥२८॥ तस्माद्विद्धि महाराज ! वृत्तं ब्राह्मणलक्षणम् । चतुर्वेदोऽपि दुर्वृत्तः शूद्रादल्पतरः स्मृतः ॥२९॥ सत्यं दमस्तपो दानमहिंसेन्द्रियनिग्रहः । दृश्यन्ते यत्र राजेन्द्र ! स ब्राह्मण इति स्मृतः ॥३०॥

---

હે દ્વિજોત્તમ ! યજ્ઞનું શેષ માંસનું ભક્ષણ, હિંસાએ સહિત યજ્ઞમાં થાય; તે ધાર્મિક બ્રાહ્મણોને યોગ્ય નથી. (૧૯) આર્તનાદો કરતા અજાદિની, બલાત્કારે હિંસા અને મારેલા પશુની ચામડી વગેરેનું વિદારણ કરવું એ બે દયાળુ બ્રાહ્મણોએ તો જોવા માટે પણ અશક્ય છે. (૨૦) હે કુબેરજી, આ સભામાં બેઠેલા સર્વ બ્રાહ્મણો પાત્રભૂત છે એમ તમો કહો છો તો પાત્રભૂત બ્રાહ્મણો રાક્ષસોની માફક તે પશુહિંસા, પશુના અંગનું એ વિદારણ અને માંસ - ભક્ષણરૂપ ક્રિયા કયા પ્રકારથી આચરણ કરશે ? (૨૧) તેવા પ્રકારનું આચરણ કરે તો એ બ્રાહ્મણોની પાત્રતા વિનાશ પામશે. અને બ્રાહ્મણ ભાવ નાશ પામશે. વૃત્ત= સત્યાદિ સદાચરણ વિના તો પાત્રતા અને બ્રાહ્મણપણું એ બંને કેવળ બહુ શાસ્ત્રના અધ્યયનાદિથી પણ સિધ્ધ થાય નહિ. (૨૨)

હે વિપ્ર ! આ અર્થમાં હેમાદ્રિ નામના વિદ્વાને ઘણાં પુરાણ-ધર્મશાસ્ત્રાદિનાં વચનો ગ્રહણ કરેલાં છે. તે વાક્યોમાંથી કેટલાંક વાક્યો તમોને હું કહું છું. (૨૩)

હેમચન્દ્ર સમુદ્ધૃત સારમાં પ્રથમ **વહ્નિ પુરાણમાં કહેલું વાક્ય** કહે છે કે, હે રાજન્ ! બ્રાહ્મણપણામાં અત્યુત્તમ બ્રાહ્મણના ઘરમાં જન્મ કારણ નથી. સારું કુળ (ગોત્ર) કારણ નથી સ્વાધ્યાય (વેદાધ્યયન) નથી શાસ્ત્રાધ્યયન પણ કારણ નથી. પરંતુ સારું વૃત્ત એટલે કે સદાચાર જ બ્રાહ્મણપણામાં કારણ છે. (૨૪)

સારા વૃત્ત રહિત માટે જ દુરાત્મા પુરુષનું કેવળ કુળમાત્ર શું કરશે ? (કંઈ પણ કરી શકે નહિ !) સુગંધીમાન પુષ્પોમાં સૂક્ષ્મ કીડાઓ શું નથી ઉત્પન્ન થતા ? (ઉત્પન્ન થાય જ છે.) (૨૫) હે વિશાંપતે ! હે તાત ! કેવળ એક વેદાધ્યયન બ્રાહ્મણપણામાં સર્વ ભાવથી ગ્રહણ ન કરવું, માટે બ્રાહ્મણપણામાં સત્યાદિ વૃત્ત ખોળવું. વૃત્તથી જ બ્રાહ્મણપણું છે. બ્રાહ્મણપણામાં વેદાધ્યયન જ જો ગ્રહણ કરતા હોય, તો રાક્ષસો શું વેદ નથી ભણતા ? વેદ ભણેલા પણ (રાવણાદિ) બ્રાહ્મણો રાક્ષસ નામથી પ્રસિદ્ધ થયા છે પણ બ્રાહ્મણનામથી કોઈ પ્રસિદ્ધ થયા નથી. (૨૬)

નટની માફક વેષમાત્રથી હિંસાદિ પાપયુક્ત મનવાળા બ્રાહ્મણને ઘણા શાસ્ત્રાધ્યયનથી પણ શો અર્થ છે ? કંઈ પણ નથી. માટે જે બ્રાહ્મણ સત્યાદિ સદ્વ્રતનું આચરણ કરે છે તે બ્રાહ્મણે શાસ્ત્રનું અધ્યયન કર્યું જ છે. (૨૭)

જેમ સ્વતઃ પવિત્ર જળ મનુષ્યની ખોપરીમાં ભરેલું, તથા સ્વતઃ પવિત્ર દૂધ કૂતરાના ચામડાના પાત્રમાં ભરેલું; જેમ સ્થાનના દોષથી દૂષિત થાય છે તેવી રીતે સત્યાદિ વૃત્ત રહિત બ્રાહ્મણમાં રહેલું શાસ્ત્ર સ્થાનદોષથી દૂષિત થાય છે. (૨૮)

હે મહારાજ ! તેથી સત્યાદિ વૃત્ત જ બ્રાહ્મણપણાની પ્રાપ્તિમાં અસાધારણ લક્ષણ છે એમ જાણો. માટે ચાર વેદને ભણેલો બ્રાહ્મણ સત્યાદિ વૃત્તે રહિત (તેમજ હિંસાદિ દુરાચાર યુક્ત) હોય તો શૂદ્રથી પણ હલકો કહેલો છે. (૨૯) હે રાજેન્દ્ર ! સત્ય-દમ-તપ-દાન-અહિંસા-ઈન્દ્રિયોનો નિગ્રહ (ભોગનો સંકોચ) એ ગુણો જે બ્રાહ્મણમાં દેખાય છે તેજ બ્રાહ્મણ કહેલો છે. (૩૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

अहिंसानिरतो नित्यं जुह्वानो जातवेदसम् । स्वदारनिरतो दाता स वै ब्राह्मण उच्यते ॥३१॥ सत्यं दानं क्षमा शीलमानृशंस्यं दया घृणा । दृश्यन्ते यत्र लोकेऽस्मिंस्तं देवा ब्राह्मणं विदुः ॥३२॥ तपो धर्मो दमो दानं सत्यं शौचं श्रुतं घृणा । विद्या विनयमस्तेयमेतद्ब्राह्मणलक्षणम् ॥३३॥ यागस्तपो दया दानं सत्यं शौचं श्रुतं घृणा । विद्या विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम् ॥३४॥ ये क्षान्तदान्ताः श्रुतपूर्णकर्णा जितेन्द्रियाः प्राणिवधान्निवृत्ताः । प्रतिग्रहे सङ्कुचिताग्रहस्तास्ते ब्राह्मणास्तारयितुं समर्थाः ॥३५॥ क्षान्तिर्दान्तिर्दया सत्यं दानं शीलं तपः श्रुतम् । एतदष्टाङ्गमुद्दिष्टं परमं पात्रलक्षणम् ॥३६॥ न विद्यया केवलया तपसा वापि पात्रता । यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम् ॥३७॥ इत्यादीनि बहून्येव दयालुत्वेऽग्रजन्मनाम् । वाक्यानि सन्ति विप्रेन्द्र ! सन्तस्तानि च मन्वते ॥३८॥ यज्ञोऽयं भवता तस्माद्रहितः पशुहिंसया । कर्तव्यस्तेन सर्वेषां श्रेय एव भविष्यति ॥३९॥ एतादृशाः पात्रविप्रा यत्र स्युस्तत्र वाडव ! । मनसापि हि जीवानां स्याद्धिंसासम्भवः कथम् ॥४०॥ आक्रोशतः पशूनेतान्निबद्धान् पश्यतो मम । भृशं सञ्जायते खेदो मानसे हि दयावशात् ॥४१॥ अन्नैर्व्रीह्यादिभिर्यज्ञः पयोदधिघृतादिभिः । रसैश्च क्रियतां तेन तृप्तिं यास्यन्ति देवताः ॥४२॥ सात्विका देवताः प्रोक्तास्तामसा असुरास्तथा । राजसा मनुजाः शास्त्रे ह्यूर्ध्वाधोमध्यवासिनः ॥४३॥ मद्यमांसप्रिया दैत्यास्तामसत्वाद्भवन्ति च । देवास्तु सात्विका ब्रह्मन्नन्नाज्यादिरसप्रियाः ॥४४॥ देवानां यजनं मांसैरनापदि तु नोचितम् । सर्वथाऽन्नाद्यभावे तु कर्तव्यं तैरपि क्वचित् ॥४५॥

**યમસ્મૃતિમાં કહે છે :-** હંમેશાં અહિંસામાં પ્રીતિવાળો - નિત્ય અગ્નિમાં હોમ કરનારો, એક પત્નીવ્રતવાળો, યથાશક્તિ દાન આપનારો એવા પ્રકારનો જે હોય તે જ બ્રાહ્મણ કહેવાય છે. (૩૧) સત્ય, દાન, ક્ષમા, શીલ, ક્રૂરતાએ રહિતપણું, દયા, ઘૃણા : આ સદ્‌વૃત્તવાચ્ય ગુણો આ લોકમાં જે બ્રાહ્મણમાં દેખાય છે, દેવો તેને બ્રાહ્મણ કહે છે. (૩૨) તેવી રીતે **યમ-શાતાતપ બંને ઋષિઓ કહે છે :** તપ, વર્ણાશ્રમને યોગ્ય સદાચારરૂપી ધર્મ, દમ, દાન,સત્ય, શૌચ, શાસ્ત્રાધ્યયન, દયા, વિદ્યા, વિનય, અસ્તેય અને તપ આદિ બ્રાહ્મણનું લક્ષણ છે. (૩૩) **વસિષ્ઠ કહે છે :** યાગ, તપ, દાન, સત્ય, શૌચ, શ્રુત એટલે શાસ્ત્રાધ્યયન, ઘૃણા, વિદ્યા-શાસ્ત્રજન્ય જ્ઞાન, વિજ્ઞાન-પ્રત્યક્ષના અર્થનો અનુભવ, આસ્તિક્ય-પરલોકાદિમાં સત્યપણાની બુદ્ધિ : આ કહેલા-યાગાદિ લક્ષણવાળો બ્રાહ્મણ કહેવાય છે. (૩૪) ક્ષમાવાળા, ઈન્દ્રિયો - અંતઃકરણને વશ કરનાર જેમના કાન શાસ્ત્રશ્રવણથી પરિપૂર્ણ છે; જેમણે ઈન્દ્રિયો જીતેલાં છે, પ્રાણીના વધથી નિવૃત્તિ પામેલા; (યાગાદિમાં પણ જીવહિંસા નહિ કરનારા) અને દાનગ્રહણમાં જેમના હાથ સંકુચિત રહે છે એવા જે હોય તે બ્રાહ્મણો જ જનોનો સંસારથી ઉદ્ધાર કરવા માટે શક્તિમાન છે. (૩૫)

ક્ષમા, ઈન્દ્રિયોનો નિગ્રહ,દયા, સત્ય, દાન, શીલ, તપ, શ્રુત : આ આઠ અંગવાળાને સર્વોત્તમ **પાત્ર** કહેલું છે. (૩૬) **યાજ્ઞવલ્કય ઋષિ કહે છે :** કેવળ વિદ્યાથી પાત્રતા નથી. કેવળ તપથી પણ પાત્રતા નથી. જે બ્રાહ્મણમાં સત્યાદિ (પહેલાં કહ્યાં તે) વ્રત હોય અને તપ અને વિદ્યા બંને હોય તે બ્રાહ્મણ પાત્ર કહેલા છે. (૩૭)

હે બ્રાહ્મણોમાં ઉત્તમ કુબેરજી ! આ વગેરે ઘણાં વાક્યો બ્રાહ્મણોના દયાળુપણામાં છે. સદાચારનિષ્ઠ વિદ્વાનજનો તે વાક્યોને પ્રમાણપણે માને છે. (૩૮) માટે તમોએ આ યજ્ઞ પશુહિંસાએ રહિત કરવો. તેનાથી તમો સર્વ ઈચ્છિત ફળ રૂપી કલ્યાણને પામશો જ. (૩૯) હે વિપ્ર ! આ પૂર્વે કહેલા લક્ષણવાળા પાત્ર બ્રાહ્મણો જે યજ્ઞમાં હોય તે યજ્ઞમાં સંકલ્પમાત્રથી પણ અજાદિ પ્રાણીઓની હિંસાનો સંભવ જ ક્યાંથી હોય ? ન જ હોય. (૪૦)

આ યજ્ઞ સ્થાનમાં મરણના ત્રાસથી આક્રંદન કરતા બાંધેલા બકરા વગેરેને જોતા મારા મનમાં દયાના વશથી નિશ્ચે અત્યંત દુઃખ થાય છે. (૪૧) ડાંગર, જવ, ઘઉં, તલ વગેરે અન્નોથી તથા દૂધ, દહીં, ઘી-સાકર વગેરે રસોથી યજ્ઞ કરો. તેવો યજ્ઞ કરવાથી દેવતાઓ તૃપ્તિ પામશે જ.(૪૨)

ભાગવતાદિ શાસ્ત્રોમાં દેવોને સાત્ત્વિક પ્રકૃતિ પ્રધાનવાળા કહેલા છે તથા અસુરોને તામસ પ્રકૃતિ પ્રધાનવાળા કહેલા છે અને મનુષ્યોને રાજસ પ્રકૃતિ પ્રધાન કહેલા છે તે સર્વે અનુક્રમથી ઊર્ધ્વલોક-અધોલોક અને મધ્યલોકનિવાસી કહેલા છે. (૪૩) હે બ્રહ્મન્ ! અસુરો, તમોગુણ સ્વભાવ હોવાથી મદ્ય-માંસ પ્રિય હોય છે. સત્ત્વગુણ પ્રકૃતિવાળા દેવો તો ચોખા, ઘઉં, જવ વગેરે અન્ન અને દૂધ, દહીં, ઘી, સાકર વગેરે રસો પ્રિય જેમને છે એવા છે. (૪૪) દેશકાળાદિના વિષમપણાથી સર્વથા પોતાને ધન-ધાન્ય પુષ્કળ હોય, ત્યારે તો માંસથી દેવોનું યજ્ઞ દ્વારા પૂજન; યોગ્ય નથી. અન્નાદિના અભાવમાં ક્યારેક પોતાના પ્રાણ જવાના સમયમાં, માંસોથી પણ વિશ્વામિત્રની માફક પોતાના પ્રાણની રક્ષા માટે દેવપૂજન કરવું.(૪૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

नानान्नरससत्त्वेऽपि युष्माभिरापदं विना । क्रियते हिंस्त्रयज्ञोऽयं लोकशास्त्रविगर्हितः ॥४६॥ मोचयित्वा पशूनेतान् हव्यैश्चेत्पायसादिभिः । यूयं करिष्यथ मखं तर्हि स्थास्याम्यहं त्विह॥४७॥ सुव्रत उवाच-इति श्रुत्वा हरेर्वाक्यं साशङ्कं स द्विजोऽभवत् । केचिच्च सात्त्विका विप्राः सदित्येव स्म मन्वते ॥४८॥ जगज्जीवो महामानी तदा काश्यादिभिर्द्विजैः । रजस्तमःप्रकृतिभिः प्रेरितस्तादृशोऽब्रवीत् ॥४९॥ यज्ञार्थं पशवः सृष्टा इति वै वैदिकी श्रुतिः । यज्ञादन्यत्र ये घ्नन्ति पशूंस्तेऽतोऽसुरा मताः ॥५०॥ या वेदविहिता हिंसा न सा मता बुधैः । हिंस्त्रयज्ञास्ततो वर्णिन् ! कृताः पूर्वैः सहस्त्रशः ॥५१॥ पन्थानं वैदिकं प्रत्नं विधातुं कोऽन्यथा क्षमः । वयं वेदोक्तरीत्यैव करिष्यामोऽध्वरं किल ॥५२॥ सुव्रत उवाच-इति हिंसारुचेर्वेदतात्पर्यं चाविजानतः । श्रुत्वा तस्य वचः स्वामी पुनस्तद्धितमब्रवीत् ॥५३॥ श्रीनारायणमुनिरुवाच-नहि वेदस्य तात्पर्यं हिंसायां वर्तते द्विज ! । किन्तु रागप्राप्तहिंसासङ्कोचे सर्वथैव हि ॥५४॥ राजसानां तामसानां स्वाभाविक्येव वर्तते । प्रवृत्तिर्जीवहिंसायां चोदना नास्ति तत्र वै ॥५५॥ हिंसायां यदि रागः स्यात्कार्या सा तर्हि तु क्रतौ । इति वेदो वदन् हिंसां सङ्कोचयति वाडव ! ॥५६॥ निवृत्तावेव तात्पर्यं वर्तते निगमस्य हि । कृतोऽस्ति निर्णयश्चास्य श्रीमद्भागवते शृणु ॥५७॥ लोके व्यवायामिषमद्यसेवा नित्यास्तु जन्तोर्नहि तत्र चोदना । व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा ॥५८॥ परोक्षवादो वेदोऽयं बालानामनुशासनम् । कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा ॥५९॥ हिंसापरं ततो वेदं मा

---

વિવિધ પ્રકારનાં અન્નો તથા રસો હોવા છતાં પણ, (આપત્કાળ પડ્યા વિના પણ તમોએ લોક અને શાસ્ત્રનિંદિત આ હિંસામય યજ્ઞ કરાય છે તે યોગ્ય નથી. (૪૬) જો તમો આ પશુઓને છોડી મૂકીને પાયસાદિ હુત દ્રવ્યોથી યજ્ઞ કરશો, તો જ અમો આ પુરમાં રહીશું. એમ નહિ થાય તો રહીશું નહિ. (૪૭) **સુવ્રત મુનિ કહે છે** : હે રાજન્, આ પ્રકારે શ્રીહરિનું વચન સાંભળી તે કુબેરજી બ્રાહ્મણ આશંકા યુક્ત થયો. કેટલાક સાત્ત્વિક બ્રાહ્મણો ‘શ્રીહરિએ સત્ય કહ્યું છે’ આ પ્રમાણે જાણતા હતા. (૪૮) તે સમયે રજોગુણ, તમોગુણ સ્વભાવવાળા કાશીના બ્રાહ્મણો તથા મહારાષ્ટ્ર-દ્રાવિડના બ્રાહ્મણોએ પ્રેરણા કરાયેલો; તેવા પ્રકારના સ્વભાવવાળો, મહામાની જગજીવન શ્રીહરિને કહેવા લાગ્યો : (૪૯)

હે હરે ! અજાદિ પશુઓ યજ્ઞ માટે સર્જેલાં છે આવી વેદની શ્રુતિ છે માટે યજ્ઞ વિના પશુઓનો નાશ કરે તે પુરુષો અસુરો માનેલા છે. (૫૦) હે વર્ણિન્ ! ‘વેદવિહિત જે હિંસા તેને (મનુ વગરે) બુધજનોએ હિંસા માનેલી નથી. તેથી જ પૂર્વકાળને વિષે રાજા વગેરેએ હજારો, પશુહિંસામય યજ્ઞો કરેલા છે. (૫૧) વેદોક્ત પુરાતન માર્ગને અન્ય પ્રકારે (મિથ્યા કરવા) કોણ સમર્થ થાય? માટે અમો વેદોક્ત રીતિથી જ યજ્ઞ કરીશું. (૫૨) હે રાજન્ ! હિંસામાં પ્રીતિવાળા તેમજ વેદનું તાત્પર્ય નહિ જાણનારા જગજીવનનું વાક્ય સાંભળી શ્રી સહજાનંદ સ્વામી ફરીથી જગજીવનનું હિતકારી વચન બોલ્યા : (૫૩)

હે દ્વિજ ! વેદનું તાત્પર્ય હિંસામાં નથી, પરંતુ રાગપ્રાપ્ત હિંસાના સંકોચમાં; સર્વ પ્રકારે નિશ્ચે તાત્પર્ય છે. (૫૪) રજોગુણવાળા અને તામસ પ્રકૃતિવાળાને સ્વાભાવિકી જીવહિંસામાં પ્રવૃત્તિ છે, વિધિવાક્યથી તેમાં પ્રેરણા નથી. (૫૫)

હે વિપ્ર ! જો હિંસામાં અનુરાગ હોય તો તે હિંસા યજ્ઞમાં કરવી : આ પ્રમાણે વેદ બોલતા સતા હિંસાનો સંકોચ કરે છે. (૫૬) વેદનું તાત્પર્ય ધીમે ધીમે સંકોચપૂર્વક હિંસાની નિવૃત્તિમાં જ છે. આ મારો કહેલો નિર્ણય શ્રીમદ્ભાગવતમાં કહેલો છે તેને સાંભળો : (૫૭) લોકમાં મનુષ્યમાત્રને મૈથુન-માંસ-મદ્યનું સેવન તો, રાગથી પ્રાપ્ત છે. પણ તેમાં વિધિ નથી. મૈથુનાદિમાં **વ્યવસ્થા** કરાય છે. વિવાહિત સ્ત્રીમાં મૈથુન-યજ્ઞ નિમિત્તે માંસભક્ષણ-સૌત્રામણિ યાગમાં મદ્યપાન : આવી વ્યવસ્થા કરી છે. પણ તેનાથી નિવૃત્તિ પામવી તે ઈષ્ટ છે. (૫૮)

[ન કેવળ હિંસાના સંકોચ માટે હિંસાથી નિવૃત્તિ કહે છે. પરંતુ કામ્યકર્મના વિધાનપૂર્વક કામ્યકર્મથી પણ નિવૃત્તિ વેદ કહે છે.] કામ્યકર્મના વિધાનના અભિપ્રાયને નહિ જાણનાર, બાળક સમાન પુરુષોના અનુશાસનરૂપ ‘યજેત સ્વર્ગફલઃ’ આ વેદ (પરોક્ષવાદ) કામ્યકર્મથી નિવૃત્તિ પ્રત્યક્ષપણે કહેતો નથી. કર્મની મુકિત માટે ધીમે ધીમે કામ્યકર્મોથી નિવૃત્તિ માટે સ્વર્ગાદિફળની ઉદ્દેશ્યતાથી યજ્ઞાદિ કર્મો વિધાન કરે છે. તેમાં (દૃષ્ટાંત આપે છે) જેમ પિતા બાળકોને ઔષધનું પાન કરાવતા થકા સાકર-પતાસાં વગેરે બતાવે છે. તે તો કેવળ બતાવવા માત્ર જ છે. (૫૯) ક્યારેય પણ સર્વ હિતનો ઉપદેશક

जानीहि कदाचन । महाननर्थो भविता ह्यन्यथा तु न संशयः ॥६०॥ पुरा राजोपरिचरो वसुनामाऽभवद्द्विज ! । तं देवा ऋषयश्चापि समपृच्छन्त संशयम् ॥६१॥ वेदो हिंसापरो नो वा पृष्ट इत्यब्रवीन्नृपः । हिंसापरो वेद इति ततोऽसावपतद्भुवि ॥६२॥ अधोगतिः सद्य आसीदन्तरिक्षचरोऽप्यसौ । कथैषा वायवीयेऽस्ति मात्स्येऽथो भारतादिषु ॥६३॥ यदि वेदस्य हिंसेष्टा भवेत्तर्हि वसुर्नृपः । तथोक्तिमात्रतः सद्यः पतेत्कथमधो द्विज ! ॥६४॥ हिंसानिवृत्तितात्पर्यं वेदं वेत्तु ततो भवान् । इत्युक्तः स पुनः कृष्णमाचिक्षेप रुषा ज्वलन् ॥६५॥ यज्ञे समन्त्रं निहता याज्ञिकैः पशवोऽखिलाः । तिर्यग्योनिविनिर्मुक्ताः प्राप्नुवन्ति दिवं किल ॥६६॥ हिंसाऽतो यज्ञिया वर्णिन् ! धर्म एवास्ति निश्चितम् । तामधर्मं ब्रुवन्नैव विद्वत्सदसि शोभसे ॥६७॥ यज्ञशेषामिषाद्याशे प्रमाणं भगवद्वचः । यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ॥६८॥ सुव्रत उवाच- मांसाशनप्रियस्येत्थं यज्ञदम्भस्य तस्य ताम् । वाचं श्रुत्वाऽब्रवीत् स्वामी ह्यधर्मे धर्ममानिनः ॥६९॥ नारायणमुनिरुवाच- पशुघातो धर्म इति त्वन्मतं न सतां मतम् । फलं धर्मस्य हि सुखं दुःखं पापस्य कर्मणः ॥७०॥ दुःखमेव फलं प्रोक्तं पशुघातस्य कर्मणः । श्रीमद्भागवते विप्र ! नारदेन वदामि तत् ॥७१॥ प्राचीनबर्हिषं भूपं कर्मस्वासक्तमानसम् । नारदोऽध्यात्मतत्त्वज्ञः कृपालुः प्रत्यबोधयत् ॥७२॥ भो भो प्रजापते ! राजन् ! पशून् पश्य त्वयाऽध्वरे । संज्ञापिताञ्जीवसङ्घान् निर्घृणेन सहस्रशः ॥७३॥ एते त्वां सम्प्रतीक्षन्ते स्मरन्तो वैशसं तव । सम्परेतमयःकूटैश्छिन्दन्त्युत्थितमन्यवः ॥७४॥

વેદ હિંસા તાત્પર્યવાળો જાણો નહિ. એમ જાણશો તો હજારો ઉપાયથી પણ વારણ ના થઈ શકે તેવો અનર્થ અવશ્ય જ થશે તેમાં સંશય નથી. (૬૦)

[વેદને વાણીથી પણ હિંસા પરત્વે કહેવાથી મહાન્ અનર્થમાં દૃષ્ટાંત કહે છે :] હે બ્રાહ્મણ ! પૂર્વે ઉપરિચર (આકાશમાં ગતિવાળો) વસુ નામનો રાજા હતો. યજ્ઞ કરનારા ઈન્દ્રાદિ દેવો અને તેમના યજ્ઞમાં તત્કાળ આવેલા વૃદ્ધ મહર્ષિઓ ત્યાં યદૃચ્છાથી આવેલા વસુરાજા પ્રત્યે(પોતાના વિવાદ સંબંધી) સંશય પૂછવા લાગ્યા : (૬૧) હે રાજન્ ! વેદ હિંસા પર છે કે હિંસા પર નથી : આ પ્રમાણે તેમણે પુછાયેલા વસુરાજા વેદ હિંસા પર છે એમ બોલ્યા. આવું બોલ્યા પછી તે રાજા એ સમયે આકાશથી પૃથ્વીમાં પડ્યા. (૬૨) આ રાજા આકાશમાં ફરનાર, તત્કાળ જ પૃથ્વીમાં ફરનારો થયો. આ કથા વાયુપુરાણ, મત્સ્ય-પુરાણ અને ભારતાદિમાં છે. (૬૩)

હે દ્વિજ ! જો વેદને હિંસા અભિમત હોય તો વસુરાજા, વેદ હિંસા પર છે એમ કહેવા માત્રથી તત્કાળ પૃથ્વીમાં કયા કારણથી પડે ? અર્થાત્ પડે જ નહિ. (૬૪) માટે તમો વેદને હિંસાની નિવૃત્તિમાં તાત્પર્યવાળો જાણો. આવી રીતે શ્રીહરિએ કહેલા જગજીવન બ્રાહ્મણે મહાક્રોધથી તપાયમાન થઈને ફરીથી પણ શ્રીહરિ પ્રત્યે આક્ષેપ કર્યો. (૬૫)

યજ્ઞ કરનારાઓએ યજ્ઞમાં મંત્ર-સંસ્કારપૂર્વક હણાયેલાં સમગ્ર પશુઓ પશુજન્મથી રહિત થઈને સ્વર્ગમાં જાય છે; અર્થાત્ દેવ-દેહને પામે છે જ. (૬૬) માટે હે વર્ણિન્ ! 'યજ્ઞમાં કરાયેલી હિંસા ધર્મ જ છે' એમ નિશ્ચિત છે, છતાં યજ્ઞની હિંસાને અધર્મ કહેતા તમો; પંડિત-બ્રાહ્મણોની સભામાં શોભતા નથી. (૬૭) યજ્ઞ શેષ માંસ-સુરાપાન-મત્સ્યાદિના ભક્ષણમાં 'યજ્ઞશેષને ખાનારા સત્પુરુષો સર્વ પાપોથી મુક્ત થાય છે' આવું ગીતામાં કહેલું શ્રીકૃષ્ણનું વચન પ્રમાણ છે. (૬૮)

હે રાજન્ ! માંસ ખાવાની રુચિવાળા; દંભમાત્રથી યજ્ઞ કરનારા, ધર્મ વિરુદ્ધ હિંસામાં ધર્મપણાના અભિમાનવાળા જગજીવનની વાણી સાંભળીને **શ્રી નારાયણ મુનિ બોલ્યા** : (૬૯) હે બ્રાહ્મણ ! પશુહિંસા ધર્મ છે એમ તમારો જ મત છે. સત્પુરુષોનો મત નથી. (વેદના અર્થને જાણનારા નારદાદિ સત્પુરુષોનો એવો મત નથી) કારણ કે ધર્મનું ફળ સુખ છે. પાપકર્મનું ફળ દુઃખ છે. (૭૦)

હે વિપ્ર ! નારદ ઋષિએ યજ્ઞમાં પણ પશુમારણકર્મનું ફળ દુઃખ જ કહેલું છે તે હું તમોને કહું છું. (૭૧) અધ્યાત્મતત્ત્વને જાણનારા પરમ કારુણિક નારદે હિંસામય યજ્ઞાદિ કર્મમાં આસક્ત મનવાળા પ્રાચીન બર્હિષ રાજાને બોધ આપ્યો : (૭૨) હે પ્રજાપતે ! હે રાજન્ ! નિર્દય એવા તમોએ યજ્ઞમાં મારેલા હજારો જીવસમુદાયોને આકાશમાં જુઓ. (૭૩) આ તમોએ મારેલાં પશુઓ તમોએ કરેલી પોતાના હનનની પીડાને સ્મરણ કરતા સતા મૃત્યુ પછીના તમારા આગમનની રાહ જુએ છે પછી ઉત્પન્ન થયેલાં ક્રોધવાળાં પશુઓ લોઢાનાં યંત્રમય શીંગડાંથી તમોને છેદશે. (૭૪)

तं यज्ञपशवोऽनेन संज्ञप्ता येऽदयालुना । कुठारैश्चिच्छिदुः क्रुद्धाः स्मरन्तोऽमीवमस्य तत् ।।७५।। इत्यादि नारदेनोक्तं स निशम्य नराधिपः । सहिंसयज्ञानुत्सृज्य ह्यहिंसं धर्ममाश्रयत्।।७६।। तस्मात्त्वमपि सुज्ञोऽसि विश्रुतो यशसा भुवि । पशुहिंसामृते यज्ञं कर्तुमर्हस्यशेषतः ।।७७।। सुव्रत उवाच-एवमुक्तेऽपि हरिणा स्वमतं स तु नात्यजत् । सद्यस्तदाऽगात्स्वस्थानं स तन्मदभरं विदन् ।।७८।। द्वितीयेऽह्नि ततः स्थातुं धर्म आज्ञाप्य स स्वकान् । निर्ययौ नगरात्स्वामी ते च दूरं तमन्वयुः ।।७९।। तान्निवर्त्य निजान्मार्गे जनान् सम्प्रीणयन्निजान् । दिनैः कतिपयैः प्रापद्धमकापुरमीश्वरः ।।८०।। हरेरुल्लङ्घ्य वचनं सोऽथ विप्रो निजं मखम् । समारेभे पशूंश्चाहन्मदमानविमूढधीः ।।८१।। हरिवाक्यातिक्रमतो वेदस्य च जनाधिप ! । हिंसापरत्वकथनात्तस्याभद्रमभून्महत् ।।८२।। राज्ञः कोपोऽभवत्तस्मिन्सहसैवेश्वरेच्छया । क्रुद्धः स तस्य तं यज्ञमुच्चिच्छेद ससैनिकः ।।८३।। शिवावमन्तुर्यज्ञः प्राग्यथा दक्षप्रजापतेः । उच्छिन्नो वीरभद्रेण तथा तेनैष भूभुजा ।।८४।। तस्य वित्तं च यानानि गृहोपकरणानि च । यज्ञपात्राणि पक्वान्नराशीन्सैन्यास्त्वपाहरन् ।।८५।। तेऽपि क्रुद्धास्त्रयस्तर्हि सोदरा भूरिमानिनः। युद्धं कुबेरजिन्मुख्याश्चक्रुस्तैः सह सानुगाः ।।८६।। सन्ताड्यमाना विप्राश्च श्मश्रुलैर्यवनादिभिः । रुदन्त उच्चैः काश्याद्यास्ततश्चक्रुः पलायनम् ।।८७।। क्रोशतो द्रवतो भीत्या हृतस्वांश्च द्विजाननु । धावतः सैनिकान् राजा न्यषेधत्कालसन्निभान् ।।८८।।

---

નિર્દય પુરંજન રાજાએ મારેલાં યજ્ઞપશુઓ, ક્રોધ પામેલા સતા પુરંજન રાજાએ કરેલા પોતાના હનનરૂપ પાપને સંભારતા થકા પુરંજન રાજાને લોઢાની ફરશીઓથી છેદી નાખતા હતા. (૭૫) હે દ્વિજ ! નારદે કહેલું વાક્ય સાંભળી પ્રાચીન બર્હિષ રાજાએ પશુહિંસા યુક્ત યજ્ઞોનો ત્યાગ કરી પશુહિંસા રહિત યજ્ઞાદિલક્ષણ ધર્મનો આશ્રય કર્યો. (૭૬)

હે દ્વિજ ! માટે તમો પણ સુજ્ઞ છો. પૃથ્વીમાં સત્કીર્તિથી વિખ્યાત છો. તેથી સમગ્રપણે પશુહિંસા વિના યજ્ઞ કરવા માટે યોગ્ય છો. (૭૭) **સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! શ્રીહરિએ આ પ્રમાણે કહ્યું તો પણ જગજીવન બ્રાહ્મણે તો પોતાના મતનો ત્યાગ કર્યો નહિ. તે સમયે શ્રીહરિ તે બ્રાહ્મણને સત્કુળ, ધન વગેરેના મદથી અતિશય ગર્વયુક્ત જાણતા સતા તત્કાળ જ ત્યાંથી પોતાના નિવાસસ્થાન પ્રત્યે ગયા. (૭૮)

પછી શ્રીહરિ બીજે દિવસે પોતાના ભક્તજનોને પોતપોતાના ધર્મમાં રહેવા માટે આજ્ઞા કરી ભુજનગરથી નીકળ્યા. તે સમયે ભક્તો દૂરદેશપર્યંત શ્રીહરિની પછવાડે આવ્યા. (૭૯) શ્રીહરિ પોતાના ભક્તજનોને પાછા વાળી માર્ગમાં રહેલાં તે તે ગામોમાં રહેલા ભક્તોને સુખ આપતા કેટલાક દિવસે ધમડકાપુરમાં ગયા. (૮૦) શ્રીહરિ ભુજથી નીકળ્યા પછી મદ અને માનથી વિપરીત ભાવને પામેલી બુદ્ધિવાળા જગજીવન બ્રાહ્મણે શ્રીહરિના વચનનું ઉલ્લંઘન કરી પોતાનો હિંસામય યજ્ઞ આરંભ કર્યો અને યજ્ઞમાં પશુઓને હણ્યાં. (૮૧)

હે જનાધિપ ! શ્રીહરિના વાક્યનું ઉલ્લંઘન કર્યું તેથી અને વેદને હિંસા પરત્વે છે એમ કહેવાથી જગજીવન બ્રાહ્મણનું મહાન અનિષ્ટ થયું. (૮૨) હે રાજન્, ઈશ્વર ઈચ્છાથી એકદમ જગજીવન બ્રાહ્મણ ઉપર તે પુરના રાજાનો મહાક્રોધ થયો. કોપાયમાન રાજાએ પોતાના સૈન્યે સહિત તે જગજીવનના યજ્ઞને ઉખેડી નાખ્યો. (૮૩) પૂર્વે શિવનું અપમાન કરનાર દક્ષ પ્રજાપતિનો યજ્ઞ જેમ વીરભદ્રે ઉખેડી નાખ્યો હતો તેવી રીતે આ જગજીવનનો યજ્ઞ રાજાએ ઉખેડી નાખ્યો. (૮૪)

તે બ્રાહ્મણનું સમગ્ર દ્રવ્ય, શિબિકા વગેરે વાહનો તથા ઘરનાં ઉપકરણો અને યજ્ઞનાં પાત્રો અને જલેબી, પેંડા, બરફી, મોતિયા લાડુ વગેરે પકવાનના સમુદાયોને સૈનિકો અપહરણ કરી ગયા. (૮૫)

તે સમયે ઘણા અભિમાનવાળા, ક્રોધ પામેલા કુબેરજી વગેરે સગા ત્રણેય ભાઈઓ સશસ્ત્ર પોતાના નોકરોએ સહિત રાજાના સૈનિકોની સાથે યુદ્ધ કરવા લાગ્યા. (૮૬) મોટી દાઢીવાળા-મુસલમાન રાજસૈન્યોએ તાડન કરાયેલા કાશી વગેરેના બ્રાહ્મણો ઊંચા સ્વરે રુદન કરતા થકા ભુજથી નાસી ગયા. (૮૭) મારવાની બીકથી બૂમો પાડતા અને દોડતા; રાજાના સૈનિકોએ જેઓનું દ્રવ્ય લૂંટી લીધું છે એવા બ્રાહ્મણોની પાછળ દોડતા કાળ સમાન સૈનિકોને રાજાએ પાછા વાળ્યા. (૮૮)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तस्मिन् युद्धे शस्त्रपाणींस्त्रींस्तानरुणलोचनान् । जघ्नू राजभटाः क्रूरा घ्नतः स्वानसिपाणयः ।।८९।। हतास्त्रयोऽपि ते तत्र भक्ष्यन्ते स्मामिषाशिभिः । कङ्कगृध्रादिभिः सद्यः ससुताश्च सहानुगाः ।।९०।। हाहाकारो महानासीत्पुरे तस्मिंस्तु सर्वतः । हरिवाक्यातिक्रमस्य फलं तद्विविदुर्जनाः ।।९१।। उद्घोषः सर्वदेशेषु बभूव च ततो नृप ! । देवार्था जीवहिंसापि सर्वोच्छेदकरीति ह ।।९२।। तत आरभ्य धरणौ धार्मिकाः पुरुषा नृप ! । तत्यजुर्जीवहिंसां च मद्यमांसाशनं तथा ।।९३।। प्रताप इत्थं प्रथितो धरायां नारायणस्याऽऽसुरकर्महर्तुः । धर्मः सभार्यः ससुतश्च तेन प्रमोदमापातितरां प्रपुष्यन् ।।९४।। इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे अहिंसाधर्मस्थापननामैकोनविंशोऽध्यायः ।।१९।।

सुव्रत उवाच-राजासील्लब्धजिन्नामा धमकाख्यपुरे नृप ! । स्वालये प्रभुमावास्य सिषेवे तं स दासवत् ।।१।। कल्याण इन्दुभो रामस्तथा राजधनाभिधः । पुत्रास्तस्य मुदा चक्रुश्चत्वारः सेवनं हरेः ।।२।। जिज्जा मान्या वायुजीवा मोटिनी कर्णिकादयः । योषितोऽपि प्रभोर्भक्त्या विदधुस्तस्य सेवनम् ।।३।। उषित्वा द्वे दिने तत्र भूचायग्राममामाययौ । जयरामः कार्मणाद्या भक्ताः पर्यचरंश्च तम् ।।४।। देविकाद्याः स्त्रियस्तं च भक्तिमत्यः सिषेविरे । तत्रोषित्वा स घस्त्रो द्वौ कन्थकूटपुरं ययौ ।।५।। मूलजित्कचराद्यैश्च तत्र भक्तैः स सेवितः । वायवीहरिबालादियोषाभिश्चावसद्दिनम् ।।६।।

યુદ્ધમાં તરવારો જેમના હાથમાં છે એવા, નિર્દય, રાજાના યોદ્ધાઓએ હાથમાં તરવારોવાળા, ક્રોધના આવેશથી લાલ નેત્રોવાળા અને પોતાને હણનારા એવા તે કુબેરજી વગેરેને તરવારોથી તેમનાં મસ્તકો છેદી મારી નાખ્યાં. (૮૯) પુત્રોએ સહિત તેમ જ ચાકરોએ સહિત તે ત્રણેય પણ યુદ્ધમાં નાશ પામ્યા અને તત્કાળ જ માંસ ખાનારા કાગડા, ગૃધપક્ષી, કૂતરા વગેરેથી ભક્ષણ કરાયા. (૯૦)

ભુજનગરમાં ચોતરફ મહાન હાહાકાર થઈ ગયો. તે પુરના વાસીજનો શ્રીહરિના વાક્યના ઉલ્લંઘનનું આ સર્વસ્વ નાશરૂપ ફળ જાણતા હતા. (૯૧) હે રાજન્ ! પછી યજ્ઞાદિમાં દેવતાને ઉદ્દેશીને કરેલી જીવહિંસા (અજાદિ પ્રાણીવધ) પણ સર્વનાશકારી છે : આ પ્રમાણે સર્વ દેશોમાં વાર્તા પ્રસરી ગઈ. (૯૨)

હે રાજન્ ! ત્યારથી આરંભીને પૃથ્વીમાં ધાર્મિક પુરુષોએ યજ્ઞાદિમાં પણ પ્રાણીવધ તથા દેવાદિકને નિવેદન કરેલા એવા પણ મદ્યમાંસાદિના ભક્ષણનો ત્યાગ કર્યો. (૯૩)

હે રાજન્ ! આ પ્રમાણે આસુર કર્મને નાશ કરનારા શ્રીહરિનો પ્રતાપ પૃથ્વીમાં પ્રસિદ્ધ થયો. તે શ્રીહરિના પ્રતાપથી પત્નીએ સહિત અને પુત્રે સહિત ધર્મપ્રજાપતિ પોષણ પામીને અત્યંત આનંદ પામ્યા. (૯૪) *ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે અહિંસાધર્મસ્થાપનનામૈકોનવિંશોઽધ્યાયઃ (૧૯)*

## અધ્યાય : ૨૦

### વિવિધ પુર અને ગ્રામોના ભક્તોને વિવિધ પ્રકારનાં ઐશ્વર્યો બતાવતા શ્રીહરિના વિચરણનું વિશેષ વિસ્તારથી વર્ણન છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! ધમડકા ગામમાં લાધોજી નામે તે પુરના રાજા હતા. તે રાજા શ્રી સહજાનંદ ભગવાનને પોતાના ભવનમાં નિવાસ કરાવી દાસની માફક સેવા કરવા લાગ્યા. (૧) કલ્યાણ-ઈન્દુભા-રામ તથા રાયધણ નામના એ ચાર લાધોજી રાજાના પુત્રો, શ્રીહરિની પરિચર્યા હર્ષપૂર્વક કરતા હતા. (૨) જીજી-માની-વાયુજીવા-મોટિની-કર્ણિકા વગેરે ક્ષત્રિય જાતિનાં સ્ત્રીભક્તો પણ શ્રીહરિની સેવા ઘણા સ્નેહથી કરતાં હતાં. (૩)

શ્રીહરિ ત્યાં બે દિવસ સુધી નિવાસ કરીને ભચાઉ નામના ગામમાં આવ્યા. ત્યાં જયરામ-કાર્મણ (કમો) વગેરે ભક્તો શ્રીહરિની સેવા કરવા લાગ્યા. (૪) દેવિકા વગેરે ભક્તિવાળી સ્ત્રીઓ શ્રીહરિની સેવા કરતી હતી. શ્રીહરિ ભચાઉ ગામમાં બે દિવસ રહીને કંથકોટ નગરમાં ગયા. (૫) મૂળજી અને કચરો વગેરે ભક્તજનોએ તથા વાયવી અને હરિબાળા આદિ સ્ત્રીઓથી સેવાયેલા શ્રીહરિએ ત્યાં એક દિવસ સુધી નિવાસ કર્યો. (૬)

ततोऽब्धिखाडीमुत्तीर्य देशमाभीरमभ्यगात् । तत्रासौ पिप्पलीग्राममियायात्मीयतुष्टये ॥७॥ तत्र देवगणेशाद्याः समसेवन्त तं विशः । स्त्रियश्च मान्यारामाद्याः स्वस्वशक्त्यनुसारतः ॥८॥ तत्रोषित्वा दिने द्वे च राजकूटं स आययौ । लक्ष्म्याख्या राजकन्या तं तत्रानर्चातिभावतः ॥९॥ स प्रसादाद्धरेः सर्वाः प्राप योगकला नृप ! । तत्रोषित्वा दिनं त्वेकं निर्ययौ भगवांस्ततः ॥१०॥ क्रोधं संयमयन्मदं च दमयन्कामं समुन्मूलयन्मानं सन्नमयन् स्पृहामपनयँल्लोभं च विच्छेदयन् । पापौघं दलयन्कलिं व्यपनयन् पाषण्डमुच्छेदयन्सत्यं निर्मलयंश्चचार भगवान्धर्मं समुत्तेजयन् ॥११॥ आश्चर्यं जनयन्नृणां प्रतापं प्रथयन्भुवि । हरन्नज्ञानतिमिरं सोऽराजज्ज्ञानभास्करः ॥१२॥ दृष्टश्रुतप्रतापं तं धर्मवर्त्मप्रवर्तकम् । आशिश्रियुश्च बहवो नरा नार्यश्च भूपते ! ॥१३॥ उत्साहार्थं सोऽपि तेषां मतिदार्ढ्याय चात्मनि । स्वैश्वर्यं दर्शयामास यदनन्याश्रयं प्रभुः ॥१४॥ अनेकेषां स जीवानां प्राणवृत्तिनिरोधनम् । अचीकरद्ब्रह्मरूपे निजात्मनि समाधिना ॥१५॥ दर्शयामास तत्रैव गोलोकं धाम चाक्षरम् । श्वेतद्वीपं च वैकुण्ठं सकलैश्वर्यसम्भृतम् ॥१६॥ अव्याकृताख्यं लोकं च दिव्यं बदरिकावनम् । अग्निबिम्बं चार्कबिम्बं धाम च क्षीरसागरम् ॥१७॥ तत्र तत्र निजामेव दिव्यां मूर्तिमदीदृशत्। सदैश्वर्येण जुष्टां च तत्तत्पार्षदशक्तिभिः ॥१८॥ अश्रावयच्च केभ्यश्चित्सहसा प्रणवध्वनीन् । कोटिकोट्यर्कसङ्काशं निजं तेजोऽप्यदीदृशत् ॥१९॥ परं यज्जाग्रदादिभ्यः सच्चिदानन्दलक्षणम् । द्रष्ट्राख्यं ब्रह्म तद्रूपं केभ्यश्चित्स्वमदीदृशत् ॥२०॥

પછી શ્રીહરિ સમુદ્રની ખાડી ઊતરી આભીર દેશમાં ગયા. ત્યાં પોતાના ભક્તોની પ્રસન્નતા માટે પીપળિયા ગામમાં ગયા. (૭) ત્યાં દેવો તથા ગણેશ વગેરે વૈશ્ય જાતિના ભક્તો અને માન્યા-રામા વગેરે સ્ત્રી ભક્તો પોતપોતાની શક્તિ અનુસારે શ્રીહરિની સેવા કરતાં હતાં. (૮)

શ્રીહરિ પીપળિયા ગામમાં બે દિવસ રહી રાજકોટ નગરમાં આવ્યા ત્યાં લક્ષ્મી નામનાં રાજકન્યાએ અતિ ભાવપૂર્વક શ્રીહરિનું મહોપચારોથી પૂજન કર્યું. (૯) હે રાજન્ ! તે લક્ષ્મી, ( આ સમયે પ્રસન્ન થયેલા) શ્રીહરિના અનુગ્રહથી સમગ્ર યોગકળાઓ પામી. ભગવાન શ્રીહરિ રાજકોટમાં એક દિવસ રહી ત્યાંથી નીકળ્યા. (૧૦) [ભુજથી નીકળીને રાજકોટથી નીકળ્યા ત્યાં સુધીનાં તે તે ગામોમાં શ્રીહરિએ કરેલાં આશ્ચર્યકારી ચરિત્રો અધ્યાયની સમાપ્તિ સુધી એકસાથે સંક્ષેપથી કહે છે.] ભગવાન શ્રીહરિકૃષ્ણ પોતાના ભક્તજનોના ક્રોધને નિયમમાં કરતા, ગર્વને શમાવી દેતા, નાના પ્રકારના પાપસમુદાયોનો ચૂરો કરી નાખતા, કળિયુગને બળહીન કરતા, કામને મૂળમાંથી ઉખેડી નાખતા, માનને નમાવી દેતા, સ્પૃહાને નિવૃત્તિ પમાડતા, લોભને છેદી નાખતા, સત્યને નિર્મળ કરતા, એકાંતિક ધર્મને સારી રીતે વૃદ્ધિ પમાડતા પોતાના ભક્તોનાં ગામોમાં વિચરતા હતા. (૧૧) જ્ઞાનમાં સૂર્યસમાન શ્રીહરિ પૃથ્વીમાં મનુષ્યોને આશ્ચર્ય ઉત્પન્ન કરાવતા પોતાનો અસાધારણ પ્રતાપ વિસ્તારતા, અનાદિ અજ્ઞાનરૂપી અંધકારને હરતા થકા અતિશય શોભતા હતા. (૧૨) હે રાજન્ ! જોયેલો છે અને સાંભળેલો છે અતિશય મહાન પ્રતાપ જેમનો એવા એકાંતિક ધર્મના પ્રવર્તક, શ્રીહરિનો ઘણાં પુરુષો અને સ્ત્રીઓએ આશ્રય કર્યો. (૧૩)

અતિ સમર્થ શ્રીહરિ પણ તે ભક્તજનોને ઉત્સાહ ઉત્પન્ન કરવા માટે અને પોતાના સ્વરૂપમાં બુદ્ધિની અતિ દૃઢતા માટે જે બીજા કોઈ મુક્ત અથવા ઈશ્વરોમાં ના હોય તેવું પોતાનું ઐશ્વર્ય બતાવતા હતા. (૧૪) શ્રીહરિ અનેક જીવોને, બ્રહ્મની સાથે એકતા પામેલા પોતાના આત્મામાં સમાધિથી પ્રાણ-ઈંદ્રિય અને મનની વૃત્તિઓનો નિરોધ કરાવતા હતા. (૧૫)

તેવી સમાધિમાં શ્રીહરિ, અનેક જીવાત્માઓને બ્રહ્મની સાથે એકતા પામેલા પોતાના ક્ષેત્રજ્ઞમાં જ ગોલોક ધામ - અક્ષરધામ-શ્વેતદ્વીપધામ અને વૈકુંઠધામ બતાવતા હતા. (૧૬) તથા દિવ્ય અવ્યાકૃત લોક-બદરિકાશ્રમ-અગ્નિમંડળ-સૂર્યમંડળ અને ક્ષીરસાગર બતાવતા હતા અને તે તે ગોલોકાદિ ધામોમાં સદા અણિમાદિ સર્વોત્કૃષ્ટ પરમૈશ્વર્ય તથા તે તે પાર્ષદો અને શક્તિઓથી સેવા કરાયેલી પોતાની મૂર્તિ તે ભક્તોને બતાવતા હતા. (૧૭-૧૮)

કેટલાંક ભક્તજનોને તો એકાએક ૐકારના નાદો સંભળાવતા હતા અને કેટલાંકને તો કોટાનકોટિ સૂર્ય સમાન પોતાનું તેજ પણ દેખાડતા હતા. (૧૯) શ્રીહરિ, જીવોની જાગ્રતાદિ ત્રણ અવસ્થાથી પર સચ્ચિદાનંદ ધર્મવાળું દૃષ્ટા સંજ્ઞાવાળું પોતાનું સ્વરૂપ જે મહાપુરુષાત્મક બ્રહ્મ તે કેટલાંકને બતાવતા હતા. (૨૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

भूगोले च खगोले च देवतानां हरेस्तथा । स्थानैश्वर्याणि यान्यासन् केभ्यश्चित्तान्यदीदृशत् ॥२१॥ आधारादिषु चक्रेषु गणेशाद्याश्च देवताः । केभ्यश्चिद्दर्शयामास संस्थिताः स पृथक् पृथक् ॥२२॥ केभ्यश्चिदपि भक्तेभ्यो विराड्रूपमदीदृशत्। क्वचित्पुरुषसूक्तोक्तं ब्रह्माण्डाधारमीश्वरः ॥२३॥ शतयोजनदूरस्थभक्तेभ्योऽपि क्वचित्क्वचित् । स्वदर्शनं स प्रददौ प्रीतः प्रत्यक्षमेव हि ॥२४॥ अपि दूरस्थितैर्भक्तैः स्वगृहे प्रतिमान्तिके । नैवेद्यमर्पितं क्वापि ह्याश्नाद्विस्मापयञ्जनान् ॥२५॥ म्रियमाणान्निजान् क्वापि निनीषुर्धाम चात्मनः । अप्यन्येभ्यः स तद्ग्रामे साक्षात्प्रादात्स्वदर्शनम् ॥२६॥ मुमुक्षूनितरांश्चेत्थं दर्शयन्तमलौकिकम् । स्वैश्वर्यं वीक्ष्य तं प्रापुरभक्ता अपि विस्मयम् ॥२७॥ तेन साकं विवादार्थं बहवो मतवादिनः । आगता अपि वादैस्तं जेतुं नैवाशकन् क्वचित् ॥२८॥ तं कार्ष्णा ददृशुश्च कृष्णमवनौ रामं च रामार्चकाः शक्तिं शक्तिपरायणा रविमथो सौराश्च शैवाः शिवम् । विष्णुं वैष्णवधर्मिणः खलु तदा जैनाश्च तीर्थङ्करान् दृष्ट्वाऽऽसन्स्वसमाधिना च यवनाः पिङ्गाम्बरान्विस्मिताः ॥२९॥ एवं यो यस्तमभ्यागात्स स सद्यः समाधिना । स्वेष्टदेवं तमेवेशं विलोक्यासीत्सुविस्मितः ॥३०॥ त्यक्त्वा स्वस्वमतान्येव ततस्ते तमुपाश्रिताः । भक्त्या नारायणं नित्यं भेजिरे धर्मसंस्थिताः ॥३१॥ मद्यमांसादिसंसर्गं त्यक्त्वा सर्वे तदाश्रिताः । ज्ञानवैराग्यसम्पन्ना बभूवुः प्राकृता अपि ॥३२॥ हीनं जात्यापि तच्छिष्यमनधीतमपि क्वचित् । न शेकेऽधीतशास्त्रोऽपि विजेतुं ब्रह्मविद्यया ॥३३॥ इत्थं निजप्रतापेन मूलाज्ञानं विनाशयन्। सद्धर्मं स्थापयामास विनष्टं

શ્રીહરિ ભૂમંડળ અને આકાશમંડળમાં જે બ્રહ્માદિ દેવોનાં તથા વિષ્ણુનાં સ્થાનો અને ઐશ્વર્યો રહેલાં છે તેને પણ કેટલાંક ભક્તોને બતાવતા હતા. (૨૧) પરમેશ્વર શ્રીહરિ ક્યારેક મૂલાધાર-સ્વાધિષ્ઠાન-મણિપુર-અનાહત-વિશુદ્ધ અને આજ્ઞાચક્ર : આ છ ચક્રોમાં રહેલા ગણપતિ વગેરે દેવતાઓ કેટલાંકને જુદા જુદા બતાવતા હતા. (૨૨) પરમેશ્વર શ્રીહરિ ક્યારેક કેટલાક ભક્તોને બ્રહ્માંડનાં આધારભૂત વિરાટ રૂપ પણ બતાવતા હતા. (૨૩) શ્રીહરિ પ્રસન્ન થયેલા સતા ક્યારેક ક્યારેક શત યોજન દૂર રહેલા ભક્તજનોને પણ સાક્ષાત્ જ પોતાનાં દર્શન આપતા હતા. તેમજ દૂર રહેલા ભક્તોએ પોતાના ભવનમાં પોતાને પૂજવાની ભગવાનની પ્રતિમા આગળ જમવા માટે અર્પણ કરેલું નૈવેદ્ય પણ ક્યારેક જોનારાં જનોને વિસ્મય ઉત્પન્ન કરતા શ્રીહરિ જમતા હતા. (૨૪-૨૫)

શ્રીહરિ ક્યારેક અંતકાળે પોતાના ભક્તજનોને પોતાનાં ગોલોકાદિ ધામોમાં લઈ જવા માટે ઈચ્છતા, મરનારના ગામમાં મરનાર તથા બીજા જનોને પણ પ્રત્યક્ષ પોતાનાં દર્શન આપતા હતા. (૨૬) મુમુક્ષુજનોને તથા બીજા જનોને પણ અલૌકિક ઐશ્વર્ય બતાવતા શ્રીહરિને જોઈ આશ્રિત વિનાના બીજા જનો પણ વિસ્મય પામ્યા. (૨૭) શ્રીહરિની સાથે શાસ્ત્રાદિથી વિવાદ કરવા માટે આવેલા અનેક મતવાદીઓ (પ્રતિબિંબ-વિવર્તાદિ વિવિધ વાદોને કરતા જનો) વાદોથી શ્રીહરિને જીતવા ક્યારેય કોઈપણ દેશમાં સમર્થ થયા નહિ, પરંતુ તે જનો જ પરાજય પામ્યા. (૨૮)

પૃથ્વીમાં તે સમયે શ્રીકૃષ્ણના ઉપાસક જનો શ્રીહરિને શ્રીકૃષ્ણરૂપે જોતા હતા, શ્રી રામના ભક્તો જાનકીનાથરૂપે જોતા હતા, દેવી ભક્તો દેવીરૂપે જોતા હતા, સૂર્ય ભક્તો સૂર્યરૂપે, શિવભક્તો પરમ શિવરૂપે, વૈષ્ણવ ધર્મમાં રહેલા જનો શ્રી વિષ્ણુરૂપે, જૈન મતના જનો મહાવીરાદિ તીર્થંકરરૂપે જોતા હતા અને યવનો શ્રીહરિને મહમદાદિ પેગંબર રૂપે જોતા હતા : એ પ્રકારે કૃષ્ણ વગેરેના સર્વે ભક્તો શ્રીહરિએ કૃપાથી કરાવેલી સમાધિમાં પોતાના ઈષ્ટદેવરૂપે શ્રીહરિને જોઈ આશ્ચર્ય પામ્યા. (૨૯)

આ પ્રમાણે જે જે માણસ શ્રીહરિની પાસે ગમે તે પ્રકારે આવ્યો તે તે માણસ તત્કાળ જ પરમેશ્વર શ્રીહરિને જ પોતાના ઈષ્ટદેવરૂપે જોઈને આશ્ચર્ય પામતો હતો. (૩૦) પછી તે સર્વ જનો પોતપોતાના સંપ્રદાયના આગ્રહનો ત્યાગ કરી શ્રી નારાયણમુનિનો આશ્રય કરી શ્રીહરિએ કહેલી ધર્મમર્યાદામાં રહી પ્રેમથી હંમેશાં શ્રીહરિને ભજતા હતા. (૩૧)

પ્રાકૃત માણસો પણ તેમનાં આશ્રિત થઈ મદ્યપાન, માંસભક્ષણ, વગેરેનો સંસર્ગ દૂરથી ત્યાગ કરી જ્ઞાન-વૈરાગ્યાદિથી સંપન્ન થયા. (૩૨) નીચ જાતિના તેમજ શાસ્ત્રાધ્યયન રહિત એવા પણ શ્રીહરિના શિષ્યને શાસ્ત્રાધ્યયનવાળો પુરુષ પણ બ્રહ્મવિદ્યાથી (શાસ્ત્રોક્ત બ્રહ્મસ્વરૂપના નિરૂપણથી) જીતવા માટે ક્યારેય પણ શક્તિમાન થતો નહિ. (એવો જે શ્રીહરિનો પ્રતાપ હતો.) (૩૩) આ પ્રકારે પોતાના અસાધારણ પ્રતાપથી જીવમાં રહેલા અનાદિ અજ્ઞાનરૂપી અંધકારનો વિનાશ કરતા

धरणीतले ॥३४॥ तत्र तत्रान्नसत्राणि कारयामास भूरिशः । यत्रागतानामन्यत्र नासीज्जिगमिषा नृणाम् ॥३५॥ यज्ञैश्च वैष्णवैर्विष्णुं याजयामास स प्रभुः । आढ्यान्निजजनान्प्रीत्या मुख्यकल्पैर्नरेश्वर ! ॥३६॥ विष्णुयागमहारुद्रादियज्ञेषु सहस्रशः । मिष्टान्नैस्तर्पयामास ब्राह्मणान्बहुवासरान् ॥३७॥ अदीदपच्च बहुशो विप्रेभ्यस्तत्र तत्र च । हेममुद्रा रूप्यमुद्रा उदारः स इवैकराट् ॥३८॥ घृतक्षीरादिभिर्यज्ञान् हविष्यान्नैश्च कारयन् । मकारपञ्चकविधिं वेदबाह्यमनीनशत् ॥३९॥ साधुभूदेवदेवानामर्चनं प्रीणनं च सः । मुहुश्चकार चाधर्मपाषण्डोच्छेदनं प्रभुः ॥४०॥ धर्मज्ञानविरक्तीनां भक्तेर्भेदांश्च सर्वशः । तत्त्वतो बोधयामास तत्र तत्र स विस्तरात् ॥४१॥ सच्छास्त्रैः स्वप्रतापेन जित्वा चाधर्मिणो गुरून् । तेभ्यो मुमुक्षून् रक्षित्वा धर्मसर्गे ह्ययोजयत् ॥४२॥ चतुर्णामपि वर्णानामाश्रमाणां सनातनम् । धर्मं संस्थापयामास भगवान् धर्मरक्षकः ॥४३॥ नैष्ठिकव्रतिनां धर्मान्प्रभुः सोऽथ प्रवर्तयन् । स्वयं नैष्ठिकधर्मेषु भेजे राजाधिराजताम् ॥४४॥ यथेष्टं पोष्यमाणाश्च भक्तिधर्मादयोऽपि तम् । सेवमाना नित्यमेव विरेजुः परया श्रिया ॥४५॥ दृश्या आसन् पुण्यवद्भिर्दिव्या-कृतिधरास्तु ते । क्वचिदेवेच्छया तस्य प्रभोर्न तु सदाऽखिलैः ॥४६॥ इति दिव्यचरित्रैश्चित्रकृत्करुणावारिनिधिर्धरातले । विचरञ्छुचिमास आययौ शरधाराख्यपुरं हरिर्नृप ! ॥४७॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे विविधैश्वर्यप्रदर्शनेन नानाविधभक्तजनानन्दनं नाम विंशोऽध्यायः ॥२०॥

---

શ્રીહરિએ પૃથ્વીમાં વિનાશ પામેલો ભાગવતધર્મ સ્થાપન કર્યો. (૩૪) શ્રીહરિ તે તે દેશમાં અન્નક્ષેત્રો કરાવતા હતા, જે અન્નક્ષેત્રોમાં આવેલાં મનુષ્યોને બીજે જવાની ઈચ્છા થતી નહોતી. (૩૫) હે નરેશ્વર ! શ્રીહરિ ધનસંપન્ન પોતાનાં જનોની પાસે વિષ્ણુ દેવતાવાળા યજ્ઞોથી પ્રીતિપૂર્વક વિષ્ણનું પૂજન કરાવતા હતા. (૩૬) વિષ્ણુયાગ અને મહારુદ્ર, આદિ શબ્દથી અતિરુદ્રાદિ યજ્ઞોમાં હજારો બ્રાહ્મણોને ઘણા દિવસ સુધી મિષ્ટાન્ન ભોજનોથી તૃપ્ત કરતા હતા. (૩૭)

ચક્રવર્તી રન્તિદેવ રાજાની માફક ઉદાર શ્રીહરિ, તે તે યજ્ઞોમાં ઘણી સુવર્ણમુદ્રાઓ અને ચાંદીની મુદ્રાઓ વિવિધ ગોત્રોના બ્રાહ્મણોને અપાવતા હતા. (૩૮) ઘી, દૂધ, ડાંગર, જવ, ઘઉં, સાકર વગેરે હવિષ્યાન્નોથી વિષ્ણુયાગાદિ યજ્ઞો કરાવતા શ્રીહરિ વેદબાહ્ય મકારપંચક (મદ્ય, માંસ, મત્સ્ય મુદ્રા, મૈથુન આ મકારપંચક) ના વિધાનનો નાશ કરાવતા હતા. (૩૯)

શ્રીહરિ, સાધુ-બ્રાહ્મણો અને દેવો તેમનું પૂજન અને સુંદર ભોજનોથી તર્પણ વારંવાર કરતા હતા. અને વંશે સહિત અધર્મ તથા પાખંડ-ધર્મનું મૂળે સહિત ઉચ્છેદન વારંવાર કરતા હતા. (૪૦) શ્રીહરિ ધર્મ, જ્ઞાન, વૈરાગ્ય અને ભક્તિના સમગ્ર ભેદો તે તે અનેક ગામોમાં યથાર્થપણે પોતાના ભક્તોને જણાવતા હતા. (૪૧) શ્રીહરિ, અધર્મી અસુર ગુરુઓને સત્શાસ્ત્રનાં પ્રમાણવચનોથી અને પોતાના પ્રતાપથી પરાભવ પમાડીને અધર્મી ગુરુઓથી મુમુક્ષુજનોનું રક્ષણ કરી ધર્મના સર્ગમાં જોડતા હતા. (૪૨)

ધર્મરક્ષક ભગવાન શ્રીહરિ બ્રાહ્મણાદિ ચાર વર્ણોના તથા બ્રહ્મચારી આદિ ચારેય આશ્રમવાસીઓના પણ સનાતન ધર્મનું સ્થાપન કરતા હતા. (૪૩) તેમજ પ્રભુ શ્રીહરિ, નૈષ્ઠિક બ્રહ્મચારીઓના ધર્મો પ્રવર્તાવતા થકા પોતે નૈષ્ઠિક-ધર્મવાળાઓમાં રાજાધિરાજપણાને ભજતા હતા. સામંત રાજાઓમાં ચક્રવર્તી રાજાની માફક નૈષ્ઠિક બ્રહ્મચારીઓમાં શોભતા હતા. (૪૪) શ્રીહરિએ યથેષ્ટ ઈચ્છા પ્રમાણે પુષ્ટિ પમાડેલાં ભક્તિ અને ધર્મ વગેરે પણ શ્રીહરિની સેવા કરતા હંમેશાં સર્વોપરિ શોભાથી શોભતા હતા. (૪૫) દિવ્યાકૃતિ ધારણ કરનારાં ભક્તિ-ધર્મ વગેરે તો શ્રીહરિની ઈચ્છાથી મહાપુણ્યશાળી જનોએ ક્યારેક જ દર્શન કરવા યોગ્ય થતા હતા. કોઈ પુણ્યશાળી પુરુષને દર્શન દેતા હતા. સમગ્રજનોને હંમેશાં દેખાતા નહોતા. (૪૬)

હે રાજન્ ! આ પ્રમાણે અલૌકિક ચરિત્રોથી મનુષ્યોને પરમ આશ્ચર્ય કરનાર કરુણાસાગર શ્રીહરિ પૃથ્વીમાં વિચરણ કરતા અષાઢ માસમાં શરધાર નગરમાં આવ્યા. (૪૭) *ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે વિવિધૈશ્વર્યપ્રદર્શનેન નાનાવિધ-ભક્તજનાનંદનં નામ વિંશોઽધ્યાયઃ (૨૦)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच-तत्र राजकुमारौ द्वौ सिषेवाते तमादरात् । तुङ्गजिद्वैरजित्संज्ञौ तत्पदाब्जदृढाश्रयौ ॥१॥ तत्राद्यः कृष्णपादाब्जरेणूनां स्वाङ्गधारणे । अक्रूरोपम एवासीद्द्वितीयो विदुरोपमः ॥२॥ तथा वैरिभियो भीमो हिक्कजित्प्रमुखा अपि। क्षत्रवीरा असेवन्त भक्तास्तं परया मुदा ॥३॥ करिमो मूकहसनौ रयो हयजिदादयः । यवना अपि तं प्रीत्या भेजिरे दृढनिश्चयाः ॥४॥ निजांस्तान् प्रीणयन्भक्तान्वसंस्तुङ्गजिदालये । अज्ञानमहरन्नृणां तिमिरं तरणिर्यथा ॥५॥ भक्तैः सम्प्रार्थितस्तत्र चातुर्मास्यमुवास सः । महान्तमुत्सवं चक्रे जन्माष्टम्यां च पूर्ववत् ॥६॥ देशान्तरेभ्यो भक्ताश्च तत्राजग्मुः सहस्त्रशः । सगृहा अगृहाश्चापि तद्दिदृक्षाहृतान्तराः ॥७॥ उपवासं जागरं च निशि कृष्णार्चनं तथा । भक्तैः सह हरिश्चक्रे सेतूनां परिपालकः ॥८॥ साधून्विप्रांश्च सन्तर्प्य नवम्यां कृतपारणः । आससाद सभां रम्यामपराह्णे सतांपतिः ॥९॥ अथोपविष्टं परमासने तं प्रणम्य विप्रा नृप ! साधवश्च । यथोचितं तस्य पुरो निषेदुरन्ये जनास्तानभितश्च सर्वे ॥१०॥ शृणवत्सु सर्वेषु सदःस्थितेषु प्रणम्य तं तन्निकषोपविश्य । बद्धाञ्जलिस्तुङ्गजिदूर्जितश्रीः पप्रच्छ सर्वानुमतेन राजा ॥११॥ तुङ्गजिदुवाच-भगवन्निह दृश्यन्ते सर्वेषामपि देहिनाम् । कामः क्रोधस्तथा लोभ इति वै वैरिणस्त्रयः ॥१२॥ बलिष्ठस्तेषु कः स्वामिन् ! योऽवश्यं हि मुमुक्षुभिः । सर्वैरुपायैर्जेतव्यस्तन्नः कथय तत्त्वतः ॥१३॥ सुव्रत उवाच-इति पृष्टः स भगवान्भूभुजा तेन संशयम् । मनोभिरामया वाचा तं जगाद जगत्पतिः ॥१४॥

## અધ્યાય : ૨૧

### શરધારપુર મધ્યે સભામાં શ્રીહરિએ કામાદિશત્રુમાં, લોભનું અતિદુષ્ટપણું કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! શરધારપુરમાં તુંગજીત અને વૈરિજીત શ્રીહરિના ચરણકમળના દૃઢ આશ્રયવાળા બે રાજકુમારો શ્રીહરિની આદરપૂર્વક સેવા કરતા હતા. (૧) બંને રાજકુમારોમાં તુંગજીત શ્રીહરિકૃષ્ણ ભગવાનના ચરણકમળની રજને પોતાના અંગમાં ધારણ કરવામાં અક્રૂરજીની ઉપમાવાળા હતા. બીજા વૈરિજીત કાર્ય અને અકાર્ય જ્ઞાનમાં અને શ્રીહરિનો મહિમા જાણવામાં વિદુર સમાન જ હતા; (૨)

તથા વેરીભાઈ, ભીમ, હકોજી વગેરે ક્ષત્રિયોમાં શ્રેષ્ઠ ભક્તો પણ શ્રીહરિનું પરમ હર્ષથી સેવન કરતા હતા. (૩) કરીમ, મૂકો, હસન, રયો,હયજીત વગેરે યવન જાતિના ભક્તો પણ દૃઢ નિશ્ચય કરી શ્રીહરિને પ્રેમથી ભજતા હતા. (૪) પોતાના તુંગજીત વગેરે ભક્તોને આનંદ પમાડતા તુંગજીત રાજાના ભવનમાં રહેતા શ્રીહરિ સૂર્ય અંધકારને જ જેમ તેમ મનુષ્યોના અજ્ઞાનને હરતા હતા. (૫)

તુંગજીત આદિ ભક્તોએ સ્તુતિ કરાયેલા શ્રીહરિએ શરધારપુરમાં અષાઢ-શ્રાવણ-ભાદરવો અને આસો : આ ચાર માસ સુધી નિવાસ કર્યો. અને તે દરમ્યાન સંવત્ ૧૮૬૧ના વર્ષમાં શ્રાવણ વદી ૮ જે શ્રીકૃષ્ણજન્માષ્ટમીને દિવસે માણાવદરની માફક મહોત્સવ કર્યો. (૬) ગૃહસ્થો તથા ત્યાગીઓ પણ હજારોહજાર ભક્તો શ્રીહરિનાં દર્શન કરવાની ઈચ્છાથી ખેંચાયેલા અંતઃકરણવાળા, દેશાંતરોથી તે ઉત્સવમાં આવ્યા. (૭) સત્શાસ્ત્રોમાં કહેલી મર્યાદાઓના પાલક શ્રીહરિએ પોતાના ભક્તોની સાથે ઉપવાસ અને રાત્રિમાં જાગરણ તથા શ્રીકૃષ્ણનું પૂજન કર્યું. (૮)

સત્પુરુષોના પતિ શ્રીહરિએ નવમીમાં સાધુ અને બ્રાહ્મણોને મિષ્ટાન્નોથી તૃપ્ત કરી પોતાને હાથે રસોઈ કરી, શ્રીકૃષ્ણને નિવેદન કરી પારણાં કર્યાં. સાંજના સમયે રમણીય સભામાં બેઠા. (૯) હે રાજન્ ! પછી મહા અમૂલ્ય સિંહાસનમાં બેઠેલા શ્રીહરિને પ્રણામ કરી બ્રાહ્મણો અને સાધુઓ યથાયોગ્ય શ્રીહરિની આગળ બેઠા. અને બીજા સર્વજનો પણ સાધુઓ અને બ્રાહ્મણોની ચોતરફ બેઠા. (૧૦)

સભામાં બેઠેલા સર્વ ભક્તો સાંભળે તેવી સંપાદન થયેલી સભામાં તુંગજીત રાજા બંને હાથ જોડી શ્રીહરિની સમીપમાં બેસી પ્રણામ કરી સર્વેની અનુમતિથી શ્રીહરિને પૂછતા હતા : (૧૧) **તુંગજીત રાજા પુછે છે** - હે ભગવન્! આ લોકમાં સર્વ મનુષ્યોને પણ કામ, ક્રોધ તથા લોભ : આ ત્રણ અંતઃશત્રુઓ દેખાય છે. (૧૨) હે સ્વામિન્ ! તે ત્રણમાં અતિ બળવાન શત્રુ કોણ છે ? જે બળવાન શત્રુ મુમુક્ષુજનોએ સર્વ ઉપાયોથી અવશ્ય જીતવા યોગ્ય હોય તે અમોને યથાર્થપણે કહો. (૧૩) હે રાજન્ ! તે રાજાએ સંશય પૂછેલા ભગવાન જગત્પતિ શ્રીનારાયણ મુનિ મનોજ્ઞ વાણીથી તુંગજીત રાજાને કહેવા લાગ્યાઃ (૧૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच-**त्रयोऽपि शत्रवो ह्येते नृणां प्राणहरा मताः । मन्ये बलाधिकं तेषु लोभमेव दुरासदम् ॥१५॥ विजेतव्यः प्रयत्नेन स एवात्र मुमुक्षुभिः । पापस्वरूपो गृहिभिस्त्यागिभिस्तु विशेषतः ॥१६॥ सांसारिकपदार्थेषु ये लुब्धा नितरां नराः। अचिरेण विनश्यन्ति ते नूनं हतबुद्धयः ॥१७॥ लोभनिष्ठाः सन्ति दोषा महान्तो निरयप्रदाः । अधिष्ठानं हि पापस्य लोभश्चाघप्रवर्तकः ॥१८॥ लोभात्कामः प्रभवति क्रोधो लोभाच्च जायते । मोहश्चेर्ष्या मत्सरश्च सर्वं लोभात्प्रवर्तते ॥१९॥ विद्याविनयसम्पन्ना विख्याताश्च तपस्विनः । महर्षयोऽपि लोभेन बहवो दुर्गतिं ययुः ॥२०॥ तथा हिरण्यकशिपुप्रमुखा ये सुरद्विषः । इन्द्रादयो देवताश्च लोभेनैव क्षयं ययुः ॥२१॥ कौरवाणां क्षयो जातो लोभेन च महामते ! । अन्येऽपि बहवो भूपा लोभेन भुवि चिक्षियुः ॥२२॥ तस्मान्मदीयैर्न क्वापि लोभः कार्यो हि वस्तुनि । अर्था अनर्थैर्निभृताः सन्त्येवेत्यपि वेत्थ च ॥२३॥ चौर्यं हिंसाऽनृतं दम्भः कामः क्रोधः स्मयो मदः । भेदो वैरमविश्वासः संस्पर्धा व्यसनत्रयम् ॥२४॥ एते पञ्चदशानर्था वर्तन्तेऽर्थेषु भूपते ! । अन्येऽपि बहवः सन्ति दोषा ह्यर्थाश्रिताः खलु॥२५॥ तस्मादनर्थमर्थाख्यं विदित्वैव मदाश्रितः । तत्रासक्तिं न कुर्वीत कृष्णभक्त्यन्तरायके ॥२६॥** सुव्रत उवाच-**दौरात्म्यमिति लोभस्य श्रुत्वा भगवतोदितम् । स राजा मुनयश्चान्ये गृहिणोऽपि मुदं ययुः ॥२७॥ तत आज्ञापयामास भक्तान् देशान्तरागतान्। प्रातर्यायात विषयान् स्वस्वान्सर्व इति प्रभुः ॥२८॥ तदा कार्यायनग्रामादागतस्तत्र सन्मतिः । खट्वाङ्गो नाम राजर्षिस्तं प्रार्थयितुमुत्थितः ॥२९॥**

---

**શ્રીનારાયણ મુનિ કહે છે :** હે રાજન્ ! એ કામાદિ ત્રણેય શત્રુઓ મનુષ્યોના પ્રાણનો નાશ કરનારા માનેલા છે. તો પણ તેમાં લોભ શત્રુ જ અધિક બળવાળો પરાભવ ન કરી શકાય એવો છે. એમ માનું છું. (૧૫) આ લોકમાં મુમુક્ષુ ગૃહસ્થ ભક્તોએ પાપરૂપ લોભ જ ઘણા ઉપાયોથી પણ જીતવો, તેમ જ ત્યાગીઓએ તો વિશેષપણે પ્રયત્નથી જીતવો. (૧૬) જે પુરુષો સંસાર સંબંધી પદાર્થોમાં અતિશય લોભવાળા હોય છે તે મનુષ્યો હણાયેલી બુદ્ધિવાળા થોડા સમયમાં જ નાશ પામે છે. (૧૭)

લોભમાં રહેલા નરકને પમાડનારા ઘણા દોષો જણાય છે. લોભ છ પ્રકારના પાપનો આશ્રયભૂત છે. લોભ પાપકર્મમાં પ્રવર્તાવનારો છે. (૧૮) લોભથી નાના પ્રકારના વિષયની અભિલાષાઓ ઉત્પન્ન થાય છે. લોભથી ક્રોધ, મોહ અને ઈર્ષા થાય છે. બહુ કહેવાથી શું ? સર્વ દોષસમુદાય પણ લોભથી પ્રવર્તે છે. (૧૯) વિદ્યા = સર્વ શાસ્ત્રનું જ્ઞાતાપણું અને વિનયથી યુક્ત તેમજ સદ્‌ગુણોથી પ્રસિદ્ધ તપસ્વી એવા વસિષ્ઠાદિ અનેક મહર્ષિઓ પણ લોભથી દુર્ગતિને પામેલા છે. (૨૦)

તે જ પ્રકારે હિરણ્યકશિપુ વગેરે અસુરો તથા ઈન્દ્રાદિ દેવતાઓ તે સર્વે પણ લોભથી જ નાશ પામ્યા છે. (૨૧) હે મહામતે ! કૌરવોનો લોભથી વિનાશ થયો છે તથા બીજા બહુ રાજાઓ પણ લોભથી નાશ પામેલા છે. (૨૨)માટે મારા આશ્રિતોએ કોઈ પણ પદાર્થમાં લોભ કરવો નહિ. કારણકે અર્થો (ધન) અનર્થોથી - ચોરી આદિક દોષોથી ભરપૂર છે જ. આ પ્રકારે પણ તમો જાણો. (૨૩) ચોરીનું કર્મ-પ્રાણીદ્રોહ-અસત્ય ભાષણ-દંભ-પારકા ધનને ગ્રહણ કરવાની ઈચ્છા અને ક્રોધ : આ છ અનર્થો દ્રવ્ય પ્રાપ્તિ નિમિત્તવાળા છે. સ્મય-મદ-ભેદ-વૈર-અવિશ્વાસ-સંસ્પર્ધા તથા સ્ત્રી-દ્યુત અને મદ્ય (આ ત્રણ વ્યસન) એ નવ અનર્થો અર્થની પ્રાપ્તિ પછી થનારા છે. (૨૪) હે રાજન્ ! આ પંદર અનર્થો દ્રવ્યમાં વર્તે છે. એટલું જ નહિ બીજા પણ ઘણા દોષો ધનને આશરીને રહેલા છે. (૨૫)

તેથી મારો આશ્રિત ભક્તજન, અર્થ શબ્દ વાચ્ય દ્રવ્ય, અનર્થને ઉત્પન્ન કરનારું હોવાથી તેને અનર્થ નામવાળું જાણી શ્રીકૃષ્ણ ભગવાનની ભક્તિમાં વિઘ્ન કરનારા અર્થમાં અનુરાગ કરે નહિ. (૨૬) **સુવ્રત મુનિ કહે છે :** હે રાજન્ ! આ પ્રકારે શ્રીહરિએ કહેલું લોભનું દુષ્ટપણું સાંભળી તુંગજીત રાજા, મુનિઓ અને બીજા ગૃહસ્થ ભક્તો પણ મહા આનંદ પામ્યા. (૨૭) પછી શ્રીહરિએ 'તમો સર્વે પ્રાતઃકાળમાં પોતપોતાના દેશોમાં જાઓ.' આ પ્રકારે દેશાંતરથી આવેલા ભક્તજનોને આજ્ઞા આપી. (૨૮)

તે સમયે કારિયાણીથી શરધારપુરમાં જન્માષ્ટમીના મહોત્સવમાં દર્શન માટે આવેલા બુદ્ધિમાન ખટ્‌વાંગ રાજર્ષિ શ્રીહરિની પ્રાર્થના કરવા માટે ઊભા થયા. (૨૯) ધર્મમાં નિષ્ઠાવાળા નૈષ્ઠિક વ્રતમાં રહેલા, પરોક્ષ ભાવથી શ્રીકૃષ્ણને

स हि भक्तो धर्मनिष्ठो नैष्ठिकं व्रतमास्थितः । मकरालयपुर्यां प्राग्जन्माष्टम्यामुपागतः ॥३०॥ तत्र प्रतापं च हरेर्दृष्ट्वा तच्छिष्यतां गतः । कृष्णवार्तासु निपुणो जितेन्द्रिय उदारधीः ॥३१॥ मणिभद्रपुरे चासौ जन्माष्टम्यां पुनर्नृप ! । आगतोऽप्याज्ञयेशस्य गतो निजनिकेतनम् ॥३२॥ पुनरत्रागतस्तं च नेतुकामो निजालयम् । तदन्तिकमुपेत्यासौ नत्वा प्राञ्जलिरब्रवीत् ॥३३॥ खट्वाङ्ग उवाच-भगवंस्तव दासोऽस्मि त्वं चास्यात्मीयवत्सलः । आयातुमर्हसि ग्रामं मदीयं कृपया मयि ॥३४॥ सेवनेन तव स्वीयं सानुगस्य धनादिकम् । सफलं हि विधित्सामि मानुषं च जनुर्निजम् ॥३५॥ सुव्रत उवाच-एवं सम्प्रार्थितस्तेन प्रसन्नो हरिरब्रवीत् । आयास्यामि तव ग्रामं राजर्षे ! नात्र संशयः ॥३६॥ साम्प्रतं तु मया स्थातुं प्रतिज्ञातमिहास्त्यतः । प्रबोधन्युत्सवं कृत्वा तत्रायास्याम्यहं खलु ॥३७॥ इत्थं प्रसन्नमनसा हरिणोदिते तं नत्वा प्रहृष्ट उदिते तरणौ दशम्याम् । गन्तुं ततः स निरगान्नृपते ! स्वखेटं प्रापच्च दुर्गपुरमध्वगतं परेद्युः ॥३८॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे लोभदोषनिरूपणनामैकविंशोऽध्यायः ॥२१॥

सुव्रत उवाच-अस्ति पश्चिमपञ्चालदेशेषु जनपावनी । उन्मत्तगङ्गेति नदी विख्याता निर्मलोदका ॥१॥ यस्यां चक्रे जलक्रीडां मुनिभिः सह सोऽच्युतः । स्नानं च बहुशस्तेन महापातकहृज्जला ॥२॥ तस्यास्तटेऽतिपुण्यायाः सरितो दुर्गसंज्ञितम्। पुरं तदस्ति नृपते ! चातुर्वर्ण्यजनाश्रयम् ॥३॥ द्वारिकानगरस्यासीद्यच्छाखानगरं पुरा । क्रीडास्थानं भगवतो वसुदेवात्मजस्य च ॥४॥ तत्रासीदभयो नाम्ना नृपतिर्भक्तिमान्हरौ । क्षात्रधर्मरतः शूरः सच्छास्त्रश्रवणादरः ॥५॥

---

ભજનારા ખટ્વાંગ રાજા પહેલાં માંગરોલપુરમાં જન્માષ્ટમીના ઉત્સવમાં આવેલા હતા. (૩૦) હે રાજન્ ! તે જન્માષ્ટમીના ઉત્સવમાં શ્રીહરિકૃષ્ણ ભગવાનનો અતિશય પ્રભાવ જોઈ શ્રીહરિના શિષ્ય થયેલા, શ્રીકૃષ્ણની વાર્તા કરવામાં નિપુણ, જિતેન્દ્રિય, મહા બુદ્ધિશાળી એવા તે ખટ્વાંગ રાજા ફરીથી પણ માણાવદરમાં શ્રીહરિએ કરેલા જન્માષ્ટમીના ઉત્સવમાં આવેલા. પછી પરમેશ્વરની આજ્ઞાથી પોતાના ગામ કારિયાણીમાં ગયા હતા. (૩૧-૩૨) ફરીથી ત્રીજી વાર આ શરધારપુરમાં આવેલા અને (આ અવસરે જન્માષ્ટમી-ઉત્સવ પછી) શ્રીહરિને પોતાના ગામમાં લઈ જવાની ઈચ્છાવાળા **ખટ્વાંગ રાજા** શ્રીહરિની સમીપમાં આવી બંને હાથ જોડી નમસ્કાર કરી બોલ્યા : (૩૩)

હે ભગવન્ ! હું તમારાં ચરણકમળનો સેવક છું. અને તમો પોતાના ભક્તોમાં પ્રીતિવાળા છો, માટે તમારા દાસ ઉપર દયા કરી મારા ગામમાં આવવા માટે યોગ્ય છો. (૩૪) હે સ્વામિન્ ! વર્ણિ-સાધુ આદિ પરિવારે સહિત તમારી પરિચર્યાથી હું અમારા ધન-ધાન્ય-ગૃહાદિ સંપત્તિ તથા મનુષ્યજન્મને કૃતાર્થ કરવા ઈચ્છું છું. (૩૫) હે રાજન્, આ પ્રકારે ખટ્વાંગ રાજર્ષિએ સમ્પ્રાર્થના કરાયેલા **શ્રીહરિ** પ્રસન્ન થઈને બોલ્યા : 'હે રાજર્ષે ! તમારા ગામમાં હું આવીશ તેમાં સંશય કરવો નહિ. (૩૬) હાલમાં શરધારપુરમાં ચાતુર્માસ પર્યંત રહેવા માટે પ્રતિજ્ઞા કરેલી છે. માટે પ્રબોધિનીનો ઉત્સવ (કારતક સુદી ૧૧ અગિયારસે) શ્રી ધર્મદેવનો જન્મોત્સવ કરી તમારા કારિયાણી ગામમાં હું નિશ્ચે આવીશ.' (૩૭)

હે નૃપતે ! આ પ્રમાણે પ્રસન્ન મનથી શ્રીહરિએ કહ્યું ત્યારે ખટ્વાંગ રાજા પ્રસન્ન મનવાળા સતા શ્રીહરિને નમસ્કાર કરી દશમી તિથિમાં સૂર્યનારાયણ ઉદય પામ્યા ત્યારે પોતાના ગામમાં જવા માટે શરધારપુરથી નીકળ્યા તે બીજે દિવસે (એકાદશીને દિવસે) માર્ગમાં આવેલા ગઢપુરમાં આવ્યા. (૩૮) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે લોભદોષનિરૂપણનામૈકવિંશોઽધ્યાયઃ (૨૧)*

## અધ્યાય : ૨૨

### અભય રાજાએ સત્શાસ્ત્રના અર્થનાં પ્રમાણોથી શ્રીહરિના અવતારનો હેતુ સારી રીતે વિચારેલો છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પશ્ચિમ દિશામાં જે પંચાલ દેશો તેમાં પાપીજનોને પણ પાવન કરનારી અતિ સ્વચ્છ જળવાળી ઉન્મત્તગંગા નામની પ્રસિદ્ધ નદી છે. (૧) જે ઉન્મત્તગંગામાં અચ્યુત શ્રીહરિએ પોતાના એકાંતિક સાધુજનોની સાથે ઘણી વખત જળક્રીડા અને સ્નાન કર્યું છે. તેથી બ્રહ્મહત્યાદિ મહાપાતકોને નાશ કરનારા જળવાળી નદી છે. (૨)

હે રાજન્ ! તે અતિ પવિત્ર નદીને કિનારે બ્રાહ્મણ-ક્ષત્રિય-વૈશ્યાદિ ચારેય વર્ણના નિવાસભૂત દુર્ગપુર સંજ્ઞાવાળું પ્રસિદ્ધ નગર છે. (૩) પૂર્વે જે દુર્ગપુર દ્વારકાનગરનું શાખાનગર હોવાથી વસુદેવના પુત્ર શ્રીકૃષ્ણનું વિહારસ્થાન હતું. (૪) તે દુર્ગપુરમાં શ્રીકૃષ્ણમાં ભક્તિવાળા, ક્ષત્રિયના ધર્મમાં નિષ્ઠાવાળા, શૂરવીર, સત્શાસ્ત્રોના શ્રવણમાં પ્રીતિવાળા અભય નામના રાજા હતા. (૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

करियानपुरेशस्य नागेशनृपतेः सुताम् । स पूर्णाख्यस्त्रियां जातामुपयेमे सुरप्रभाम् ॥६॥ बुद्दाख्यपुरेशस्य तनयां रणगामिनः । सोमादेवीति विख्यातामुपयेमेऽपरां च सः ॥७॥ पतिव्रताधर्मनिष्ठे उभे अपि बभूवतुः । सुरप्रभायां तत्रासीत्तस्य कन्याचतुष्टयम् ॥८॥ आद्या तत्र जयासंज्ञा द्वितीया ललिता तथा । पाञ्चाली च तृतीयोक्ता नानीसंज्ञा तथान्तिमा ॥९॥ सोमादेव्यां बभूवैको गुणवानुत्तमः सुतः । सुशीलो मृदुवाक् शान्तः प्रह्लाद इव सन्मतिः ॥१०॥ जया च ललिता तत्र भगिन्यौ द्वे महामती । बाल्ये वैधव्यमापन्ने विरक्ते विषयेषु च ॥११॥ उरीकृतब्रह्मचर्ये कृच्छ्रादिव्रततत्परे । आस्तां स्वधर्मनिष्ठे च पितृवेश्मकृतस्थिती ॥१२॥ राज्ञः स्वसाऽऽसीत्सोमाख्या शालको गालवाभिधः । सर्वेऽप्येते स्वधर्मस्थाः कृष्णभक्तिपरास्तथा ॥१३॥ एतैः सह स भूपालः प्रत्यहं नियमेन च । श्रीमद्भागवतं राजञ्छुश्राव परमादरात् ॥१४॥ श्रुतां कथां भगवतः सङ्गत्य निशि तैः सह । कथयामास चित्ते च मुहुस्तां स व्यचिन्तयत् ॥१५॥ श्रुत्वा पुराणं सकलं दत्त्वा विप्राय दक्षिणाम् । पुनस्तदशृणोत्प्रीत्या चक्र एवं स सप्तशः ॥१६॥ यर्हि यर्ह्यशृणोत्तच्च तर्हि तर्हि व्यचिन्तयत् । यदा यदा हि धर्मस्येत्यादिपद्यार्थमात्मनि ॥१७॥ अधर्मोपचयो यर्हि स्याद्धर्मापचयो भुवि । तदावतारं भगवान् गृह्णातीत्येव निश्चयः ॥१८॥ अधर्मः साम्प्रतं भूमौ विवृद्धो दृश्यते नृषु । अतो हर्यवतारस्य कालोऽयमित्यवेद् हृदि ॥१९॥ अयमेव प्रतिदिनं विचारस्तस्य चेतसि । अवर्तत नरेशस्य विरक्तिं समुपेयुषः ॥२०॥ एकदा श्रावणे मासि कृष्णैकादशिकादिने । महोपचारैः कृष्णस्य पूजां स विधिनाऽकरोत् ॥२१॥ एकादशीव्रतप्रोक्तान्नियमान् पालयन् स च । पूजान्ते कृष्णपद्यानि गापयामास भूरिशः ॥२२॥

---

તે અભય રાજા કરિયાણા નગરના અધિપતિ નાગેશ રાજાની પૂર્ણા નામની પત્નીમાં ઉત્પન્ન થયેલી સુરપ્રભા નામની પુત્રીને પરણ્યા હતા. (૬) તથા બોટાદપુરના અધિપતિ રણગામી નામના રાજાની સોમાદેવી નામની પુત્રીને અભય રાજા પરણ્યા હતા. (૭) અભય રાજાની બંને પત્નીઓ પતિવ્રતા ધર્મમાં પ્રીતિવાળી હતી. તે બન્નેમાં સુરપ્રભા નામની પત્નીમાં અભય રાજાને ચાર કન્યાઓ ઉત્પન્ન થઈ. (૮) તેમાં પ્રથમ જયા, બીજી લલિતા, ત્રીજી પાંચાલી, ચોથી નાની નામવાળી કહી છે. (૯)

અભય રાજાની બીજી પત્નીમાં સદ્‌ગુણોથી યુક્ત એક **ઉત્તમ** નામવાળો પુત્ર હતો. તે સારી વર્તણૂકવાળા, કોમળ વાણીવાળા, શાંત સ્વભાવયુક્ત, પ્રહ્‌લાદની માફક સરળ બુદ્ધિવાળા હતા. (૧૦) તેમાં (અભયરાજાની કન્યાઓમાં) જયા અને લલિતા એ બે બહેનો મહાબુદ્ધિશાળી, બાલ્યાવસ્થામાં જ વૈધવ્યપણાને પામેલી માયિક શબ્દાદિ પંચવિષયોમાં વૈરાગ્ય પામેલી હતી. (૧૧) તેમજ પિતાને ઘેર કરેલી છે સ્થિતિ જેમણે એવી, નૈષ્ઠિક બ્રહ્મચર્યવ્રત અંગીકાર કરીને કૃચ્છ્રાદિ વ્રત પરાયણ, તથા શાસ્ત્રોકત વિધવા ધર્મમાં નિષ્ઠાવાળી હતી. (૧૨) અભય રાજાની બહેન સોમા નામની હતી. ગાલવ નામનો સાળો હતો. એ અભય રાજા વગેરે પણ પોતપોતાના ધર્મમાં નિષ્ઠાવાળા તથા શ્રીકૃષ્ણની ભક્તિપરાયણ હતા. (૧૩)

હે રાજન્ ! અભય રાજા તે સર્વ સંબંધીઓ સાથે દરરોજ નિયમપૂર્વક શ્રીમદ્ ભાગવતપુરાણ શ્રદ્ધાપૂર્વક સાંભળતા હતા. (૧૪) અભય રાજા રાત્રિમાં પોતાના સંબંધીઓ સાથે મળીને પુરાણીના મુખથી સાંભળેલી શ્રીકૃષ્ણની કથા તેઓને સંભળાવતા હતા. પોતાના અંતઃકરણમાં કથાનું વારંવાર ચિંતવન કરતા હતા. (૧૫) અભય રાજા સમગ્ર શ્રીમદ્ ભાગવત સાંભળી, પુરાણ કહેનારા બ્રાહ્મણને દક્ષિણા આપી ફરીથી પણ તે પુરાણ સ્નેહપૂર્વક સાંભળતા હતા : આ પ્રમાણે સાત વાર અભયરાજાએ શ્રવણ કર્યું. (૧૬) અભયરાજા જ્યારે જ્યારે સાંભળતા હતા ત્યારે ત્યારે "यदा यदा हि धर्मस्य क्षयो वृद्धिश्च पाप्मनः । तदा तु भगवानीश आत्मानं सृजते हरिः ॥" આ નવમા સ્કંધના છેલ્લા અધ્યાયમાં કહેલા શ્લોકનો અર્થ પોતાના મનમાં વિચારતા હતા : આ પૃથ્વીમાં જ્યારે અધર્મની વૃદ્ધિ થાય, ધર્મનો ક્ષય થાય ત્યારે ભગવાન અવતાર ગ્રહણ કરે છે આવો નિશ્ચય છે. પૃથ્વીમાં હાલ મનુષ્યોમાં અધર્મ વૃદ્ધિ પામેલો દેખાય છે માટે શ્રીકૃષ્ણના પ્રાદુર્ભાવનો આ અવસર છે. આવી રીતે અભયરાજા પોતાના હૃદયમાં જાણતા હતા. (૧૭-૧૮-૧૯)

હે રાજન્ ! વૈરાગ્ય પામેલા અભય રાજાના મનમાં દરરોજ આજ વિચાર થતો હતો. (૨૦) એક વખત શ્રાવણ માસમાં કૃષ્ણપક્ષની એકાદશીને દિવસે અભયરાજાએ મહાઉપચારોથી શાસ્ત્રવિધિ પ્રમાણે શ્રીકૃષ્ણનું પૂજન કર્યું. (૨૧) અભયરાજા એકાદશી વ્રતમાં કહેલા અહિંસા-બ્રહ્મચર્યાદિ નિયમોનું પાલન કરતા થકા મહાપૂજાના અંતમાં ઘણાં શ્રીકૃષ્ણના ગુણચરિત્રોનાં કીર્તનો ગવડાવતા હતા. (૨૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

अपराह्ने भागवतीं गीतां शुश्राव सादरम् । कथान्ते भगवद्वार्तामकरोत्स्वयमेव च ॥२३॥ शृण्वन्तु बन्धवः सर्वे वदामि स्वमनोगतम् । श्रेयः स्यादिह सर्वेषां भक्त्या कृष्णस्य वै नृणाम् ॥२४॥ प्रत्यक्षकृष्णे भक्तिस्तु सद्य एव फलप्रदा । प्रतिमायां तस्य सा च चिरेण फलदा मता ॥२५॥ धन्या हि पुरुषा लोके यैः साक्षात्कृष्ण ईक्षितः । पूजितश्च यथाशक्ति प्राप्तास्ते तु परां गतिम् ॥२६॥ अवतारो भवेद्यर्हि कृष्णस्य धरणीतले । तर्हि प्रत्यक्षभक्तिः स्याद्दुर्लभा सा तु देहिनाम् ॥२७॥ अवतारस्य हेतुस्तु कृष्णस्याधर्मपुष्टता । भुवि धर्मस्य च ग्लानिरत्र कृष्णवचो ब्रुवे ॥२८॥ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ! । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥२९॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥३०॥ आरम्भे हि कलेः पूर्वमधर्मोऽतिव्यवर्धत । तदा कृष्णः स्वयं जज्ञे देवक्यां वसुदेवतः ॥३१॥ अधर्माश्रयिणो हत्वा सोऽसुरांश्च सहस्रशः । वर्णाश्रमोचितं धर्मं भूमौ सम्यगपप्रथत् ॥३२॥ परीक्षित्सहदेवाद्यै रिपुञ्जयसमापनैः । चन्द्रवंश्यै रक्षिता वै तन्मर्यादा ततो नृपैः ॥३३॥ बृहद्रणादिभिर्भूपैः सुमित्रचरमैस्तथा । रक्षिता सूर्यवंश्यैश्च मर्यादा सा स्वशक्तितः ॥३४॥ कालेन क्षीयमाणाऽथ विक्रमार्केण भूभुजा । शालिवाहननाम्ना च यथावत्सा सुरक्षिता ॥३५॥ ततः श्रीशङ्कराचार्यो नास्तिकादीन्विजित्य च । धरण्यां स्वप्रतापेन धर्मसेतूनतिष्ठिपत् ॥३६॥ विष्णुस्वामी ततो रामानुजाचार्यश्च वीर्यवान् । मध्वाचार्यश्च निम्बार्को धर्माध्वानमपीपलन् ॥३७॥ ततः श्रीवल्लभाचार्यः सह गोस्वामिना

સાંજના સમયમાં શ્રીમદ્ ભગવદ્ગીતા આદરપૂર્વક સાંભળતા હતા. કથાના અંતમાં અભયરાજા જ સ્વસંબંધીઓની આગળ ભગવાનની વાર્તાઓ કરતા હતા. (૨૩) હે બંધુઓ ! હું મારા મનમાં રહેલો વિચાર કહું છું. તેને તમો સર્વે સાંભળો. આ લોકમાં સર્વે મનુષ્યોનું શ્રેય શ્રીકૃષ્ણની ભક્તિથી જ થાય. (૨૪)

પ્રત્યક્ષ શ્રીકૃષ્ણની ભક્તિ તો તત્કાળ જ ફળ આપનારી માનેલી છે. ને શ્રીકૃષ્ણની પ્રતિમામાં કરેલી ભક્તિ ઘણા સમયે ફળ આપનારી માની છે. (૨૫) જે પુરુષોએ પ્રત્યક્ષ શ્રીકૃષ્ણ જોયા છે, યથાશક્તિ સેવા કરી છે તે પુરુષો તો કૃતાર્થ છે. સર્વોત્તમ ભગવાનના ધામની પ્રાપ્તિરૂપ ગતિ પામેલા છે. (૨૬) ભૂતલમાં જ્યારે શ્રીકૃષ્ણના અવતારોનો પ્રાદુર્ભાવ થાય ત્યારે પ્રત્યક્ષ ભક્તિ થાય. તે પ્રત્યક્ષ ભક્તિ તો મનુષ્યોને દુર્લભ છે. (૨૭) શ્રી વાસુદેવના અવતારનું કારણ તો પૃથ્વીમાં સર્વ પ્રકારે અધર્મની વૃદ્ધિ અને ધર્મની હાનિ થાય તે છે. આ અર્થમાં શ્રીમદ્ ભગવદ્ગીતામાં શ્રીકૃષ્ણે અર્જુનના પ્રત્યે કહેલું વચન કહું છું : (૨૮)

હે અર્જુન ! જ્યારે જ્યારે ધર્મનો નાશ (ચાર વર્ણ અને ચાર આશ્રમની વ્યવસ્થાથી રહેલા મારા આરાધન-લક્ષણ સદાચારની હાનિ) થાય છે અને જ્યારે જ્યારે અધર્મની વૃદ્ધિ થાય છે ત્યારે ત્યારે હું આત્માને સર્જું છું. (નિત્યસિદ્ધ જ મારી મૂર્તિ પોતાની ઈચ્છાથી જ સર્વજનોને પ્રત્યક્ષપણાને પમાડું છું.) (૨૯) સત્શાસ્ત્રોમાં કહેલા ધર્મોને સેવનારા, ભગવદ્ ભક્ત સાધુઓના રક્ષણ માટે અને અધર્મવૃદ્ધિથી વૃદ્ધિ પામતા અસુરોના વિનાશ માટે અને વૈદિક ધર્મનું પ્રવર્તન કરવા માટે હું દરેક યુગમાં પ્રાદુર્ભાવ પામું છું. (૩૦) પહેલાં, ચોથા (કલિ) યુગના આરંભમાં અધર્મ અત્યંત વૃદ્ધિ પામ્યો હતો તે સમયે પોતે શ્રીકૃષ્ણભગવાન વસુદેવથી દેવકીમાં પ્રાદુર્ભાવ પામ્યા. (૩૧) શ્રીકૃષ્ણ વંશે સહિત અધર્મમાં નિષ્ઠાવાળા હજારો અસુરોનો વિનાશ કરી પૃથ્વીમાં ચાર વર્ણ અને ચાર આશ્રમને યોગ્ય ધર્મને સારી રીતે વિસ્તારતા હતા. (૩૨)

શ્રીકૃષ્ણના તિરોધાન પછી તેમણે સ્થાપન કરેલો વેદમાર્ગ (ધર્મસેતુ) પરીક્ષિત સહદેવ આદિ જેમાં છે અને રિપુંજયરાજા અંતમાં જેમાં છે એવા ચંદ્રવંશી રાજાઓએ રક્ષણ કરાયો. (૩૩) તે જ પ્રકારે બૃહદ્રણ રાજા આદિ જેમાં છે, સુમિત્ર રાજા અંતમાં છે એવા સૂર્યવંશમાં ઉત્પન્ન થયેલા રાજાઓએ ધર્મમર્યાદા પોતાની શક્તિ પ્રમાણે પાલન કરી. (૩૪) પછી કળિયુગના કાળબળથી ક્ષય પામતી ધર્મમર્યાદા વિક્રમાદિત્ય અને શાલિવાહન નામના રાજાએ યથાર્થપણે રક્ષણ કરી હતી. (૩૫) પછી શ્રી શંકરાચાર્ય બૌદ્ધ-જૈન આદિ નાસ્તિકોને જીતીને પોતાના પ્રતાપથી પૃથ્વીમાં ધર્મ-મર્યાદાઓને સ્થાપન કરતા હતા. (૩૬)

પછી અતિસમર્થ વિષ્ણુસ્વામી, રામાનુજાચાર્ય, મધ્વાચાર્ય અને નિમ્બાર્ક એ આચાર્યો ધર્મમાર્ગને પાલન કરતા હતા. (૩૭) પછી શ્રીવલ્લભાચાર્ય પોતાના પુત્ર શ્રી વિઠ્ઠલનાથજીની સાથે પૃથ્વીમાં શ્રીકૃષ્ણની ભક્તિ પ્રવર્તાવતા ધર્મમર્યાદાનું



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

भुवि । अपालयद्धर्मसेतून् कृष्णभक्तिं प्रवर्तयन् ॥३८॥ तयोरितोऽन्तर्हितयोः कलिः प्राप्तबलोऽद्य तु । साधर्मः सम्प्रवृत्तोऽस्ति गृहित्यागिनृपादिषु ॥३९॥ प्राप्तोऽस्ति धर्मः साङ्कर्यं नृषु वर्णाश्रमात्मकः । अधर्मरुचयः सन्ति प्रायशो ह्युत्तमा जनाः ॥४०॥ शूद्रा द्विजसमाचाराः शूद्राचारा द्विजातयः । त्यागिनः सगृहाः प्रायो गृहिणो भिक्षुका इव ॥४१॥ पतिव्रताधर्महीना व्यभिचारपराः स्त्रियः । सन्त्युत्तमाश्चापि नरा हिंसामांससुराप्रियाः ॥४२॥ स्त्रीरसद्रविणाद्याप्त्यै दम्भप्रायैव दृश्यते। भक्तिस्तथा तपोयोगौ धर्माचारश्च बन्धवः ! ॥४३॥ पुम्भिर्हास्यविनोदादौ तत्स्पर्शे चाधवाः स्त्रियः । रसाशने च सक्ताः सद्वासोभूषादिधारणे ॥४४॥ एवं बहुविधा भूमौ सम्प्रवृत्तिर्हि दृश्यते । अधर्मस्य कलेश्चापि दुर्दृश्या भगवज्जनैः ॥४५॥ तत्कृष्णस्यावतारस्य कालोऽयं शास्त्रदर्शितः । धर्मरक्षाव्रतधृतः प्राप्तोऽस्तीत्येव भाति मे ॥४६॥ यत्र कुत्रापि भगवान् प्रादुर्भूत इति ध्रुवम् । सच्छास्त्रवाक्यप्रामाण्यादधर्मोन्मूलनोद्यतः ॥४७॥ कृष्णः स भगवानस्मान्स्वकीयानिति वेत्तु च । रक्षत्वधर्मपाषण्डाद्दत्ताच्च कृपयेक्षणम् ॥४८॥ सुव्रत उवाच-इत्थं वदत्यभयभूमिपतौ तदैव खट्वाङ्गराजऋषिरस्य गृहं स आयात् । वृद्धस्य चात्मसुहृदः स च तस्य सम्यगातिथ्यमात्महितकारिणि आचचार ॥४९॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे अभयराजगृहे खट्वाङ्गागमननामा द्वाविंशोऽध्यायः ॥२२॥

---

પાલન કરતા હતા. (૩૮) શ્રીવલ્લભાચાર્ય તથા શ્રી વિઠ્ઠલનાથજીનું આ પૃથ્વીમાંથી અંતર્ધાન થયા પછી આ સમયે વૃદ્ધિ પામેલા બળવાળો અધર્મસર્ગ સહિત કળિયુગ, ગૃહસ્થજનો અને ત્યાગીઓ અને રાજાઓ વગેરે જેમાં છે એવા જનોમાં સારી રીતે પ્રવર્તેલો છે. (૩૯) મનુષ્યોમાં વર્ણાશ્રમ વ્યવસ્થાથી રહેલો ધર્મ અન્યોન્ય મિશ્રણભાવને પામેલો છે, ઉત્તમજનો બ્રાહ્મણો વગેરે ઘણું કરીને અધર્મમાં રુચિવાળા છે. (૪૦) ઘણું કરીને શૂદ્ર વર્ણો દ્વિજના સમાન આચરણવાળા છે. બ્રાહ્મણ-ક્ષત્રિય અને વૈશ્યો શૂદ્ર સમાન આચરણવાળા છે. ત્યાગીઓ ગૃહસ્થોના સમાન આચરણવાળા છે અને ગૃહસ્થો ભિક્ષુકોની માફક સ્ત્રી-અન્નાદિના અભાવથી ત્યાગીજનોની માફક જણાય છે. (૪૧)

સ્ત્રીઓ પતિવ્રતાના ધર્મથી રહિત, પરપુરુષના ઉપભોગમાં આસક્ત વર્તે છે. ઉત્તમ જનો પણ પ્રાણીદ્રોહ, માંસ-ભોજન-મદ્યપાન જેમને પ્રિય હોય એવા છે. (૪૨) હે બંધુઓ ! ભક્તિ = શ્રવણાદિ ભગવાનના ભજનની રીતિ તે પણ જાણે કે સ્ત્રીનો ઉપભોગ-મિષ્ટાન્નનો રસાસ્વાદ-ધન આદિ જેમાં છે એવા માનાદિની પ્રાપ્તિ માટે કપટથી યુક્ત જ હોય તેવી દેખાય છે. એજ પ્રકારે તપ-યોગ અને ધર્માચાર એ પણ સ્ત્રી આદિની પ્રાપ્તિ માટે જ દંભમય જ દેખાય છે. (૪૩) વિધવા સ્ત્રીઓ પુરુષોની સાથે હાસ્યવિનોદાદિ હાવભાવ વગેરેમાં, પુરુષના અંગસ્પર્શ અને વિવિધ પ્રકારના રસાસ્વાદમાં, સુંદર વસ્ત્રો અને અલંકારાદિ ધારણ કરવામાં આસક્તિયુક્ત થયેલી છે. (૪૪) આ પ્રકારે ભૂમિ ઉપર કળિયુગ અને અધર્મની પ્રવૃત્તિ ભગવદ્-ભક્તોએ દેખી ન શકાય તેવી અતિ અધિક વૃદ્ધિ પામેલી જણાય છે. માટે ધર્મરક્ષણના નિયમોના ધારક શ્રીકૃષ્ણ ભગવાનના અવતારનો શાસ્ત્રે જણાવેલો આ અવસર (સમય) પ્રાપ્ત થયો છે એમ જ મને નિશ્ચે જણાય છે. (૪૫-૪૬) સત્શાસ્ત્રોનાં વાક્યોનાં પ્રામાણ્ય ઉપરથી મને એવું ચોક્કસ જણાય છે કે અધર્મનો સમૂળ વિનાશ કરવામાં તત્પર તે ભગવાન જરૂર કોઈ પણ દેશમાં કોઈપણ ઠેકાણે પ્રગટ થયા હોવા જોઈએ. તે પ્રાદુર્ભાવ પામેલા ભગવાન અમોને પોતાના જાણો, અધર્મ અને પાંખડથી રક્ષણ કરો. કૃપા કરી અમોને દર્શન આપો. (૪૭-૪૮)

હે રાજન્ ! આ પ્રકારે અભય ભૂપ પોતાના બંધુઓને કહે છે તે સમયમાં જ ખટ્વાંગ રાજર્ષિ અભય રાજર્ષિના ગૃહ પ્રત્યે આવી પહોંચ્યા. અભય રાજાએ ગુણ અને અવસ્થાથી વૃદ્ધ, પોતાના અનન્ય મિત્ર, માટે જ પોતાના હિતકારી ખટ્વાંગ રાજર્ષિનો અતિથિને યોગ્ય સારો સત્કાર કર્યો. (૪૯) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે અભયરાજગૃહે ખટ્વાંગાગમનનામા દ્વાવિંશોઽધ્યાયઃ (૨૨)*

सुव्रत उवाच-**सन्मानितं तं नृपते ! स्वागतासनवारिभिः । फलाहारेण चोपेत्य निषसादाभयो नृपः ॥१॥ सुखोपविष्टं विश्रान्तं खट्वाङ्गं स महामतिः । अनूपविष्टस्त्रीपुत्रपुत्र्यादिः समपृच्छत ॥२॥ कुत आगम्यते धीमंस्त्वया धर्मविदाऽधुना । स्वजनानां हितायैव त्वदागमनमस्ति नः ॥३॥ इति पृष्टं स तं प्राह शरधाराख्यपत्तने। सहजानन्दनामाऽस्मद्गुरुरस्ति समागतः ॥४॥ तद्दर्शनार्थमगममहं परिमितानुगः । सहस्रशो जनास्तत्र मिलिता अभयाभवन् ॥५॥ तत्र तेन महांश्चक्रे कृष्णजन्माष्टमीतिथौ । उत्सवस्तमहं दृष्ट्वा स्वग्रामं यन्निहागमम् ॥६॥ खट्वाङ्गेनैवमुक्तोऽसौ नृपः प्रोवाच तं पुनः । सम्पन्नः कैर्गुणैः सोऽस्ति गुरुस्तव महाव्रत ! ॥७॥ महानेव पुमान्कश्चित्स भवेदिति तर्कये । त्वादृग्वर्षास्वन्यथा तं द्रष्टुं गच्छेत्कथं सुधीः ॥८॥ सामान्यः स गुरुर्नेति ततः सम्भावयाम्यहम् । वक्तुमर्हसि तस्य त्वं गुणानस्मान्सुहृत्तम ! ॥९॥** खट्वाङ्ग उवाच-**कथयिष्ये गुणांस्तस्य किन्तु ते भवदादिभिः । मन्येरन्सत्यभावेनेत्यत्र मे त्वस्ति संशयः ॥१०॥** अभय उवाच-**प्रतीतिर्धर्मनिष्ठस्य तव सत्यगिरोऽस्ति नः । मन्यामहे भवन्तं तु ज्येष्ठपाण्डववद्वयम् ॥११॥ अतस्तस्य प्रतापादि स्वसुतानिव नो भवान् । वक्तुमर्हति राजर्षे ! वयं स्मो हि मुमुक्षवः ॥१२॥ खट्वाङ्ग ऊचे भद्र! त्वं मनो दत्त्वा निशामय। शृण्वन्त्वन्ये बन्धवोऽपि वच आश्चर्यकृन्मम ॥१३॥ इत्युक्त्वा कथयामास प्रतापं तस्य सोऽखिलम् । यथावलोकितं स्वेन**

## અધ્યાય : ૨૩

### ગઢપુરમાં ખટ્વાંગ અને અભય રાજાનો મેળાપ અને બંનેના સંવાદમાં શ્રીહરિનું અલૌકિક ઐશ્વર્ય કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! ભલે પધાર્યા. કેમ સુખી છો ? વગેરે સ્વાગત પ્રશ્ન, બેસવા માટે આસન આપવું, મુખ-હાથ-પગ વગેરે ધોવા માટે જળ અને ફલાહાર આપવા વગેરેથી સત્કાર કરાયેલા ખટ્વાંગ રાજાની સમીપમાં જઈ અભયરાજા બેઠા. (૧) તેમની પાછળ બેઠેલાં છે બે પત્નીઓ પુત્ર ઉત્તમ તથા જયાદિ ચાર પુત્રીઓ એવા મહાબુદ્ધિશાળી અભય રાજા સુખેથી બેઠેલા અને માર્ગનો શ્રમ જેમનો મટી ગયો છે એવા ખટ્વાંગ રાજાને પૂછતા હતા : (૨)

હે મહામતે ! ધર્મજ્ઞ તમો હાલમાં કયા સ્થાનથી આવો છો ? તમારું અહી આવવાનું અમારા હિતને માટે જ છે. (૩) હે રાજન્, અભય રાજાએ પુછાયેલા ખટ્વાંગ રાજર્ષિ અભય રાજાને કહેવા લાગ્યા : હે અભય રાજન્ ! શરધારપુરમાં સહજાનંદ નામવાળા અમારા ગુરુ આવ્યા છે, (૪) હે અભય ! થોડા સેવકોની સાથે હું તેમનાં દર્શન માટે ગયો હતો. ત્યાં હજારો તેમના આશ્રિતજનો ભેગા થયા હતા. (૫) શરધારપુરમાં અમારા ગુરુએ કૃષ્ણ જન્માષ્ટમીને દિવસે અત્યુત્તમ ઉત્સવ કર્યો. હું તે ઉત્સવ જોઈ કારિયાણી ગામમાં જતાં આ દુર્ગપુરમાં તમારી સમીપે આવેલો છું. (૬)

હે રાજન્ ! ખટ્વાંગ રાજાએ આ પ્રમાણે કહેવાયેલા અભય ભૂપતિ ફરીથી ખટ્વાંગ રાજર્ષિને કહેવા લાગ્યા : હે મહાવ્રત ! તમારા ગુરુ કેવા ગુણોથી યુક્ત છે ? (૭) તમારા ગુરુ કોઈ મહાપુરુષ જ હોય આવું હું અનુમાન કરું છું. જો એવા ના હોય તો તમારા જેવા બુદ્ધિશાળી, વર્ષાૠતુમાં તે ગુરુના દર્શન કરવા કેમ જાય ? ના જ જાય. (૮) માટે શ્રી સહજાનંદ ગુરુ સાધારણ નથી જ, આવી હું સંભાવના કરું છું. હે પ્રિય મિત્ર ! માટે તમો તેમના ગુણો અમોને કહેવા માટે યોગ્ય છો. (૯)

**ખટ્વાંગ બોલ્યા** : હે અભય ! મારા ગુરુના ગુણો હું કહીશ પરંતુ તમો આદિ જનો તે ગુણો સત્યપણાથી માનશો કે કેમ ? તેમાં મને તો સંશય છે. (૧૦) ખટ્વાંગ રાજાનું આવું વચન સાંભળી **અભય રાજા બોલ્યા** : હે ખટ્વાંગ ! ધર્મનિષ્ઠાવાળા સત્યવાદી તમારો વિશ્વાસ અમોને છે જ, માટે અમો, તમોને તો યુધિષ્ઠિરની માફક સત્યવાણીવાળા જાણીએ છીએ. (૧૧)

માટે હે રાજર્ષે ! તમારા ગુરુનો પ્રતાપ તથા સદ્ગુણો પોતાના પુત્રની માફક જ કહેવા માટે યોગ્ય છો. કારણ કે અમો સર્વે મુમુક્ષુઓ છીએ. (૧૨) હે રાજન્, અભય રાજાએ આ પ્રમાણે કહેવાયેલા ખટ્વાંગ રાજા બોલ્યા, હે અભય રાજન્! તમો એકાગ્ર મનથી આશ્ચર્યકારી મારું વચન સાંભળો. બીજા સર્વે તમારા સંબંધીજનો પણ સાંભળો. (૧૩) તે ખટ્વાંગ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

संश्रुतं च सतां मुखात् ॥१४॥ मकरालयपुर्यादौ प्रतापो यः प्रदर्शितः । तेन तं कथयामास तस्य साधुगुणांस्तथा ॥१५॥ अलौकिकं तदैश्वर्यं स निशम्य धरापतिः । साश्चर्यः सकुटुम्बोऽभूद्धृष्टरोमा जहर्ष च ॥१६॥ अवतारो भगवतो जात एष न संशयः । इति निश्चित्य मनसा तं पप्रच्छ पुनः स च ॥१७॥ महामते ! त्वया प्रोक्तं यद्वचः सत्यमेव तत् । स कृष्णोपासकः स्वामी कृष्ण एव न संशयः ॥१८॥ कस्य पुत्रोऽभवत्सोऽत्र कस्मिन्देशे च सत्तम ! । सौराष्ट्रानागतः कर्हि कं च देशं गमिष्यति ॥१९॥ जन्मकर्माणि तस्य त्वं वक्तुमर्हसि तत्त्वतः । अस्मद्भाग्यवशादेव त्वमत्रासि समागतः ॥२०॥ कुर्वे विष्णववतारस्य चिन्तनं ह्यहमन्वहम् । तद्वार्ताऽद्य श्रुता दिष्ट्या तां वदाऽऽदित एव मे ॥२१॥ अस्मत्सम्बन्धिनोऽप्येते शुश्रूषन्तीदमुत्सुकाः । प्रामाण्यादाप्तवाक्यस्य त्वं तद्वद हितोऽसि नः ॥२२॥ सुव्रत उवाच–इत्थं स भक्तऋषभः परमादरेण पृष्टोऽभयेन सह बन्धुजनैः प्रसन्नः । श्रीनीलकण्ठचरितस्मृतिसम्भवायामानन्दसारसरिति प्रममज्ज सद्यः ॥२३॥ स्वान्तःस्फुरद्धरिपदाम्बुजलग्नचेतास्तूर्ष्णीं मुहूर्तमभवच्च गतस्मृतिः सः । देहस्मृतिं त्वथ शनैः समवाप्य भक्त्या हर्षाश्रुदृक् पुलकिताङ्गरुहोऽवदत्तम् ॥२४॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे खट्वाङ्गाभयसंवादनामा त्रयोविंशोऽध्यायः ॥२३॥

---

રાજા આ પ્રમાણે કહીને પોતે જે પ્રકારે જોયેલું અને શ્રીહરિના એકાંતિક સાધુ જનોના મુખથી સાંભળેલું તેવું તે શ્રીહરિનું સમગ્ર ઐશ્વર્ય અને પ્રતાપ કહેવા લાગ્યા. (૧૪)

માંગરોલપુરમાં પ્રથમ શ્રીહરિએ જે પ્રતાપ બતાવ્યો તે પ્રતાપ તથા તેમના પરમકૃપાળુપણું આદિ ભગવાનપણાને જણાવનારા સદ્‌ગુણો કહેવા લાગ્યા. (૧૫) તે શ્રીહરિનું અલૌકિક ઐશ્વર્ય સાંભળીને પુત્રાદિ બંધુ વર્ગ સહિત અભય રાજા હર્ષિત રોમવાળા સતા અત્યંત આનંદિત થયા. (૧૬) અભય રાજા 'આ ભગવાનનો અવતાર થયો આ વિષયમાં સંશય નથી જ' એમ પોતાના મનથી નિશ્ચય કરી ફરીથી તેમને પૂછવા લાગ્યા : (૧૭)

હે મહાબુદ્ધિશાળી ! તમોએ જે વચન કહ્યું તે સત્ય જ છે. શ્રીકૃષ્ણને પોતાના ઈષ્ટદેવ તરીકે માનતા શ્રી સહજાનંદ નામે તમારા ગુરુ પોતે જ, શ્રીકૃષ્ણ જ પ્રાદુર્ભાવ પામેલા છે. આમાં લેશમાત્ર સંશય નથી. (૧૮) હે સત્તમ ! ખટ્વાંગ ! આ પૃથ્વીમાં શ્રી સહજાનંદ સ્વામી કોના વંશમાં ઉત્પન્ન થયા ? કયા દેશમાં થયા? સૌરાષ્ટ્ર દેશમાં ક્યારે આવ્યા ? કયા દેશમાં જશે ? (શરધારપુરથી કયા દેશમાં જશે ?) (૧૯) તમો તેમના પ્રાદુર્ભાવનો પ્રકાર અને નાના પ્રકારનાં ચરિત્રો યથાર્થપણે કહેવા માટે યોગ્ય છો. તમો અમારા ભાગ્યથી જ મારા ભવનમાં આવેલા છો. (૨૦)

હું દરરોજ શ્રી વાસુદેવના પ્રાદુર્ભાવનું ચિંતન કરું છું. હાલમાં શ્રી ભગવાનના પ્રાદુર્ભાવનું વૃત્તાંત તમારા મુખથી સાંભળી મહા આનંદ થયો. તેમની વાર્તા પ્રથમથી જ મને તમો કહો. (૨૧) પોતાના હિતકારી જનનું વચન પ્રમાણિત હોવાથી આ અમારા સંબંધીઓ પણ ઉત્સાહવાળા, આ ભગવદ્‌વૃત્તાંત સાંભળવા ઈચ્છે છે માટે તે વૃત્તાંત કહો. કારણ કે તમો અમારા હિતસ્વી છો; માટે કહેવાને યોગ્ય છો. (૨૨)

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! આ પ્રમાણે બંધુજનોએ સહિત અભય રાજાએ પરમ શ્રદ્ધાથી પુછાયેલા ભક્તોત્તમ ખટ્વાંગ રાજર્ષિ અનંત કલ્યાણકારી દિવ્ય ગુણયુક્ત શોભાવિશિષ્ટ શ્રીનીલકંઠ ભગવાનનાં ચરિત્રોનું અનુસ્મરણ કરવાથી આવિર્ભાવ પામેલી જે આનંદ-સરિતા તેમાં તત્ક્ષણ જ નિમગ્ન થયા. (૨૩)

પોતાના અંતઃકરણમાં આવિર્ભાવ પામેલા શ્રીહરિના ચરણકમળમાં આસક્ત મનવાળા ખટ્વાંગ રાજા જેમની દેહના અનુસંધાનવાળી સ્મૃતિ નાશ પામી છે એવા થકા મુહૂર્ત પર્યંત મૌન રહ્યા પછી ધીમે ધીમે દેહની સ્મૃતિ પામીને ભક્તિથી (શ્રીહરિમાં અત્યંત સ્નેહથી) આનંદનાં આંસુઓ આંખમાં જેમને છે એવા, રોમાંચિત ગાત્રવાળા થઈને તે અભય રાજાને શ્રીહરિનાં ચરિત્ર કહેવા લાગ્યા. (૨૪) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે ખટ્વાંગાભયસંવાદ નામા ત્રયોવિંશોડધ્યાયઃ (૨૩)*

खट्वाङ्ग उवाच-**कोसलेषूत्तरेष्वस्ति ग्रामश्छुप्पयआह्वयः । तत्र धर्मावतारोऽभूद्देवशर्मा द्विजः सुधीः ॥१॥ सावर्णिगोत्रसम्भूतिः सामगो धर्मसंस्थितिः । भक्त्याख्या तस्य भार्याऽऽसीत्साध्वी धर्मे दृढस्थितिः ॥२॥ श्रीकृष्णं स सपत्नीको विष्णुयागेन भूयसा । वृन्दावने परमया भक्त्याऽऽराधयदादृतः ॥३॥ प्रसन्नो भगवांस्तस्मै भुवि धर्मप्रवृत्तये । अधर्मोच्छेदनार्थं च जज्ञे तस्मात्तु तत्स्त्रियाम् ॥४॥ हरिनाम्ना स विख्यातो बाल्यात्सर्वमनोहरः । निजेक्षणादिभिर्जीवान्बहून् पापादमोचयत् ॥५॥ सोऽनिर्दशाहो बालः स्वं जिघांसूनर्भकग्रहान् । कोटराप्रमुखान् सद्यो दहन्नद्रावयद्दृशा ॥६॥ कृत्यासृजं त्रिवर्षोऽसौ कालीदत्तं महासुरम् । व्यमोहयद्दृशा तेन स ममार परिभ्रमन् ॥७॥ कृत्योत्पातादिभीतेन ततः पित्रा स बालकः । अयोध्यायां समानिन्ये प्राक्तनं निजकेतनम् ॥८॥ मानुष्यनाट्यसञ्छन्ननिजैश्वर्य उदारधीः । आनन्दयामास जनांस्तत्र कौमारलीलया ॥९॥ सम्पन्नोऽभूत्स पौगण्डे सर्वैः साधुगुणैरपि । पित्रा कृतोपनयनो नैष्ठिकं व्रतमास्थितः ॥१०॥ गुरुं विस्मापयन्विद्याः सकला निगमादिकाः । अध्यैताल्पेन कालेन गृह एव वसन्निजे ॥११॥ जनन्यै जनकायाथ ददौ दिव्यगतिं प्रभुः । एकादशाब्दिको गेहाद्विरक्तः प्राव्रजत्ततः ॥१२॥ स्वयमाचरणेनैव नैष्ठिकब्रह्मचारिणाम् । धर्मान् स दर्शयामास तीर्थानि विचरन्भुवि ॥१३॥ तपस्विभ्यस्तपोरीतिं तपस्तप्त्वा ह्यदर्शयत् । योगरीतिं च योगिभ्यो युञ्जन् योगमदर्शयत् ॥१४॥**

---

## અધ્યાય : ૨૪

**શ્રીહરિનું જન્માદિ શુભ ચરિત્ર મહા ઐશ્વર્ય-ગુણોથી યુક્ત સંક્ષેપથી કહ્યું છે.**

**ખટ્વાંગ બોલ્યા** : હે અભય ભૂપતે ! ઉત્તર કૌશલ દેશમાં છપૈયા નામનું ગામ છે. ત્યાં ધર્માવતાર, બુદ્ધિમાન દેવશર્મા હતા. (૧) સાવર્ણિ ગોત્રમાં જેમનો જન્મ છે એવા સામવેદી, વર્ણાશ્રમધર્મમાં દૃઢ સ્થિતિવાળા હતા. તે દેવશર્માને ભક્તિ નામની સાધ્વીધર્મમાં દૃઢ નિષ્ઠાવાળી પત્ની હતાં. (૨)

પત્ની સહિત દેવશર્મા બ્રાહ્મણે વૃન્દાવનમાં અતિ મહાન વિષ્ણુયાગથી સર્વોત્તમ ભક્તિપૂર્વક આદર સહિત શ્રીકૃષ્ણની આરાધના કરી. (૩) દેવશર્મા વિપ્ર ઉપર પ્રસન્ન થયેલા સ્વયં શ્રીકૃષ્ણ, પૃથ્વીમાં એકાંતિક ધર્મ પ્રવર્તાવવા અને અધર્મનો નાશ કરવા દેવશર્માથી તેમની પત્ની ભક્તિમાં પ્રાદુર્ભાવ પામ્યા. (૪) હરિ નામથી પ્રસિદ્ધ, બાલ્યાવસ્થાથી આરંભીને સર્વ મનુષ્યોનાં ચિત્તનું તત્કાળ જ પોતાની મૂર્તિમાં આકર્ષણ કરનારા તે ભગવાન, પોતાનાં દર્શનાદિથી ઘણા જીવોને પાપરૂપ સંસારસાગરથી મુકાવતા હતા. (૫)

જેમને દશ દિવસ થયા નથી એવા બાળક શ્રીહરિએ પોતાનો નાશ કરવા ઈચ્છતા કોટરા વગેરે બાળગ્રહોને પોતાની દૃષ્ટિમાત્રથી બાળતા તત્કાળ જ નસાડી મૂકી. (૬) ત્રણ વર્ષની અવસ્થાવાળા શ્રીહરિએ કૃત્યાઓને ઉત્પન્ન કરનાર કાલિદત્ત નામના મહાઅસુરને પોતાની દૃષ્ટિમાત્રથી મોહિત કર્યો. તેનાથી તે અસુર પડેલાં વૃક્ષોમાં અહીંથી ત્યાં ભમતો મરણ પામ્યો. (૭) પછી કૃત્યાઓના ઉપદ્રવો વગેરેના ભયથી પોતાના પિતા ધર્મે બાલમૂર્તિ શ્રીહરિને અયોધ્યામાં લઈ જવાયા. (૮)

મનુષ્યનાટકથી ઢંકાયેલું છે પોતાનું ઐશ્વર્ય જેમનું એવા મહા બુદ્ધિશાળી શ્રીહરિ, બાલપણાની લીલાઓથી અયોધ્યામાં જનોને આનંદ પમાડતા હતા. (૯) શ્રીહરિ, પોતાના પિતાએ વિધિ પ્રમાણે ઉપનયન સંસ્કાર જેમનો કર્યો છે એવા થકા નૈષ્ઠિક વ્રતમાં રહેલા, પૌગંડાવસ્થામાં પણ સર્વ સાધુગુણોથી સંપન્ન હતા. (૧૦)

પોતાના ભવનમાં નિવાસ કરતા શ્રીહરિ, વિદ્યાગુરુ પોતાના પિતાને વિસ્મય પમાડતા, થોડા સમયમાં વેદાદિ ચૌદ વિદ્યાઓ ભણ્યા. (૧૧) પછી અગિયાર વર્ષની ઉંમરવાળા શ્રીહરિએ પોતાનાં માતુશ્રી અને પોતાના પિતા ધર્મદેવને દિવ્યગતિ આપી. પછી તીવ્ર વૈરાગ્યના વેગથી પોતાના ઘેરથી ચાલી નીકળ્યા. (૧૨) શ્રીહરિ પૃથ્વીમાં પુલહાશ્રમાદિ તીર્થોમાં ફરતા ફરતા પોતાનાં સદાચરણોથી જ નૈષ્ઠિક બ્રહ્મચારીઓના ધર્મો નૈષ્ઠિક બ્રહ્મચારીઓને બતાવતા હતા. (૧૩)

શ્રીહરિ મહાતપશ્ચર્યા કરી તપસ્વીઓને તપશ્ચર્યાનો પ્રકાર બતાવતા હતા. અષ્ટાંગ યોગને સાધતા શ્રીહરિ યોગીઓને અષ્ટાંગયોગના સાધનનો પ્રકાર બતાવતા હતા. (૧૪) શ્રીહરિએ સીરપુરમાં સિદ્ધપણાના અભિમાનવાળા જે શક્તિના

सिद्धाभिमानिशाक्तानां जह्रे सीरपुरे मदम् । दुष्प्रतिग्रहकृष्णाङ्गं विप्रं दृष्ट्याकरोत्सितम् ॥१५॥ वीरान् कृत्या महाशाक्तान्निर्जिगाय सहस्रशः । सहस्रशः स्वाश्रितानां पापकर्माण्यहापयत् ॥१६॥ असुराणां सहस्राणि शतानि च दुरात्मनाम् । जगन्नाथपुरेऽन्योन्यं विमोह्यासावघातयत् ॥१७॥ धर्मद्रुहां चासुराणां सहस्रं मानसे पुरे । सत्रधर्मनृपद्वारा धर्मगुप्त्या अजीघनत् ॥१८॥ नानातीर्थानि विचरंस्तत्र तत्र जनान्बहून् । स्ववीक्षास्पर्शभाषाद्यैर्मोचयामास संसृतेः ॥१९॥ उच्छेदयन्नधर्मं च धर्मं संस्थापयन्निह । लोजाख्यं पुरमागच्छत्सौराष्ट्रेषु स सन्मते ! ॥२०॥ कृष्णभक्तेः प्रथयितॄ रामानन्दमहामुनेः। वैष्णवाचार्यवर्यस्य शिष्यैस्तत्र स मानितः ॥२१॥ धर्मज्ञानतपोयोगविद्यावैराग्यभक्तिभिः । सर्वातिशायिभिः सर्वांस्तद्वतस्तानचित्रयत् ॥२२॥ साकं तैः पिप्पलग्रामे तमाचार्यमुपेयिवान् । उद्धवस्यैवावतारं वृतं शिष्यैः सहस्रशः ॥२३॥ दीक्षारीतिप्रवृत्त्यर्थं भुवि तस्मात्स वैष्णवीम् । महतीमग्रहीद्दीक्षां गुरूणां गुरुरप्यसौ ॥२४॥ सहजानन्द इत्याख्या गुरुणा विदधेऽस्य च । तेन नारायणमुनिरिति चार्थवती मुदा ॥२५॥ सम्पन्ने सद्गुणैः सर्वैस्तस्मिन्धर्मधुरं निजाम् । विन्यस्य भगवद्धाम कालेन प्राप्तवान्स च ॥२६॥ तस्याज्ञायामवर्तन्त सतीर्थ्याः सकला अपि । नारायणमुनेर्नित्यं गृहिणस्त्यागिनोऽपि च ॥२७॥ सद्धर्मस्य प्रवृत्त्यर्थं ततोऽसौ व्यचरद्भुवि । आदावगादब्धितटे मकरालयपत्तनम् ॥२८॥ विक्रमार्कशकस्याब्दे वसुभूतगजेन्दुभिः । प्रमिते तत्पुरं ह्यायात् स पौषे पूर्णिमातिथौ ॥२९॥ अधर्मादवितुं जीवान्स्वप्रतापं प्रदर्शयन् । तत्र मासानुवासाष्टौ धर्मं चाद्यं प्रवर्तयन् ॥३०॥

---

ઉપાસકો, તેમના મદને નાશ કર્યો. દુષ્ટ પ્રતિગ્રહથી કાળા શરીરવાળા બ્રાહ્મણને દૃષ્ટિમાત્રથી પૂર્વની માફક ગૌરાંગ-ગૌર શરીરવાળો કર્યો. (૧૫) શ્રીહરિ હજારો બટુકભૈરવાદિ વીરગણો, કૃત્યાઓ તથા પિબૈક આદિ દેવીઓના ઉપાસકોને પરાભવ પમાડીને પોતાનાં શરણે આવેલા હજારો આશ્રિતજનોને પાપકર્મોનો ત્યાગ કરાવતા હતા. (૧૬)

શ્રીહરિએ જગન્નાથપુરીમાં દુષ્કર્મમાં આસક્ત મનવાળા હજારો તથા સોએ સો અસુરોને મોહ પમાડી પરસ્પર નાશ કરાવ્યો. (૧૭) શ્રીહરિએ માનસપુરમાં ધર્મના દ્રોહી હજારો અસુરોને ધર્મના માર્ગનું સંરક્ષણ કરવા સત્રધર્મા નામના રાજા દ્વારા નાશ કરાવ્યો. (૧૮) નાના પ્રકારનાં તીર્થોમાં ફરતા શ્રીહરિ, તે તે તીર્થસ્થાનોમાં ઘણાં જનોને પોતાનાં દર્શન-સ્પર્શ-ભાષણાદિથી અને અન્નભોજનાદિથી જન્મમરણાત્મક સંસારથી મુકાવતા હતા. (૧૯)

હે સન્મતે ! અભય રાજન્ ! આ પ્રમાણે શ્રીહરિ આ પૃથ્વીમાં અધર્મનો નાશ કરવા પૂર્વક ધર્મનું સ્થાપન કરતા, સૌરાષ્ટ્ર દેશમાં લોજ નામના પુરમાં આવ્યા. (૨૦) ત્યાં શ્રીકૃષ્ણની એકાંતિકી ભક્તિનો પ્રચાર કરતા વૈષ્ણવાચાર્યોમાં શ્રેષ્ઠ-રામાનંદ મહામુનિના શિષ્ય મુક્તાનંદાદિ સાધુઓએ અત્યંત સત્કાર કરાયેલા શ્રીહરિ, સર્વનાથી પણ અતિ શ્રેષ્ઠ ધર્મ-જ્ઞાન-તપ-યોગ-વિદ્યા-વૈરાગ્ય અને ભક્તિથી યુક્ત થકા તે ધર્માદિ યુક્ત મુક્તાનંદાદિને આશ્ચર્ય પમાડતા હતા. (૨૧-૨૨) મુક્તાનંદાદિ સંતો સાથે શ્રીહરિને ઉદ્ધવાવતાર, હજારો શિષ્યોથી વિંટાયેલા શ્રી રામાનંદમુનિનો મેળાપ થયો. (૨૩)

ગુરુઓના પણ ગુરુ આ શ્રીહરિએ પૃથ્વીમાં દીક્ષાની રીતિ પ્રવર્તાવવા રામાનંદમુનિ થકી શ્રીકૃષ્ણના સંબંધવાળી મહાદીક્ષા વિધિ પ્રમાણે ગ્રહણ કરી. (૨૪) ગુરુ શ્રી રામાનંદ સ્વામીએ શ્રીહરિનું સાર્થક નામ **'સહજાનંદ'** આ પ્રકારનું નામ અને **'નારાયણમુનિ'** નામ હર્ષપૂર્વક પાડ્યું. (૨૫)

શ્રી રામાનંદમુનિ, સ્વધર્મ-જ્ઞાન-વૈરાગ્ય-ભક્તિ આદિ સદ્‌ગુણોથી યુક્ત શ્રીનારાયણમુનિને પોતાની ધર્મધુરા સમર્પણ કરી દેહાવસાન સમય પ્રાપ્ત થયે ભગવદ્ધામમાં ગયા. (૨૬)

ગૃહસ્થો અને ત્યાગી ભક્તો સમગ્ર જે એક ગુરુના શિષ્યો તે નારાયણમુનિની આજ્ઞામાં નિરંતર વર્તતા હતા. (૨૭) પછી નારાયણમુનિ પૃથ્વીમાં ભાગવત ધર્મની પ્રવૃત્તિ માટે વિચરતા હતા. પ્રથમ સમુદ્રને કિનારે રહેલ માંગરોળપુરમાં આવ્યા. (૨૮) શ્રીહરિ સંવત્ ૧૮૫૮ના પોષ માસની પૂર્ણિમાને દિવસે માંગરોળપુરમાં આવ્યા. (૨૯)

શ્રીહરિએ અધર્મથી જીવોનું રક્ષણ કરવા પોતાનો પ્રતાપ બતાવતા પ્રથમ સનાતન ધર્મ પ્રવર્તાવતા થકા ત્યાં આઠ માસ સુધી નિવાસ કર્યો. (૩૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

पूर्तकर्मोत्सवे प्रादाद्विप्रेभ्यः स्वस्य दर्शनम् । विष्णुरूपेण तेऽथाऽऽर्चन्मन्त्रैस्तं वैदिकैर्मुदा ॥३१॥ महान्तमुत्सवं चक्रे जन्माष्टम्यां स तत्र च । प्रादर्शयत्कृष्णरूपं सर्वान्स्वीयमलौकिकम् ॥३२॥ रामानन्दमुनेः शिष्याः स्वोपास्यं राधिकापतिम् । तदा तमेव निश्चित्य तं समाश्रित्य भेजिरे ॥३३॥ मुमुक्षवोऽन्येऽपि नरा नार्यश्च बहवस्तदा । तमेव शरणं प्राप्य भेजिरे परमादरात् ॥३४॥ तदा सदःस्थेन मया साक्षात्कृष्णोऽयमेव हि । इति निश्चित्य मनसा भेजे तच्छिष्यताऽनघ ! ॥३५॥ स्वैश्वर्यं प्रकटीकुर्वन्निजमूर्तावकारयत् । प्राणवृत्तिनिरोधं स स्त्रीपुंसानां सहस्रशः ॥३६॥ तत्राधिकारिणो ह्येते सन्त्येतेऽनधिकारिणः । नापश्यदित्यसौ किञ्चित्प्रावृषीव घनाघनः ॥३७॥ अत्याश्चर्यं जनाः प्रापुस्तेनैवाद्भुतकर्मणा । तस्याश्रयं ततः कृत्वा तस्थुः सद्धर्मवर्त्मनि ॥३८॥ सर्वेभ्यो मतवादिभ्यस्तत्तदिष्टामरात्मना । ददौ स दर्शनं तेन विस्मितास्ते तमाश्रयन् ॥३९॥ कालवाण्यां स बहुधा योगैश्वर्यमलौकिकम् । दर्शयामास भगवान्सर्वसंशयनुत्तये ॥४०॥ सहस्रशः स्वभक्तानां समाधौ च स्वतन्त्रताम् । कृपयाऽचीकरत्स्वामी विना साधनसम्पदम् ॥४१॥ महान्तं विष्णुयागं च चक्र ओजस्वतीतटे । यथेष्टं भोजयामास वत्सरार्धं स वाडवान् ॥४२॥ द्रविणं हेमरूप्यादि विप्रेभ्यश्च ददौ भृशम् । घनाघन इवाम्बूनि यानानि वसनानि च ॥४३॥ उत्सवान्महतः कुर्वन्प्रतिग्रामं स मानद ! । साम्प्रतं शरधाराख्यं पुरमेत्योषितोऽस्ति हि ॥४४॥ मया स्वग्राममानेतुं प्रार्थितो जनसंसदि । कार्तिक्यामागमिष्यामीत्येवं प्रत्यश्रृणोत्किल ॥४५॥ सैष नारायणमुनिः सहजानन्दनामकः । स्वामिनारायणाख्यश्च स्वाम्याख्यश्च विराजते ॥४६॥ हरिकृष्णो हरिः कृष्णो नीलकण्ठश्च स श्रुतः ।

---

શ્રીહરિએ પૂર્તકર્મના ઉત્સવ નિમિત્તવાળા વિષ્ણુની પૂજાના મહોત્સવમાં બ્રાહ્મણોને વિષ્ણુરૂપે પોતાનાં દર્શન આપ્યાં પછી બ્રાહ્મણો શ્રીહરિને હર્ષ પૂર્વક વૈદિક મંત્રોથી પૂજતા હતા. (૩૧) શ્રીહરિએ તે પુરમાં જન્માષ્ટમીનો મહોત્સવ કર્યો અને તે ઉત્સવમાં પોતાનું અલૌકિક શ્રીકૃષ્ણ સ્વરૂપ સર્વ જનોને બતાવ્યું. (૩૨) તે સમયે રામાનંદ મુનિના શિષ્યો, મુક્તાનંદાદિ શ્રી નારાયણમુનિને જ પોતાના ઈષ્ટદેવ રાધિકાપતિ શ્રીકૃષ્ણનો નિશ્ચય કરી તેમનો આશ્રય કરી ભજતા હતા. (૩૩) તે સમયે મુક્તિની ઈચ્છાવાળા બીજા પણ ઘણા પુરુષો અને સ્ત્રીઓ નારાયણમુનિનું જ શરણ પામી પરમાદરપૂર્વક ભજન કરતા હતા. (૩૪)

હે નિષ્પાપ ! તે સમયે સભામાં બેઠેલા મેં આ નારાયણ મુનિને જ પ્રત્યક્ષ કૃષ્ણ જ છે એમ નિશ્ચય કર્યો. આ પ્રમાણે મનમાં નિશ્ચય કરી હું તે શ્રી નારાયણ મુનિના શિષ્યભાવને પામ્યો છું. (૩૫) શ્રીહરિ પોતાનો પ્રતાપ પ્રગટ કરતા સતા હજારો સ્ત્રીપુરુષોના પ્રાણની વૃત્તિનો નિરોધ પોતાના સ્વરૂપમાં સમાધિ દ્વારા કરાવતા હતા. (૩૬) સમાધિમાં એ જનો યોગ્ય છે કે નથી આ પ્રકારે શ્રીહરિ વર્ષાૠતુમાં મેઘ (વર્ષવા યોગ્ય સ્થળને જ) જેમ તેમ લગારેય જોતા નહોતા. (૩૭)

જોનારા જનો આ સમાધિરૂપ અલૌકિક ક્રિયાથી બહુ વિસ્મય પામ્યા. પછી શ્રીહરિનો આશ્રય કરી સદ્ધર્મના માર્ગમાં પ્રવર્તતા હતા. (૩૮) શ્રીહરિ, સર્વ મતવાદીઓને તેના તેના ઈષ્ટદેવરૂપે દર્શન આપતા હતા તેથી આશ્ચર્ય પામેલા તે મતવાદીઓ પોતાના મતનો ત્યાગ કરી શ્રીહરિના જ એક શરણને પામી તેમને જ પરમેશ્વર જાણી ભજતા હતા. (૩૯) શ્રીહરિ કાલવાણી ગામમાં સર્વજનોના સંશય નાશ કરવા અલૌકિક યોગનું સમાધિસ્વરૂપ-ઐશ્વર્ય, ઘણા પ્રકારે જનોને બતાવતા હતા. (૪૦)

શ્રી નારાયણમુનિ સાધનસામગ્રી વિના કૃપાપૂર્વક જોવા માત્રથી, હજારો પોતાના ભકતોને સમાધિમાં સ્વતંત્રપણું કરાવતા હતા. (૪૧) શ્રીહરિ ઓજસ્વતી નદીના તીરે મહાવિષ્ણુયાગ કરતા હતા અને છ માસ સુધી બ્રાહ્મણોને યથેષ્ટ તેમને ઈચ્છિત ભોજન કરાવતા હતા. (૪૨) શ્રીહરિ વરસતો મેઘ જળને જ જેમ તેમ સુવર્ણચાંદી વગેરે તથા ધન-વાહનો-મહાવસ્ત્રો આદિ બ્રાહ્મણોને અત્યંત આપતા હતા. (૪૩)

હે માનદ્ ! આ પ્રકારે શ્રીહરિ પોતાના ભક્તોનાં દરેક ગામોમાં મોટા ઉત્સવો કરતા થકા હાલમાં શરધારપુરમાં આવીને નિવાસ કરી રહ્યા છે. (૪૪) મેં સમગ્ર ભક્તોની સભામાં મારા ગામમાં લાવવા પ્રાર્થના કરાયેલા શ્રીહરિએ કારતક શુદી પૂર્ણિમા પછી આવીશ : આવી મને પ્રતિજ્ઞા કરેલી છે. (૪૫) તે આ નારાયણ મુનિ નામવાળા (સ્વયં શ્રીહરિ) સહજાનંદ, સ્વામિનારાયણ-સ્વામી આવા નામથી હાલ શરધારપુરમાં વિરાજે છે. (૪૬) તથા હરિકૃષ્ણ, હરિ-કૃષ્ણ અને નીલકંઠ એ ગુણ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

गौणानि तस्य नामानि सन्त्यन्यानि बहूनि च ॥४७॥ सहस्त्रशस्त्यागिजनैर्गृहिभिश्च सहस्त्रशः । योषाभिर्धर्मनिष्ठाभिः सेव्यते स च भक्तितः ॥४८॥ भक्तिधर्मादयोऽप्येनं सेवन्ते दिव्यविग्रहाः । केचित्तान् पुण्यवन्तोऽत्र वीक्षन्त इति शुश्रुम ॥४९॥ केभ्यश्चित्कृष्णरूपेण राधिकापार्षदादिभिः । ददाति दर्शनं स्वामी गोलोकेन सहैव च ॥५०॥ केभ्यश्चिद्विष्णुरूपेण साकं लक्ष्म्या च पार्षदैः । ददाति दर्शनं स्वामी वैकुण्ठेन च स प्रभुः ॥५१॥ साकं निरन्नमुक्तैश्च श्वेतद्वीपेन भास्वता । महापुरुषरूपेण दत्ते केभ्यश्च दर्शनम् ॥५२॥ केभ्यश्चिद्भूमरूपेण सह लक्ष्म्यादिशक्तिभिः । पार्षदैश्चेक्षणं दत्ते सहैवाव्याकृतेन सः ॥५३॥ केभ्यश्चिद्दर्शनं दत्ते नरनारायणात्मना । विशालया च मुनिभिः सहानेकैस्तपस्विभिः ॥५४॥ योगेश्वरस्वरूपेण सह शेषेण च श्रिया । केभ्यश्चिद्दर्शनं स्वस्य दत्ते क्षीराब्धिना च सः ॥५५॥ हिरण्मयस्वरूपेण केभ्यश्चित्स्वस्य दर्शनम् । दत्ते सहार्कबिम्बेन भगवान्स सतां पतिः ॥५६॥ ददाति यज्ञपुरुषस्वरूपेणात्मदर्शनम् । सहाग्निमण्डलेनासौ केभ्यश्चिद्भक्तवत्सलः ॥५७॥ तस्मात्साक्षाद्धि भगवान्स एवास्ति जगत्प्रभुः । तस्मात्परतरं किञ्चिन्नैवास्तीति विनिश्चयः ॥५८॥ विनैवाष्टाङ्गयोगं च समाधावीदृशं स वै । नाडीप्राणान्निरोध्यैव ददाति स्वस्य दर्शनम् ॥५९॥ तेन सर्वेऽपि मनुजा आश्चर्यं प्राप्नुवन्ति हि । मुमुक्षवस्तु ये तत्र ते भजन्ति च तं प्रभुम् ॥६०॥ प्रतापमन्यमप्यस्य प्रसिद्धं भूतलेऽखिले । कथयामि महाभाग ! प्रत्यक्षं योऽनुभूयते ॥६१॥ ये केचिद्भुवि तद्भक्ता ज्ञानिनोऽज्ञानिनोऽपि वा । शिशवस्तरुणा वृद्धा नरा योषाश्च षण्डकाः ॥६२॥ साक्षात्तद्दर्शनं प्राप्ता न प्राप्ता वा कदाचन । स्मरन्ति केवलं तं तद्भक्तवाक्प्राप्तनिश्चयाः ॥६३॥

વિશેષથી  કરેલા નામોથી પ્રસિદ્ધ છે, તેમજ તેમનાં સ્વરૂપ ગુણો અને ચરિત્રોને અનુલક્ષીને બીજાં હજારો નામો છે. (૪૭) અપરિમિત ત્યાગીજનો જે વર્ણીઓ અને સાધુઓ, તથા હજારો ગૃહસ્થાશ્રમીજનો અને હજારો પોતપોતાના ધર્મમાં રહેલી સધવા અને વિધવા સ્ત્રીઓ તે આ શ્રીહરિની પ્રેમ સહિત નવ પ્રકારની ભક્તિથી સેવા કરે છે. (૪૮) દિવ્ય દેહવાળા ભક્તિ-ધર્માદિ પણ નારાયણ મુનિનું સેવન કરે છે. આ લોકમાં કેટલાક મહા પુણ્યવાળા જનો તે ભક્તિ-ધર્માદિને પ્રત્યક્ષ જુએ છે એમ સાંભળ્યું છે. (૪૯)

શ્રીહરિ ગોલોક ધામની સાથે જ રાધિકા અને શ્રીદામા-નંદ-સુનંદાદિ જેમાં છે એવા સમૃદ્ધિ-ઐશ્વર્યાદિથી યુક્ત શ્રીકૃષ્ણ સ્વરૂપે કેટલાક પોતાના ભક્તોને દર્શન આપે છે. (૫૦) પ્રભુ શ્રીહરિ વૈકુંઠધામની સાથે, લક્ષ્મી-ગરુડાદિની સાથે વિષ્ણુરૂપે કેટલાંકને દર્શન આપે છે. (૫૧) શ્રીહરિ અતિપ્રકાશવાળા શ્વેતદ્વીપનામના ધામ સાથે અને નિરન્નમુક્તોએ સહિત મહાપુરુષરૂપે કેટલાક જનોને દર્શન આપે છે. (૫૨) શ્રીહરિ અવ્યાકૃત ધામની સાથે લક્ષ્મી આદિ શક્તિઓ અને સુનંદાદિ પાર્ષદોએ સહિત ભૂમા પુરુષરૂપે કેટલાંક જનોને દર્શન આપે છે. (૫૩) શ્રીહરિ બદરિકાશ્રમે સહિત તપસ્વી એવા અપરિમિત મુનિઓએ સહિત નરનારાયણ સ્વરૂપે કેટલાંકને દર્શન આપે છે. (૫૪) શ્રીહરિ ક્ષીરસાગર નામના ધામે સહિત 'અનંત' નામના શેષ અને લક્ષ્મી સાથે યોગેશ્વરરૂપે કેટલાંક જનોને પોતાનાં દર્શન આપે છે. (૫૫)

સત્પુરુષોના પતિ શ્રીહરિ, સૂર્યમંડળે સહિત હિરણ્યમય સ્વરૂપે કેટલાંક જનોને પોતાનાં દર્શન આપે છે. (૫૬) ભક્તવત્સલ શ્રીહરિ, અગ્નિમંડળે સહિત યજ્ઞપુરુષરૂપે કેટલાંકને પોતાનાં દર્શન આપે છે. (૫૭) તેથી શ્રીકૃષ્ણાદિ સમગ્ર સ્વસ્વરૂપે દર્શન આપવાથી સમગ્ર જગતના એક સ્વામી, સમગ્ર ઐશ્વર્યસંપન્ન સાક્ષાત્ શ્રીહરિકૃષ્ણ જ છે માટે તેમનાથી અધિક-શ્રેષ્ઠ કોઈ છે જ નહિ માટે સર્વના કારણ છે : આવો શાસ્ત્રાનુભવ સિદ્ધાંત છે. (૫૮)

અષ્ટાંગયોગ વિના સમાધિમાં નાડીઓમાં પ્રાણોને રોકાવીને શ્રીહરિ પોતાનાં દર્શન આપે છે. (૫૯) માટે સર્વે જનો પણ અતિ વિસ્મય પામે છે. તે મનુષ્યોમાં જે મુમુક્ષુઓ તે તો શ્રીહરિને પરમેશ્વર જાણીને તેમનું ભજન કરે છે. (૬૦) હે મહાભાગ્યશાળી ! અભય રાજન્, સમગ્ર ભૂમંડળમાં પ્રસિદ્ધ આ શ્રીહરિનો બીજો પણ પ્રતાપ હું તમોને કહું છું જે પ્રતાપ પ્રત્યક્ષ જ સર્વજનોએ અનુભવ કરાય છે. (૬૧)

પૃથ્વીમાં કેટલાક શ્રીહરિને ભજતા જનો, જ્ઞાનીઓ-અજ્ઞાનીઓ-બાળકો-વૃદ્ધપુરુષો તથા સ્ત્રીઓ અને નપુંસકો સાક્ષાત્ શ્રીહરિનાં દર્શન પામેલા; અને જેમને ક્યારેય પણ તેમનાં દર્શન નથી થયાં કેવળ શ્રીહરિના સાધુ આદિ ભક્તોની માહાત્મ્ય સહિત તેમના સ્વરૂપના જ્ઞાનની વાતોથી **'શ્રીહરિ જ ભગવાન છે'** એવો નિશ્ચય જેમને છે એવા ભક્તો, શ્રીહરિને નામોચ્ચારણ પૂર્વક ચિંતવે છે. (૬૨-૬૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**सर्व एतेऽप्यन्तकाले दुःखमप्राप्य किञ्चन । विमानस्थं तमेवेशं वीक्षन्ते सहपार्षदम् ॥६४॥ आरोपिता विमानं ते पार्षदैर्दिव्यमद्भुतम्। धाम तस्य प्रयान्त्येव योगिनामपि वाञ्छितम् ॥६५॥ म्रियमाणा जना एव वीक्षन्ते तं न केवलम् । अन्येऽप्यभक्ता अपि तं तत्रेक्षन्ते क्वचित्क्वचित् ॥६६॥ साश्चर्यं तमवेक्ष्यैव गतानीश्वरसंशयाः । तस्यैवाश्रयणं सद्यः सुधियो ह्यत्र कुर्वते ॥६७॥ ईदृक् सामर्थ्यमन्यस्य न भवेद्धरिमन्तरा । अतो यूयं च तं वित्त सर्वेऽसौ भगवानिति ॥६८॥ ततश्च तस्य ध्यानेन यूयं स्वहृदये प्रभुम् । तथाविधं द्रक्ष्यथेति निश्चयो नात्र संशयः ॥६९॥** सुव्रत उवाच-**इति तद्वाक्यमाश्रुत्य स राजा चास्य बन्धवः । कृष्ण एवैष इत्येव निश्चयं चक्रिरे दृढम् ॥७०॥ ततोऽतिहृष्टास्ते तस्य प्रशंसां बहुधा नृप ! । चक्रुस्तं पुनरप्राक्षीदभयः सर्वसम्मतात् ॥७१॥** अभय उवाच-**राजर्षे ! यत्त्वया प्रोक्तं सर्वं तत्तथ्यमेव हि । धन्योऽसि येन साक्षाच्छ्रीकृष्णो दृष्टश्च निश्चितः ॥७२॥ अद्यप्रभृति तस्य स्मो वयं सर्व इति ध्रुवम् । तस्य ध्यानं यथाकार्यं वक्तुमर्हसि नस्तथा ॥७३॥** सुव्रत उवाच-**सम्पृष्ट इत्थमभयेन महादरेण हृष्टः स कृष्णपदपद्मषडङ्घ्रिचेताः । ध्यानं हरेर्गदितुमारभतोर्ध्वरेताः सम्प्रीणयन्सपरिवारममुं नरेश ! ॥७४॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे सङ्क्षेपेण हरिचरित्रवर्णननामा चतुर्विंशोऽध्यायः ॥२४॥

---

એ સર્વ ભક્તો અંતકાળે કોઈ પણ પ્રકારની પીડાનો અનુભવ કર્યા વગર વિમાનમાં બેસીને પાર્ષદો સહિત શ્રીહરિને જુએ છે. (૬૪)

અંતકાળે શ્રીહરિને જોનારા તે જનો શ્રીહરિની સાથે આવેલા પાર્ષદોએ દિવ્ય આશ્ચર્યજનક વિમાનમાં બેસાર્યા થકા યોગીજનોને પણ દુર્લભ એવા અભીષ્ટ શ્રીહરિના ગોલોક, અક્ષરાદિક ધામમાં જાય છે જ. (૬૫) કેવળ સમીપમાં મરણવાળા જનો જ શ્રીહરિને જુએ છે એમ નથી પરંતુ બીજા સત્સંગીજનો તથા કુસંગીજનો પણ ત્યાં મરણાસન્ન જન પાસે ક્યારેક ક્યારેક શ્રીહરિને જુએ છે. (૬૬) આશ્ચર્યપૂર્વક શ્રીહરિને જોઈ જેઓને આ ઈશ્વર નહિ હોય એવો સંશય નાશ પામ્યો છે એવા આ લોકમાં રહેલા બુદ્ધિશાળીઓ તત્કાળ જ શ્રીહરિનો આશ્રય કરે છે. (૬૭) પરમેશ્વર વિના બીજા દેવ-મનુષ્યાદિનું આવા પ્રકારનું સામર્થ્ય હોય જ નહિ, માટે તમો સર્વે આ શ્રીહરિ પ્રત્યક્ષ ભગવાન છે એમ જાણો. (૬૮) પછી તમો શ્રીહરિના ધ્યાનથી પોતાના મનમાં કહેલા મહિમાવાળા પ્રભુને જોશો આવો નિર્ણય છે એમાં સંશય નથી. (૬૯)

હે રાજન્ ! આવું ખટ્વાંગ રાજર્ષિનું વાક્ય સાંભળી અભય રાજા અને તેમના બંધુજનોએ 'આ શ્રીહરિ ભગવાન શ્રીકૃષ્ણ વાસુદેવ જ છે' એવો દૃઢ નિશ્ચય કર્યો. (૭૦) હે રાજર્ષિ ! પછી અતિ પ્રસન્ન મનવાળા અભયાદિ (પરિવાર), રાજર્ષિની ઘણા પ્રકારે પ્રશંસા કરતા હતા. અભય રાજાએ પણ સર્વ બંધુઓની સંમતિથી ફરીથી ખટ્વાંગ રાજર્ષિને પૂછ્યું : (૭૧)

હે રાજર્ષિ ! તમોએ જે કહ્યું તે સર્વ નિશ્ચે સત્ય જ છે. તમો કૃતાર્થ છો. જે માટે તમોએ પ્રત્યક્ષ શ્રીકૃષ્ણને જોયા અને શાસ્ત્રાનુભવ પ્રમાણોથી નિર્ણય કર્યો છે. (૭૨) અમો સર્વે આ દિવસથી આરંભીને તે શ્રીહરિના જ છીએ. આ વાત નિશ્ચિત જ છે. હે રાજર્ષે ! શ્રીહરિનું ધ્યાન જે પ્રકારે કરવા યોગ્ય હોય તે પ્રકારે અમોને કહેવા યોગ્ય છો. (૭૩)

સુવ્રત મુનિ બોલ્યા : હે નરેશ ! આ પ્રમાણે અભય રાજાએ પૂછેલા શ્રીહરિકૃષ્ણ ભગવાનનાં ચરણકમળોમાં જેમનું ચિત્ત ભ્રમરની માફક આસક્ત છે એવા નૈષ્ઠિક બ્રહ્મચારી ખટ્વાંગ રાજર્ષિ હર્ષ પામીને પરિવારે સહિત અભય રાજાને શ્રીહરિકૃષ્ણના સ્વરૂપના ધ્યાનનો પ્રકાર કહેવાથી પ્રસન્ન કરવા શ્રી નારાયણ મુનિનું ધ્યાન કહેવા માટે આરંભ કરતા હતા. (૭૪) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે સંક્ષેપેણ હરિચરિત્રવર્ણનનામા ચતુર્વિંશોઽધ્યાય: (૨૪)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

खट्वाङ्ग उवाच-**शुचिर्भूत्वा शुचौ देशे मुमुक्षुर्निरुपद्रवे । स्वस्तिकासनमासीन ऋजुकायो भवेन्मुनिः ॥१॥ हस्तौ स्वोत्सङ्ग आधाय स्वनासाग्रनिरीक्षणः । अव्यग्रमनसा ध्यायेत्तं स्वीयहृदयाम्बुजे ॥२॥ आसीनं वा स्थितं ध्यायेन्नारायणमुनिं पुरः । अतिरम्यनराकारं तारुण्ये वयसि स्थितम् ॥३॥ रूपानुरूपावयवं नवपद्मदलेक्षणम् । अतीव दर्शनीयं च शान्तं कोमलभाषणम् ॥४॥ नूत्नरक्तारविन्दाभहस्ताङ्घ्रितलशोभितम् । चञ्चत्तुङ्गारुणनखचन्द्रावलिविराजितम् ॥५॥ मितस्मितस्फुरत्तुल्यदन्तमुक्तावलिप्रभम् । प्रलम्बपीवरभुजं विशालहृदयस्थलम् ॥६॥ पृथुतुङ्गललाटं च सुकपोलारुणाधरम् । दधतं कैसरे पुण्ड्रे भाले कुङ्कुमचन्द्रकम् ॥७॥ घनश्यामं च तुलसीमालिकां दक्षिणे करे । दधतं च द्वितीयेन ददतं पाणिनाऽभयम् ॥८॥ बिभ्रतं तुलसीकाष्ठसूक्ष्ममालाद्वयं गले । शुभ्रं यज्ञोपवीतं च वामस्कन्धे सुशोभनम् ॥९॥ वासः शुभ्रं मृदु परिदधतं दृढकच्छकम् । वसानमुत्तरपटं हंसपक्षसितं तथा ॥१०॥ सूक्ष्मं सितं च पटकं बध्नन्तं शीर्ष्णि मञ्जुलम् । उत्सवे भक्तसम्प्रीत्यै दधानं भूरिभूषणम् ॥११॥ नानाविधैः पुष्पहारैश्चन्दनेनार्चितं निजैः । लम्बद्भिः शेखरै रम्यं मन्दस्मितमनोहरम् ॥१२॥ तारामण्डलमध्यस्थपूर्णचन्द्रमिवोदितम् । । भक्तमण्डलमध्यस्थं सर्वलोकनमस्कृतम् ॥१३॥ हृदयानि हरन्तं च निजानां करचेष्टया । करुणाभृतया दृष्ट्या वीक्षमाणं च चिन्तयेत् ॥१४॥**

---

## અધ્યાય : ૨૫

**ખટ્વાંગ રાજર્ષિએ અભય રાજાને હરિભક્તોને મનોહર શ્રીહરિના સ્વરૂપનું ધ્યાન કહેલું છે.**

**ખટ્વાંગ રાજર્ષિ બોલ્યા :** હે અભય નૃપ ! શ્રીહરિના ધ્યાનપરાયણ મુમુક્ષુ પોતે બાહ્ય અને આંતરિક શુદ્ધિવાળો થકો પવિત્ર દેશમાં સ્વસ્તિક આસને બેસી સમ શરીરવાળો, મૌન વ્રત ધારીને પોતાના બંને હાથ પોતાના ખોળામાં ઉપરાઉપર મૂકી, પોતાની નાસિકાના અગ્રભાગમાં દૃષ્ટિ જેની છે એવો મુમુક્ષુ પોતાના હૃદયકમળમાં એકાગ્ર મનથી શ્રીહરિનું ધ્યાન કરે. (૧-૨) મુમુક્ષુ પોતાની આગળ બેઠેલા અથવા ઉભા રહેલા અતિ રમણીય પુરુષાકૃતિવાળા સંપૂર્ણ યૌવન અવસ્થામાં રહેલા શ્રીહરિનું ધ્યાન કરે. (૩)

**ધ્યાન કરવા યોગ્ય શ્રીહરિનું સ્વરૂપ :-** પરસ્પર સ્પર્ધા કરતા રૂપને અનુરૂપ(તેવાજ) અતિ સૌન્દર્યથી યુક્ત પોતાનાં દરેક અંગોવાળા, નૂતન કમળદળના સમાન નેત્રોવાળા, અત્યંત દર્શનીય સૌમ્ય, કોમળભાષી, (૪) નૂતન લાલકમળની કાન્તિ જેવી લાલ કાંતિવાળા બંને હાથ તથા પગના તળિયાથી શોભતા, પ્રકાશિત ઊંચા મધ્ય ભાગવાળા-લાલ વર્ણવાળા નખરૂપી ચંદ્રમાની પંક્તિઓથી વિશેષ શોભતા, મંદ હાસ્યથી સ્ફુરાયમાન એવા સમાન દંતરૂપી મોતીઓની પંક્તિઓથી પ્રકાશિત મુખકમળવાળા, જાનુપર્યંત લાંબા અને પુષ્ટ બાહુવાળા, વિશાળ હૃદયવાળા, (૫-૬) વિશાળ અને ઊંચા લલાટવાળા, અતિ શોભતા ગંડસ્થળ (કપોળ)વાળા, પરિપક્વ ઘીલોડાના સમાન લાલ ઓષ્ઠવાળા, ભાલમાં કેસર-ચંદનથી નિર્મિત ઊર્ધ્વપુંડ્ર તિલક અને તેના મધ્ય ભાગમાં કુમકુમના ગોળ ચાંલ્લાને ધારણ કરતા, (૭) નવીન મેઘની માફક શ્યામ વર્ણવાળા, જમણા હાથમાં જપ માટે તુલસીની માળા ધારણ કરતા, ડાબા હાથથી અભયદાન આપતા, (૮) કંઠમાં તુલસીના કાષ્ઠની સૂક્ષ્મ મણિકાની બેવડી માળા ધારણ કરતા, ડાબા ખભા ઉપર શ્વેત રમણીય યજ્ઞોપવીત ધારણ કરતા, (૯) શ્વેત કોમળ વસ્ત્રનો દૃઢ કચ્છ ધારવા પૂર્વક કટિતટમાં પહેરી રહેલા તેવી જ રીતે હંસની પાંખોની માફક શ્વેત ઓઢવાનું વસ્ત્ર ઓઢતા, (૧૦) મસ્તકમાં અતિ સૂક્ષ્મ શ્વેત સુંદર ફેંટો બાંધતા, જન્માષ્ટમી આદિ ઉત્સવોમાં ભક્તોની પ્રીતિ માટે ઘણાં ભૂષણો ધારણ કરતા, (૧૧) પોતાના ભક્તજનોએ વિવિધ પ્રકારના કેશરાદિ યુક્ત અગરુ, ચંદન, તથા લાલ-પીળા-શ્વેતાદિ અનેક પ્રકારના પુષ્પના હારોથી પૂજેલા, માથાની પાઘમાં લગારેક નીચે લંબાયમાન તોરાઓથી રમણીય, મંદ હાસ્યથી ભક્તના મનને હરતા, (૧૨) તારાના મંડળના મધ્ય ભાગમાં ઉદય પામેલા શરદઋતુના પૂર્ણ ચંદ્રમાની માફક પોતાના ભક્તોના મંડળના મધ્ય ભાગમાં રહેલા, સર્વ જનોએ વંદના કરાયેલા, (૧૩) પોતાના હાથની ચેષ્ટાથી સ્વભક્તજનોનાં હૃદયોને પોતાની મૂર્તિમાં આકર્ષણ કરતા, અતિશય દયાથી પૂર્ણ દૃષ્ટિથી વારંવાર પોતાનું ધ્યાન કરનાર નિજજનને નિહાળતા એવા શ્રીહરિનું મુમુક્ષુ ભક્ત પોતાના હૃદયકમળમાં ધ્યાન કરે. (૧૪)

अथ मनसि शनैः स्थिरत्वमाप्ते भगवति मानुषमूर्तिवासुदेवे । निजहृदि पृथगेकमेकमङ्गं चरणतलादि विचिन्त्यमस्य पुंसा ॥१५॥ निजहृदि दृशि गोचरे तदीये ह्यवयव एकक एकके पृथक् च । चपलमपि मनः स्थिरं विधेयं व्रजति लयं खलु तेन तन्मलौघः ॥१६॥ ध्वजकमलयवाङ्कुशोर्ध्वरेखाप्रमुखसुलक्षणलक्षिते च रम्ये । अतिशयमृदुले च यावकाभे चरणतले मनसाऽस्य चिन्तनीये ॥१७॥ अरुणनखशशाङ्कराजिकान्त्या हृतनिजचिन्तकहृत्तमोङ्घ्रियुग्मम् । क्रमलघुसमकोमलाङ्गुलीभिर्हृतनवपल्लवकान्ति चास्य चिन्त्यम् ॥१८॥ निजजनमनसः प्रहर्षणार्थं परिधृतनूपुरशिञ्जितातिरम्यम् । स्वगतनिजजनाक्षिवृत्तिचोरं चरणयुगं हृदि चिन्तनीयमस्य ॥१९॥ किसलयमृदुले सुवृत्तजङ्घे क्रमपृथुलेऽथ सुवर्तुलौ च जानू । करिकरसदृशं समं च पीनं निजहृदि सक्थियुगं च चिन्त्यमस्य ॥२०॥ मृदुघनसितसूक्ष्मदीर्घवासः परिदधदुत्तमहैमकाञ्चिनद्धम् । पृथुलकटियुगं च चिन्तनीयं निजहृदये चिरमस्य भक्तभर्तुः ॥२१॥ उदरमपि लसद्वलित्रयान्तर्गतशुभसभ्रमनिम्ननाभिकूपम् । हृदयमुरुसुगन्धिपुष्पहारं समविततं हृदि चिन्त्यमस्य तुङ्गम् ॥२२॥ कनककटकशृङ्खलोर्मिकाभिर्लसदरुणाब्जनिभं करद्वयं च । दृढतरमतिरम्यबाहुयुग्मं निजहृदयेऽस्य विचिन्त्यमङ्गदाढ्यम् ॥२३॥ विविधमणिविशुद्धहेमसूत्रग्रथितसुमौक्तिकहारहारिकण्ठः । विगतशशकलङ्क आस्यचन्द्रः स्थिरमनसाऽस्य चिरं च चिन्तनीयः ॥२४॥

---

**ધ્યાનનો પ્રકાર** :- સમગ્ર શ્રીહરિની મૂર્તિનું ધ્યાન કર્યા પછી શ્રી વાસુદેવ ભગવાનમાં મન ધીમે ધીમે સ્થિર થાય ત્યારે શ્રીહરિની મૂર્તિનું ચિંતન કરનારે શ્રીહરિના ચરણારવિંદના તળિયા આદિ એક એક અંગનું પોતાના મનમાં જુદું જુદું ચિંતવન કરવું. (૧૫) પોતાના હૃદયમાં દૃષ્ટિની વૃત્તિમાં પ્રાપ્ત થયેલા શ્રીહરિના જુદા જુદા એક એક અવયવમાં ચંચળ એવા મનને પણ સ્થિર કરવું. જેથી નિશ્ચલ મનથી ધ્યાન કરનારના મનોગત દોષસમૂહ વિનાશ પામે છે જ. (૧૬)

ધ્વજ-કમળ-જવ-અંકુશ-ઊર્ધ્વ રેખા આદિ જેમાં છે એવા રેખાના આકારવાળાં સુંદર સોળ ચિહ્નોથી ચિહ્નિત, રમણીય, અત્યંત કોમળ, અળતાની માફક લાલ શ્રીહરિના ચરણનાં તળિયાં મનથી ચિંતવન કરવાં. (૧૭)

લાલ વર્ણવાળા જે નખરૂપી ચંદ્રમાઓની પંક્તિઓની કાન્તિથી નાશ પમાડ્યો છે પોતાના ચિંતનમાં આસક્તિવાળા ભક્તોના હૃદયગત અંધકારને જેણે એવા, અનુક્રમે એક એકથી હ્રસ્વ-સમ અને કોમળ આંગળીઓથી હરી લીધી છે નૂતન પલ્લવોની શોભા જેણે એવા શ્રીહરિકૃષ્ણ ભગવાનનાં બંને ચરણકમળ ભક્તજને ચિંતવન કરવાં. (૧૮) પોતાના ભક્તજનના મનને મહાઆનંદ પમાડવા ધારણ કરેલા નૂપુરના શબ્દોથી અતિ રમણીય પોતાના સ્વરૂપને પામેલા જે પોતાના ભક્તજનોનાં નેત્રની વૃત્તિઓને ચોરનાર શ્રીહરિનાં બંને ચરણકમળ પોતાના હૃદયમાં ભક્તજને ચિન્તવન કરવાં. (૧૯) પલ્લવની માફક કોમળ અનુક્રમથી વિશાળ શ્રીહરિની શોભાયમાન ગોળ જંઘાઓનું  પોતાના હૃદયમાં ભક્તજને ધ્યાન કરવું. પછી અતિશય ગોળાકાર શ્રીહરિના ઢીંચણનું ધ્યાન કરવું તથા હાથીની સૂંઢના સમાન પુષ્ટ બંને સાથળનું ચિંતવન કરવું. (૨૦)

સર્વોત્તમ જે સુવર્ણના કંદોરાથી બંધાયેલું કોમળ અને ઘાટું એવા સૂક્ષ્મ-શ્વેત-લાંબા-વસ્ત્રને ધારી રહેલું, ભક્તના સ્વામી શ્રીહરિનું વિશાળ કટિયુગલ પોતાના હૃદયમાં ઘણા સમય સુધી ભક્તજને ધ્યાન કરવું. (૨૧)

શોભાયમાન જે ત્રિવળી તેની અંદર રહેલા, સુંદર જળના આવર્ત સમાન ગોળ-ગંભીર નાભિરૂપી કૂવાવાળું શ્રીહરિનું ઉદર પણ પોતાના મનમાં ભક્તજને ધ્યાન કરવું.અત્યંત સુગંધયુક્ત વિવિધ પ્રકારનાં પુષ્પોની માળાઓ જેમાં છે, સમાન અને વિસ્તારવાળું, યથાયોગ્ય ઊંચું જે શ્રીહરિનું વક્ષઃસ્થળ તેનું હૃદયમાં ચિન્તવન કરવું. (૨૨)

સુવર્ણના કડા-સાંકળા અને વેઢ-વીંટીઓથી શોભાયમાન લાલ કમળના સમાન શ્રીહરિના બંને હાથ પોતાના હૃદયમાં ચિન્તવન કરવા. અતિ દૃઢ બાજુબંધથી અલંકૃત અતિરમણીય એવા આ શ્રીહરિના બંને બાહુઓનું પોતાના મનમાં ચિન્તવન કરવું. (૨૩)

આ શ્રીહરિના શુદ્ધ સુવર્ણના તંતુઓથી ગૂંથેલા જે સુંદર મોતીઓના હારો અને વિવિધ પ્રકારના મણિઓ જેમાં છે એવા હારોથી ભક્તના મનને હરનારો એવો કંઠ, સ્થિર મનથી લાંબા કાળ પર્યંત ચિન્તવન કરવો. તેમજ સસલાનાં લાંછને રહિત શ્રીહરિના મુખારવિન્દરૂપી ચંદ્રમાનું સ્થિર મનથી લાંબા સમય સુધી ચિન્તવન કરવું. (૨૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

मितहसनविसर्पिदन्तकान्तिप्रथनसमुज्ज्वलगण्डयुग्ममस्य । नवनलिनदलायतं विचिन्त्यं निजहृदि चञ्चललोचनद्वयं च ॥२५॥ श्रवणयुगलमस्य कुण्डलश्रीबहुविधपुष्पमयावतंसरम्यम् । तरदलघुविशालभालराजत्सतिलककुङ्कुमचन्द्रकश्च चिन्त्यः ॥२६॥ असिततिलकलक्ष्म दक्षगण्डे तिलकुसुमोत्तमनासिकान्तिकेऽस्ति । विलसदसितबिन्दुरस्य वामे श्रवणपुटे भवतीति चिन्तनीयः ॥२७॥ विविधकुसुमशेखरालिराजत्पटमुकुटं च शिरोऽस्य चिन्तयित्वा । वदनकमलमेव चिन्तकेन स्मितमधुरं चिरकालमस्य चिन्त्यम् ॥२८॥ इति ध्यानं भगवतो नारायणमुनेर्मया । कथितं तत्तथा यूयं नित्यं कुर्यात सद्धियः! ॥२९॥ ध्यायन्त इत्थं नित्यं ते श्रीकृष्णेति मनोर्जपम् । कुर्वतोऽल्पेन कालेन यूयं प्राप्स्यथ तं ध्रुवम् ॥३०॥ सुव्रत उवाच-**एवमुक्त्वा स राजर्षिस्तूष्णीमासीन्नराधिप ! । तद्वचो धारयामासुर्हृदि तेऽप्यभयादयः ॥३१॥ कुर्वाणानामादरात्कृष्णवार्ता इत्थं तेषां सा व्यतीयाय सर्वा । एकादश्या यामिनीव क्षणार्धं क्षोणीपालात्यन्तशुद्धान्तराणाम् ॥३२॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे श्रीहरिस्वरूपध्याननिरूपणनामा पञ्चविंशोऽध्यायः ॥२५॥

सुव्रत उवाच-**विधाय पारणां प्रातः स्वग्रामं यान्तमादरात् । अभयः प्राह खट्वाङ्गं विनीतोऽथाश्रुलोचनः ॥१॥ त्वद्भक्तिवशतो ग्राममायात्ते यदा हरिः । तर्हि नः सूचनां कुर्याः सद्यो दूतेन सुव्रत ! ॥२॥**

---

મંદહાસ્યથી પ્રસરતી જે દંતની કાન્તિ તેના વિસ્તારથી પ્રકાશતાં જે બંને ગંડસ્થળો, (કપોળ) તે પોતાના હૃદયમાં ચિન્તવન કરવાં. નૂતન કમળના પત્રની માફક કર્ણ પર્યંત લાંબા શ્રીહરિના બંને કર્ણોનું ચિન્તવન કરવું. લગારેક ઉન્નત, લાંબુ અને વિશાળ જે લલાટમાં શોભાયમાન તિલકે સહિત કુમકુમનો ચંદ્રાકાર ચાંલ્લો તેનું ચિન્તવન કરવું. (૨૫-૨૬)

શ્રીહરિના જમણા કપોળમાં પણ તિલના પુષ્પ જેવું તેમજ નાશ કર્યો છે અંધકાર જેણે એવી દીપની જ્યોતિના સમાન જે નાસિકા તેના સમીપમાં શ્યામ તિલના આકારનું ચિહ્ન છે તેનું ભક્તજને પોતાના મનમાં ધ્યાન કરવું. આ શ્રીહરિના વામ કરણમાં વિશેષ શોભાયમાન શ્યામ તિલ છે તેનું ચિન્તન કરવું. (૨૭)

વિવિધ પુષ્પોના તોરાઓની પંક્તિથી શોભાયમાન, વસ્ત્ર નિર્મિત મુગટ (પાઘ) જેમાં છે એવા શ્રીહરિના મસ્તકનું ચિન્તન કરી મંદ હાસ્યથી રમણીય શ્રીહરિના મુખારવિન્દનું શ્રીહરિના સ્વરૂપનું ધ્યાન કરનાર ભક્તજને ઘણા સમય સુધી ધ્યાન કરવું. (૨૮)

હે સુંદર બુદ્ધિવાળા અભયાદિ ! આ પ્રકારે મેં શ્રીનારાયણમુનિનું ધ્યાન કહ્યું તે ધ્યાન તમો સર્વે દરરોજ કરો. પૂર્વોક્ત પ્રમાણે દરરોજ શ્રીનારાયણમુનિનું ધ્યાન કરતા, શ્રીકૃષ્ણ આ ત્રણ અક્ષરવાળા મંત્રરાજનો જપ કરતા તમો સર્વે થોડા સમયમાં જ નિશ્ચે શ્રીનારાયણમુનિને જ પામશો. (૨૯-૩૦)

**સુવ્રતમુનિ બોલ્યા** : હે નરાધિપ ! ખટ્વાંગ રાજર્ષિ આ પ્રમાણે કહીને મૌન રહ્યા. અભયાદિ પણ પોતાના મનમાં તેમનું વચન ધારણ કરતા હતા. (૩૧)

હે પ્રતાપસિંહ રાજન્ ! આવી રીતે શ્રદ્ધાના અતિશયથી શ્રીહરિકૃષ્ણનાં ચરિત્રોની વાર્તાઓ કરતા કરતા અતિશય શુદ્ધાન્તઃકરણવાળા તે અભયાદિ સર્વને શ્રાવણ વદી અજા નામની એકાદશીની રાત્રિ અર્ધાક્ષણની માફક વીતી ગઈ. (૩૨)

*ઈતિ શ્રી સત્સંગિજીવને શ્રીનારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે શ્રીહરિસ્વરૂપધ્યાનનિરૂપણનામા પંચવિંશોऽધ્યાયઃ (૨૫)*

## અધ્યાય : ૨૬

**સાર્થક સંકટહરસ્તોત્રનો ઉપદેશ અને અભયાદિએ કરેલું શ્રીહરિનું આરાધન કહ્યું છે.**

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પછી સવારમાં પારણાં (અર્થાત્ એકાદશી તિથિના ઉપવાસને અંતે કરવામાં આવતું ભોજન) કરી પોતાના ગામમાં જતા ખટ્વાંગ રાજર્ષિ પ્રત્યે વિનયથી નમ્ર અભય રાજા જેમનાં નેત્રોમાં આંસુ છે એવા સતા બોલ્યા : (૧) હે જીવનપર્યંત નૈષ્ઠિક વ્રતશાળી ! શ્રી સ્વામિનારાયણ ભગવાન તમારી ભક્તિના વશપણાથી તમારા ગામમાં જ્યારે આવે ત્યારે તત્કાળ જ દૂત દ્વારા અમોને સૂચના કરવી. (૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

वयं तु साम्प्रतं भद्र ! तुदतां निर्निमित्तकम् । अधार्मिकाणां शत्रूणां प्राप्ताः स्मो वा उपद्रवम् ॥३॥ बहिर्गन्तुमतो युक्तं नैवास्ति हि पुरादितः । नोचेदद्यैव गच्छेम शरधारं तमीक्षितुम् ॥४॥ सपत्नादिभयं नश्येद्येनोपायेन सत्वरम् । तं वेत्सि चेत्तदा ब्रूहि शीघ्रं पश्येम यद्धरिम् ॥५॥ बहुश्रुतोऽथ खट्वाङ्गस्तमाह शृणु सत्तम ! । दशावतारस्तोत्रं ते हरेर्वच्म्यवधारय ॥६॥ कृष्णमभ्यर्च्य तन्नित्यं पठनीयं त्वयादरात् । सर्वेभ्योऽपि भयेभ्यस्त्वं तेन मुक्तो भविष्यसि ॥७॥ इत्युक्त्वोपादिशत्स्तोत्रं तत्सर्वभयभञ्जनम् । अभयो धारयामास तच्च बुद्धिमतां वरः ॥८॥ मात्स्यं रूपमलौकिकं भुवि दधत्कल्पान्तकाले नृपं साकं भूतरणौ महर्षिभिरपात्सत्यव्रतं तोयगः । तस्मै मत्स्यपुराणमाह च हयग्रीवं निहत्यासुरं धात्रेऽदान्निगमांश्च यः स हरतात्कष्टं समग्रं हरिः ॥९॥ पीयूषाय पयोनिधिं स्वमहसा देवासुराणामनाधारं चोन्मथतां तु मन्दरगिरिं मज्जन्तमम्भोनिधौ। पृष्ठे कूर्मतनुर्दधार सहसा कारुण्यतो यो जगौ सद्धर्मांश्च मुनिभ्य एष हर० ॥१०॥ यो वाराहतनू रसातलगतां क्षोणीं क्षणादुद्दधौ दैतेयं च जघान संयति हिरण्याक्षं तनुस्थाध्वरः । धर्मानाह भुवेऽभवाय च नृणां यज्ञान्वितत्याखिलान्कल्पादौ प्रतिवासरं स हर० ॥११॥ दैत्यानामधिपं हिरण्यकशिपुं हत्वा नृसिंहाकृतिः प्रह्लादं च ततोऽभिरक्ष्य परमं भक्तं निजं निर्जरान्। इन्द्रादीन्सुरसद्मसौख्यमुदितांश्चक्रे य उग्रेक्षणो भक्ताभीष्टफलप्रदः स हर० ॥१२॥ याचित्वा त्रिपदच्छलेन च बलिं त्रैलोक्यमिन्द्राय यः प्रादाद्वामनमूर्तिरस्य च पुनर्दौवारिकत्वं स्वयम् । चक्रेऽथ त्रिदिवस्थितोऽपि च मेऽपहर० ॥१३॥

(હાલમાં શરધારપુરમાં દર્શન કરવા કેમ ન જવું એવી શંકાના સમાધાનમાં કહે છે : ) હે ભદ્ર ! હાલમાં અમો કારણ વિના જ પીડા કરતા અધર્મી શત્રુઓનો ઉપદ્રવ પામેલા છીએ. (૩) માટે હાલ અમોએ જે દુર્ગપુરથી બહાર જવું તે યોગ્ય નથી જ. એવું જો ના હોત તો આજે જ શ્રીહરિના દર્શન માટે શરધારપુરમાં જાત. (૪) હે ખટ્વાંગ રાજર્ષિ ! જે ઉપાયથી શત્રુઓનો ભય નાશ પામે તે ઉપાય તમો જાણો છો ? જો જાણતા હો તો કહો જેથી અમો શ્રી નારાયણ મુનિનાં તત્કાળ દર્શન પામીએ. (૫)

હે રાજન્ ! પછી ઘણાં શાસ્ત્ર જાણનારા ખટ્વાંગે અભય રાજાને કહ્યું, હે સર્વોત્તમ સ્વભાવવાળા ! તમો સાંભળો. **શ્રી નારાયણમુનિનું દશાવતાર સ્તોત્ર** તમોને કહું છું. શ્રવણપૂર્વક તે સ્તોત્ર તમારા મનમાં ધારણ કરો. (૬) શ્રીકૃષ્ણની મૂર્તિનું પૂજન કરી તમોએ દરરોજ શ્રદ્ધાપૂર્વક આ મેં કહેલા સ્તોત્રનો પાઠ કરવો. તે સ્તોત્રના પાઠથી સમગ્ર ભયથી રહિત થશો. (૭) હે રાજન્ ! ખટ્વાંગે સર્વ ભયને નાશ કરનાર સ્તોત્રનો બોધ આપ્યો. બુદ્ધિશાળીઓમાં શ્રેષ્ઠ અભય રાજાએ તે સ્તોત્રને એકાગ્ર મનથી ધારણ કર્યું. (૮)

a જે હરિએ પૃથ્વીના પ્રલયકાળમાં અલૌકિક મીનની આકૃતિ ધારણ કરતા, સર્વત્ર જળાકાર સમુદ્ર થયો ત્યારે પૃથ્વીરૂપી નાવમાં સ્થાપન કરી મહર્ષિઓએ સહિત સત્યવ્રત રાજાનું રક્ષણ કર્યું. તે રાજાને મત્સ્ય પુરાણ કહ્યું. હયગ્રીવ નામના દૈત્યને મારી બ્રહ્માને વેદો આપ્યા તે શ્રીહરિ સમગ્ર મારું કષ્ટ નિવારણ કરો. (૯)

a અમૃત ઉત્પન્ન કરવા પોતાના સામર્થ્યથી ક્ષીરસમુદ્ર મંથન કરતા દેવો અને અસુરો-સંબંધી ક્ષીરસાગરમાં બૂડતા-આધાર રહિત મંદરાચળને જે શ્રીહરિએ કૂર્મ શરીરવાળા થઈને એકદમ શ્રેષ્ઠ પૃષ્ઠ ભાગમાં ધારણ કર્યો. અને કરુણાથી નારદાદિ મુનિઓને કૂર્મ પુરાણ રૂપ ભાગવત ધર્મો કહ્યા તે શ્રીહરિ મારા સમગ્ર કષ્ટને નાશ કરો. (૧૦)

a જે શ્રીહરિએ વરાહ આકૃતિ-જેના શરીરમાં યજ્ઞો રહેલા છે એવા થકા રસાતળમાં ગયેલી પૃથ્વીને ક્ષણમાં ઊંચે લાવ્યા. યુદ્ધમાં હિરણ્યાક્ષ દૈત્યને હણ્યો. બ્રહ્માના આદિ દિવસમાં સમગ્ર યજ્ઞોને વિસ્તારી મનુષ્યોના મોક્ષ માટે પૃથ્વીને વરાહપુરાણ રૂપે ભાગવત ધર્મો કહ્યા તે શ્રીહરિ દરરોજ મારું સમગ્ર કષ્ટ હરો. (૧૧)

a જે શ્રીહરિએ નૃસિંહાકૃતિવાળા, તીવ્ર નેત્રવાળા થકા અસુરોના અધિપતિ હિરણ્યકશિપુને નખોથી વિદારણ કરી પોતાના પરમૈકાંતિક ભક્ત પ્રહલાદનું તેનાથી રક્ષણ કરી ઈન્દ્ર મુખ્ય જેમાં છે એવા દેવોને સ્વર્ગલોકનું સુખ ફરીથી પમાડવાપૂર્વક હર્ષવાળા કર્યા તે શ્રીહરિ મારું સમગ્ર કષ્ટ હરો. (૧૨)

a જે શ્રીહરિએ વામનાકૃતિ ધારણ કરીને બલિરાજા પાસેથી ત્રણ પગલાં પરિમિત પૃથ્વીના મિષથી ભૂમિ આદિક સમગ્ર ત્રિલોકી માગીને ઈન્દ્રને પાછી આપી હતી અને તે પછી પોતે તે બળિરાજાના ભવનમાં દ્વારપાળપણું કરતા થકા રહ્યા હતા, ત્યાર પછી સ્વર્ગલોકમાં રહીને ઈન્દ્રના અનુજ (નાનાભાઈ) થઈને વૈવસ્વત મનુની રક્ષા કરી હતી. તે શ્રીહરિ મારું સમગ્ર કષ્ટ નિવારણ કરો. (૧૩)

क्षत्रं घोरतरं च कापथगतं त्रिःसप्तकृत्वश्च यो हत्वा सान्वयकार्तवीर्यनृपतिप्राणापहृद्भार्गवः । रामः पर्शुकरो धरामरकरप्रत्तासमुद्रक्षितिः सिद्धर्षिस्तुतसद्यशाः स हर० ॥१४॥ धर्मात्मा पितुराज्ञया सदयितासौमित्रिराप्तो वनं बद्ध्वा सेतुमपांनिधौ स्वमहसा लङ्केश्वरं सान्वयम् । योषाहारिणमाशु यो निहतवान्धर्मेण सर्वाः प्रजा रामः स्मावति पुत्रवत्स हर० ॥१५॥ कंसादीनसुरान्निहत्य नृपतीन्भारान्भुवो भूरिशो गोभूसाधुधरामरामरवृषान् पाति स्म यः सर्वतः । लोकक्षेमकरस्वरूपचरितो विघ्नौघविद्रावणः श्रीकृष्णः स यदूत्तमोऽपहर० ॥१६॥ श्रीबुद्धोऽसुरबुद्धिमोहचरितः सद्धर्मसंस्थापकः पाषण्डादवितात्मभक्तनिकरः कारुण्यवारांनिधिः । हिंसाहीनमखप्रवर्तनयशा यः शुद्धबुद्धिप्रदः संसारार्णवतारकः स हर० ॥१७॥ आरुह्याश्वममर्त्यदत्तमवनौ निस्त्रिंशपाणिश्चरन्कल्की पापिनराधिपांश्च बहुशो हत्वाऽवसाने कलेः । धर्मं स्थापयिता विशुद्धमखिलं यः स्वाङ्गसङ्गानिलस्पर्शोच्छिन्नकुबुद्धिरेष हर० ॥१८॥ स्तोत्रस्य श्रवणाद्दशाकृतिधृतः स्यान्नास्य पाठाच्च भीस्तोयार्तेर्निरयार्तितोऽसुरगणाद्व्याघ्रादितो दुःस्थलात् । राजभ्यश्च कदध्वतो रिपुगणादज्ञानतोऽथो कलेर्देहान्ते सुगतिर्नृणां करुणया स्याद्दीनबन्धोर्हरेः ॥१९॥

---

a જે શ્રીહરિ ભૃગુકુળમાં ઉત્પન્ન જમદગ્નિના પુત્ર ફરશી હાથમાં જેમને છે એવા રામરૂપે થઈ પુત્રોએ સહિત સહસ્ત્રાર્જુન રાજાના પ્રાણનો વિનાશ કરી અતિ ઉદ્ધત-નઠારા માર્ગનું સેવન કરનાર ક્ષત્રિય જાતિનો એકવીસ વાર નાશ કરી, અધ્વર્યુ આદિ બ્રાહ્મણોના હાથમાં આપેલી છે સમુદ્રપર્યન્ત પૃથ્વી જેણે; સિદ્ધો અને ઋષિઓએ સ્તુતિ કરાયેલી છે સત્કીર્તિ જેમની એવા શ્રીહરિ મારું સમગ્ર કષ્ટ હરો. (૧૪)

a જે શ્રીહરિ દશરથના પુત્ર રૂપે થઈ ધર્મમૂર્તિ, માટે જ દશરથની આજ્ઞાથી પોતાની પત્ની અને સુમિત્રાનંદન-પોતાના નાના ભાઈ લક્ષ્મણે સહિત અરણ્યમાં ગયા. પોતાના પ્રતાપથી દક્ષિણ સમુદ્રમાં પુલ બાંધી પોતાની સ્ત્રીનું અપહરણ કરનાર લંકાધિપતિ રાવણને પરિવારે સહિત તત્કાળ મારી નાખ્યો. તથા સમગ્રજનોને પુત્રની માફક પાલન કરતા હતા તે શ્રીહરિ મારું સમગ્ર કષ્ટ હરો. (૧૫)

a જે શ્રીહરિ યદુ રાજાના કુળમાં શ્રેષ્ઠ શ્રીકૃષ્ણ પૃથ્વીના ભારભૂત ઘણા કંસ આદિ દૈત્યાંશ રાજાઓને મારી, ગાયો-પૃથ્વી-સાધુ-બ્રાહ્મણો-દેવો અને ધર્મનું સર્વ પ્રકારે રક્ષણ કરતા હતા. માટે જ જનોનું પરમ શ્રેય કરનાર મનોહર મૂર્તિ અને ગોવર્ધનને ઊંચો કરવારૂપ ચરિત્રાદિથી સ્વાશ્રિત જનોનાં વિઘ્નોને નાશ કરનારા હતા. તે શ્રીહરિ મારા સમગ્ર કષ્ટને હરો. (૧૬)

a જે શ્રીહરિ ધારણ કર્યો છે બુદ્ધાવતાર જેમણે એવા, જેમનું ચરિત્ર અસુરોની બુદ્ધિને મોહ પમાડનારું છે. સદ્ધર્મના પ્રવર્તક પાખંડ ધર્મોથી રક્ષણ કરાયેલો છે સ્વભક્ત સમૂહ જેમણે એવા, કરુણા સાગર, હિંસા રહિત યજ્ઞોના પ્રવર્તાવવાથી સત્કીર્તિવાળા, વિમલ વિજ્ઞાન પ્રદાતા, સંસારસમુદ્રથી તારનારા હતા. તે શ્રીહરિ મારું સમગ્ર કષ્ટ હરો. (૧૭)

a જે શ્રીહરિ કળિયુગના અંતમાં કલ્કિરૂપ ધારી, દેવે આપેલા અશ્વ ઉપર બેસી હાથમાં તરવારવાળા પૃથ્વીમાં વિચરતા થકા અનેક મ્લેચ્છપ્રાય થયેલા રાજાઓને વિનાશ કરી પોતાના અંગના સ્પર્શવાળા વાયુના સ્પર્શથી નાશ કરી છે જનોની કુબુદ્ધિ જેણે એવા, અતિ નિર્મળ સમગ્ર વર્ણાશ્રમનો સદાચાર રૂપ ધર્મ સ્થાપન કરશો એ શ્રીહરિ મારું સમગ્ર કષ્ટ હરો. (૧૮)

**શ્રીહરિના સ્તોત્રની ફળ શ્રુતિ :-** મત્સ્યાદિ દશાવતાર ધારણ કરનાર શ્રી નારાયણ મુનિના આ સ્તોત્રના શ્રવણ અને જપથી જળસંબંધી પીડાનો ભય થતો નથી. સર્વ નરકના દુઃખ-અસુરના ગણ-વ્યાઘ્રાદિ હિંસક પ્રાણીઓ-દુર્ગમ સ્થાન-દુષ્ટ રાજાઓ-નઠારા માર્ગમાં ગમન-શત્રુઓના સમુદાય-અજ્ઞાન-કળિયુગથી ભય થતો નથી. (મત્સ્યાદિ દશાવતારના અનુક્રમથી દશ ફળો જાણવાં.) તેમજ દીનબંધુ શ્રીહરિની નિષ્કારણ અપાર કરુણાથી આ સ્તોત્રનો પાઠ અને શ્રવણ કરનાર જનોને દેહના અવસાનમાં ભગવાનના ધામની પ્રાપ્તિ થાય છે. (૧૯)

सुव्रत उवाच-**इत्युक्त्वा स तु राजर्षिर्ययौ कार्यायनं नृप ! । सकुटुम्बोऽभयोऽप्यासीद्धर्याराधनतत्परः ॥२०॥ घृतदुग्धैक्षवान् हित्वा धारणापारणाव्रतम् । हरीक्षणावधि दधौ यमैः सह निजैः सह ॥२१॥ सर्वान्तरात्मा भगवान् सर्वभावविदीश्वरः । दर्शनं दास्यतेऽत्रैव स आगत्य दयानिधिः ॥२२॥ निश्चित्येत्थं निजगृहे श्रीकृष्णं तं जगद्गुरुम् । कृतावतारं हि भुवि सम्यगाराधयंश्च ते ॥२३॥ खट्वाङ्गोक्तप्रकारेण ध्यायन्तो नियतव्रताः । भेजिरे स्वामिनं भक्त्या भक्तवत्सलमादृताः ॥२४॥ तपोदग्धाङ्गरुधिरा विशुद्धहृदयाश्च ते । निराहारा मिताहारा फलाहाराश्च कुत्रचित् ॥२५॥ लोष्टादिवदनादृत्य राजभोगोचितास्तनूः । आराधनं भगवतो विदधुर्वनिनो यथा ॥२६॥ राज्यं स्वं मन्त्रिसात्कृत्वा तत्कथाश्रवणादिषु । प्रसक्तोऽभून्नृपः स्तोत्रं कृष्णार्चान्ते च तत्पठन् ॥२७॥ ध्यायन्तस्तं जपन्तश्च सर्वे ते हृदयाम्बुजे । यथाश्रुतं तं ददृशुःप्रत्यहं स्फुरितं हरिम् ॥२८॥ प्रत्यक्षदर्शनेच्छा तु तथाप्यन्वहमैधत । तदर्थमेव देहांश्च शोषयन्ति स्म ते निजान् ॥२९॥ इत्थं हरिं तमनुवासरमेव तेषां भक्त्या नरेन्द्र ! भजतां विमलाशयानाम् । साक्षात्तदाप्तिमनसां व्यगमत्तु सार्धमासद्वयं निजसपत्नभयेन साकम् ॥३०॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे सङ्कष्टहरस्तोत्रोपदेशहर्याराधननिरूपणनामा षड्विंशोऽध्यायः ॥२६॥

---

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! રાજર્ષિ ખટ્વાંગ તો આ પ્રમાણે કહીને કારિયાણી-પોતાના ગામમાં ગયા. પોતાના પરિવારે સહિત અભય રાજા પણ શ્રીહરિની ઉપાસના પરાયણ થયા. (૨૦)

પોતાના સ્ત્રી-પુત્ર-પુત્રીઓ સહિત અભય રાજાએ શ્રીહરિનાં દર્શન જ્યારે થાય ત્યાં સુધી ઘી, દૂધ, સાકર આદિ પદાર્થો જમવા નહિ એવો નિયમ રાખી અહિંસા, બ્રહ્મચર્ય આદિએ સહિત ધારણા-પારણાનું વ્રત ધારણ કર્યું. (૨૧)

સર્વાન્તરાત્મા ભગવાન, સર્વ જનોના અંતરનો અભિપ્રાય જાણનારા પરમેશ્વર, દયાનિધિ શ્રી નારાયણમુનિ આ દુર્ગપત્તનમાં આવી દર્શન આપશે : (૨૨) આવો નિશ્ચય કરી અભય આદિ, પૃથ્વીમાં ધારણ કર્યો છે નરાકાર જેમણે એવા જગત્ગુરુ શ્રીહરિને પોતાના ભવનમાં વિધિ પ્રમાણે પૂજન વગેરેથી આરાધન કરતા હતા. (૨૩)

ખટ્વાંગ રાજર્ષિએ કહેલા પ્રકારથી શ્રીહરિની મૂર્તિનું ચિંતવન કરતા, અખંડિત વ્રતવાળા, અતિ આદરવાળા અભયાદિ; ભક્તવત્સલ શ્રી નારાયણ મુનિને અતિસ્નેહથી ભજતા હતા. (૨૪) વ્રતના આચરણથી શુષ્ક અંગવાળા શુદ્ધાંતઃકરણવાળા ધારણાના દિવસે આહાર રહિત અને પારણાને દિવસે પણ પરિમિત જમનારા તેમજ એકાદશી આદિ વ્રત-દિવસમાં પારણાં પ્રાપ્ત થયાં હોય તો ફલાહાર કરનાર અભયાદિ; (૨૫) વાનપ્રસ્થો હોય તેમ તે સર્વે રાજભોગ યોગ્ય પોતપોતાનાં શરીરોને મૃત્તિકાના પિંડની માફક અનાદર કરી હરિકૃષ્ણ ભગવાનની ઉપાસના કરતા હતા. (૨૬) અભય રાજા પોતાનું રાજ્ય અમાત્યને આધીન કરી શ્રીકૃષ્ણના પૂજનના અંતમાં દશાવતાર સ્તોત્રનો પાઠ કરતા થકા શ્રીહરિની કથાનું શ્રવણ આદિ જેમાં છે એવાં કીર્તનાદિમાં અત્યંત પ્રેમાસક્ત થયા. (૨૭)

અભયાદિ સર્વે ખટ્વાંગ રાજર્ષિથી જેવા સાંભળ્યા હતા તેવા શ્રીહરિ કૃષ્ણ ભગવાનનું વારંવાર ધ્યાન કરતા, અને શ્રીકૃષ્ણ મંત્રનો જપ કરતા સતા પોતાના હૃદયકમળમાં એકદમ આવિર્ભાવ પામેલા શ્રીહરિને દરરોજ જોતા હતા. (૨૮) તોપણ પ્રત્યક્ષ દર્શનની ઈચ્છા પ્રતિદિન વૃદ્ધિ પામતી હતી. અભયાદિ પ્રત્યક્ષ દર્શન માટે પોતાનાં શરીરોને તપથી ક્ષીણ શક્તિવાળા કરતા હતા. (૨૯)

હે નરેન્દ્ર ! આ પ્રમાણે શ્રી નારાયણ મુનિને જ પ્રતિદિન અત્યંત સ્નેહપૂર્વક આરાધન કરતા વિમળ અંતઃકરણવાળા પ્રત્યક્ષ શ્રીહરિ કૃષ્ણની સંપ્રાપ્તિના મનવાળા અભયાદિને અઢી માસની સાથે પોતાના શત્રુની પીડા ચાલી ગઈ. (૩૦)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે સંકષ્ટહરસ્તોત્રોપદેશહર્યારાધન-નિરૂપણનામા ષડ્વિંશોઽધ્યાયઃ (૨૬)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

सुव्रत उवाच-प्रबोधन्युत्सवं कृत्वा शरधारपुरे हरिः । कार्यायनमथ प्रायात्स्ववाक्यं प्रतिपालयन् ॥१॥ आयान्तं कृष्णमाश्रुत्य खट्वाङ्गो हर्षविह्वलः । प्रतीक्षमाणस्तं नित्यं तत्संमुखमगाद्द्रुतम् ॥२॥ वृतोऽश्ववारैर्बहुभिर्नानावादित्रनिःस्वनैः। निनादयन्दिशोऽद्राक्षीदायान्तं प्रभुमध्वनि ॥३॥ आरूढं जविवाजिनं परिवृतं वर्णिव्रजैर्नैष्ठिकैः प्रीत्या चन्दनपुष्पहारततिभिः सम्पूज्यमानं जनैः । आयद्भिर्मुनिभिस्तथा गृहिजनैरुद्वीक्षितं पृष्ठतस्तं नत्वा च तदाश्रितान्निजगृहं तैः साकमायान्नृपः ॥४॥ आवासं स्वगृहे तस्य प्रभोः सम्यगकारयत् । अन्येषां तु तदीयानां ग्राम एव यथोचितम् ॥५॥ सानुगस्य हरेः सेवा निर्मानः स तु दासवत् । चकार परमप्रीत्या तथान्येऽपि जना नृप ! ॥६॥ राघवाख्यश्च वैकुण्ठप्रमुखा ब्राह्मणोत्तमाः । वास्तू रामस्तथा वेलो विक्रमाद्याश्च बाहुजाः ॥७॥ वीरः कामो राघवश्च कर्णो देवश्च गोवरः । पञ्चायनश्च हीराद्या वैश्यास्तं च सिषेविरे ॥८॥ देविकाद्या योषितोऽपि भक्त्या पर्यचरंश्च तम् । यथाधनं यथाशक्ति विशुद्धमनसोऽखिलाः ॥९॥ कार्तिकी पौर्णमास्यासीद्दिने तस्मिन्नराधिप ! । खट्वाङ्गप्रमुखाः सर्वे तमानर्चुस्तदा मुदा ॥१०॥ गन्धपुष्पस्त्रगापीडनूत्नवासोधनादिभिः। सम्पूज्य भक्त्या परया तं प्रणेमुश्च सादरम् ॥११॥ ततो बद्धाञ्जलिपुटाः पश्यन्तो वर्णिनं हरिम् । साक्षात्कृष्णमपश्यंस्ते मुरलीवादनोद्यतम् ॥१२॥ पुनः प्रणम्य साश्चर्यं यावत् पश्यन्ति तेऽथ तम् । तावत्स भगवानासीद्यथापूर्वं हि वर्णिराट्॥१३॥

## અધ્યાય : ૨૭

### કારિયાણી ગામમાં સર્વાવતારી શ્રીહરિનું આગમન અને દિવ્ય ચરિત્રો રૂપી ક્રિયાઓનાં વર્ણનોથી સ્તુતિ કહેલી છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પછી શ્રી નારાયણમુનિ શરધારપુરમાં પ્રબોધિનીનો ઉત્સવ કરી પોતાનું વાક્ય (હે રાજર્ષે ખટ્વાંગ ! હું તમારા ગામમાં આવીશ એમાં સંશય નથી) એમ જે કહેલું તે સત્ય કરવા કારિયાણી ગામમાં, માર્ગમાં પોતાના ભક્તોને આનંદ આપતા સતા આવ્યા. (૧) શ્રીહરિની પ્રતિદિન રાહ જોતા ખટ્વાંગ રાજા, પોતાના ગામમાં આવતા શ્રીહરિકૃષ્ણને સાંભળી મહા આનંદથી સંભ્રાન્ત થઈને શ્રીહરિની સન્મુખ તત્કાળ ગયા. (૨) ઘણા ઘોડેસવારોથી વિંટાયેલા તથા નાના પ્રકારનાં વાજિંત્રોના ધ્વનિથી દશ દિશાઓને શબ્દાયમાન કરતા ખટ્વાંગ રાજાએ માર્ગમાં આવતા શ્રીહરિને જોયા. (૩)

અતિ વેગવાળા અશ્વ ઉપર બેઠેલા, નૈષ્ઠિક બ્રહ્મચારીઓના સમુદાયોથી વિંટાયેલા, ભક્તજનોએ ચંદન અને પુષ્પના હારોની પંક્તિઓથી પૂજેલા શ્રીહરિની સાથે આવતા મુક્તાનંદાદિ સાધુસમૂહો તથા તે જ પ્રકારે ગૃહસ્થજનોએ પાછળથી ઊંચે (અશ્વારૂઢ પણે) જોવાયેલા શ્રીહરિને સાષ્ટાંગ નમસ્કાર કરીને તથા શ્રીહરિની સાથે આવેલા વર્ણીઓ-સાધુઓ અને ગૃહસ્થોને નમસ્કાર કરીને ખટ્વાંગ રાજર્ષિ- શ્રીહરિ અને તેમના આશ્રિતોએ સહિત પોતાના ભવનમાં આવ્યા. (૪)

ખટ્વાંગ રાજાએ શ્રીહરિનો નિવાસ પોતાના ગૃહમાં જ સારી રીતે કરાવ્યો. બીજા શ્રીહરિના અનુગામી સાધુ-વર્ણીઓ વગેરે આશ્રિતોનો ઉતારો ગામમાં જ યથાયોગ્ય કરાવ્યો. (૫) હે રાજન્ ! ખટ્વાંગ રાજર્ષિ તો દાસની માફક માને રહિત અનુગામી સહિત શ્રીહરિની સેવા પરમ પ્રીતિથી કરતા હતા. (૬) રાઘવ-વૈકુંઠ આદિ ઉત્તમ બ્રાહ્મણો, વાસ્તુ-રામો-વેલો-વિક્રમ વગેરે ક્ષત્રિયો, (૭) તથા વીરો-કામો, રાઘવ, કર્ણો, દેવો, ગોવર, પંચાયન, હીરો વગેરે વૈશ્યો શ્રીહરિની સેવા કરતા હતા. (૮)

દેવિકા વગેરે સ્ત્રીઓ પણ પરમ પ્રેમથી શ્રીહરિની પરિચર્યા કરતી હતી : એ પ્રકારે શુદ્ધ અંતઃકરણવાળા સમગ્ર રાઘવાદિ બ્રાહ્મણો વગેરે ભક્તજનો પોતપોતાની શક્તિ અને ધન પ્રમાણે સેવા કરતા હતા. (૯) હે રાજન્ ! કારિયાણી ગામમાં શ્રીહરિ પધાર્યા તે દિવસે કારતક સુદી પૂર્ણિમા હતી. તે તિથિમાં ખટ્વાંગ વગેરે સર્વ ભક્તજનો પરમાનંદથી શ્રીહરિનું પૂજન કરતા હતા. (૧૦)

અગરુ-ચંદન, વિવિધ પુષ્પોની માળાઓ, તોરા, નવીન વસ્ત્રો, ધન વગેરે જેમાં છે એવા મહાનીરાજનાદિ વડે પરમ ભક્તિથી શ્રીહરિનું પૂજન કરી આદરપૂર્વક નમસ્કાર કરતા હતા. (૧૧) પછી તે ભક્તોએ બંને હાથ જોડી નૈષ્ઠિક બ્રહ્મચારીના વેશવાળા શ્રીહરિને જોતા સતા વાંસળી વગાડતા પ્રત્યક્ષ અક્ષરધામના અધિપતિ દિવ્યમૂર્તિ શ્રી વાસુદેવ ભગવાનને જોયા. (૧૨) પછી તે ભક્તો સવિસ્મય જેમ હોય તેમ ફરીથી પ્રણામ કરી શ્રીકૃષ્ણને જેટલામાં જુએ છે તેટલામાં

सर्वावतारधर्तारं श्रीकृष्णं पुरुषोत्तमम् । तमेव जानन् खट्वाङ्गस्तुष्टाव प्राञ्जलिस्ततः ॥१४॥ खट्वाङ्ग उवाच–श्रीनीलकण्ठ! जय बद्धविमोचनाय शुद्धाय बुद्धिनिधयेऽसुरमोहनाय । भक्त्यङ्गजाय शरणागतजीवनाय कृष्णाय ते भगवते सततं नमोऽस्तु ॥१५॥ अक्षरात्पर इति श्रुतिवर्ण्यं ह्यक्षरे बृहति धाम्नि वसन्तम् । त्वामवाप्य पुरुषोत्तममद्य श्रीहरेऽभवमहं हि कृतार्थः ॥१६॥ ब्रह्मतामुपगतैरपि जीवैर्नैकसाधनसमृद्धिबलेन । त्यक्तमायिकगुणत्रयकार्यैस्त्वं बृहत्परममेष उपास्यः॥१७॥ स त्वं विश्वं सृजसि रजसा ब्रह्मदक्षादिरूपः सत्त्वेनेदं ह्यवसि च दधद्यज्ञधर्मादिमूर्तीः । अन्ते सर्वं हरसि तमसा रुद्रशेषादिरूपस्तत्राबद्धस्त्रिगुणपतिरिति श्रीमहाराज उक्तः ॥१८॥ धत्से परंब्रह्म तनूः स्वतंत्रस्त्वं स्वेच्छयैवानुयुगं हि दिव्याः। कालेन नष्टं निगमोक्तधर्मं प्रवर्तयन् पासि सतोऽप्यसद्भ्यः ॥१९॥ असुरसदनतः स्वदंष्ट्रोद्धृतां गिरिगहनयुतां वराहाकृतिः। प्रबलदितिसुतं च हत्वा न्यधास्त्वमुपरि पयसां स्वशक्तिं धराम् ॥२०॥ प्रार्थनया बहुधा रुचिनाऽऽप्तः कामद ! दक्षिणया सह जातः । यज्ञतनुर्भुवनत्रयपाता स त्वमहन्मनवेऽसुरसङ्घम् ॥२१॥ भुवि भारतवर्षजन्मनां भजतां पुण्यधियां नृणां सताम् । हृदि धर्मकुलाभिवृद्धये नरनारायणरूपमादधाः ॥२२॥ साङ्ख्यज्ञानं त्वं कपिलः सन्निजमात्रे कालग्रस्तं कर्दमसूनुश्च पुराऽदाः। शिष्यायेदं चासुरयेऽपि प्रददाथ द्वीपेऽम्भोधेः कल्पितकेतोऽथ ततप्थ ॥२३॥

---

પૂર્વની માફક વર્ણીવેશવાળા થયા. (૧૩) પછી શ્રીહરિને જ સર્વાવતારના ધારણ કરનાર પુરુષોત્તમ જાણતા ખટ્વાંગ રાજા બંને હાથ જોડી સ્તુતિ કરવા લાગ્યા : (૧૪)

**ખટ્વાંગ રાજાએ કરેલું શ્રીહરિનું સ્તવન :-** હે નીલકંઠ ! તમો સર્વોત્કર્ષથી વર્તો છો. અનાદિ માયાના પાશથી બંધાયેલા જીવોને પોતાના સ્વરૂપનું જ્ઞાન આપી મુકાવનાર, શુદ્ધસ્વરૂપ,નિરવધિક બુદ્ધિના સાગર, અસુરજનોને મનુષ્યનાટ્યથી મોહ પમાડનારા, શ્રી ધર્મની પત્ની જે ભક્તિના પુત્ર, પોતાના શરણે આવેલા જનને જીવનરૂપ, સકલ ઐશ્વર્ય સંપન્ન-ભગવાન શ્રીહરિકૃષ્ણ ! તમોને નિરંતર નમસ્કાર થાઓ. (૧૫)

**ચોવીસ અવતારાદિ અનેક સ્વરૂપ ધરનારા સર્વકર્તા શ્રીહરિઃ-** હે શ્રીહરે ! અક્ષરથી પર આ પ્રમાણે શ્રુતિથી વર્ણન કરાયેલા; અક્ષરબ્રહ્મધામમાં નિવાસ કરતા તમોને આ અવસરમાં પામીને કૃતાર્થ થયેલો છું. (૧૬) અનેક સાધનો-સ્વધર્મ, જ્ઞાન, વૈરાગ્ય, ભક્તિ આદિની વૃદ્ધિના સામર્થ્યથી ત્યાગ કર્યાં છે માયિક ત્રણ ગુણનાં કાર્યો, (ભૂત, ઈન્દ્રિયો, અંતઃકરણ) જેમણે એવા માટે જ બ્રહ્મભાવ પામેલા જીવોએ પણ પરબ્રહ્મ તમો તે અમારા નયનગોચર ઉપાસ્ય છો. (૧૭) તે પરબ્રહ્મ વાસુદેવ તમો રજોગુણ અંગીકાર કરી બ્રહ્મા અને દક્ષાદિરૂપે વિશ્વને ઉત્પન્ન કરો છો. સત્ત્વગુણ અંગીકાર કરી વિષ્ણુ અને ધર્મ પ્રજાપતિ આદિ રૂપો ધારણ કરતા વિશ્વનું રક્ષણ કરો છો. તમો તમોગુણ અંગીકાર કરી શિવ અને અનંત (શેષ) આદિ જેમાં છે એવાં રૂપોવાળા થઈને પ્રલયકાળમાં સર્વ વિશ્વનો વિનાશ કરો છો. રજ આદિ ગુણો અને તેનાં કાર્યોમાં બંધાયેલા નહિ માટે સત્ત્વાદિ ત્રણ ગુણોના સ્વામી છો. માટે સર્વાધિપતિ આ પ્રમાણે શ્રુતિઓએ વર્ણન કરેલા છો. (૧૮) પરબ્રહ્મ-સ્વતંત્ર તમો પોતાના સંકલ્પથી જ પ્રત્યેક યુગમાં દિવ્ય અવતારો ધારણ કરો છો. કાળથી નાશ પામેલા શાસ્ત્રોક્ત ધર્મને ફરીથી પ્રવર્તાવીને અસુરોથકી સત્પુરુષોનું રક્ષણ કરો છો. (૧૯)

હે હરે ! તમોએ વરાહાકૃતિ ધારણ કરી રસાતલથી પોતાની દાઢના અગ્રભાગથી ઉપાડેલી, પર્વતો અને ગહન વનોએ સહિત એવી સ્વશક્તિ અર્થાત્ તેજ રૂપ પોતાની ઐશ્ચર્ય શક્તિથી યુક્ત ધરાને મહાબળવાન હિરણ્યાક્ષને મારીને એકાર્ણવ જળની ઉપર પૂર્વની માફક સ્થાપન કરી હતી. (૨૦)

હે મનોરથોને પૂર્ણ કરનાર ! રુચિ નામના પ્રજાપતિએ ઘણા પ્રકારે કરેલી પ્રાર્થનાથી વશ થયેલા સર્વજનોના હિતકારી તમો યજ્ઞ શરીરવાળા, દક્ષિણા નામની પત્નીએ સહિત આવિર્ભાવ પામીને ત્રિભુવનના રક્ષક, યજ્ઞરૂપ તમોએ સ્વયંભૂ મનુના રક્ષણ માટે અસુરસમુદાયનો નાશ કર્યો હતો. (૨૧) પૃથ્વીમાં ભરતખંડમાં જન્મ જેમના છે એવા, ધર્મમતિવાળા, તમોને ભજતા સાધુપુરુષોના હૃદયમાં ધર્મકુળની અભિવૃદ્ધિ માટે તમોએ નરનારાયણ રૂપ ધારણ કર્યું. (૨૨)

તમોએ કર્દમ પ્રજાપતિના પુત્ર કપિલ નામે થઈ કાળથી તિરોહિત સાંખ્યજ્ઞાન પ્રથમ પોતાની માતા દેવહૂતિને આપ્યું. પછી શિષ્ય જે આસુરી નામના ઋષિ તેને પણ આ સાંખ્યજ્ઞાન આપ્યું. પછી સમુદ્રના દ્વીપમાં (બેટમાં) નિવાસ કરીને તપ કરતા હતા. (૨૩)

चातुर्वर्ण्याचारसमेताश्रमधर्मान्सम्यग्भूमौ स्थापितवानत्रितनूजः । त्वं प्राक् प्रादा भुक्तिसमेतामपि मुक्तिं दत्तात्रेयो हैहयराजे यदवे च ॥२४॥ दधदरिजलधौ गदां च पद्मं ध्रुववरदो वरदोश्चतुष्टयेन । नवजलदतनुश्च वासुदेवो मधुवनवासिजनांस्त्वमुद्दधर्थ ॥२५॥ पृथुरथ पृथिवीं दुदुग्धौषधीः सममिदमकरोर्धरायास्तलम् । अघिनमपि दिवं च वेनं नयन्प्रथमनृपतिस्त्वमासीः पुरा ॥२६॥ नाभेर्जातो देव ! सुदेव्यां शतकृत्वः कृत्वा यज्ञान्स्वीयसुतादीनुपदिश्य । प्राशा धर्मांस्त्यागिजनानामृषभस्त्वं निर्मानादीन् पारमहंस्याचरणेन ॥२७॥ त्वं हयग्रीवरूपोऽददा वेधसे वेदवृन्दं दिनान्ते मुखेभ्यः सृतम् । मत्स्यरूपोऽपि भक्तेश ! कुर्वंस्तथा धर्ममात्थ स्म सत्यव्रतायाखिलम् ॥२८॥ त्वमेव मुनिशापतः सुरगणं गतश्रीपदं विपद्व्यसनतोऽवितुं जलधिमन्थने मन्दरम् । दधाथ कमठाकृतिर्विततपृष्ठभागे विभो ! ततोऽमृतमपाययः कपटमोहिनीस्त्रीवपुः ॥२९॥ भवानुग्रंरंहोऽतिसिंहो नृसिंहः प्रचण्डोऽट्टहासस्वनस्फोटिताण्डः । नखाग्रैर्ददारादिदैत्यं च मत्तं विरक्तं स्वभक्तं प्रभुत्वे न्ययुङ्क्त ॥३०॥ वामननामा विनयनतांसो विप्रबटुस्त्वं त्रिपदमिषात्तम् । देववराय त्रिभुवनराज्यमासुरराज्यं पृथु बलयेऽदाः ॥३१॥ मनूनां मुनीनां च बर्हिर्मुखानां सुराधीश्वराणां च कर्तुं प्रवृत्तिम् । त्रिलोक्याः सदा रक्षणे राजराजाभिधानावतारान्दधासि त्वमेषः ॥३२॥ आयुर्वेदं रुगपनुदभिधः प्राशाद्धन्वन्तरिरिह च भवान् । रुद्धं भागं प्रतिमखममरैर्दत्तं नम्रैरलभत महसा ॥३३॥ पर्शुं तीक्ष्णं बिभ्रदारक्तनेत्रः क्षत्रं घोरं कार्तवीर्येण साकम् । हत्वा हत्वा

તમોએ અત્રિઋષિપુત્ર દત્તાત્રેય નામવાળા થઈને બ્રાહ્મણાદિ ચાર વર્ણના ધર્મોએ સહિત આશ્રમધર્મો પૃથ્વીમાં પ્રથમ સારી રીતે સ્થાપ્યા. ઐહિક- રાજ્યાદિ ભોગ સહિત મુક્તિ; સહસ્ત્રાર્જુન અને યદુ રાજાને પણ આપી. (૨૪) નવીન મેઘ સમાન શ્યામ મૂર્તિવાળા વાસુદેવ તમોએ શ્રેષ્ઠ ચાર હાથમાં શંખ-ચક્ર-ગદા-પદ્મ ધારણ કરતા થકા ઉત્તાનપાદના પુત્ર ધ્રુવને વર આપીને મધુવનવાસી જનોને પોતાનાં દર્શન આપવાથી ઉદ્ધાર કર્યો. (૨૫)

તમોએ વેન રાજાના પુત્ર પૃથુ રૂપે થઈને પૃથ્વી પ્રત્યે ઔષધીઓનું દોહન કર્યું; આ પૃથ્વીનું તળ સરખું કર્યું, ભગવાન અને વેદાદિની નિંદા કરનાર મહાપાપી પોતાના પિતા વેનને પણ સ્વર્ગમાં મોકલીને પ્રથમ રાજા થયા. (૨૬) હે દિવ્ય મૂર્તિ! નાભિ રાજાથી તેમની પત્ની સુદેવીમાં પ્રગટ થયેલા ઋષભ નામવાળા તમોએ સો યજ્ઞો કરી પોતાના પુત્રો આદિને પ્રવૃત્તિધર્મમાં રહેલા એકાંતિક ધર્મો કહ્યા અને પરમહંસાશ્રમમાં રહેલા ત્યાગીજનોને પરમહંસધર્મના આચરણથી નિર્માનાદિ ધર્મો શીખવ્યા. (૨૭)

હે ભક્તપતે ! તમોએ હયગ્રીવ રૂપે થઈને બ્રહ્માના દિવસના અંતમાં બ્રહ્માના મુખથી નીકળી પડેલા (અર્થાત્ વિસ્મૃત થયેલા) વેદો બ્રહ્માને (ઉપદેશ દ્વારા) પાછા લાવી આપ્યા અને મત્સ્યાવતાર ધારણ કરીને પણ બ્રહ્માને વેદોનું દાન આપી સત્યવ્રત રાજાને સમગ્ર વર્ણાશ્રમનો સદાચાર કહેતા હતા. (૨૮) હે વિભો ! તમોએ જ કૂર્માકૃતિ થઈને દુર્વાસા મુનિના શાપથી જેમની લક્ષ્મી નાશ પામી છે એવા દેવસમૂહને દારિદ્રદુઃખથી રક્ષણ કરવા ક્ષીરનિધિના મંથનનો આરંભ કર્યો. મંદરાચળને લાખ યોજન વિસ્તારવાળા પોતાના પીઠપ્રદેશમાં ધારણ કર્યો. પછી અસુરોના મોહ માટે કપટથી મોહિની સ્વરૂપ ધારણ કરી દેવોને અમૃતનું પાન કરાવ્યું હતું. (૨૯)

અતિ તીવ્ર વેગવાળા જેણે કેસરી સિંહોને પણ પરાભવ પમાડ્યા છે એવા અતિ ક્રોધાયમાન આકૃતિવાળા, અખંડ અતિશય હાસ્યના શબ્દોથી ભેદી નાખ્યું છે બ્રહ્માંડ જેણે એવા નર અને સિંહ ઉભયની આકૃતિવાળા નૃસિંહરૂપે તમોએ મદથી ઉદ્ધત આદિ દૈત્ય હિરણ્યકશિપુને નખોના અગ્રભાગોથી વિદારણ કરી નાખ્યો અને વૈરાગ્યવાળા પોતાના ભક્ત પ્રહ્લાદને પિતાના રાજ્યસ્થાનમાં બળાત્કારે બેસાડ્યો. (૩૦)

તમે વામનરૂપે વિનયથી નમ્ર ખભાવાળા બ્રહ્મચારીના વેશવાળા કશ્યપના પુત્ર થઈને ત્રણ પગલાં (ભૂમિ)ના મિષથી બલિ રાજાનું મહાન ભૂરાદિ ત્રણ લોકનું અધિપતિપણું દેવોમાં શ્રેષ્ઠ ઈન્દ્રને આપ્યું. અને મહાન સુતલ લોકમાં રહેનારા દૈત્યોનું રાજ્ય બલિ રાજાને આપ્યું. (૩૧) જે તમો સ્વાયંભુવ મનુઓ તથા સપ્ત ઋષિઓ અને યજ્ઞભાગ જમનારા દેવો તથા ઈંદ્રોની સ્થિતિ કરવા ત્રિલોકીના રક્ષણ નિમિતે રાજરાજ આ પ્રકારની સંજ્ઞાવાળા અવતારો ધારણ કરો છો. (૩૨)

તમોએ આ લોકમાં ધન્વંતરી નામે રોગોને નાશ કરનાર સંજ્ઞાવાળા થઈને આયુર્વેદને કહ્યો. દરેક યજ્ઞમાં દેવોએ રોકેલો પછી નમ્ર થયેલા દેવોએ આપેલો યજ્ઞ સંબંધી પોતાનો ભાગ પોતાના તેજથી પામ્યા. (૩૩) તમોએ જમદગ્નિના

नष्टराजन्यबीजामेको भूमिं जामदग्न्यश्चकर्थ ॥३४॥ जातो रामः स च त्वं दशरथतनयस्ताडकां यज्ञहन्तॄन् हत्वोद्धृत्याप्यहल्या-मुद्वहिथ पुरभिच्चापमाभज्य सीताम् । यातः पित्राज्ञयाऽथो वनमनुजकलत्रानुयातः स्वसारं रक्षोभर्तुर्विरूपां विदधदृषिरिपून् भूरिरक्षांस्यहिंसीः ॥३५॥ रक्षोनीतां च शोचन्नुरु जनकसुतां त्वं जटायुःकबन्धौ भिल्लीं चोद्धृत्य वालिक्षपणगत-भयप्रीतसुग्रीवदूतैः । तामत्रान्वेष्य लङ्कां विततजलनिधौ सेतुमाबध्य गत्वा हत्वा कीशर्क्षसैन्यो युधि दशवदनं चाप्य सम्राडभूस्ताम् ॥३६॥ बुध्वा बुद्धीरल्पतरास्त्वं च जनानां व्यासो भूत्वा वेदकदम्बं प्रविभज्य । पैलादिभ्यस्तं प्रददाथाथ दुरुह्यान् प्रावोचोऽर्थान्सूत्रपुराणादिभिरस्य ॥३७॥ क्षितिभरमपहर्तुमासीद्भवान् कृष्णनामाऽकरोद्गोकुले पूतनान्तं तृणावर्तघातं दृढानोविभङ्गं मुखे विश्वभानं च बाल्योचितक्रीडनं मन्थनीभङ्गयुग्मार्जुनोन्मूलपातं बकस्याथ दैत्यस्य वृन्दावनेऽन्तं च वत्सासुरस्याघनाशं स्ववत्सादिरूपैर्विधेर्मोहनम् । अगनगखगशंसनं मर्दनं कालियाहेश्च पानं दवाग्नेः कुमारीव्रतेष्टस्य दानं च यज्ञाङ्गनाप्रीणनं धारणेन व्रजस्यावनं स्वेष्टगोवर्धनस्येन्द्रदर्पापनोदं प्रचेतोन्तिकादानयनं नन्दराजस्य नीतिं स्वधाम्नि प्रियाणां विलासं च गोपीजनै राधिकारञ्जनम् । अहिधृतपितृमोचनं शङ्खचूडर्षभव्योमकेश्यन्तमक्रूरवाक्यात्सपुर्यागमं नाशनं रङ्गकारस्य चानुग्रहं तुन्नवायस्य कुब्जासुदाम्नोर्धनुर्भङ्गमत्तेभमल्लेश-कंसप्रणाशं गुरोः कामपूर्तिं च गोपीमनःशान्तिमक्रूरकुन्तापृथातोषणं द्वारिकानिर्मितिम् । यवनमगधराडनीकक्षयं राजसङ्घं विजित्याष्टपट्टाङ्गनाषोडश-

---

પુત્ર રામ થઈને તીવ્ર ધારવાળી ફરશી ધારણ કરતા ચોતરફ લાલચોળ નેત્રવાળા કોઈની સહાય વિના એકાકી સહસ્ત્રાર્જુને સહિત અતિ ક્રૂર ક્ષત્રિય જાતિને એકવીશ વાર નાશ કરી પૃથ્વીથી નષ્ટ કર્યું છે ક્ષત્રિયબીજ જેમાં એવી કરી. (૩૪)

**રામાવતાર સમયે** :- તમો દરશરથ રાજાના પુત્ર રામચંદ્રરૂપે પ્રાદુર્ભાવ પામ્યા, સુકેતુ રાક્ષસની પુત્રી તાડકા અને વિશ્વામિત્રના યજ્ઞનો નાશ કરનાર રાક્ષસોને નાશ કરી, અહલ્યાનો પણ ઉદ્ધાર કરી, શિવ ધનુષ્ય ભાંગીને સીતાને પરણ્યા પછી પિતાની આજ્ઞાથી નાનાભાઈ લક્ષ્મણજી અને પોતાની પત્ની જાનકીથી અનુસરેલા, અરણ્યમાં ગયા. રાક્ષસાધિપતિ રાવણની બહેન સુર્પણખાને વિરૂપ કરી ઘણા ઋષિઓના શત્રુઓને (અસુરોને) હણ્યા. (૩૫) ત્યારબાદ તમો રાવણે હરણ કરાયેલી પોતાની પત્ની જાનકીનો અધિક શોક કરતા સતા જટાયુ નામના પક્ષીન્દ્ર, કબન્ધ અને ભીલ જ્ઞાતિય શબરીનો ઉદ્ધાર કરી વાલીનો નાશ કરવાથી ભય રહિત, માટે જ પ્રસન્ન થયેલા સુગ્રીવના દૂતો હનુમાન આદિ દ્વારા સીતાને આ લોકમાં ખોળીને વિસ્તારવાળા સમુદ્રમાં પુલ બાંધી લંકાપુરીમાં જઈ વાંદરા-રીંછોના સૈન્યવાળા થકા યુદ્ધમાં રાવણને મારી સીતાને પામી અયોધ્યામાં આવી રાજાધિરાજ થયા. (૩૬)

**વ્યાસાવતાર સમયે** :- તમો પરાશરસુત વ્યાસરૂપે થઈ કળિયુગમાં લોકોની બુદ્ધિને અતિ અલ્પ જાણીને વેદસમુદાયનો ચાર પ્રકારે વિભાગ કરી પૈલ આદિ મુનિઓને તે ભણાવ્યા હતા. પછી તેના ન જાણી શકાય એવા અર્થોને સ્પષ્ટ કરવા શ્રીમદ્ ભાગવત પુરાણ અને સૂત્ર (શારીરક આદિક સૂત્ર) રચ્યાં હતાં. (૩૭)

**કૃષ્ણાવતાર સમયે** :- હે હરે ! તમો પૃથ્વીનો ભાર ઉતારવા માટે શ્રીકૃષ્ણ નામવાળા થયા. તમોએ ગોકુળમાં પૂતનાનો નાશ કર્યો. તૃણાવર્ત નામનો અસુર-શકટાસુર આદિ અસુરોને બાળચેષ્ટાથી જ મારી નાખ્યા. પુત્રના સ્નેહથી મોહ પામેલાં મૃત્તિકાભક્ષણની પરીક્ષામાં પ્રવર્તેલાં યશોદા માતાને પહોળું મુખ કરી ઉદરની અંદર વિભાગે સહિત રહેલું સમગ્ર વિશ્વ બતાવ્યું. (બીજી **બાલ્યોચિત ક્રીડાઓ** બતાવે છેઃ) દહીં વલોવવાની ગોળી ભાંગવી, માખણ ચોરવું, યશોદાએ કરેલા તિરસ્કાર સહન કરવા, યમલાર્જુનનાં બંને વૃક્ષોને મૂળમાંથી ઉખેડી નાખવાં વગેરે લીલા **ગોકુળમાં** કરી હતી. પછી **વૃંદાવનમાં** બકાસુર અને વત્સાસુરનો વિનાશ, અઘાસુર વગેરેનો નાશ કર્યો. પોતે સ્વીકાર કરેલી વત્સ અને ગોપાદિ આકૃતિઓથી બ્રહ્માને મોહ પમાડ્યો તેમજ ગોવર્ધન પર્વત-વૃંદાવનનાં વૃક્ષો અને તેના ઉપર બેઠેલાં પક્ષીઓ તેમની બળદેવની આગળ મહાભાગ્યપણે પ્રશંસા-કાલિય નાગનું મર્દન, દાવાગ્નિનું પાન-વ્રજકન્યા સંબંધી વ્રતના આચરણથી તેણીઓએ ઈચ્છિત વસ્તુનું આપવું. યજ્ઞમાં નિષ્ઠાવાળા બ્રાહ્મણોની પત્નીઓનાં અન્નભોજનથી પ્રસન્નતા, પોતાને ઈષ્ટ ગોવર્ધન પર્વતને સાત દિવસ સુધી પોતાના હાથમાં ધારણ કરવાથી વ્રજના પશુસમૂહ સહિત વ્રજવાસીજનોનું રક્ષણ, ઈન્દ્રના ગર્વનો નાશ, પ્રચેતાના (વરુણના) સમીપથી

स्त्रीसहस्त्रोपयामं नृगोद्धारणं बाणदोश्छेदनं पार्थयज्ञावनं चैद्यसाल्वादिनाशं सुहृद्विप्रदारिद्र्यभङ्गं कुरुक्षेत्रयात्रोत्सवं स्वाग्रजानन्दनं मोहनाशं वैदेहपार्थोद्धवानां हरे ! ॥३८॥ वैदिकं विधिमुपाश्रितानपि प्राणिनां त्रिभुवनौकसां हरे!। अर्दनं विदधतोऽसुरव्रजान् बुद्धरूपधृदमूमुहद्भवान् ॥३९॥ म्लेच्छप्रायान् पापिजनान् कुमनीषांस्तिष्यस्यान्ते विष्णुयशोद्विजसूनुः। भूत्वा कल्की घोरमहासिकरस्त्वं हन्ता नूनं भूमितले विचरन्वै ॥४०॥ धर्महानिमीक्षसे यदा यदा सुरारिभिस्त्वं कृतां तदा तदा दधासि भूतले तनूः । मातृताततयोगतः कदा कदाचिदेकतः क्वाप्यतर्कितः स्वयं प्रकाशसे निजेच्छया ॥४१॥ तवावतारधारणं हि रक्षणं विधातुमेव धर्मवर्त्मनः प्रभो ! । भवत्यतोऽत्र दुर्जनैरुपद्रुतं तदद्य साधु पालयन्विराजसे ॥४२॥ त्वमात्मतन्त्रो भुवि यानि यानि करोषि कर्माणि कृतावतारः । भवन्ति तापत्रयभर्जितानां हितावहान्येव हि तानि तानि ॥४३॥ जन्मानि कर्माणि च ते दिव्यानि पुरुषोत्तम ! । अनन्तत्वान्न शक्यन्ते सङ्ख्यातुं क्वापि केनचित् ॥४४॥

---

નંદરાજાનું લાવવું, પોતાને પ્રિય નંદાદિ ગોપોને પોતાના અક્ષરધામમાં પહોંચાડવા, વ્રજની અંગનાઓની સાથે રાસોત્સવથી રમણ (રમવું), રાધિકાને એકાંતમાં લઈ જવાથી પ્રીતિનું ઉત્પન્ન કરવું, અજગરે ગળેલા પિતા નંદનું અજગરના વિનાશપૂર્વક મુકાવવું, શંખચૂડ અરિષ્ટાસુર વ્યોમાસુર અને કેશી (અશ્વાકૃતિ) અસુર તેઓનો વિનાશ-અક્રૂરના વાક્ય શ્રવણથી પોતાની પુરી (મથુરાપુરી) માં આવ્યા, રંગકારનો નાશ, દરજી-ત્રણ વાંકવાળી કુબ્જા અને સુદામા નામના માળીના ઉપર અનુગ્રહ, કંસે પૂજેલા ધનુષ્યનું ભાંગવું, કુવલયાપીડ નામનો હાથી-મહાન મલ્લો અને કંસને માર્યા, ગુરુ સાંદીપનિના મનોરથને પૂર્ણ કર્યા. ગોપીઓના મનને શાંતિ પમાડી, અક્રૂર-કુબ્જા-કુંતી તેઓને યથાયોગ્ય પ્રસન્ન કર્યા, વિશ્વકર્મા દ્વારા દ્વારિકાનું નિર્માણ, કાલયવન, જરાસંધના સૈન્યોનો ક્ષય, રાજ સમુદાયનો પરાભવ કરી રૂકિમણ્યાદિ આઠ પટરાણી અને સોળ હજાર સ્ત્રીઓને પરણવું, વિપ્રના અપરાધથી કાંચીડાની યોનિ પામેલા નૃગરાજને તેથી મુકાવવું, બાણાસુરના હસ્તોનું છેદન, યુધિષ્ઠિરના યજ્ઞનું જરાસંધના વિનાશપૂર્વક રક્ષણ, શિશુપાલ અને શાલ્વ જેમાં છે એવા દંતવક્રાદિનો નાશ, મિત્ર બ્રાહ્મણ સુદામાના દારિદ્ર્યનો વિનાશ, કુરુક્ષેત્રમાં સૂર્યગ્રહણ સમયે યાત્રોત્સવ, પોતાના મોટાભાઈઓ જે કંસે મારી નાખેલા (જે બ્રહ્મશાપથી આસુરપણાને પામેલા હતા) તેઓને બ્રહ્મશાપથી મુકાવવા પૂર્વક પાછા લાવી દેવકીને દેખાડવાથી તેઓને આનંદ પમાડ્યા તથા બહુલાશ્વ નામવાળો મિથિલાનો અધિપતિ વૈદેહ-અર્જુન-ઉદ્ધવ તેઓનો (સદુપદેશથી) મોહનાશ એ સર્વે કાર્યો હે ભગવાન ! તમો કરતા હતા. (૩૮)

**બુદ્ધાવતાર સમયે** :- હે હરે ! બુદ્ધાકૃતિ ધારણ કરીને વેદોક્ત કર્માનુષ્ઠાનના માર્ગનો આશ્રય કરી રહેલા ત્રણે ભુવનોમાં રહેનારા જનોને પીડા કરતા અસુરસમૂહોને ઉપધર્મોના બોધથી મોહ પમાડતા હતા. (૩૯)

**કલ્કિ અવતાર સમયે** :- તમો કળિયુગના અંતમાં વિષ્ણુયશ નામના બ્રાહ્મણના પુત્ર કલ્કી થઈને તીક્ષ્ણ ધારવાળી મોટી તલવાર હાથમાં જેમને છે એવા ભૂમિના તળમાં વિચરતા, દેવોએ આપેલા અશ્વ ઉપર બેસીને ભૂતળમાં વિચરતા થકા મ્લેચ્છપ્રાય કુબુદ્ધિવાળા પાપીજનોનો નાશ કરશો તે પણ તમો જ છો. (૪૦)

તમો જ્યારે જ્યારે અસુરોએ કરેલી ધર્મહાનિ જુઓ છો ત્યારે ત્યારે પૃથ્વીમાં અવતારો ધારણ કરો છો તે શરીરો ક્યારેક માતા અને પિતાના યોગથી ધારણ કરો છો ( એ રામકૃષ્ણાદિ અવતારોમાં પ્રસિદ્ધ છે.) ક્યારેક એક પિતાથી જ ધારણ કરો છો ( તે પણ વૈન્ય-વરાહાદિમાં પ્રસિદ્ધ છે.) અને ક્યારેક અતર્કિત (અચિંતિત) ગમે તે કોઈ ઠેકાણે પણ પોતાની ઈચ્છાથી પોતે પ્રકાશો છો. (આ મત્સ્ય-કૂર્મ-નૃસિંહ-ધન્વંતરી વગેરેમાં પ્રસિદ્ધ છે.) (૪૧) હે પ્રભો ! તમારે અવતાર ધારણ કરવાનું તો વેદોક્ત વર્ણાશ્રમ ધર્મમાર્ગનું સર્વ પ્રકારે રક્ષણ કરવા માટે છે. માટે ભૂતળમાં આ સમયે અસુરાંશ ગુરુ-રાજા આદિ દુષ્ટજનોએ વિનાશિત ધર્મમાર્ગને સારી રીતે પાલન કરતા થકા **સર્વાવતારને ધારણ કરનાર પુરુષોત્તમ**, તમો સર્વોત્કર્ષપણાથી શોભો છો. (૪૨) સ્વતંત્ર તમો પૃથ્વીમાં આવિર્ભાવ પામીને જે જે ચરિત્રો કરો છો તે તે ચરિત્રો ત્રિવિધ તાપથી તપાયમાન થયેલા જનોને હિત કરનારાં છે અર્થાત્ ત્રણ તાપને નાશ કરનારાં છે. (૪૩) હે પુરુષોત્તમ ! અલૌકિક માટે જ અતિરમણીય તમારા અવતારો અને ચરિત્રો અનંત હોવાથી કોઈ પણ પુરુષે અથવા બ્રહ્માએ પણ ક્યારેય ગણવા માટે શક્તિમાન થવાતું નથી. (૪૪)

सुव्रत उवाच – **इति स्तुत्वा हरिं भक्त्या प्रार्थयामास भक्तराट् । स तच्छुश्रूषणमनाः प्रश्रयावनतः सुधीः ॥४५॥ भगवन् ! करुणां कृत्वा मयि भक्ते त्वदात्मनि । स्वस्थोऽत्र कतिचिन्मासान्वस्तुमर्हसि सत्पते ! ॥४६॥** श्रीभगवानुवाच – **वसन्तोत्सवपर्यन्तमत्र वत्स्याम्यहं ननु । प्रीतये तव राजर्षे ! धर्मनिष्ठस्य सर्वदा ॥४७॥** सुव्रत उवाच – **ततः संसेव्यमानोऽसौ खट्वाङ्गादिभिरादरात् । तत्रोवास हरी राजन् ! सुखयन्स्वाश्रितान्सुखम् ॥४८॥ पत्रं लिखित्वाऽथ स दूतमेकं सम्प्रैषयद्दुर्गपुरं नृपर्षिः । स शीघ्रयायी त्वरितं नृपेन्द्रं तत्राभयं प्राप्य ददौ तदङ्ग ! ॥४९॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे कार्यायनग्रामागमन–खट्वाङ्गकृतहरिस्तुतिनिरूपणनामा सप्तविंशोऽध्यायः ॥२७॥

सुव्रत उवाच – **तत्प्राप्य पत्रं भगवानुपेतः कार्यायनग्राममिति प्रहर्षात् । प्राहाभयः स्वानथ ते तदैव सज्जा बभूवुर्गमनाय राजन् ! ॥१॥ हरेः प्रसादाद्गतवैरिभीतिर्नृपस्ततः स्वैः सह बन्धुभिः सः । ग्रामं तमायात्परिमेयपद्गो यानैस्त्वरद्भिर्दिन एव तस्मिन् ॥२॥ आयातमात्मीयसुहृत्तमं तं सम्मानयित्वैव यथार्हमाशु । खटवाङ्ग आवासयति स्म तुष्टः सहानुगैरात्मपर-प्रतीतिम् ॥३॥ कृतावतारं प्रगृहीतकृष्णपूजोपहारं स्वजनैः समेतम् । तं दर्शनोत्कं भगवत्समीपमुपानयद्राजऋषिः स शीघ्रम् ॥४॥ श्रीकृष्णदेवं मनुजाकृतिं तं प्रत्यक्षमालोक्य यथाश्रुतं ते । सहस्रशस्त्यागिगृहस्थवृन्दैर्वृतं मुदा पूर्णहृदः**

---

હે રાજન્ ! ભક્તશ્રેષ્ઠ ખટ્વાંગ રાજર્ષિએ આ પ્રમાણે શ્રીહરિની સ્તુતિ કરી, પછી બુદ્ધિમાન તે ખટ્વાંગ રાજા શ્રીહરિની પરિચર્યામાં મનવાળા, સ્નેહથી નમેલા અંગવાળા, અતિસ્નેહથી શ્રીહરિની પ્રત્યે યાચના કરતા હતા. (૪૫) હે ભગવન્ ! હે સત્પતે ! આપ તમારે વિષે મનવાળા તમારા ચરણસેવક એવા મારી ઉપર દયા કરી કેટલાક માસ સુધી અહીં મારા ગૃહે શાંતિથી નિવાસ કરવાને યોગ્ય છો. (૪૬)

**શ્રી ભગવાન બોલ્યા :** હે રાજર્ષે ! હું હંમેશાં ધર્મનિષ્ઠ એવા તમારી પ્રીતિ માટે માઘ સુદી પંચમી સુધી (અર્થાત્ વસંતના ઉત્સવ સુધી) તમારા ગૃહમાં નિવાસ કરીશ. (૪૭) **સુવ્રતમુનિ કહે છે :** હે રાજન્ ! ત્યાર પછી ખટ્વાંગ આદિ ભક્તજનોએ પરમ શ્રદ્ધાથી સેવા કરાયેલા શ્રીહરિ પોતાના આશ્રિત જનોને સુખ આપતા કારિયાણી ગામમાં ખટ્વાંગ રાજાના ભવનમાં સુખ પૂર્વક નિવાસ કરતા હતા. (૪૮)

હે પ્રતાપસિંહ રાજન્ ! શ્રીહરિના નિવાસનો નિર્ધાર થયા પછી રાજર્ષિ ખટ્વાંગે શ્રીહરિના આગમનના વૃત્તાંતની મંગલ પત્રિકા લખીને એક દૂતને દુર્ગપત્તન મોકલ્યો. ઉતાવળા ચાલનાર દૂતે ઉતાવળથી દુર્ગપુરમાં અભય રાજાને મળીને તે પત્ર અર્પણ કર્યો. (૪૯) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે કાર્યાયનગ્રામાગમન-ખટ્વાંગકૃત હરિસ્તુતિ-નિરૂપણનામા સપ્તવિંશોऽધ્યાયઃ (૨૭)*

## અધ્યાય : ૨૮

**પરિવારે સહિત અભય રાજા અને શ્રીહરિનો મેળાપ તથા વિષ્ણુયાગનો મહોત્સવ કહ્યો છે.**

**સુવ્રત મુનિ બોલ્યા -** હે રાજન્ ! અભયરાજા પત્ર વાંચી ભગવાન શ્રીહરિ કારિયાણી ગામમાં આવ્યા છે આવું જાણી આનંદપૂર્વક પોતાના ઉત્તમાદિ બંધુજનોને તે વૃત્તાંત કહેવા લાગ્યા. પછી અભય રાજાના મુખથી શ્રીહરિનું કારિયાણીમાં આગમન સાંભળી ઉત્તમાદિ તત્કાળ જ શ્રીહરિનાં દર્શન માટે કારિયાણી જવા તૈયાર થયા. (૧) પછી શ્રી નારાયણમુનિની (સંકટહર સ્તોત્રના પાઠથી થયેલી) પ્રસન્નતાથી શત્રુનો ભય જેને નાશ પામ્યો છે, માટે પ્રસન્ન થયેલા અભયરાજા પોતાના બંધુઓની સાથે પરિમિત સેવકોવાળા, શીઘ્ર ગતિવાળાં રથ-ઘોડા આદિ વાહનોથી તે જ દિવસે કારિયાણી ગામમાં આવ્યા. (૨)

ખટ્વાંગ રાજર્ષિ પોતાને ઘેર આવેલાં, પોતાના ઉપર અત્યંત વિશ્વાસવાળા, પોતાના અત્યંત મિત્ર અભય રાજાને યોગ્યતા પ્રમાણે સત્કાર કરી પ્રસન્ન થતા સતા અનુચરોએ સહિત નિવાસ કરાવતા હતા. (૩)

ખટ્વાંગ રાજા શ્રીહરિકૃષ્ણની પૂજાની સામગ્રી અને ઉત્તમાદિ બંધુવર્ગે સહિત શ્રીહરિકૃષ્ણનાં દર્શનની ઉત્કંઠાવાળા અભય નૃપતિને તત્કાળ ભગવાનની સમીપમાં લઈ ગયા. (૪) અભયાદિ મનુષ્યાકૃતિવાળા શ્રી નારાયણમુનિને ખટ્વાંગ

प्रणेमुः ॥५॥ तं मानयामास हरिः सबन्धुं खट्वाङ्गविज्ञापितसर्वभावम् । सर्वान्तरात्मा निजवाञ्छितार्थसम्पूरणे कल्पतरूपमानः ॥६॥ सिंहासने संस्थितमीश्वरं तं भक्त्या पुपूजुः परया ततस्ते । वस्त्रैरमूल्यैर्विविधैरनेकैर्विभूषणैश्चन्दनपुष्पहारैः ॥७॥ तं पूजितं प्रेमभरेण भक्त्या नीराजयित्वा नमनं विधाय । बद्ध्वाऽञ्जलींस्ते तदुदारमूर्तौ लग्नेक्षणास्तुष्टुवुरादरेण ॥८॥ अभयादय ऊचुः - सद्धर्मरक्षात्तजने ! सदीश ! प्रतापनिर्मूलितदैत्ययूथ ! । पाषण्डमार्गावितभूरिभक्त ! प्रशान्तमूर्ते ! जय नीलकण्ठ ! ॥९॥ निःश्रेयसायैव कलौ नराणां भक्त्या सदोपास्यमनोज्ञमूर्ते! । अतिक्षमाब्धेऽतिदयानिधान ! प्रशा० ॥१०॥ स्वभक्तगोलोकनयात्मनिष्ठ ! प्रभो! सदैकान्तिकधर्मधर्तः ! । प्रवर्तितक्षेमदसाङ्ख्ययोग ! प्रशा० ॥११॥ अधर्ममायाकलिकालनानादोषाशुनाशश्रवणादिभक्ते ! । धर्मक्रियातत्पर ! चारुवेष ! प्रशा० ॥१२॥ महामुने ! योगकलाप्रवृत्ते ! योगेश्वरानन्तगुणप्रभाव ! । विभो ! वराभीतिद ! दिव्यरूप ! प्रशान्त० ॥१३॥ कामाद्यरित्रासदचिन्तनेश ! पापौघविद्रावणनामधेय ! । अज्ञानविध्वंसनबोधशक्ते ! प्रशान्त० ॥१४॥ हारिप्रसादे ! हरिकृष्ण ! कृष्ण ! स्वामिन् ! हरे! तापसनैष्ठिकेन्द्र ! । नारायण ! प्रेमवतीतनूज ! प्रशान्त० ॥१५॥ अदीनदिव्याचरित ! स्वतन्त्र ! ब्रह्मर्षिराजर्षिसमर्चिताङ्घ्रे!। श्रीस्वामिनारायण ! देशिकेन्द्र ! प्रशान्तमूर्ते ! जय नीलकण्ठ! ॥१६॥ सकलजनभवाब्धिमज्जनेक्षोत्थितकरुणार्द्रितहृन्निजेच्छयैव । धृतनृतनुरहो त्वमेव कृष्णो भवसि भुवि स्वयमेव नीलकण्ठ ! ॥१७॥

---

રાજર્ષિના મુખથી જેવા સાંભળ્યા હતા તેવા પ્રત્યક્ષ જોઈને હર્ષથી સંપૂર્ણ હૃદયવાળા થઈ, હજારો ત્યાગીઓ-બ્રહ્મચારીઓ વગેરે અને ગૃહસ્થોના સમૂહોથી વિંટાયેલા તેમને પ્રણામ કરવા લાગ્યા. (૫)

સર્વ જીવોના અંતર્યામી પોતાના ભક્તોના મનોરથ પૂર્ણ કરવામાં કલ્પતરુ સમાન શ્રીહરિએ ખટ્વાંગ રાજર્ષિએ જણાવ્યો છે સમગ્ર ભાવ (પ્રત્યક્ષ ભગવાનની પ્રાપ્તિનો અભિપ્રાય) જેમનો એવા બંધુઓ સહિત અભય રાજાનો યથાયોગ્ય સત્કાર કર્યો. (૬) અભય આદિ સિંહાસનમાં બેઠેલા પરમેશ્વર શ્રીહરિને અમૂલ્ય નાના પ્રકારનાં અનેક પીતાંબરાદિ વસ્ત્રો અને આભૂષણો (કડાં, બાજુબંધ, મોતીની માળાઓ વગેરેથી) તથા ચંદન, પુષ્પોના હારોથી પરમ ભક્તિથી પૂજા કરવા લાગ્યા. (૭)

અત્યંત પ્રેમથી પૂજેલા, શ્રીહરિને સ્નેહથી આરતી ઉતારી સાષ્ટાંગ પ્રણામ કરી બંને હાથ જોડી શ્રીહરિની તારુણ્યાવસ્થામાં રહેલી રમણીય મૂર્તિમાં જેમનાં નેત્રો સંલગ્ન થયાં છે એવા અભય વગેરે આદરપૂર્વક સ્તુતિ કરવા લાગ્યા. (૮)

**અભયાદિ બોલ્યા** - એકાંતિક ધર્મની રક્ષા માટે ગ્રહણ કર્યો છે જન્મ જેમણે એવા હે સત્પુરુષોના પતિ ! અલૌકિક પ્રતાપથી જેમણે દૈત્યોનાં મૂળો ઉખેડી નાખ્યાં છે એવા, કુંડ અને નાસ્તિકાદિ અસત્ માર્ગોથી પોતાના ભક્તોની રક્ષા કરનારા, હે પ્રશાંત મૂર્તિ ! હે નીલકંઠ ! તમો જય પામો અર્થાત્ અમારા મનોરથ પૂર્ણ કરવાથી ઉત્કર્ષનો આવિર્ભાવ કરો. (૯)

આ કળિયુગમાં મનુષ્યોનાં કલ્યાણ માટે અતિ પ્રેમથી જ નિરંતર ઉપાસનીય સુંદર મૂર્તિ જેમની છે એવા હે ક્ષમાસાગર ! હે દયાનિધિ ! હે નીલકંઠ ! અમારા મનોરથ પૂર્ણ કરવામાં ઉત્કર્ષનો આવિર્ભાવ કરો. (૧૦) પોતાના ભક્તોને ગોલોક ધામમાં લઈ જનારા હે આત્મનિષ્ઠ ! હે પ્રભો ! હમેશાં એકાંતિક ધર્મ ધારણ કરનારા, પોતાના સ્વાશ્રિતોમાં પ્રવર્તાવ્યો છે સુખ આપનાર સાંખ્યયોગ જેણે એવા, (૧૧) અધર્મ-માયા-કળિયુગ તથા જગતને ક્ષોભ કરનાર ભગવાનની શક્તિરૂપ કાળ-નાના પ્રકારના દોષો આદિને તત્કાળ નાશ કરનાર શ્રવણાદિ ભક્તિ છે જેમની, ધર્માચરણમાં તત્પર ! હે રમણીય વેશવાળા, (૧૨) હે મહામુને ! યોગની કળાઓને પ્રવર્તાવનાર હે યોગેશ્વર, કારુણ્યાદિ અનંત ગુણો અને કાળ-માયા અક્ષરનું નિયંતાપણું આદિક પ્રભાવશાળી, હે વિભો ! વર અને અભય આપનારા હે દિવ્યરૂપ ! (૧૩) કામ, ક્રોધ, લોભ, માનાદિ અંતઃશત્રુઓને ત્રાસ આપનાર જેમનું ચિંતવન છે એવા હે સર્વ નિયામક ! પાપોના સમૂહોને નાશ પમાડનાર છે નામ જેમનું એવા, જીવની અંદર રહેલા અજ્ઞાનને નાશ કરનાર બોધશક્તિવાળા, (૧૪) હે હરિપ્રસાદના પુત્ર ! હે હરિકૃષ્ણ, હે કૃષ્ણ, હે સ્વામિન્, હે હરે, હમેશાં તપમાં નિષ્ઠાવાળા નૈષ્ઠિક બ્રહ્મચારીઓમાં શ્રેષ્ઠ હે નારાયણ ! હે પ્રેમવતીના પુત્ર, (૧૫) મહા પ્રતાપયુક્ત અતિસ્મરણીય ચરિત્રો વાળા હે શ્રી સ્વામિનારાયણ ! હે આચાર્યેન્દ્ર, હે સ્વતંત્ર, મયારામ ભટ્ટ આદિ બ્રહ્મર્ષિઓએ અને ખટ્વાંગાદિ રાજર્ષિઓએ પૂજ્યાં છે બંને ચરણકમળ જેમનાં એવા, (૧૬) હે નીલકંઠ ! સમગ્ર જનોને સંસારસાગરમાં બૂડતા જોવાથી ઉત્પન્ન થયેલી અતિશય કરુણાથી દ્રવિત મનવાળા માટે જ પોતાની ઈચ્છાથી જ ભૂતળમાં નરાકૃતિવાળા તમો જ પોતે બ્રહ્મપુરાધિપ ભગવાન જ છો, એ આશ્ચર્ય છે. (૧૭)

जय जय निजभक्तजीवनेश! प्रचुरदयोदय ! पूर्णकाम! विष्णो ! । सकलसुरसुरेन्द्रसेविताङ्घ्रे ! सकलमनोरथदानदक्ष! जिष्णो ! ॥१८॥ तव जगदुदयावनान्तहेतोः स्थिरचरदेहभृदात्मनो मुकुन्द ! । प्रकृतिघनतमःपरे स्वधाम्नि स्थितवत एव सदा नुतौ क ईशः ॥१९॥ भवदवदहनप्रशान्तिहेतुं सुखनिलयं हि भवन्तमर्थयामः । अतिशयितदयाप्रदर्शितेऽस्मिन्वपुषि तवास्तु रतं मनोऽस्मदीयम् ॥२०॥ मुहुरिह दयया स्वतो हि निर्यत्स्मितकिरणोज्ज्वलकुण्डलाभगण्डे । परिसरदुरुशेखरालिशोभे ! तव वदनाम्बुरुहेऽस्तु नो मनोऽलिः ॥२१॥ शुभवरतिलकेन साक्षतेन भ्रुकुटियुगेन च वक्रितेन रम्ये । प्रविततनयने तवास्यचन्द्रे नयनचकोरयुगानि नो रमन्ताम् ॥२२॥ सुव्रत उवाच - इति स्तुतः सुप्रसन्नो भगवान्भक्तवत्सलः। अभयं प्रददौ तेभ्यो वाञ्छितं यन्मुमुक्षुभिः॥२३॥ ततस्तं प्रार्थयामास प्रणम्य स नृपः पुनः । स्वामिन् ! दासस्य मेऽभीष्टं सम्पूरयितुमर्हसि ॥२४॥ सानुगं त्वामहं नेतुं भगवन् ! दुर्गपत्तनम् । आयातोऽस्मि सबन्धुस्तदनुमान्यं त्वयाऽधुना ॥२५॥ श्रीभगवानुवाच - तवाऽऽशयमहं वेद्मि सबन्धोः शुद्धमेव हि । आगमिष्यामि नगरं तवाहं नात्र संशयः ॥२६॥ अत्र स्थातुं प्रतिज्ञातं खट्वाङ्गाय मयास्ति हि । मध्वारम्भावधि ततः साम्प्रतं नैतुमुत्सहे ॥२७॥ पुष्पदोलोत्सवं तस्मात् पुरे तव महीपते ! । मुन्यादिभिः सहैवैत्य करिष्यामि न संशयः ॥२८॥ तदाभयः प्राह हरिं तावदत्र सह स्वकैः । वत्स्याम्यहं त्वया साकं गमिष्यामि गृहं निजम् ॥२९॥ इत्युक्त्वा स तु तत्रैव राजा हर्यनुमोदितः ।

હે પોતાના ભક્તોના પ્રાણપતે ! અતિશય દયાથી ભૂતળમાં આવિર્ભાવ પામેલા, હે પૂર્ણકામ ! હે વિષ્ણો, સમગ્ર બ્રહ્માદિ દેવો અને રાજાઓ તેમણે સેવેલાં છે ચરણ જેમનાં એવા, પોતાના ભક્તજનોના ઈચ્છિત અર્થોને આપવામાં અતિ ચતુર હે જીષ્ણો ! તમો સર્વોત્કર્ષપણે વર્તો. (૧૮) હે મુકુંદ ! જગતની ઉત્પતિ-સ્થિતિ અને પ્રલયના કારણ, સ્થાવર-જંગમ પ્રાણીઓના આત્મા, માયાના ગાઢાંધકારથી પર પોતાના અક્ષરધામમાં નિરંતર રહેલા તમારી સ્તુતિ કરવામાં કોણ સમર્થ થાય ? કોઈ પણ થાય નહિ. (૧૯)

સંસારરૂપી દાવાગ્નિથી બળતાને શાંતિ કરવામાં કારણ, સુખના એક આશ્રય તમોને અમો પ્રાર્થના કરીએ છીએ. અતિશય દયાથી બતાવેલા તમારા આ પ્રત્યક્ષ સ્વરૂપમાં અમારું મન હંમેશા આસક્ત રહો. (૨૦)

અપાર કરુણાથી સ્વભાવસિદ્ધ પ્રસરતા મંદહાસ્યનાં કિરણોથી પ્રકાશિત કુંડળોની કાંતિવાળાં ગંડસ્થળો (કપોળ) જેમાં છે એવા, મોળીયામાં ચોતરફ પ્રસરતા ઘણા તોરાઓની પંક્તિઓથી શોભાયમાન તમારા મુખારવિંદમાં અમારું મનરૂપી ભ્રમર વારંવાર રહો. (૨૧)

અક્ષતે સહિત શુભ તિલક અને કુટિલ ભ્રકુટિના જોડલાથી સુંદર વિસ્તારવાળાં નેત્રોયુક્ત તમારા મુખચંદ્રમાં અમારા નેત્રરૂપી ચકોરનું જોડલું ક્રીડા કરો. (૨૨)

**સુવ્રતમુનિ કહે છે** : હે રાજન્ ! આ પ્રકારે સ્તુતિ કરાયેલા, અતિ પ્રસન્ન થયેલા ભક્તવત્સલ ભગવાન અભયાદિને મુમુક્ષુજનોએ ઈચ્છિત અભયદાન આપતા હતા. (૨૩)

પછી અભય રાજા શ્રીહરિને નમસ્કાર કરી ફરી પ્રાર્થના કરવા લાગ્યા : હે સ્વામિન્ ! તમારો સેવક એવો હું તે મારું ઈચ્છિત પૂર્ણ કરવા તમો યોગ્ય છો. (૨૪) હે ભગવાન, બંધુવર્ગે સહિત હું અનુયાયીવર્ગ સહિત તમોને દુર્ગપત્તનમાં લઈ જવા આવ્યો છું. માટે મારા પુરમાં આવવા હાલમાં તમોએ અમારી પ્રાર્થનાનો સ્વીકાર કરવો જોઈએ. (૨૫)

**શ્રી ભગવાન બોલ્યા** : હે રાજન્ ! હું પરિવારે સહિત તમારો નિર્દોષ અભિપ્રાય જાણું છું જ, માટે હું તમારા દુર્ગપત્તનમાં આવીશ. આ મારા વચનમાં સંશય કરવો નહિ. (૨૬) પરંતુ મેં કારિયાણી ગામમાં વસંતોત્સવ સુધી રહેવાનું ખટ્વાંગને વચન કહ્યું છે માટે હાલમાં તમારા પુરમાં આવવા ઈચ્છા નથી. (૨૭) હે મહીપતે ! તેથી હું વસંતોત્સવ પછી સાધુઓ આદિની સાથે તમારા પુરમાં આવી પુષ્પદોલોત્સવ કરીશ એમાં સંશય નથી. (૨૮)

હે રાજન્ ! તે સમયે અભય રાજાએ નારાયણ મુનિને કહ્યું, હે હરે ! હું મારા સંબધીઓ સાથે ત્યાં સુધી અહીયાં (કારિયાણીમાં) નિવાસ કરીશ. તમારી સાથે પોતાને ઘેર જઈશ. (૨૯) હે રાજન્ ! અભય રાજા તો આ પ્રમાણે કહી

न्यवसत्स्त्रीपुत्रपुत्रीसहितो दृढनिश्चयः ॥३०॥ हरीक्षणावधिधृतं व्रतं स्वीयं समापयत् । मेने स्वं पूर्णकामं स तथा तस्य सुतादयः ॥३१॥ गालवं गृहकार्यार्थं प्रैषयद्दुर्गपत्तनम् । स्वयं स हरिसेवायां तत्परोऽवर्ततान्वहम् ॥३२॥ स्वामिनारायणः सोऽपि खट्वाङ्गस्य गृहे वसन् । तडागं खनयामास सर्वजीवसुखावहम् ॥३३॥ आत्मनो वित्तमखिलं सुवर्णरजतादि यत् । तस्मै निवेदयामास खट्वाङ्गस्तदुदारधीः ॥३४॥ महान्तं वैष्णवं यागं पिप्पलग्रामवत्प्रभुः । विदधे तेन तत्रैव जनयञ्जनविस्मयम् ॥३५॥ देशान्तरेभ्योऽपि जनास्तत्रायान्ति स्म भूरिशः । सोपायनकरा राजंस्तं प्राप्यापुः परां मुदम् ॥३६॥ इष्टकर्मोत्सवे तत्र सोमं सूरं च मान्त्रिकम् । चक्रेऽलर्कं च जीवाख्यं स मुख्यान् क्षत्रियोत्तमान् ॥३७॥ बहुशो ब्राह्मणान् भोज्यैर्विविधैर्मोदकादिभिः । स्वर्णादिदक्षिणाभिश्च तोषयामास वर्णिराट् ॥३८॥ मखं तत्रातिरुद्रं च सम्भारेणैव भूयसा । चकार प्रीणयन्विप्रान्वैदिकान्स सहस्रशः ॥३९॥ यज्ञं वसन्तपञ्चम्यां विधिना स समापयत् । रक्षको धर्मसेतूनां नश्यतां कालवेगतः ॥४०॥ भूरिदानपरितोषितविप्रैर्वीक्षितक्रतुमहैश्च गृहस्थैः । गीतमस्य तु यशः श्रुतवन्तश्चित्रमापुरवनौ क्षितिपालाः ॥४१॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे श्रीनारायणाभयराजसमागमपूजनस्तवननिरूपणनामाऽष्टाविंशोऽध्यायः ॥२८॥

---

શ્રીહરિએ અનુમોદન આપેલા સતા બે પત્નીઓ-ઉત્તમ પુત્ર-જયા વગેરે ચાર પુત્રીઓએ સહિત દૃઢ નિશ્ચયવાળા ત્યાં જ નિવાસ કરવા લાગ્યા. (૩૦) અભય રાજાએ શ્રીહરિના દર્શન સુધી પોતે સ્વીકાર કરેલું ધારણાં-પારણાં નામનું વ્રત સમાપ્ત કર્યું. પોતાને પૂર્ણકામ માનવા લાગ્યા. તે જ પ્રકારે અભય રાજાના ઉત્તમ વગેરે બંધુજનોએ પણ પોતાનું વ્રત સમાપ્ત કર્યું. અને પોતાને પૂર્ણકામ માનતા હતા. (૩૧)

અભય રાજાએ પોતાના ઘરના કામ સારુ ગાલવ નામના પોતાના સાળાને દુર્ગપત્તન મોકલ્યા. પોતે તો શ્રીહરિની સેવામાં પ્રતિદિન વર્તતા હતા. (૩૨) જગતપ્રસિદ્ધ શ્રી સ્વામિનારાયણ પણ ખટ્વાંગના ગૃહમાં નિવાસ કરતા થકા સર્વ જીવોને સુખ કરનાર તળાવ ખોદાવતા હતા. (૩૩) ઉદાર બુદ્ધિવાળા ખટ્વાંગ રાજર્ષિ પોતાનું સુવર્ણ-ચાંદી-આદિ શબ્દથી રત્નો વગેરે પણ જે સમગ્ર ધન તે શ્રીહરિને અર્પણ કરતા હતા. (૩૪)

શ્રીહરિકૃષ્ણ ભગવાને લોકોને આશ્ચર્ય ઉત્પન્ન કરતા, પિપલાણા ગામમાં જેમ તેમ કારિયાણી ગામમાં તેનાથી મહાન વિષ્ણુયાગ કર્યો. (૩૫) હે રાજન્ ! ઘણા હરિભક્તો હાથમાં ભેટની સામગ્રીઓ લઈને દેશાંતરોથી પણ ઉત્સવમાં આવ્યા. શ્રીહરિને મળી સર્વોત્તમ આનંદ પામ્યા. (૩૬) શ્રીહરિએ તે વિષ્ણુયાગ મહોત્સવમાં સોમ-સૂરા-માંત્રિક-અલૈયા- જીવા ખાચર એ જે ઉત્તમ ક્ષત્રિયો, તેમને તે તે કાર્યવિધાનમાં અગ્રેસર કર્યા. (૩૭)

વર્ણીન્દ્ર શ્રીહરિએ લાડુ વગેરે વિવિધ પ્રકારનાં ભોજનોથી અને સુવર્ણ આદિ દક્ષિણાઓથી ઘણા વિપ્રોને સંતોષ પમાડ્યા. (અને વિષ્ણુયાગની સમાપ્તિ કરી.) (૩૮) તેમજ શ્રીહરિએ વેદ જાણનારા હજારો બ્રાહ્મણોને સંતોષ પમાડતા, ઘણી સામગ્રીથી જ અતિ રુદ્ર નામનો યજ્ઞ પણ કારિયાણી ગામમાં કર્યો. (૩૯) કાળવેગથી નાશ પામેલી ધર્મર્યાદાઓના રક્ષણ કરનારા શ્રીહરિએ અતિ રુદ્ર યજ્ઞ શાસ્ત્ર વિધિથી માઘ સુદી પંચમી તિથિએ સમાપ્ત કર્યો. (૪૦)

ઘણી દક્ષિણાઓ આપવાથી સંતોષ પમાડેલા બ્રાહ્મણોએ તથા જોયેલો છે યજ્ઞનો ઉત્સવ જેમણે એવા ધનાઢ્ય ગૃહસ્થ જનોએ ગાન કરાયેલ શ્રીહરિનો યશ સાંભળનારા, પૃથ્વીમાં રહેલા રાજાઓ આશ્ચર્ય પામ્યા. (૪૧)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે શ્રી નારાયણાભયરાજસમાગમ પૂજનસ્તવન નિરૂપણનામા ऽष्टाविंशोऽध्याय : (२८)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच - **अथो हरिर्यज्ञविधिं यथावत्समाप्य सन्तोष्य स विप्रसङ्घान् । उपाविशत्संसदि तुङ्गपीठे नृप ! स्वभक्तैः परिपूज्यमानः ॥१॥ तस्याग्रतस्त्यागिजना निषेदुस्तांश्चाभितोऽन्ये पुरुषा यथार्हम् । पुंसोऽस्पृशन्त्यः स्त्रिय एकतश्च दृढव्रतास्तत्र तदा निषेदुः ॥२॥ तान्भक्तसङ्घानभिवीक्ष्य सर्वानवस्थितान् स्वाननदत्तदृष्टीन् । आनन्दयन्प्रीतमनाः स्ववाचा जगाद नारायण ऊर्जितश्रीः ॥३॥** श्रीनारायणमुनिरुवाच - **भक्ताः ! । शृणुत मद्वाक्यं सर्वेषां वो हितं ब्रुवे । परोपकारसदृशं नान्यत्सुकृतमस्ति हि ॥४॥ अपि कीटपतङ्गाद्याः सन्त्येव स्वोदरम्भराः । परोपकारिणो लोके विरलाः सन्ति पूरुषाः ॥५॥ स्वयं सोढ्वापि ये कष्टं परेषां कुर्वते हितम् । तैरेव साधितः स्वार्थ इति जानीत निश्चितम् ॥६॥ अन्यस्य दुःखमालोक्य यथाशक्त्यत्र यः पुमान् । न तन्निवारणं कुर्यान्निर्दयः स पशुर्मतः ॥७॥ धन्यो हि रन्तिदेवाख्यो राजा यस्य यशोऽमलम् । अद्यापि गीयते लोके परोपकरणाज्जनैः ॥८॥** सुव्रत उवाच - **इति भक्तपतेस्तस्य श्रुत्वा वाक्यं तु तेऽखिलाः । प्रोचुर्भक्ता नमस्कृत्य तमहेतुकृपानिधिम् ॥९॥** भक्ता ऊचुः - **भगवञ्छ्रोतुमिच्छामो वयं सर्वेऽपि भूपतेः । आख्यानं रन्तिदेवस्य परोपकृतिशालिनः॥१०॥** श्रीनारायणमुनिरुवाच - **आसीद्राजा पुरा धीमांश्चन्द्रवंशसमुद्भवः । सङ्कृतिर्नामतस्तस्य रन्तिदेवोऽभवत्सुतः ॥११॥ सर्वलक्षणसम्पन्नो दयालुर्मतिमाञ्छुचिः । पितर्युपरते राज्यं धर्मेणैव चकार सः ॥१२॥ परोपकारशीलोऽसौ मखानुद्दिश्य भूरिशः । निजां समृद्धिमखिलां विप्रेभ्यः प्रददौ नृपः ॥१३॥ यद्यत्किञ्चिदभूत्प्राप्तं वस्त्रपात्रधनादि च । तत्तत्सर्वं ददाति स्म ब्राह्मणेभ्यस्तदैव सः ॥१४॥ निष्किञ्चनोऽतिधीरश्च सकुटुम्बोऽपि भूपतिः । आश्रित्यायाचितां वृत्तिं वर्तते स्मानुवासरम् ॥१५॥**

---

## અધ્યાય : ૨૯

**શ્રીહરિએ પરોપકારમાં આશ્ચર્યકારી રંતિદેવ રાજાનું આખ્યાન કહ્યું છે.**

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પછી શ્રીહરિએ શાસ્ત્રવિધિ પ્રમાણે યજ્ઞની સમાપ્તિ કરી વિપ્રસમૂહોને દક્ષિણાથી સંતોષ પમાડી, પોતાના ભક્તોએ સારી રીતે પૂજાયેલા શ્રીહરિ સભામાં ઊંચે આસને બેઠા. (૧) તે સમયે સભામાં શ્રીહરિની આગળ દઢ વ્રતવાળા સાધુઓ તથા બ્રહ્મચારીઓ બેઠા. તેમની ચારે તરફ ગૃહસ્થ ભક્તો યથાયોગ્ય બેઠા. પુરુષોને નહિ સ્પર્શ કરતી સ્ત્રીઓ સભાના એક દેશમાં બેઠી. (૨) અતિ શોભાયમાન શ્રી સ્વામિનારાયણ ભગવાન સભામાં બેઠેલા પોતાના મુખકમળમાં નેત્રની વૃત્તિઓ જેમની છે તે સર્વે ભક્તજનોને જોઈ પ્રસન્ન મનવાળા પોતાનાં વચનરૂપી અમૃતથી આનંદ આપતાં બોલ્યા. (૩)

**પરોપકારનો મહિમા :-** શ્રી નારાયણ મુનિ કહે છે : હે ભક્તો ! મારું વચન તમો સાંભળો. જેથી તમારૂ સર્વેનું હિત થાય તેવું વચન કહું છું. પરોપકાર સમાન બીજું કોઈ પુણ્ય જ નથી. (૪) કીડીઓ તથા પતંગિયાંઓ અને પશુ વગેરે પ્રાણીઓ પણ પોતાના ઉદરનું પોષણ કરનારાં હોય છે. પરોપકારી પુરુષો તો કોઈક જ હોય છે. (૫)

જે પુરુષો પોતે દુઃખ સહન કરીને પણ બીજાં જનોનું હિત કરે છે તે પુરુષોએ જ પોતાનું કાર્ય સંપાદન કર્યું છે : આ પ્રમાણે નિશ્ચે જાણો. (૬) આ લોકમાં જે પુરુષ બીજાના દુઃખને જોઈને પોતાની શક્તિ પ્રમાણે તેના દુઃખનું નિવારણ ના કરે, દયારહિત તે પુરુષ પશુ સમાન માનેલો છે. (૭)

હે ભક્તો ! રંતિદેવ નામના રાજા પરોપકારથી ધન્ય (કૃતાર્થ) થઈ ગયા, કે જે રાજાનો નિર્મળ યશ લોકમાં હાલમાં પણ જનો દ્વારા ગવાય છે. (૮) હે રાજન્, ભક્તપતિ શ્રીહરિનું આવું વાક્ય સાંભળી સભામાં બેઠેલા સમગ્ર જનો નિષ્કારણ કૃપાસાગર શ્રીહરિને નમસ્કાર કરી બોલ્યા. (૯)

**ભક્તજનો કહે છે** : હે ભગવન્, અમો સર્વે પણ પરોપકારશાળી રંતિદેવ રાજાનું આખ્યાન સાંભળવા ઈચ્છીએ છીએ. (૧૦) આ પ્રમાણે પોતાના ભક્તોએ પૂછેલા **શ્રી નારાયણમુનિ બોલ્યા** : હે ભક્તો ! પૂર્વે બુદ્ધિશાળી, ચંદ્રવંશમાં ઉત્પન્ન થયેલો સંકૃતિ નામનો રાજા હતો. તેમનો પુત્ર રંતિદેવ હતો. (૧૧) સર્વ લક્ષણોથી સંપન્ન, દયાળુ-મહાબુદ્ધિશાળી-પવિત્ર રંતિદેવ પિતા પરલોકમાં ગયા પછી ધર્મથી રાજ્ય કરતો હતો. (૧૨)

પરોપકારના સ્વભાવવાળો આ રંતિદેવ અનેક યજ્ઞોને ઉદ્દેશીને સમગ્ર પોતાની સમૃદ્ધિ બ્રાહ્મણોને આપતો હતો. (૧૩) વસ્ત્રો-પાત્રો-ધન વગેરે જે જે વસ્તુ પોતાને પ્રાપ્ત થતી તે સર્વે તે સમયમાં જ બ્રાહ્મણોને આપતો હતો. (૧૪) કુટુંબે સહિત અકિંચન રંતિદેવ રાજા પણ મહા ધીરજતા યુક્ત અયાચિત વૃત્તિનો આશ્રય કરી દરરોજ વર્તતો હતો. (૧૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

क्वचित्स्निग्धं क्वचिद्रूक्षं क्वचिदल्पं च भूरि वा । अन्नं वाप्युदकं राजा यत्प्राप्तं स्यात्तदग्रहीत् ॥१६॥ वर्तमानस्य तस्येत्थमेकदा त्वीश्वरेच्छया । अष्टचत्वारिंशदीयुर्दिनान्यन्नोदकं विना ॥१७॥ एकोनपञ्चाशत्तमे दिवसे कश्चन द्विजः । पक्वमन्नं च पानीयं ददौ तच्चाग्रहीन्नृपः ॥१८॥ विभज्य पुत्रादिभ्यस्तद्यावद्भोक्तुमुपाविशत् । अतिथिर्ब्राह्मणस्तावदन्नार्थी प्राप तं नृपम् ॥१९॥ स तस्मै श्रद्धयैवान्नं हरिबुद्ध्या ददौ ततः । स भुक्त्वा प्रययौ तावदन्योऽतिथिरुपाययौ ॥२०॥ वृषलायाप्यतिथये तस्मै श्रद्धादरान्वितः । हरिं स्मरन् ददावन्नं नृपतिः स दयार्द्रहृत् ॥२१॥ अथ शूद्रे गते भुक्त्वा तमन्योऽतिथिरभ्यगात् । श्वभिर्वृतः क्षुधाक्षामो राजानं तमुवाच सः ॥२२॥ अन्नं मे दीयतां राजन्सगणाय बुभुक्षवे । इति तेनार्थितो राजा प्रसन्नोऽभून्निजान्तरे ॥२३॥ ततोऽन्नमवशिष्टं यत्तत्सर्वं श्रद्धयाऽऽदरात् । दत्त्वा तस्मै श्वपतये हरिबुद्ध्या ननाम सः ॥२४॥ अथावशिष्टमुदकं तच्चैकपरितर्पणम् । यावत्पिपासति नृपस्तावत्तं पुष्कसोऽभ्यगात् ॥२५॥ स नृपं प्राह भो राजन्नपो देह्यशुभाय मे । इति दीनां तस्य वाचं श्रुत्वा राजा तमैक्षत ॥२६॥ ततो निसर्गकरुणस्तृषार्तोऽपि नृपोत्तमः । हरिबुद्ध्या जलं तस्मै दास्यन्प्राहामृतं वचः ॥२७॥ न कामयेऽहं गतिमीश्वरात्परामष्टर्द्धियुक्तामपुनर्भवं वा । आर्तिं प्रपद्येऽखिलदेहभाजामन्तःस्थितो येन भवन्त्यदुःखाः ॥२८॥ क्षुत्तृट्श्रमो गात्रपरिश्रमश्च दैन्यं क्लमः शोकविषादमोहाः। सर्वे निवृत्ताः कृपणस्य जन्तोर्जिजीविषोर्जीवजलार्पणान्मे ॥२९॥ एवं प्रभाष्य पानीयं म्रियमाणः पिपासया । पुष्कसायाददाद्धीरो निसर्गकरुणो नृपः ॥३०॥ ततस्त्रिभुवनाधीशा ब्रह्मविष्णुमहेश्वराः। परोपकारसन्तुष्टा ददुस्तस्मै

---

કોઈ સમયે ઘૃતાદિયુક્ત, ક્યારેક લૂખું, ક્યારેક ઘણું, ક્યારેક અલ્પાહાર અન્ન-જળ જે કંઈ પ્રાપ્ત થતું તે રંતિદેવ ગ્રહણ કરતા હતા. (૧૬) આ પ્રમાણે વર્તતા રાજાને એક સમયે ઈશ્વર ઈચ્છાથી અન્નજળ વિના અડતાળીશ દિવસો ગયા. (૧૭)

ઓગણ-પચાસમે દિવસે કોઈ બ્રાહ્મણે રાંધેલું અન્ન અને જળ આપ્યું. (૧૮) રાજાએ તે અન્નાદિ પોતાના પુત્રાદિને વિભાગ કરી આપ્યું, જેટલામાં રાજા ભોજન કરવા બેઠા તેટલામાં અન્નાર્થી બ્રાહ્મણ અતિથિ પ્રાપ્ત થયો. (૧૯) પછી રાજાએ પરમેશ્વરબુદ્ધિથી, શ્રદ્ધાથી જ તે અતિથિને અન્ન આપ્યું. તે જમીને ગયો તેટલામાં બીજો અતિથિ આવ્યો. (૨૦) દયાથી ભીના હૃદયવાળા રંતિદેવ રાજાએ પરમેશ્વરને સંભારતાં આદરપૂર્વક શૂદ્ર અતિથિને પણ અન્ન આપ્યું. (૨૧) પછી તે શૂદ્ર અતિથિ ભોજન કરી ગયો. તે સમયમાં ત્રીજો અતિથિ રંતિદેવને પ્રાપ્ત થયો. કૂતરાઓથી વીંટાયેલો, ભૂખથી દુર્બળ અંગવાળો તે અતિથિ રાજા પ્રત્યે બોલ્યો : (૨૨) ‘હે રાજન્, કૂતરાના મંડળે સહિત જમવાની ઈચ્છાવાળા મને અન્ન આપો.’ હે ભક્તો ! આ પ્રમાણે અતિથિએ પ્રાર્થના કરાયેલા રંતિદેવ રાજા પોતાના મનમાં પ્રસન્ન થયા. (૨૩)

પછી રાજાએ બાકી રહેલું અન્ન તે સર્વે કૂતરાના પાલક અતિથિને શ્રદ્ધાથી આપીને પરમાત્મબુદ્ધિથી નમસ્કાર કર્યો. (૨૪)

પછી તે માત્ર એક જણની તૃષાનિવર્તક બાકી રહેલું જળ જેટલામાં પીવા ઈચ્છે છે તેટલામાં રાજાની પાસે એક ચંડાળ આવી પહોંચ્યો. (૨૫) તે ચંડાળ રાજાને કહેવા લાગ્યો : ‘હે રાજન્, મને નીચને જળ આપો’ આવી તેની દીન વાણી સાંભળી રંતિદેવે ચંડાળને જોયો. (૨૬)

પછી સ્વભાવથી દયાળુ, શ્રેષ્ઠ રાજા પોતે તરસ્યા છે છતાં પણ તેને પરમાત્મબુદ્ધિથી જળ અર્પણ કરશે એવા થકા અમૃત સમાન વચન બોલ્યા : (૨૭) ‘હું પરમાત્માથી અણિમાદિ આઠ ઐશ્વર્યો સહિત સર્વોત્તમ ભોગપ્રાપ્તિ અથવા મુક્તિ ઈચ્છતો નથી. હું સર્વે પ્રાણીઓના અંદર રહેલા આત્માની સાથે ઐક્યતા પામી તેના દુઃખના ભોક્તારૂપે વર્તતો સતો તેમનું દુઃખ પામું. જેનાથી દુઃખભોક્તા મારાથી સર્વે તે દુઃખથી રહિત થાય. (૨૮) જીવવા ઈચ્છતા આ દીન ચંડાળને જીવનના કારણભૂત જળને અર્પણ કરવાના સંકલ્પથી મારી ભૂખ, તરસ, ઈન્દ્રિયોનો ખેદ, શરીરનો શ્રમ, દૈન્ય, ચિત્તની ગ્લાનિ, શોક, વિષાદ, મોહ તે બધા નાશ પામ્યા’. (૨૯)

હે ભક્તો ! મહાધૈર્યશાળી, સ્વભાવથી દયાળુ રંતિદેવ રાજાએ પોતે તરસથી પ્રાણાન્ત કષ્ટને પામ્યો હતો છતાં પણ આ પ્રમાણે બોલીને ચંડાળને પાણી આપ્યું. (૩૦) પછી ત્રણ ભુવનના અધિપતિઓ બ્રહ્મા, વિષ્ણુ અને શંકરે પરોપકારથી પ્રસન્ન

**स्वदर्शनम् ॥३१॥ स तु तेभ्यो नमश्चक्रे निःसङ्गो विगतस्पृहः । अनुरक्तो वासुदेवे न त्वयाचत किञ्चन ॥३२॥ परोपकृतिशीलस्य दयालोस्तस्य भूपतेः । माया गुणमयी भक्ताः ! स्वप्नवत्प्रत्यलीयत ॥३३॥ तत्प्रसङ्गानुभावेन ये वै तस्यानुवर्तिनः । तेऽभवन् योगिनः सर्वे नारायणपरायणाः ॥३४॥ एवम्भूतः स राजर्षिः पुण्यकीर्तिरभूद्भुवि । परोपकृतिधर्मेण विख्यातो दृढभक्तिमान् ॥३५॥ तस्माद्यूयं च भो भक्ताः ! यथाशक्ति निरन्तरम् । स्वयं सोढ्वापि विपदं कुर्यातान्यहितं मुदा ॥३६॥** सुव्रत उवाच - **इत्याश्रुत्य प्रभोस्तस्य वचः पीयूषसन्निभम् । सर्वे भक्तजना हृष्टास्तद्गृहीत्वा ववन्दिरे ॥३७॥ स्वं स्वं देशं गन्तुमाज्ञाप्य भक्तान्वर्णिस्वामी स्थानमायात्ततः स्वम् । खट्वाङ्गोऽपि प्राप हर्षं महान्तं मेने भक्तः पूर्णकामं ततः स्वम् ॥३८॥**

इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे परोपकारोपदेशे रन्तिदेवाख्याननिरूपणनामैकोनत्रिंशोऽध्यायः ॥२९॥

सुव्रत उवाच - **भक्तकल्पद्रुमं कृष्णं तु सुखासीनमेकदा । प्रणम्याभयभूपालः प्रोवाच प्राञ्जलिर्नृप ! ॥१॥** अभय उवाच - **प्रतिज्ञातस्त्वया कालो दुर्गपुर्यागमाय यः । भगवन्वर्तते सोऽद्य विधेह्यस्मास्वतः कृपाम् ॥२॥** सुव्रत उवाच - **सत्यप्रतिश्रुतः स्वामी श्रुत्वेति नृपतेर्वचः । सज्जो भवाद्यैव यामस्त्वत्पुरं हीत्युवाच तम् ॥३॥ माघमासस्य शुक्लाया**

---

થઈને રંતિદેવ રાજાને પોતાનાં દર્શન આપ્યાં. (૩૧) રાજ્યાદિમાં આસક્તિરહિત, ભોગમાં સ્પૃહાએ રહિત, વાસુદેવમાં પ્રીતિવાળા રંતિદેવ રાજાએ તો બ્રહ્માદિને સાષ્ટાંગ પ્રણામ કર્યા. પરંતુ કંઈ પણ વરદાન તો માગ્યું જ નહિ. (૩૨)

હે ભક્તો ! પરોપકારના સ્વભાવવાળા દયાળુ રંતિદેવ રાજાને સત્ત્વ, રજ અને તમોગુણવાળી માયા સ્વપ્નની માફક વિલીન થઈ ગઈ. (૩૩)

રંતિદેવ રાજાના જે અનુયાયીજનો તે સર્વે પણ તેમના સર્વોત્કૃષ્ટ પ્રસંગના મહિમાથી ભક્તિનિષ્ઠાવાળા થઈને શ્રી વાસુદેવના એકાંતિક ભક્તો થયા. (૩૪) આવા ગુણવાળા પવિત્ર યશસ્વી-દઢ ભક્તિમાન તે રાજર્ષિ રંતિદેવ પરોપકારધર્મથી પૃથ્વીમાં પ્રસિદ્ધ થયા. (૩૫)

હે ભક્તો ! આવા પરોપકારના માહાત્મ્યથી તમો સર્વે પણ પોતે દુઃખ સહન કરીને પણ નિરંતર શક્તિ પ્રમાણે બીજાનું હિત કરો. (૩૬) **સુવ્રતમુનિ કહે છે** : હે રાજન્ ! શ્રીનારાયણમુનિનું સુધા સમાન આ વચન સાંભળીને સર્વ ભક્તજનો હર્ષ પામી તેમનું વચન સ્વીકારી, તેમની સ્તુતિ કરવા લાગ્યા. (૩૭)

વર્ણિ સ્વામી શ્રીહરિએ દેશાંતરથી આવેલા ભક્તજનોને પોતપોતાના દેશમાં જવાની આજ્ઞા આપી પછી સભાના સ્થાનથી પોતાના નિવાસસ્થાનમાં આવ્યા. પછી પોતાના ગૃહમાં શ્રીહરિના નિવાસથી તેમના એકાંતિક ભક્ત ખટ્વાંગ રાજર્ષિ પણ અતિશય આનંદ પામ્યા. પોતાના આત્માને શ્રીહરિની સેવાથી સંપૂર્ણ મનોરથવાળા(કૃતાર્થ) માનતા હતા. (૩૮)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે પરોપકારોપદેશે રંતિદેવાખ્યાનનિરૂપણ-નામૈકોનત્રિંશોઽધ્યાયઃ (૨૯)*

## અધ્યાય : ૩૦

**શ્રીહરિનું દુર્ગપત્તનમાં આગમન થયા પછી સાધુસમાગમની પ્રશંસા અને પુષ્પદોલોત્સવ કર્યો એ કહ્યું છે.**

**સુવ્રતમુનિ બોલ્યા** : હે રાજન્ ! એક સમયે સુખપૂર્વક બેઠેલા, કલ્પતરુની માફક ભક્તોના મનોરથ પૂર્ણ કરનાર શ્રીહરિને પ્રણામ કરી અભયરાજા બંને હાથ જોડી બોલ્યા : (૧) હે ભગવન્ ! તમોએ દુર્ગપત્તનમાં આવવા માટે જે સમય કહેલો છે તે હાલમાં વર્તે છે. માટે અમારા ઉપર કૃપા કરો. (૨)

**સુવ્રતમુનિ કહે છે** : હે રાજન્, સત્ય પ્રતિજ્ઞાવાળા શ્રી સહજાનંદ સ્વામી અભય રાજાનું વચન સાંભળી 'હે રાજન્! તમે તૈયાર થાઓ; આજે જ તમારા નગરમાં જઈએ' : આ પ્રમાણે અભયરાજાને કહેવા લાગ્યા. (૩) શ્રીહરિ માઘ સુદી

दशम्या रजनौ हरिः । साकमृष्यादिभिर्ग्रामान्निर्ययौ साभयस्ततः ॥४॥ खट्वाङ्गस्तु सहैवागादुपशल्यावधीतरे । ग्राम्या अनुव्रज्य हरिं न्यवर्तन्त तदाज्ञया ॥५॥ एकादश्यां प्रातरसौ प्राविशद्दुर्गपत्तनम् । अभियातो गालवेन नानावादित्रनिःस्वनैः ॥६॥ स्वदुर्गेऽथाभयो गेहे तदर्थं ह्येव कल्पिते । न्यवासयद्धरिं चान्यान्यथार्हं सोऽन्यवेश्मसु ॥७॥ आत्मना सह सर्वस्वं तदैव हरये मुदा । त्वदीयमेतत्सर्वं हीत्येवं राजा न्यवेदयत् ॥८॥ अनन्यभावेन ततो दासवत्सात्मजोऽन्वहम्। तस्यावर्तत सेवायां सानुगस्य यथोचितम् ॥९॥ तथाऽकरोत्तस्य सेवां सानुगस्य नृपो यथा । स ह्यागन्तुकतां हित्वा मेने स्वं तत्पुराधिपम् ॥१०॥ तेनान्नतोयवासाद्यैः सन्तोऽपि सेवितास्तथा । यथाऽन्यैः प्राक् कृतां सेवां गुर्वीं वा ते विसस्मरुः ॥११॥ गोपीभट्टो बर्हिचरो लालजिद्भगवांस्तथा । रामचन्द्रश्च कृष्णाद्या विप्रास्तत्सेवनं व्यधुः ॥१२॥ नाञ्जोऽलयश्च राष्ट्रोढो नाङ्गमालादयश्च तम् । क्षत्रियप्रवरा भक्त्या नित्यदैव सिषेविरे ॥१३॥ मालजित्कृष्णजिच्चाम्ब उत्करो हरजित्तथा । रामो योधादयो वैश्या अप्यसेवन्त तं मुदा ॥१४॥ रमाऽमर्यमला क्षेमा देवी स्वर्णा यमी रतिः । फुल्ला दिव्या च रामाद्याः स्त्रियः पर्यचरंश्च तम् ॥१५॥ पुष्पदोलोत्सवं तत्र करिष्यन् भगवानथ । भक्तान्देशान्तरेभ्योऽपि राज्ञो दूतैरजूहवत् ॥१६॥ राजाप्यभारयद्दङ्गैर्मन्थनीकृत्रिमहृदान्। अकारयद्गुलालस्य राशींश्च महतो नृप ! ॥१७॥ होलाद्वितीयदिवसे नक्षत्रेऽर्यमदैवते । अबन्धयत्पुष्पदोलां हरिर्भक्तैः सुशोभनाम् ॥१८॥ श्रीकृष्णप्रतिमां तत्र निधायाभ्यर्च्य वर्णिराट् । स्वयमान्दोलयामास दोलापद्यानि गापयन् ॥१९॥

---

૧૦ દશમની રાત્રિમાં મુનિઓ વગેરેની સાથે અને કુટુંબે સહિત અભયરાજાએ સહિત કારિયાણી ગામથી નીકળ્યા. (૪) ખટ્વાંગ રાજર્ષિ તો શ્રીહરિની સાથે જ ચાલ્યા, બીજા ગામના જનો તો ગામના સીમાડા સુધી શ્રીહરિની પછવાડે જઈને શ્રીહરિની આજ્ઞાથી પાછા ગયા. (૫)

અભયરાજાના સાળા ગાલવે શ્રીહરિને આવતા સાંભળી નાના પ્રકારનાં વાજિંત્રોના ધ્વનિઓની સાથે શ્રીહરિની સન્મુખ જઈને સ્વાગત કરાયેલા શ્રીહરિ સંવત્ ૧૮૬૧ ના માઘસુદી એકાદશીને દિવસે પ્રભાત સમયે દુર્ગપત્તન આવ્યા. (૬) અભયરાજાએ પોતાના ઘરોની ચોતરફ કોટમાં શ્રીહરિના નિવાસ માટે તૈયાર કરી રાખેલા ભવનમાં શ્રીહરિને ઉતારો કરાવ્યો. શ્રીહરિના અનુગામી મુનિ આદિને બીજાં ઘરોમાં નિવાસ કરાવ્યો. (૭) પછી અભય નૃપતિએ શ્રીહરિને કહ્યું : હે હરે ! આ બધુ આ રાજ્ય-ખજાનો -મહેલ વગેરે સમગ્ર તમારું જ છે, એમ કહીને એજ સમયે (શ્રીહરિના આગમન દિવસે જ) પોતાના દેહની સાથે યત્કિંચિત્ પોતાનું હતું તે હર્ષપૂર્વક ઉત્તમપાત્ર શ્રીહરિકૃષ્ણ ભગવાનને અર્પણ કરી દીધું. (૮)

ત્યાર પછી પુત્રે સહિત અભયરાજા દાસની માફક મુનિઓએ સહિત શ્રીહરિની યથાયોગ્ય પરિચર્યા અનન્ય ભાવથી પ્રતિદિન કરતા હતા. (૯) અભયરાજા અનુચરોએ સહિત શ્રીહરિની સેવા એવી કરતા હતા કે જેથી શ્રીહરિ મહેમાનપણાના ભાવનો ત્યાગ કરી પોતાને ગઢપુરના અધિપતિ માનતા હતા. (૧૦)

અભયરાજાએ અન્ન-જળ-વસ્ત્ર વગેરે આપવાથી સાધુઓની પણ તેવી જ રીતે સેવા કરી કે જે સેવાથી તે સંતો બીજાઓએ પહેલાં કરેલી મહાસેવાને ભૂલી ગયા. (૧૧) ગોપીભટ્ટ-બેચર-લાલજી તથા ભગવાન, રામચંદ્ર, કૃષ્ણજી આદિ બ્રાહ્મણો શ્રીહરિના ચરણકમળની સેવા કરતા હતા. (૧૨) નાજો-અલૈયો-રાઠોડ-નાંગમાલ વગેરે ક્ષત્રિયોમાં શ્રેષ્ઠ ભક્તો શ્રીહરિને ભક્તિપૂર્વક હંમેશાં સેવતા હતા. (૧૩)

માલજી-કૃષ્ણજી--આંબો-ઉત્કર-હરજી-રામજી-જોધો આદિક વૈશ્યો તે ભગવાનની પરાભક્તિથી હંમેશા સેવા કરવા લાગ્યા. (૧૪) રમા-અમરી-અમૂલાં-ક્ષેમા-દેવી-સોના-યમી-રતિ-ફૂલી-દિવ્યા-રામા આદિક સ્ત્રીભક્તો શ્રીહરિની સેવા કરતી હતી. (૧૫)

પછી દુર્ગપુરમાં પુષ્પદોલોત્સવ કરવાની ઈચ્છાવાળા ભગવાન શ્રીહરિએ અભયરાજાના દૂતો દ્વારાએ દેશાંતરથી પણ પોતાનાં ભક્તજનોને બોલાવડાવ્યા. (૧૬) હે રાજન્ ! અભયરાજાએ પણ ભગવાનની આજ્ઞાથી કૃત્રિમ જળાશય (હોજ) અને ઘણી ગાગરો રંગથી ભરાવી રાખી અને ગુલાલના મોટા ગંજ કરાવી મૂક્યા. (૧૭) શ્રીહરિએ હોળીને બીજે દિવસે અર્યમા દેવતાવાળા ઉત્તરાફાલ્ગુની નક્ષત્રમાં ભક્તજનો દ્વારા અતિશય સુશોભિત મોગરા વગેરેનાં પુષ્પોથી તૈયાર કરેલો હિંડોળો બંધાવ્યો. (૧૮) વર્ણીન્દ્ર શ્રીહરિ પુષ્પના હિંડોળામાં બાળમુકુંદજીને મૂકીને વિધિ પ્રમાણે પૂજન કરી હિંડોળાનાં પદો ગવડાવતા હતા. અને પોતે શ્રીહરિ જ હિંચકો નાખતા હતા. (૧૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

वीणातालमृदङ्गाद्यैः साधवो गायकास्तदा । होलाक्रीडनपद्यानि कृष्णस्य जगुरादरात् ॥२०॥ क्रीडति स्म ततो भक्तैः साकं कृष्णाग्रतो हरिः । गुलालरङ्गप्रक्षेपैर्भक्ताश्चान्योन्यमुत्सुकाः ॥२१॥ एकतः सधवा योषाश्चिक्रीडुश्च परस्परम् । कृष्णबालचरित्राणि गायन्त्यो जनमङ्गलम् ॥२२॥ यथा रङ्गो गुलालं च न स्पृशेत्स्वं तथाऽधवाः । योषितो दूरतः स्थित्वा पश्यन्ति स्म हरिं नृप ! ॥२३॥ कृष्णप्रसादिनं रङ्गं रेचकैर्हरिणा मुदा । क्षिप्यमाणं गुलालं च जना जगृहुरादरात् ॥२४॥ मध्याह्नावधि सङ्क्रीड्य ततो भक्तजनैः सह । सस्नावुन्मत्तगङ्गायां निर्मलाम्भसि धर्मजः ॥२५॥ ततो निवेद्य कृष्णाय महानैवेद्यमुत्तमम् । महानीराजनं चक्रे स्वापयामास तं ततः ॥२६॥ चतुर्विधैश्च सुरसैरन्नैर्भक्तान्स सर्वशः । यथेष्टं भोजयित्वैव बुभुजे स्वयमीश्वरः ॥२७॥ अपराह्णे सभां तत्र कारयामास शोभनाम् । न्यषीदत्तन्मध्यपीठे स जनास्तं च सर्वतः ॥२८॥ त्यागिनो गृहिणश्चैव सधवा विधवाः स्त्रियः । भक्ता यथोचितं तत्र निषेदुस्तद्गतेक्षणाः ॥२९॥ तानथानन्दयन्स्वामी प्रोवाच मधुरं वचः । सर्वेषामप्युसुभृतां हितकृच्छास्त्रसम्मतम् ॥३०॥ श्रीभगवानुवाच - शृण्वन्तु सर्वेऽप्यव्यग्राः श्रेयोहेतुं वदामि वः । सतां समागमो नित्यं कर्तव्यः सर्वथा जनाः ! ॥३१॥ ये ये मुक्ताः पुराप्यासन्निह संसृतिबन्धनात् सत्सङ्गेनैव ते ते तु ज्ञातव्यमिति निश्चितम् ॥३२॥ कृष्णमाहात्म्यमतुलं यत्तत्सद्भ्योऽवगम्यते । उदेति भक्तिश्च ततो भवबन्धविमोचनी॥३३॥

---

તે સમયે ગાયનક્રિયામાં પ્રવીણ મુક્તાનંદ આદિ સાધુઓ વીણા-તાલ-મૃદંગ વગેરે વાજિંત્રોથી શ્રીકૃષ્ણના હોળીના ખેલનનાં (ક્રીડાના) કીર્તનો આદરપૂર્વક ગાતા હતા. (૨૦) પછી શ્રીહરિ હિંડોળામાં રહેલા બાલકૃષ્ણની આગળ પોતાના ભક્તજનોની સાથે ગુલાલ અને રંગના ફેંકવાની ક્રીડા કરતા હતા અને ખેલવામાં ઉત્સાહવાળા હરિભક્તો પરસ્પર ગાતા સતા પરસ્પર ક્રીડા કરતા હતા. (૨૧)

સધવા સ્ત્રીઓ, જે પ્રકારે શ્રીકૃષ્ણનાં બાળચરિત્રો જેના શ્રવણથી જનોનું મંગળ થાય તેવી રીતે ગાતી પરસ્પર રમતી હતી. (૨૨) હે નૃપ ! વિધવા સ્ત્રીઓ જે પ્રકારે રંગનું જળ અને ગુલાલ પોતાને સ્પર્શ ના કરે તેવી રીતે દૂર પ્રદેશમાં રહીને, પોતાના ભક્તો સાથે રંગક્રીડા કરતા શ્રીહરિને જોતી હતી. (૨૩) શ્રીહરિએ સુવર્ણની પિચકારીઓથી હર્ષપૂર્વક ફેંકેલાં પ્રસાદીભૂત રંગજળ અને તેવો ગુલાલ તે હરિભક્તો, અતિ પ્રેમથી ગ્રહણ કરતા હતા. (૨૪)

ધર્મપુત્ર શ્રીહરિ ભક્તોની સાથે મધ્યાહ્ન સુધી રમીને પછી સ્વચ્છ જળવાળી ઉન્મત્ત ગંગામાં સ્વભક્તો સાથે સ્નાન કરતા હતા. (૨૫)

પછી શ્રીહરિએ પોતે પૂજેલા શ્રીકૃષ્ણને સર્વોત્તમ મહાનૈવેદ્ય નિવેદન કરી મહાનીરાજન કર્યું. પછી શ્રીકૃષ્ણને પોઢાડી દીધા. (૨૬) શ્રી હરિ ચાર પ્રકારનાં (ભક્ષ્ય-ભોજ્ય-લેહ્ય-ચોષ્ય) સારા રસવાળાં મોતિયા લાડુ-દૂધપાક વગેરેથી સર્વ સાધુ આદિ સમગ્ર ભક્તજનોને ઈચ્છા પ્રમાણે જમાડીને પોતે જમ્યા. (૨૭) શ્રીહરિ અભય રાજાના દરબારમા સાંજના પહોરમાં અતિ રમણીય સભા કરાવતા હતા. સભાના મધ્યમાં રહેલા સુંદર સિંહાસનમાં બેઠા. મુનિ વગેરે ભક્તજનો શ્રીહરિની ચોતરફ બેઠા. (૨૮)

સાધુઓ, ગૃહસ્થો અને સધવા-વિધવા સ્ત્રીઓ તે સર્વે ભક્તજનો શ્રીહરિમાં અર્પણ કર્યાં છે, મન જેમણે એવા સતા સભામાં યથાયોગ્ય બેસતા હતા. (૨૯) પછી શ્રીસહજાનંદ સ્વામી તે સર્વ ભક્તજનોને આનંદ આપતા સતા સર્વ પ્રાણીઓને પણ શ્રેય આપનારું શાસ્ત્રસંગત સુધાની માફક મિષ્ટ વચન બોલ્યા : (૩૦)

**શ્રી ભગવાન કહે છે :** હે જનો ! સર્વે તમો એકાગ્ર મનવાળા થઈ મારું વચન સાંભળો. તમારા કલ્યાણનું કારણ કહું છું. હંમેશાં સાધુજનોનો સમાગમ સર્વથા કરવો. (૩૧) પહેલાં પણ આ લોકમાં જે જે જનો સંસારના બંધનથી મુક્ત થયા છે તે તે સર્વે જનો સત્સંગથી જ થયા છે એ નિશ્ચિત તમારે જાણવું. (૩૨) અનુપમ જે પ્રત્યક્ષ શ્રીહરિનો મહિમા તે સાધુઓથી જ મુમુક્ષુઓ જાણે છે. પછી જ અનાદિ સંસારના પાશને નાશ કરનારી શ્રવણાદિ ભક્તિ ઉદય પામે છે. (૩૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

अज्ञानतमसान्धेभ्यः सन्तो ददति वै दृशः । धर्माधर्मस्वरूपं च तेभ्य एवावबुद्ध्यते ॥३४॥ वेदशास्त्रपुराणानां दुर्बोधानां विदामपि । सिद्धान्तं सन्त एवात्र सुष्ठु जानन्ति नेतरे ॥३५॥ कामादियादआत्ताना मज्जतां भववारिधौ । नृणामुद्धरणे शक्ताः सन्त एव भवन्ति हि ॥३६॥ अधर्मिकृष्णनागोपदेशोग्रगरलाग्निना । नराणां म्रियमाणानां सन्तो जाङ्गुलिका ननु॥३७॥ सद्भ्यो यथावद्विज्ञानमात्मकृष्णस्वरूपयोः । भवेत्तेऽप्यत्र विज्ञेया लक्षणैः शास्त्रसम्मतैः ॥३८॥ जितकामा जितक्रोधा जितलोभा जितेन्द्रियाः । निर्मत्सराश्च निर्माना निःस्वादा जननिःस्पृहाः ॥३९॥ निर्ममा निरहङ्कारा अहिंसाधर्मसंस्थिताः । यथोक्तब्रह्मचर्यस्थाः सत्यवाचो दयालवः ॥४०॥ कृष्णेऽनुरक्ता नितरां विरक्ता विषयेषु च । आत्मना ब्रह्मरूपेण कृष्णोपासनतत्पराः ॥४१॥ इत्यादिलक्षणोपेताः सन्तो ज्ञेया मुमुक्षुभिः । तेषां समागमः कार्यो हृदि धार्याश्च तद्गिरः ॥४२॥ सन्त एव हि जीवानां सर्वथा हितकारिणः । सन्तीति तेषां विश्वासः कर्तव्यः कृष्णचेतसाम् ॥४३॥ मान्याः पूज्या भोजनीयाः सेवनीया यथोचितम् । साधवः कृष्णहृदयं तेभ्योऽन्यन्नास्ति वै महत् ॥४४॥ सुव्रत उवाच - इति भगवता प्रोक्तां वाणीं निशम्य हितावहां सद उपगता भक्ताः सर्वे दधुः शिरसा नृप !॥ निजनिजपुरं गन्तुं सर्वानथाऽऽदिशदीशिता नृपतिरभयः प्रोवाचेदं तदा हरिमुत्थितः ॥४५॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे दुर्गपुरे पुष्पदोलोत्सवे सत्सङ्गप्रशंसननामा त्रिंशोऽध्यायः ॥३०॥

---

અનાદિ અજ્ઞાનાન્ધકારથી અંધજનોને જ્ઞાનરૂપી ચક્ષુઓ સંતો જ આપે છે. ધર્મ અને અધર્મના સ્વરૂપનો નિર્ણય પણ સંતોથી જ જણાય છે. (૩૪) પંડિતોએ પણ ન જાણી શકાય તેવા વેદો-મીમાંસાદિ શાસ્ત્રો અને પુરાણોના સિદ્ધાંતો આ લોકમા સંતો જ સારી રીતે જાણે છે, બીજા જાણતા નથી. (૩૫)

સંસાર સમુદ્રમાં બૂડતાં જનોને, કામાદિ શત્રુઓ રૂપી મગર-સાપ વગેરેએ ગળેલા મનુષ્યોને તે મગરાદિકના મુખ છેદીને ઉદ્ધાર કરવામાં સંતો જ શક્તિમાન છે. (૩૬)

અધર્માચરણવાળા અસુર ગુરુઓ રૂપી કાળા સર્પના વિપરીત ઉપદેશ રૂપી ઉગ્ર ઝેરરૂપ અગ્નિથી મરવા પડેલા જનોને સાધુઓ જ વિષવૈદ્યો છે. (૩૭) આત્મા અને પરમાત્માના સ્વરૂપનું યથાર્થપણે વિજ્ઞાન સંતોથી જ થાય છે. આ લોકમાં તેવા પ્રકારના સંતો પણ શાસ્ત્ર પ્રતિપાદિત લક્ષણોથી જાણવા. (૩૮)

**સંતપુરુષના લક્ષણો** :- સત્શાસ્ત્ર પ્રતિપાદિત સાધનોથી જેમણે કામ-ક્રોધ-લોભ અને ઈન્દ્રિયો જીત્યાં છે એવા, મત્સરે રહિત, માન રહિત, સ્વાદે રહિત, સ્પૃહાએ રહિત, મમતાએ રહિત, અહંકારે રહિત, અહિંસા પરાયણ, બ્રહ્મચર્ય વ્રતધારી, સત્યવાણીવાળા, દયાળુ, (૩૯-૪૦) પરમાત્મામાં અખંડ પ્રીતિવાળા, વિષયોમાં વૈરાગ્યવાળા, બ્રહ્મરૂપથી ભાવના કરાયેલા પોતાના આત્માથી સાક્ષાત્પરમાત્માની ઉપાસનામાં આસક્ત; (૪૧) એ આદિ કહેલા લક્ષણોથી યુકત જે હોય તેમને સાધુઓ જાણવા અને તેવા લક્ષણવાળા સાધુઓનો સમાગમ કરવો, અને તેમનાં વચનો હૃદયમાં ધારવાં. (૪૨)

પ્રાણીઓના સર્વ પ્રકારે હિતકારી સાધુઓ જ છે. માટે પરમાત્મામાં ચિત્તવાળા સાધુઓનો વિશ્વાસ કરવો. (૪૩) **સાધુઓ શ્રીકૃષ્ણ ભગવાનનું હૃદય છે** અર્થાત્ ભગવાનને પોતાના હૃદય સમાન પ્રિય છે માટે તેમનો સત્કાર કરવો-પૂજવા-જમાડવા-યથાયોગ્ય સેવવા. તેમનાથી બીજું અધિક છે જ નહિ. (૪૪)

હે રાજન્ ! આ પ્રકારે શ્રીનારાયણમુનિએ કહેલી સર્વ જનોને હિત કરનારી વાણી સાંભળીને સભામાં આવેલા ભક્તો મસ્તકથી ધારણ કરતા હતા. પછી પરમેશ્વર શ્રીહરિએ સર્વ ભક્તોને પોતપોતાના નગરમાં જવા આજ્ઞા આપી. તે સમયે અભયરાજા ઊભા થઈ શ્રીહરિને (આગળ કહેશે તે પ્રમાણે) કહેવા લાગ્યા. (૪૫) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે દુર્ગપુરે પુષ્પદોલોત્સવે સત્સંગપ્રશંસનનામા ત્રિંશોઽધ્યાયઃ (૩૦)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

अभय उवाच-साधूनेतान्वर्णिनश्च चातुर्मास्यावधि प्रभो ! । इहैव रक्ष शुश्रूषां कर्तास्म्येषां स्वशक्तितः ॥१॥ मुनिमण्डलमध्यस्थं त्वां दिदृक्षामि नित्यदा । अतः सहैव मुनिभिस्त्वमत्र स्थातुमर्हसि ॥२॥ तवैवानन्यभक्तोऽस्मि त्वं चासि भक्तवत्सलः । अतो मत्प्रार्थितं ह्येतत्कृपया दातुमर्हसि ॥३॥ सुव्रत उवाच-एवं सम्प्रार्थितो राज्ञा तेनासौ शुद्धभावतः। भावगम्यः प्रशंसंस्तं प्रोवाच मधुरं वचः ॥४॥ श्रीभगवानुवाच- राजंस्त्वदाशयं शुद्धं यथावद्वेद्मि धार्मिक ! । मनोरथोऽयं सफलो भविष्यति तव ध्रुवम् ॥५॥ स्थास्याम्यत्रर्षिभिः साकमूर्जैकादशिकावधि । इत्युक्त्वा तं ततो भक्तान्सर्वान्प्रति जगाद सः ॥६॥ ऋषिवर्जं स्वस्वदेशान् यान्तु सर्वे जनाः प्रगे । वसन्तु स्वस्थमेवात्र मुनयो नृपमन्दिरे ॥७॥ इत्युक्त्वा प्रशशंसास्य राज्ञो भक्तिं च भूयसीम् । धर्मस्थितिं च वैराग्यं श्रद्धां ज्ञानं सदादरम् ॥८॥ राज्ञः पुत्रस्य पुत्रीणां भार्ययोश्चात्मनि स्थिराम् । भक्तिं च धर्मस्थित्यादीन् गुणान् हरिरवर्णयत् ॥९॥ ततः सहर्षिभिरसौ तत्रोवास सुखं पुरे । देशान्तरागता भक्ताः स्वं स्वं स्थानं ययुर्नृप ! ॥१०॥ सखिभावं भगवति सम्प्राप्ता मुनयोऽखिलाः । तद्वीक्षणादिनाऽऽनन्दं प्रत्यहं लेभिरेऽधिकम् ॥११॥ जयाललितयोर्भक्तिस्तस्मिन्सर्वातिशायिनी । आसीदनन्यमनसोः सर्वदा शुद्धभावयोः ॥१२॥ सपुत्रो नृपतिर्नित्यं दिवा निशि च सादरम् । प्रीत्याऽनुवर्तमानस्तं सिषेवे समुनिं हरिम् ॥१३॥

---

## અધ્યાય : ૩૧

**અભયાદિનાં ભક્તિ વગેરે ગુણોની પ્રશંસા અને રાજાએ આશ્ચર્યપૂર્વક શ્રીહરિની સ્તુતિ કરી તે કહી છે.**

**અભયરાજા બોલ્યા :** હે પ્રભો ! આ સાધુઓ અને બ્રહ્મચારીઓને ચાર માસ સુધી મારા પુરમાં જ નિવાસ કરાવો. એમની મારી શક્તિ પ્રમાણે હું સેવા કરીશ. (૧) હે હરે ! મુનિમંડળના મધ્યમાં સિંહાસન ઉપર બેઠેલા તમોને પ્રતિદિન જોવા ઈચ્છું છું. માટે તમો મુનિઓની સાથે જ અહીંયાં નિવાસ કરવા યોગ્ય છો. (૨) હું તમારો અનન્ય દાસ છું. અને તમો ભક્તવત્સલ છો. માટે મેં પ્રાર્થના કરેલું દયા કરી આપવા યોગ્ય છો. (૩)

**સુવ્રતમુનિ કહે છે :** હે રાજન્, આ પ્રકારે તેમણે શુદ્ધ ભાવથી પ્રાર્થના કરાયેલા ભાવગમ્ય શ્રીહરિ અભયનૃપતિની પ્રશંસા કરતાં અમૃતની સમાન મધુર વચન બોલ્યા : (૪) **શ્રી ભગવાન કહે છે :** હે રાજન્ ! ધર્મનિષ્ઠ, શુદ્ધ તમારો અભિપ્રાય હું યથાર્થપણે જાણું છું. તમારો આ મનોરથ નિશ્ચે સંપૂર્ણ થશે. (૫) હે ભૂપતે ! હું મુનિઓ અને વર્ણિઓની સાથે જ કારતક સુદી ૧૧ એકાદશી સુધી તમારા ગૃહમાં નિવાસ કરીશ. **સુવ્રતમુનિ પ્રતાપસિંહ રાજાને કહે છે :** હે રાજન્, શ્રીહરિ આ પ્રમાણે અભયરાજાને કહીને પછી સમગ્ર ભક્તો પ્રત્યે બોલ્યા : (૬) હે ભક્તો ! મુનિઓ સિવાયના તમો સર્વ ભક્તજનો કાલે પ્રાતઃકાળે પોતપોતાના દેશમાં જાઓ. સાધુ-બ્રહ્મચારીઓ તો અભયરાજાના ગૃહમાં જ સ્વસ્થતાપૂર્વક નિવાસ કરો. (૭)

હે રાજન્ ! આ પ્રમાણે કહીને અભયરાજાની ઘણી ભક્તિ-ધર્મમાં સ્થિતિ - વૈરાગ્ય - શ્રદ્ધા - આત્મા પરમાત્માનું જ્ઞાન સાધુજનોની સેવા કરવામાં અતિશય આદર વગેરે ગુણોની શ્રી નારાયણમુનિ પ્રશંસા કરતા હતા. (૮) તેમજ અભયનૃપતિનાં પુત્ર-પુત્રીઓ તથા સ્ત્રીઓ, તેમની પોતામાં અચળ ભક્તિ અને ધર્મમાં સ્થિતિ વગેરે ગુણોનું શ્રીહરિ વર્ણન કરતા હતા. (૯) હે રાજન્, પછી શ્રીહરિ સાધુઓ અને વર્ણિઓ સાથે દુર્ગપત્તનમાં સુખપૂર્વક નિવાસ કરતા હતા. દેશાંતરથી આવેલા ભક્તો પોતપોતાના ગામમાં ગયા. (૧૦)

શ્રી સહજાનંદ સ્વામીમાં મિત્રભાવને પામેલા, તેમજ દુર્વાસાના અનુગ્રહથી ભેગા થયેલા સમગ્ર મુનિઓ પ્રતિદિન શ્રીહરિનાં દર્શન-સ્પર્શ-સંભાષણ વગેરેથી ઉત્તરોત્તર અધિક આનંદ પામતા હતા. (૧૧) શ્રીહરિમાં જ એકાગ્ર મનવાળાં સર્વદા વિશુદ્ધ ભાવવાળાં જયા અને લલિતાની શ્રીહરિમાં સર્વને ઉલ્લંઘન કરનારી ભક્તિ હતી. (૧૨) પુત્ર-પુત્રી આદિ સહિત અભયરાજા રાત્રિ-દિવસ આદરપૂર્વક સ્નેહથી અનુવર્તન કરતા થકા મુનિમંડળે સહિત પોતાના ઘરમાં રહેલા શ્રીહરિની હંમેશાં સેવા કરતા હતા. (૧૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

मधुशुक्लनवम्यां तं तज्जन्मदिनविन्नृपः । पुपूज परमप्रेम्णा निजसम्बन्धिभिः सह ॥१४॥ नूत्नैरनर्घ्यैर्वसनैर्नानाविधविभूषणैः। वरकेसरमिश्रेण चन्दनेन सुगन्धिना ॥१५॥ शेखरैरवतंसैश्च पोष्पैर्हारैः सुगन्धिभिः । पुपूज हेममुद्राभिर्महानीराजनेन च ॥१६॥ ततः प्रणम्य साष्टाङ्गं बद्धाञ्जलिपुटः प्रभुम् । तस्थौ निरीक्षमाणोऽसौ तथा तस्य सुतादयः ॥१७॥ ऋषिमण्डलमध्यस्थं वर्णिवेषधरं हरिम् । पश्यंस्तं सहसा ज्योतिर्दिशो व्याप्नुवदैक्षत ॥१८॥ ब्रह्मसंज्ञे तत्र धाम्नि दिव्ये वृन्दावने वने । रासमण्डलमध्ये तं क्रीडन्तं कृष्णमैक्षत ॥१९॥ निनादयन्तं मुरलीं किशोरं श्यामसुन्दरम् । मयूरबर्हमुकुटं राधावक्त्रेन्दुलोचनम् ॥२०॥ शृङ्गारिकद्रव्यकरैर्गोपीवृन्दैश्च सर्वतः । कटाक्षैर्वीक्षमाणास्यं कोटिमन्मथमोहनम् ॥२१॥ ससम्भ्रमं तमालोक्य प्रणनाम स सान्वयः । ततोऽपश्यद्यथापूर्वं वर्णीन्द्रं मुनिसंसदि ॥२२॥ संपूर्णसर्वकामोऽथ सबन्धुर्नृपसत्तमः । पुनर्नत्वा प्राञ्जलिस्तं तुष्टाव प्राप्तमुद्धरः ॥२३॥ अभय उवाच–सिताम्बरं नैष्ठिकवर्णिवेषं पीताम्बरं तं नटवर्यवेषम् । नवाम्बुदश्यामलसुन्दराङ्गं वन्दे हरिं धर्मसुतं च कृष्णम् ॥२४॥ शान्तान्तरस्वाश्रितमण्डलस्थं शृङ्गारिगोपीगणमण्डलस्थम् । सरोजपत्राभविलोलनेत्रं वन्दे० ॥२५॥ वृन्देन्धनस्रग्धरपद्मपाणिं वृन्दावने सुस्वरवेणुपाणिम् । विचित्रपुष्पोत्तमचारुहारं वन्दे० ॥२६॥ समाधिविस्मापितसर्वलोकं रासक्रियाचित्रितदेवलोकम् । कन्दर्पदर्पोत्खननातिदक्षं

---

શ્રીહરિકૃષ્ણ ભગવાનનો જન્મદિવસ જાણતાં અભયરાજા પોતાના સંબંધીઓ સાથે પરમ પ્રેમથી સંવત્ ૧૮૬૧ના ચૈત્ર સુદી નવમી તિથિમાં શ્રીહરિનું પૂજન કરતા હતા. (૧૪) નવીન ઘણાં મૂલ્યવાળાં વસ્ત્રો-નાના પ્રકારનાં આભૂષણો- શ્રેષ્ઠ કુમકુમ અને કેસરથી મિશ્ર સુગંધીમાન ચંદન અને પુષ્પોના હારો તથા તોરાઓ - કલગીઓ - સુવર્ણ મુદ્રાઓ અને મહાઆરતી વગેરેથી પૂજતા હતા. (૧૫-૧૬) ત્યાર પછી અભયરાજા શ્રીહરિને સાષ્ટાંગ પ્રણામ કરી બંને હાથ જોડી શ્રીહરિને જોતા સતા ઊભા રહ્યા. તે પ્રકારે અભયરાજાના પુત્રાદિ પણ ઊભા રહ્યા. (૧૭)

મુનિમંડળના મધ્યમાં સિંહાસન ઉપર બેઠેલા વર્ણિવેશધારી પોતે પૂજેલા શ્રીહરિને જોતા સતા અભયરાજા દસ દિશાઓમાં વ્યાપતું તેજ એકદમ જોતા હતા. (૧૮) અક્ષરબ્રહ્મ નામના શ્રીહરિના સ્થાનમાં અભયરાજા આ શ્રીહરિને જ પૃથ્વીમાં રહેલા દિવ્ય વૃંદાવનમાં રાસમંડળના મધ્યમાં રહેલા શ્રીકૃષ્ણરૂપે જોતા હતા. (૧૯)

મોરલી વગાડતા - કિશોર અવસ્થાવાળા - શ્યામસુંદર, મયૂરના પીંછાંના મુગટવાળા - રાધાના મુખચંદ્રમામાં નેત્રોવાળા- શૃંગારનાં સાધનો જે પુષ્પના હારો, તામ્બૂલ, ચંદનાદિનાં પાત્રો હાથમાં જેમને છે એવા ગોપીઓનાં મંડળોએ કટાક્ષોથી ચોતરફ જોવાયું છે મુખકમળ જેમનું એવા-કોટાનકોટિ કામદેવોને મોહ પમાડનાર શ્રીકૃષ્ણરૂપે જોયા. (૨૦-૨૧) પરિવારે સહિત અભયરાજા શ્રીકૃષ્ણરૂપે દેખાતા શ્રીહરિને આદરપૂર્વક નમસ્કાર કરતા હતા. પછી પૂર્વની માફક મુનિની સભામાં રહેલા વર્ણિવેશવાળા શ્રીહરિને જોવા લાગ્યા. (૨૨)

પછી પૂર્ણપણાને પામ્યા છે મનોરથ જેમના એવા પરિવારે સહિત અભયરાજા ફરીથી નમસ્કાર કરી, પ્રાપ્ત થયો છે હર્ષ જેમને એવા સતા બંને હાથ જોડી શ્રીહરિની સ્તુતિ કરવા લાગ્યા. (૨૩)

**અભયરાજા સ્તુતિ કરે છે :** હે શ્વેત વસ્ત્ર ધારણ કરનારા- નૈષ્ઠિક બ્રહ્મચારીના વેષવાળા - પીતાંબરધારી - ઉત્તમ નટના સમાન વેષધારી - નવીન મેઘસમાન અતિ સ્નેહ યુક્ત મયૂરના પીંછ સમાન લાવણ્યયુક્ત શ્યામસુંદર અંગવાળા- સમાધિમાં જોયેલા શ્રીકૃષ્ણરૂપે જણાતા ધર્મપુત્ર શ્રીહરિ તમોને હું પ્રણામ કરું છું. (અહીંથી આરંભીને આઠ શ્લોકોમાં પ્રથમ ચરણથી શ્રીહરિકૃષ્ણનું વર્ણન છે. બીજા ચરણથી સમાધિમાં જોયેલા શ્રીહરિએ બતાવેલું શ્રીકૃષ્ણ સ્વરૂપનું વર્ણન અને ત્રીજા ચરણથી બંનેમાં રહેલા સમાન ધર્મના વિશેષપણે વર્ણન છે. ચોથા ચરણમાં બંનેના નામપૂર્વક પ્રણામ કર્યા છે એવો વિવેક જાણવો.) (૨૪) શાંત છે અંતઃશત્રુઓ જેમને એવા સ્વાશ્રિતમુનિઓના મંડળમાં બેઠેલા - શૃંગાર રસવાળા ગોપાંગનાઓના સમૂહોના મંડળોમાં રહેલા-કમળપત્ર સમાન શોભાયમાન-ચંચળ નેત્રોવાળા; (૨૫) તુલસીના કાષ્ટની જે જપમાલા તેને ધારણ કરનાર કમળ સમાન હાથવાળા - વૃંદાવનમાં સુંદર ધ્વનિવાળી વાંસળી બંને હાથમાં જેમને છે એવા - નાના પ્રકારનાં ઉત્તમ પુષ્પોના સુંદર હારો જેમને છે; (૨૬) પોતાના દર્શન માત્રથી સમાધિ કરાવવાથી અતિ આશ્ચર્યચકિત કર્યા છે સર્વ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**वन्दे० ॥२७॥ स्वभक्तसत्सद्मविराजमानं वृन्दावनाक्रीडसुशोभमानम्। स्वानां हरन्तं हृदयानि दृष्ट्या वन्दे० ॥२८॥ शिरःपटापीडनिजात्मलाभं मयूरपत्रालिकिरीटशोभम् । पद्मादिलक्ष्माङ्कितपादयुग्मं वन्दे० ॥२९॥ स्वदत्तभूषाः सहसा ददानं स्वाङ्गेषु भूषा विविधा दधानम् । सकालमायाभयदाभिधानं वन्दे० ॥३०॥ भक्तान्तरारिक्षपणप्रतापं गोगोपगोपीरिपुदैत्यतापम् । पादानमत्स्वीयजनैकबन्धुं वन्दे० ॥३१॥** सुव्रत उवाच-**इति स्तुत्वा हरिं भक्त्या प्रणम्य स नृपोत्तमः । प्रसन्नस्याज्ञया तस्य निषसाद तदन्तिके ॥३२॥ नष्टसंशयजालोऽसौ पूर्णाखिलमनोरथः । प्रीत्या नित्यं सिषेवे तं तथोत्तमजयादयः ॥३३॥ भगवानपि तं राजन् ! प्रीणयन्सात्मजं सदा । धर्ममैकान्तिकं सम्यग्बोधयन्न्यवसत्सुखम् ॥३४॥ वसंस्तत्र नभोमासे जन्माष्टम्यां महोत्सवम् । चकार पूर्ववत्स्वामी प्रत्येकादशि चोत्सवम् ॥३५॥ मुनिभिः सह दुर्गपत्तने वसतस्तस्य तु भक्ततुष्टये । विमलोडुगणेन्दुमण्डला समियाय क्षितिपेषपूर्णिमा ॥३६॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे अभयराजकृतश्रीनारायणस्तुतिर्नामैकत्रिंशोऽध्यायः ॥३१॥

सुव्रत उवाच-**पूर्णचन्द्रोदये रात्रौ तस्यां नारायणो नृप ! । संस्नाय चन्द्रशालायां सिंहासनमतिष्ठिपत् ॥१॥ तस्मिञ्छ्री-कृष्णमास्थाप्य पुपूज स यथाविधि । नवान्नपृथुकान् दुग्धशर्करादि न्यवेदयत् ॥२॥**

---

જનો જેમણે-ગોપીઓની સાથે રાસક્રિયા કરવાથી વિસ્મય પમાડ્યા છે દેવલોક જેમણે - કામદેવનો ગર્વ ઉખેડી નાખવામાં અતિ ચતુર; (૨૭) પોતાના ભક્તોનાં સુંદર ગૃહોમાં વિરાજમાન - વૃંદાવનમાં જે ક્રીડાસ્થાનોમાં અત્યંત શોભતા-પોતાના ભક્તજનોનાં હૃદયોને દૃષ્ટિથી પોતાની મૂર્તિમાં આકર્ષણ કરતા; (૨૮) મસ્તકના મોળિયામાં જે સુગંધીમાન તોરાઓથી પોતાના ભક્તજનોના મનને લોભાવનાર, મયૂરના પીંછાંની પંક્તિઓ જેમાં છે એવા મુગટથી શોભાવાળા, કમળ વગેરે જેમાં છે એવાં રેખારૂપ ચિહ્નોથી અંક્તિ ચરણકમળની જોડવાળા; (૨૯) પોતાના ભક્તજનોએ પૂજન કરીને અર્પણ કરેલાં ભૂષણોને તત્કાળ બ્રાહ્મણોને આપનારા, પોતાનાં અંગોમાં વિવિધ પ્રકારનાં ભૂષણો ધારણ કરનારા, કાળે સહિત માયાના ભયને ખંડન કરનાર છે નામ જેમનું; (૩૦) ભક્તોના અંતઃશત્રુઓને નાશ કરનાર છે પ્રતાપ જેમનો, ગાયો - ગોપો અને ગોપીઓના શત્રુઓ જે દૈત્યો તેને વિનાશ કરનારા, પોતાના ચરણકમળમાં સાષ્ટાંગ નમસ્કાર કરતા પોતાના જનોના એક હિતકારી શ્રીકૃષ્ણરૂપે જણાતા ધર્મપુત્ર શ્રીહરિને હું પ્રણામ કરું છું. (૩૧)

**સુવ્રત મુનિ બોલ્યા** :- હે રાજન્ ! શ્રેષ્ઠ ભૂપતિ અભયરાજા આ પ્રકારે શ્રીહરિની સ્તુતિ કરી, સ્નેહથી નમસ્કાર કરી પ્રસન્ન થયેલા શ્રીહરિની આજ્ઞાથી શ્રીહરિની સમીપમાં બેઠા. (૩૨) નાશ પામ્યો છે પોતાના હૃદયમાંથી સંશય સમુદાય જેને, પૂર્ણ થયા છે મનોરથ જેના એવા અભય રાજા પ્રીતિથી શ્રીહરિની દરરોજ સેવા કરતા હતા. (૩૩)

હે રાજન્ ! ભગવાન પણ, પુત્રાદિ સહિત અભય રાજાને પ્રસન્ન કરતા, હંમેશાં એકાંતિક ધર્મનો સારો બોધ આપતા સુખપૂર્વક નિવાસ કરતા હતા. (૩૪) શ્રી નારાયણ મુનિએ ત્યાં નિવાસ કરતા, શ્રાવણ માસમાં સંવત્ ૧૮૬૨ના શ્રાવણ વદી અષ્ટમી તિથિમાં શ્રીકૃષ્ણના જન્મનો મહોત્સવ પહેલાં માણાવદર-માંગરોલ-શરધારમાં જેમ કર્યા હતા તેવો કર્યો અને દરેક એકાદશીના ઉત્સવો કરતા હતા. (૩૫)

હે પ્રતાપસિંહ રાજન્ ! અભયાદિ ભક્તોની પ્રસન્નતા માટે મુનિઓએ સહિત ગઢપુરમાં શ્રીહરિને નિવાસ કરતા સતા નિર્મલ નક્ષત્ર ગણો તથા ચંદ્રમંડળ જેમાં છે એવી આસો સુદી પૂર્ણિમા આવી. (૩૬) *ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે અભયરાજકૃત શ્રીનારાયણસ્તુતિ નામૈકત્રિંશોऽધ્યાયઃ (૩૧)*

## અધ્યાય : ૩૨

**મુનિઓને તેમના પૂર્વરૂપનું જ્ઞાન અને શ્રીહરિની દુર્ગપત્તનમાં નિવાસની પ્રતિજ્ઞા કહેલી છે.**

**સુવ્રત મુનિ બોલ્યા** : હે નૃપ ! શ્રી સ્વામિનારાયણ ભગવાને આસો સુદી પૂર્ણિમાની રાત્રિમાં પૂર્ણ ચંદ્રોદય થયો ત્યારે સ્નાન કરી ચંદ્રશાળામાં (અગાશીમાં) સિંહાસન, પોતાના ભક્તજનો પાસે મુકાવ્યું. (૧) શ્રી નારાયણમુનિ સિંહાસનમાં બાલકૃષ્ણની મૂર્તિની સ્થાપના કરી શાસ્ત્રવિધિ પ્રમાણે પૂજન કરતા હતા. દૂધ-સાકરથી મિશ્રિત નવીન પૌંઆ નિવેદન કરતા હતા. (૨)

महानीराजनं कृत्वा गीतवाद्यादिभिः सह । श्रीकृष्णरासलीलायाश्चारुपद्यान्यगापयत् ।।३।। वीणामृदङ्गतालाद्यैर्मुनीनां गायतां निशः । यामत्रयं व्यतीयाय कृष्णं सोऽस्वापयत्ततः ।।४।। तद्दर्शनार्थमायाता नरास्तर्हि सहस्रशः । स्त्रियश्च स्वस्वनिलयान् जग्मुर्नत्वा प्रभुं ततः ।।५।। सात्मजश्च ययौ राजा स्वावासं हर्यनुज्ञया । केवलं मुनयस्तस्थुरन्तिके धर्मजन्मनः ।।६।। तेभ्यः प्रसन्नो भगवांस्तत्प्राग्जन्मादिवेदनम् । दास्यंस्तान् कृपया प्राह स्वाननैकार्पितेक्षणान् ।।७।। भक्ता ! द्विजातयः सर्वे शृण्वन्तु मम भाषितम् । यूयं सर्वे हि मुनयो भवथाब्जभवोपमाः ।।८।। शापाद्दुर्वाससः ऋषेः प्राप्ता जन्म नृषु क्षितौ । रहस्यमिति जानीत यूयमात्मीयमात्मनि ।।९।। एवमुक्ता भगवता तेऽपि सद्यस्तदिच्छया । ददृशुः स्वं स्वमात्मानं दिव्यदृष्ट्या यथा पुरा ।।१०।। तपोयोगसमाधीनां सकलैश्वर्यसंयुतम् । स्वं स्वं दृष्ट्वा मरीच्यादिं महर्षिं लेभिरे मुदम् ।।११।। तं च नारायणमृषिं भगवन्तमवेत्य च । अतिप्रसन्ना मुनयो हरिमूचुः प्रणम्य ते ।।१२।। ईदृशं ज्ञानमस्माकं प्रसादात्तव सत्पते ! । सर्वदा स्यादिति वयं चेतसा कामयामहे ।।१३।। तानुवाच तदा स्वामी मुनयः ! श्रूयतामिदम् । भवद्भिरिष्यते यत्तत्सर्वदा न हिताय वः ।।१४।। घोरं कलियुगं ह्यद्य वर्तते तत्र मानवाः । प्रायशः पापिनः सन्ति श्रिताः सम्पदमासुरीम् ।।१५।। युष्मन्माहात्म्यमज्ञात्वा ते द्रुह्युर्यर्हि वस्तदा । युष्माभिस्तदशक्यं हि सोढुं स्वबलवेदिभिः ।।१६।। युष्माकं च यदा क्रोधो भवेत्स्वैश्वर्यशालिनाम् । क्षय आकस्मिको नूनं तदा स्यात्सर्वदेहिनाम् ।।१७।।

શ્રીહરિ ગાયન-વાદ્યોના ધ્વનિઓ સાથે શ્રીકૃષ્ણનું મહાનીરાજન કરી, શ્રીકૃષ્ણે ગોપીઓ સાથે કરેલી જે રાસલીલાનાં સુંદર પદો તેનું ગાયનકળામાં પ્રવીણ પ્રેમાનંદ, મુક્તાનંદ વગેરે મુનિઓની પાસે ગાન કરાવતા હતા. (૩) વીણા-મૃદંગ-તાલ આદિથી રાસલીલાનાં પદોનું ગાન કરતા સંતોને રાત્રિના ત્રણ પહોર ચાલી ગયા. પછી શ્રીહરિએ શ્રી બાલકૃષ્ણને પોઢાડ્યા. (૪)

તે સમયે શ્રીકૃષ્ણ અને શ્રીહરિકૃષ્ણનાં દર્શન માટે આવેલાં હજારો પુરુષો અને સ્ત્રીઓ, શ્રી બાલકૃષ્ણને પોઢાડ્યા પછી શ્રીહરિકૃષ્ણ ભગવાનને નમસ્કાર કરી પોતપોતાના સ્થાનમાં ગયાં. (૫)

પુત્રે સહિત અભયરાજા પણ શ્રીહરિની આજ્ઞાથી પોતાના સ્થાનમાં ગયા. ધર્મનંદન શ્રીહરિના સમીપમાં કેવળ સાધુઓ બેઠા હતા. (૬) મુનિજનોની ભક્તિથી પ્રસન્ન થયેલા શ્રીહરિ તે મુનિઓને તેમના પૂર્વજન્મ અને ઐશ્વર્યાદિનું જ્ઞાન આપતા, પોતાના મુખકમળમાં અર્પણ કરેલી છે નેત્રોની વૃત્તિઓ જેમણે તેવા મુનિઓને કૃપાથી કહેવા લાગ્યા : (૭) હે ભક્તો ! બ્રાહ્મણાદિ ત્રણ વર્ણમાં ઉત્પન્ન થયેલા સર્વે તમો મારું વચન સાંભળો. તમો સર્વે બ્રહ્માની ઉપમા જેમને છે એવા મરીચ્યાદિ ઋષિઓ છો એમ જાણો. (૮) દુર્વાસા મુનિના શાપથી પૃથ્વીમાં ત્રણ વર્ણના મનુષ્યોમાં જન્મ પામેલા છો. આ પોતાનું ગુપ્ત વૃત્તાંત તમો સર્વ પોતાના મનમાં જાણો. (૯)

હે રાજન્ ! શ્રીહરિએ કહેલા મુનિઓ પણ પરમાત્માના સંકલ્પથી તત્કાળ જ પ્રાપ્ત થયેલી અલૌકિક દિવ્ય દૃષ્ટિથી પૂર્વજન્મની માફક વર્તમાન પોતાના આત્માનું સ્વરૂપ જોતા હતા. (૧૦) તપશ્ચર્યા તથા સબીજ સાંખ્યયોગનો અભ્યાસ તથા અષ્ટાંગયોગનાં અભ્યાસથી પરમાત્માની ઉપાસના સંબંધી જે સમગ્ર ઐશ્વર્ય તેણે યુક્ત પોતપોતાના મરીચ્યાદિ મહર્ષિરૂપ જોઈ મહાઆનંદ પામ્યા. (૧૧)

તેમજ સકલ ઐશ્વર્યસંપન્ન શ્રીહરિને નારાયણ ઋષિ સ્વરૂપથી પ્રાદુર્ભાવ પામેલા જાણી અત્યંત પ્રસન્ન થયેલા મુનિઓ શ્રીહરિને પ્રણામ કરી કહેવા લાગ્યા : (૧૨) હે સત્પતે ! તમારા અનુગ્રહથી અમોને આવું અમારા સ્વરૂપનું યથાર્થ જ્ઞાન સર્વદા થાય. આ પ્રમાણે અમો મનથી ઈચ્છીએ છીએ. (૧૩)

હે રાજન્ ! તે સમયે શ્રીહરિ તે મુનિઓને કહેવા લાગ્યા : હે મુનિઓ, આ મારું વચન સાંભળો. તમોએ જે જ્ઞાન સર્વકાળે ઈચ્છ્યું છે તે તમોને હિત માટે નથી. (૧૪) હે મુનિઓ ! આ ઘોર કળિયુગ વર્તે છે તેમાં મનુષ્યો આસુરી સંપત્તિને આશરેલા હોય છે. માટે બહુધા તો ઘણાં પાપવાળા હોય છે. (૧૫) તે પાપી મનુષ્યો તમારો મહિમા જાણ્યા વગર તમોને જ્યારે પીડા કરે ત્યારે પોતાના સામર્થ્યને જાણનારા તમો તે સહન કરવા માટે શક્તિમાન થાઓ નહિ. (૧૬) પોતાને વિષે ઐશ્વર્યયુક્ત એવા તમો સર્વેને જ્યારે ક્રોધ થાય ત્યારે સર્વ પ્રાણીઓનો એકદમ વિનાશ નિશ્ચે થાય. (૧૭)

सत्यप्यैकस्यापराधे तत्संसर्गाद्धि भूयसाम् । दुःखं स्यादिन्द्रदोषेण त्रैलोक्यस्य पुरा यथा ॥१८॥ तादृक्क्षये निमित्तं च यूयं स्यातापि साधवः । तपक्षयश्च युष्माकं भवेत्क्रोधोदयेन च ॥१९॥ तस्मात्स्वरूपविज्ञानं सर्वदा नोचितं हि वः । क्वचित्क्वचिद्ध्यानकाले तद्भविष्यति निश्चितम् ॥२०॥ इत्युक्तवति सर्वेशे ज्ञानं तेषां तु तन्नृप ! । आसीत्तिरोहितं सद्यस्तस्यैवेच्छावशात्प्रभोः ॥२१॥ तावदासीदुषःकालः स्वाम्यगान्नित्यकर्मणे । ययुरुन्मत्तगङ्गां ते स्नानाद्यर्थं द्विजा अपि ॥२२॥ एवं भगवता राजन्स्वभक्तानां हि सर्वथा । विधीयते हितं नित्यं पित्रार्भाणामिवादरात् ॥२३॥ क्षेमं विधातुं सर्वेषामथ भूमौ मुमुक्षताम् । मुनीन् प्रेषयितुं स्वामी मनसैच्छद्दयानिधिः ॥२४॥ देशान्तरेभ्यो भक्ताश्च तमुपेत्य पुनः पुनः । स्वस्वग्रामागमायैव प्रार्थयन्बहुधा नृप ! ॥२५॥ आगमिष्यामि वो ग्रामानिति सर्वेभ्य एव सः । प्रतिजज्ञे भाववशाद्धर्मस्थापन उद्यतः ॥२६॥ किन्तु राज्ञे प्रतिज्ञातं स्वेन यत्तत्स पालयन् । चातुर्मासीसमाप्त्यन्तं तत्रैवोवास सद्विजः ॥२७॥ एकादश्यां प्रबोधिन्यां तत्र कृत्वा महोत्सवम् । सदःस्थोऽथाभयं भूपं स प्रोचे भक्तिनन्दनः ॥२८॥ चातुर्मास्यावधि मया मुनयः प्रीतये तव । रक्षिता इह सर्वेऽपि सम्राजोऽप्यतिदुर्लभाः ॥२९॥ अधुना प्रेषयाम्येतान् भूमौ विचरितुं नृप ! । मुमुक्षूणां हितायैव यत्सन्तो भवतारकाः ॥३०॥ देशान्तरीया भक्ताश्च प्रतीक्षन्ते ममागमम् । ततोऽहमपि यास्यामि सौवीरानधुनाऽनघ! ॥३१॥ त्वं तु साकं निजजनैः कृष्णस्यैव निरन्तरम् । भक्तिं कुर्या अहिंसादीन् यमान्सम्परिपालयन् ॥३२॥ सुव्रत उवाच-एतच्छ्रुत्वा हरेर्वाक्यं नृपश्चास्य सुतादयः । रुदन्तः प्रार्थयामासुस्तं प्रणम्य मुहुर्मुहुः ॥३३॥ त्वत्प्राणानत्र नो

એકના અપરાધથી તેના સંબંધથી ઘણાં નિરપરાધીઓને પણ તમારા શાપજન્ય મહાદુઃખ થાય. જેમ પૂર્વે ઈન્દ્રના અપરાધથી ત્રિલોકીના જનોને દુઃખ થયું હતું. (૧૮) હે મુનિઓ ! તમો તેવા ક્ષયમાં હેતુભૂત થાઓ. વળી તમોને ક્રોધની ઉત્પત્તિથી તમારા સર્વના તપનો ક્ષય થાય. (૧૯) માટે તમોને સર્વદા સમગ્ર ઐશ્વર્ય સહિત પોતાના સ્વરૂપનું જ્ઞાન યોગ્ય નથી. ક્યારેક ક્યારેક મારા સ્વરૂપના ચિંતન સમયમાં પૂર્વજન્મનું જ્ઞાન થશે જ. (૨૦)

હે નૃપ ! આ પ્રમાણે શ્રીહરિ કહે છે ત્યારે મુનિઓનું જ્ઞાન શ્રીહરિની ઈચ્છાથી જ તત્કાળ ઢંકાઈ ગયું. (૨૧) તે સમયે જ પ્રભાત-સમય થયો તેથી શ્રીહરિ નિત્ય સ્નાનાદિ કરવા પોતાના નિવાસસ્થાનમાં ગયા. મુનિઓ પણ સ્નાનાદિ ક્રિયા કરવા માટે ઉન્મત્ત ગંગામાં ગયા. (૨૨) હે રાજન્ ! આવી રીતે શ્રીહરિ પિતા બાળકનું જેમ તેમ પોતાના ભક્તોનું સર્વ પ્રકારે હિત આદરપૂર્વક સર્વદા કરે છે. (૨૩)

પછી દયાસાગર શ્રીહરિ પૃથ્વીમાં સમગ્ર મુમક્ષુજનોનું કલ્યાણ કરવા મુનિઓને મોકલવા માટે મનથી ઈચ્છા કરતા હતા. (૨૪) હે નૃપ ! પોતાના ભક્તજનો દેશાંતરથી આવીને પોતપોતાના ગામમાં શ્રીહરિને લઈ જવા માટે શ્રીહરિની વારંવાર ઘણા પ્રકારે પ્રાર્થના કરતા હતા. (૨૫) પૃથ્વીમાં સર્વ ઠેકાણે જઈ ધર્મ સ્થાપન કરવામાં પ્રવૃત્તિવાળા શ્રીહરિએ 'તમારાં ગામોમાં આવીશ' : આ પ્રકારે સમગ્ર જનોને તેમની પોતાનામાં પ્રીતિના અતિશયપણાથી પ્રતિજ્ઞા કરી. (૨૬) પરંતુ પોતે અભય રાજાને જે પ્રતિજ્ઞા કહી હતી તેનું પાલન કરતા શ્રીહરિ મુનિમંડળે સહિત ચાર માસ સુધી અભય રાજાના દરબારગઢમાં જ રહ્યા. (૨૭)

ભક્તિનંદન શ્રીહરિ અભય રાજાના દુર્ગમાં પ્રબોધિની કારતક સુદી એકાદશીની તિથિએ મહોત્સવ કરી પછી સભા મધ્યે સિંહાસનમાં બેસીને અભય રાજાને કહેવા લાગ્યા : (૨૮) હે રાજન્ ! ચક્રવર્તી રાજાને પણ અતિ દુર્લભ એવા સર્વે મુનિઓ પણ તમારી પ્રસન્નતા માટે ચાતુર્માસની અવધિપર્યન્ત મેં આ તમારા પુરમાં રાખ્યા. (૨૯) હે રાજન્ ! હાલમાં પૃથ્વીમાં મુમુક્ષુજનોના કલ્યાણરૂપ હિત કરવા માટે આ મુનિઓને ફરવાની આજ્ઞા આપું છું. કારણ કે સંતો જનોનો સંસારસાગરથી ઉદ્ધાર કરનારા છે. (૩૦)

હે નિષ્પાપ ! દેશાંતરના ભક્તજનો મારા આવવાની રાહ જુએ છે. માટે હું પણ હાલમાં જ સૌવીરદેશમાં જઈશ. (૩૧) તમે તો બંધુજનોની સાથે અહિંસાદિ યમો પરિપાલન કરતાં શ્રીકૃષ્ણની નવધા ભક્તિ નિરંતર કરો. (૩૨) **સુવ્રતમુનિ કહે છે** : હે રાજન્! શ્રીહરિનું આવું વચન સાંભળી અભયરાજા અને રાજાના પુત્ર વગેરે રુદન કરતા સતા વારંવાર શ્રીહરિને નમસ્કાર કરી પ્રાર્થના કરવા લાગ્યા : (૩૩) હે કરુણાસાગર ! તમો જેના પ્રાણ છો એવાં અમોને અહીંયાં



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**हित्वा क्व यासि करुणाम्बुधे ! । गते त्वयि शरीरेषु न स्थास्यन्त्यसवो हि नः ॥३४॥ गन्तव्यं चेदवश्यं ते तर्ह्यस्मानात्मना सह । नेतुमर्हसि नाथ ! त्वं सौवीरानत्र वा वस ॥३५॥ सोढुं शक्ता वयं नैव विरहं तव सत्पते ! । साकमेवागमिष्यामस्त्वयातो नात्र संशयः ॥३६॥ राज्यस्य चिन्ता नास्त्येव तत्तु ते यत्समर्पितम् । ब्रह्माण्डपोषकस्त्वं हि सर्वत्रान्नं तु दास्यसि ॥३७॥ इति निष्कपटं वाक्यं सान्वयस्य नरेशितुः । निशम्य तद्भक्तिवशः प्रीतः प्रोवाच स प्रभुः ॥३८॥ त्यज चिन्तां धराधीश ! त्वयाहं हि वशीकृतः । तवैकान्तिकधर्मेण प्रसन्नोऽस्मीति विद्धि भो ! ॥३९॥ वत्स्याम्यत्रैव नियतमहं नास्त्यत्र संशयः । भक्तानां तुष्टयेऽन्यत्र गत्वैष्यामि पुनःपुनः ॥४०॥ राज्यं त्वेतत्त्वया राजन् ! पालनीयं मदाज्ञया । मदर्थमृषयोऽप्यत्र मुहुरेष्यन्ति सर्वतः ॥४१॥ तवत्पुत्रपुत्र्यादेर्भक्त्या चादम्भया भृशम् । वशीकृतस्य मे वाक्यं सत्यमेतन्नराधिप ! ॥४२॥** सुव्रत उवाच- **इति दत्तवरः स भक्तभर्त्रा नृपतिः सान्वय आप भूरि तोषम् । न्यवसद्धरिप्युदारकीर्तिर्निलये तस्य सुखं सुखप्रदाता ॥४३॥ विधिना क्षितिपस्य तस्य दुर्गे प्रभुरस्थापयदुत्तमालये सः । सह राधिकयैव वासुदेवं महमत्रापि महान्तमाततान ॥४४॥ राजा कर्तुं तस्य सेवां यथार्हं विष्णोर्भक्तं विप्रवर्यं सुशीलम् । दत्त्वा वृत्तिं रक्षति स्माथ राजंश्चक्रे सेवां सोऽपि तस्यानुकालम् ॥४५॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे दुर्गपत्तननिवासप्रतिज्ञाविधाननामा द्वात्रिंशोऽध्यायः ॥३२॥

---

ત્યાગ કરી ક્યાં જાઓ છો ? હે પ્રાણનાથ ! તમો ગયા પછી અમારાં શરીરોમાં પ્રાણો રહેશે નહિ. (૩૪) હે નાથ ! જો તમારે જવાનું નિશ્ચિત હોય તો અમો સર્વેને તમારી સાથે સૌવીર દેશમાં લઈ જવા માટે યોગ્ય છો અથવા (સાથે લઈ જવાની ઈચ્છા ન હોય તો) અહીંયાં જ રહો. (૩૫) હે સત્પતે ! અમો તમારો વિરહ સહન કરવા શક્તિમાન નથી. માટે તમારી સાથે જ આવીશું એમાં સંશય નથી. (૩૬)

હે ભગવન્ ! રાજ્યની ચિન્તા નથી. કારણ કે તે તમોને અર્પણ કરેલું છે. (તેમાં અમારે મમત્વના અભાવથી ચિન્તા નથી) અને દેહનિર્વાહ તો બ્રહ્માંડમાં રહેલાં જીવપ્રાણી માત્રના પોષણકર્તા તમો જ્યાં જ્યાં તમારી સાથે આવીશું ત્યાં ત્યાં અન્ન તો આપશો જ.(૩૭)

**સુવ્રતમુનિ કહે છે** : હે રાજન્ ! પરિવારે સહિત અભય રાજાનું આવું કપટ રહિત વચન સાંભળી પ્રસન્ન થયેલા શ્રીહરિ બોલ્યા : (૩૮) હે ધરાધીશ ! ચિન્તાનો ત્યાગ કરો, કારણ કે તમારા એકાંતિક ધર્મથી પ્રસન્ન થયેલો હું તમોએ વશ કરાયેલો છું. એમ તમો જાણો. (૩૯) હું આ દુર્ગપત્તનમાં નિવાસ કરીશ એમાં સંશય નથી. વળી દેશાંતરના ભક્ત જનોની પ્રસન્નતા માટે બીજે જઈને ફરી વારંવાર અહીંયાં જ આવીશ. (૪૦)

હે ભૂપતે ! આ રાજ્ય તો મારી આજ્ઞાથી તમારે જ પાલન કરવું. આ મુનિઓ પણ મારા દર્શન માટે સર્વ દેશાંતરોથી આ પુરમાં વારંવાર આવશે. (૪૧) હે નરાધિપ ! હું તમારા પુત્ર-પુત્રી વગેરેની દંભે રહિત ભક્તિથી અત્યંત સ્વાધીન કરાયેલો છું, તે આ મારું વચન સત્ય માનો. (૪૨) હે રાજન્ ! ભક્તપતિ શ્રીહરિએ આ પ્રમાણે જેમને વર આપ્યો છે એવા પરિવારે સહિત અભય રાજા ઘણો આનંદ પામ્યા. મહાયશસ્વી, પોતાના ભક્તોને મહાસુખ આપનારા શ્રીહરિ પણ અભય રાજાના સ્થાનમાં સુખપૂર્વક નિવાસ કરતા હતા. (૪૩)

શ્રીહરિએ અભય રાજાના દુર્ગમાં સર્વોત્તમ મંદિરમાં રાધિકાએ સહિત વાસુદેવની મૂર્તિની શાસ્ત્રોક્ત વિધિથી પ્રતિષ્ઠા કરી. પ્રતિષ્ઠાવિધિમાં મોટો ઉત્સવ પણ કર્યો. (૪૪)

હે રાજન્ ! પછી અભય રાજાએ શ્રી વાસુદેવની યથાયોગ્ય દરરોજ સેવા કરવા સારુ શ્રીહરિના ભક્ત, સારા સ્વભાવવાળા બેચર નામના શ્રેષ્ઠ બ્રાહ્મણને જીવિકાવૃત્તિ આપીને રાખ્યા. તે બ્રાહ્મણ પણ વાસુદેવ ભગવાનની પાંચ વખત સમય સમય પ્રમાણે સેવા કરતા હતા. (૪૫) *ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે દુર્ગપત્તનનિવાસપ્રતિજ્ઞાવિધાનનામા દ્વાત્રિંશોઽધ્યાયઃ (૩૨)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच - **नानादेशान् प्रेषयिष्यन् स्वज्ञानाय मुमुक्षताम् । शिक्षयामास स मुनीन् भूयस्त्वाद्भुवि दुर्धियाम् ॥१॥** श्रीभगवानुवाच - **मुनयो ! भुवि बोधाय नराणां यात यूथशः । चरतानेकदेशेषु कृष्णभक्तिप्रवर्तकाः ॥२॥ तत्र ये शरणं यायुर्युष्माकं तु मुमुक्षवः । उपदेश्या कृष्णभक्तिस्तेभ्यो बन्धविमोचनी ॥३॥ दृढं स्थितिः स्वस्वधर्मेऽथाहिंसाप्रमुखा यमाः । उपदेश्या मनुर्जप्यः श्रीकृष्णेति च नित्यदा ॥४॥ स्त्रीभ्यस्तदीयसम्बन्धिपुरुषेणायमेव च । उपदेशः कारणीयो मुनयः ! क्वापि न स्वयम् ॥५॥ युष्माभिस्त्विह योषाभ्यो राक्षसीभ्य इवार्भकैः । भेतव्यमष्टधा ताश्च वर्ज्याः स्पृश्या न कर्हिचित् ॥६॥ स्थित्वा स्वधर्मे कृष्णस्य भक्तिश्च श्रवणादिका । कर्तव्या कारणीया च पालनीया यमास्तथा ॥७॥ आसुर्या सम्पदा मत्ता दुर्जना भुवि भूरिशः । सद्द्रोहशीला वर्तन्ते दम्भभक्ताश्च केचन ॥८॥ तेषां तु विषया एव सन्ति प्रेष्ठा दुरात्मनाम् । न कृष्णो न स्वधर्मश्च नास्ति भीश्चाघकर्मणः ॥९॥ अस्ति तद्विपरीतैव क्रिया सर्वापि वोऽनघाः ! । तस्माद्द्रोहं करिष्यन्ति युष्माकं तेऽतिनिर्दयाः ॥१०॥ युष्मत्तादृक्क्रियामूलं ज्ञात्वा मां ते विशेषतः । द्रोक्ष्यन्ति मत्प्रतापस्य श्रुतेः प्रागाप्तमत्सराः ॥११॥ ईदृशैर्दुर्जनैः क्वापि कृतेऽपि व उपद्रवे । सहनं तस्य कर्तव्यं न तु क्रोधः कदाचन ॥१२॥ तत्प्रतीकारसामर्थ्ये सत्यपि स्वस्य सर्वथा । सहनं तस्य कर्तव्यं साधूनां लक्षणं हि तत् ॥१३॥ अन्योपरि कृते क्रोधे तपः सङ्क्षीयते निजम् । साधवोऽतः सहन्ते वै परैः कृतमुपद्रवम् ॥१४॥**

## અધ્યાય : 33

### મુનિઓને ક્રોધના નિયમનનો ઉપદેશ શ્રીહરિએ કર્યો અને નાના પ્રકારના દેશોમાં તેમને મોકલ્યા તે કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! મુમુક્ષુ જનોને પોતાના સ્વરૂપનું જ્ઞાન કરાવવા નાના દેશોમાં મોકલશે એવા શ્રીહરિ ભૂમિ ઉપર દુષ્ટ મતિવાળા ઘણા જનો હોવાથી મુનિઓને શિક્ષા આપતા હતા. (૧)

**સંતોને સદુપદેશઃ-** શ્રી ભગવાન બોલ્યા - હે મુનિઓ ! પૃથ્વીમાં મનુષ્યોના બોધ માટે તમો મંડળો બાંધીને જાઓ - પ્રત્યક્ષ શ્રીકૃષ્ણની ભક્તિ પ્રવર્તાવતા અનેક દેશોમાં વિચરણ કરો. (૨) તે દેશોમાં જે મુમુક્ષુ જનો તમારો આશ્રય કરે તેમને માયાના બંધનથી મુકાવનારી શ્રીકૃષ્ણ ભગવાનની ભક્તિનો ઉપદેશ કરવો. (૩) પોતપોતાના ધર્મમાં દઢ સ્થિતિ જે પ્રકારે થાય, અને અહિંસા મુખ્ય જેમાં છે એવા યમોનો ઉપદેશ આપવો. તથા હંમેશા જપ કરવા યોગ્ય **"શ્રીકૃષ્ણ"** આ મંત્રનો જપ કરવો એમ ઉપદેશ આપવો. (૪) હે મુનિઓ ! આ ઉપદેશ સ્ત્રીઓને તેનાં સંબંધી પુરુષ દ્વારા કરાવવો. ક્યારેય પણ પોતે ન કરવો. (૫) તમોએ તો બાળકોએ રાક્ષસીઓથી જેમ તેમ સ્ત્રીઓથી ભય પામવો. તે સ્ત્રીઓનો આઠ પ્રકારે દૂરથી જ ત્યાગ કરવો. ક્યારેય સ્પર્શ પણ કરવો નહિ. (૬) હે મુનિઓ ! પોતાનો જે ત્યાગીધર્મ તેમાં રહીને પ્રત્યક્ષ ભગવાનની ભક્તિ કરવી અને કરાવવી. તે પ્રકારે "અહિંસા, સત્ય, અસ્તેય, બ્રહ્મચર્ય, અપરિગ્રહ" આ યમોનું પાલન કરવું અને કરાવવું. (૭)

પૃથ્વીમાં આસુરી સંપત્તિવાળા મદોન્મત્ત, માટે જ સાધુ જનોનો દ્રોહ કરનારા ઘણા દુર્જનો છે. કેટલાક દંભી ભક્તો હોય છે. (૮) તે દુરાત્માઓને તો વિષયો અતિ પ્રિય હોય છે; શ્રીકૃષ્ણ ભગવાન પ્રિય હોતા નથી. અને સ્વધર્મ હંમેશાં પ્રિય હોતો નથી. અને પાપ કર્મોથી તેમને ભય હોતો નથી. (૯)

હે નિષ્પાપ મુનિઓ ! તમારી સમગ્ર ક્રિયાઓ પણ તેમનાથી વિપરીત જ હોય છે. માટે નિર્દય દુર્જનો તમારો દ્રોહ કરશે. (૧૦) મારો પ્રતાપ લોકના મુખથી સાંભળીને જેમને મત્સર થયો છે, તે દુર્જનો મને તેવી તમારી ક્રિયાના મૂળરૂપ જાણીને મારો પણ વિશેષ દ્રોહ કરશે. (૧૧)

**ક્ષમાનું મહત્ત્વ :-** આવા પ્રકારના દુર્જનોએ ક્યારેક તમારો દ્રોહ કર્યે સતે તે ઉપદ્રવનું સહન કરવું. ક્યારેય પણ ક્રોધ કરવો નહિ. (૧૨) પોતે ઉપદ્રવનો પ્રતિકાર કરવા શક્તિમાન હોય તોપણ ઉપદ્રવને સર્વ પ્રકારે સહન કરવો, કારણ કે શક્તિ હોવા છતાં સહન કરવું તે સાધુનું લક્ષણ છે. (૧૩) પોતાનો અપરાધ કરનાર ઉપર ક્રોધ કરે તો પોતાનું તપ નાશ પામે છે. માટે સાધુઓ દુર્જનોએ કરેલા અપરાધને સહન કરે છે. (૧૪)

दृश्यन्ते बहवोऽत्र साधुपुरूषास्तावत्क्षमासागरा यावन्नैव दुरुक्तमीषदुदितं केनापि संश्रृण्वते । सामर्थ्ये ह्यतुले तु सत्यपि मनः क्षोभं न येषां व्रजेद्दुर्वाच्यैः कुधियामुपद्रवशतैस्ते साधवो दुर्लभाः ॥१५॥ मदाश्रितानां साधूनां परोपकृतिशालिनाम्। दयार्द्रहृदयानां वः क्षमैवैकास्ति भूषणम् ॥१६॥ यथा ऋषभदेवः प्राक् तत्सुतो भरतस्तथा । आसीत्तथैव निर्मानां यूयं चरत भूतले ॥१७॥ परेषामतिवादान् यः सहते पुरुषो भुवि । जितं सर्वमिदं तेन त्रैलोक्यं क्षमया किल ॥१८॥ क्रोधं यो हृदये जातं क्षमयैव निरस्यति । त्वचं जीर्णामहिरिव स एव मुनिरुच्यते ॥१९॥ यो यजेत्क्रतुराजेन प्रतिमासं शतं समाः । न कुद्ध्येद्यश्च कस्मैचित् तयोरक्रोधनोऽधिकः ॥२०॥ क्रोधं कुर्याद्यदि ज्ञानी लोके प्राकृतजीववत् । ज्ञानेन किं फलं तस्य तदा मूर्खसमस्य हि ॥२१॥ दानं व्रतं च नियमा अतिश्रमकृतं तपः । भस्मीभवति तत्सर्वं स्वस्य क्रोधाग्निना खलु ॥२२॥ शमो दमस्तपो दानमार्जवं ह्रीस्तथा दया । द्वाराणि सप्त स्वर्गस्य साधवोऽत्र वदन्ति हि ॥२३॥ क्रोधस्तु नरकस्यैव द्वारमित्युदितो बुधैः । अतो दूरात्त्यजन्त्येनं शीघ्रसिद्धिमभीप्सवः ॥२४॥ क्रोधमूलो विनाशो हि जनानामिह दृश्यते । तं कथं साधवो धीराः स्वीकुर्युर्लोकनाशनम् ॥२५॥ क्रुद्धः पापं नरः कुर्यात् क्रुद्धो हन्याद्गुरूनपि । क्रुद्धः परुषया वाचा श्रेष्ठानप्यवमन्यते ॥२६॥ वाच्यावाच्ये हि कुपितो नैव जानाति कर्हिचित् । नाकार्यमस्ति क्रुद्धस्य नावाच्यमपि किञ्चन ॥२७॥ क्रुद्धः कार्यं न जानाति न मर्यादां च पश्यति । अवाच्यैर्दुर्वचोभिश्च गुरून् क्रुद्धस्तुदत्यपि ॥२८॥ आत्मानमपि च क्रुद्धः प्रेषयेद्यमसादनम् । एतान्दोषान्विलोक्यैव क्रोधस्त्याज्यो मनीषिभिः ॥२९॥

---

જ્યાં સુધી કોઈ પણ માણસે કહેલું જરા પણ તિરસ્કારનું વચન સાંભળ્યું નથી ત્યાં સુધી ક્ષમાસાગર આ લોકમાં ઘણા સાધુ પુરુષો દેખાય છે. પરંતુ અપરિમિત ઐશ્વર્ય હોવા છતાં પણ જેઓનું મન દુર્જનોનાં દુષ્ટ વચનોવાળા સોએ સો ઉપદ્રવોથી પણ ક્ષોભ પામે નહિ તે સાધુઓ દુર્લભ છે. (૧૫) પરોપકારથી શોભનારા, દયાથી કોમળ હૃદયવાળા મારા આશ્રિત સાધુઓને કેવળ ક્ષમા એ જ ભૂષણ છે. (૧૬)

જેમ ઋષભદેવરૂપ ભગવાનનો અવતાર, માને રહિત હતા તેમ જ તેમના પુત્ર ભરતજી જેમ નિર્માની હતા તે પ્રકારે તમો સર્વે પણ મારા નિર્માની સંતો ભૂતળમાં મારી આજ્ઞાથી વિચરણ કરો. (૧૭) પૃથ્વીમાં જે સાધુ બીજાઓનાં દુર્વચનો સહન કરે છે તેમણે નિશ્ચે ત્રિલોકી વશ કરેલી છે. (૧૮) જે સાધુપુરુષ જૂની ચામડીને સર્પ જેમ તેમ પોતાના મનમાં ઉત્પન્ન થયેલા ક્રોધને ક્ષમાથી જ ત્યાગ કરે છે તે સાધુપુરુષ કહેવાય છે. (૧૯) જે પુરુષ સો વર્ષ સુધી દરેક માસમાં ઉત્તમ યજ્ઞથી પૂજન કરે અને જે પુરુષ દ્રોહ કરનાર ઉપર ક્રોધ કરે નહિ, તે બેમાં ક્રોધ નહિ કરનાર અધિક છે. (૨૦)

**ક્રોધનું પરિણામ :-** જ્યારે આ લોકમાં સ્વધર્માદિયુક્ત સાધુપુરુષ સાધારણ માણસની માફક ક્રોધ કરે તો તેને જ્ઞાનનું ફળ શું ? મૂર્ખની સમાન જ નિશ્ચે છે. (૨૧) સુપાત્રમાં દાન-એકાદશી આદિક વ્રત-નિયમો-મહાપ્રયાસથી કરાયેલાં કૃચ્છ્ર-ચાંદ્રાયણાદિ તે સર્વ પોતાના ક્રોધાગ્નિથી નિશ્ચે બળી જાય છે. (૨૨) શમ-દમ-તપ-દાન-સરલતા-લજ્જા તથા દયા આ સાત આ લોકમાં સ્વર્ગની પ્રાપ્તિના દ્વાર છે. આ પ્રમાણે સાધુઓ કહે છે. (૨૩) ક્રોધ તો નરક પ્રાપ્તિનું જ દ્વાર છે. આવી રીતે વિવેકી સાધુઓએ કહ્યું છે. માટે તત્કાળ સિદ્ધિને ઈચ્છતા સાધુપુરુષો ક્રોધને દૂરથી જ ત્યાગ કરે છે. (૨૪)

આ લોકમાં જનોનો વિનાશ ક્રોધના મૂળવાળો દેખાય છે. ધૈર્યશાળી પુરુષો, અર્થાત્ ક્રોધનું કારણ હોય તો પણ ચિત્તમાં વિકારે રહિત સાધુઓ લોકને નાશ કરનાર ક્રોધનો કેમ સ્વીકાર કરે ? અર્થાત્ સ્વીકાર ન જ કરે. (૨૫) ક્રોધાતુર માણસ સ્ત્રીહત્યાદિ પાપ કરે છે, ક્રોધી ગુરુઓને પણ મારે છે, ક્રોધી માણસ કઠોર વાણીથી શ્રેષ્ઠ પુરુષોનું પણ અપમાન કરે છે. (૨૬) કોપાયમાન પુરુષ ક્યારેય પણ બોલવા યોગ્ય અને નહિ બોલવા યોગ્યને જાણતો નથી. ક્રોધી પુરુષ કરવા યોગ્ય અને ન કરવા યોગ્યને જાણતો નથી; સત્પુરુષ અને સત્શાસ્ત્રોની બાંધેલી ધર્મની સ્થિતિને જોતો નથી. ક્રોધી પુરુષ ન બોલવા યોગ્ય તુંકારા વગેરેના વચનોથી પોતાના ગુરુઓને પણ દુઃખી કરે છે. (૨૭-૨૮) ક્રોધી પુરુષ પોતાના આત્માને પણ યમપુરીમાં મોકલે છે. એ દોષોને જોઈને જ બુદ્ધિવાળા સાધુઓએ ક્રોધનો ત્યાગ જ કરવો. (૨૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

इच्छद्भिः परमं श्रेय इहामुत्र च सर्वदा । धीरैर्विवर्जितं क्रोधं कथं युष्मद्विधश्चरेत् ॥३०॥ क्रुध्यन्तं प्रति न क्रुध्येन्नात्मानं च परानपि । महतो रक्षति भयात्सर्वथा पुरुषो भुवि ॥३१॥ बलीयसे यदि क्रुध्येदशक्तः पुरुषः क्वचित् । जह्यादेव स आत्मानमात्मना तेन वा हतः ॥३२॥ आत्महन्तुर्न वै लोकाः सन्त्यमुत्र शुभाः क्वचित् । अशक्तस्य ततः पुंसो मन्योर्नियमनं हितम् ॥३३॥ शक्तोऽपि विद्वानन्येन क्लिश्यमानो न कुप्यति । यदि तर्हि यशो ह्यत्र प्राप्यामुत्र स मोदते ॥३४॥ अशक्तस्येव शक्तस्य क्रोधत्यागे महर्षयः ! । आत्मनश्च परस्यापि रक्षणात्सुकृतं महत् ॥३५॥ तस्माद्बलवताप्यत्र निर्बलेन च नित्यदा । परापराधः सोढव्य आपत्स्वपि विजानता ॥३६॥ क्रुद्धस्य न जयं क्वापि प्रशंसन्तीह साधवः । क्षमावतो जयो नित्यं साधोरिति सतां मतम् ॥३७॥ सदुपद्रवदोषेण स्वतो जीवन्मृताय च । कः क्रुध्येत् पण्डितो लोके यतस्तन्मृतमारणम् ॥३८॥ दुष्टैः शस्त्रैर्वध्यमाना अपि युष्मादृशाः कथम् । तेजस्विनो महाप्राज्ञाः क्रुध्येयुर्दीर्घदर्शिनः ॥३९॥ यस्तु क्रोधं समुत्पन्नं प्रज्ञया प्रतिबाधते । तेजस्विनं तं विद्वांसो मन्यन्ते दीर्घदर्शिनः ॥४०॥ क्रोधस्त्वपण्डितैर्लोके तेज इत्यभिधीयते । परिणामो हि रजसः क्रोधो ज्ञेयो नृनाशनः ॥४१॥ राजर्षीणामपि क्रोधः स्वधर्मत्वान्न वै हितः । वरं स्वधर्मसन्त्यागो नतु क्रोधस्य सङ्ग्रहः ॥४२॥ बलिना ताडितोऽशक्तो जयेत् क्रोधं यथा तथा । शक्तो नित्यं जितक्रोधो यो भवेत्स सदा सुखी ॥४३॥ क्षमा धर्मः क्षमा यज्ञः क्षमा वेदः क्षमा श्रुतम् । क्षमाहीनेन यत्पुण्यं क्रियते तन्निरर्थकम् ॥४४॥

---

આ લોકમાં અને પરલોકમાં સર્વદા પરમ શ્રેય ઈચ્છતા સાધુજનોએ ત્યાગ કરેલા ક્રોધને તમારા જેવા સાધુપુરુષ કેમ ગ્રહણ કરે ? (૩૦) પૃથ્વીમાં સાધુપુરુષ પોતાના ઉપર ક્રોધ કરતા માણસ પ્રત્યે ક્રોધ નહિ કરતા સતા પોતાનું અને બીજાનું પણ મહાન ભયથી સર્વ પ્રકારે રક્ષણ કરે છે. (૩૧) અસમર્થ પુરુષ કયારેક બળવાન પુરુષ ઉપર ક્રોધ કરે, તો અશક્ત પુરુષ તેની સાથે પહોંચવાની શક્તિ નહિ હોવાથી મુંઝાઈને પોતે જ પોતાના દેહનો ત્યાગ કરે જ અથવા બળવાન પુરુષે શસ્ત્રાદિથી મારેલા પોતાના આત્માને ત્યાગ કરે છે. (૩૨) આત્મઘાત કરનાર પુરુષ પરલોકમાં, મરીને પ્રાપ્ય સ્વર્ગાદિ શુભ લોકો પામતો નથી પરંતુ ઘોર નરકોને જ પામે છે. માટે અશક્ત પુરુષે ક્રોધ સહન કરવો એ જ હિત છે. (૩૩) સમર્થ પણ વિવેકી પુરુષ બીજાએ પીડા પમાડેલો હોય તો પણ જો ક્રોધ કરતો નથી તો તે સમર્થ પુરુષ આ લોકમાં કીર્તિ પામીને પરલોકમાં આનંદ પામે છે. (૩૪) હે મહર્ષિઓ ! અશક્તની માફક શક્તિમાન ક્રોધનો ત્યાગ કરે તો પોતાના અને બીજાના પણ રક્ષણથી મોટું પુણ્ય થાય છે. (૩૫) માટે આ લોકમાં બળવાન પુરુષે પણ અને બળ વિનાનાએ આપત્કાળમાં પણ હંમેશાં પારકાનો અપરાધ સહન કરવો. (ક્રોધ કરવો નહિ.) (૩૬)

ક્રોધી માણસનો ક્યારેય પણ જય થતો નથી એમ સાધુપુરુષો કહે છે. ક્ષમાવાળા સજ્જન પુરુષનો સદા વિજય થાય છે. આ પ્રમાણે સત્પુરુષોનો સિદ્ધાંત છે. (૩૭) સત્પુરુષોમાં કરેલા અપરાધ-દોષથી પોતે જીવતો સતો મરેલા સમાન જ છે. તેને કયો વિવેકી પુરુષ, ક્રોધથી મરેલાને મારે ? (૩૮)

દુર્જન પુરુષો શસ્ત્રોથી મારતા હોય તો પણ પ્રતાપવાળા, મહાબુદ્ધિશાળી, દીર્ઘદષ્ટિવાળા તમારા જેવા સાધુઓ ક્રોધ કેમ કરે ? અર્થાત્ કરે નહિ. (૩૯) જે સાધુપુરુષ ઉત્પન્ન થયેલા ક્રોધને બુદ્ધિથી શાંત કરે છે તેમને દીર્ઘદર્શી વિદ્વાન સાધુઓ ક્રોધ શાંત કરનાર સાધુને પ્રતાપશાળી જાણે છે. (૪૦) લોકમાં મૂર્ખ માણસો તો ક્રોધને તેજ (પ્રતાપ) આ પ્રમાણે કહે છે. મનુષ્યનો પણ નાશ કરનાર ક્રોધ રજોગુણથી ઉત્પન્ન થયેલો છે એમ જાણવો. (૪૧) રાજર્ષિ વિશ્વામિત્રાદિને પણ પોતાના ધર્મપણાથી પણ ક્રોધ હિત કરનારો નથી. પોતાના ધર્મનો ત્યાગ કરવો તે શ્રેષ્ઠ છે પરંતુ પોતાના ધર્મપણે માનેલા ક્રોધનો સ્વીકાર કરવો તે શ્રેષ્ઠ નથી. (૪૨) જેમ અશક્ત પુરુષ બળવાન માણસે તાડન કરાયેલો થકો ક્રોધને જીતે છે તે પ્રકારે શક્તિમાન પુરુષ હંમેશાં ક્રોધ જીતનારો થાય તે હંમેશાં સુખી થાય છે. (૪૩)

ક્ષમા એ ધર્માચરણ છે. ક્ષમા એ યજ્ઞ, ક્ષમા વેદ, ક્ષમા શાસ્ત્રશ્રવણ છે. ક્ષમા સહિત સ્વધર્માદિ આચરણો ફળ આપનારાં છે. ક્ષમા રહિત પુરુષે જે પુણ્ય કરાય છે તે નિરર્થક છે. (૪૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

अतिक्रम्य क्रतुमतां लोकान्वै क्षमिणो नराः । तत ऊर्ध्वं दिव्यलोकान् प्राप्नुवन्ति न संशयः ॥४५॥ क्षमा तेजस्विनां तेजः क्षमा ब्रह्म तपस्विनाम् । क्षमा सत्यं सत्यवतां क्षमा शौचं क्षमा शमः ॥४६॥ क्षन्तव्यमेव सततं पुरुषेण विजानता । यदा हि क्षमते सर्वं ब्रह्म सम्पद्यते तदा ॥४७॥ क्षमावतामयं लोकः परश्चैव क्षमावताम् । सन्मानोऽस्तीह तेषां हि परत्र च शुभा गतिः ॥४८॥ प्रशंसन्ति क्षमां नित्यं जगतामीश्वरा अपि । वैकुण्ठनाथो ब्रह्मा च शङ्करश्चातिवीर्यवान् ॥४९॥ ममापि सर्वदा प्रेष्ठा क्षमैव मुनयः ! किल । तस्मान्मदीयैर्युष्माभिः क्षमा धार्या सदा भुवि ॥५०॥ क्षमावन्तः साधुशीला बोधयन्तो निजाश्रितान् । कृष्णभक्तिं सस्वधर्मां यूयं चरत भूतले ॥५१॥ सुव्रत उवाच - इत्याज्ञप्ता भगवता तदिङ्गितविदो द्विजाः । आज्ञां गृहीत्वा शिरसा प्रोचुः प्राञ्जलयश्च तम् ॥५२॥ एवमेवाचरिष्यामो वयं नारायण ! प्रभो ! । न भविष्यति साधुत्वे दूषणं नस्त्वदोजसः ॥५३॥ मनसा वचसा वपुषा च हरे ! भवतः स्म वयं भवतः स्म वयम् । त्वदृते न परा गतिरस्ति हि नस्तव दर्शनमस्तु पुनस्त्वरितम् ॥५४॥ सुव्रत उवाच - इति सम्प्रार्थ्य ते सर्वे तं प्रणम्य च यूथशः । जग्मुर्नैकान् जनपदान् दिक्ष्वष्टस्वपि भूमिप ! ॥५५॥ चक्रुश्च भगवद्वार्तास्तत्र तत्र च ते गताः । धर्मद्विषोऽपि याः श्रुत्वा सत्या एवेति मेनिरे ॥५६॥ यथार्थवादिनः सुज्ञाञ्छास्त्रज्ञा बहवोऽपि तान् । न जेतुमीशिरे वादैर्जिग्युः सद्यश्च ते तु तान् ॥५७॥ तद्वार्ताश्रवणादापुराश्चर्यमखिला जनाः । मुमुक्षवस्तु तांस्तत्र शरणं दृढनिश्चयाः ॥५८॥ कृष्णस्य भक्तिं तेभ्यस्ते हरिनाम्न उपादिशन् । धर्मान्वयस्य चादानं त्यागं चाधर्मसन्ततेः ॥५९॥ त्यक्त्वा स्वस्वमतान्येव गुरूंश्च भुवि मानवाः । तानाश्रित्य

---

ક્ષમાવાળા પુરુષો યજ્ઞ કરનારાઓના લોકોને ઉલ્લંઘન કરીને તે લોકોથી ઉપર વર્તતા દિવ્ય લોકોને પામે છે એમાં સંશય નથી. (૪૫) તેજસ્વીઓનું તેજ ક્ષમા છે. તપસ્વીઓનું તપ ક્ષમા, સત્યવાદીઓનું સત્ય ક્ષમા, શુદ્ધિવાળાઓની શુદ્ધિ ક્ષમા છે, શમવાળાઓનું શમ ક્ષમા છે. (અર્થાત્ ક્ષમાવાળાઓને જ તેજ આદિક ગુણો ફળ આપનારા થાય છે.) (૪૬) ક્ષમાદિ ગુણોના જાણનારા પુરુષે નિરંતર ક્ષમા રાખવી. જ્યારે સર્વ સુખદુઃખાદિ સહન કરે છે ત્યારે પરમાત્માને પામે છે. (૪૭)

ક્ષમા ગુણયુક્તનો આ લોક અને પરલોક પણ ક્ષમાવાળાઓને છે. આ લોકમાં તેઓનું સન્માન થાય છે. અને પરલોકમાં નિશ્ચે શુભ ગતિ થાય છે. (૪૮) મહાપ્રતાપવાળા વિષ્ણુ-બ્રહ્મા અને શંકર એ જગતના નિયંતાઓ પણ હંમેશાં ક્ષમાને વખાણે છે. (૪૯) હે મુનિઓ ! મને પણ ક્ષમા જ અતિ પ્રિય છે. માટે મારા આશ્રિત તમોએ હંમેશાં ક્ષમા ધારણ કરવી. (૫૦) સદા ક્ષમાવાળા સાધુ સ્વભાવવાળા તમો પોતાના ધર્મે સહિત શ્રીકૃષ્ણની ભક્તિને પોતાનો આશ્રય કરનાર જનોને ઉપદેશ આપતા સતા ભૂતળમાં મારી આજ્ઞાથી વિચરણ કરો. (૫૧)

**સંતોએ કરેલી પ્રતિજ્ઞાપૂર્વક પ્રાર્થના :- સુવ્રતમુનિ કહે છે** : હે રાજન્, શ્રીસહજાનંદ સ્વામીએ આજ્ઞા આપેલા શ્રીહરિના હૃદયગત અભિપ્રાય જાણનારા મુનિઓ મસ્તકથી આજ્ઞા ગ્રહણ કરી બંને હાથ જોડી શ્રીહરિને કહેવા લાગ્યા : (૫૨) હે નારાયણ, હે પ્રભો ! અમો સર્વે મુનિઓ તમારા કહ્યા પ્રમાણે આચરણ કરીશું. અમારા સાધુપણામાં દૂષણ તમારા પ્રતાપથી થશે નહિ. (૫૩) હે હરે ! અમો સર્વે મુનિઓ મન-વચન અને દેહથી તમારા જ છીએ, તમારા જ છીએ. અમારે તમારા વિના બીજી ગતિ નથી. પરંતુ તમો જ પ્રાપ્ય સ્થાન છો. તમારાં દર્શન ફરીથી તત્કાળ થાઓ. (૫૪)

**અનેકવિધ આશ્ચર્ય દર્શન :- સુવ્રતમુનિ કહે છે,** હે ભૂમિપ ! સર્વે તે મુનિઓ પ્રાર્થના કરી શ્રીહરિને પ્રણામ કરી જુદાં જુદાં મંડળો બાંધી આઠ દિશાઓમાં અનેક દેશોમાં ગયા. (૫૫) શ્રીહરિની આજ્ઞાથી દેશાંતરમાં ગયેલા મુનિઓ તે તે દેશોમાં પ્રત્યક્ષ શ્રીકૃષ્ણના પ્રાદુર્ભાવની કથાઓ કહેતા હતા. જે વાર્તાઓ સાંભળી ધર્મનો દ્વેષ કરનારા દુર્જનો પણ તેને સત્ય જ માનતા હતા. (૫૬) યથાર્થ વચન કહેનારા સત્શાસ્ત્રાર્થને જાણનારા મુનિઓને ઘણા વિદ્વાનો પણ શાસ્ત્રાર્થના વાદોથી જીતવા સમર્થ થયા નહિ. મુનિઓ તો શાસ્ત્રજ્ઞ પંડિતોને તત્કાળ વાદોથી પરાભવ કરતા હતા. (૫૭) તે મુનિઓએ ઉપદેશ કરેલી શ્રીહરિના એકાંતિકધર્મ સંબંધી પ્રતાપની વાર્તાઓનાં શ્રવણથી સર્વે જનો આશ્ચર્ય પામી ગયા. તેમાં જે મુમુક્ષુજનો હતા તે તો તે ભગવદ્‌વાર્તાઓમાં વિશ્વાસથી દૃઢ નિશ્ચયવાળા થઈને તે મુનિઓનો આશ્રય કરતા હતા. (૫૮)

તે મુનિઓ જેમણે આશ્રય કર્યો છે એવા મુમુક્ષુ જનોને શ્રીહરિ નામવાળા ભક્તિધર્મના પુત્ર પ્રત્યક્ષ શ્રીહરિકૃષ્ણ ભગવાનની ભક્તિનો ઉપદેશ આપતા હતા. જ્ઞાનાદિ પરિવારે સહિત ધર્મનું ગ્રહણ અને દંભાદિ પરિવારે સહિત અધર્મનો



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

हरिं भेजुस्तत्र तत्र सहस्रशः ॥६०॥ मिलित्वा यूथशो लोकास्तत्र तत्र पुरे पुरे । ग्रामे ग्रामे च राजेन्द्र! वार्तास्तस्यैव चक्रिरे ॥६१॥ मुनीन्प्रपद्य ये भेजुर्हरिं तेषां सहस्रशः । नराः प्रपेदिरे सद्यः समाधिमपि भूपते ! ॥६२॥ गोलोकादीनि धामानि समाधौ ते व्यचक्षत । तत्र कृष्णस्य रूपाणि सहैश्वर्यादिभिस्तथा ॥६३॥ अन्तकाले हरेस्तस्य भक्तान् नॄन् योषितस्तथा । तत्पार्षदा एव निन्युर्विमानैः कृष्णधाम हि ॥६४॥ भक्ता अभक्ता अप्येतदाश्चर्यं हि क्वचित्क्वचित् । प्रत्यक्षमेव ददृशुर्म्रियमाणे तदाश्रिते ॥६५॥ एवं हि कृष्णो भगवान् दयालुर्विनापि साक्षान्निजदर्शनं सः । प्रतापमात्मीयमदीदृशन्नॄन्मानुष्यनाट्यं दधदूर्जितश्रीः ॥६६॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे क्रोधनियमनोपदेशनामा त्रयस्त्रिंशोऽध्यायः ॥३३॥

सुव्रत उवाच – प्रतापो व्यानशे तस्य प्रभोर्दिक्षु दशस्वपि । दैवा जीवा मुमुदिरे तेन चुक्षुभुरासुराः ॥१॥ दैत्यांशा गुरवो ये ते निजशिष्यांस्तदाश्रयम् । कुर्वाणान्वीक्ष्य नो तस्य प्रतापं सोढुमीशिरे ॥२॥ द्विषतस्तं च ते राज्ञो दैतेयांशसमुद्भवान् । मिलित्वा सह तैः सर्वेऽदुध्रुक्षन् हरये नृप ! ॥३॥ तत्र केचिन्महावीरान्कालीभैरवसंश्रितान् । तं हन्तुं प्रैषयन्नुग्रान् बुभुक्षून्कष्टसाधितान् ॥४॥ हरेस्ते त्वीक्षणादेव दह्यमाना इतस्ततः । क्रोशन्तश्च भ्रमन्तश्च तानेवैत्याऽऽर्दयन् भृशम् ॥५॥

---

ત્યાગ કરવાનો ઉપદેશ આપતા હતા. (૫૯) આ રીતે પૃથ્વીમાં તે તે દેશોમાં હજારો મનુષ્યો મુનિઓનો આશ્રય કરી પોતપોતાના મત નિમિત્તે દુરાગ્રહો અને તે તે મતના ઉપદેશ આપનારા ગુરુઓનો ત્યાગ કરીને જ પ્રત્યક્ષ ભગવાન શ્રીનારાયણ મુનિને ભજતા હતા. (૬૦)

હે રાજેન્દ્ર ! તે તે દેશોમાં નગરેનગરમાં અને ગામેગામમાં લોકો ભેગા થઈને તે શ્રીહરિની જ વાર્તા કરતા હતા. (૬૧) હે ભૂપતે ! જે પુરુષો મુનિઓનું શરણ લઈને શ્રીહરિને ભજતાં હતા તેમાં હજારો મનુષ્યો તત્કાળ જ સમાધિ પણ પામતા હતા. (૬૨)

સમાધિવાળા જનો સમાધિમાં ગોલોકાદિ ધામો જોતાં હતાં. તે જ પ્રકારે તેમાં ઐશ્વર્યાદિ સહિત શ્રીહરિકૃષ્ણ ભગવાનનાં શ્રીકૃષ્ણાદિ સ્વરૂપોને જોતા હતા. (૬૩) શ્રીહરિના ઉપદેશથી ભજન કરતા પુરુષો તથા સ્ત્રીઓને અંત સમયે શ્રીહરિના પાર્ષદો જ વિમાનોથી શ્રીહરિના ધામમાં નિશ્ચે લઈ જતા હતા. (૬૪) આ શ્રીહરિના આશ્રિતજનને અંતકાળે ધામમાં લઈ જવા રૂપ આશ્ચર્યને ભક્તો અને અભક્તો પણ ક્યારેક ક્યારેક પ્રત્યક્ષ જ જોતા હતા (૬૫)

મનુષ્યભાવનું અનુકરણ ધારણ કરતા દયાળુ ભગવાન હરિકૃષ્ણ-શ્રી સહજાનંદ આ પ્રમાણે પોતાના પ્રત્યક્ષ દર્શન વિના પણ પોતાનો અસાધારણ પ્રતાપ મનુષ્યોને બતાવતા હતા. (૬૬)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે ક્રોધનિયમનોપદેશનામા ત્રયસ્ત્રિંશોऽધ્યાયઃ (૩૩)*

## અધ્યાય : ૩૪

### અસુરાંશ ગુરુઓ અને રાજાઓએ સત્પુરુષોને કરેલો ઉપદ્રવ અને સત્પુરુષોનું સાંત્વન શ્રીહરિએ કર્યું તે કહ્યું છે.

**સુવ્રત મુનિ કહે છે -** હે રાજન્ ! શ્રીહરિનો મહાપ્રતાપ આ રીતે દશે દિશાઓમાં વ્યાપી ગયો. તે શ્રીહરિના પ્રતાપથી દૈવી સંપત્તિવાળા પુરુષો આનંદ પામ્યા અને આસુરી સંપત્તિવાળા જનો અત્યંત ખેદ પામ્યા. (૧) દૈત્યાંશ ગુરુઓ મુનિઓનાં વચનોથી શ્રીહરિનો આશ્રય કરનારા પોતાના શિષ્યપણાને પામેલા જનોને જોઈ, શ્રીહરિના મહિમાને સહન કરવા સમર્થ થયા નહિ. (૨) હે નૃપ ! તે દૈત્યાંશ ગુરુઓ શ્રીહરિનો દ્વેષ કરનારા રાજાઓને મળીને શ્રીહરિનો દ્રોહ કરવા ઈચ્છતા હતા. (૩)

**શ્રીહરિને મારવા અસુરોએ કરેલા અનેકવિધ ઉપાયો :-** તેમાં કેટલાક કાલી દેવી અને ભૈરવના આશ્રિત હતા તે વિકરાળ, ભક્ષણ કરવા ઈચ્છતા, મહાદુઃખોથી સિદ્ધ કરેલા મહાવીરોને શ્રીહરિને મારી નાખવા મોકલતા હતા. (૪) મહાવીરો તો શ્રીહરિને જોવાથી જ બળતા અંગવાળા અહીંતહીં ભમતા બૂમો પાડતા, મોકલનાર અસુરાંશ ગુરુ અને રાજાઓને જ મળીને પીડા કરવા લાગ્યા. (૫) કેટલાક અસુરાંશ ગુરુઓ દ્વેષે સહિત ઉપરથી શાંત આકૃતિ ધારણ કરી



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सद्वेषं धारयित्वैके तदन्तिकमुपेत्य च । प्रच्छन्नं प्राक्षिपंस्तस्मिन् माषमुष्टीन् सुमन्त्रितान् ॥६॥ केचिद्विषप्रयोगांश्च तस्मिंश्चक्रुः सुदुःसहान् । प्रलोभ्य स्त्रीः कार्मणानि ताभिः केचिदकारयन् ॥७॥ इत्याद्यैर्मारणोपायैर्हरिस्त्वाप न विक्रियाम् । तत्कारिणस्तु सम्प्रापुर्महारोगान् स्वपातकैः ॥८॥ वंशोच्छेदश्च केषाञ्चिदाढ्यानां च धनक्षयः । आसीत्तद्द्रोहिणां राज्ञां राज्यभ्रंशश्च भिक्षुता ॥९॥ हेरेध्वानमाबध्य व्रजतः क्वापि केचन । मिलित्वा यूथशस्तस्थुस्तं हन्तुं चोद्यतायुधाः ॥१०॥ मायया मोहितास्तेऽपि हेरेद्भुतकर्मणः । पश्यन्तोऽपि न तं शेकुर्हन्तुं गच्छन्तमग्रतः ॥११॥ यथाशक्ति यथाबुद्धि यथावित्तं यथासुहृत् । एवं तन्मारणोपायांश्चक्रुः सर्वेऽपि दुर्जनाः ॥१२॥ तथाप्यजेयं देवेशैरपि तं ते कथञ्चन । पराभावयितुं राजन्न शेकुर्भूरितेजसम् ॥१३॥ साक्षाद्धरेर्यदा द्रोहं कर्तुं शेकुर्न ते क्वचित् । तदा तस्यानन्यभक्तान् रुरुजुस्तानितस्ततः ॥१४॥ चरन्तः पुण्यतीर्थानि मुनयो यत्र यत्र ते । जग्मुस्तत्तद्देशनृपा गुरवश्चार्दयन् हि तान् ॥१५॥ श्रीकृष्णस्य प्रतिकृतीः क्वचिदाच्छिद्य केचन । दुर्धियः खण्डयन्ति स्म भङ्क्त्वा सिंहासनानि च ॥१६॥ कण्ठेभ्यस्तुलसीमालास्त्रोटयन्ति स्म केचन । प्रामृजन्नूर्ध्वपुण्ड्राणि ललाटेभ्यश्च केचन ॥१७॥ जहुर्वासःपुस्तकादि बभञ्जुश्च कमण्डलून् । अभक्ष्यं मत्स्यमांसादि केचिद्भैक्ष्ये च चिक्षिपुः ॥१८॥ अस्पृश्यस्त्र्यादिसंस्पर्शं दुष्टाः केचिदचीकरन् । अभाषयंश्च नारीभिरवदांस्तांस्त्वाडयन् ॥१९॥ अस्फाटयन् गुह्यपटान् भैक्षे धूलिं च चिक्षिपुः । केचित्तु पाकपात्राणि बभञ्जुरतिकोपतः ॥२०॥ अपशब्दान् ब्रुवन्तश्च तान् वृथा केऽप्यताडयन् । तदुत्कर्षासहा इत्थं तेऽपचक्रुरनेकधा ॥२१॥

---

શ્રીહરિની સમીપમાં આવી મંત્રોથી મંત્રેલા અડદની મુષ્ટિ ગુપ્તપણે શ્રીહરિ ઉપર નાખતા હતા. (૬) કેટલાક અસુર ગુરુઓ સહન કરવા અશક્ય એવા ઝેરના પ્રયોગો (પાનબીડી, દૂધ વગેરેમાં ઝેર નાખવું વગેરે) શ્રીહરિ ઉપર કરતા હતા, કેટલાંક કામણટૂમણ કરનારી સ્ત્રીઓને લોભ બતાવી તે સ્ત્રીઓ દ્વારા કામણટૂમણ (મંત્રતંત્રાદિ પ્રયોગ) કરાવતા હતા. (૭) ઈત્યાદિ મારવાના ઉપાયોથી શ્રીહરિને તો કંઈ પણ વિકાર થયો નહિ. મારણના ઉપાયો કરનારા અસુર ગુરુઓ તો પોતાનાં પાપોથી મહારોગો જે, ગળતો કોઢ કે પિત્ત વિકાર- ભગંદર વગેરેને પામ્યા. (૮)

શ્રીહરિનો દ્રોહ કરનારા કેટલાક અસુર ગુરુ અને રાજાઓનો વંશ નાશ પામ્યો. ધનવાનોનું ધન નાશ પામ્યું. તેવા રાજાઓના રાજ્યની ભ્રષ્ટતા થઈ અને ભિક્ષુકો થયા. (૯) કેટલાક અસુરાંશ ગુરુઓ તથા રાજાઓ ભેગા મળી ઉગામ્યા છે તલવાર વગેરે આયુધો હાથમાં જેમણે એવા, કોઈ પણ સ્થાનમાં જતા શ્રીહરિના માર્ગને રોકીને શ્રીહરિને મારવા માટે ઊભા રહ્યા. (૧૦) આશ્ચર્યકારી ચરિત્રવાળા શ્રીહરિની ઈચ્છાથી મોહ પામેલા અસુર ગુરુઓ તથા રાજાઓ પણ પોતાની આગળ થઈ અન્યત્ર જતા શ્રીહરિને જોઈને પણ મારવા માટે શક્તિમાન થયા નહિ. (૧૧)

દુર્જનો પોતાની શક્તિ પ્રમાણે, બુદ્ધિ પ્રમાણે અને મિત્રના બળ પ્રમાણે શ્રીહરિને મારવાનાં સાધનો કરતા હતા. (૧૨) હે રાજન્, તો પણ તે અસુરો દેવોના નિયામક બ્રહ્માદિકોએ પણ ન જીતી શકાય એવા અત્યંત મહાપ્રતાપી શ્રીહરિનો કોઈ પણ પ્રકારે પરાભવ કરવા માટે સમર્થ થયા નહિ. (૧૩) તે અસુરો જ્યારે પ્રત્યક્ષ શ્રીહરિનો દ્રોહ કરવા ક્યારેય પણ શક્તિમાન થયા નહિ ત્યારે શ્રીહરિના એકાંતિક ભક્તો એવા મુનિઓને જ્યાં ત્યાં પીડા કરવા લાગ્યા. (૧૪)

**નિર્માની સંતોને પરેશાન કરતા પાપબુદ્ધિ અસુરો :-** પુણ્યતીર્થોમાં વિચરણ કરતા મુનિઓ જે જે દેશોમાં ગયા ત્યાં તે તે દેશોમાં રહેલા અસુર રાજાઓ અને ગુરુઓ પણ તે મુનિઓને અતિશય કષ્ટ આપતા હતા : (૧૫) કેટલાક દુષ્ટ બુદ્ધિવાળા અસુરાંશ ગુરુઓ તથા રાજાઓ કોઈ સમયે મુનિઓને પૂજવા યોગ્ય મૂર્તિઓ બળપૂર્વક લઈને ખંડન કરતા હતા અને સિંહાસનો ભાંગી નાખતા હતા. (૧૬) કેટલાક કંઠેથી તુલસીની માળાઓ તોડી નાખતા હતા, કેટલાક મુનિઓના ભાલમાંથી ઊર્ધ્વપુંડ્ર તિલકો ભૂંસી નાખતા હતા. (૧૭) કેટલાક વસ્ત્રો-પુસ્તકો વગેરે મુનિઓની પાસેથી લઈ લેતા હતા. અને કમંડળો ભાંગી નાખતા હતા. મુનિઓના ભિક્ષાન્નમાં માછલાનું માંસ વગેરે અભક્ષ્ય વસ્તુ નાખતા હતા. (૧૮) દુષ્ટ સ્વભાવવાળા અસુરો મુનિઓને અસ્પૃશ્ય સ્ત્રીઓ, ચંડાળ વગેરેનો સંસ્પર્શ કરાવતા હતા. નારીઓની સાથે બળપૂર્વક ભાષણ કરાવતા હતા, નારીઓની સાથે નહિ બોલતા મુનિઓને લાકડીઓથી પ્રહાર કરતા હતા. (૧૯) કેટલાક અસુર ગુરુ તથા રાજાઓ તો અતિ ક્રોધથી મુનિઓની કૌપીનો ફાડી નાખતા હતા અને ભિક્ષાન્નમાં ધૂળ નાખતા, તથા પાક કરવાનાં પાત્રો ભાંગી નાખતા હતા. (૨૦) કેટલાક ગાલીદાન વગેરે કઠોર વચનો બોલીને મુનિઓને કોઈ પણ કારણ વિના તાડન કરતા હતા. મુનિઓના ઉત્કર્ષને નહિ સહન કરનારા અસુરો આ પ્રમાણે અનેક પ્રકારે મુનિઓનો તિરસ્કાર કરતા હતા. (૨૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तत्र तत्रान्नसत्रेषु हरिणा स्थापितानपि । साधून्सन्ताड्य निष्कास्य बभञ्जुस्तानि केचन ॥२२॥ मुनयस्ते तु तत्सर्वं सेहिरे क्षमिणोऽर्दनम् । शुकर्षभार्षभनिभा जितक्रोधा जितेन्द्रियाः ॥२३॥ दुष्टैर्निष्कास्यमानास्ते दिग्भ्योऽष्टभ्य इतस्ततः । नारायणमुनेः पार्श्वमाययुर्यूथशस्ततः ॥२४॥ तानागतान् स भगवान्मानयित्वा यथोचितम् । तेषां वृत्तान्तमप्राक्षीत्ततस्ते सर्वमूचिरे ॥२५॥ नीलकण्ठः स तच्छ्रुत्वा प्राह तान्सर्ववित्प्रभुः । आगतः क्षयकालो हि तेषां युष्मदतिक्रमात् ॥२६॥ यदा निरपराधानां साधूनां कोऽप्यतिक्रमम् । कुर्यात्स शिवतुल्योऽपि सानुबन्धो विनश्यति ॥२७॥ आयुः श्रियं यशो धर्मं लोकानाशिष एव च । हन्ति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ॥२८॥ राजानो गुरवश्चैते दैत्यांशाः सन्ति भूतले । ते क्षीणसुकृता जाता युष्मद्द्रोहेण साम्प्रतम् ॥२९॥ स्वपापेनैव ते सर्वे कालेनाल्पेन पापिनः । विनश्यन्ति यथापूर्वं कंसकेशिबकादयः ॥३०॥ सतां वो रक्षणार्थं हि राधिकारमणेच्छया । शास्तैतेषां नृपः कोऽपि वायोरस्त्यागतो दिशः ॥३१॥ ननु श्रीरामचन्द्रेण यः किंपुरुषराट् कृतः । तद्वंश्यो नीतिविच्छिष्य ईशानस्य कलानिधिः ॥३२॥ गौराङ्गो मुण्डितश्मश्रुर्दधत्केशांश्च शीर्षणि । मलहीनानि वस्त्राणि शस्त्राणि च धरत्यसौ ॥३३॥ गुणेषु षट्सूपायेषु चतुर्षु निपुणोऽस्ति च । अष्टादशविधस्यापि व्यवहारस्य निर्णये ॥३४॥ गारुडं माकरं क्रौञ्चं चक्रं सूचीमुखं महत् । वज्रं च सर्वतोभद्रमर्धचन्द्रं च शाकटम् ॥३५॥ शृङ्गाटकादीनि चासौ वेत्ति व्यूहानि सर्वशः । व्यूहान्यतः स्वसैन्यानि स चारयति भूतले ॥३६॥ तपस्विवेषो राजापि त्यक्तस्वर्णाद्यलङ्कृतिः । गुरुप्रोक्तं दशविधं स्वधर्मं पालयत्यसौ ॥३७॥

કેટલાક અસુર ગુરુઓ તથા રાજાઓ તે તે દેશોમાં સ્થાપન કરેલાં અન્નક્ષેત્રોમાં શ્રીહરિએ રાખેલા મુનિઓને મારીને તેઓને નસાડી મૂકી અન્નક્ષેત્રો ભાંગી નાખતા હતા. (૨૨) શુકદેવ તથા ઋષભ અને ઋષભના પુત્ર જડભરતની સમાન ક્ષમતાવાળા-જીતક્રોધ-જિતેન્દ્રિય મુનિઓ તો તે સર્વે પીડા સહન કરતા હતા. (૨૩) દુર્જનોએ આઠ દિશાઓ થકી જ્યાંત્યાંથી કાઢી મૂકેલા મુનિઓ ભેગા થઈને ત્યાંથી શ્રીહરિની પાસે આવ્યા. (૨૪)

**શ્રીહરિએ સંતોને આપેલું આશ્વાસન** :- ભગવાન શ્રીહરિ દેશાંતરથી આવેલા તે મુનિઓનો યથાયોગ્ય સત્કાર કરી મુનિઓને દેશાંતરમાં થયેલું વૃત્તાંત પૂછવા લાગ્યા. પછી મુનિઓએ સમગ્ર વૃત્તાંત શ્રીહરિની આગળ કહ્યું. (૨૫) નીલકંઠ, સર્વ વૃત્તાંત જાણનારા-ઉપદ્રવના નિવારણમાં સમર્થ શ્રીહરિ તે વૃત્તાંત સાંભળી મુનિઓને કહેવા લાગ્યા : હે મુનિઓ ! તમારો અપરાધ કરવાથી તેઓના વિનાશનો સમય આવ્યો છે જ. (૨૬) કોઈ પણ પુરુષ જ્યારે નિરપરાધી સાધુઓનો અપરાધ કરે તો તે શંકરજી તુલ્ય હોય તોપણ પરિવારે સહિત નાશ પામે છે. (૨૭)

હે મુનિઓ ! મોટા પુરુષોનો અપરાધ કરનાર પુરુષના આયુષ્ય, ધનાદિ સંપત્તિ, કીર્તિ, આ લોકમાં યજ્ઞદાનાદિથી સંપાદન કરેલો ધર્મ-સુકૃતથી પ્રાપ્ય સ્વર્ગાદિ લોકો-આશીર્વાદો વિશેષ શું કહેવું ? બીજાં પણ સર્વ કલ્યાણકારી પુણ્યો નાશ પામે છે. (૨૮) પૃથ્વીમાં જે તમારો અપરાધ કરનાર અસુરાંશ ગુરુઓ અને રાજાઓ છે તે સર્વે હાલમાં તમારા દ્રોહથી જેમનાં પુણ્યો નાશ પામ્યાં છે એવા થયા છે. (૨૯)

પાપીઓ પોતાના પાપોથી જ જેમ પૂર્વે કંસ, કેશી, બક, તૃણાવર્ત, અઘાસુર આદિ નાશ પામ્યા તેમ જ થોડા સમયમાં નાશ પામશે. (૩૦) તમારા જેવા સાધુઓનું રક્ષણ કરવા રાધિકાપતિ શ્રીકૃષ્ણ પરમાત્માની ઈચ્છાથી અસુરોને નિયમન કરનાર કોઈ પણ રાજા વાયવ્ય દિશા તરફથી આવેલા છે. (૩૧)

શ્રી રામચંદ્રજીએ અંગદને કિંપુરુષખંડનો અધિપતિ કર્યો હતો. તેના વંશમાં ઉત્પન્ન થયેલો-નીતિશાસ્ત્રને જાણનાર-ઈશાન નામના પેગમ્બરનો શિષ્ય, કળાઓનો નિધિ - શ્વેત શરીરવાળો જેણે દાઢી મૂંછ મૂડાવી છે, માથામાં કેશ ધારણ કરનાર આ રાજા મેલ રહિત વસ્ત્રો તથા શસ્ત્રોને ધારણ કરે છે. (૩૨-૩૩) આ રાજા છ ગુણો (સંધિ-વિગ્રહ-યાન-આસન-સંશય-દ્વૈધીભાવ) અને સામ, દામ, ભેદ અને દંડ એ ચાર ઉપાયોમાં અને અઢાર પ્રકારના વ્યવહારના નિર્ણયમાં પણ નિપુણ છે. (૩૪) આ રાજા ગરુડ, મકર, ક્રૌંચ, ચક્ર, સૂચીમુખ, મહત્, વજ્ર, સર્વતોભદ્ર, અર્ધચંદ્ર, શાકટ, શૃંગાટક આદિ વ્યૂહો જેમાં છે એવા બાર્હસ્પત્યાદિ સર્વ વ્યૂહોને જાણનાર, માટે તે રાજા વ્યૂહરચનાથી યુક્ત પોતાનાં સૈન્યોને પૃથ્વીમાં જ્યાંત્યાં ફેરવે છે. (૩૫-૩૬) રાજા છે તો પણ ત્યાગ કર્યા છે સુવર્ણના અલંકારો જેમણે એવા માટે જ તપસ્વીના જેવા વેશવાળા આ રાજા ગુરુએ કહેલા દશ પ્રકારના પોતાના ધર્મનું પાલન કરે છે. (૩૭)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**प्रत्यक्षमेकमीशानं विनाऽन्यदैवतं न हि । इत्येकस्तस्य धर्मोऽस्ति द्वितीयश्च निगद्यते ॥३८॥ मनोनुरागः कर्तव्यस्तस्मिन्नेव प्रभाविति । नानृते शपथः कार्य ईशस्येति तृतीयकः ॥३९॥ आर्केऽह्न्याऽऽराधनं कार्यं तस्यैव च दिवानिशम् । जननी जनकश्चोभौ माननीयौ सदेति च ॥४०॥ न घातः कस्यचित्कार्यः षष्ठो धर्म इतीरितः । परदारा न गन्तव्याः स्तैन्यं कार्यं न कस्यचित् ॥४१॥ मिथ्या साक्ष्यं न कर्तव्यं नवमो धर्म इत्यसौ । परेषां च धनादीनि कामनीयानि न क्वचित् ॥४२॥ इत्थं दशविधं धर्मं पालयन्स नृपोत्तमः । संशिक्ष्य तानधर्मिष्ठान्करिष्यत्यवनं हि वः ॥४३॥ अलक्ष्यलिङ्गा वर्तध्वं तावद्यूयमिहानघाः!। देशकालानुसारेण वर्तनं नीतिरस्ति हि ॥४४॥ पाण्डवाः कृष्णसाहाय्या अपि शात्रवसङ्कटे । अलक्ष्यलिङ्गा न्यवसन्विराटनगरे पुरा ॥४५॥ धर्मो जयति नाधर्मः सत्यं जयति नानृतम् । इत्यार्षवचनं सत्यं मत्वा निश्चिन्तमुष्यताम् ॥४६॥** सुव्रत उवाच – **इत्युक्ता नीलकण्ठेन मुनयस्ते तथैव हि । किञ्चित्कालमवर्तन्त क्षितौ ध्यायन्त एव तम् ॥४७॥ अविदिता असुरैर्गुरुभिर्नृभिर्मुनिगणा भुवि रङ्कजना इव । प्रथितवैष्णवचिह्नमपास्य ते नृप ! विचेरुरहंममतोज्झिताः ॥४८॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे असुरांशगुरुनृपादिकृतसमुपद्रवनामा चतुस्त्रिंशोऽध्यायः॥३४॥

---

**ગવર્નર રાજાના દશ પ્રકારના ધર્મો :-** પ્રત્યક્ષ એક ઈશાન વિના બીજા દેવતા નથી જ : આ પ્રકારે તે રાજાનો પ્રથમ ધર્મ છે. પ્રભુ-ઈશ્વરમાં જ પોતાના મનની આસક્તિ કરવી આ બીજો ધર્મ છે. જૂઠું બોલવામાં પોતાના ઈષ્ટના સોગન ખાવા નહિ આ ત્રીજો ધર્મ છે. રવિવારે રાત્રિ-દિવસ ઈશ્વરનું જ આરાધન કરવું : આ ચોથો ધર્મ છે. માતા અને પિતા બંનેને નિરંતર માનવાં આ પાંચમો ધર્મ છે. કોઈ પણ માણસનો શસ્ત્રાદિથી નાશ કરવો નહિ : આ છઠ્ઠો ધર્મ છે. પારકી સ્ત્રી સાથે વ્યભિચાર કરવો નહિ : આ સાતમો ધર્મ છે. કોઈ પણ પદાર્થની ચોરી કરવી નહિ : આ આઠમો ધર્મ છે. જૂઠી સાક્ષી પૂરવી નહિ : આ નવમો ધર્મ છે. અને બીજાઓનાં ધન વગેરે ક્યારેય ઈચ્છવાં નહિ : આ દશમો ધર્મ છે. (૩૮ થી ૪૨)

આ પ્રકારે દશ પ્રકારનો ધર્મ પાલન કરતા સર્વ રાજાઓમાં અતિશ્રેષ્ઠ રાજા અધર્મીઓને સારી રીતે શિક્ષા આપીને તમારું રક્ષણ નિશ્ચે કરશે. (૪૩) હે નિષ્પાપ મુનિઓ ! ત્યાં સુધી તમો આ લોકમાં ન જાણી શકે એવા ચિહ્નોવાળા થઈ વર્તો. કારણ કે દેશ-કાળાનુસારે પોતાનું વર્તન કરવું એ નીતિ છે. (૪૪) શ્રી કૃષ્ણની સહાયવાળા પાંડવો પણ પૂર્વે શત્રુ સંબંધી પીડા સમયે વિરાટનગરમાં કોઈ ન જાણી શકે તેવા વેશવાળા થઈને નિવાસ કરતા હતા. (૪૫)

**પરિણામે વિજય પામવાનો માર્ગ :-** હે ઋષિઓ ! ધર્મ જય પામે છે. અધર્મ જય પામતો નથી. સત્ય જય પામે છે. અસત્ય જય પામતું નથી : આવું શાસ્ત્રવચન છે તે સત્ય માનીને ચિંતા વિનાના થઈને નિવાસ કરો. (૪૬) **સુવ્રતમુનિ કહે છે :** હે રાજન્ ! નીલકંઠવર્ણીએ આ પ્રમાણે કહેલા મુનિઓ શ્રીહરિનું ચિંતવન કરતા સતા કેટલોક સમય પૃથ્વીમાં શ્રીહરિએ કહ્યું તે પ્રમાણે વર્તતા હતા. (૪૭)

હે રાજન્ ! અહંતા અને મમતાથી રહિત મુનિગણો, પ્રસિદ્ધ વૈષ્ણવ ચિહ્નોનો (તુલસીમાળા-ઊર્ધ્વપુંડ્રતિલક વગેરે ચિહ્નોનો) ત્યાગ કરી અસુરાંશ ગુરુઓ અને રાજાઓએ 'આ સ્વામિનારાયણના આશ્રિત સાધુઓ છે' એમ નહિ જાણેલા સતા પૃથ્વીમાં રાંક જનો હોય તેમ ફરતા હતા. (૪૮) *ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે અસુરાંશ ગુરુનૃપાદિકૃત સમુપદ્રવનામા ચતુસ્ત્રિંશોऽધ્યાયઃ (૩૪)*

सुव्रत उवाच – **वर्धमानप्रतापेन तावत्तस्येच्छया प्रभोः । सद्द्रोहिणो नृपास्तेन विजिग्ये सकला भुवि ॥१॥ अनायासेन सर्वेऽपि सद्द्रोहक्षीणमङ्गलाः । वशीकृता नृपास्तेन सद्रक्षोर्जिततेजसा ॥२॥ हृतराज्या हृतस्थानास्ते नृपाला गतश्रियः । विनष्टबन्धुसुहृदो न्यूषुश्छन्नाः क्वचिद्भुवि ॥३॥ सदसल्लक्ष्मविद्राजा हरिभक्तेतरान् गुरून् । यथार्हं दण्डयामास दाम्भिकान् विषयैषिणः ॥४॥ औद्धवे सम्प्रदाये ये त्यागिनो गृहिणोऽपि वा । तान् यस्त्वपीडयत्कोऽपि राजा वान्येऽपि दाम्भिकाः ॥५॥ गृहीत्वा तांस्त्वसौ बद्ध्वा कण्ठपाशेन भूपतिः । सद्यो हन्ति स्म तेनाभूदाक्रोशो भूतले महान् ॥६॥ सद्द्रोहिणस्तदा ये ये ते ते भीतास्ततो भृशम् । यत्र तत्र निलीयैव निन्युः कृच्छ्रेण वासरान् ॥७॥ भारते सकले वर्षे तथा किंपुरुषेऽपि च । तस्यैव राज्यमभवत्सन्मार्गस्यैव रक्षितुः ॥८॥ कुर्वन्दिग्विजयं सोऽथ सौराष्ट्रेषु नृपः पुरम् । राजकूटाभिधं प्राप्य मासमेकमुवास च ॥९॥ हेतुं जानन्निजोत्कर्षे भक्तरक्षां हरेः सुधीः । तं द्रष्टुमासीदुत्कण्ठस्तस्मै दूतं निसृष्टवान् ॥१०॥ स दुर्गपत्तने प्राप्य शीघ्रगस्तं प्रणम्य च । प्राञ्जलिर्भूपतेर्वाक्यं न्यवेदयदनाकुलः ॥११॥** राजदूत उवाच – **स्वामिन् ! दूतोऽस्मि नृपतेर्गवेन्द्रस्य महौजसः । राजकूटपुरे सोऽस्ति सेवितः शतशो नृपैः ॥१२॥ स विजित्य दिशः सर्वाः प्रतापेन तवैव हि । भवन्तं द्रष्टुमुत्कोऽस्ति यास्यन्मुम्महिपत्तनम् ॥१३॥**

---

## અધ્યાય : ૩૫

### રાજકોટમાં સમગ્ર રાજાઓને આશ્ચર્ય કરનારો ભગવાન શ્રીહરિ અને ગવર્નર રાજાનો મેળાપ થયો તે કહેલો છે.

**શ્રીહરિના સંકલ્પથી પૃથ્વીમાં અંગ્રેજ રાજાનું શાસન :-** સુવ્રત મુનિ કહે છે : હે રાજન્ ! જે સમયમાં તે મુનિઓ આ પ્રમાણે ફરતા હતા તે સમયે શ્રીહરિની ઈચ્છાથી વૃદ્ધિ પામતા પ્રતાપવાળા તે રાજાએ સત્પુરુષોનો દ્રોહ કરનારા રાજાઓને જીતી લીધા. (૧) સાધુઓના રક્ષણ કરવાથી જેનો પ્રતાપ અતિશય વૃદ્ધિ પામ્યો છે એવા ગવર્નર રાજાએ સાધુઓના દ્રોહથી નાશ પામ્યાં છે પુણ્યો જેમનાં એવા સર્વે અસુર રાજાઓને પ્રયત્ન વિના વશ કરી લીધા. (૨)

**સત્પુરુષોના અપરાધનું પરિણામ :-** જેમનાં રાજ્ય હરી લીધાં છે અને રાજ્ય-સિંહાસનો પણ લઈ લીધાં છે માટે લક્ષ્મી વિનાના, નાશ પામ્યા છે બંધુઓ અને મિત્રો જેમના એવા અસુર રાજાઓ પૃથ્વીમાં કોઈ ના જાણે તેવા સ્થાનમાં ગુપ્ત પણે નિવાસ કરતા હતા. (૩) સ્વધર્મનિષ્ઠ સાધુઓ અને અધર્મનિષ્ઠ અસાધુઓનાં લક્ષણો જાણનાર અંગ્રેજ રાજા દાંભિક અને વિષયમાં પ્રીતિવાળા અસુર ગુરુઓને યોગ્યતા પ્રમાણે દંડ કરતો હતો. (૪)

ઉદ્ધવ સંપ્રદાયમાં જે ત્યાગીઓ રહેલા છે અને જે ગૃહસ્થો છે તેમને જે કોઈ રાજા પીડા કરે અથવા અસુર ગુરુઓ પણ જે પીડા કરતા હતા; તે અસુર ગુરુઓ તથા રાજાઓને આ રાજા ગ્રહણ કરી, (પકડી) ગળે બાંધીને તત્કાળ જ મારતા હતા તેથી પૃથ્વીમાં ઘણો ત્રાસ થયો. (૫-૬) તે સમયે જે જે સત્પુરુષોના દ્રોહી અસુર ગુરુઓ તથા રાજાઓ હતા તે તે અંગ્રેજ રાજાથી ભય પામેલા સતા જ્યાં ત્યાં ગુપ્ત સ્થાનોમાં સંતાઈને મહા કષ્ટથી દિવસો કાઢતા હતા. (૭) સન્માર્ગનું રક્ષણ કરનારા અંગ્રેજ રાજાનું જ એક અધિપતિપણું સમગ્ર ભારતમાં તથા કિંપુરુષવર્ષમાં પણ હતું. (૮) પછી અંગ્રેજ રાજાએ દિગ્વિજય કરતા સતા સૌરાષ્ટ્ર દેશોમાં રાજકોટ નગરમાં આવીને એક માસ નિવાસ કર્યો. (૯)

**સર્વનિયંતા શ્રીહરિના દર્શનની ઉત્કંઠા :-** નારાયણ મુનિના ભક્તોની રક્ષાને પોતાના ઉત્કર્ષમાં કારણ જાણતો બુદ્ધિમાન રાજા શ્રીહરિને જોવા માટે ઉત્કંઠાવાળો થયો. શ્રીહરિને પોતાની વિજ્ઞપ્તિ (નિવેદન) કરવા માટે દૂતને મોકલ્યો. (૧૦)

શીઘ્ર ગતિવાળો દૂત દુર્ગપત્તનમાં રહેલા શ્રીહરિને પ્રણામ કરી બંને હાથ જોડી એકાગ્ર ચિત્તથી ગવર્નર રાજાનું વાક્ય નિવેદન કરતો હતો. (૧૧) **રાજદૂત બોલ્યો :** હે સ્વામિન્ ! મહાબળવાન ગવેન્દ્ર રાજાનો દૂત છું. સોએ સો રાજાઓથી સેવાયેલા તે ગવેન્દ્ર રાજા હાલ રાજકોટમાં રહેલા છે. (૧૨) તે ગવર્નર રાજા તમારા પ્રતાપથી જ સર્વ દિશાઓને જીતીને હવે મુંબઈ નગરમાં જશે એવા થકા તમોને મળવા ઉત્સાહવાળા છે. (૧૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सोऽत्रागच्छेत्त्वदाज्ञा चेत्तत्राऽऽयाहि त्वमेव वा । यथेच्छं कुरु वर्णीन्द्र ! स्वतन्त्रोऽसि त्वमत्र हि ॥१४॥ तव त्वदाश्रितानां च तद्राज्ये कुत्रचिद्भुवि । दुर्जनेभ्यो भयं नास्ति सर्वथेत्यवगम्यताम् ॥१५॥ उत्तरं देहि मे स्वामिन् ! यथा तव चिकीर्षितम्। इति दूतवचः श्रुत्वा प्रसन्नो हरिरब्रवीत् ॥१६॥ श्रीनारायणमुनिरुवाच - स्वस्ति स्तात्तस्य भूभर्तुर्येनास्मत्साधवोऽविताः । रक्षोभ्य इव दुष्टेभ्यः सदसद्व्यक्तिवेदिना ॥१७॥ दुर्लभः खलु भूपाल ईदृशः साम्प्रतं भुवि । अहमेवागमिष्यामि ततस्तं निकषा ननु ॥१८॥ इत्युक्त्वा तं भोजयित्वा दूतं प्राह पुनर्हरिः । गच्छ त्वमग्रतो राज्ञे ब्रूह्याऽऽयाम्यहमद्य वै ॥१९॥ इत्युक्तो हरिणा दूतः स्वभर्तारमुपेत्य तत् । यथावत्प्राह स ततो हृष्टः प्राह निजानुगान् ॥२०॥ अत्र नारायणमुनिरद्य श्वो वाऽऽगमिष्यति। यदाऽऽगच्छेत्तदा सद्यो वाच्यं मेऽपि रहोजुषे ॥२१॥ इत्यादिश्यानुगान् राजा हर्यर्चासाधनानि सः । एकत्रानीय हर्षेण प्रत्यैक्षत तदागमम् ॥२२॥ तं मानयन् हरिरपि प्रथितप्रतापः प्रायात्परेद्यवि युतः परिमेयपद्रैः । आरुह्य चारुशिबिकां कतिभिश्चिदात्मसेवापरैरपि च वर्णिवरैः पुरं तत् ॥२३॥ मार्गे जनास्तु शतशश्च सहस्रशस्तं श्रेयस्तनुं ह्यनुययुः क्षपितान्यकार्याः। भक्तास्तु तेषु तदवेक्षणमात्रकामा आसन् परे तु नृपमानदिदृक्षवोऽस्य ॥२४॥ तद्राजपत्तनमवाप दिने द्वितीये नारायणो मुनिरहर्दशमक्षणान्ते । नैकक्षितीशशिबिरावलिमत्तनागवाहोष्ट्रगोरथपदातिगणावृतं च ॥२५॥ दूरान्निशम्य जनताजयशब्दमुच्चैः सम्भ्रान्तराजकुलसैनिकपौरवृन्दैः । त्यक्तासनाशनशयादि समीक्ष्यमाणं राज्ञे शशंसुरनुगा हरिमागतं ते ॥२६॥ श्रुत्वाऽऽगतं तमतिहर्षभृतः स सद्यस्त्यक्तान्यराजकुलकार्य उदारबुद्धिः । प्रत्युज्जगाम हरिमाशु चलन् पदातिस्तं चान्वधावदखिलोऽपि च राजसङ्घः ॥२७॥

---

હે વર્ણીન્દ્ર ! જો તમારી આજ્ઞા હોય તો તે તમારી સમીપમાં આવે અથવા તમો રાજકોટ આવો. આ બંને પક્ષમાં તમો સ્વતંત્ર છો માટે ઈચ્છા પ્રમાણે કરો. (૧૪) પૃથ્વીમાં તેમના રાજ્યમાં કોઈ પણ ઠેકાણે તમોને અને તમારા આશ્રિતોને દુર્જનોથી ભય સર્વ પ્રકારે નથી. આ પ્રમાણે જાણો. (૧૫) હે સ્વામિન્ ! જે પ્રકારે તમોએ કરવા ઈચ્છેલું હોય તે પ્રકારે મને ઉત્તર આપો. (અહીંયાં સુવ્રત મુનિ પ્રતાપસિંહ રાજાને કહે છે) હે રાજન્ ! દૂતવચન સાંભળી પ્રસન્ન થયેલા શ્રીહરિ બોલ્યા : (૧૬)

હે દૂત ! તે ગર્વનર રાજાનું મંગળ થાઓ. સાધુઓ અને અસાધુઓને તથા સત્ય અને અસત્યને જાણનારા ગવેન્દ્ર રાજાએ અમારા સાધુજનોની રાક્ષસોથી જ જેમ તેમ દુષ્ટોથી રક્ષા કરેલી છે. (૧૭) ભૂતળમાં હાલમાં ગવેન્દ્ર રાજા સમાન રાજા નિશ્ચે દુર્લભ છે. માટે હું જ તેમની સમીપમાં આવીશ. (૧૮) હે રાજન્ ! આ પ્રમાણે દૂતને કહીને તેને ભોજન કરાવી ફરીથી તે દૂતને શ્રીહરિએ કહ્યું : હે દૂત ! તમો આજે આગળ જાઓ અને રાજાને મારું આગમન કહો કે હું તૈયાર થઈને આવું છું. (૧૯)

શ્રીહરિએ કહેવાયેલા દૂતે પોતાના સ્વામી ગવેન્દ્ર રાજાને મળીને શ્રીહરિનું વચન યથાર્થપણે કહ્યું. પછી ગવેન્દ્ર ભૂપે પ્રસન્ન થઈ પોતાના સેવકોને કહ્યું : હે સેવકો ! નારાયણ મુનિ આજ કે કાલે આ પુરમાં આવશે. જ્યારે આવે ત્યારે હું એકાંતમાં બેઠો હોઉં તો પણ મને તત્કાળ કહેવું. (૨૦-૨૧) હે રાજન્ ! રાજા ગવેન્દ્ર આ પ્રમાણે અનુચરોને આજ્ઞા આપી શ્રીહરિની પૂજાનાં સાધનો (સુંદર વસ્ત્રો, પુષ્પના હારો, ચંદનાદિ) એક સ્થાનમાં લાવીને તેમના આવવાની પ્રતીક્ષા કરવા લાગ્યા. (૨૨)

સિદ્ધ મહાપ્રતાપશાળી શ્રીહરિ પણ ગવેન્દ્ર રાજાને માન આપતા થોડાક પાર્ષદો તથા પોતાની સેવાપરાયણ બ્રહ્મચારી તથા સાધુઓ સાથે સુંદર શિબિકામાં બેસીને બીજે દિવસે રાજકોટ જવા માટે નીકળ્યા. (૨૩) માર્ગમાં સોએ સો અને હજારોહજાર લોકો બીજાં કાર્યો ત્યાગ કરી કલ્યાણમૂર્તિ શ્રીહરિની પાછળ આવતા હતા. તેમાં કેટલાંક ભક્તો તો શ્રીહરિના દર્શન માત્રની ઈચ્છાવાળાં હતાં. બીજાં જનો તો ગવેન્દ્ર રાજાએ કરેલા સન્માન જોવાની ઈચ્છાવાળાં હતાં. (૨૪)

નારાયણમુનિ બીજે દિવસે અપરાહ્ન સમયે અનેક રાજાઓનાં શિબિરોની પંક્તિઓમાં મદોન્મત્ત હાથીઓ, ઘોડાઓ-ઊંટો-બળદો, રથો-પાર્ષદોના સમૂહોથી વિંટાયેલા રાજકોટમાં ગયા. (૨૫) ઊંચો જનસમુદાયનો જય જય ધ્વનિ દૂરથી સાંભળીને ભ્રાંતિ પામેલા રાજસમૂહો-સૈનિકો અને પુરના લોકોના સમુદાયોએ ત્યાગ કર્યા છે આસન-ભોજન-શયનાદિ એવા થકા જોવાયેલા, આવેલા શ્રીહરિને જણાવવા માટે રાજાએ પૂર્વે આજ્ઞા આપેલા અનુચરો ગવેન્દ્ર રાજાને કહેવા લાગ્યા. (૨૬) પરમ કરુણાથી આવેલા શ્રીહરિને સાંભળી અતિ હર્ષવાળા, તત્કાળ જ ત્યાગ કર્યા છે બીજાં રાજકાર્યો જેમણે એવા મહાબુદ્ધિશાળી ગવર્નર રાજા તત્કાળ ચાલતા થકા શ્રીહરિની સન્મુખ ગયા. રાજાની પછવાડે સમગ્ર રાજસમૂહ દોડ્યો.(૨૭)

तं धावनोच्छ्वसितफुल्लमुखं नरेन्द्रं हर्षाश्रुनेत्रमवलोक्य हरिश्च यानात् । उत्तीर्य यावदभियाति नृपः स तावत्तत्पादपद्मनिहितात्मशिरा ननाम ॥२८॥ उत्थापितोऽथ हरिणा चिरमाश्लिषत्तं तस्थौ कृताञ्जलिपुटश्च मुखं स पश्यन्। दृग्भ्यां निपेतुरुदबिन्दव उन्मुदोऽस्य साकं हि सद्रिपुमदोद्यममानसौख्यैः॥२९॥ परस्परं सुखप्रश्नं कुर्वन्तौ तावथो जनाः । दृष्ट्वा सर्वे चिरस्निग्धौ सखायाविव मेनिरे॥३०॥ वासस्थानं तदीयेभ्यो दापयित्वाऽथ भूपतिः । तत्करं स्वकरेणैव धृत्वाऽगाच्छिबिरं निजम् ॥३१॥ सामर्षा अपि भूपालास्तत्र ये सङ्गतास्तु ते । विस्मितास्तं नमश्चक्रुर्निर्मदा निरहङ्कृताः ॥३२॥ न्यवीविशद्गवेन्द्रस्तं स्वानीतेऽनर्घ्य आसने। तदीयांश्च मुनीन्नानापीठेषु स यथोचितम् ॥३३॥ देशान्तरागतान् भूपान्निष्कास्य सदसोऽखिलान् । द्वित्रैः साकं स्वकै राजा तदन्तिक उपाविशत् ॥३४॥ दूरस्थितास्तं शतशो नृपालास्तस्यानुगाः शस्त्रभृतश्च सर्वे । नताननाः प्राञ्जलयो विनीताः सत्रासमैक्षन्त हरेः पुरःस्थम् ॥३५॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे राजकूटपुरे भगवतो गवेन्द्रनृपसमागमो नाम पञ्चत्रिंशोऽध्यायः ॥३५॥

सुव्रत उवाच - ततो नारायणं नत्वा बद्धाञ्जलिपुटः स च । उवाच प्रश्रयानम्रो नीतिशास्त्रविशारदः ॥१॥ स्वामिंस्त्वद्दर्शनाज्जातो ममानन्दोऽद्य वै महान् । त्वामहं न्राकृतिच्छन्नमवैमीश्वरमेव हि ॥२॥ ब्रह्माण्डक्षोभकान्कामक्रोधादीनात्मवैरिणः । विजित्योपशमं यायुस्त्वदीयाः कथमन्यथा ॥३॥

---

**નૃપતિરાજ અને મુનિપતિ શ્રીજીમહારાજનું અદ્‌ભુત મિલન :-** ત્વરિત ગતિથી શ્વાસોચ્છ્‌વાસની ગતિથી જેમનું મુખ પ્રફુલ્લિત છે. આનંદનાં આંસુઓ યુક્ત નેત્રવાળા સાર્વભૌમ રાજાને જોઈને શ્રીહરિ શિબિકાથી ઊતરીને જેટલામાં તેમની સન્મુખ જાય છે તેટલામાં તે રાજાએ શ્રીહરિના ચરણકમળમાં મસ્તક મૂકીને શ્રીહરિને નમસ્કાર કર્યા. (૨૮)

પછી શ્રીહરિએ ઉઠાડેલા રાજા શ્રીહરિને લાંબા સમય સુધી ભેટ્યા. બંને હાથ જોડી શ્રીહરિના મુખકમળને સસ્નેહ જોતા ઊભા થયા. અધિક હર્ષવાળા રાજાનાં નેત્રોમાંથી આંસુનાં બિંદુઓ, સત્પુરુષોના શત્રુ જે અસુરગુરુઓ અને રાજાઓ તેમના મદ-ઉદ્યમ-અભિમાન અને સુખોની સાથે પડતાં હતાં. (૨૯)

પછી એકબીજાને સુખના પ્રશ્નો કરતા શ્રીહરિ અને ગવેન્દ્ર બંનેને જોઈને સર્વે જનો તેમને બહુ કાળના સ્નેહી મિત્રોની માફક માનતા હતા. (૩૦) પછી ભૂપતિ, શ્રીહરિના સંતો-બ્રહ્મચારી વગેરેને સેવક દ્વારા નિવાસસ્થાનો અપાવીને શ્રીહરિનો હાથ પોતાના હસ્તથી ગ્રહણ કરીને જ પોતાના નિવાસસ્થાનમાં લઈ ગયા. (૩૧) રાજકોટમાં મળેલા રાજાઓ સર્વે શ્રીહરિના ઉત્કર્ષને સહન નહિ કરનારા હોવા છતાં પણ વિસ્મય પામીને મદ અને અભિમાને રહિત થકા શ્રીહરિને નમસ્કાર કરતા હતા. (૩૨)

રાજાએ પોતે લાવેલા અમૂલ્ય સિંહાસનમાં શ્રીહરિને બેસાડ્યા. શ્રીહરિના સંત-બ્રહ્મચારીઓને યથાયોગ્ય નાના પ્રકારનાં આસનોમાં બેસાડ્યા. (૩૩) ગવેન્દ્ર રાજા દેશાંતરથી આવેલા રાજાઓ અને સમગ્ર નોકરવર્ગને સભાથી બહાર કાઢીને બેત્રણ પોતાના મંત્રીઓની સાથે શ્રીહરિની સમીપમાં બેઠા. (૩૪)

સો એ સો શસ્ત્રધારી રાજાઓ અને ગવર્નર રાજાના સેવકો દૂર પ્રદેશમાં ઊભા રહીને નમેલા મુખવાળા, બંને હાથ જોડી વિનયયુક્ત થકા શ્રીહરિની આગળ બેઠેલા ગવેન્દ્ર રાજાને (ગવાક્ષના અવકાશથી) ભયે સહિત જોતા હતા. (૩૫)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે રાજકૂટપુરે ભગવતો ગવેન્દ્રનૃપસમાગમો નામ પંચત્રિંશોડધ્યાયઃ (૩૫)*

## અધ્યાય : ૩૬

## ગવેન્દ્ર રાજાએ શ્રીહરિનું અતિસન્માન કર્યું અને શ્રીહરિએ તેમને વરદાન આપ્યું અને શ્રીહરિ દુર્ગપુર આવ્યા તે વર્ણવ્યું છે.

**સુવ્રત મુનિ કહે છે :** હે રાજન્ ! પછી નીતિશાસ્ત્રમાં વિશારદ, બંને હાથ જોડી પ્રણયથી નમ્ર અંગવાળા ગવેન્દ્ર રાજા નારાયણને નમસ્કાર કરી બોલ્યા : (૧) હે સ્વામિન્ ! આજે તમારાં દર્શનથી મને ઘણો આનંદ થયો છે. હું તમોને મનુષ્યાકૃતિથી ઢંકાયેલા પરમેશ્વર જાણું છું. (૨) તમો જો ઈશ્વર ના હો તો તમારા આ સાધુઓ બ્રહ્માંડોને ક્ષોભ કરનારા, આત્માના શત્રુઓ કામક્રોધાદિ દોષોને જીતીને સમગ્ર સાંસારિક વિષયોથી ઉપશમને કેમ પામે ? ન જ પામે. (૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

त्वदाश्रितान् सतो ज्ञात्वा सच्छास्त्रोदितलक्षणान् । तद्द्रुहो दाम्भिका दुष्टा असन्तो दण्डिता मया ॥४॥ सद्द्रुहो गुरवो भूपा उच्छेदं प्रापिता मया । क्वचित्क्वचिच्च प्रच्छन्नं वसन्ति भुवि केचन ॥५॥ प्रतापोऽयं तवैवास्ति राजानो यन्मया भुवि । अनायासेन वर्णीन्द्र ! प्रायशः स्ववशीकृताः ॥६॥ चरन्त्वेते यथापूर्वं भुवि जीवहितावहाः । त्वदीयद्रोहिणो घात्या इति मेऽस्ति व्रतं किल ॥७॥ इति क्षोणीपतेर्वाक्यं निशम्य हरिरब्रवीत् । सुज्ञोऽसि भूपते ! सर्वं करोषि न्याय्यमेव हि ॥८॥ धर्मस्य च सतां रक्षा दण्डनं चापि तद्द्रुहाम् । पालनं स्वप्रजानां च धर्मो राज्ञः परो मतः ॥९॥ सद्धर्मरक्षया भूमावुत्कर्षो जायते तव । अधर्माश्रयणादन्ये क्षयं यान्ति च भूमिपाः ॥१०॥ तव किम्पुरुषात् खण्डाद्यदिहागमनं नृप ! । ईशस्यैवेच्छया धर्मगुप्त्यै जातमिति ध्रुवम् ॥११॥ एवमेव हि धर्मेण भवान्वर्तिष्यते यदि । तदा तु सर्वराजेन्द्रश्चक्रवर्ती भविष्यति ॥१२॥ ये ये वृद्धिं गताः पूर्वे भूपाला भुवि विश्रुताः । ते ते संरक्षणेनैव सद्धर्मस्येति विद्धि भोः! ॥१३॥ इति श्रुत्वा हरेर्वाक्यं तं पप्रच्छ स भूपतिः । उपायं श्रेयसः स्वस्य मुमुक्षुर्भवबन्धनात् ॥१४॥ प्राप्तं राज्यसुखं ह्येतत्कृपयैव तवाखिलम् । मयैहिकमथेच्छामि देहान्तेऽपि सुखं परम् ॥१५॥ जीवानां स्वाश्रितानां त्वं संसृतेरसि मोचकः । अतोऽहमपि सम्प्राप्तः शरणं त्वां जगद्गुरो ! ॥१६॥ तस्मान्निःश्रेयसोपायं ब्रूहि मे तव सम्मतम् । येनाञ्जसा विमुच्येय संसृतेरहमापदः ॥१७॥ श्रीनारायणमुनिरुवाच - एतद्व्यवसितं सम्यक् त्वया यद्धितमात्मनः । सच्छास्त्रसम्मतं वच्मि मया यन्निश्चितं नृप ! ॥१८॥ सुखं वैषयिकं यत्तज्जीवैः सर्वत्र लभ्यते । अनादिबन्धमुक्तिस्तु नृदेहेनैव साध्यते ॥१९॥

---

તમારા આશ્રિત સાધુઓને સત્શાસ્ત્રમાં કહેલાં લક્ષણોવાળા જાણીને તેમના દ્રોહી દાંભિક દુષ્ટ સ્વભાવવાળા અસાધુજનોને મેં દંડ આપ્યો છે. (૪) તમારાં આશ્રિત સાધુઓનો દ્રોહ કરનારા ફક્ત નાટકની માફક વેશ કાઢનારા અસાધુઓ અને તેવા પ્રકારના રાજાઓ મેં વિનષ્ટ કર્યા છે. તેમ છતાં જે બાકી રહેલા પૃથ્વીમાં કોઈ સ્થાનોમાં ગુપ્તપણે નિવાસ કરે છે. (૫) હે વર્ણીન્દ્ર ! પૃથ્વીમાં રાજાઓ મેં પ્રયાસ વિના જ ઘણું કરીને પોતાને આધીન કરેલા છે. આ તમારો જ પ્રતાપ છે. (૬) અનેક જીવોનું હિત કરનાર આ સાધુઓ પૃથ્વીમાં પૂર્વની માફક સુખપૂર્વક ફરો કારણ કે 'તમારા દ્રોહીજનો મારે વધ કરવા યોગ્ય છે' એવી મારે પ્રતિજ્ઞા છે જ. (૭) હે રાજન્ ! આવું ગવેન્દ્ર રાજાનું વચન સાંભળી શ્રીહરિ બોલ્યા : હે ભૂપતે ! તમો સુજ્ઞ છો. બધું ન્યાય પ્રમાણે કરો છો. (૮)

**ગવેન્દ્રરાજાને શ્રીહરિનો સદુપદેશ :-** ધર્મ અને સત્પુરુષોની રક્ષા અને તેમનો દ્રોહ કરનારનો દંડ કરવો અને પોતાની પ્રજાઓનું પણ પાલન કરવું એ રાજાઓનો પરમ ધર્મ મુનિઓએ માનેલો છે. (૯) પૃથ્વીમાં સત્પુરુષો અને ધર્મના રક્ષણથી તમારી અભિવૃદ્ધિ થશે. બીજા રાજાઓ તો અધર્મનો આશ્રય કરવાથી વિનાશ પામશે. (૧૦) હે રાજન્ ! કિંપુરુષખંડથી તમારું આ ભારતવર્ષમાં આગમન થયું તે ઈશ્વરની ઈચ્છાથી ધર્મના રક્ષણ માટે જ થયું છે : આ નિશ્ચિત જાણો. (૧૧) તમો જો આ પ્રમાણે ધર્મથી વર્તશો તો સર્વ રાજાઓના અધિપતિ ચક્રવર્તી રાજા થશો. (૧૨)

હે નૃપ ! પૂર્વે પ્રસિદ્ધ જે જે રાજાઓ પૃથ્વીમાં વૃદ્ધિ પામ્યા છે : તે સર્વે, સાધુઓ અને ધર્મનું રક્ષણ કરવાથી જ વૃદ્ધિ પામ્યા છે. આ પ્રકારે જાણો. (૧૩) હે રાજન્ ! આ પ્રકારે શ્રીહરિનું વચન સાંભળી સંસારના બંધનથી મુક્તિ ઈચ્છનાર ગવેન્દ્ર રાજા પોતાના આત્માના કલ્યાણનું સાધન શ્રીહરિને પૂછવા લાગ્યા : (૧૪)

હે સ્વામિન્ ! તમારી કૃપાથી જ આ લોકમાં ભોગવવા યોગ્ય આ સમગ્ર રાજ્યસુખ પ્રાપ્ત થયું છે, હવે દેહ મૂક્યા પછી પણ પરમ સુખ ઈચ્છું છું. (૧૫) હે જગદ્ગુરો ! તમો સ્વાશ્રિત જીવોને સંસારના પાશથી મુકાવો છો. માટે હું પણ તમારા શરણને પામ્યો છું. (૧૬) માટે તમો અસાધારણ મોક્ષનો ઉપાય મને કહો; જેનાથી હું સંસારથી તત્કાળ મુક્ત થાઉં. (૧૭)

**શ્રી નારાયણ મુનિ બોલ્યા :** હે રાજન્ ! તમોએ બુદ્ધિથી સારો નિશ્ચય કર્યો છે, કારણ કે આ નિશ્ચય પોતાના હિતને કરનારો છે. સત્શાસ્ત્રોએ માનેલો; મેં નિશ્ચય કરેલો હું કહું છું. (૧૮) જે વિષય સંબંધી સુખ તે જીવોએ સર્વ પશુ-પક્ષ્યાદિ યોનિઓમાં પણ પમાય છે. અનાદિ સંસારથી મુક્તિ તો મનુષ્યદેહથી જ પમાય છે. (૧૯)

સર્વ પુરુષાર્થ સિદ્ધ કરનાર માટે જ મહાન સુખનું સાધન છતાં ક્ષણમાં નાશ પામનાર મનુષ્ય દેહ દુર્લભ છે.

स त्वस्ति दुर्लभो नूनं क्षणिकश्चार्थसाधकः । अवश्यमेव तन्नाशो भविता नात्र संशयः ॥२०॥ चिन्तामणिसमो यावत्स्ववशे वर्तते स च । सम्पादनीयं सुधिया कल्याणं तावदात्मनः ॥२१॥ भक्तिर्भगवति श्रेयःसाधनं मे मतं परम् । स्वधर्मज्ञानवैराग्यैर्युक्ता कार्या च सा दृढम् ॥२२॥ सच्छास्त्राणां च सर्वेषां सिद्धान्तोऽस्त्ययमेव हि । साङ्गां भक्तिं ततः कृष्णे कुरु मोक्ष्यसि संसृतेः ॥२३॥ एवमुक्तः स हरिणा प्रीतः पप्रच्छ तं पुनः । स्वधर्मज्ञानवैराग्यभक्तीनां लक्षणानि च ॥२४॥ कथयामास भगवांस्ततस्तानपि तत्त्वतः । ततः सोऽतिप्रसन्नस्तं प्रोवाचातिविचक्षणः ॥२५॥ स्वामिंस्त्वमेव भगवान्नराकृतिरसि ध्रुवम् । अतो भक्तिं करिष्यामि तवैवाहं निरन्तरम् ॥२६॥ अद्यप्रभृत्यहं देव ! सकुटुम्बस्तवास्मि हि । इत्युक्त्वा दण्डवद्राजा प्रणनाम तमादरात् ॥२७॥ तमुत्थाप्य हरिः प्राह प्रसन्नोऽस्मि वरं वृणु । इत्युक्तः प्राञ्जली राजा तमुवाचाश्रुलोचनः ॥२८॥ स्वामिनारायण ! हरे ! मुच्येयाखिलदुष्कृतैः । बुद्ध्यबुद्धिकृतैरद्येत्येतत्त्वत्प्रार्थयाम्यहम् ॥२९॥ तस्मै तथास्त्विति वरं दत्त्वा च नियमान् हरिः । उपदिश्य स्वतन्त्रोऽसावुदतिष्ठासदासनात् ॥३०॥ उपहारान्समानीय स तावन्मन्त्रिभिः सह । चकारास्य महापूजां मुनीनां चातिभावतः ॥३१॥ अनर्घ्यैर्वसनै रम्यैः पौष्पैर्हारैश्च शेखरैः । हैमैर्विभूषणैः पूगताम्बूलादिभिरार्चिचत् ॥३२॥ ततः स्थितं प्राञ्जलिं तमाज्ञाप्य हरिराययौ । तेनानुयातः स्वावासं तं निवर्त्य बलात्पथि ॥३३॥ विस्मयं परमं प्राप्तास्तद्द्विषोऽपि नृपास्तदा । त्यक्तमानाः प्रणेमुस्तं पथि सङ्गत्य यूथशः ॥३४॥ गवेन्द्रः प्राह सर्वांस्तान् सद आहूय भूपतीन् । नारायणमुनिर्मान्यः सर्वैस्तत्साधवोऽपि च ॥३५॥ यः करिष्यति तद्द्रोहं स मे घात्यो न संशयः । इत्युक्तास्तेऽपि तद्वाक्यं शिरसा जगृहुर्नताः ॥३६॥

---

મનુષ્યદેહનો વિનાશ તો અવશ્ય થશે જ; આમાં સંશય નથી. (૨૦) ચિંતામણિ સમાન મનુષ્યદેહ જ્યાં સુધી પોતાને વશ વર્તે છે ત્યાં સુધી બુદ્ધિમાન પુરુષે પોતાનું શ્રેય સંપાદન કરવું. (૨૧) શ્રી પરમાત્મામાં ભક્તિ છે તે સર્વોત્તમ કલ્યાણનું સાધન મેં માનેલું છે. તે ભક્તિ સ્વધર્મ-જ્ઞાન-વૈરાગ્યે સહિત જ દૃઢ થાય તેમ કરવી. (૨૨) સમગ્ર શાસ્ત્રનો સિદ્ધાંત આ મેં કહ્યો તે જ છે. માટે પરમાત્મામાં અંગે સહિત ભક્તિ કરો તેનાથી મોક્ષ પામશો. (૨૩)

હે રાજન્ ! આ પ્રમાણે શ્રીહરિએ કહેલા ગવેન્દ્ર રાજા પ્રસન્ન થઈને ફરીથી સ્વધર્મ-જ્ઞાન-વૈરાગ્ય અને ભક્તિનાં લક્ષણો પૂછવા લાગ્યા. (૨૪) પછી ભગવાન શ્રીહરિ સ્વધર્માદિનાં લક્ષણો પણ યથાર્થપણે કહેવા લાગ્યા. પછી અતિ વિચક્ષણ ગવેન્દ્ર નૃપ અતિ પ્રસન્ન થઈ શ્રીહરિને કહેવા લાગ્યા : (૨૫) હે સ્વામિન્ ! તમો જ મનુષ્યાકૃતિ શ્રીકૃષ્ણ પરમાત્મા જ છો. માટે હું નિરંતર તમારી જ ભક્તિ કરીશ. (૨૬) હે દિવ્યમૂર્તિ ! પરિવારે સહિત હું આજથી તમારો જ છું. હે રાજન્ ! ગવેન્દ્ર રાજાએ આ પ્રમાણે કહીને શ્રીહરિને શ્રદ્ધાપૂર્વક દંડવત્ પ્રણામ કર્યા. (૨૭)

શ્રીહરિ ગવેન્દ્ર રાજાને ઉઠાડીને બોલ્યા : હે નૃપતે ! હું પ્રસન્ન છું. મારી પાસે વર માગો. હે રાજન્ ! આ પ્રમાણે શ્રીહરિએ કહેલા ગવેન્દ્ર રાજા આનંદનાં અશ્રુ નેત્રમાં જેને છે એવા સતા બંને હાથ જોડી શ્રીહરિને કહેવા લાગ્યા : (૨૮) હે સ્વામિનારાયણ! હે હરે ! હું જાણ્યે અથવા અજાણ્યે આચરણ કરેલાં સમગ્ર પાપોથી આજે જ મુક્ત થાઉં એ તમારી પાસે યાચના કરું છું. (૨૯)

હે રાજન્ ! આ પ્રમાણે વર માગતા ગવેન્દ્ર રાજાને શ્રીહરિએ 'તમે જેમ કહો છો તે પ્રમાણે થાઓ' : આવો વર આપી અહિંસાદિ યમોનો તેમને ઉપદેશ આપી સ્વતંત્ર શ્રીહરિએ આસનથી ઊઠવા ઈચ્છા કરી. (૩૦) તે સમયે ગવેન્દ્ર રાજાએ મહાવસ્ત્રાદિ ઉપહારોને લાવીને મંત્રીઓ સહિત અતિભાવથી શ્રીહરિની મહાપૂજા કરી. પછી શ્રીહરિના અનુગામી મુક્તાનંદાદિ સાધુઓની પૂજા કરી. (૩૧) અમૂલ્ય અતિસુંદર વસ્ત્રો, પુષ્પના હાર-તોરાઓ, સોનાનાં અલંકારો, કડાં, સાંકળાં વગેરેથી ગવેન્દ્ર રાજા શ્રીહરિને પૂજતા હતા. (૩૨)

પછી બંને હાથ જોડી ઊભા રહેલા ગવેન્દ્ર રાજાને પૂછીને શ્રીહરિ ગવેન્દ્ર રાજાએ અનુગમન કરાયેલા, માર્ગમાં ગવેન્દ્ર રાજાને બળપૂર્વક પાછા વાળીને પોતાના નિવાસમાં ગયા. (૩૩) તે સમયે શ્રીહરિનો દ્વેષ કરનારા અસુર રાજાઓ પણ આશ્ચર્ય પામીને અભિમાનનો ત્યાગ કરીને માર્ગમાં ભેગા થઈ શ્રીહરિને મળીને પ્રણામ કરતા હતા. (૩૪)

**ખંડિયા રાજાઓને ગવર્નર રાજાનો નિયમન-હુકમ :-** ગવેન્દ્ર રાજા તે સર્વ રાજાઓને સભામાં બોલાવી કહેવા લાગ્યા : 'હે રાજાઓ ! સર્વ તમોએ નારાયણ મુનિને માનવા તથા તેમના સાધુઓને પણ માનવા. (૩૫) જે કોઈ રાજા વગેરે શ્રી નારાયણ મુનિ અને તેમના સંતોનો દ્રોહ કરશે તે મારે હણવો એમાં સંશય નથી.' હે રાજન્ ! આ પ્રમાણે ગવેન્દ્ર રાજાએ કહેલા રાજાઓ પણ નમીને તેમના વચનને મસ્તકથી ગ્રહણ કરતા હતા. (૩૬)

तत आरभ्य भुव्यासीद्ग्रामे ग्रामे पुरे पुरे । नारायणमुनिर्मान्यः सर्वैरित्येव घोषणा ॥३७॥ नृपानुगकृतातिथ्य उषित्वा तत्र तां निशाम् । प्रातर्दुर्गपुरं स्वामी गन्तुमैच्छन्नराधिप ! ॥३८॥ स्वसेवानिरतं स्वामी नृपामात्यमथाब्रवीत् । राज्ञे निवेदयामात्य! शीघ्रं जिगमिषां मम ॥३९॥ ततस्तूर्णमुपेत्यासौ भूपतिं प्राह तद्वचः । सोऽपि स्वतन्त्रं तं जानंस्तदन्तिकमगाद्द्रुतम् ॥४०॥ भगवन्तं प्रणम्यासौ तेन सम्मानितोऽस्मयः । गमनोद्यममालक्ष्य तस्य प्राञ्जलिरब्रवीत् ॥४१॥ महाननुग्रहः स्वामिंस्त्वयाऽतिकृपया मम । कृतो मया नृदेहस्य साफल्यं प्राप्तमेव हि ॥४२॥ त्वां रक्षितुमिहेच्छा मे हृद्यासीद्दिनपञ्चकम्। त्वं त्वद्यैवोद्यतो गन्तुं स्वतन्त्रं को निवारयेत् ॥४३॥ श्रीनारायणमुनिरुवाच – त्वयास्मत्साधवो राजन्साधुलक्ष्मविदा यदा । रक्षिता दुष्टभूपालदेशिकादिकृतार्दनात् ॥४४॥ ततःप्रभृति मे प्रीतिस्त्वय्यासीदथ साम्प्रतम् । निश्छद्मभक्तिमालोक्य भृशं प्रीतोऽस्मि सानुगः ॥४५॥ त्वद्भक्तिवशतोऽत्राहं वसेयं द्वित्रवासरान् । किन्तु दुर्गपुरे भक्ता आयाताः सन्ति दूरतः ॥४६॥ साधुसन्तर्पणादीनि तेषां कार्याणि सन्ति हि । तथापि त्वत्प्रीतिवशादिहाहं सद्य आगतः ॥४७॥ आवयोर्मेलनं जातं सिद्धस्तव मनोरथः । तद्भक्ततुष्ट्यै त्वधुना गमने क्रियते त्वरा ॥४८॥ धर्मेण पालयेरुर्वीं रक्षेः साधूंश्च भूसुरान् । दुर्बलेषु दयां कुर्या यामि दुर्गपुरे नृप ! ॥४९॥ राजोवाच – यद्येवमेव कर्तव्यं तव तर्हि कृपां मयि । कृत्वा भुञ्जिं विधायैव सानुगो गन्तुमर्हसि ॥५०॥ सुव्रत उवाच – एवमुक्तः स भगवांस्तथेत्याहाथ भूपतिः । पाकं विधापयामास यथायोग्यं चतुर्विधम् ॥५१॥ तत्प्रीतये हरिः सम्यग्भोजयित्वाखिलान्निजान् । स्वयं च भुक्त्वा गमनेऽपराह्णे सज्ज आस सः ॥५२॥

---

ત્યારથી આરંભીને પૃથ્વીમાં દરેક ગામમાં અને દરેક નગરોમાં 'રાજાદિ સર્વજનોએ નારાયણ મુનિને માનવા' આ પ્રકારની ઘોષણા (સર્વત્ર વાર્તાની પ્રવૃત્તિ) થઈ. (૩૭) હે રાજન્ ! ગવેન્દ્ર રાજાના અમાત્યો વગેરેથી આતિથ્યસત્કાર કરાયેલા નારાયણ મુનિ રાજકોટમાં રાત્રિ રહીને પ્રાતઃકાળમાં ગઢપુર જવાની ઈચ્છા કરતા હતા. (૩૮) પછી શ્રીહરિએ પોતાની સેવામાં રહેલા રાજાના અમાત્યને કહ્યું, હે અમાત્ય, મારે તત્કાળ જવાની ઈચ્છા છે. ગવેન્દ્ર રાજાને નિવેદન કરો. (૩૯)

હે રાજન્ ! પછી અમાત્યે તત્કાળ ગવેન્દ્ર રાજાને શ્રીહરિનું વચન કહ્યું. તે રાજા પણ શ્રીહરિને સ્વતંત્ર જાણીને તત્કાળ શ્રીહરિની સમીપમાં આવ્યા. (૪૦) ગવેન્દ્ર રાજા શ્રીહરિને પ્રણામ કરી શ્રીહરિએ સત્કાર કરાયેલા, ગર્વ રહિત થઈ શ્રીહરિને જવા માટે ઉદ્યમવાળા જોઈને બંને હાથ જોડીને બોલ્યા : (૪૧) હે સ્વામિન્ ! તમોએ અતિ કરુણા કરી મહાઅનુગ્રહ કર્યો અને તેનાથી મનુષ્યજન્મનું સફળપણું પામેલો છું. (૪૨) હે હરે ! આ પુરમાં તમોને પાંચ દિવસ સુધી રાખવાની મારા હૃદયમાં ઈચ્છા હતી. તમે તો આજે જ જવા તત્પર છો. સ્વતંત્ર તમોને કોણ રોકે ? (૪૩)

શ્રી નારાયણ મુનિ બોલ્યા : હે રાજન્ ! સાધુનાં લક્ષણોને જાણનારા તમોએ જ્યારથી મારા આશ્રિત સાધુઓને દુર્જન ખંડિયા રાજાઓએ તથા અધર્મી ગુરૂઓ વગેરેએ કરેલી પીડાથી રક્ષણ કરાયેલા છે ત્યારથી આરંભીને તમારી ઉપર મારે પ્રસન્નતા હતી અને હાલમાં મારે વિષે તમારો કપટ રહિત ભાવ જોઈને મુનિઓએ સહિત અત્યંત પ્રસન્ન થયેલો છું. (૪૪-૪૫) હું તમારી ભક્તિને વશ થઈ આ પુરમાં બે ત્રણ દિવસ નિવાસ કરત પરંતુ મારા સેવકો દૂર દેશથી ગઢપુરમાં આવેલા છે. (૪૬) તે ભક્તોને સાધુ ભોજનાદિ ઘણાં કામ કરવાનાં છે તો પણ હું તમારી પ્રીતિના વશપણાથી આ પુરમાં તત્કાળ આવેલો છું. (૪૭) તમારો અને મારો સમાગમ થયો. તમારો મનોરથ સિદ્ધ થયો. હાલમાં જવાની ઉતાવળ તો દૂર દેશથી આવેલા ભક્તજનોને સાધુ ભોજનાદિથી સંતોષ માટે છે. (૪૮) હે રાજેન્દ્ર ! તમો વસુંધરાને ધર્મથી પાલન કરો. સાધુઓ અને બ્રાહ્મણોનું રક્ષણ કરો. દીનજનો ઉપર દયા કરો. હું દુર્ગપુરમાં જાઉં છું. (૪૯)

રાજા બોલ્યા : હે હરે ! જો તમારે અવશ્ય જ જવાનું હોય તો મારા ઉપર કૃપા કરી સંતમંડળે સહિત તમો ભોજન કરીને જ જવા માટે યોગ્ય છો. (૫૦) હે રાજન્ ! આ પ્રમાણે ગવેન્દ્ર રાજાએ કહેલા શ્રીહરિએ કહ્યું કે 'તમો કહો છો તે પ્રમાણે થાઓ.' પછી ગવેન્દ્ર રાજા યથાયોગ્ય ચાર પ્રકારનાં ભોજન કરાવતા હતા. (૫૧)

શ્રીહરિ તેમની પ્રસન્નતા માટે સમગ્ર પોતાના આશ્રિત બ્રહ્મચારી સાધુ વગેરેને સારી રીતે ભોજન કરાવીને તથા પોતે પણ પોતાને હાથે રસોઈ કરી શ્રીકૃષ્ણને નિવેદન કરી ભોજન કરી સાંજના પહોરે ચાલવા માટે તૈયાર થયા. (૫૨) પોતાના



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

स्वावासतो निर्गतमश्वसंस्थं तमन्वगाद्भूमिपतिः ससैन्यः । विचित्रवादित्रनिनादिताशो देशान्तरीयक्षितिपानुयातः ॥५३॥ दूरागतं तं स निवर्त्य कृष्णो बलादनिच्छन्तमपि स्वभक्तम् । साकं निजैर्वर्णिमुखैः प्रसन्नः समाययौ दुर्गपुरं नरेन्द्र ! ॥५४॥ प्रत्युद्गतः पौरजनैः सभूपैर्वादित्रगीतैः सह भूपसद्म । उपेत्य तत्रावसदात्मतन्त्र आनन्दयन्स्वाश्रितजीवजातम् ॥५५॥ देशान्तरगतान् सर्वान् मुनीनाहूय सर्वतः । सभायामाह तान्सर्वं वृत्तं तद्राजकूटजम् ॥५६॥ श्रीहरिरुवाच – **श्रीकृष्णेन नृपद्वारा ह्युच्छेदः पापकर्मणाम् । असुराणां कृतो नृणां भुवि युष्मद्द्रुहां खलु ॥५७॥ अतो यूयं यथापूर्वं सम्प्रदायानुसारतः । धृतवेषाः सुखेनैव भूमौ विचरतानघाः ! ॥५८॥ इत्युक्तास्ते मुदं प्रापुश्चावर्तन्त यथा पुरा । प्रतापं तत्तु तस्यैव विदन्तो दृढनिश्चयाः॥५९॥ हर्याज्ञयाऽथ व्रजत उषित्वा दिनपञ्चकम् । मुनींस्तान्वासयामास मासं तत्राभयो नृपः ॥६०॥ विक्रमार्कशकस्याब्दे वेदाङ्गवसुभूमिते । वर्तमाने तपोमासे हरेश्चरितमित्यभूत् ॥६१॥ एवं स धर्मप्रतिपक्षशान्तिं विधाप्य नारायण ऊर्जितश्रीः । उवास साकं मुनिभिः समेतैस्तत्रैव धर्मप्रिय आप्तकामः ॥६२॥ महाप्रतापस्य हरेश्चरित्रं यः कीर्तयेद्वा शृणुयादपीदम् । प्राप्नोति सर्वत्र जयं स नूनं तस्य प्रसादाच्च पुमर्थसिद्धिम् ॥६३॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे भगवत्कृतगवेन्द्रवरप्रदान – दुर्गपुरप्रत्यागमननिरूपणनामा षट्त्रिंशोऽध्यायः ॥३६॥

---

નિવાસસ્થાનમાંથી નીકળેલા, ઘોડા ઉપર બેઠેલા શ્રીહરિને ગવેન્દ્રરાજા સૈન્યે સહિત નાના પ્રકારનાં વાજિંત્રોના ધ્વનિઓથી દિશાઓ ગજાવી છે જેણે એવા થકા દેશાંતરથી આવેલા ખંડિયા રાજાઓથી અનુગમન કરાયેલા સતા પછવાડે ચાલ્યા. (૫૩)

હે નરેન્દ્ર ! **શ્રીહરિ** દૂર દેશપર્યન્ત પછવાડે આવતા પોતાના ભક્ત એવા પાછા વળવા નહિ ઈચ્છતા ગવેન્દ્ર રાજાને બળાત્કારે પાછા વાળીને પ્રસન્ન થઈ વર્ણિ વગેરે પોતાના ભક્તો સાથે ગઢપુરમાં આવ્યા. (૫૪)

અભયરાજાએ સહિત પુરનાં જનો વાજિંત્રો વગાડવાપૂર્વક ગાવા યોગ્ય કીર્તનોની સાથે જેમની સામે ગયેલા છે એવા સ્વતંત્ર શ્રીહરિ અભયરાજાના ભવનમાં જઈને પોતાના આશ્રિત પ્રાણીસમુદાયને આનંદ આપતા થકા અભયરાજાના ઘરમાં નિવાસ કરતા હતા. (૫૫) શ્રીહરિ દેશાંતરથી આવેલા સર્વ મુનિઓને સર્વ દેશોમાંથી બોલાવીને સભામાં તે સર્વ મુનિઓને રાજકોટમાં થયેલું સર્વ વૃત્તાંત કહેવા લાગ્યા : (૫૬)

**શ્રીહરિ કહે છે** : હે મુનિઓ !, પૃથ્વીમાં પાપકર્મવાળા, તમોને પીડા પમાડનાર અસુરોનો વિનાશ ભગવાને ગવેન્દ્ર રાજા દ્વારા નિશ્ચે કરેલો છે. (૫૭) હે નિષ્પાપો ! માટે તમો પૂર્વની માફક સંપ્રદાયને અનુસારે ચાંદલા સહિત ઊર્ધ્વપુંડ્ર તિલક, તુલસીની બેવડી કંઠી કંઠમાં ધારણ કરવી વગેરે વૈષ્ણવનો વેશ ધારણ કરી પૃથ્વીમાં સુખેથી ફરો. (૫૮)

હે રાજન્, આ પ્રકારે શ્રીહરિએ કહેલા મુનિઓ હર્ષ પામ્યા અને તે પ્રતાપ તો શ્રીહરિનો જ જાણતા દૃઢ નિશ્ચયવાળા થઈને પૂર્વની માફક ઉદ્ધવ સંપ્રદાયનાં ઊર્ધ્વપુંડ્ર તિલક વગેરે ધારણ કરીને વર્તતા હતા. (૫૯) પછી પાંચ દિવસ શ્રીહરિની સમીપમાં નિવાસ કરી શ્રીહરિની આજ્ઞાથી દેશાંતરમાં જતા મુનિઓને અભયરાજા શ્રીહરિની પ્રાર્થના કરી દુર્ગપત્તનમાં એક માસ પર્યંત નિવાસ કરાવતા હતા. (૬૦)

સંવત્ ૧૮૬૪ની સાલમાં માઘ માસમાં રાજકોટ ગયા તે શ્રીહરિનું ચરિત્ર થયું. (૬૧) અતિશય પ્રતાપરૂપી લક્ષ્મીવાળા ધર્મપ્રિય પૂર્ણકામ-નારાયણમુનિ આવી રીતે ધર્મના દ્રોહી અસુરાંશ ગુરુ તથા રાજા વગેરેની શાંતિ ગવેન્દ્ર રાજા દ્વારા કરાવી મુનિઓની સાથે દુર્ગપત્તનમાં જ નિવાસ કરતા હતા. (૬૨)

મહા પ્રતાપી શ્રીહરિનું આ ચરિત્ર જે ભક્તજન ગાન કરે અથવા સાંભળે, તો પણ તે ભક્તજન શ્રીહરિની પ્રસન્નતાથી સર્વ દેશ કાળાદિના પણ શત્રુઓથી વિજય પામે અને ધર્મ-અર્થ-કામ અને મોક્ષરૂપી પુરુષાર્થની સિદ્ધિ નિશ્ચે પામે છે. (૬૩) *ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે ભગવત્કૃત ગવેન્દ્રવરપ્રદાન – દુર્ગપુરપ્રત્યાગમન-નિરૂપણનામા ષટ્ત્રિંશોऽધ્યાયઃ (૩૬)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच - **एकादश्यां शुक्लपक्षे तपस्यस्य हरिर्नृप ! । कृताह्निकश्चकाराथ कृष्णपूजामहोत्सवम् ॥१॥ सभामकारयदथाभयराजालयाङ्गणे । तत्रोपविष्टा अभवन् यथार्हं वैष्णवा निशि ॥२॥ तन्मध्य उच्चपीठस्थः स्वामी स शुशुभे स्वयम् । तारामण्डलमध्यस्थः शारदेन्दुरिवाम्बरे ॥३॥ पृथक् पृथक् तमर्चन्तस्त्यागिनो गृहिणस्तथा । चक्रुर्जागरणं भक्ताः कृष्णसङ्कीर्तनादिभिः ॥४॥ तदैक आयाद्विप्रेन्द्रः शिवरामाभिधः सुधीः । शर्वाणीग्रामवसतिर्मुमुक्षुर्धार्मिकः कविः ॥५॥ सौवीरदेशभूपेन हरिसिंहाभिधेन च । प्रेषितः स्वामिनस्तस्य ज्ञात्यध्वादिबुभुत्सुना ॥६॥ तं तदीयांश्च नत्वाऽसौ मानितस्तेन सादरम् । पृष्टश्चागमने हेतुमुपविष्टोऽब्रवीद्द्विजः ॥७॥ स्वामिन् ! सौवीरभूपस्त्वां स्तूयमानं जनैर्भुवि । कैश्चित्कैश्चिन्निन्द्यमानं नूतनाध्वप्रवर्तकम् ॥८॥ श्रुत्वा साश्चर्यचित्तोऽसौ तद्याथार्थ्यबुभुत्सया । द्रुतं मां प्रेषयद्विप्रं निकषा त्वां निजाश्रितम् ॥९॥ सोऽहं त्वां तावकीनांश्च दृष्ट्वैवाद्य सतोऽखिलान् । गतासन्मार्गशङ्कस्त्वां तत्प्रश्नान्वच्मि सत्पते ! ॥१०॥ को ? देशो जन्मभूः का ? ते को ? ज्ञातिर्जनकश्च कः ? । को ? वेदः का ? च शाखा किं ? गोत्रं च प्रवराः कति ? ॥११॥ कः ? सम्प्रदायस्तव को ? विष्णुदीक्षाप्रदो गुरुः । किं ? च शास्त्रमभीष्टं ते भक्तिर्भवति कीदृशी ? ॥१२॥ अर्च्यन्ते बहवो देवाः स्थाप्यन्ते च त्वदाश्रितैः । तत्रेष्टः कोऽस्ति ? वोऽन्ये च मान्यन्ते केन हेतुना ? ॥१३॥ का ? देवी सम्प्रदायेऽथ भवदीयेऽस्ति मालिका । कीदृशी ? कण्ठधार्योक्ता तिलकं चास्ति कीदृशम् ? ॥१४॥ साधवो भवदीया ये**

## અધ્યાય : ૩૭

### શ્રીહરિએ શિવરામ બ્રાહ્મણ પ્રત્યે ઉદ્ધવ સંપ્રદાયનું પ્રકાશન સારી રીતે કર્યું તેનું નિરૂપણ છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! શ્રીહરિ ફાગણ સુદી ૧૧ એકાદશીને દિવસે આહ્નિકવિધિ કરી શ્રીહરિકૃષ્ણની પૂજાનો મહોત્સવ કરતા હતા. (૧) ત્યાર પછી શ્રીહરિએ અભય રાજાના ભવનના ચોકમાં રાત્રિને સમયે સભા કરાવી. તે સભામાં શ્રીહરિનાં આશ્રિત ભક્તજનો યથાયોગ્ય બેઠાં હતાં. (૨) તેના મધ્યમાં ઊંચા સિંહાસન પર બેઠેલા પોતે શ્રીહરિ આકાશમાં તારામંડળના મધ્યમાં શરદઋતુના ચંદ્રમાની માફક શોભતા હતા. (૩) ત્યાગીઓ અને ગૃહસ્થ ભક્તો શ્રીહરિની અલગ અલગ પૂજા કરતા સતા શ્રીકૃષ્ણનાં કીર્તનો ગાવાં વગેરેથી તથા તેમની કથાશ્રવણાદિથી જાગરણ કરતા હતા. (૪) તે સમયે બુદ્ધિમાન, શિયાણી ગામના નિવાસી મુમુક્ષુ, સ્વધર્મમાં દૃઢ સ્થિતિવાળા, કવિ શિવરામ નામના એક ઉત્તમ બ્રાહ્મણ ત્યાં આવ્યા. (૫)

જેમને પ્રસિદ્ધ પ્રતાપવાળા શ્રીહરિકૃષ્ણ ભગવાનની જ્ઞાતિ અને સંપ્રદાય વગેરે જાણવાની ઈચ્છાવાળા, હરિસિંહ નામના સૌવીર દેશના રાજાએ મોકલેલા હતા. (૬) આ શિવરામ ભટ્ટ, શ્રીહરિને તથા તેમના આશ્રિત સાધુઓને પ્રણામ કરી શ્રીહરિએ આદરપૂર્વક સત્કાર કરાયેલા સભામાં બેઠા. શ્રીહરિએ આવવાનું કારણ પૂછતા બોલ્યા : (૭)

હે સ્વામિન્ ! સૌવીર દેશના રાજા હરિસિંહજીએ પૃથ્વીમાં કેટલાંક માણસોએ સ્તુતિ કરાતા અને કેટલાંક જનોએ નિન્દા કરાયેલા નવીન સંપ્રદાયના પ્રવર્તક તમોને સાંભળી આશ્ચર્ય મનવાળા આ રાજાએ તેમની સ્તુતિ-પ્રાર્થના વગેરેનું યથાર્થપણું જાણવાની ઈચ્છાથી પોતાના આશ્રિત બ્રાહ્મણ એવા મને તમારી સમીપે તત્કાળ મોકલ્યો છે. (૮-૯) હે સત્પતે ! તેમણે મોકલેલો હું હાલમાં તમોને તથા તમારા સમગ્ર સંતોને જોઈને જ નિવૃત્ત થઈ છે અસત્ સંપ્રદાયની શંકા જેને એવો હું, તમોને તે રાજાએ પુછાવેલા પ્રશ્નો કહું છું. (૧૦)

હે સ્વામિન્, તમારો દેશ કયો છે ? તમારું જન્મસ્થાન ક્યાં છે ? તમારી જ્ઞાતિ કઈ છે ? તમારા પિતા કોણ છે ? તમારો વેદ કયો છે ? તમારી શાખા કઈ ? શાખાના પ્રવર્તક ઋષિ કોણ છે ? તમારું ગોત્ર શું છે ? તમારા ગોત્રના પ્રવર્તક ઋષિ કોણ ? તમારા પ્રવરના ઋષિઓ કેટલા છે ? (૧૧) તમારા સંપ્રદાયનું નામ શું છે ? તમોને વિષ્ણુદીક્ષાના આપનાર ગુરુ કોણ ? તમારે અભીષ્ટ શાસ્ત્રનું નામ શું છે ? તમારે ભગવાનના ભજનનો પ્રકાર કોના જેવો છે ? (૧૨) તમારા આશ્રિતોએ ઘણા દેવતાઓ પૂજાય છે અને દરેક મંદિરમાં સ્થાપના કરાય છે તે દેવોમાં તમારે ઈષ્ટદેવપણે માનેલા દેવ કોણ છે ? અને કયા કારણથી માનો છો ? (૧૩) અને તમારા સંપ્રદાયમાં દેવીનું નામ શું છે ? કંઠમાં ધારણ કરવા યોગ્ય માળા કયા પ્રકારની છે ? તિલક કયા પ્રકારનું છે ? (૧૪) લોકોમાં વૈરાગી વગેરે જે સાધુઓ છે તેનાથી ભિન્ન પ્રકારના



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

लोकसाधुविलक्षणाः । कथं ? परमहंसाख्या उच्यन्ते भवदाश्रितैः ॥१५॥ एते प्रश्नाः प्रभो ! राज्ञः सन्ति तस्य बुभुत्सतः। यथावदुत्तरं तेषां कृपया वक्तुमर्हसि ॥१६॥ सुव्रत उवाच – इत्थं स तेन सम्पृष्टो राजप्रश्नान्महामुनिः । ऊचे तदुत्तरं तथ्यं कुर्वन् स्वानप्यसंशयान् ॥१७॥ श्रीनारायणमुनिरुवाच – कोसलेषूत्तरेष्वस्ति नाम्नाऽयोध्यापुरी द्विज ! । योजनद्वितये तस्या ग्रामोऽस्ति छुप्पया उदक् ॥१८॥ स मेऽस्ति जन्मभूस्तत्र बभूव ब्राह्मणोत्तमः । नाम्ना हरिप्रसादश्च सारवज्ञातिविश्रुतः ॥१९॥ सुरनेतृनराधीशकुलपूज्यपदाम्बुजः । पण्डितोपाभिधः प्राज्ञो धर्मकीर्तिरुदारधीः ॥२०॥ स मे पिताऽथ सावर्णिर्गोत्रर्षिः प्रवरास्त्रयः । भार्गवो वैतहव्यश्च सावेतस इति श्रुताः ॥२१॥ वेदः सामाभिधो मेऽस्ति शाखा भवति कौथुमी । नीलकण्ठ इति प्राहुर्नाम्ना मां जनकादयः ॥२२॥ समागमं सतामेव बाल्येऽप्याचरमन्वहम् । भृशारुचिरसत्सङ्गे बालक्रीडनकेषु च ॥२३॥ उपनीतोऽष्टमे वर्षे पित्राऽहं जन्मतो द्विज ! । ब्रह्मचर्यव्रतं प्रीत्या पालयामि स्म चाञ्जसा ॥२४॥ प्राचीनसंस्कारवशान्महतां च प्रसादतः । कृष्णे भक्तिः साहजिकी ममासीद्धृदयेऽमला ॥२५॥ श्रीमद्भागवतादीनि पुराणान्यथ शृण्वतः। साक्षात्कृष्णदिदृक्षा मे ह्यासीच्चारुचिर्गृहे ॥२६॥ ततोऽहं तीव्रवैराग्यो हित्वा गेहं सदैहिकम् । पर्यव्रजमरण्यार्नी साक्षात्कृष्णेक्षणोत्सुकः ॥२७॥ श्रीमुक्तनाथमुख्यानि पुण्यक्षेत्राणि भूतले । एकाकी व्यचरं कृष्णदर्शनं मार्गयन् गुरुम् ॥२८॥

---

જે તમારા સાધુઓને તમારા આશ્રિતો પરમહંસ નામવાળા કયા કારણથી કહે છે ? (૧૫) હે પ્રભો ! આ મેં કહેલા અઢાર પ્રશ્નોના ઉત્તરો હરિસિંહ નામના રાજા જાણવા ઈચ્છે છે. તેના પ્રત્યુત્તરો યથાર્થપણે કૃપા કરી કહેવા માટે યોગ્ય છો. (૧૬)

**સુવ્રતમુનિ કહે છે** : હે રાજન્ ! શિવરામ બ્રાહ્મણે આ પ્રકારે રાજાના પ્રશ્નને પુછાયેલા, સમગ્ર મુનિઓના સ્વામી શ્રી નારાયણ મુનિ પોતાના ભક્તજનોને પણ સંશય રહિત કરતા તેના સત્ય ઉત્તરો કરવા લાગ્યા : (૧૭)

**શ્રીનારાયણમુનિ બોલ્યા** : હે વિપ્ર ! ઉત્તર કોસલ દેશમાં અયોધ્યા નામની પુરી છે તેનાથી ઉત્તર દિશામાં આઠ કોશ દૂર છપૈયા નામે ગામ છે. (૧૮) તે છપૈયા ગામ મારું જન્મસ્થાન છે. તેમાં રહેલા વિપ્રવર્ય નામથી હરિપ્રસાદ, સરવૈયા જ્ઞાતિના બ્રાહ્મણોમાં શ્રેષ્ઠપણે પ્રસિદ્ધ હતા. (૧૯) તેઓ સુરનેતા નામવાળા જે રાજા, તેના કુળના પૂજ્ય ચરણકમળ જેનાં છે એવા, ઉદાર બુદ્ધિવાળા, પંડિત (પાંડે) આ પ્રકારે ઉપનામ (અવટંક)વાળા-બુદ્ધિશાળી-ધર્મરૂપ કીર્તિવાળા, અતિશય ધર્મનું પાલન કરવાથી સાક્ષાત્ **ધર્મદેવ** આ પ્રકારના નામથી લોકો બોલાવતા હતા એવા હરિપ્રસાદ શર્મા (તેમનું મૂળનામ) તે મારા પિતા છે. અને સાવર્ણી નામના ઋષિ ગોત્રપ્રવર્તક છે. ભાર્ગવ-વૈતહવ્ય અને સાવેતસ એ ત્રણ પ્રસિદ્ધ પ્રવર ઋષિઓ છે. (૨૦-૨૧) મારો વેદ સામ છે. મારી શાખા કૌથુમી છે. શાખા પ્રવર્તક ઋષિ કૌથુમ ઋષિ છે. મારા પિતા વગેરે મને **નીલકંઠ** નામથી બોલાવતા હતા. (૨૨)

[પોતે સાક્ષાત્ શ્રીવાસુદેવ ભગવાન હોવા છતાં પણ મનુષ્યનાટ્ય કરતા શ્રીહરિ પોતાના સ્વરૂપને નહિ જાણનાર વિપ્રને પોતાને વિષે સ્નેહ કરાવતા, પોતાના ગુરુનો મહિમા કહેવા માટે કહે છે :] હે વિપ્ર ! બાલ્યાવસ્થામાં પણ અસત્પુરુષના સંગમાં અને બાલોચિત ક્રીડાઓમાં મને અરુચિ વર્તતી હતી. સાધુપુરુષોનો જ સમાગમ કરતો હતો. (૨૩)

હે વિપ્ર ! જન્મથી આરંભીને આઠમે વર્ષે પિતાએ મને ઉપનયનસંસ્કાર આપ્યો હતો. હું પ્રીતિપૂર્વક તત્ત્વથી બ્રહ્મચર્યવ્રતનું પાલન કરતો હતો. (૨૪) પ્રાચીન સંસ્કારના વશથી અને સત્પુરુષોના અનુગ્રહથી મારા મનમાં નિર્મળ, સ્વભાવસિદ્ધ શ્રીકૃષ્ણ ભગવાનમાં અત્યંત પ્રેમે સહિત નવ પ્રકારની ભક્તિ હતી. (૨૫)

પછી શ્રીમદ્ ભાગવતાદિ પુરાણોને સાંભળનાર મારા મનમાં પ્રત્યક્ષ શ્રીકૃષ્ણના દર્શનની ઈચ્છા અને પોતાના ભવનમાં અરુચિ થઈ હતી. (૨૬) પછી તીવ્ર વૈરાગ્યવાળો હું સાક્ષાત્ કૃષ્ણના દર્શનમાં ઉત્સાહવાળો દેહના સંબંધીઓનો ત્યાગ કરી મહાવનમાં, ફરી ઘેર નહિ આવવા માટે ગયો. (૨૭) એકાકી, શ્રીકૃષ્ણનાં દર્શન કરાવનાર ગુરુને ખોળતો હું પૃથ્વીમાં શ્રી મુક્તનાથ આદિ જેમાં છે એવા પુલહાશ્રમાદિ પુણ્ય તીર્થોમાં વિચરણ કરતો હતો. (૨૮)

यो यः ख्यातो गुरुत्वेन महान् सिद्धः प्रतिष्ठितः । तं तं गत्वा प्रश्नमेतमपृच्छं प्रश्रितो भुवि ॥२९॥ मम येन भवेत्सद्यः साक्षाच्छ्रीकृष्णदर्शनम् । कृपया तमुपायं मे ब्रूहि जानासि चेदिति ॥३०॥ प्रश्नमेनं मम श्रुत्वा केचिन्मौनमुपाश्रयन्। केचित्क्रुधाऽपमानं मे चक्रुः सद्यो दुरुक्तिभिः ॥३१॥ तदुत्तरं न कुत्रापि प्राप्तः प्राप्तो दुरुत्तरम् । तत्तत्कृतं भर्त्सनादि मृष्यंस्तं तं समत्यजम् ॥३२॥ अज्ञलोककृतं पूर्वमार्षभो भरतो यथा । दुश्चेष्टितं दुरुक्तादि सेहेऽहं च तथा सहे ॥३३॥ चिन्तयन्कृष्णमेवैकमहं तीर्थानि भूरिशः । सेवमानो रैवतकं सौराष्ट्रेष्वाप्तवान् गिरिम् ॥३४॥ उपत्यकासु तस्याहं ग्रामे पिप्पलसंज्ञके । रामानन्दस्वामिसंज्ञमपश्यं वैष्णवेश्वरम् ॥३५॥ विक्रमार्कक्ष्मेशशके गुहास्याक्षकरीन्दुभिः । प्रमिते वर्तमाने च शुक्रकृष्णे तिथौ हरेः ॥३६॥ तं प्राप्य विनयेनाहमपृच्छं पूर्ववद्द्विज ! । तदा सोऽतिप्रसन्नो मामुवाच मधुरं वचः ॥३७॥ अद्यैवेहोपविश्य त्वं सुस्थिरासन आत्मनि । ध्याय श्रीराधिकाकृष्णमष्टार्णं तन्मनुं जपन् ॥३८॥ द्रष्टाऽसि सद्य एव त्वं साक्षात्स्वेशं समाधिना । इत्युक्तोऽहं तेन तदा तथैवाकरवं मुदा ॥३९॥ अथ तर्ह्येव हृदये प्रसादात्तस्य सत्पतेः । तीर्णावस्थात्रयोऽपश्यं तेजःपुञ्जमलौकिकम् ॥४०॥ तत्र श्रीकृष्णमद्राक्षं वृन्दावनविहारिणम् । श्रीराधाभ्यामर्च्यमानं वेणुवादनतत्परम् ॥४१॥ तं प्रणम्य प्रसीदेति बद्धाञ्जलिपुटोऽब्रवम् । प्रसन्नो भगवानाह मां ततः प्रीणयन्वचः ॥४२॥ रामानन्दाभिधो योऽत्र वर्तते वैष्णवाग्रणीः । तं ममैकान्तिकं भक्तमवगच्छ त्वमुद्धवम् ॥४३॥ तद्वशत्वान्मया दत्तं तुभ्यं साक्षात्स्वदर्शनम् । स हि लोकानुग्रहार्थं प्रकटोऽस्ति मदिच्छया ॥४४॥ तत्सेवनात्पूर्णकामो भविता त्वं न संशयः । येऽन्ये

પૃથ્વીમાં જે જે માણસ ગુરુપણાથી પ્રસિદ્ધ હતા, જે જે મહાપુરુષ પ્રસિદ્ધ હતા, જે જે અષ્ટાંગયોગાદિથી સિદ્ધપણે પ્રસિદ્ધ હતા, જે જે શાસ્ત્રાધ્યયનથી વિખ્યાત હતા તે તે સર્વ જનની પાસે જઈ વિનયથી નમ્રતા પૂર્વક આ પ્રશ્ન પૂછતો હતો. (૨૯) મને પ્રત્યક્ષ શ્રીકૃષ્ણનાં દર્શન તત્કાળ થાય તે ઉપાય જાણતા હો તો કહો : એ પ્રમાણે પૂછતો હતો. (૩૦)

મારો આ પ્રશ્ન સાંભળીને કેટલાક ગુરુઓ મૌન રહ્યા, કેટલાક ક્રોધથી દુર્વચનોથી તત્ક્ષણ જ મારી અવજ્ઞા કરતા હતા, (૩૧) કોઈ પણ સ્થાનમાં મારા પ્રશ્નોના પ્રત્યુત્તરો પ્રાપ્ત થયા નહિ. યોગ્ય નહિ એવી દુરુક્તિઓ પ્રાપ્ત થઈ તે અપમાનોને સહન કરતો તે તે ગુરુઓનો ત્યાગ કરતો હતો. (૩૨) ઋષભદેવના પુત્ર જડભરત જેમ અજ્ઞાની લોકોએ કરેલા તિરસ્કાર આદિક દુષ્કર્મ અને દુષ્ટ ભાષણ સહન કરતા હતા તેવી રીતે હું પણ તે ગુરુઓ વગેરેએ કરેલું અપમાન સહન કરતો હતો. (૩૩)

કેવળ શ્રીકૃષ્ણનું ચિંતવન કરતો હું ઘણા તીર્થોનું સેવન કરતો સૌરાષ્ટ્ર દેશમાં રૈવતાચળ ગિરિને પામ્યો. (૩૪) હું રૈવતાચળ ગિરિની સમીપની ભૂમિમાં પિપલાણા ગામમાં શ્રી રામાનંદ સ્વામી સંજ્ઞાવાળા સમગ્ર વૈષ્ણવોના આચાર્યને જોતો હતો. (૩૫) સંવત્ ૧૮૫૬ના જેઠ વદી ૧૨ બારસને દિવસે મેં રામાનંદ સ્વામીનાં દર્શન કર્યાં. (૩૬)

હે દ્વિજ ! હું શ્રી રામાનંદ મુનિને મળીને વિનયપૂર્વક પૂર્વેના ગુરુઓને જેમ પૂછતો હતો- ( મને પ્રત્યક્ષ શ્રીકૃષ્ણનાં તત્કાળ દર્શન થાય તેવો ઉપાય જો જાણતા હો તો કહો.) તે પ્રમાણે પૂછતો હતો. તે સમયે જ અતિશય પ્રસન્ન થઈ મને શ્રી રામાનંદ મુનિએ મનોજ્ઞ વચન કહ્યું : (૩૭) હે વર્ણીન્દ્ર ! તમો અહીંયાં હાલમાં જ બેસો. સ્થિર આસનવાળા થઈને શ્રીકૃષ્ણનાં અષ્ટાક્ષર મંત્રનો જપ કરતા સતા શ્રીકૃષ્ણનું ધ્યાન ધરો. (૩૮) તમો તત્કાળ જ સમાધિથી પ્રત્યક્ષ પોતાના ઈષ્ટદેવ શ્રીકૃષ્ણને જોશો. હે દ્વિજ! આ પ્રમાણે શ્રી રામાનંદ મુનિએ કહેવાયેલો હું તે સમયે હર્ષથી તે પ્રમાણે જ કરતો હતો, (૩૯) પછી તે સમયે જ સત્પુરુષોના સ્વામી શ્રી રામાનંદ મુનિના અનુગ્રહથી જાગ્રત-સ્વપ્ન અને સુષુપ્તિ એ ત્રણ અવસ્થાથી પર હું પોતાના હૃદયકમળમાં અલૌકિક તેજઃપુંજ જોતો હતો. (૪૦) તેમાં વૃંદાવનવિહારી, લક્ષ્મીજી અને રાધિકાજીએ પૂજેલા, બંસી વગાડવામાં તત્પર શ્રીકૃષ્ણને જોવા લાગ્યો. (૪૧) શ્રીકૃષ્ણને પ્રણામ કરી બંને હાથ જોડી હું 'હે શ્રીકૃષ્ણ ! પ્રસન્ન થાઓ.' આ પ્રમાણે બોલ્યો. પછી પ્રસન્ન થયેલા શ્રીકૃષ્ણ મને પ્રસન્ન કરતાં વચન બોલ્યા : (૪૨) હે વર્ણિન્! આ લોકમાં રામાનંદ નામના જે વૈષ્ણવોમાં અગ્રેસર છે તેમને મારા એકાંતિક ભક્ત, ઉદ્ધવાવતાર છે એમ તમે જાણો. (૪૩) તેમને હું વશ વર્તું છું. માટે મેં તમોને પ્રત્યક્ષ દર્શન આપ્યાં છે. તે ઉદ્ધવ સર્વ જનોનું શ્રેય કરવા માટે મારી ઈચ્છાથી પ્રગટ થયેલા છે. (૪૪) તમે શ્રી રામાનંદમુનિની સેવાથી પૂર્ણ મનોરથવાળા થશો. તેમાં સંશય કરવો નહિ. જે

च तं श्रयिष्यन्ति मोक्ष्यन्ते तेऽपि संसृतेः ॥४५॥ अनन्यभावा ये तत्र मयि तस्मिंस्तथा दृढम् । विश्वासमाप्तास्तेऽत्रैव देहे द्रक्ष्यन्ति मां सति ॥४६॥ अज्ञातभूरिमाहात्म्या अपि वर्त्मास्य ये भुवि । अघिनोऽप्याश्रयिष्यन्ति पुरुषा योषितस्तथा ॥४७॥ तेषामपि च देहान्ते कृत्वा पातकसङ्क्षयम् । दत्त्वा स्वदर्शनं सर्वान्स्वकं नेष्यामि धाम तान् ॥४८॥ अतस्त्वमपि तं प्रीत्या समाश्रित्य सुखी भव । इत्यमृतं वचः पीत्वा हरेराप्तोऽतिनिर्वृतिम् ॥४९॥ व्युत्थायाथास्य शिष्यत्वं प्राप्तोऽहं द्विजसत्तम!। सहजानन्द इति मे नाम कृत्वा स आह माम् ॥५०॥ स्वरूपनिर्णयो ज्ञेयो जीवमायापरात्मनाम्। रामानुजाचार्यकृतग्रन्थेभ्यस्तत्त्वतस्त्वया ॥५१॥ कृष्णव्रतोत्सवानां तु सर्वेषामपि निर्णयः । श्रीविठ्ठलगोस्वामिरचितो ग्राह्य उत्तमः ॥५२॥ रीतिः श्रीकृष्णसेवाया अपि ग्राह्या तदीरिता । प्रेम्णा सेवेदृशी नान्यैराचार्यैरुदिता यतः ॥५३॥ लोकसच्छास्त्रगर्ह्यं यत्कर्म स्यान्महता कृतम् । तत्तु नैव ग्रहीतव्यं दोषत्वात्कर्हिचित्त्वया ॥५४॥ महतो वाल्पकात् पुंसो गुणः सारश्च शास्त्रतः । दत्तात्रेयवदादेय इति मेऽनुग्रहं व्यधात् ॥५५॥ सोऽप्यासीत्सारवज्ञातिर्देशेषु कोसलेषु हि । रामशर्माभिधो विप्रो बह्वृचः सद्गुणालयः ॥५६॥ पूर्वाभ्यासवशात्तस्य कृष्णे भक्तिस्तु शैशवात् । आसीत्स्वाभाविकी विप्र ! विरक्त्या तीव्रया सह ॥५७॥ कृतोपनयनः पित्रा वेदाभ्यासमिषेण सः । हित्वा गृहं वनं यात एकाकी निःस्पृहः शुचिः ॥५८॥ हृदये कृष्णमेवैकं चिन्तयन्विजितेन्द्रियः । तीर्थयात्रां चरन्प्रागात्सौराष्ट्रान् लोकपावनः ॥५९॥ तत्रात्मानन्दनामानं महायोगिनमैक्षत । ब्रह्मचर्यं पालयन्तं तीव्रवैराग्यशालिनम् ॥६०॥ गोपालानन्दसंज्ञस्य नैष्ठिकब्रह्मचारिणः । गोपनाथशिवस्थानवसतेः

બીજા જનો તેમનો આશ્રય કરશે તે પણ જન્મ-મરણરૂપી સંસારથી મુક્ત થશે. (૪૫) તેમાં જે ભક્તો મારા વિશે એકાંતિક ભાવને પામેલા તે જ પ્રકારે શ્રી રામાનંદ મુનિમાં દૃઢ વિશ્વાસ પામેલા છે તે જનો આ દેહ છતાં જ મને જોશે. (૪૬) ભૂતળમાં જે પુરુષો તથા સ્ત્રીઓએ શ્રી રામાનંદ મુનિનું તથા મારું અતિશય માહાત્મ્ય નથી જાણ્યું એવા પાપીજનો પણ રામાનંદ મુનિના સંપ્રદાયનો આશ્રય કરશે  તે સર્વે જનોને પણ પાતકનો નાશ કરી દેહાંતમાં મારાં દર્શન આપીને મારા ધામમાં લઈ જઈશ. (૪૭-૪૮) માટે તમો પણ રામાનંદ મુનિનો પ્રીતિથી આશ્રય કરી સુખી થાઓ. હે દ્વિજ ! આવું શ્રીહરિના અમૃતમય વચનનું પાન કરી હું અતિ સુખી થયો. (૪૯)

હે દ્વિજસત્તમ ! પછી હું સમાધિથી ઊઠીને શ્રી રામાનંદ મુનિના (તેમના થકી શ્રી વાસુદેવી મહાદીક્ષા ગ્રહણ સ્વરૂપ) શિષ્યપણાને પામ્યો. તેમણે મારું નામ સહજાનંદ પાડીને મને કહેતા હતા : (૫૦) તમોએ જીવ-માયા અને પરમાત્માના સ્વરૂપનો નિર્ણય રામાનુજાચાર્યે કરેલા ગ્રંથોથી યથાર્થ જાણવો. (૫૧) સર્વ શ્રીકૃષ્ણનાં એકાદશી વગેરે વ્રતો અને અન્નકૂટાદિ ઉત્સવોનો નિર્ણય શ્રી વિઠ્ઠલનાથજીએ કરેલો તે ગ્રહણ કરવો. તે ઉત્તમ છે. (૫૨) શ્રીકૃષ્ણની સેવાની રીતિ પણ શ્રી વિઠ્ઠલનાથજીએ કહેલી ગ્રહણ કરવી. કારણ કે એમના સમાન સ્નેહથી સેવારીતિ બીજા આચાર્યોએ કહી નથી. (૫૩) લોક અને સત્શાસ્ત્રોએ નિંદાપાત્ર જે કર્મ યદ્યપિ મોટા બ્રહ્માદિ જેવા  ઉત્તમ પુરુષોએ આચરણ કરેલું હોય તો પણ તે દોષરૂપ હોવાથી તમોએ ક્યારેય પણ ગ્રહણ કરવું નહિ. (૫૪) હે દ્વિજ ! મોટા  પુરુષ અથવા નાના માણસોથી ગુણ ગ્રહણ કરવો અને મહાન શાસ્ત્ર અથવા નાના શાસ્ત્ર થકી સાર ગ્રહણ કરવો. દત્તાત્રેયની માફક આવો મારા ઉપર શ્રી રામાનંદ મુનિએ અનુગ્રહ કરેલો છે. (૫૫)

શ્રી રામાનંદ મુનિ પણ રામશર્મા નામવાળા, બહુઋચા ઋગ્વેદી, સદ્ગુણના સ્થાનભૂત, સારવ જ્ઞાતિના બ્રાહ્મણ; કોસલ દેશમાં અયોધ્યાપુરીમાં થયા હતા. (૫૬) હે વિપ્ર ! પૂર્વજન્મના અભ્યાસથી તે રામશર્મા બ્રાહ્મણને નાનપણાથી સ્વાભાવિકી શ્રીકૃષ્ણ પરમાત્મામાં ભક્તિ તો તીવ્ર વૈરાગ્યે સહિત હતી. (૫૭)

અજય નામના પોતાના પિતાએ ઉપવીતસંસ્કાર કરાયેલા રામશર્મા વેદાભ્યાસના મિષથી પોતાના ભવનનો ત્યાગ કરી એકાકી, નિઃસ્પૃહ અને બાહ્યાભ્યન્તર પવિત્ર થકા વનમાં ગયા. (૫૮) પોતાના હૃદયમાં કેવળ શ્રીકૃષ્ણનું ચિંતવન કરતા, જિતેન્દ્રિય, તીર્થયાત્રા કરતા સતા જનોને પવિત્ર કરતા સૌરાષ્ટ્ર દેશમાં આવ્યા. (૫૯) ત્યાં આત્માનંદ નામના મહાયોગીને રામશર્માએ જોયા. તે આત્માનંદ સ્વામી બ્રહ્મચર્યવ્રતને પાલન કરનારા તીવ્ર વૈરાગ્યવાળા; (૬૦) નૈષ્ઠિક બ્રહ્મચારી ગોપનાથ નામના જે શંકર તેના ક્ષેત્રમાં નિવાસવાળા ગોપાળાનંદ નામના યોગીન્દ્રના ઉત્તમ શિષ્ય એવા જે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

शिष्यमुत्तमम् ॥६१॥ तच्छिष्यतां स सम्प्राप्य नैष्ठिकं व्रतमास्थितः । रामानन्द इति ख्यातः साङ्गं योगं ततोऽध्यगात् ॥६२॥ ब्रह्मतेजो निराकारं समाधौ वीक्ष्य देशिकम् । स प्राहाथ दिदृक्षामि कृष्णं साकृत्यहं बृहत् ॥६३॥ गुरुराहायमेवास्ति सत्यः कृष्णो न चेतरः । इत्युक्तः सोऽतिखिन्नात्मा हित्वा तं निर्ययौ ततः ॥६४॥ साकारकृष्णनित्यत्वस्थापकं तत्प्रदर्शकम् । जानन् श्रीवैष्णवाचार्यं श्रीरङ्गक्षेत्रमाययौ ॥६५॥ तत्र रामानुजाचार्यं समाराध्य प्रसाद्य च । जग्राह वैष्णवीं दीक्षां पञ्चसंस्कारलक्षणाम् ॥६६॥ तदुक्तान्भगवद्धर्मान् पालयंस्तत्प्रसादतः । हृदि ध्यानेऽर्चनेऽर्चायां कृष्णं प्रत्यक्षमैक्षत ॥६७॥ पूर्णकामोऽभवत्तेन ततो गुरुनिदेशतः । कृष्णभक्तिं मुमुक्षुभ्य आदिशन्व्यचरद्भुवि ॥६८॥ ये ये तस्याभवन् शिष्यास्ते ते तस्य प्रसादतः । भक्तिनिष्ठां परां प्रापुर्धर्मनिष्ठास्तथाभवन् ॥६९॥ समाधौ ददृशुः कृष्णं केचिच्च पुरुषाः स्त्रियः । मद्यमांसादिसंसर्गं जहुः सर्वे तदाश्रिताः ॥७०॥ निर्दम्भभक्त्या ज्ञानेन यमैश्च नियमैर्धिया । विरक्त्या च स्वधर्मेण विश्रुतोऽभूत्स सर्वतः ॥७१॥ तं चानर्चुर्बहुविधैर्वस्त्रभूषाधनैर्जनाः । अयोजयद्धर्मकार्ये तत्सर्वं सोऽपरिग्रहः ॥७२॥ वस्त्रभूषादि विप्रेभ्यो बहुशः स ददौ महान् । महान्ति चान्नसत्राणि कारयामास वाडव ! ॥७३॥ जितेन्द्रियं च निष्कामं निर्लोभमपरिग्रहम् । अरोषणं च निर्मानं तं जना बहु मेनिरे ॥७४॥ तदान्ये वैष्णवजनाः स्त्रीद्रव्यरसलालसाः । दाम्भिकास्तं तदुत्कर्षं सोढुं शेकुर्न दुर्धियः ॥७५॥ तन्मानहानिमिच्छन्तस्तस्मिन् दोषं तु कञ्चन । अप्राप्य निन्दां कुर्वन्तस्ते मिथ्यापावदन् खलाः ॥७६॥

---

આત્માનંદ યોગી, તેના શિષ્યભાવને પામીને નૈષ્ઠિક વ્રતમાં રહેલા રામાનંદ નામના પ્રસિદ્ધ તે રામશર્માએ આત્માનંદ યોગીથી અષ્ટાંગ સહિત યોગ પ્રાપ્ત કર્યો. (૬૧-૬૨)

પછી શ્રી રામાનંદ મુનિ સમાધિમાં નિરાકાર બ્રહ્મતેજ જોઈને હું સાકાર બ્રહ્મ શ્રીકૃષ્ણને જોવા ઈચ્છું છું : આ પ્રમાણે પોતાના ગુરુ આત્માનંદને કહેવા લાગ્યા. (૬૩) આત્માનંદ યોગીએ શ્રી રામાનંદ મુનિને કહ્યું, આ તેજ રૂપ નિરાકાર જ સત્ય કૃષ્ણ છે. તેનાથી જુદા સાકાર કૃષ્ણ તો છે જ નહિ. આ પ્રમાણે ગુરુએ કહેલા રામાનંદ મુનિ અત્યંત ખેદ પામ્યા અને પોતાના ગુરુનો ત્યાગ કરી ગુરુના નિવાસથી નીકળ્યા. (૬૪)

સદા દિવ્ય મનોહર મૂર્તિ જે શ્રીકૃષ્ણ પરમાત્મા તેનું નિત્યપણું સ્થાપન કરનાર તથા તેવા પ્રકારના શ્રીકૃષ્ણને બતાવનાર શ્રી વૈષ્ણવાચાર્ય શ્રી રામાનુજાચાર્યના સ્થાન પર બેઠેલા હોવા જોઈએ એમ જાણતા શ્રી રામાનંદ શ્રીરંગક્ષેત્રમાં ગયા. (૬૫) ત્યાં દિવ્ય દેહથી વર્તમાન રામાનુજાચાર્યની સમારાધના કરી સમાધિમાં સાક્ષાત્કાર કરી પછી પંચસંસ્કારના સ્વરૂપવાળી વૈષ્ણવી દીક્ષા ગ્રહણ કરી. (૬૬) સમાધિમાં શ્રી રામાનુજાચાર્યે કહેલા ભાગવતધર્મોને પાલન કરતા શ્રી રામાનંદમુનિ તેમની પ્રસન્નતાથી ધ્યાન કરતાં સતા હૃદયકમળમાં અને પૂજન કરવા સમયે મૂર્તિમાં પ્રત્યક્ષ (દૃષ્ટિગોચર થયેલા) શ્રીકૃષ્ણને જોતા હતા. (૬૭) તેનાથી શ્રી રામાનંદમુનિ પૂર્ણ મનોરથવાળા થયા. તેથી શ્રી રામાનુજાચાર્યની આજ્ઞાથી મુમુક્ષુજનોને શ્રીકૃષ્ણની ભક્તિનો ઉપદેશ આપતા પૃથ્વીમાં વિચરતા હતા. (૬૮) શ્રી રામાનંદમુનિના જે જે જનો શિષ્યો થયા તે તે જનો શ્રી રામાનંદસ્વામીના અનુગ્રહથી સર્વોત્તમ ભક્તિનિષ્ઠા પામ્યા અને ધર્મમાં પણ દૃઢ નિષ્ઠાવાળા થયા. (૬૯) કેટલાક પુરુષો અને સ્ત્રીઓ સમાધિમાં શ્રીકૃષ્ણને જોતા હતા, સર્વ શ્રી રામાનંદમુનિના આશ્રિત જનો મદ્ય-માંસ વગેરેનો સંબંધ ત્યાગ કરતા હતા. (૭૦)

નિર્દંભ ભક્તિ, આત્મા-પરમાત્માનું જ્ઞાન, અહિંસાદિ યમો, શૌચાદિ નિયમો, વિચક્ષણ બુદ્ધિ, તીવ્ર વૈરાગ્ય અને સ્વધર્મથી શ્રી રામાનંદ મુનિ સર્વ ગુણવાળા જનોમાં વિખ્યાત હતા. (૭૧) જનો શ્રી રામાનંદ મુનિની અનેક પ્રકારનાં વસ્ત્રો-અલંકારો-અને ધન વગેરેથી પૂજા કરતા હતા. અપરિગ્રહવાળા શ્રી રામાનંદ મુનિ તે વસ્ત્રાદિ ધર્મકાર્યમાં વાપરતા હતા. (૭૨)

હે વિપ્ર ! મહાન શ્રી રામાનંદ મુનિ અનેક બ્રાહ્મણોને વસ્ત્ર-ભૂષણો આપતા હતા અને મોટાં અન્નસત્રો કરાવતા હતા. (૭૩) જિતેન્દ્રિય, નિષ્કામી, નિર્લોભી, અપરિગ્રહી, ક્રોધરહિત તથા માનરહિત શ્રી રામાનંદ મુનિને જનો અતિ અધિક માનતા હતા. (૭૪)

તે સમયે સ્ત્રી-દ્રવ્ય અને રસોને વિષે આસક્ત દાંભિક દુર્બુદ્ધિવાળા બીજા વૈષ્ણવજનો શ્રી રામાનંદ મુનિનો ઉત્કર્ષ સહન કરવા સમર્થ થયા નહિ. (૭૫) શ્રીરામાનંદ સ્વામીની માનહાનિને ઈચ્છતા અધમ જનો શ્રી રામાનંદ મુનિમાં કોઈપણ દોષ નહિ પામીને નિંદા કરતા સતા મિથ્યાપવાદો આરોપણ કરતા હતા. (૭૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

विवदन्ते स्म बहुधा तेन ते ब्रह्मविद्यया । प्रापुः पराजयं सर्वे न तु कोऽपि जयं द्विज ! ॥७७॥ तदाऽतिक्रुद्धास्ते भूय उपदुद्रुवुरक्रुधम् । भर्त्सयामासुरपि तमपशब्दैररुन्तुदैः ॥७८॥ प्रामार्जयंस्तत्तिलकं केचिन्नीत्वैव तं रहः । अत्रोटयन्कण्ठमालां चकर्तुश्च शिखां परे ॥७९॥ सिंहासनमपीशस्य बभञ्जुः केचिदुन्मदाः । जहुश्च कृष्णप्रतिमाः केचिद्वासांसि तस्य च ॥८०॥ केचित्तदन्नसत्राणि साधून्निष्कास्य तच्छ्रितान् । बभञ्जुरुद्धताकारा वैष्णवाः शस्त्रपाणयः ॥८१॥ सहमानः स तं सर्वं दुर्जनोपद्रवं मुहुः । वृन्दावनमुपेत्याशु विजने क्वचिदावसत् ॥८२॥ ध्यायंस्तत्रैकमनसा कृष्णं स न्यवसत्सुधीः । तदिच्छया मतिं प्राप नूतनाध्वप्रवर्तिनीम् ॥८३॥ बाह्यं श्रीवैष्णवाचार्यलिङ्गं सोपद्रवं ततः । हित्वा शास्त्रानुसारेण नवीनं तदकल्पयत् ॥८४॥ रामानुजकृतान् ग्रन्थांस्त्वध्यात्मज्ञानसिद्धये । तानेव रक्षन्भगवद्धर्मं प्रावर्तयत्पुनः ॥८५॥ धर्मेण सहितामेव भक्तिं स्वाध्वनि वर्तयन् । तीर्थानि व्यचरद्भूमौ मुमुक्षुहितकारकः ॥८६॥ गुरुकृष्णप्रसादाच्च सोऽनुजग्राह भूतले । यं यं स स पुमान्सद्यः समाधौ कृष्णमैक्षत ॥८७॥ कृत्वा स द्वारिकायात्रां रैवताचलमाययौ । कृष्णक्रीडास्थले तत्र न्यवसद्धितकृन्नृणाम् ॥८८॥ स गुरुर्मम विप्रेन्द्र ! साक्षादुद्धव एव हि । कृष्णादप्यणुरन्यूनः कृष्णभक्तिप्रवर्तकः ॥८९॥ तदाश्रितानथावोचं तत्र सर्वांश्च वैष्णवान् । एष नः सद्गुरुः साक्षादुद्धवोऽस्ति स्वयं किल ॥९०॥ अतो नः सम्प्रदायोऽयं

હે દ્વિજ ! દુષ્ટ વૈષ્ણવજનો શ્રી રામાનંદ મુનિની સાથે બ્રહ્મવિદ્યાથી ઘણા પ્રકારે વિવાદો કરતા હતા. પરંતુ તે વિવાદો કરનારા પરાજય પામતા હતા. તેમાં કોઈ પણ જય પામતો ન હતો. (૭૭) તે સમયે અતિ ક્રોધ પામેલા દુષ્ટ વૈષ્ણવો ક્રોધે રહિત શ્રી રામાનંદ મુનિને ફરીથી પણ ઉપદ્રવ કરતા હતા. મર્મસ્થળોને સ્પર્શે એવા અપશબ્દોથી પણ તિરસ્કાર કરતા હતા. (૭૮)

કેટલાક દુષ્ટ વૈષ્ણવો રામાનંદ મુનિને એકાંત પ્રદેશમાં લઈ જઈને તેમનું તિલક ભૂંસી નાખતા હતા. કંઠમાં ધારણ કરેલી કંઠી તોડી નાખતા હતા. બીજા કેટલાક શિખા કાપી નાખતા હતા. (૭૯) અધિક ગર્વવાળા કેટલાક દુર્જનો અર્ચામૂર્તિનું સિંહાસન ભાંગી નાખતા હતા. કેટલાક શ્રીકૃષ્ણની પ્રતિમાઓ લઈ જતા હતા. કેટલાક રામાનંદ મુનિનાં ઓઢવાનાં વસ્ત્રો લઈ જતા હતા. (૮૦) અતિ ઉદ્ધત આકૃતિવાળા હાથમાં શસ્ત્રોવાળા કેટલાંક વૈષ્ણવોના ચિહ્નને ધારણ કરનારા દુષ્ટજનોએ રામાનંદ મુનિના આશ્રિત સાધુઓ, જેમને અન્નસત્રોમાં રાખ્યા હતા તેમને કાઢી મૂકીને તે અન્નસત્રોને ભાંગી નાખ્યાં. (૮૧)

તેવો ઉપદ્રવ વારંવાર સહન કરતા શ્રી રામાનંદ મુનિ તત્કાળ વૃંદાવન જઈને કોઈ એકાંત પ્રદેશમાં નિવાસ કરતા હતા. (૮૨) બુદ્ધિમાન રામાનંદ મુનિ ત્યાં એકાગ્ર ચિત્તથી શ્રીકૃષ્ણનું ધ્યાન કરતા નિવાસ કરતા હતા. સમાધિમાં પ્રત્યક્ષ જોયેલા શ્રીકૃષ્ણના સંકલ્પથી નવીન સંપ્રદાય પ્રવર્તાવવાની બુદ્ધિ પામ્યા. (૮૩) પછી ઉપદ્રવે સહિત એવા બાહ્ય શ્રી વૈષ્ણવાચાર્યના (દ્વાદશ ઊર્ધ્વપુંડ્રાદિ ધારણ કરવારૂપ) ચિહ્નનો ત્યાગ કરીને શ્રીમદ્ ભાગવતાદિ સત્શાસ્ત્રોના રહસ્યને નહિ જાણનારને બીજા સંપ્રદાયોથી ભિન્ન જણાતા, પોતાના ઐશ્વર્યથી શાસ્ત્રસંમત ચિહ્નની કલ્પના કરી. (૮૪)

જીવ, ઈશ્વર, માયાનું યથાર્થ રૂપ જાણવા માટે રામાનુજાચાર્યે કરેલા ગ્રંથોને સ્વીકાર કરતા શ્રી રામાનંદ મુનિ ફરીથી પણ ભાગવત ધર્મને પ્રવર્તાવતા હતા. (૮૫) વર્ણાશ્રમ ધર્મે સહિત જ ભક્તિ પોતાના સંપ્રદાયમાં પ્રવર્તાવતા મુમુક્ષુઓનાં હિત કરનારા શ્રી રામાનંદ મુનિ ભૂમિમાં તીર્થોમાં વિચરતા હતા. (૮૬) શ્રી રામાનંદ મુનિ પૃથ્વીમાં જે જે પુરુષને અનુગ્રહ કરતા હતા તે તે પુરુષ, ગુરુ અને શ્રીકૃષ્ણનો પોતાના ઉપર અનુગ્રહ થવાથી સમાધિમાં તત્ક્ષણ જ કૃષ્ણને જોતા હતા. (૮૭)

મનુષ્યોના હિતકર્તા રામાનંદ મુનિ દ્વારિકાની યાત્રા કરી રૈવતાચળમાં આવ્યા. ત્યાં કૃષ્ણની ક્રીડાના સ્થાનમાં નિવાસ કર્યો. (૮૮) હે વિપ્રેન્દ્ર ! શ્રીકૃષ્ણથી અણુ માત્ર પણ ન્યૂન નહિ એવા શ્રીકૃષ્ણની ભક્તિના પ્રવર્તક સાક્ષાત્ ઉદ્ધવ જ નિશ્ચે મારા ગુરુ હતા. (૮૯)

હે વિપ્ર ! ગુરુથી દીક્ષાગ્રહણ કર્યા પછી શ્રી રામાનંદ સ્વામીના આશ્રિત, શ્રી રામાનંદ સ્વામીની સમીપમાં રહેલા સર્વ વૈષ્ણવોને મેં કહ્યું કે 'હે ભક્તો ! આપણા આ ગુરુ શ્રી રામાનંદ મુનિ પ્રત્યક્ષ પોતે નિશ્ચે ઉદ્ધવ છે. માટે આપણો સંપ્રદાય સર્વ વૈષ્ણવોએ માનેલો-દૈવી સંપદાએ યુક્ત, ઉદ્ધવ નામથી થાઓ.' હે દ્વિજ ! આ મારું વાક્ય સાંભળી શ્રી રામાનંદ સ્વામીના

सर्ववैष्णवसम्मतः । औद्धवाख्योऽस्त्विति श्रुत्वा तथोचुस्तेऽखिला अपि ॥९१॥ स गुरुर्मयि विन्यस्य निजधर्मधुरं प्रभुः । तिरोदधे तत्प्रतापान्मया सैवोह्यतेऽधुना ॥९२॥ नवीनं सम्प्रदायं नो ज्ञात्वाऽन्ये मतवादिनः । भृशमस्मत्साधुजनान्प्रति-ग्रामममपीडयन् ॥९३॥ यथा यथा भवेत्तेषामापत्काले तथाविधे । सुखं तथा तथा तेऽथ वर्तिता भुवि वै मया ॥९४॥ प्रतापात्सद्गुरोस्तस्य पातुर्धर्मस्य च प्रभोः । साम्प्रतं स्वास्थ्यमापन्नाः प्राग्वद्वर्तामहे वयम् ॥९५॥ उक्तस्ते सम्प्रदायोऽथ श्रीकृष्णोऽस्तीष्टदेवता । परमात्मा परं ब्रह्म सर्वकारणकारणम् ॥९६॥ स हि राधिकया युक्तो राधाकृष्ण इतीर्यते । युक्तः स लक्ष्म्या रुक्मिण्या लक्ष्मीनारायणस्तथा ॥९७॥ सोऽर्जुनेन युतो ब्रह्मन्नरनारायणाभिधः । योगेन बलभद्रादेस्तत्तन्नाम्नोच्यते च सः ॥९८॥ श्रीवासुदेवप्रमुखाश्चतस्रस्तस्य मूर्तयः । चतुर्विंशतिसङ्ख्याकाः केशवप्रमुखास्तथा ॥९९॥ पद्मनाभवराहाद्या भगवन्मूर्तयोऽपि च । श्रीकृष्णस्यावतारत्वान्मान्याः सन्त्येव नोऽखिलाः ॥१००॥ आदिवैष्णवराजश्चेत्युपदेष्टा प्रचेतसाम् । शङ्करः सह पार्वत्या मतः पूज्यतयाऽस्ति नः ॥१०१॥ पूज्यः कृष्णावतारत्वाच्छ्रीगणेशो मतस्तथा । अस्माकं कुलदेवत्वात् पूज्यो भवति मारुतिः ॥१०२॥ गायत्र्या अधिदेवत्वादस्माकं च द्विजन्मनाम् । पूज्योऽस्ति सविता देवोऽथेष्टशास्त्राणि मे ब्रुवे ॥१०३॥ वेदाः सहोपनिषदो द्वैपायनकृतान्यथ । शारीरकाभिधान्येव सूत्राणि ब्राह्मणोत्तम ! ॥१०४॥ श्रीमद्भागवताभिख्यं पुराणं दशलक्षणम् । या चास्ति भगवद्गीता भारते भीष्मपर्वणि ॥१०५॥ विष्णोर्नामसहस्रं च भारते भीष्मकीर्तितम् । नीतिश्च विदुरप्रोक्ता तत्रैवोद्योगपर्वणि ॥१०६॥ श्रीवासुदेवमाहात्म्यं स्कान्दवैष्णवखण्डगम् । याज्ञवल्क्यस्मृतिश्चेति शास्त्राणीष्टानि सन्ति मे ॥१०७॥ तत्र शारीरसूत्राणि गीता भागवतीति च । द्वयं रामानुजाचार्यभाष्योपेतं

---

આશ્રિત વૈષ્ણવો 'એ પ્રમાણે થાઓ' એમ બોલ્યા. (૯૦-૯૧) અતિસમર્થ ગુરુ શ્રી રામાનંદ મુનિએ પોતાની ધર્મધુરા (પોતાનું ભાગવતધર્મની પ્રવૃત્તિસ્વરૂપ પદ) મારે વિષે મૂકીને અંતર્ધાન થયા. હાલમાં તે ધર્મની પ્રવૃત્તિ મારાથી કરાય છે. (૯૨)

આસુરી સંપત્તિવાળા મતવાદીઓ અમારા સંપ્રદાયને નવીન સંપ્રદાય માની દરેક ગામમાં અમારા સાધુઓને અત્યંત પીડા પમાડતા હતા. (૯૩) પછી તેવા પ્રકારના આપત્કાળમાં અમારા સાધુઓને જે પ્રકારે સુખ થાય તે પ્રકારે તે સાધુઓને મેં પૃથ્વીમાં વર્તાવેલા છે. (૯૪) શ્રી રામાનંદ સ્વામીના પ્રતાપથી અને ધર્મનું રક્ષણ કરનાર શ્રીકૃષ્ણના પ્રતાપથી હાલમાં જ અમો સ્વસ્થ ચિત્તવાળા થયેલા સતા પહેલાંની માફક વર્તીએ છીએ. (૯૫)

હે દ્વિજ ! તમોને સંપ્રદાય કહ્યો. હવે સંપ્રદાય સંબંધી પ્રશ્નના ઉત્તરો કહ્યા પછી **અમારા ઈષ્ટદેવ તો જે પરમાત્મા, પરબ્રહ્મ, સર્વ કારણના કારણ શ્રીકૃષ્ણ તે જ છે.** (૯૬) તે શ્રીકૃષ્ણ જ રાધિકાએ સહિત રાધાકૃષ્ણ નામથી કહેવાય છે. તે જ પ્રકારે શ્રીકૃષ્ણ લક્ષ્મીજીએ યુક્ત હોય ત્યારે લક્ષ્મીનારાયણ નામથી કહેવાય છે. (૯૭) હે વિપ્ર ! તે શ્રીકૃષ્ણ નરના અવતારરૂપ અર્જુન સહિત હોય ત્યારે નરનારાયણ નામે કહેવાય છે. શ્રીકૃષ્ણ બલભદ્ર-સત્યભામા આદિએ સહિત હોય ત્યારે બલકૃષ્ણ, સત્યાકૃષ્ણ આદિ સંજ્ઞાઓથી કહેવાય છે. (૯૮)

શ્રી વાસુદેવ આદિ શ્રીકૃષ્ણની ચાર મૂર્તિઓ તથા કેશવ વગેરે ચોવીશ શ્રીકૃષ્ણની મૂર્તિઓ; (૯૯) પદ્મનાભ, વરાહ વગેરે પણ શ્રીકૃષ્ણનાં સ્વરૂપો સમગ્રપણે તે શ્રીકૃષ્ણના અવતારો હોવાથી અમારે પૂજ્ય જ છે. (૧૦૦) શંકર પુરાતન સર્વ વૈષ્ણવોમાં શ્રેષ્ઠ અને પ્રાચીન બર્હિષ રાજાના દશ પુત્રોના ઉપદેષ્ટા હોવાથી પાર્વતીની સાથે અમોએ પૂજ્યપણે માનેલા છે. (૧૦૧) તે જ પ્રકારે શ્રી ગણેશજી શ્રીકૃષ્ણનો અવતાર હોવાથી પૂજ્ય માનીએ છીએ. હનુમાનજી અમારા કુળના ઈષ્ટદેવ હોવાથી પૂજ્ય છે. (૧૦૨)

શ્રી સૂર્યનારાયણ, બ્રાહ્મણોના કુળમાં ઉત્પન્ન હોવાથી અને ગાયત્રીના ઉપદેશથી બીજા જન્મવાળા (દ્વિજન્મા = દ્વિજ સંજ્ઞાવાળા) અમોએ ગાયત્રીમંત્રના અધિદેવ હોવાથી પૂજ્ય છે. હવે અમોએ માનેલા ઈષ્ટશાસ્ત્રો કહું છું. (૧૦૩)

હે બ્રાહ્મણોત્તમ ! ઉપનિષદોએ સહિત ચાર વેદ અને કૃષ્ણ દ્વૈપાયન નામનાં શ્રી વ્યાસે જ કરેલાં શારીરક સંજ્ઞાવાળાં સૂત્રો, (૧૦૪) દશ લક્ષણવાળું શ્રીમદ્ ભાગવત પુરાણ તથા ભારતમાં ભીષ્મપર્વમાં જે ભગવદ્ ગીતા છે; (૧૦૫) ભારતમાં ભીષ્મે કહેલું વિષ્ણુ નામ સ્તોત્ર અને ભારતમાં જ ઉદ્યોગપર્વમાં વિદુરે કહેલી વિદુરનીતિ; (૧૦૬) સ્કંદપુરાણના વિષ્ણુખંડમાં રહેલું શ્રી વાસુદેવ માહાત્મ્ય અને યાજ્ઞવલ્ક્યઋષિની સ્મૃતિ : આ આઠ શાસ્ત્ર મેં ઈષ્ટ માનેલાં છે. (૧૦૭)

मतं मया ॥१०८॥ आचारव्यवहाराघनिष्कृतिज्ञानहेतवे । मता मिताक्षरायुक्ता याज्ञवल्क्यस्य तु स्मृतिः ॥१०९॥ विशेषात्कृष्णमाहात्म्यज्ञानाय तु मतौ मया। श्रीमद्भागवतस्यैव स्कन्धौ दशमपञ्चमौ ॥११०॥ अन्यानि यानि शास्त्राणि वेदार्थानुसृतानि ह । तानि सन्ति मतेऽस्माकं प्रमाणान्यास्तिकत्वतः ॥१११॥ आद्या शक्तिर्भगवतो लक्ष्मीर्देव्यस्ति नो मते। धार्ये च तुलसीकाष्ठमाले कण्ठे द्विजातिभिः ॥११२॥ चन्दनादीन्धनभवे कृष्णाङ्घ्रिस्पर्शपाविते । धार्ये सूक्ष्ममणी माले कण्ठे शूद्रैश्च भूसुर ! ॥११३॥ सचन्द्रकं चोर्ध्वपुण्ड्रं गोपीचन्दनमृत्स्नया । कृष्णपूजावशिष्टेन क्रियते चन्दनेन वा ॥११४॥ राधालक्ष्मीप्रसादेन कुङ्कुमेनापि चन्द्रकः। तन्मध्ये क्रियते ब्रह्मन्सम्प्रदाय इहौद्धवे ॥११५॥ सन्ति ये साधवोऽस्माकं त्यक्तग्राम्यसुखा इह । भरतस्यार्षभस्येव भक्तिस्तेषां ममापि च ॥११६॥ निर्मानत्वमसङ्गत्वम-हिंसाहंममत्यजिः । आत्मनिष्ठा च तस्येव सन्ति भक्तेरलङ्क्रियाः ॥११७॥ सालङ्क्रियेदृशी कृष्णभक्तिर्यस्य भवेन्न सः । त्यागी बहिष्कृत इति ज्ञेय उद्धववर्त्मनः ॥११८॥ गृहस्थाश्रमिणो येऽत्र सन्त्यस्माकं तु वाडव !॥ अम्बरीषनृपस्येव तेषां भक्तिः स्वधर्मयुक् ॥११९॥ इत्थं द्वेधा भक्तिरीतिः सम्प्रदायेऽस्ति नः किल । उक्ताधिकारिभेदेन योग्यत्वाद्द्विजसत्तम! ॥१२०॥ अस्मदीयाः साधवस्तु भरतस्यैव योगिनः । मार्गं परमहंसस्य श्रिता भागवतस्य यत् ॥१२१॥ अतः परमहंसाख्या उच्यन्तेऽस्मदुपाश्रितैः । प्रश्नानामिति सर्वेषामुत्तरं कथितं तव ॥१२२॥

---

તે શાસ્ત્રોમાં શારીરક સૂત્રો અને ભગવદ્ ગીતા આ બે શ્રી રામાનુજાચાર્યે કરેલા ભાષ્યે સહિત મેં માનેલાં છે. (૧૦૮) આચાર-વ્યવહાર અને પ્રાયશ્ચિત્તના જ્ઞાન માટે મિતાક્ષરા ટીકાએ યુક્ત યાજ્ઞવલ્ક્ય સ્મૃતિ મેં માનેલી છે. (૧૦૯) વિશેષ પણે શ્રીકૃષ્ણ પરમાત્માના માહાત્મ્ય જ્ઞાન માટે તો શ્રીમદ્‌ભાગવતના દશમ અને પંચમ બે સ્કંધો જ મેં માનેલા છે. (૧૧૦) વેદના અર્થોને અનુસરનારાં બીજાં ઋષિપ્રણીત રામાયણાદિ શાસ્ત્રો પરલોકાદિનું સત્યપણું પ્રતિપાદન કરનારાં હોવાથી આસ્તિક એવા અમારા સિદ્ધાંતમાં પ્રમાણપણે માનેલાં છે. (પરંતુ ઈષ્ટપણે માનેલાં નથી એવો ભાવાર્થ છે.) (૧૧૧)

હે દ્વિજ ! શ્રીકૃષ્ણની આદિશક્તિ (પત્ની) મહાપુરુષના લક્ષણયુક્ત સ્વરૂપવાળી લક્ષ્મી અમારા મતમાં દેવી છે. હે વિપ્ર! ત્રણ વર્ણના પુરુષોએ કંઠમાં તુલસીના કાષ્ઠની સૂક્ષ્મ મણિકાવાળી બેવડી કંઠી નિત્ય ધારણ કરવી. (૧૧૨) હે ભૂદેવ ! ચંદનાદિ કાષ્ઠથી કરેલી સૂક્ષ્મ મણિકાવાળી શ્રીકૃષ્ણના ચરણસ્પર્શથી પવિત્ર બેવડી માળા શૂદ્રોએ કંઠમાં ધારણ કરવી. (૧૧૩)

હે વિપ્ર ! ગોપીચંદનની મૃત્તિકા અથવા કૃષ્ણની પૂજા કરતાં બાકી રહેલા કેસરાદિયુક્ત ચંદનથી ચાંલ્લાસહિત ઊર્ધ્વપુંડ્રતિલક અમારા સંપ્રદાયના પુરુષોએ કરાય છે. (૧૧૪) હે બ્રહ્મન્, આ ઉદ્ધવ સંપ્રદાયમાં ઊર્ધ્વપુંડ્રના મધ્યમાં રાધા અને લક્ષ્મીના પૂજનથી વધેલા કુમકુમથી પણ ચાંલ્લો કરાય છે. (૧૧૫)

હે દ્વિજ ! આ ઉદ્ધવ સંપ્રદાયમાં ત્યાગ કર્યું છે વિષયસુખ જેમણે એવા અમારા સાધુઓ છે. તે સાધુઓને તથા મારે પણ પરમાત્માને વિષે ઋષભદેવના પુત્ર ભરત નામના રાજા(જડભરત)ની માફક ભક્તિ છે. (૧૧૬) નિર્માનીપણું-અસંગીપણું-અહંમમતા રહિત - આત્મનિષ્ઠા આદિક ગુણો આ સર્વે ભક્તિના અલંકારભૂત નિર્માનત્વાદિ પાંચ ગુણો જડભરતની માફક જ અમારે માન્ય છે. (૧૧૭)

નિર્માનત્વાદિ ગુણરૂપી અલંકારે સહિત શ્રીકૃષ્ણની ભક્તિ જે ત્યાગીને ના હોય તે ત્યાગી અમારા ઉદ્ધવ સંપ્રદાયથી બહાર છે એમ જાણવું. (૧૧૮) હે વાડવ ! આ સંપ્રદાયમાં અમારા જે ગૃહસ્થો છે તેમની અંબરીષ રાજાની માફક સ્વધર્મે સહિત ભક્તિ છે. (૧૧૯) હે દ્વિજોત્તમ ! આ પ્રમાણે અધિકારીભેદથી યોગ્યતા પ્રમાણે બે પ્રકારે ભક્તિની રીતિ અમારા સંપ્રદાયમાં કહી છે. (૧૨૦)

હે દ્વિજ ! અમારા સાધુઓ તો સાંખ્યયોગ-અષ્ટાંગયોગ-ભક્તિયોગવાળા ભાગવત પરમહંસ જડભરતના નિર્માનત્વાદિ માર્ગને આશરેલા હોવાથી અમારા આશ્રિતોએ પરમહંસ નામવાળા સાધુઓ કહેવાય છે. હે દ્વિજ ! આ પ્રમાણે તમારા અઢાર પ્રશ્નોના ઉત્તરો મેં કહ્યા. (૧૨૧-૧૨૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच – **इति स्वामिवचः श्रुत्वा मुमुक्षुः स तु वाडवः । तमेव सद्गुरुं ज्ञात्वा समाश्रयदसंशयः ॥१२३॥ प्रसादात्तस्य चापश्यत्सद्यस्तं स समाधिना । श्रीकृष्णं राधया साकं कृतार्थस्तेन चाभवत् ॥१२४॥ ततः स्वयजमानाय हरिसिंहाय भूभुजे । तत्सर्वमवदद्विप्रो यथादृष्टं यथाश्रुतम् ॥१२५॥ ततः सोऽपि सुधीर्हृष्टस्तमेव शरणं हरिम् । प्राप्यानन्दं परं लेभे तदीयाश्च नराधिप ! ॥१२६॥ श्रुत्वर्षयस्ते निजसम्प्रदायप्रकाशमीशेन कृतं प्रहृष्टाः । दोलोत्सवं तत्र विधाय भूमौ सुखं विचेरुर्गतवैरिभीकाः ॥१२७॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे उद्धवसम्प्रदायप्रकाशनामा सप्तत्रिंशोऽध्यायः ॥३७॥

सुव्रत उवाच – **पुरे वसंस्तत्र मुनीश्वरोऽथ महोत्सवान्सोऽभयसद्मनि प्रभुः । चकार कृष्णस्य जनुर्दिनेषु सर्वासु चैकादशिकासु राजन् ! ॥१॥ शुश्राव नित्यं च महापुराणं स प्रीतिमान्भागवताभिधानम् । अचीकरद्दानममुष्य चासौ पाठांश्च विप्रैर्विधिवच्छतानि ॥२॥ श्रीभारतोक्तस्य सहस्रनामस्तोत्रस्य विष्णोः श्रवणं च पाठान् । स्वयं चकाराथ च वाडवेन्द्रैः स कारयामास यथाविधानम् ॥३॥ तं प्रार्थयन्ति स्म पुरान्तरेभ्यो भक्ताः समेत्य स्वपुरागमाय । यदा तदा**

---

**સુવ્રત મુનિ કહે છે -** હે પ્રતાપસિંહ રાજન્ ! આ પ્રમાણે ભગવાન શ્રી સ્વામિનારાયણનું વચન સાંભળીને મુમુક્ષુ શિવરામ ભટ્ટે શ્રી સ્વામિનારાયણને જ સત્શાસ્ત્રમાં કહેલા લક્ષણવાળા આચાર્ય જાણીને પોતાની બુદ્ધિથી સંશયે રહિત થઈ શ્રી સ્વામિનારાયણનો આશ્રય કર્યો. (૧૨૩) શિવરામ બ્રાહ્મણે શ્રી સ્વામિના અનુગ્રહથી તત્કાળ જ સમાધિ વડે રાધાએ સહિત વર્તતા શ્રીકૃષ્ણ રૂપે શ્રી સ્વામિનારાયણને જ જોયા. આવાં દર્શનથી કૃતાર્થ થયા. (૧૨૪)

પછી શિવરામ વિપ્ર પોતાના યજમાન હરિસિંહ રાજાને જેવું જોયું હતું અને જેવું સાંભળ્યું હતું તે બધું વૃત્તાંત કહેતા હતા. (૧૨૫) હે રાજન્ ! પછી બુદ્ધિમાન હરિસિંહ રાજા પણ આનંદ પામીને સર્વ લોકપ્રસિદ્ધ શ્રીહરિનું શરણ પામીને સર્વોત્તમ આનંદ પામ્યા. તેમના મંત્રી વગેરે અને તેમના આશ્રિતો પણ શ્રીહરિનું શરણ પામીને પરમાનંદ પામ્યા. (૧૨૬)

સભામાં રહેલા મુનિઓ પરમાત્મા શ્રીહરિએ સંપ્રદાયનો પ્રકાશ કર્યો તે સાંભળીને પ્રસન્ન થયેલા સતા ગઢપુરમાં પુષ્પોદોલોત્સવ કરી અસુર ગુરુ-રાજાદિ શત્રુઓનો ભય જેમને નિવૃત્ત થયો છે એવા થકા પૃથ્વીમાં સુખપૂર્વક જેમ હોય તેમ શ્રીહરિની આજ્ઞાથી વિચરણ કરવા લાગ્યા. [પોતાના ભક્તોની શિક્ષા માટે સ્વયં શ્રીહરિ પણ પોતાના સંપ્રદાયને પોતાના ભક્તોને કહેતા હતા તે શ્રીહરિને હું ભજું છું.] (૧૨૭) *ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે ઉદ્ધવસંપ્રદાયપ્રકાશનામા સપ્તત્રિંશોઽધ્યાયઃ (૩૭)*

## અધ્યાય : ૩૮

### મત્સ્યાવપુરમાં સુરસિંહ રાજા વગેરેએ સારી રીતે શ્રીહરિનું પૂજન કર્યું અને ફૂલદોલનો ઉત્સવ વગેરે કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! પછી દુર્ગપુરમાં અભય રાજાના મંદિરમાં નિવાસ કરતા મુનિપતિ શ્રીહરિ શ્રીકૃષ્ણના જન્મ દિવસો તથા સર્વ, ચોવીસ સંખ્યાવાળી એકાદશીઓમાં મહોત્સવો કરતા હતા. (૧) શ્રીહરિ પ્રસન્નતાપૂર્વક ભાગવત નામનું મહાપુરાણ દરરોજ સાંભળતા હતા. શ્રીહરિ શ્રીમદ્ભાગવત પુરાણનું શાસ્ત્રવિધિ પ્રમાણે દાન અભયરાજા દ્વારા કરાવતા હતા. આ પુરાણના સ્વાશ્રિત વિદ્વાન બ્રાહ્મણો દ્વારા શાસ્ત્રવિધિ પ્રમાણે (સો પાઠો = સો પાઠથી એક પુરશ્ચરણ કહેવાય છે. શત શબ્દ બહુવચન હોવાથી) ઘણાં પુરશ્ચરણો કરાવતા હતા. (૨)

શ્રી ભારતમાં કહેલા વિષ્ણુનામસ્તોત્રનું શ્રવણ પોતે શ્રીહરિ કરતા હતા અને સ્વાશ્રિત બ્રાહ્મણો પાસે તેના પાઠો વિધિ પ્રમાણે કરાવતા હતા. (૩) પોતાના ભક્તજનો બીજાં નગરો તથા ગામોમાંથી આવી શ્રીહરિને મળીને પોતાના પુરમાં લઈ જવા માટે જ્યારે પ્રાર્થના કરતા હતા ત્યારે શ્રીહરિ પણ (હંમેશાં હું તમારા ભુવનમાં રહીશ એવો વર આપેલો હોવાથી)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सोऽप्यभयं नृपं तमापृच्छ्य तत्तत्पुरमप्ययाच्च ॥४॥ साकं स्वकैर्बन्धुभिरन्वयात्तं क्वचित्क्वचिद्भूमिपतिर्निजेष्टम् । क्वचित्क्वचित्तस्य निदेशतोऽसौ पुरे स्वकेऽस्थाद्धृदि चिन्तयंस्तम् ॥५॥ हरिश्च तत्तन्नगरे स्वभक्तानानन्दयित्वा प्रथितप्रतापैः। महोत्सवैः श्रीरमणस्य भूयः पुरं तदेति स्म ततः क्षितीश ! ॥६॥ प्रत्युत्सवं जनास्तत्र समायान्ति स्म यूथशः । स्त्रियो वृद्धाश्च शिशवो गृहिणो मुनयस्तथा ॥७॥ त्यागिनां तत्र भक्तानां यूथानि तु सहस्रशः । आजग्मुर्जग्मुरूषुश्च नैरन्तर्येण चान्वहम् ॥८॥ त्यागिनां हरिभक्तानां यूथानि गणका अपि । सङ्ख्यातुं शेकिरे नैव तत्रायान्त्यपयान्ति च ॥९॥ यावन्तो नृपमन्दिरे हरिजनास्तावन्त आसन् पुरे गङ्गायां च परावरे तटयुगे तावन्त एवाभवन् । तावन्तः किल वाटिकासु पथिषु छायासु च क्ष्मारुहां तत्रैवं मनुजाकृतौ विलसति श्रीवासुदेवे प्रभौ ॥१०॥ तत्रत्यानां तु भक्तानां नित्यमेव महोत्सवाः । बभूवुः सेवमानानामनुवेलं तमीश्वरम् ॥११॥ राजोवाच – धन्यो राजाऽभयो ब्रह्मन् ! येन भक्त्या वशीकृतः । उवास तद्गृहे साक्षाद्भगवान्निःस्पृहोऽपि सः ॥१२॥ त्वया यदुक्तं भगवान् पुरान्तरजनैर्मुने ! । प्रार्थितो ह्यभयं पृष्ट्वा तत्तत्पुरमगादिति ॥१३॥ पुरान्तरे कुत्र कुत्र ततो गत्वा स सत्पतिः । कृत्वा महोत्सवान्भूयस्तत्रायाद्वद तच्च माम् ॥१४॥ तव नाविदितं किञ्चिच्चरितं तस्य सन्मते ! । तत्प्रसादात्सर्वविदस्तथा तत्पार्श्ववर्तिनः ॥१५॥ एवं प्रतापसिंहेन पृष्टो भागवतो मुनिः । स्मरन्नारायणं चित्ते तमुवाच नराधिपम् ॥१६॥ सुव्रत उवाच – शृणु राजन् ! भगवतश्चरित्राणि वदामि ते । धर्मरक्षावतारस्य

---

અભય રાજાને પૂછીને તે તે ભક્તોના નગરમાં પણ જતા હતા. (૪) અભય ભૂપતિ પોતાના બંધુજનોની સાથે ક્યારેક ક્યારેક પોતાના ઈષ્ટદેવ શ્રીહરિની પાછળ જતા હતા. ક્યારેક ક્યારેક શ્રીહરિની આજ્ઞાથી પોતાના દુર્ગપુરમાં જ શ્રીહરિનું પોતાના હૃદયમાં ધ્યાન કરતા નિવાસ કરતા હતા. (૫)

હે ક્ષિતીશ ! શ્રી નારાયણમુનિ તે તે નગરમાં શ્રીકૃષ્ણના પ્રસિદ્ધ પ્રતાપવાળા મહોત્સવોથી પોતાના ભક્તોને આનંદ પમાડીને ફરીથી પણ તે તે પુરથી દુર્ગપત્તનમાં આવ્યા. (૬) ત્યાં દરેક ઉત્સવમાં હરિભક્ત સ્ત્રીઓ-વૃદ્ધો-નાનાં બાળકો-ગૃહસ્થ ભક્તો તેમજ મુનિઓ : એ બધા ભેગા થઈને આવતા હતા. (૭) હજારો-હજાર ત્યાગીમંડળો તો દુર્ગપુરમાં પ્રતિદિન, શ્રીહરિની આજ્ઞાથી દેશાંતરમાં ગયેલા તે આવતા હતા. અને શ્રીહરિની સમીપમાં લાંબા સમયથી રહેલા તે શ્રીહરિની આજ્ઞાથી દેશાંતરમાં જતા હતા અને દેશાંતરથી આવેલા તે નિવાસ કરીને રહેતા હતા. (૮)

ગઢપુરમાં દર્શન કરવા માટે આવતા અને દર્શન કરીને જતા ત્યાગી અને ગૃહસ્થોના સમુદાયોને ગણતરી કરનારાઓ (સંખ્યા વિશારદો) પણ ગણવા માટે શક્તિમાન થયા જ નહિ. (૯) મનુષ્યાકૃતિ ધારણ કરનાર શ્રી વાસુદેવ ભગવાન દુર્ગપત્તનમાં આ પ્રકારે વિરાજતા હતા ત્યારે અભય રાજાના ભવનમાં જેટલી સંખ્યાવાળા હરિભક્તો હતા, નગરમાં પણ તેટલા જ હતા અને ઉન્મત્તગંગામાં તથા કિનારે પણ તેટલા જ અને ઉત્મત્તગંગાના સામે કાંઠે પણ તેટલા જ હતા. અને લક્ષ્મીવાડીમાં તેટલા જ હતા, માર્ગમાં પણ તેટલા જ હતા અને વૃક્ષોની છાયામાં પણ તેટલા જ હતા. (૧૦) સમય સમય પ્રમાણે શ્રીહરિની સેવા કરનારા ગઢપુરના ભક્તજનોને તો દરરોજ મહોત્સવો થતા હતા. (૧૧)

[નાના પ્રકારનાં ચરિત્રોના શ્રવણ પછી પ્રસન્ન થયેલા છતાં અતૃપ્ત ચિત્તવાળા] **પ્રતાપસિંહ રાજા સુવ્રત મુનિને પૂછે છે** : હે સુવ્રતમુને ! અભયરાજા કૃતાર્થ છે. જે અભય રાજાએ ભક્તિથી વશ કરેલા શ્રીહરિ, સ્પૃહાએ રહિત હોવા છતાં પણ અભયરાજાના મંદિરમાં રહેતા હતા. (૧૨) હે મુને ! પુરાંતરનાં જનોએ પ્રાર્થના કરાયેલા શ્રીહરિ અભયરાજાને પૂછીને તે તે હરિભક્તોના નગરમાં જતા હતા. આવી રીતે જે તમોએ કહ્યું, તો તે સંતપતિ શ્રીહરિ દુર્ગપુરથી કયા કયા બીજા નગરમાં જઈને મહોત્સવો કરી ફરી દુર્ગપુરમાં આવ્યા? અને તે પુરાંતરમાં જઈ જે જે મહોત્સવોરૂપી શ્રીહરિનું ચરિત્ર હોય તે પણ મને કહો. (૧૩-૧૪) હે સન્મતે ! શ્રીહરિની પ્રસન્નતાથી સર્વજ્ઞ તથા સદા શ્રીહરિની સમીપમાં નિવાસ કરનાર તમારે શ્રીહરિનું ચરિત્ર કંઈ પણ નહિ જાણેલું નથી જ. (૧૫) આ પ્રમાણે પ્રતાપસિંહ રાજાએ પૂછેલા શ્રીહરિના એકાંતિક ભક્ત સુવ્રતમુનિ પોતાના મનમાં શ્રીહરિનું ચિંતવન કરતા થકા પ્રતાપસિંહ રાજાને કહેવા લાગ્યા. (૧૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

कुर्वतो भक्ततोषणम् ॥१७॥ वसन्तं तं दुर्गपुरे भक्तसङ्घाः सहस्त्रशः । ग्रामान् पुराणि च स्वेषां नेतुं सम्प्रार्थयन्भृशम् ॥१८॥ कृपानिधिः स भगवान्भक्तवत्सल ईश्वरः । तं तं ग्रामं पुरं प्रायात्तत्तत्प्रियचिकीर्षया ॥१९॥ जन्माष्टम्यादितिथिषु तत्र तत्र महोत्सवान् । चक्रे सच्छास्त्रवार्ताश्च धर्मं भक्तिं च पोषयन् ॥२०॥ बहवः सन्ति हि ग्रामाः पुराणि च नराधिप ! । कृतोत्सवानि हरिणा वृतेन मुनिमण्डलैः ॥२१॥ तानि सर्वाणि तु मया वक्तुं शक्यानि न ध्रुवम् । वदामि कतिचित्तत्र तल्लीलाश्च समासतः ॥२२॥ सौवीरदेशनृपतिः सुरसिंहस्तमार्थयत् । सहैव मुनिभिर्नेतुं स्वीयं मत्स्याह्वयं पुरम् ॥२३॥ संवत्सरे प्रमाथ्याख्ये कृत्वा वासन्तिकोत्सवम् । हरिस्तन्नगरं प्रायादश्वारूढः सपार्षदः ॥२४॥ संस्थापयन्वैदिकधर्मसेतून्निजप्रतापं प्रथयञ्जनेषु । हरन्नधर्मं परिलीयमानं मासं न्यवात्सीत्स च तत्र पुर्याम् ॥२५॥ भक्तस्य राज्ञः सुरसिंहनाम्नो गृहे वसंस्तत्र मुनिः पुराणः । देशान्तरेभ्यो बहुशः स्वभक्तान्समाह्वयामास स पत्रदूतैः ॥२६॥ राजा तमार्चद्वसनैरनर्घ्यैर्विभूषणैर्हेममयैरनेकैः । सच्चन्दनेनोत्तमपुष्पहारैः सहस्त्रशो राजतमुद्रिकाभिः ॥२७॥ राज्ञः स्त्रिया देविकयाऽतिभक्त्या तेजोवतीसंज्ञिकया च पुत्र्या । सहेमसूत्रैर्विविधैः पुपूजे वस्त्रैः सुभोज्यैश्च धनैः प्रभुः सः ॥२८॥ तं केशिनी श्यालकयोषिदस्य महोपचारैः सुपुपूज भक्त्या । अन्याश्च नार्यः शतशः सहस्त्रशः प्रीत्या तमार्चन् पुरुषाश्च राजन् ! ॥२९॥ देशान्तरेभ्यश्च समागता ये नराश्च नार्यश्च हरेः सपर्याम् । संवीक्ष्य हर्षं बहुविस्मयं च प्रापुः स्तुवन्तो भगवत्प्रतापम् ॥३०॥ भक्ष्यभोज्यैर्बहुविधैः साधून्विप्रांश्च वर्णिनः । हरेरनुचरान्सर्वान्नृपोऽतर्पयदन्वहम् ॥३१॥

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પોતાના પ્રિય એકાંતિક ધર્મનું રક્ષણ કરવા માટે અવતાર જેમનો છે એવા, ભક્તોની પ્રસન્નતા કરતાં શ્રીહરિનાં ચરિત્રો તમોને કહું છું તેને તમો સાંભળો. (૧૭) હજારો ભક્તજનોના સંઘોએ ગઢપુરમાં નિવાસ કરતા શ્રીહરિને પોતાના ગામ તથા નગરોમાં લઈ જવા અત્યંત પ્રાર્થના કરાયેલા કૃપાસાગર - ભક્તવત્સલ-સર્વ નિયંતા શ્રીહરિ તે ભક્તોનું પ્રિય કરવાની ઈચ્છાથી તે તે ગામમાં અને તે તે નગરમાં જતા હતા. (૧૮-૧૯) ધર્મ અને ભક્તિનું પોષણ કરતા શ્રીહરિ તે તે ગામમાં અને તે તે પુરમાં જન્માષ્ટમી આદિ તિથિઓમાં મહોત્સવો કરતા હતા અને સત્શાસ્ત્રોની વાર્તાઓ કરતા હતા. (૨૦)

હે રાજન્ ! મુનિમંડળોએ વીંટાયેલા શ્રીહરિએ જેમાં ઉત્સવો કર્યા છે તે ગામો તથા નગરો અસંખ્ય છે. તે સર્વે ગામો તથા પુરો તો મારાથી કહી શકાય તેમ નથી માટે તે ગામો અને પુરોમાં શ્રીહરિએ કરેલી કેટલીક લીલાઓ સંક્ષેપથી કહું છું. (૨૧-૨૨) સૌવીર દેશના અધિપતિ **સુરસિંહ** નામના રાજા શ્રીહરિને સમગ્ર સાધુઓની સાથે જ પોતાના મત્સ્યાવપુરમાં લઈ જવા પ્રાર્થના કરતા હતા. (૨૩) શ્રીહરિ પ્રમાથી નામના સંવત્સર વર્ષમાં સંવત્ ૧૮૬૫ની સાલમાં માઘ સુદી પાંચમને દિવસે વાસંતિકોત્સવ કરી ઘોડા ઉપર બેસી વર્ણી-મુનિ-સોમ-સુરાદિ પાર્ષદે સહિત મત્સ્યાવપુરમાં ગયા. (૨૪)

વૈદિક ધર્મમર્યાદાનું સંસ્થાપન કરતા, લોકોમાં પોતાનો પ્રતાપ વિસ્તારતા ત્યાં ત્યાં ગુપ્તપણે રહેલા અધર્મનો નાશ કરતા શ્રીહરિએ મત્સ્યાવમાં એક માસ સુધી નિવાસ કર્યો . (૨૫) મત્સ્યાવપુરમાં પોતાના સેવક સુરસિંહ રાજાના ગૃહમાં નિવાસ કરતા પુરાણમુનિ શ્રીહરિ પત્રો દ્વારા દેશાંતરોથી ઘણા પોતાના ભક્તોને બોલાવતા હતા. (૨૬)

સુરસિંહ રાજા અતિ મૂલ્યવાળાં વસ્ત્રો- સુવર્ણથી રચેલાં અનેક વિભૂષણો-સુગંધીમાન કેસર-સંયુક્ત ચંદન-ઉત્તમ પુષ્પના હારો - હજારોહજાર ચાંદીની મુદ્રાઓ (રૂપિયા) થી શ્રીહરિનું પૂજન કરતા હતા. (૨૭) દેવિકા નામવાળાં સુરસિંહ રાજાનાં ધર્મપત્ની અને તેજોવતી નામની રાજાની પુત્રી સુવર્ણ તંતુવાળા નાના પ્રકારનાં વસ્ત્રો અને ઘણી રૂપામુદ્રાઓ અને સુસ્વાદિષ્ટ અન્નોથી અતિ ભક્તિપૂર્વક શ્રીનારાયણમુનિને પૂજતા હતા. (૨૮)

પછી હે રાજન્ ! આ સુરસિંહ રાજાના સાળાની પત્ની કેશિનીએ મહા પૂજાની સામગ્રીથી ભક્તિપૂર્વક શ્રીહરિની પૂજા કરી બીજી સો એ સો ને હજારો-હજાર સ્ત્રીઓ તથા પુરૂષો પણ સ્નેહથી તે શ્રીહરિનું પૂજન કરતા હતા. (૨૯) અનેક દેશાંતરોથી આવેલા પુરૂષો અને સ્ત્રીઓ તે શ્રી સહજાનંદસ્વામીની આ રાજા વગેરેએ કરેલી પૂજાને જોઈ ભગવાન શ્રીહરિનાં પ્રતાપને વખાણતા થકા હર્ષ સહિત અતિ આશ્ચર્યને પામ્યા. (૩૦) સુરસિંહ રાજા પ્રતિદિન, બહુ પ્રકારનાં ભક્ષ્ય-ભોજ્યાદિ મિષ્ટ ભોજનોથી સાધુઓ, બ્રાહ્મણો, બ્રહ્મચારીઓ તથા શ્રીહરિનાં અનુચર સોમવર્માદિ પાર્ષદોને તૃપ્ત કરતા હતા. (૩૧)

मुनिमण्डलमध्यस्थं सिंहासनमधिष्ठितः । लक्षशः पुरुषैर्भक्तैः स्त्रीभिश्च परिवेष्टितः ॥३२॥ गायकैः संस्तुतो भक्त्या पूज्यमानश्च सज्जनैः । वादित्रघोषं तुमुलं शृण्वंस्तत्र हरिर्बभौ ॥३३॥ दोलोत्सवदिने खेलन्भक्तैर्मुनिगणैः सह । क्षिपन् गुलालप्रसृतीर्हर्षयामास सोऽखिलान् ॥३४॥ पीतै रक्तैश्च रङ्गैर्दृतिभिरभिधृतैः स्नापयन्नेव भक्तान् रङ्गक्लिन्नाङ्गवासाः श्रमजनितपरिस्वेदमुक्तालिभालः । गृह्णन्नाशु स्वपार्श्वस्थितमुनिकरतः पुष्टमुष्ट्या गुलालं लिम्पंस्तद्वक्त्रमेव स्मितरुचिरमुखो हासयामास स स्वान् ॥३५॥ लीलामेवंविधां कुर्वन्नरनाट्यानुसारिणीम् । जहार जनचेतांसि स्वस्वरूपेऽखिलेश्वरः ॥३६॥ राजर्षेश्च गृहे तस्य नारायणमुनिर्हरेः । मूर्तेर्दामोदराख्यायाः स्थापनं चाप्यचीकरत् ॥३७॥ एकदा तत्र सदसि पूजितश्च नृपेण सः । वीज्यमानश्चामरेण बोधयंस्तं जगाद ह ॥३८॥ श्रीनारायणमुनिरुवाच – ब्राह्मणानां ब्रह्मविदां सेवा कार्या मदाश्रितैः । सर्वे मनोरथाः पूर्णास्तत्प्रसादाद्भवन्ति हि ॥३९॥ गृहस्थानां विशेषेण ब्राह्मणा दैवतं परम् । माननीया नृपैस्ते च राज्यवृद्धिमभीप्सुभिः ॥४०॥ सन्तुष्टाः सेवया विप्राः किं किं न नृपवाञ्छितम् । साधयेयुः स्वतपसा देवान्कुर्युर्हि सेवकान् ॥४१॥ ब्राह्मणानां प्रसादेन पार्थिवा बहवः पुरा । कृत्वा महान्ति पुण्यानि प्राप्ता सिद्धिं सुदुर्लभाम् ॥४२॥ ब्रह्मण्यानां धार्मिकाणां तेषामद्यापि गीयते । यशः सर्वत्र सुमहन्नारदादिभिरुज्ज्वलम् ॥४३॥

---

શ્રીહરિ સભામાં મુનિમંડળનાં મધ્યે રહેલા મહા સિંહાસનમાં વિરાજમાન થઈને લક્ષાવધિ ભક્તો, પુરૂષો અને સ્ત્રીભક્તોથી વિંટાયેલા સતા મુક્તાનંદાદિ ગાયકવૃંદ-સંતોએ ગવાતાં કીર્તનોને વાજિંત્રોના ધ્વનિઓની સાથે સાંભળતા શોભતા હતા. (૩૨-૩૩) પુષ્પદોલ-ઉત્સવનાં દિવસે પોતાનાં ગૃહસ્થ ભક્તો અને સંતવૃંદોની સાથે ક્રીડા કરતા શ્રીહરિ જમણા હાથથી ખોબે-ખોબે ગુલાલ ભક્તજનો ઉપર ફેંકતા થકા સર્વ ભક્તોને અત્યંત આનંદ પમાડતા હતા. (૩૪)

સુવર્ણની પિચકારીમાં ભરેલા, રાતા-પીળા રંગોથી યુક્ત જળની ભક્તજનો ઉપર વર્ષા કરી શ્રીહરિ તેમને રંગજળથી સ્નાન કરાવી દેતા હતા અને પોતે પણ ભક્તોએ છાંટેલા રંગજળથી ભીના થયેલા વસ્ત્રોવાળા, રંગક્રીડાનાં પરિશ્રમથી ઉત્પન્ન થયેલા પરસેવાનાં બિંદુઓથી જાણે કે સૂક્ષ્મ મોતીઓની પંક્તિથી જ જેમ તેમ શોભાયમાન ભાલવાળા, પોતાની પાસે ઊભેલા મુનિના હાથમાં તેણે ધારણ કરેલા, ગુલાલથી ભરેલા મોટા થાળમાંથી મુઠી ભરી ભરી ગુલાલ ભક્તો ઉપર ફેંકતા થકા તે મુનિનાં મુખને જ પોતાની પૂર્ણ ભરેલી મુઠ્ઠીથી ગુલાલનું લેપન કરતા સતા મંદહાસ્યથી સુંદર મુખારવિંદવાળા શ્રીહરિ પોતાનાં ભક્તજનોને ખૂબ હસાવતા હતા. (૩૫)

સર્વના સ્વામી શ્રીહરિ આવા પ્રકારની મનુષ્યના અનુકરણને અનુસરનારી લીલા કરતા સતા પોતાના ભક્તોનાં મન પોતાના સ્વરૂપમાં ખેંચી લેતા હતા. (૩૬) નારાયણમુનિ, રાજર્ષિ સુરસિંહના ભવનમાં દામોદર નામની શ્રીકૃષ્ણની મૂર્તિની પ્રતિષ્ઠાવિધિથી સ્થાપના કરાવતા હતા. (૩૭) એક સમયે સુરસિંહ રાજાના દરબારની અંદર સભામાં બિરાજતા શ્રીહરિની અનેક પ્રકારના ઉપચારોથી પૂજા કરી સુરસિંહ રાજા વીંઝણાથી શ્રીહરિને ચામર ઢોળવા લાગ્યા, તે સમયે શ્રીનારાયણમુનિ તે રાજાને ઉદ્દેશીને હિતનો બોધ આપતાં કહેવા લાગ્યા. (૩૮)

**શ્રીનારાયણમુનિ બોલ્યા** : હે ભક્તો ! મારાં આશ્રિત સર્વજનોએ આત્માપરમાત્માના સ્વરૂપના જાણનારા - વેદ જાણનારા અને તપોનિષ્ઠ બ્રાહ્મણોની સેવા કરવી. તેમની પ્રસન્નતાથી સર્વ મનોરથો સંપૂર્ણ થાય છે. (૩૯) બ્રાહ્મણો ગૃહસ્થાશ્રમી જનોને વિશેષપણે પરમ દેવની માફક પૂજનીય છે. રાજ્યવૃદ્ધિને ઈચ્છતા રાજાઓએ તે બ્રાહ્મણો વિશેષપણે પૂજનીય છે. (૪૦)

સેવાથી સંતોષ પામેલા બ્રાહ્મણો રાજાએ ઈચ્છેલું કયું કાર્ય સિદ્ધ નથી કરતા ? બધું કાર્ય સિદ્ધ કરે છે. તે બ્રાહ્મણો પોતાના તપોબળથી દેવોને રાજાના સેવકો નિશ્ચે કરે છે. (૪૧) પૂર્વે ઘણા રાજાઓ બ્રાહ્મણોના અનુગ્રહથી મહાપુણ્યો કરી અત્યંત દુર્લભ સિદ્ધિને પામેલા છે. (૪૨) બ્રાહ્મણોને દેવની માફક પૂજનારા ધાર્મિક રાજાઓની અતિશય ઉજ્જ્વળ કીર્તિ નારદાદિ મુનિઓએ સર્વ લોકોમાં હાલના સમય સુધી પણ ગવાય છે. (૪૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच – **इति प्रोक्तं भगवता विप्रमाहात्म्यमुत्तमम् । निशम्य सुरसिंहस्तं पप्रच्छ विनयानतः ॥४४॥** सुरसिंह उवाच – **के के नृपाः पुरा स्वामिन् ! केनोपायेन भूसुरान् । इह सन्तोषयामासुस्तन्मे त्वं वक्तुमर्हसि ॥४५॥** सुव्रत उवाच – **इत्थं विशुद्धमतिना विनयेन पृष्टः सौवीरनीवृदधिपेन हरिः प्रसन्नः । प्रोवाच सादरमुदारनराधिपानां चित्रं चरित्रमवनीश ! समासतस्तम् ॥४६॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे मत्स्याह्वयपुरे सुरसिंहनृपादिकृतनारायणार्चनादिनिरूपणनामाऽष्टत्रिंशोऽध्यायः ॥३८॥

श्रीनारायणमुनिरुवाच – **भूप ! पृष्टं त्वया साधु ब्राह्मणेष्वादरोऽस्ति ते । अतोऽहं कथयामि त्वां चरित्रं भूभुजामपि ॥१॥ सन्तोषका ब्राह्मणानां भूरिदानैः सहस्रशः । आसन्नृपतयो भूमौ वंशयोः सूर्यसोमयोः ॥२॥ कथा न शक्या सर्वेषां वक्तुं वर्षशतैरपि । अतः सङ्क्षेपतः किञ्चित्केषाञ्चिच्चरितं ब्रुवे ॥३॥ मरुत्तो नाम नृपतिरासीद्ब्राह्मणपूजकः । यस्याययुर्महायज्ञे सेन्द्रा देवाः सहर्षिभिः ॥४॥ यस्मै पस्पर्ध देवेन्द्रो गुरुस्तत्प्रीतये च यम् । यज्ञं माकुर्विति प्राह संवर्तोऽयाजयत्ततः ॥५॥ यस्य यज्ञे दिव्यरूपा विश्वेदेवाः सभासदः । मरुतः परिवेष्टारः साध्याश्चासन्महात्मनः ॥६॥ नाशकन्दक्षिणा वोढुं यद्यज्ञे ब्राह्मणा अपि । अकृष्टपच्या पृथ्व्यासीद्यस्मिन् राज्यं प्रशासति ॥७॥ तथा सुहोत्रो नृपतिर्द्विजभक्तः पुराऽभवत् । यद्राष्ट्रे मघवाऽवर्षत्सुवर्णं परिवत्सरम् ॥८॥ अन्वर्थाख्या वसुमती नद्यः स्वर्णाम्बुमण्डिताः । नक्रकूर्मादिभिर्हैमैर्युक्तास्तस्मिन्नृपेऽभवन् ॥९॥ सौवर्णान् पातितान् दृष्ट्वा मघोना मकरादिकान् । चक्रेऽर्थिसाच्च तद्द्रव्यं यो नृपः सर्वमेव**

---

**સુવ્રતમુનિ કહે છે :** હે રાજન્ ! ભગવાન શ્રીહરિએ કહેલું ઉત્તમ બ્રાહ્મણ-માહાત્મ્ય સાંભળીને સુરસિંહ રાજા વિનયથી નમ્ર થઈ શ્રીહરિને પૂછવા લાગ્યા. (૪૪) **સુરસિંહ રાજા બોલ્યા :** હે સ્વામિન્ ! પૂર્વે આ લોકમાં કયા કયા રાજાઓ કયા ઉપાયથી બ્રાહ્મણોને સંતોષ પમાડતા હતા ? તમો તે સર્વ મને કહેવા માટે યોગ્ય છો. (૪૫)

**સુવ્રત મુનિ કહે છે :** હે ભૂપતિ ! આવી રીતે વિશુદ્ધ બુદ્ધિવાળા સૌવીર દેશના રાજા સુરસિંહજીએ સ્નેહથી પુછાયેલા શ્રીહરિ પ્રસન્ન થઈ ઉદાર રાજાઓનાં આશ્ચર્યકારી ચરિત્રો સંક્ષેપથી આદરપૂર્વક જેમ હોય તેમ સુરસિંહ રાજાને કહેતા હતા. (૪૬) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે મત્સ્યાહ્વયપુરે સુરસિંહનૃપાદિકૃત-નારાયણાર્ચનાદિ નિરૂપણનામાઽષ્ટત્રિંશોઽધ્યાયઃ (૩૮)*

## અધ્યાય : ૩૯

### બ્રાહ્મણોની પ્રશંસામાં મરૂત્ત વગેરે રાજાઓનું ચરિત્ર શ્રીહરિએ સંક્ષેપથી કહ્યું છે.

**શ્રી નારાયણમુનિ બોલ્યા :** હે રાજન્ ! તમોએ સારું પૂછયું. તમારે બ્રાહ્મણોમાં શ્રદ્ધા છે, માટે હું, બ્રાહ્મણોના પૂજક રાજાઓનું ચરિત્ર પણ તમોને કહું છું. (૧) ઘણા દાનોથી બ્રાહ્મણોને સંતોષ કરનારા હજારો રાજાઓ પૃથ્વીમાં સૂર્યવંશ અને ચંદ્રવંશમાં થયા હતા. (૨) સર્વ રાજાઓની કથા તો સો વર્ષે પણ કહી શકાય નહિ માટે કેટલાક રાજાઓનાં થોડાંક ચરિત્રો સંક્ષેપથી કહું છું. (૩)

પૂર્વે બ્રાહ્મણનો પૂજક **મરૂત્ત** નામનો પ્રસિદ્ધ રાજા હતો; જેના મહાયજ્ઞમાં ઈંદ્રે સહિત દેવતાઓ ઋષિઓની સાથે પ્રત્યક્ષ આવ્યા હતા. (૪) દેવેન્દ્રે મરૂત્ત રાજાની સ્પર્ધા કરી હતી. ગુરુ બૃહસ્પતિએ ઈન્દ્રને પ્રસન્ન કરવા માટે મરૂત્ત રાજાને કહ્યું કે તમો યજ્ઞ ના કરો : આ પ્રમાણે કહ્યું હતું. પછી બૃહસ્પતિના નાના ભાઈ સંવર્તે યજ્ઞ કરાવ્યો હતો. (૫) મહામનવાળા મરૂત્ત રાજાના યજ્ઞમાં દિવ્ય રૂપવાળા વિશ્વદેવો સભાસદો હતા, મરૂતો અને સાધ્ય દેવો પીરસનારા હતા. (૬) જેના યજ્ઞમાં બ્રાહ્મણો પણ દક્ષિણા રૂપે પ્રાપ્ત થયેલાં દ્રવ્યોને વહન કરવા માટે શક્તિમાન થયા નહિ. મરૂત્ત રાજા પ્રજાનું પાલન કરતા હતા ત્યારે વસુંધરા ખેડ કર્યા વિના અનાજ પકવતી હતી. (૭)

તે જ પ્રકારે પૂર્વે બ્રાહ્મણ ભક્ત **સુહોત્ર** નામના રાજા હતા. જેના દેશમાં ઈન્દ્ર એક વર્ષ સુધી સુવર્ણની વૃષ્ટિ કરતો હતો. (૮) તે સુહોત્ર રાજા હતો ત્યારે વસુમતી (વસુ એટલે ધન છે આમાં તે વસુમતી = પૃથ્વી) અર્થયુક્ત સંજ્ઞાવાળી થઈ. સુવર્ણયુક્ત જળોથી શોભાયમાન, સુવર્ણમય મગર-મીન-કાચબાઓ વગેરેથી યુક્ત થઈ. (૯) જે સુહોત્ર નૃપતિએ ઈન્દ્રે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

हि ॥१०॥ तथाङ्गाख्योऽभवद्राजा यो यज्ञे दक्षिणा ददौ । लक्षमश्वांस्तथा कन्या लक्षं हेमपरिष्कृताः ॥११॥ लक्षं धेनूर्वृषान् लक्षं स्वर्णमालाद्यलङ्कृतान् । ददौ विष्णुपदे चन्द्रं सोमेनातर्पयन्नृपः ॥१२॥ चक्रे यज्ञान् शतं चैव प्रीणयन्ब्राह्मणान्सुरान् । अप्रमत्तो विनीतश्च ब्राह्मणाज्ञानुपालकः ॥१३॥ यदङ्गः प्रददौ वित्तं सोमसंस्थासु सप्तसु । न जातो जनिता चान्यः पुमान् यस्तत्प्रदास्यति ॥१४॥ शिबिरौशीनरश्चासीत्पूर्वं राजातिधार्मिकः । रथघोषेण यः पृथ्वीं चर्मवत्समवेष्टयत् ॥१५॥ जैत्रेणैकरथेनैव दिशो जित्वा स्वयं च यः । एकच्छत्रां महीं चक्रे ब्रह्मण्यश्चात्युदारधीः ॥१६॥ यावद्भुवि गवाश्वादि तत्सर्वमददात्क्रतौ । न वोढा यद्धुरां कोऽपि राजेत्याह प्रजापतिः ॥१७॥ तथासीद्भरतो राजा दौष्यन्तिर्भूरिविक्रमः । योऽश्वमेधसहस्रेण राजसूयशतेन च ॥१८॥ ईजे विस्मापयन्देवान्ददावतुलदक्षिणाः। यज्ञेषु बद्वशो यस्य ब्राह्मणा गा विभेजिरे ॥१९॥ रत्नानि कण्वाय ददौ यः पद्मानां सहस्रकम् । खं मर्त्य इव बाहुभ्यां को राजाऽऽप्नोति तद्यशः ॥२०॥ तथा भगीरथो राजा पूर्वमासीच्च यत्क्रतौ । पीत्वा सोमं मदोत्सिक्तो जिग्य इन्द्रोऽसुरान्बहून् ॥२१॥ यो हेमभूषिताः कन्या ददौ यज्ञेषु लक्षशः । सर्वा रथगताः कन्याश्चतुरश्वाश्च ते रथाः ॥२२॥ शतं शतं प्रतिरथं गजा हेमविभूषणाः । गजं गजं चानु हयाः सहस्रं प्रतिवाजि च ॥२३॥ व्यतरद्गोसहस्रं यो यश्च तप्त्वा महत्तपः। गङ्गां पित्रर्थमानिन्ये ख्याता भागीरथीति सा ॥२४॥

---

વરસાદથી ફેંકેલા મગર-કાચબા-માછલા વગેરે જોઈને તે બધું જ દ્રવ્ય અતિથિઓને આપી દીધું. (૧૦)

તે પ્રકારે **અંગ** નામના રાજાએ પોતાના યજ્ઞમાં સુવર્ણથી શણગારેલા ઘોડાઓ તથા સુવર્ણથી શણગારેલી લાખ કન્યાઓ દક્ષિણારૂપે આપ્યાં. (૧૧) અંગ રાજાએ સુવર્ણના હાર વગેરેથી અલંકૃત કરેલી લાખ ગાયો, સુવર્ણની માળાઓથી શણગારેલા લાખ વૃષભો દક્ષિણારૂપે આપ્યા. તથા આકાશમાં રહેલા ચંદ્રને સોમ નામના હવિષ્યાન્નથી તૃપ્ત કર્યો હતો. (૧૨) સાવધાન અને વિનયયુક્ત, બ્રાહ્મણોની આજ્ઞાનું પાલન કરનાર અંગરાજાએ બ્રાહ્મણો અને દેવોને તૃપ્ત કરવા માટે આવી રીતે સો યજ્ઞો કર્યા. (૧૩) અંગરાજાએ અગ્નિષ્ટોમ-અત્યગ્નિષ્ટોમ-ઉકથ-ષોડશી-વાજપેય-અતિરાત્ર અને અપ્તોર્યામઃ આ સાત સોમ સંસ્થાઓમાં જે દ્રવ્ય આપ્યું છે તેવું દ્રવ્ય આપે એવો બીજો પુરુષ ઉત્પન્ન થયો નથી અને થશે પણ નહિ. (૧૪)

પૂર્વે અતિ ધાર્મિક ઉશીનર-દેશાધિપતિ **શિબિ** રાજા હતા, જે શિબિ રાજાએ પોતાના રથના ધ્વનિથી પૃથ્વીને ચામડાથી જેમ તેમ વિંટાળી દીધી. (૧૫) બ્રાહ્મણના પરિપાલક - અતિ ઉદાર-બુદ્ધિશાળી પોતે એકલા શિબિ રાજાએ જેના ઉપર આરોહણ કરનાર અવશ્ય શત્રુઓને જીતે એવા એક રથથી જ દિશાઓને જીતી દિશાઓમાં રહેતા રાજાઓને પરાભવ પમાડીને પૃથ્વીને એક છત્રવાળી કરી હતી. (૧૬) પૃથ્વીમાં જેટલી ગાયો, ઘોડાઓ અને હાથીઓ વગેરે હોય તે સર્વ યજ્ઞમાં આપ્યા હતાં. જે શિબિ રાજાનો રાજ્યભાર કોઈ પણ રાજા વહન કરનાર હતો નહિ માટે પ્રજાપતિ બ્રહ્માએ જેને રાજા કહેલ છે (અર્થાત્ પ્રજાને રંજન કરવાથી રાજા એવી સાર્થક સંજ્ઞા આપી) બીજાઓને નૃપ કહેવાય છે. (૧૭)

તેવી રીતે દુષ્યંતનો પુત્ર બહુ પરાક્રમી **ભરત** નામનો રાજા હતો. જે ભરત રાજા હજાર અશ્વમેધ યજ્ઞો અને સો રાજસૂય યજ્ઞોથી પૂજન કરતો હતો. (૧૮) ઈન્દ્રાદિ દેવોને વિસ્મય પમાડતા સતા પૂજન કરતા હતા. તેમાં અપરિમિત દક્ષિણાઓ રાજાએ આપી. જે ભરત રાજાના યજ્ઞમાં બ્રાહ્મણો અર્બુદ (દશ કરોડ) સંખ્યાવાળી ગાયો ગ્રહણ કરતા હતા. (૧૯) જે ભરત રાજા હજાર રત્નો, હજાર હાથીઓ કણ્વ નામના મુનિને આપતા હતા. મનુષ્ય બે હાથથી આકાશને જેમ તેમ કયો રાજા ભરતની કીર્તિને પામે ? અર્થાત્ કોઈ પામે નહિ. (૨૦)

તેવીજ રીતે પૂર્વે **ભગીરથ** રાજા હતો, જેના યજ્ઞમાં ઈન્દ્રે સોમરસનું પાન કરી મદથી ઉદ્ધત થઈ ઘણા અસુરોને જીત્યા હતા. (૨૧) જે ભગીરથ રાજાએ યજ્ઞમાં સુવર્ણનાં અલંકારોથી શોભાયમાન લાખ કન્યાઓ બ્રાહ્મણોને કન્યાદાનમાં આપી, સમગ્ર કન્યાઓ જે રથમાં બેઠેલી તે રથો ચાર ચાર ઘોડાઓથી જોડેલા હતા. (૨૨) દરેક રથ પ્રત્યે સુવર્ણની ઝુલોથી શણગારેલા સો સો હાથીઓ, દરેક હાથીએ હજાર સુવર્ણના આભૂષણોથી શણગારેલા ઘોડાઓ, દરેક ઘોડે હજાર ગાયો જે ભગીરથ રાજાએ કન્યાદાનની દક્ષિણાપણે આપ્યું હતું અને ભગીરથ મહાતપ કરી પોતાના પિત્રિઓના ઉદ્ધાર માટે સ્વર્ગગંગાને પૃથ્વીમાં લાવ્યા માટે ગંગા ભાગીરથી નામે પ્રસિદ્ધ થઈ. (૨૩-૨૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तथा दिलीपो राजासीद्यत्पुरोधाः प्रतिक्रतु । सहस्रं वारणान्हैमान्दक्षिणां प्राप्तवान्किल ॥२५॥ सौवर्णे यन्महायूपे ननृतुर्देवगायकाः । जगुश्च षट्सहस्राणि यद्गीतेनावृतं जगत् ॥२६॥ नाजीर्यन्त त्रयः शब्दा दिलीपस्य निवेशने । स्वाध्यायघोषो ज्याघोषो दीयतामिति च ध्वनिः ॥२७॥ ददौ यश्च महायज्ञे वसुधां वसुसम्भृताम् । ब्राह्मणेभ्यो महाबाहुर्भूतलं स्वश्चकार यः ॥२८॥ मान्धातासीत्तथा राजा पृषदाज्यसमुद्भवः । युवनाश्वोदराज्जातस्त्रैलोक्यविजयी पुरा ॥२९॥ देवैरुक्ते मात्रभावात्कं धास्यत्ययमित्यथ । मां धातेत्याह मघवा मान्धाताख्यस्ततोऽभवत् ॥३०॥ योऽश्वमेधसहस्रेण राजसूयशतेन च । ईजे तत्र ददौ मत्स्यान् हैमान्रोहितसंज्ञितान् ॥३१॥ शतयोजनदीर्घांश्च तुङ्गांश्चाप्येकयोजनम् । यश्च सर्वान्नृपान् जिग्येऽत्रासयद्रावणादिकान् ॥३२॥ यावत्सूर्य उदेतिस्म यावच्च प्रतितिष्ठति । सर्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥३३॥ तथा ययाती राजासीद्यः सहस्रं क्रतून्पुरा । चक्रे शतं वाजपेयान् जिग्ये पृथ्वीं ससागराम् ॥३४॥ शम्यापातो भवेद्यावदन्तरेण च तावता । पुरःपुरो महीं चित्रां चक्रे यः क्रतुवेदिभिः ॥३५॥ तर्पयामास यो विप्रान् त्रिभिः काञ्चनपर्वतैः । जघ्ने दैत्यान्मृधे चान्ते त्यक्त्वा राज्यं वनं गतः ॥३६॥ तथाम्बरीषो राजासीद्यो युयोज पुरा नृपान् । अयुतं यज्वनो विप्रातिथ्यार्थं स्वमहामखे ॥३७॥ ददौ यथेष्टं विप्रेभ्यो दक्षिणा विविधाश्च यः । यत्प्रसादेन भूपालाः प्राप्ता मुक्तिं सहस्रशः ॥३८॥ शशबिन्दुर्नृपश्चासील्लक्षं यस्याभवन् स्त्रियः । दशलक्षं च तनया धन्विनो हेमकण्टकाः ॥३९॥ शतं कन्या राजपुत्रमेकैकं

તેવી જ રીતે દિલીપ રાજા હતો. જે દિલીપ રાજાના પુરોહિત દરેક યજ્ઞમાં સુવર્ણના બનાવેલા હજાર હાથીઓ દક્ષિણાના રૂપમાં પામેલા હતા. (૨૫) દિલીપના મહાયજ્ઞના સુવર્ણના સ્તંભમાં છ હજાર ગંધર્વો નાચ કરતા હતા અને જેનું યશગાન કરતા હતા. જેનાથી આ સમસ્ત જગત વ્યાપ્ત છે. (૨૬) દિલીપ રાજાના ભવનમાં ત્રણ શબ્દો જૂના થતા નહોતા પરંતુ હંમેશાં પ્રવર્તતા હતા. (૧) વેદાદિ પારાયણનો ધ્વનિ(૨) જ્યાઘોષ = ધનુર્વિદ્યાના અભ્યાસથી ધનુષ્યની પ્રત્યંચાનો ધ્વનિ અને (૩) દીયતામ્ = બ્રાહ્મણોને ઘણી દક્ષિણા આપો : આ ત્રણ શબ્દો જાણવા. (૨૭) જે દિલીપ રાજા પોતાના મહાયજ્ઞમાં રત્ન-સુવર્ણાદિ ધન ભરેલી પૃથ્વી બ્રાહ્મણોને આપતો હતો. મહાભુજાવાળો તે દિલીપ રાજા ભૂતળને સ્વર્ગ કરતો હતો. (૨૮)

તેવી રીતે પૂર્વે પુત્રને માટે ઋષિઓએ અભિમંત્રિત દહીં યુક્ત ઘી રૂપ પૃષદાજ્ય નામનું હવિઃ યુવનાશ્વ રાજાએ અજાણતાથી પીધું. તેનાથી જે ગર્ભનો પ્રાદુર્ભાવ થયો તે યુવનાશ્વના ઉદરથી ઉત્પન્ન થયેલો ત્રણ લોકનો વિજય કરનાર **માંધાતા** નામનો રાજા હતો. (૨૯) આ કુમારને માતા નથી તે કોને ધાવશે ? આ પ્રમાણે દેવોએ કહ્યું ત્યારે ઈન્દ્રે કહ્યું કે, 'માં ધાતા' મને ધાવશે એમ કહીને તેના મુખમાં પોતાની તર્જની આંગળી આપી. માટે માંધાતા એ નામે પ્રસિદ્ધ થયા. (૩૦)

માંધાતા રાજા હજાર અશ્વમેધ યજ્ઞથી અને સો રાજસૂય યજ્ઞથી પૂજન કરતા હતા. તે યજ્ઞોમાં સુવર્ણના કરેલા રોહિત નામનાં મત્સ્યો ચારસો ગાઉ સુધી લાંબાં અને ચાર ગાઉ ઊંચાં મત્સ્યોને આપતા હતા. (૩૧) જે માંધાતા રાજા રાવણ વગેરે સર્વ રાજાઓને જીતતા હતા અને તેઓને ત્રાસ પણ આપતા હતા. (૩૨) સૂર્ય જેટલી પૃથ્વીમાં ઉદય પામે છે અને જેટલી પૃથ્વીમાં આથમે છે તે સર્વે પૃથ્વીનો ભાગ યુવનાશ્વ રાજાના પુત્ર માંધાતા રાજાનું ક્ષેત્ર (રાજ્ય) હતું. (૩૩)

તેવીજ રીતે **યયાતિ** રાજા હતા તે એક હજાર અને એક સો (૧૧૦૦) વાજપેય યજ્ઞો કરતા હતા. સાગરે સહિત પૃથ્વી જીતતા હતા. (૩૪) બળવાન પુરુષે વેગથી ફેંકેલો, સાંબેલા જેવો દંડ જેટલો દૂર પડે તેટલા અંતરમાં આગળ આગળ યયાતિ રાજાએ પૃથ્વીને યજ્ઞની વેદિઓથી ચીતરી દીધી. (૩૫) જે રાજાએ ત્રણ સુવર્ણના પર્વતોના દાનથી બ્રાહ્મણોને સંતોષ પમાડ્યા અને રણસંગ્રામમાં ઈન્દ્રના સહાયકપણે દૈત્યો રૂપ જે અસુરોને હણ્યા. છેવટે વૃદ્ધાવસ્થામાં રાજ્યનો ત્યાગ કરીને વનમાં ગયા. (૩૬)

તે પ્રકારે પૂર્વે **અંબરીષ** રાજા હતા. તે અંબરીષ રાજા અશ્વમેધ યજ્ઞ કરનારા યાજ્ઞિક બ્રાહ્મણોના આતિથ્યસત્કારમાં દશ હજાર રાજાઓને નિયુક્ત કરતા હતા. (૩૭) અંબરીષ રાજા બ્રાહ્મણોને ઈચ્છા પ્રમાણે નાના પ્રકારની દક્ષિણા આપતા હતા, જે અંબરીષ રાજાના અનુગ્રહથી હજારો રાજાઓ મોક્ષ પામેલા છે. (૩૮)

તથા પૂર્વે **શશબિંદુ** નામના રાજા હતા. તે શશબિંદુ રાજાને લાખ સ્ત્રીઓ હતી. ધનુર્ધરા, સુવર્ણના કવચવાળા દશ લાખ પુત્રો હતા. (૩૯) જુદા જુદા એક એક રાજપુત્રની પછવાડે સો સો કન્યાઓ, એકએક કન્યાને ઉદ્દેશીને સો સો

पृथगन्वयुः । कन्यां कन्यां शतं नागाः प्रतिनागं शतं रथाः ॥४०॥ शतमश्वाः प्रतिरथं प्रत्यश्वं गोशतं तथा । एतद्धनं ब्राह्मणेभ्यो योऽश्वमेधे ददौ मखे ॥४१॥ गयश्चाभून्नृपो वर्षशतं यो हुतशेषभुक् । वह्नेर्वरेण चाक्षीणवित्तः श्राद्धश्च सत्यवाक् ॥४२॥ दर्शे च पौर्णमासे च चातुर्मास्ये पुनः पुनः । अयजद्धयमेधेन सहस्त्रं परिवत्सरान् ॥४३॥ गवां लक्षं ब्राह्मणेभ्यो यो ददौ प्रत्यहं नृपः । सोमेनातर्पयद्देवान् कव्यैः पितृन् धनैर्द्विजान् ॥४४॥ दशव्यामां वाजिमेधे हैमीं भूमिं द्विरायताम् । ब्राह्मणेभ्यो ददौ यश्च गङ्गावालुमिताश्च गाः ॥४५॥ तथासीत्सगरो राजा य एकच्छत्रभूपतिः । पुत्राः षष्टिः सहस्त्राणि यस्यासन्भूरिविक्रमाः ॥४६॥ योऽश्वमेधसहस्त्रेण तर्पयामास देवताः । ब्राह्मणानां कामितानि पूरयामास चोत्सुकः ॥४७॥ यः प्रादात्काञ्चनस्तम्भं प्रासादं स्वस्य शोभनम् । भृतं हैमोपकरणैर्ब्राह्मणेभ्यो विभज्य च ॥४८॥ यः पुत्रैः खनयामास पृथिवीं परितो नृपः । यस्य नाम्ना समुद्रश्च सागरत्वमुपागतः ॥४९॥ एवमन्येऽपि बहवो रन्तिदेवादयो नृपाः । ब्राह्मणप्रीणनात्ख्याताः प्राप्ता ऋद्धिं च दुर्लभाम् ॥५०॥ अवमानाद्ब्राह्मणानां प्रणष्टा नहुषादयः । स्वर्गगा अपि राजानो देवा दैत्याः सहस्त्रशः ॥५१॥ कथाविस्तर एतेषां वर्तते भारतादिषु । तस्य तात्पर्यमेतद्धि विप्रा पूज्या नृपैरिति ॥५२॥ तस्मान्नित्यं ब्राह्मणानां कुर्वीत प्रीणनं नृपः । श्रेयोर्थी निर्मदो भूत्वा भ्रश्यत्येवान्यथा श्रियः ॥५३॥ अन्येऽपि ये जनास्ते च ब्राह्मणानां महात्मनाम् । सर्वथा पूजनं कुर्युर्मच्छ्रितास्तु विशेषतः ॥५४॥

---

હાથીઓ-એક એક હાથીની પાછળ સો સો રથો - એક એક રથની પાછળ સો સો ઘોડાઓ તથા એક એક ઘોડા પાછળ સો સો ગાયો; જે શશબિંદુ રાજા કન્યાની સંખ્યાથી ગણેલું આ ધન, હાથી-ઘોડા-રથ અને ગાય રૂપી ધન અશ્વમેધ નામના યજ્ઞમાં બ્રાહ્મણોને આપતો હતો. (૪૦-૪૧)

અને **ગય** નામનો રાજા હતો, શ્રદ્ધાવાળો-સત્યવાણીવાળો જે ગય રાજા સો વર્ષ સુધી યજ્ઞમાં દેવોને તૃપ્તિ પમાડી તેમનું શેષ અમૃતાન્ન ભોજન કરનારો હતો અને અગ્નિના વરદાનથી અક્ષય ધનવાળો હતો. (૪૨) અમાસ, પૂર્ણિમા અને ચાતુર્માસમાં- આ હવિર્યજ્ઞની સંસ્થાવિશેષોમાં વારંવાર હજાર વર્ષ સુધી અશ્વમેધ યજ્ઞથી યજન કરતો હતો. (૪૩) જે ગય રાજા દરરોજ લાખ ગાયો બ્રાહ્મણોને આપતો હતો. સોમ નામના હવિર્વિશેષથી દેવોને તૃપ્તિ પમાડતો હતો. કવ્યોથી અગ્નિઓમાં પિતૃગણોને તૃપ્તિ પમાડતો હતો. દ્રવ્યોથી બ્રાહ્મણોને તૃપ્તિ પમાડતો હતો. (૪૪) પચાસ હાથના વિસ્તારવાળી અને તેનાથી બમણી અર્થાત્ સો હાથ લાંબી સુવર્ણથી નિર્માણ કરેલી પૃથ્વીને પોતે કરેલા અશ્વમેધ યજ્ઞમાં બ્રાહ્મણોને આપતો હતો અને જેટલી ગંગા નદીની રેતીની કણો છે તેટલી ગાયો આપતો હતો. (૪૫)

તેવી જ રીતે **સગર** નામનો રાજા ચક્રવર્તી હતો. તે રાજાને ઘણા પરાક્રમવાળા સાઠ હજાર પુત્રો હતા. (૪૬) મહાઉત્સાહવાન જે સગર રાજા હજાર અશ્વમેધ યજ્ઞથી ઈન્દ્રાદિ દેવતાઓને તૃપ્ત કરતો હતો અને બ્રાહ્મણોને ઈચ્છિત તે તે વસ્તુઓ પૂર્ણ કરતો હતો. (૪૭) જે સગર રાજા અનેક સુવર્ણના સ્તંભો જેમાં છે એવા, સુવર્ણમય પલંગો વગેરે સામગ્રીથી પરિપૂર્ણ અતિ રમણીય પોતાના મહેલનો વિભાગ કરી બ્રાહ્મણોને આપતો હતો. (૪૮) જે સગર રાજાએ સાઠ હજાર પુત્રોદ્વારા ચોતરફ પૃથ્વી ખોદી, સગર રાજાના નામથી સમુદ્ર સાગરપણાને પામ્યો. (૪૯)

આ પ્રકારે રંતિદેવ વગેરે બીજા અનેક રાજાઓ પણ બ્રાહ્મણોની પ્રસન્નતાથી પ્રસિદ્ધ થયા. અને ઈન્દ્રાદિ દેવતાઓને પણ દુર્લભ એવી સંપત્તિ પામ્યા. (૫૦) સ્વર્ગલોકને પામેલા પણ નહુષ વગેરે રાજાઓ બ્રાહ્મણોના અપમાનથી સ્વર્ગમાંથી ભ્રષ્ટપણાને પામ્યા. હજારો દેવતાઓ અને દૈત્યો બ્રાહ્મણોના અપમાનથી નાશ પામેલા છે. (૫૧)

આ બંને પ્રકારના રાજાઓની કથાનો વિસ્તાર ભારત વગેરેમાં છે. તે કથાના વિસ્તારનો અભિપ્રાય રાજાઓએ બ્રાહ્મણોને પૂજવા એ જ છે. (૫૨) હે રાજન્ ! માટે કલ્યાણાર્થી રાજા ગર્વરહિત થઈ નિત્ય બ્રાહ્મણોને પ્રસન્ન કરે. એમ ના કરે તો રાજ્યલક્ષ્મીથી ભ્રષ્ટ થાય છે જ. (૫૩) રાજાઓથી બીજા ગૃહસ્થોએ પણ મહાનુભાવ બ્રાહ્મણોનું સર્વ પ્રકારે પૂજન કરવું. મારા આશ્રિત ગૃહસ્થોએ તો વિશેષપણે બ્રાહ્મણપૂજન કરવું. (૫૪)

सुव्रत उवाच – **इति भूमिपतिं स्वामी निजभक्तं तथाऽपरान् । गृहस्थांश्च ब्राह्मणानां शुश्रूषणमुपादिशत् ॥५५॥ इत्थं स बोधितो राजा जनाः सर्वे च तं प्रभुम् । मुदान्विता नमस्कृत्य तदाज्ञां शिरसा दधुः ॥५६॥ सुखयित्वा निजजनानित्थं तत्र ततो हरिः । चैत्र्यां गम्यं तीर्थमिति तानुक्त्वा निर्ययौ नृप ! ॥५७॥ तद्देशलोकैश्च ततोऽनुयातो भक्तैरनेकैर्मुनिभिः परीतः । उपागमत्सिद्धपदं महात्मा क्षेत्रं पृथिव्यां प्रथितं पवित्रम् ॥५८॥** इति श्री सत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे मत्स्याह्वयपुरब्राह्मणप्रशंसायां मरुत्तादिनृपचरित्रनिरूपणनामैकोनचत्वारिंशोऽध्यायः ॥३९॥

सुव्रत उवाच – **चक्रे स विधिवत्स्नानं तत्र बिन्दुसरोवरे । दानानि दापयामास ब्राह्मणेभ्यो निजाश्रितैः ॥१॥ हिरण्यं रजतं मुक्ता वासांस्याभरणानि च । अश्वांश्च ताम्रपात्राणि द्विजेभ्यः समदीदपत् ॥२॥ ब्राह्मणान् भोजयामास सदन्नैर्मनसःप्रियैः। अन्यानन्नार्थिनश्चापि तोषयामास तत्र सः ॥३॥ माधव्यां पौर्णमास्यां च तत्राभूदुत्सवो महान् । समेता अभवंस्तत्र नरा नार्यश्च भूरिशः ॥४॥ ते च तीर्थविधिं कृत्वा सभायां निशि संस्थितम् । सरस्वत्यास्तटे वृत्वा निषेदुः सर्वतः प्रभुम् ॥५॥ विप्रक्षत्रियविट्शूद्रा वर्णिनो गृहिणस्तथा । सकलाः साधवश्चासंस्तन्मुखार्पितदृष्टयः ॥६॥ प्रच्छन्नवासं तीर्थादावधर्मं स विदन्नथ । उत्सिसादयिषुस्तं च प्राह सर्वान् वचो नृप ! ॥७॥** श्रीनारायणमुनिरुवाच–**जनाश्च ! मुनयो! यूयं मद्वचः शृणुताऽऽदरात् । सर्वेषां वो हितं वच्मि तैर्थिकानां नृणामहम् ॥८॥ इदं हि परमं क्षेत्रं तीर्थानामुत्तमं मतम् ।**

**સુવ્રત મુનિ કહે છે :** હે રાજન્ ! આ પ્રમાણે શ્રીનારાયણમુનિ પોતાના સેવક સુરસિંહ રાજાને અને તેવીજ રીતે બીજા ગૃહસ્થોને બ્રાહ્મણોની સેવા કરવાનો ઉપદેશ આપતા હતા. (૫૫) આ પ્રમાણે શ્રીહરિએ બોધ આપેલા સુરસિંહ રાજા તથા સર્વે ગૃહસ્થજનો હર્ષયુક્ત થઈ શ્રીહરિને નમસ્કાર કરી તેમની આજ્ઞા મસ્તકથી ધારણ કરતા હતા. (૫૬) હે રાજન્, શ્રી નારાયણ મુનિ મત્સ્યાવપુરમાં આ પ્રમાણે પોતાના ભક્તજનોને સુખ આપી 'ચૈત્ર સુદી પૂર્ણિમાને દિવસે તીર્થયાત્રા કરવી' આ પ્રમાણે પોતાના જનોને કહીને મત્સ્યાવપુરથી નીકળ્યા. (૫૭)

પછી સૌવીર દેશના જનોએ અનુગમન કરાયેલા તથા અનેક પોતાના સાધુ અને દેશાંતરના જનોથી વીંટાયેલા મહાત્મા શ્રીહરિ પૃથ્વીમાં પ્રસિદ્ધ પવિત્ર **સિદ્ધપદ** ક્ષેત્રમાં ગયા. (૫૮) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે મત્સ્યાહ્વયપુરબ્રાહ્મણપ્રશંસાયાં મરૂત્તાદિનૃપચરિત્રનિરૂપણ નામૈકોનચત્વારિંશોऽધ્યાયઃ (૩૯)*

## અધ્યાય : ૪૦

### ભક્તજનોનું હિત કરવા ઇચ્છતા શ્રીહરિએ સિદ્ધપદ નામના ક્ષેત્રમાં જે તીર્થવિધિનો ઉપદેશ કર્યો છે તે કહેલો છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! શ્રીહરિ સિદ્ધપુર ક્ષેત્રમાં **બિન્દુ સરોવર**માં વિધિ પ્રમાણે સ્નાન કરતા હતા. પોતાના આશ્રિતો પાસે ત્યાંના બ્રાહ્મણોને દાનો અપાવતા હતા. (૧) સુવર્ણ, ચાંદી, મોતીઓ, વસ્ત્રો, ઘોડાઓ અને તાંબાનાં પાત્રો બ્રાહ્મણોને સારી રીતે અપાવતા હતા. (૨) શ્રીહરિ સિદ્ધપુરમાં મનોહર સુંદર ભોજનોથી બ્રાહ્મણોને જમાડતા હતા; બીજા અન્નાર્થીઓને પણ સંતોષ પમાડતા હતા. (૩)

સિદ્ધપદ ક્ષેત્રમાં ચૈત્ર માસની પૂર્ણિમાને દિવસે મોટો ઉત્સવ થયો. તે ઉત્સવમાં ઘણાં પુરુષો અને સ્ત્રીઓ ભેગાં થયાં હતાં. (૪) તે સર્વ હરિભક્તો તીર્થમાં કરવા યોગ્ય વિધિ કરીને સરસ્વતી નદીના તીરમાં રાત્રિએ સભામાં બેઠેલા શ્રી નારાયણ મુનિની ચોતરફ વીંટાઈ બેઠા. (૫) બ્રાહ્મણ, ક્ષત્રિય, વૈશ્ય, શૂદ્ર તથા વર્ણીઓ અને સાધુઓ-સમગ્ર જનો શ્રીહરિના મુખકમળમાં અર્પણ કરી છે દૃષ્ટિઓ જેમણે એવા થયા. (૬) હે રાજન્ ! પછી તીર્થક્ષેત્રોમાં ગુપ્તપણે રહેલા અધર્મને જાણતા શ્રીહરિએ તે અધર્મનો ઉચ્છેદ કરવા ઈચ્છતા સતા સર્વ ભક્તોને વચન કહ્યું. (૭)

**શ્રી નારાયણ મુનિ બોલ્યા :** હે મારા આશ્રિત ગૃહસ્થો ! હે મુનિઓ ! વર્ણીઓ, તમો સર્વે મારું વચન શ્રદ્ધાપૂર્વક સાંભળો. હું તીર્થયાત્રામાં આવેલા તમો સર્વે મનુષ્યોનું હિત કહું છું. (૮) આ સિદ્ધપદ નામનું સર્વોત્તમ ક્ષેત્ર માનેલું છે. જે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

कर्दमेन तपस्तप्तमस्मिन्बिन्दुसरोवरे ॥९॥ ब्रह्मणो मानसः पुत्रः कर्दमः स प्रजापतिः । तपसाराधयामास कमलाकान्तमीश्वरम् ॥१०॥ तस्मै प्रसन्नो भगवान् वरं दातुमिहाययौ । तपसातिकृशाङ्गं तं स ददर्श प्रजापतिम् ॥११॥ तादृक्तद्दर्शनादत्र न्यपतन्नश्रुबिन्दवः । विष्णोस्तेनास्ति विख्यातमिदं बिन्दुसरोवरम् ॥१२॥ कर्दमाद्देवहूत्यां च कपिलोऽपि महामुनिः । अत्रैव जज्ञे यः प्राह साङ्ख्यज्ञानं निजप्रसूम् ॥१३॥ प्राप्ता सिद्धदशामत्र देवहूतिस्ततो जनाः! । तेन सिद्धपदं प्रोक्तं क्षेत्रमेतन्महर्षिभिः ॥१४॥ यद्यत्तीर्थं भवेद्भूमौ तस्य तस्य यथाविधि । सेवनात्स्याद्यथोक्तं वै फलं पुंसां न चान्यथा ॥१५॥ अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः । हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः ॥१६॥ कामं क्रोधं च लोभं च यो जित्वा तीर्थमाविशेत्। न तेन किञ्चिदप्राप्तं तीर्थाभिगमनाद्भवेत् ॥१७॥ यस्य हस्तौ च पादौ च जिह्वा शिश्नं मनस्तथा । संयतं स्यात्तपो विद्या स तीर्थफलमश्नुते ॥१८॥ योऽकोपनोऽमलमतिः सत्यवादी दृढव्रतः । आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥१९॥ तीर्थे कार्यश्चोपवासः क्षौरं श्राद्धं सपिण्डकम् । विप्राश्च साधवो भोज्या देयं दानं यथाधनम् ॥२०॥ तत्र क्षौरं तु व्रतिभिर्वर्णिभिर्जीवदम्बकैः । नियतक्षौरकालैश्च कारणीयं न योगिभिः ॥२१॥ नारीभिः पतिवत्नीभिः कारणीयं न तत्तथा । दिग्मासाभ्यन्तरे चापि तत्तीर्थे पुनरागमे ॥२२॥ येषु तीर्थेषु ये विप्रा भोज्याः पूज्यास्त एव च । तेषां परीक्षणं तत्र कर्तव्यं नैव सर्वथा ॥२३॥ देवता यत्र या मुख्या शक्त्या कार्यं तदर्चनम् । वासोभूषणनैवेद्य-फलपात्रधनादिभिः ॥२४॥ दरिद्रस्त्वाचरेत्तीर्थे भगवन्मन्दिरे स्वयम् । सम्मार्जनोपलेपादि साधुशुश्रूषणं तथा ॥२५॥

---

માટે આ બિન્દુ સરોવરમાં કર્દમ ઋષિએ તપ કર્યું છે. (૯) બ્રહ્માના સંકલ્પથી ઉત્પન્ન થયેલા પુત્ર, પ્રજાપતિ કર્દમ શ્રી લક્ષ્મીનાથ પરમેશ્વરની તપથી આરાધના કરતા હતા. (૧૦) કર્દમ ઋષિના ઉપર પ્રસન્ન થયેલા ભગવાન વર આપવા માટે આ ક્ષેત્રમાં આવ્યા. તે ભગવાન તપથી દુર્બળ શરીરવાળા કર્દમ ઋષિને જોતા હતા. (૧૧) તેવા પ્રકારના કર્દમ ઋષિને જોવાથી વિષ્ણુ ભગવાનનાં આંસુનાં બિન્દુઓ, આ સરોવરમાં દયાથી પડયાં; તેથી આ સરોવર બિન્દુ સરોવરના નામથી પ્રસિદ્ધ થયું. (૧૨) મહામુનિ કપિલદેવ નામના ભગવાન પણ કર્દમથી તેમનાં દેવહૂતિ પત્નીમાં આ ક્ષેત્રમાં જ પ્રાદુર્ભાવ પામ્યા. જે કપિલ ભગવાને પોતાની માતા દેવહૂતિને સાંખ્યજ્ઞાન કહ્યું હતું. (૧૩)

હે ભક્તો ! તે સાંખ્ય જ્ઞાનના શ્રવણથી દેવહૂતિ આ ક્ષેત્રમાં સિદ્ધગતિને પામેલાં હતાં તેથી વ્યાસાદિ મુનિઓએ આ ક્ષેત્રને **સિદ્ધપદ** નામથી કહેલું છે. (૧૪)

પૃથ્વીમાં જે જે તીર્થ હોય તેનું તેનું યથાવિધિ સેવન કરવાથી પુરુષોને શાસ્ત્રોમાં કહેલું ફળ થાય. એમ ના કર્યું હોય તો શાસ્ત્રમાં કહ્યા પ્રમાણે ફળ થતું નથી. (૧૫) શ્રદ્ધા વિનાનો - પાપાત્મા - નાસ્તિક - સંશયવાળો - હેતુ ખોળનારો - આ પાંચ પુરુષો તીર્થનું ફળ પામતા નથી. (૧૬)

જે પુરુષ કામ, ક્રોધ અને લોભને જીતીને તીર્થમાં જાય તે પુરુષને તીર્થમાં જવાથી કંઈ પણ અપ્રાપ્ય રહેતું નથી અર્થાત્ સર્વ ફળો પણ પ્રાપ્ત થાય. (૧૭) જે પુરુષના બંને હાથ નિયમમાં હોય, બંને પગ, દૃષ્ટિ, જિહ્વા, ઉપસ્થેન્દ્રિય, મન, તપ તથા વિદ્યા આ બધા સદાચાર યુક્ત નિયમમાં હોય તે પુરુષ તીર્થના ફળને પામે છે. (૧૮) જે પુરુષ ક્રોધરહિત, નિર્મળ બુદ્ધિવાળો, સત્યવાદી, દૃઢ વ્રતવાળો, ભૂત પ્રાણીમાત્રમાં આત્મોપમાથી જોનારો તે પુરુષ તીર્થના ફળને પામે છે. (૧૯)

તીર્થમાં ઉપવાસ કરવો, મુંડન કરાવવું અને પિંડદાન સહિત શ્રાદ્ધ કરવું, બ્રાહ્મણો અને સાધુઓને જમાડવા, પોતાની શક્તિ પ્રમાણે દાન આપવું; (૨૦) તેમાં મુંડન તો વ્રતધારી (ચાતુર્માસ વગેરેમાં વ્રતાદિ નિયમવાળા)ઓ, બ્રહ્મચારીઓ, તથા જેમના પિતા જીવતા હોય તેમણે તથા નિયમથી ક્ષૌર કરાવતા હોય તેવા સંન્યાસીઓ અને સાધુઓએ કરાવવું નહિ. (૨૧) તેવી રીતે સધવા સ્ત્રીઓએ મુંડન કરાવવું નહિ. દશ માસની પહેલાં તેજ તીર્થમાં ફરીથી આવવાનું થાય તો મુંડન કરાવવું નહિ. (૨૨) જે તીર્થોમાં જે બ્રાહ્મણ હોય તેમને તૃપ્ત કરવા અને પૂજવા. તીર્થોમાં બ્રાહ્મણોની પરીક્ષા સર્વ પ્રકારે કરવી જ નહિ. (૨૩)

જે તીર્થમાં જે દેવતા મુખ્ય હોય તેનું પૂજન પોતાની શક્તિ પ્રમાણે વસ્ત્ર-ભૂષણ, નૈવેદ્ય, ફળ, પાત્ર, ધનાદિથી કરવું. (૨૪) જે નિર્ધન પુરુષ હોય તે તો ભગવાનના મંદિરમાં વાળે (ધૂળ વગેરે સાફ કરે) અને છાણ વગેરેથી લીંપે વગેરે સેવા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

महापूजाफलं तेन सर्वदानफलं तथा । स तु प्राप्नोति पुरुषः श्राद्धादेश्च न संशयः ॥२६॥ पुण्यतीर्थेषु यत्कर्म मानवैः क्रियते जनाः! । सहस्रगुणितं तद्धि जायते नात्र संशयः ॥२७॥ कृतं तीर्थेष्वल्पमपि यत्पुण्यं तद्विवर्धते । तथैव पापकर्मापि वृद्धिमाप्नोति देहिनाम् ॥२८॥ अन्यत्र यत्कृतं पापं तीर्थे तत्तु विनश्यति । तीर्थकृतं तु यत्पापं वज्रलेपायते हि तत् ॥२९॥ तीर्थे कृतानां पापानां प्रायश्चित्तेन शोधनम् । न जायतेऽतोऽत्र भक्ताः ! स्थातव्यं नियमैः सह ॥३०॥ शारीरं नियमं प्राहुर्ब्राह्मणा मानुषं व्रतम् । मनोविशुद्धिं दैवं च द्वयं रक्षेत्तु तीर्थकृत् ॥३१॥ यो लुब्धः पिशुनः क्रूरो दाम्भिको विषयात्मकः । सर्वतीर्थेष्वपि स्नातः पापो मलिन एव सः ॥३२॥ न शारीरमलत्यागात् पुमान् भवति निर्मलः । मानसे तु मले त्यक्ते भवत्यत्यन्तनिर्मलः ॥३३॥ विषयेष्वतिसंरागो मनसो मलमुच्यते । तेष्वेवातिविरागोऽस्य नैर्मल्यं समुदाहृतम् ॥३४॥ यैर्यैस्तीर्थे कृतं पापं नरास्ते ते पिशाचताम् । डाकिनीशाकिनीभावं प्राप्ताः सन्ति च योषितः ॥३५॥ तेऽत्र तीर्थकृतां छिद्रं पश्यन्त्येव दिवानिशम् । दोषमप्यल्पकं दृष्ट्वा सद्यस्तेषु विशन्ति च ॥३६॥ पुमांसः कामयन्ते स्त्रीः स्त्रियः पुंसश्च तद्वशात्। धनलाभे च हिंसायां प्रवर्तन्ते च ते ततः ॥३७॥ इत्थं तीर्थे महाविघ्ना वसन्तीत्यत्र दुष्कृतात् । भीतैः सनियमैरेव स्थातव्यं मत्समाश्रितैः ॥३८॥ स्त्रीणां निरीक्षणात्स्पर्शान्नर्मक्ष्वेल्यादिभिस्तथा । क्षीयते सुकृतं पुंसां तीर्थेषु विदुषामपि ॥३९॥ एवं स्त्रीणां च सुकृतं परपुंवीक्षणादिना । नश्येत्ततस्तैस्ताभिश्च नियम्यानीन्द्रियाणि हि ॥४०॥

---

તથા સાધુઓની સેવા કરે. (૨૫) તે દરિદ્ર પુરુષ તો પોતે સમ્માર્જનાદિ કરવાથી મહાપૂજાનું ફળ પામે છે તથા સર્વ દાનનું અને શ્રાદ્ધાદિના ફળને પામે છે એમાં સંશય નથી. (૨૬) હે જનો ! મનુષ્યોથી પુણ્ય તીર્થોમાં શ્રાદ્ધ-દાન-મહાપૂજા વગેરે સત્કર્મ કરાય છે. તે સત્કર્મ હજાર ગણું થાય છે. એમાં સંશય નથી. (૨૭)

તીર્થોમાં લગારેક કરેલું પુણ્ય પણ દિવસે દિવસે વૃદ્ધિ પામે છે. તે જ પ્રકારે પ્રાણીઓનું પાપકર્મ થોડું પણ કર્યું હોય તો તે પાપકર્મ પણ દરરોજ વૃદ્ધિ પામે  છે. (૨૮) બીજે ઠેકાણે કરેલું જે પાપ તે તો તીર્થમાં નાશ પામે છે. તીર્થમાં જે પાપ કરે છે તે તો વજ્રની માફક ચોંટે છે જ. (૨૯)

હે ભક્તો ! તીર્થમાં કરેલાં પાપોની નિવૃત્તિ થતી નથી. માટે આ તીર્થમાં (કહેલા નિયમો અને આગળ કહેશે એવા) નિયમોની સાથે રહેવું. (૩૦) પુરાતન ઋષિઓએ શરીરથી કરાયેલા નિયમ જે ઉપવાસાદિ આચરણ વગેરે મનુષ્ય સંબંધી વ્રત કહેલું છે. તથા કામક્રોધાદિ દોષોથી પરાભવ રહિત મનની વિશુદ્ધિને દેવ સંબંધી વ્રત કહેલું છે. તીર્થયાત્રા કરનાર જન મનુષ્યસંબંધી અને દેવસંબધી બંને વ્રતનું રક્ષણ કરે. (૩૧)

જે પુરુષ લોભી, ચાડિયો, ખલ, નિર્દય, દાંભિક અને વિષયી હોય તે પુરુષ સર્વ તીર્થોમાં સ્નાન કરવા છતાં પણ મલિન જ છે. (૩૨)

પુરુષ તીર્થોદકના સ્નાનથી શરીરનો મેલ નાશ પામવાથી નિવૃત્ત પાપવાળો થતો નથી. મનનો મેલ નાશ પામવાથી અત્યંત નિર્મળ થાય છે. (૩૩) પંચ વિષયોમાં અતિ આસક્તિ છે તે મનનો મેલ છે. તે વિષયોમાં અત્યંત આસક્તિએ રહિતપણું છે તે મનની નિર્મળતા કહેલી છે. (૩૪)

જે જે પુરુષોએ તીર્થમાં પાપ કર્યું તે તે પુરુષો પિશાચપણાને પામેલા છે. જે જે સ્ત્રીઓએ તીર્થમાં પાપ કરેલું છે તે તે સ્ત્રીઓ ડાકણ અને ચૂડેલો થયેલી છે. (૩૫) તે પિશાચભાવને પામેલા પુરુષો અને સ્ત્રીઓ આ તીર્થમાં રહ્યા સતા તીર્થાચરણ કરનારા જનોનું પાપાચરણરૂપ છિદ્ર રાત્રિ-દિવસ જુએ છે. તે તીર્થ કરનારા પુરુષો અને સ્ત્રીઓમાં થોડોક દોષ જોઈને તત્કાળ જ તેઓમાં પ્રવેશ કરે છે. (૩૬) પછી પિશાચાદિના આવેશપણાથી જ તે પુરુષો અને સ્ત્રીઓ ઉપભોગ કરવા ઈચ્છે છે. તે સ્ત્રીઓ અને પુરુષો ધનપ્રાપ્તિ અને હિંસામાં પ્રવર્તે છે. (૩૭)

આ પ્રમાણે તીર્થમાં મહા અંતરાયો (વિઘ્નો) રહે છે. માટે મારા આશ્રિત જનોએ આ તીર્થમાં પાપકર્મથી ભય પામેલા સતા નિયમોએ સહિત જ રહેવું. (૩૮) તીર્થોમાં પરસ્ત્રીઓના જોવાથી તથા અંગના સ્પર્શથી-હાસ્ય કરવાથી  અને ક્રીડા કરવાથી પંડિતોનું પણ પુણ્ય નાશ પામે છે. (૩૯) એજ રીતે પરપુરુષના જોવા વગેરેથી સ્ત્રીઓનું પુણ્ય નાશ પામે છે માટે પુરુષો અને સ્ત્રીઓએ ચક્ષુ આદિક ઈન્દ્રિયોને વશ રાખવી. (૪૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**क्रोधश्च सर्वदा जेयस्तीर्थेषु तु विशेषतः । अन्यथा सुकृतं सोऽपि भस्मसात्कुरुते नृणाम् ॥४१॥ आपत्कालं विना विप्रैर्ग्राह्यो नैव प्रतिग्रहः । तीर्थेषु तु विशेषेण तपस्तेजोहरो हि सः ॥४२॥ न भाषणीयमनृतं पुंसा तीर्थविचारिणा । भेतव्यं जीवहिंसायाः सर्वथा पापकर्मणः ॥४३॥ स्वनित्यकर्मणा विष्णोरर्चाश्रवणकीर्तनैः । स्मरणेन च दानाद्यैरहर्नेयं न चान्यथा ॥४४॥ इत्थं कुर्युर्हि ये लोके तीर्थयात्रां तु मानवाः । तेषां भवेत्तीर्थफलं नान्येषामिति निश्चयः ॥४५॥** सुव्रत उवाच – **भक्तास्त इत्थं हरिणा शिक्षितास्तद्वचो नृप !। तथेति जगृहुः प्रीत्या द्राक् तादृग्वर्तना अपि ॥४६॥ तत्राखिलं तीर्थविधिं विधाय स्वयं विधिज्ञः सह भक्तसङ्घैः । आनन्दयन्नध्वनि मानवौघानुपाययौ विश्नगरं मुनीशः ॥४७॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे सिद्धपुरक्षेत्रे तीर्थविध्युपदेशनामा चत्वारिंशोऽध्यायः ॥४०॥

सुव्रत उवाच – **सनतिनुतिपरैः पुरार्थितः स्वैर्हरिरधुनैति किलेत्यथो निशम्य । वटनगरजनैः सहाभिजग्मुः सपदि च विश्नगरौकसो जनास्तम् ॥१॥ अधिकतरदयालुतां प्रभोस्ते निजहृदयेषु विदन्त एव तस्य । निजजनवृतवेगिसैन्धवस्थं पथि ददृशुस्तमशेषभक्तबन्धुम् ॥२॥ प्रणम्य तं भूरिमुदः पुरं ते सहाययुस्तेन नराधिप ! स्वम् । वादित्रघोषैश्च विचित्रगीतैर्धरामराणां सह वेदघोषैः ॥३॥ विधाप्य तस्योचितवेश्मवासं सहानुगस्याथ मुदैव चक्रुः । यथार्हमातिथ्यमवापुरेते ह्येतत्फलं**

ક્રોધ હંમેશાં જીતવો. તીર્થોમાં તો અધિકપણે જીતવો. એમ ન કરે તો ક્રોધ પણ તીર્થ કરનાર જનોનું પુણ્ય ભસ્મ કરી નાખે છે. (૪૧) બ્રાહ્મણોએ આપત્કાળ પડ્યા વિના પ્રતિગ્રહ કરવો નહિ. તીર્થોમાં તો વિશેષપણે કરવો નહિ. કારણ કે તે પ્રતિગ્રહ તપ અને બ્રહ્મતેજને નાશ કરનાર છે. આપત્કાળમાં દોષ નથી. (૪૨) તીર્થમાં ફરનાર પુરુષે અસત્ય વચન બોલવું નહિ. જીવહિંસા અને બીજા કોઈ પણ પાપાચરણથી સર્વ પ્રકારે ભય પામવો. (૪૩)

પોતાનાં સંધ્યા-વંદનાદિ નિત્યકર્મથી શ્રીકૃષ્ણનું પૂજન, શ્રવણ, કીર્તન અને સ્મરણ, દાન વગેરેથી દિવસ કાઢવો. બીજે પ્રકારે દિવસ કાઢવો નહિ. (૪૪) લોકમાં જે મનુષ્યો આ પ્રમાણે તીર્થયાત્રા કરે છે તે મનુષ્યોને તો (શાસ્ત્રોક્ત પ્રમાણે) તીર્થનું ફળ થાય. આ પ્રમાણે નહિ કરનાર મનુષ્યને તીર્થફળ થતું નથી. આ પ્રમાણે શાસ્ત્રનાં વાક્યોથી મેં નિર્ણય કરેલો છે. (૪૫) હે રાજન્ ! શ્રી નારાયણ મુનિએ આ પ્રમાણે બોધ કરાયેલા તે ભક્તો શ્રીહરિએ કહ્યા પ્રમાણે વર્તનારા હતા તોપણ શ્રીહરિનું વચન 'તમારા કહ્યા પ્રમાણે અમો વર્તીશું' એમ સ્નેહપૂર્વક તત્કાળ ગ્રહણ કરતા હતા. (૪૬)

તીર્થવિધિને જાણનાર, મુનિપતિ સ્વયં શ્રીહરિ ભક્તજનોના સંઘોની સાથે સિદ્ધપુરમાં સમગ્ર તીર્થવિધિ કરી માર્ગમાં મનુષ્યસમુદાયોને આનંદ આપતા વિશનગરની સમીપમાં આવી પહોંચ્યા. (૪૭) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે સિદ્ધપુરક્ષેત્રે તીર્થવિધ્યુપદેશનામા ચત્વારિંશોऽધ્યાયઃ (૪૦)*

## અધ્યાય : ૪૧

### વડનગર અને વિશનગર આ બંને નગરોમાં બ્રાહ્મણોને જમાડ્યા અને ચાતુર્માસમાં તપ નામનું વ્રત કહ્યું છે.

**સુવ્રત મુનિ કહે છે :** હે રાજન્ ! પછી નમસ્કારપૂર્વક સ્તુતિપરાયણ પોતે ભક્તજનોએ પ્રથમથી જ પોતાના પુરમાં આવવા માટે પ્રાર્થના કરાયેલા શ્રીહરિ હાલમાં જ આવે છે : આ પ્રમાણે સાંભળી વિશનગરના નિવાસી તથા વડનગરના નિવાસી ભક્તજનો સાથે મળી તત્કાળ જ શ્રીહરિની સન્મુખ ગયા. (૧) શ્રીહરિનું અત્યંત દયાળુપણું પોતાનાં હૃદયોમાં જાણતા બંને નગરના ભક્તજનો, પોતાનાં ભક્તજનોએ વીંટાયેલા મહા વેગવાળા ઘોડા ઉપર બેઠેલા સમગ્ર ભક્તજનોના હિતકર્તા શ્રીહરિને માર્ગમાં જ જોતા હતા. (૨)

હે નરાધિપ ! પછી સાષ્ટાંગ નમસ્કાર કરી અત્યંત આનંદવાળા તે ભક્તો વાજિંત્રોના ધ્વનિઓ, વિચિત્ર નાના પ્રકારનાં પદોનાં ગાયનો અને બ્રાહ્મણોના વેદધ્વનિઓની સાથે પોતાના પુર વિશનગરમાં શ્રી હરિની સાથે આવ્યા. (૩) પછી એ ભક્તો, વર્ણિ-સાધુ-પાર્ષદોએ સહિત શ્રીહરિનો યોગ્ય ભવનમાં નિવાસ કરાવી યથાયોગ્ય આતિથ્ય સત્કાર હર્ષપૂર્વક કરતા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

स्वीयमनोरथस्य ॥४॥ सूर्यशर्मा मौक्तिकश्च वनमाल्युद्यमस्तथा । अमूल्यश्चामिरामाद्यास्तमसेवन्त वाडवाः ॥५॥ पीताम्बरो गणेशश्च पुञ्जश्चेलादयोऽपरे । भक्ताः शुश्रूषणं तस्य चक्रुः सहमुनेर्मुदा ॥६॥ दुर्लभा चोज्ज्वला ज्येष्ठा हृद्योदयकुमारिका । सुवर्णा यतिनी ज्ञाना पुञ्जा धनवती तथा ॥७॥ शृङ्खलाप्रमुखाश्चान्या योषा धर्मस्थिता हरिम् । परिचेरुरतिप्रीत्या जनाश्च शतशोऽपरे ॥८॥ नवीनवस्त्रभूषाभिर्बहुभिश्च धनैः प्रभुम् । भक्ता आनर्चुरखिला गन्धपुष्पादिभिश्च तम् ॥९॥ ब्राह्मणांस्तर्पयामास तत्र स्वामी सहस्रशः । तथैव वटपुर्यां च पक्वान्नैर्विविधैर्नृप ! । ॥१०॥ लड्डुकैर्मौक्तिकाख्यैश्च कंसारैर्घृतपूरकैः । संयावपायसापूपैः शष्कुलीखाजकादिभिः ॥११॥ नानाविधैर्व्यञ्जनैश्च शर्कराम्रसादिभिः । तोषयन्स द्विजान्सम्यक्सद्धर्मं चाप्यतिष्ठिपत् ॥१२॥ सार्धमासद्वयं हीत्थं भोजयामास वाडवान् । रथयात्रोत्सवं भूरिसम्भारेणाकरोच्च सः ॥१३॥ जनाः श्रीनगरस्थास्तमथैत्य प्रार्थयन्भृशम् । स्वपुरागमनायैव तानुवाच तदा हरिः ॥१४॥ जन्माष्टम्युत्सवं कर्तुं तत्रायास्याम्यहं स्वयम् । साम्प्रतं स्वपुरं यातेत्युक्तास्ते तु ययुर्नृप ! ॥१५॥ सभायां प्रत्यहं वार्ता अपराह्णे तथा निशि । एकान्तधर्मसम्बद्धाश्चकार सुखदा नृणाम् ॥१६॥ आषाढशुक्लदशमीप्रदोषे जनसंसदि । महासनस्थो भगवान् प्राह भक्तानिदं वचः ॥१७॥ एकादश्याः श्व आरभ्य चातुर्मास्यमुपागतम् । तप एवात्र कर्तव्यं यथाशक्त्यखिलैर्जनाः ! ॥१८॥ जना ऊचुः – कीदृक् तपोऽत्र भगवन् ! कर्तव्यं मानवैर्भुवि । वक्तुमर्हसि तच्च त्वं धर्मवर्त्मप्रवर्तकः ॥१९॥

---

હતા : આ પ્રમાણે પોતાના મનોરથનું (શ્રીહરિના આતિથ્ય સત્કારનો લાભ રૂપ) ફળ પામ્યા. (૪) સૂર્યશર્મા-મોતીરામ-વનમાળી-ઉત્તમરામ (ઉદ્યમ) - અમૂલ શર્મા - અમીરામ વગેરે બ્રાહ્મણો તથા પીતાંબર-ગણેશ-પુંજો-ચેલો વગેરે બીજા ભક્તો મુનિઓએ સહિત શ્રીહરિની સેવા હર્ષથી કરતા હતા. (૫-૬) તથા દુર્લભા-ઉજ્જવળા-જ્યેષ્ઠા-હૃદ્યા- ઉદયકુમારી-સુવર્ણા-યતિની-જ્ઞાના-પુંજા-ધનવતી તથા સાંકળા વગેરે પોતાના ધર્મમાં રહેલી અન્ય સ્ત્રીઓ પણ અતિ સ્નેહથી શ્રીહરિની સેવા કરતી હતી; તેમજ સો એ સો બીજા ભક્તજનો પણ સેવા કરતા હતા. (૭-૮)

આ કહેલા સમગ્ર ભક્તો ઘણાં નવીન વસ્ત્રો-અલંકારો અને ધનોથી અને સુગંધીમાન ચંદન-પુષ્પના હારો વગેરેથી શ્રીહરિનું પૂજન કરતા હતા. (૯) હે નૃપ ! શ્રી સહજાનંદ સ્વામી વિશનગરમાં, તે જ પ્રકારે વડનગરમાં હજારો બ્રાહ્મણોને વિવિધ પ્રકારનાં ભોજનોથી ભોજન કરાવતા હતા. (૧૦) મોતિયા લાડુ-કંસાર-ઘેબર-શીરો-દૂધપાક-માલપુવા-જલેબી અને ખાજાં-પેંડા-બરફી વગેરે જમાડતા હતા. (૧૧) બહુ પ્રકારનાં શાકો અને સાકરે સહિત આંબાના રસો તથા રાયણનાં ફળો વગેરેથી બ્રાહ્મણોને સારી રીતે જમાડતા શ્રીહરિ સદ્ધર્મનું પણ સ્થાપન કરતા હતા. (૧૨)

શ્રીહરિ આવી રીતે અઢી માસ સુધી બ્રાહ્મણોને જમાડતા હતા અને ઘણી સામગ્રીઓના સંપાદનથી અષાઢ સુદી બીજને દિવસે ભગવાનનો રથયાત્રાનો ઉત્સવ કરતા હતા. (૧૩) પછી શ્રીનગરના જનો, નથુભટ્ટ વગેરે હરિભક્તો શ્રીહરિને મળીને પોતાના પુરમાં આવવા માટે અત્યંત પ્રાર્થના કરતા હતા. તે સમયે શ્રીહરિએ ભક્તજનોને કહ્યું, હે ભક્તજનો ! હું શ્રીનગરમાં જન્માષ્ટમીનો ઉત્સવ કરવા આવીશ. હાલમાં તો તમો પોતાના નગરમાં જાઓ આ પ્રમાણે શ્રીહરિએ કહેલા ભક્તજનો પોતાના પુરમાં ગયા. (૧૪-૧૫)

શ્રીહરિ દરરોજ અપરાહ્ન (સાંજના પ્રહર) સમયે તથા રાત્રિએ સભામાં મનુષ્યોને સુખ આપનારી એકાંતિક ધર્મના આશ્રયવાળી વાર્તાઓ કરતા હતા. (૧૬) અષાઢ સુદી ૧૦ દશમીને દિવસે સંધ્યા સમયે સિંહાસનમાં બેઠેલા શ્રીહરિ સભામાં બેઠેલા ભક્તજનોને આ પ્રમાણે વચન કહેવા લાગ્યા : (૧૭) હે ભક્તો ! આવતી કાલે એકાદશીથી આરંભીને ચાતુર્માસ આવ્યો છે. આ ચાતુર્માસમાં સમગ્ર મારા આશ્રિતોએ પોતાની શક્તિ પ્રમાણે તપ જ કરવું. (૧૮) આવું શ્રીહરિનું વચન સાંભળી **હરિભક્તો બોલ્યા** - હે ભગવન્ ! પૃથ્વીમાં તમારા આશ્રિત અમોએ આ ચાતુર્માસમાં કેવા પ્રકારનું તપ કરવું ? ધર્મમાર્ગના પ્રવર્તક તમો તે તપ કહેવા માટે યોગ્ય છો. (૧૯)

श्रीनारायणमुनिरुवाच – **चातुर्मास्ये तपः कार्यं जना ! यत्तद्ब्रवीम्यहम् । इन्द्रियाणां च मनस एकाग्र्यं परमं तपः ॥२०॥ एकाग्र्यं वासुदेवे तु पुष्टानां स्वेप्सितै रसैः । नेन्द्रियाणां भवेत्तस्मात्कार्यं विषयवर्जनम् ॥२१॥ एन्द्रियेषु रसेष्वेको जैह्व्यो मुख्यो रसो मतः । प्रयत्नतः स जेतव्य उपवासैस्तपस्यता ॥२२॥ चक्रिरे चतुरो मासानुपवासानतोऽखिलाः । प्राचीनाः पुरुषाश्चाद्य केचित्कुर्वन्ति योगिनः ॥२३॥ तथा कर्तुमशक्यं हि कलावत्राखिलैर्नरैः। फलाहारः पयःपानं कार्यं वैकान्नमत्र तत् ॥२४॥ शाकत्यागोऽथवा कार्यः शाकाहारोऽथवा नृभिः । दधिप्राशस्तिलप्राशो घृतत्यागश्च सद्व्रतम् ॥२५॥ वर्ज्यं च श्रावणे शाकं दधि भाद्रपदे तथा । दुग्धमाश्विनमासे च द्विदलं मासि कार्तिके ॥२६॥ वृन्ताकं च कलिङ्गं च मूलकं च कदाचन । चातुर्मास्ये नैव भक्ष्यं त्रैवर्णिकजनेन तु ॥२७॥ गोदानं वा स्वर्णदानमन्नदानं तथान्वहम् । यथाशक्ति विधातव्यं गृहस्थैर्दम्भवर्जितम् ॥२८॥ धारणापारणाख्यं च व्रतं श्रेष्ठमिहोदितम्। गृहिभिस्त्यागिभिस्तत्तु कर्तुं शक्यं महाफलम् ॥२९॥ अवश्यमेतत्कर्तव्यं यौवने व्रतमुत्तमम् । पुरुषैरपि नारीभिर्विधवाभिर्विशेषतः ॥३०॥ व्रताङ्गभूता नियमा ब्रह्मचर्यादयोऽखिलाः । पालनीयाः प्रयत्नेन श्रम एवान्यथा भवेत् ॥३१॥ कर्तृशक्तिमपेक्ष्यैव चातुर्मास्ये व्रतानि तु । पुराणे बहुधोक्तानि सन्ति कार्याणि तानि वा ॥३२॥ सकामैर्वापि निष्कामैश्चातुर्मास्यव्रतानि तु । स्वस्वशक्त्यनुसारेण कर्तव्यानि प्रयत्नतः ॥३३॥ सकामाः प्राप्नुवन्त्येव तत्तत्फलमसंशयम्। निष्कामानां भवत्येव वासुदेवप्रसन्नता ॥३४॥ अन्ते व्रतानां समनुष्ठितानां सन्तर्पणं विप्रसतां स्वशक्त्या । विधेयमर्चासहितं मुरारेस्तेनैव सर्वं फलमाप्यते वै ॥३५॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे विश्नगरवटनगरयोर्ब्राह्मणभोजनानन्दवर्णननामैकचत्वारिंशोऽध्यायः ॥४१॥

---

**ચાતુર્માસમાં વ્રત અને તપનાં નિયમો :-** શ્રીનારાયણ મુનિ બોલ્યા : હે ભક્તો ! હું ચાતુર્માસમાં અવશ્ય કરવા યોગ્ય જે તપ તે તમોને કહું છું. ચક્ષુ વગેરે પાંચ જ્ઞાનેન્દ્રિયો અને મનનું બીજા વિષયોનો ત્યાગ કરી શ્રી વાસુદેવપરાયણ થવું તે સર્વોત્તમ તપનું સ્વરૂપ છે. (૨૦) પોતાને ઈચ્છિત માયિક તે તે ઈન્દ્રિયોના વિષયોથી પુષ્ટ થયેલી ઈન્દ્રિયોનું વાસુદેવમાં એકાગ્રપણું થાય નહિ, માટે વિષયનો ત્યાગ કરવો. (૨૧)

ઈન્દ્રિયો સંબંધી રસોમાં એક જિહ્‌વા ઈન્દ્રિય સંબંધી રસાસ્વાદરૂપ વિષય મુખ્ય માનેલો છે. તપ કરનાર પુરુષે જિહ્‌વા સંબંધી રસ, પ્રયત્નપૂર્વક કરેલા ઉપવાસોથી જીતવો. (૨૨) જે માટે પ્રાચીન સમગ્ર યોગીપુરુષોએ ચાર માસ પર્યંત ઉપવાસો કરેલા છે. હાલમાં પણ કેટલાક યોગીપુરુષો કરે છે. (૨૩) આ કળિયુગમાં સમગ્ર પુરુષોએ ચાર માસ સુધી ઉપવાસ કરવા. શક્તિમાન ના હોય તેમણે તો ચાતુર્માસમાં ફળાહાર કરવો અથવા કેવળ દુગ્ધપાન કરવું અથવા એક અન્નનું ભોજન કરવું; (૨૪) અથવા માણસોએ શાકનો ત્યાગ કરવો અથવા શાકાહાર કરવો અથવા કેવળ દહીં જ ખાવું અથવા કેવળ તલનું ભોજન કરવું અથવા ઘીનો ત્યાગ કરવો : આ બધાં સદ્‌વ્રત છે. (૨૫) શ્રાવણ માસમાં શાકનો ત્યાગ કરવો, ભાદરવા માસમાં દહીંનો ત્યાગ કરવો. આસો માસમાં દૂધનો ત્યાગ કરવો અને કારતકમાસમાં દાળનો ત્યાગ કરવો. (૨૬) ચાતુર્માસમાં ત્રણ વર્ણના માણસોએ વૃંતાક, કાળીંગડું અને મૂળો એ ક્યારેય પણ ખાવાં નહિ. (૨૭)

ધનવાન ગૃહસ્થોએ પ્રતિદિન ગૌદાન અથવા સુવર્ણદાન પોતાની શક્તિ પ્રમાણે દંભે રહિત કરવું. (૨૮) ચાતુર્માસમાં ધારણા-પારણા વ્રત શ્રેષ્ઠ કહેલું છે, મહાફળને આપનારું તે વ્રત ગૃહસ્થોએ અને ત્યાગીઓએ કરવા યોગ્ય છે. (૨૯) સર્વોત્તમ આ વ્રત પુરુષો અને સ્ત્રીઓએ યૌવન અવસ્થામાં અવશ્ય કરવું. વિધવા સ્ત્રીઓએ વિશેષપણે કરવું. (૩૦) બ્રહ્મચર્ય વગેરે, વ્રતના અંગભૂત સમગ્ર નિયમો પ્રયત્નથી પાલન કરવા. બ્રહ્મચર્યાદિ નિયમ ના પાળે તો કેવળ શરીરને ક્લેશ થાય. વ્રતનું ફળ થાય નહિ. (૩૧)

વ્રત કરનારના શરીરની શકિત જોઈને જ પુરાણો (બ્રહ્મવૈવર્ત વગેરે)માં ચાતુર્માસનાં વ્રતો બહુ પ્રકારના કહેલાં છે, તે વ્રતો પણ કરવાં. (૩૨) સકામ અને નિષ્કામ પુરુષોએ પણ ચાતુર્માસનાં વ્રતો પોતપોતાની શક્તિને અનુસરીને પ્રયત્નપૂર્વક કરવાં. (૩૩) સકામીજનો તે તે વ્રતનું ફળ પામે છે જ. નિષ્કામી જનોને વાસુદેવની પ્રસન્નતા અવશ્ય થાય છે, જ. એમાં લેશમાત્ર સંશય નથી. (૩૪)

નિયમોની સાથે સારી રીતે પાલન કરાયેલાં વ્રતોની સમાપ્તિમાં શ્રીકૃષ્ણના પૂજન સહિત બ્રાહ્મણો અને સાધુઓને મિષ્ટાન્નોથી ભોજન પોતાની શક્તિ પ્રમાણે કરાવવું, તેનાથી સર્વવ્રતોનું ફળ નિશ્ચે પમાય છે. (૩૫)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે વિશ્નગરવટનગરયોર્બ્રાહ્મણભોજનાનંદ-વર્ણનનામૈકચત્વારિંશોઽધ્યાયઃ (૪૧)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच – **व्रतान्युक्तानि सामान्यादथ वः कथये जनाः ! । कर्तव्यानि विशेषेण मदीयैर्विधिपूर्वकम् ॥१॥ आषाढशुक्लैकादश्यां चातुर्मास्यव्रतस्य तु । आदितो नियमो ग्राह्यः श्रीकृष्णप्रतिमान्तिके ॥२॥ अथवा कृष्णभक्तस्य स्वधर्मदृढसंस्थितेः । पुरतो नियमो ग्राह्यः प्रातः स्नात्वेशतुष्टये ॥३॥ इदं व्रतं मया देव ! गृह्यते तव सन्निधौ । निर्विघ्नं सिद्धिमायातु प्रसादात्तव केशव ! ॥४॥ गृहीतेऽस्मिन्व्रते देव ! पञ्चत्वं यदि मे भवेत् । तदा तदस्तु सम्पूर्णं प्रसादात्त इतीरयेत् ॥५॥ एवं सम्प्रार्थ्य गोविन्दमारभेत व्रतं शुचिः । रक्षन् व्रताङ्गनियमान् पुमान् स्त्री च यथोचितम् ॥६॥ स्वभर्तुराज्ञया कार्यं व्रतं सधवयोषिता । न स्वातन्त्र्येण कर्तव्यं विधाय कलहं गृहे ॥७॥ अनुसृत्य स्वाधिकारं गृहिभिस्त्यागिभिस्तथा । गृहीतव्यं व्रतं प्रीत्या पाल्यं तच्च निरन्तरम् ॥८॥ प्राप्तायां क्वाप्यापदि तु देशकालानुसारतः । वर्तितव्यं यथाशक्ति कृष्णः सर्वमवैति यत् ॥९॥ श्रीभागवतप्रमुखपुराणस्यानुवासरम् । कर्तव्यं श्रवणं नित्यं कीर्तनं वापि पाठनम् ॥१०॥ श्रवणे वाचकः पूज्यो व्रतान्ते निजशक्तितः । ब्राह्मणाः साधवश्चार्च्या भोजनीयाश्च सादरम् ॥११॥ कीर्तने पाठने चापि महापूजा रमापतेः । अन्ते कार्यं साधुविप्राभ्यर्चनादि च सिद्धिदम् ॥१२॥ व्रतत्रयमिति प्रोक्तं पुण्यं कर्तव्यमादरात् । दशमस्कन्धमात्रस्य श्रवणादिव्रतं तथा ॥१३॥**

---

## અધ્યાય : ૪૨

### વિશનગરમાં શ્રીહરિએ શુભ ચાતુર્માસના વ્રતનો વિધિ અવશ્ય કરવાપણે કહ્યો છે.

**નિયમ ગ્રહણનો પ્રકાર :-** શ્રીનારાયણ મુનિ બોલ્યા : હે જનો ! પુરાણોક્ત ચારે વર્ણના જનોએ કરવા યોગ્ય વ્રતો સામાન્યપણે કહ્યા, હવે મારા આશ્રિતજનોએ વિધિપૂર્વક વિશેષપણે કરવા યોગ્ય વ્રતો તમોને કહું છું. (૧) અષાઢ સુદી ૧૧ એકાદશીમાં ચાતુર્માસના વ્રતનો નિયમ તો શ્રીકૃષ્ણની મૂર્તિના સમીપમાં પ્રથમથી ગ્રહણ કરવો. (૨) અથવા સવારમાં નદી વગેરેના જળમાં સ્નાન કરી પોતાના ધર્મમાં દૃઢ સ્થિતિવાળા ભગવાનના ભક્તની આગળ પરમેશ્વરની પ્રસન્નતા માટે નિયમ ગ્રહણ કરવો : (૩) ‘હે દેવ ! હે કેશવ ! તમારી સમીપમાં હું આ વ્રત ગ્રહણ કરું છું. તે વ્રત તમારા અનુગ્રહથી વિઘ્ને રહિત સંપૂર્ણપણાને પામો. (૪) હે દેવ ! આ વ્રત ગ્રહણ કર્યે સતે જો મારું મરણ થાય તો પણ તે વ્રત તમારી પ્રસન્નતાથી સંપૂર્ણ થાય.’ હે જનો ! આ પ્રકારે વ્રતનો નિયમ ગ્રહણ કરનાર માણસ બોલે. (૫) આવી રીતે શ્રીકૃષ્ણની પ્રાર્થના કરી, બાહ્યાભ્યંતર શુદ્ધિયુક્ત તેમજ વ્રતના અંગભૂત નિયમોનું યથાયોગ્ય પાલન કરતા થકા પુરુષ અને સ્ત્રી વ્રતનો આરંભ કરે. (૬)

સધવા સ્ત્રીએ પોતાના પતિની આજ્ઞાથી વ્રત કરવું. પોતાના ગૃહમાં ક્લેશ કરીને સ્વચ્છંદપણે વ્રત કરવું નહિ. વિધવા સ્ત્રીએ પણ પોતાના પિતા વગેરેની આજ્ઞાથી વ્રત કરવું પણ સ્વતંત્રપણે વ્રત કરવું નહિ. (૭)

ગૃહસ્થાશ્રમીઓ તથા ત્યાગીઓએ પોતપોતાની યોગ્યતાને અનુસરી વ્રત ગ્રહણ કરવું, તે વ્રત કારતક સુદી દ્વાદશી સુધી સ્નેહથી પાલન કરવું. (૮) ક્યારેય આપત્કાળ પ્રાપ્ત થાય તો દેશકાળને અનુસરીને શક્તિ પ્રમાણે વર્તવું. કારણ કે શ્રીકૃષ્ણ સર્વે જાણે છે. (૯)

**સત્શાસ્ત્ર-ભગવદ્ભક્તિ સબંધી નિયમો :-** શ્રીમદ્ ભાગવત વગેરે પુરાણનું દરરોજ શ્રવણ કરવું અથવા દરરોજ કથા વાંચવી (તે રૂપ કીર્તન) અથવા પારાયણ(=પાઠન) કરવું. (૧૦) ભાગવતના શ્રવણમાં વ્રતના અંતે વાંચનાર પુરાણીનો પોતાની શક્તિ પ્રમાણે ધન-વસ્ત્રાદિથી સત્કાર કરવો. બ્રાહ્મણો અને સાધુઓને આદર પૂર્વક પૂજવા અને મિષ્ટાન્નથી તૃપ્તિ પમાડવા. (૧૧) પોતે કથા વાંચે તો, અથવા પોતે જ પારાયણ કરે તો વ્રતના અંતમાં શ્રીકૃષ્ણની મહાપૂજા કરવી, વ્રતના ફળની સિદ્ધિ આપનાર સાધુઓ અને હરિભક્ત બ્રાહ્મણોનું પૂજન અને ભોજન કરાવવું. (૧૨) પુણ્ય આપનાર, આદરપૂર્વક કરવા યોગ્ય, આ ત્રણ વ્રત (શ્રવણ-કીર્તન અને પાઠ) કહ્યાં તેવી રીતે કેવળ દશમ સ્કંધનું શ્રવણ-કથા કહેવી અને પાઠ (પારાયણ) તે આ શ્રવણ વગેરે ત્રણ વ્રત કરવાં. (૧૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

कृष्णाभ्यर्चा यथालब्धैस्त्रिकालं सूपचारकैः । कार्येति व्रतमस्यान्ते महापूजादि पूर्ववत् ॥१४॥ कृष्णस्तोत्रसहस्राख्यपाठः कृष्णप्रदक्षिणा । कृष्णाय साष्टाङ्गनतिः स्वशक्त्येति व्रतानि च ॥१५॥ शतादिसङ्ख्यया मालावर्तनं कृष्णमन्त्रतः । प्रतिघस्त्रं यथाशक्ति व्रतमेतत्परं मतम् ॥१६॥ अन्ते त्वेषां यथाशक्ति कृष्णस्य महदर्चनम् । तद्भक्तपूजाऽथ जपे हविर्होमोऽपि चाधिकः ॥१७॥ वैष्णवानां समर्चा च प्रत्यहं चन्दनादिभिः । तद्भोजनं स्वशक्त्या वा सदन्नैरिति च व्रते ॥१८॥ अन्तेऽनयोर्महापूजा सर्वेषां कृष्णसेविनाम् । यथार्हवस्त्रैः पात्रैश्च प्रीणनं भोजनादिभिः ॥१९॥ कामस्य च क्रुधो नित्यमनृतस्य च वर्जनम् । बुद्धिपूर्वप्राणिहिंसावर्जनं सर्वथान्वहम् ॥२०॥ पालनं ब्रह्मचर्यस्य त्यजनं चाप्यहंमतेः । स्नेहस्य चैक्षवस्याथ वर्जनं लवणस्य च ॥२१॥ व्रतान्येतानि कार्याणि युक्तानि हरिपूजया । पृथक् पृथग्यथाशक्ति भवन्ति हरितुष्टये ॥२२॥ एतेषां तु समाप्तौ स्यात्त्यागिनां कृष्णसेविनाम् । समर्हणं सविनयं वासःसद्भोजनादिभिः ॥२३॥ प्राधान्येन मयोक्तानि व्रतान्येतानि सद्धियः ! । कृष्णसम्बन्धिधर्मो यस्तद्व्रतं मे परं मतम् ॥२४॥ पुराणादिष्वथोक्तानि काम्यान्यपि व्रतानि तु । नातिप्रेष्ठानि मे तानि तुच्छाल्पफलदत्वतः ॥२५॥ विषयासक्तचित्तानां ग्राम्याणां तन्निवृत्तये । यथातद्रुचि शास्त्रं तु तानि वक्ति हितावहम् ॥२६॥ कुसङ्गदोषतस्तत्र सज्जन्ते कामुका नराः । ततोऽल्पफलमाप्यैते यान्त्यन्ते संसृतिं किल ॥२७॥ पशुपुत्रधनस्त्र्यादिसुखं प्रारब्धकर्मणः । भवतीत्येव निश्चित्य श्रमयन्ति न तद्बुधाः ॥२८॥ कृतेन कर्मणा येन भगवांस्तज्जनास्तथा । प्रीयेरंस्तत्प्रयत्नेन कर्तव्यं स्वहितेच्छुना ॥२९॥

---

દરરોજ યથાસમય પ્રાપ્ત થયેલા સારા ચંદન-પુષ્પાદિ ઉપચારોથી સવાર-મધ્યાહ્‌ન અને સાયંકાળ આ ત્રણેય સમયમાં શ્રીકૃષ્ણનું વિધિ પ્રમાણે પૂજન કરવું : આ પ્રમાણે વ્રત છે. આ વ્રતના અંતે મહાપૂજા વગેરે અને સાધુ બ્રાહ્મણોને ભોજનાદિ પૂર્વના વ્રતની માફક કરવું. (૧૪) પોતાની શક્તિને અનુસરી કૃષ્ણના સ્તોત્રો અને સહસ્ર નામોનો પાઠ, શ્રીકૃષ્ણની પ્રદક્ષિણા, અને શ્રીકૃષ્ણને સાષ્ટાંગ પ્રણામ; એ ત્રણ વ્રતો પણ કરવાં. (૧૫)

દરરોજ શક્તિ પ્રમાણે શ્રીકૃષ્ણના મંત્રથી (અષ્ટાક્ષર મંત્ર અથવા નામમંત્રથી) સો વગેરે સંખ્યાથી માળા ફેરવવી એ પરમ વ્રત માનેલું છે. (૧૬) તે સ્તોત્રપાઠ-પ્રદક્ષિણા-સાષ્ટાંગ પ્રણામ-અષ્ટાક્ષર મંત્ર જપ : આ વ્રતોની સમાપ્તિમાં શક્તિ પ્રમાણે મહાપૂજા, શ્રીહરિના ભક્તોની પૂજા, શ્રીકૃષ્ણના મંત્રજપમાં અને સ્તોત્રના પાઠમાં તેના દશાંશથી અગ્નિમાં હવિષ્યાન્નથી હોમ વિશેષ કરવો. (૧૭) દરરોજ ચંદનાદિથી સાધુ-વર્ણિ-બ્રાહ્મણ વગેરે હરિભક્તોનું પૂજન અથવા પોતાની શક્તિ પ્રમાણે સુંદર ભોજનોથી વૈષ્ણવો જમાડવા : આ બે વ્રતો કરવા. આ બે વ્રતોની સમાપ્તિમાં યથાયોગ્ય વસ્ત્રો, ભોજનપાત્રો અને જળપાત્રોથી સમગ્ર શ્રીકૃષ્ણની સેવા કરનાર સાધુ વગેરેની મહાપૂજા કરવી અને ભોજનો વગેરેથી તૃપ્તિ પમાડવા. (૧૮-૧૯)

દરરોજ સ્ત્રીવિષયક ઉપભોગનો ત્યાગ કરવો. ક્રોધ અને અસત્ય ભાષણનો ત્યાગ કરવો. દરરોજ જાણીને સર્વ પ્રકારે હિંસાનો ત્યાગ કરવો. (૨૦) બ્રહ્મચર્યનું પાલન કરવું. અહંકારનો પણ પરિત્યાગ કરવો. ઘૃત વગેરે સ્નેહદ્રવ્યનો ત્યાગ કરવો. ગોળ-ખાંડ-સાકર વગેરેનો ત્યાગ કરવો અને મીઠાનો ત્યાગ કરવો. (૨૧) આ કામનો ત્યાગ વગેરે નવ વ્રતો જુદા જુદા શક્તિ પ્રમાણે શ્રીકૃષ્ણના પૂજને સહિત કરવાં. આ પ્રમાણે કરે તો શ્રીકૃષ્ણની પ્રસન્નતા થાય છે. (૨૨)

આ નવ વ્રતોની સમાપ્તિમાં તો, શ્રીકૃષ્ણનું સેવન કરનાર ત્યાગી સાધુઓને યથાયોગ્ય વસ્ત્રો અને સુંદર ભોજનોથી જમાડવા અને ચંદન-પુષ્પાદિથી વિનયપુરઃસર પૂજા કરવી. (૨૩)

**કામ્યવ્રતોનું ધ્યેય અને ફળ :-** હે સદ્‌બુદ્ધિમાનો ! આ (પૂર્વ અધ્યાયમાં અને આ અધ્યાયમાં) મેં પ્રધાનપણે કરવા યોગ્ય વ્રતો કહેલા છે. જેથી શ્રીકૃષ્ણના સંબંધયુક્ત આચારરૂપી વ્રત મેં શ્રેષ્ઠ માનેલું છે. (૨૪) હવે પુરાણાદિમાં પુત્ર-કલત્ર-ધન વગેરેની પ્રાપ્તિ માટે કરવાનાં વ્રતો પણ કહ્યાં છે. તે વ્રતો તો નાશવંત અલ્પ ફળ આપનારાં હોવાથી મને અત્યંત પ્રિય નથી. (૨૫) વિષયોમાં આસક્ત ચિત્તવાળા જનોની વિષયોમાંથી નિવૃત્તિ માટે સર્વ જીવોને હિતકારક શાસ્ત્ર, જેમ તેમની (= વિષયાસક્ત પુરુષોની) રુચિ હોય તેને અનુસરીને કામ્ય વ્રતો કહે છે. (૨૬) નાના પ્રકારના ભોગમાં આસક્તિવાળા પુરુષો કુસંગીઓના સંગદોષથી કામ્ય વ્રતોમાં આસક્ત થાય છે. પછી તે કામનાવાળા પુરુષો અલ્પ ફળ પામીને અંતે સંસારને નિશ્ચે પામે છે. (૨૭) ગાયો-પુત્રો-ધન-સ્ત્રીઓ વગેરેનું સુખ પ્રારબ્ધકર્મથી થાય છે. આ પ્રકારે જ નિશ્ચે કરી વિવેકી ભગવાનના એકાંતિક ભક્તો કામ્ય વ્રતોમાં શ્રમ કરતા નથી. (૨૮) જે કર્મનું આચરણ કરવાથી શ્રીકૃષ્ણ અને તેમના ભક્તો પ્રસન્ન થાય, તે જ કર્મ પોતાનું હિત ઈચ્છતા પુરુષે પ્રયત્નપૂર્વક કરવું. (૨૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**चातुर्मास्यव्रतं योऽत्र यथाशक्त्यपि नाचरेत् । स मृतो निरयान् भुक्त्वा कीटयोनिषु जायते ॥३०॥ मदीयैस्तु विशेषेण व्रतेषूक्तेषु सुव्रताः ! । अवश्यमेवैकतममपि कार्यं व्रतं दृढम् ॥३१॥ कार्तिके शुक्लपक्षेऽथ द्वादश्यां शक्तितोऽर्चनम् । विधाय कृष्णस्य ततस्तन्निवेद्यं तदग्रतः ॥३२॥ इदं व्रतं मया देव! कृतं त्वत्प्रीतये प्रभो ! । न्यूनं सम्पूर्णतां यातु तेन तुष्टो भवेर्मयि ॥३३॥ एवं समाप्य नियमं साधुविप्रादिभोजनम् । विधाप्य पारणां कुर्यादिष्टैः सह मुदा व्रती ॥३४॥ ये पालयन्ति मनुजा नियमानिहैतान् सच्छास्त्रसाधुविहिताञ्जनताहिताय । ते यान्ति नूनमिह भूरि यशोऽतिशुद्धिमन्ते सुखं च परमं परमात्मधाम्नि ॥३५॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे विश्नगरे चातुर्मास्यव्रतविधिनिरूपणनामा द्विचत्वारिंशोऽध्यायः ॥४२॥

सुव्रत उवाच – **नारायणमुनेर्वाक्यमित्याश्रुत्य जनाधिप ! । जना वटपुरावासाः पप्रच्छुस्तं प्रणम्य च ॥१॥** जना ऊचुः– **व्रतोपवासनियमान्मासान् ये चतुरो जनाः । कर्तुं न शक्तास्तैः स्वामिन् ! यत्कार्यं ब्रूहि तत्तु नः ॥२॥** श्रीनारायणमुनिरुवाच– **अशक्ताश्चतुरो मासांस्तपः कर्तुं तु ये नराः । कर्तव्यं तैर्जना ! भकत्या पवित्रं कार्तिकव्रतम् ॥३॥ स्नातव्यं कार्तिके मासि प्रातर्नक्षत्रदर्शने । व्रतं च शक्तितः कार्यं तत्र कृच्छ्राख्यमादरात् ॥४॥ आश्वयुज्याः समारभ्य कार्तिक्यवधि भक्तितः । व्रतं मासोपवासाख्यं कार्यं चान्द्रायणं तु वा ॥५॥ अन्यान्यपि च कृच्छ्राणि कथयामि समासतः। तेषु शक्त्यनुसारेण कार्यमेकमपि ध्रुवम् ॥६॥**

**વ્રતાનુષ્ઠાન નહિ કરનારને વિપરીત ફળઃ-** આ લોકમાં જે માણસ મેં કહેલું ચાતુર્માસનું વ્રત પોતાની શક્તિ અનુસારે આચરણ કરતો નથી તે માણસ મરીને નરકની યાતનાઓ ભોગવીને કીડાની યોનિઓમાં ઉત્પન્ન થાય છે. (૩૦)

હે સુંદર વ્રતવાળા જનો ! મારા આશ્રિત જનોએ તો વિશેષપણે મેં કહેલાં વ્રતોમાં કોઈ પણ એક વ્રત દૃઢપણે કરવું. (૩૧) વ્રતની સમાપ્તિ પછી કારતક માસમાં શુકલ પક્ષની દ્વાદશીને દિવસે પોતાની શક્તિ પ્રમાણે શ્રીકૃષ્ણની મૂર્તિનું પૂજન કરી પછી તે વ્રત શ્રીકૃષ્ણ પરમાત્માની પ્રતિમા આગળ આ પ્રમાણે મંત્રોચ્ચારણપૂર્વક નિવેદન કરવું : (૩૨) 'હે દેવ ! હે પ્રભો! મેં આ વ્રત તમારી પ્રીતિ માટે કર્યું છે તેમાં ન્યૂનતા હોય તો સંપૂર્ણપણાનો પામો. અને તે વ્રતથી મારી ઉપર પ્રસન્ન થાઓ.' (૩૩) આ પ્રમાણે વ્રતી, નિયમ સમાપ્ત કરી ત્યાગીઓ અને બ્રાહ્મણો વગેરે અન્નાર્થી જનોને ભોજન કરાવીને ઈષ્ટ સંબંધીઓની સાથે હર્ષથી પારણાં કરે. (૩૪)

હે ભક્તો ! આ લોકમાં જે મનુષ્યો જનસમુદાયનું હિત કરવા માટે સત્શાસ્ત્રો અને સાધુપુરુષોએ કહેલા-પૂર્વે કહેલા નિયમોને પાળે છે તે મનુષ્યો આ લોકમાં ઘણું યશ અને અતિ શુદ્ધિ પામે છે અને દેહ અવસાનમાં પરમાત્માના ધામમાં સર્વોત્તમ સુખ જ પામે છે. (૩૫) *ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે વિશ્નગરે ચાતુર્માસ્યવ્રતવિધિનિરૂપણનામા દ્વિચત્વારિંશોऽધ્યાયઃ (૪૨)*

## અધ્યાય : ૪૩

### વડનગરના નિવાસીજનોએ પૂછેલા કારતક માસમાં કૃચ્છ્રાદિ વ્રતોનું વર્ણન શ્રીહરિએ સારી રીતે કર્યું તે કહ્યું છે.

**કારતક માસના વિશેષ વ્રતો :-** સુવ્રત મુનિ બોલ્યા : હે રાજન્ ! આવી રીતે શ્રીનારાયણમુનિનું વચન સાંભળી વડનગરના નિવાસીજનો નારાયણમુનિને પ્રણામ કરી પૂછતા હતા : (૧) હે સ્વામિન્, જે જનો ચાર માસ સુધી ફળાહારાદિ વ્રતો, ધારણાપારણાદિ ઉપવાસો અને શ્રીમદ્ ભાગવતાદિનું શ્રવણ વગેરે નિયમો કરવા માટે શક્તિમાન ના હોય તે જનોએ જે કરવા યોગ્ય હોય તે અમોને કહો. (૨) **શ્રીનારાયણમુનિ બોલ્યા :** હે જનો ! જે માણસો ચાર માસ સુધી તપ કરવા અશક્ત હોય તે પુરુષોએ પવિત્ર કારતક વ્રત ભક્તિપૂર્વક કરવું. (૩) કારતક માસમાં પ્રાતઃકાળમાં નક્ષત્ર દર્શનમાં નદી વગેરેમાં સ્નાન કરવું. તેમાં કૃચ્છ્ર વ્રત આદરપૂર્વક શક્તિ પ્રમાણે કરવું. (૪) આસો સુદી પૂર્ણિમાથી આરંભીને કારતક સુદી પુનમ સુધી એક માસ સુધી, એક માસના ઉપવાસ (માસોપવાસ) નામનું વ્રત ભક્તિથી કરવું અથવા ચાંદ્રાયણ નામનું વ્રત કરવું. (૫) બીજાં પણ વ્રતો સંક્ષેપથી કહું છું. તેમાં એક પણ કૃચ્છ્ર-વ્રત શક્તિને અનુસરીને નિશ્ચે કરવું. (૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

शुक्लपक्षे चतुर्दश्यां वारिमध्ये स्थितोऽनिलम् । पिबन्नुपवसेदेव जलकृच्छ्र उदीरितः ॥७॥ दशम्यां पञ्चगव्याशी ह्येकादश्यामुपोषणम् । विष्णुमभ्यर्चयन्कुर्याद्धरिकृच्छ्र इतीरितः ॥८॥ अपः क्षीरं दधि घृतं सप्तम्यादौ पिबेत्पृथक् । एकादश्यामुपवसेत्कृच्छ्रः पैतामहो हि सः ॥९॥ षष्ठ्यादि पयसः पानं त्रिदिनं च ततस्त्र्यहम् । उपवास इति प्रोक्तो माहेन्द्रः कृच्छ्र उत्तमः ॥१०॥ त्र्यहं मुन्यन्नमश्नीयाद्यावकं च त्र्यहं ततः । त्र्यहं चोपवसेदन्यत्कृच्छ्रोऽयं वैष्णवो मतः ॥११॥ पञ्चरात्रं प्रतिपदः पयःपानं ततः परम् । दधिपानं पञ्चरात्रं कृच्छ्रोऽयं भास्कराभिधः ॥१२॥ यवागूं यावकं शाकं दधि क्षीरं घृतं जलम् । पञ्चम्यादौ सितेऽश्नीयात्कृच्छ्रः सार्प्तर्षिको मतः ॥१३॥ पलाशबिल्वदर्भाब्जोदुम्बरैः सुशृतं पयः । पिबेत्षष्ठ्यामुपवसेत्कृच्छ्र आग्नेय उच्यते ॥१४॥ पयोबिल्वाम्बुजमृणालान्यत्त्वाऽऽसप्तमीतिथेः । एकादश्यामुपवसेल्लक्ष्मीकृच्छ्रोऽयमीरितः ॥१५॥ त्र्यहं प्रातस्त्र्यहं सायं त्र्यहं कुर्यादयाचितम् । त्र्यहं परं च नाश्नीयात्प्राजापत्योऽयमुच्यते ॥१६॥ द्वादशाहोपवासेन पराकः कृच्छ्र उच्यते । कृष्णभक्त्यन्वितान्येव व्रतानि फलदानि वै ॥१७॥ कृच्छ्रव्रतानि ह्येतानि सर्वपापहराण्यतः । कर्तव्यानि नरैर्भक्त्या कार्तिके तु विशेषतः ॥१८॥ ब्रह्मचारी गृहस्थो वा वनस्थो वाथ भिक्षुकः । कृत्वा व्रतान्यवाप्नोति वैष्णवं पदमव्ययम् ॥१९॥ कृच्छ्राणि कुर्वन् सर्वाणि यतवाङ्मानसेन्द्रियः। धौतवासाः शुचिः स्नातः पूजयेत्कृष्णमन्वहम् ॥२०॥ अहिंसको दानरतो जपहोमपरायणः । पालयेद्ब्रह्मचर्यं च क्षमासत्यदयान्वितः ॥२१॥ व्रतद्रव्याणि सर्वाणि क्षीरादीनि सदा व्रती । विप्रदत्तानि चाश्नीयात्स्वेच्छया न प्रकामतः ॥२२॥

**કૃચ્છ્રવ્રતોના પ્રકાર** :- શુક્લપક્ષની ચૌદશે જળના મધ્યમાં ઊભા રહીને વાયુનું ભક્ષણ કરીને ઉપવાસ કરે તે **જળકૃચ્છ્ર** કહેલું છે. (જળમાં ઊભા રહેવું તે સવારથી આરંભીને મધ્યાહ્ન સુધી અથવા સૂર્ય આથમે ત્યાં સુધી શક્તિને અનુસરીને જાણવું.) (૭) કારતક સુદી ૧૦ ને દિવસે પંચગવ્ય(ગોમૂત્ર, ગોમય, ગોઘૃત, દહીં, દૂધ)નું ભક્ષણ કરી એકાદશીને દિવસે શ્રીવિષ્ણુ ભગવાનનું પૂજન કરી ઉપવાસ કરે : આ **હરિકૃચ્છ્ર** કહેવાય છે. (૮) સપ્તમી તિથિથી આરંભીને ચાર દિવસ સુધી જુદા જુદા જળ, દૂધ, દહીં, ઘૃતનું પાન કરે અને એકાદશીને દિવસે ઉપવાસ કરે. આ પાંચ દિવસનું **પિતામહ** નામનું કૃચ્છ્ર વ્રત કહેવાય છે. (૯) છઠ્ઠથી આરંભીને ત્રણ દિવસ સુધી દૂધનું પાન, ત્યાર પછી ત્રણ દિવસ ઉપવાસ કરે : આ છ દિવસનું શ્રેષ્ઠ **મહેન્દ્ર** કૃચ્છ્ર કહેલું છે. (૧૦) ત્રણ દિવસ સુધી નિવારાદિ અન્ન ભક્ષણ કરે, ત્યાર પછી ત્રણ દિવસ જવનો સાથવો ખાય; પછી ત્રણ દિવસ ઉપવાસ કરે : આ નવ દિવસનું **વિષ્ણુ** નામનું કૃચ્છ્ર માનેલું છે. (૧૧) પડવાથી આરંભીને પાંચ રાત્રિ દૂધપાન, પછી પાંચ રાત્રિ દહીંનું પાન કરવું : આ દશ દિવસનું **ભાસ્કર** કૃચ્છ્ર કહેલું છે. (૧૨) શુક્લ પક્ષની પંચમી તિથિથી આરંભીને રાબડી, જવ, શાક, દહીં, દૂધ, ઘી અને જળ ભિન્ન ભિન્ન દિવસે આ સાત વસ્તુઓ જમે અર્થાત્ પાંચમને દિવસે રાબડી, છઠને દિવસે જવ, એમ સાત દિવસ સુધી જમે : આ સાત દિવસાત્મક **સપ્તર્ષિ** કૃચ્છ્ર માનેલું છે. (૧૩) પલાશનાં પાન, બીલીનાં પાન, દર્ભ, કમળ, ઉમરડાના પાનોથી સારી રીતે ક્વાથ કરીને પાન કરે અને છઠ્ઠને દિવસે ઉપવાસ કરે : આ છ દિવસનું **અગ્નિ** કૃચ્છ્ર કહેવાય છે. આ વ્રતનો પ્રતિપદાથી આરંભ કરવો. (૧૪) સપ્તમી તિથિથી આરંભી દૂધ, બિલીનાં ફળ, કમળનાં ફળ, અને મૃણાલ (કમળતંતુ) જમીને એકાદશીને દિવસે ઉપવાસ કરવો. આ પાંચ દિવસનું **લક્ષ્મીકૃચ્છ્ર** કહેલું છે. (૧૫) ત્રણ દિવસ સુધી પ્રાતઃકાળમાં જમે, ત્રણ દિવસ સુધી સાયંકાળે જમે, ત્રણ દિવસ માગ્યા વિના પ્રાપ્ત થયેલા અન્નને જમે, પછી ત્રણ દિવસ ઉપવાસ કરે. આ બાર દિવસનું **પ્રાજાપત્ય કૃચ્છ્ર** કહેવાય છે. (૧૬) બાર દિવસ સુધી ઉપવાસ કરવાથી **પારાક કૃચ્છ્ર** કહેવાય છે. આ કૃચ્છ્ર વ્રતો શ્રીકૃષ્ણ ભગવાનની નવધા ભક્તિ સહિત જ કરેલા સતા યથાર્થ ફળ આપનારાં નિશ્ચે થાય છે. (૧૭)

આ કૃચ્છ્રવ્રતો સર્વ પાપને હરનારાં છે. માટે મનુષ્યે ભક્તિથી કરવાં. કારતક માસમાં તો વિશેષપણે કરવાં. (૧૮) વર્ણી, ગૃહસ્થ અથવા વાનપ્રસ્થ અથવા સંન્યાસી આ વ્રતો કરી અવિનાશી વિષ્ણુના ધામને પામે છે. (૧૯)

**વ્રતકર્તાએ પાળવાના નિયમો** :- સર્વ કૃચ્છ્રવ્રતો કરનાર માણસ વાણી, મન અને ઈન્દ્રિયો જેના નિયમમાં છે એવો થકો નદી વગેરેમાં સ્નાન કરી પવિત્ર, ધોયેલાં વસ્ત્રો ધારણ કરી દરરોજ શ્રીકૃષ્ણનું પૂજન કરે. (૨૦) હિંસા નહિ કરનાર- યથાશક્તિ દાન કરનાર, શ્રીકૃષ્ણના મંત્રનો જપ અને હોમ, પરાયણ, તેમજ ક્ષમા, સત્ય, દયાથી યુક્ત આ પ્રમાણે વ્રતકર્તા બ્રહ્મચર્ય પાલન કરે. (૨૧) વ્રત કરનાર પુરુષ દૂધ આદિ જેમાં છે તે સર્વે, બ્રાહ્મણે આપેલાં ભક્ષણ કરે. પોતાની ઈચ્છાથી ભોજન કરે નહિ. (૨૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

कुर्वन् कृच्छ्राणि मुह्येच्चेत्क्षुधया पीडितस्तदा । अमृतं तु गवां क्षीरं पाययेत्तं नरं द्विजः ॥२३॥ अष्टैतान्यव्रतघ्नानि ह्यापो मूलं फलं पयः । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥२४॥ यथोक्तेन विधानेन कार्तिके कृच्छ्रमाचरेत् । कृष्णमभ्यर्चयन्नित्यमिति ब्रह्माह नारदम् ॥२५॥ कृच्छ्राणि कर्तुं च नरः शक्नुयान्नैव यस्तु सः । व्रतान्यन्यानि कुर्वीत यथाविधि यथाबलम् ॥२६॥ मञ्चखट्वादिशयनं पटोलं मूलकं मधु । वृन्ताकं च कलिङ्गं च बहुबीजं च वर्जयेत् ॥२७॥ प्रातःस्नानं हरेर्ध्यानं यथाशक्ति दृढासनः । नित्यं सर्वः प्रकुर्वीत पूजां च मानसीमपि ॥२८॥ एकभक्तं च भक्तं च व्रतं निर्लवणं तथा । अयाचितं फलत्यागमपक्वाशनमेव च ॥२९॥ शाकत्यागं रसत्यागं ताम्बूलाभ्यङ्गवर्जनम् । दधिदुग्धसितासर्पिर्गुडतैलविवर्जनम् ॥३०॥ व्रतं च भूमिशयनं भूमिभोजनमेव वा । मौनं पाषाणशयनं तीर्थस्नानं व्रतं तथा ॥३१॥ गोविप्रसाधुदेवार्चानियमः पत्रभोजनम् । शिलायां भोजनं चैव स्थालीपाकविवर्जनम् ॥३२॥ अन्नदानं च गोदानं स्वर्णदानं च प्रत्यहम् । तिलदानं दीपदानमित्युक्तानि व्रतानि वै ॥३३॥ तुलामकरमेषार्के प्रातःस्नानं विधीयते । हविष्यं ब्रह्मचर्यं च महापातकनाशनम् ॥३४॥ नद्यां स्नानं विशेषेण कर्तव्यं कार्तिके नरैः । तदभावे तडागे वा कूपे वा दुर्बलो गृहे ॥३५॥ यः स्नात्यनुदिते भानौ भानुजात्तस्य भीः कुतः । इमं मन्त्रं समुच्चार्य मौनी स्नायाद्व्रती नरः ॥३६॥ कार्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन!। प्रीत्यर्थं तव देवेश ! दामोदर ! मया सह ॥३७॥

---

**વ્રતમાં બાધ નહિ કરનારા પદાર્થો :-** કહેલા કૃચ્છ્ર વ્રતો કરનાર પુરુષ ભૂખથી પીડા પામેલો જો વ્યાકુળ થાય તો બ્રાહ્મણ, ગાયોનું અમૃતરૂપ દૂધ તે માણસને પાન કરાવે. (૨૩) જળ, મૂળ, (કંદમૂળ, શક્કરિયાં વગેરે) ફળ, (ખજૂર વગેરે) દૂધ, હવિષ્યાન્ન, બ્રાહ્મણની અનુમતિ, ગુરુનાં વચન અને ઔષધ આ આઠ વ્રતને હણનારાં નથી. (૨૪) કારતક માસમાં માણસ દરરોજ શ્રીકૃષ્ણપૂજન કરતો સતો કહેલી વિધિથી કૃચ્છ્ર આચરણ કરે. આ પ્રમાણે બ્રહ્માએ નારદને કહેલું છે. (૨૫)

જે માણસ આ કૃચ્છ્ર વ્રતો આચરણ કરવા સમર્થ ન જ હોય, તે માણસ તો બીજાં વ્રતો વિધિ પ્રમાણે યથાશક્તિ કરે. (૨૬) માંચો અર્થાત્ ઢોલિયો-ખાટલો વગેરેમાં સૂવાનો ત્યાગ કરે. પંડોળું (સર્પની આકૃતિવાળું), મૂળા, મધ, વૃંતાક, કાળીંગડું, જામફળ વગેરે ફળોનો ત્યાગ કરે. (૨૭) સર્વ કોઈ (વ્રતકર્તા) ભક્તજન પ્રાતઃસ્નાન, દૃઢાસનપૂર્વક શક્તિ પ્રમાણે શ્રીહરિનું ધ્યાન અને માનસી પૂજા પણ દરરોજ કરે. (૨૮)

એક વાર ભોજન કરે તે વ્રત, કેવળ ભાત જમે તથા મીઠા વિનાનું વ્રત, માગ્યા વિના પ્રાપ્ત થયેલા અન્નનું ભોજન વ્રત, ફળમાત્રના ભોજનનો ત્યાગ, રાંધ્યા વિનાનું અન્ન જમવું. (૨૯) શાકનો ત્યાગ, મધુરાદિ છ રસોનો ત્યાગ, પાનબીડું અને તેલમર્દનનો ત્યાગ; દૂધ, દહીં, સાકર, ઘી, ગોળ અને તેલ તેનો ત્યાગ : આ સર્વે વ્રતો છે. (૩૦)

પાથર્યા વગર પૃથ્વીમાં શયનનું વ્રત-કેવળ ભૂમિ ઉપર ભોજન કરવા યોગ્ય અન્નાદિ રાખીને જમવાનું વ્રત, તથા ભોજન સમયે મહિના સુધી મૌન રાખવું અથવા અખંડ મૌન રાખવાનું વ્રત તથા તીર્થમાં જઈને ત્યાં સૂર્યોદય પહેલાં સ્નાન કરવાનું વ્રત તથા કેવળ શિલા ઉપર શયન કરવાનું વ્રત; (૩૧) ગાયો-બ્રાહ્મણો-સાધુઓ-દેવો તેમના પૂજનનો નિયમ રાખવો : આ ચાર વ્રતો છે. પાંદડામાં જમવું તે વ્રત-પથ્થરની શિલા ઉપર અન્ન મૂકીને જમવું તે વ્રત - તપેલી વગેરે પાત્રમાં રાંધેલું જમવું નહિ તે વ્રત; (૩૨) દરરોજ અન્નદાન વ્રત - ગાયનું દાન - સુવર્ણ દાન - તિલદાન -દીપદાન એ સર્વ વ્રતો નિશ્ચે કહેલાં છે. (૩૩) તુલા-મકર અને મેષના સૂર્ય થાય ત્યારે (કારતક-માઘ અને વૈશાખ માસમાં) પ્રાતઃસ્નાન-હવિષ્યાન્ન ભોજન અને બ્રહ્મચર્ય : આ ત્રણ મહાપાતકને નાશ કરનાર છે. માટે વિધિવાક્યોથી કર્તવ્યપણે ઉપદેશ કરાય છે. (૩૪)

કારતક માસમાં મનુષ્યોએ વિશેષપણે નદીમાં સ્નાન કરવું. નદી ના હોય તો તળાવમાં, અને કૂવામાં (કાઢેલા જળથી) સ્નાન કરવું. બળરહિત માણસે ઘરમાં ઠંડા જળથી સ્નાન કરવું. (૩૫) જે વ્રતવાળો માણસ સૂર્યોદય પહેલાં સ્નાન કરે, તે માણસને સૂર્યના પુત્ર યમરાજાથી ભય ક્યાંથી હોય ? ના જ હોય. આ (આગળ કહે છે તે) મંત્રનું ઉચ્ચારણ કરી વ્રતી માણસ મૌન રાખીને (પરમાત્માના નામોચ્ચારણ વિના બીજું બોલે નહિ) સ્નાન કરે. (૩૬) (મંત્ર કહે છે :) હે જનાર્દન! હે દેવેશ ! હે દામોદર ! લક્ષ્મીએ સહિત તમારી પ્રીતિ માટે હું કારતક માસમાં પ્રાતઃસ્નાન કરીશ. (૩૭)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

केतक्या वापि मालत्या मुनिपुष्पैश्च वाम्बुजैः । पूजनीयः प्रयत्नेन कार्तिके विष्णुरव्ययः ॥३८॥ कार्तिके नार्चितो यैस्तु कमलैः कमलेक्षणः । जन्मकोटिष्वपि भवेन्न तेषां कमला गृहे ॥३९॥ तुलसीदललक्षेण कार्तिके योऽर्चयेद्धरिम् । पत्रेपत्रेऽश्वमेधस्य स फलं प्राप्नुयान्नरः ॥४०॥ धात्रीफलविलिप्ताङ्गो धात्रीफलविभूषणः । धात्रीफलकृताहारः संसृतेर्मुच्यते नरः ॥४१॥ धात्रीच्छायां समाश्रित्य योऽर्चयेच्चक्रधारिणम् । पुष्पे पुष्पे भवेत्तस्य राजसूयफलं किल ॥४२॥ दामोदरं वनेऽभ्यर्च्य धात्रीवृक्षोपशोभिते । पक्वान्नैस्तोषयेद्विप्रान् यः स विष्णुपुरं व्रजेत् ॥४३॥ राजिकां मादकं क्षौद्रं कांस्यपात्रे च भोजनम् । कार्तिके वर्जयेत्तैलं द्विदलं च विशेषतः ॥४४॥ माषमुद्गमसूराश्च चणकाश्च कुलत्थकाः । निष्पावा राजमाषाश्च ह्याढक्यो द्विदलं स्मृतम् ॥४५॥ त्यजेत्पर्युषितं चान्नं सन्धितं मतिदूषितम् । ऊर्जे त्यजेत्सूरणं च दिवास्वापं तथानृतम् ॥४६॥ विष्णुनामसहस्रस्य पठनं च दिवानिशि । कार्यमाकाशदीपश्च देय उर्जे निशामुखे ॥४७॥ यवान्नमृषिधान्यं वा भक्ष्यमूर्जे शुभं मतम् । नोर्जो वन्ध्यो विधातव्यो व्रतिना केनचित्क्वचित् ॥४८॥ कार्तिके मासि गृह्णीयाद्दीक्षां भागवतीं तु यः । स पुमान्मुच्यते नूनं जन्मसंसृतिबन्धनात् ॥४९॥ तुलसीकाष्ठसम्भूता माला कृष्णपदेऽर्पिता। कार्तिके मासि या सा वै नित्यं धार्या तु वैष्णवैः ॥५०॥ तुलसीकाष्ठसम्भूते ! माले ! कृष्णजनप्रिये ! । बिभर्मि त्वामहं कण्ठे कुरु मां कृष्णवल्लभम् ॥५१॥ मन्त्रेणैतेन सम्प्रार्थ्य माला धार्या तु भक्तितः । कर्तव्यानि व्रतानीत्थमूर्जमासे विशेषतः॥५२॥ एकेनापि व्रतेष्वेषु कार्तिकेऽनुष्ठितेन च । चातुर्मास्यव्रतफलं पुरुषस्य भवेज्जनाः ! ॥५३॥ व्रतोपवासनियमा यथाशक्ति ततो नरैः। प्रीतये वासुदेवस्य विधातव्याः प्रयत्नतः ॥५४॥

કેતકીનાં પુષ્પો અથવા જાઈનાં પુષ્પો અથવા અગથીયાનાં પુષ્પો અથવા કમળોથી કારતક માસમાં, અવિનાશી સ્વરૂપ શ્રીકૃષ્ણ-પરમાત્મા પ્રયત્નપૂર્વક પૂજા કરવા યોગ્ય છે; જે માણસોએ કારતકમાસમાં કમળનયન શ્રીકૃષ્ણને કમળોથી પૂજ્યા નથી તે મનુષ્યોના ગૃહમાં કોટિ જન્મ સુધી પણ લક્ષ્મી ન થાય. (૩૮-૩૯) જે માણસ કારતક માસમાં લાખ તુલસીનાં પત્રોથી શ્રીકૃષ્ણનું પૂજન કરે તે માણસ દરેક પત્રે અશ્વમેધ યજ્ઞનું ફળ પ્રાપ્ત કરે છે. (૪૦) આમળાનાં ફળોથી જેનું અંગ લેપાયેલું છે, ધાત્રીનાં ફળો (આમળા)થી જેનું અંગ શણગારેલું છે. ધાત્રીના ફળોનો આહાર કર્યો છે એવો માણસ સંસારથી મુકાય છે. (૪૧) જે પુરુષ આમળીની છાયામાં રહીને ચક્રધારી શ્રીકૃષ્ણની કહેલાં પુષ્પોથી પૂજા કરે તે પુરુષને પુષ્પે પુષ્પે રાજસૂય યજ્ઞનું ફળ નિશ્ચે પ્રાપ્ત થાય છે. (૪૨) જે માણસ આમળીનાં વૃક્ષોથી શોભાયમાન વનમાં દામોદર નામના શ્રીકૃષ્ણને પૂજીને પકવાન્નોથી બ્રાહ્મણોને સંતોષ પમાડે તે માણસ વૈકુંઠ લોકમાં જાય. (૪૩)

રાઈ, જાયફળ, મધ અને કાંસાના પાત્રમાં ભોજન અને તેલ આ વસ્તુઓ કારતક માસમાં ત્યાગ કરવી. વિશેષપણે દ્વિદળ-દાળનો ત્યાગ કરે. (૪૪) અડદ, મગ, મસૂર, ચણા, કળથી, વાલ, ચોળા અને તુવેરની દાળ દ્વિદળ સંજ્ઞાવાળા કહેલા છે. (૪૫)

કારતક માસમાં વ્રતી પુરુષે રાત્રિ ગયેલું અન્ન, સંધિત = લવણ-શાક વગેરે, તથા દાતાએ અતિક્લેશથી આપેલું (મતિદૂષિત) અન્ન તેનું ભક્ષણ કરવું નહિ. તથા સૂરણ, દિવસે નિદ્રા તથા અસત્યભાષણનો ત્યાગ કરવો. (૪૬) કારતક માસમાં વિષ્ણુનામસહસ્રનો પાઠ દિવસમાં અને રાત્રિમાં કરવો. સંધ્યા સમયે હરિમંદિર વગેરેમાં આકાશદીપ આપવો. (૪૭)

કારતક માસમાં જવ અથવા શ્યામો - નિવાર વગેરે ઋષિ-ધાન્ય ભક્ષણ કરવાં તે શુભ છે. કોઈ વ્રતવાળા પુરુષે ક્યારેય પણ કારતક માસ આ કહેલા વ્રતો વિના નિષ્ફળ કાઢવો નહિ. (૪૮) જે પુરુષ કારતક માસમાં ભાગવતી દીક્ષા ગ્રહણ કરે તે પુરુષ જન્મ મરણરૂપી સંસારના બંધનથી નિશ્ચે મુક્ત થાય છે. (૪૯) તુલસીના કાષ્ઠથી થયેલી, કારતક માસમાં શ્રીકૃષ્ણના ચરણકમળમાં અર્પણ કરેલી જે માળા તે તો વૈષ્ણવોએ હંમેશાં ધારણ કરવી. (૫૦)

'હે તુલસીકાષ્ઠથી થયેલા ! હે કૃષ્ણજનને પ્રિય ! હે માલે ! તમોને હું કંઠમાં ધારણ કરું છું. મને શ્રીકૃષ્ણને પ્રિય કરો.' (૫૧) આ મંત્રથી પ્રાર્થના કરી માળા ભક્તિપૂર્વક ધારણ કરવી. આવી રીતે કારતક માસમાં વિશેષપણે વ્રતો કરવાં. (૫૨) હે જનો ! કારતક માસમાં આ કહેલાં વ્રતોમાંથી આચરણ કરેલા એક વ્રતથી પણ પુરુષને ચાતુર્માસના વ્રતનું ફળ થાય. (૫૩) માટે પુરુષોએ વાસુદેવની પ્રીતિ માટે શક્તિ પ્રમાણે વ્રત-ઉપવાસના નિયમો પૂર્વે કહેલા ધારણ કરવા. (૫૪)

सुव्रत उवाच – **इत्युक्त्वा भगवान्भक्तान्नारायणमुनिर्नृप!। विरराम च ते सर्वेऽप्यानन्दं लेभिरे परम् ॥५५॥ ऊचुश्च ते तं चतुरोऽपि मासान्वयं करिष्याम इह व्रतानि । इति प्रभुः सोऽपि तदा प्रसन्नः पुरद्वयावासिजनानशंसत् ॥५६॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे विश्नगरे कार्तिककृच्छ्रादिव्रतनिरूपणनामा त्रिचत्वारिंशोऽध्यायः ॥४३॥

सुव्रत उवाच – **पुरद्वयौकसो भक्तान्सुखयित्वाथ तान् हरिः । अनुज्ञाप्य नभोमासि पञ्चम्यां निर्ययौ ततः ॥१॥ प्रेम्णानुयातो भक्तांस्तान्संनिवर्त्य च वर्त्मनि । ग्राम्यान् पौरांश्च सुखयन्भक्तान् श्रीनगरं ययौ ॥२॥ प्रेष्ठमायान्तमाश्रुत्य पौरा भक्तास्तमभ्ययुः । गीतवादित्रनिर्घोषैर्वाहनैर्विविधैः सह ॥३॥ पुरात् क्रोशार्धदूरे तमश्वारूढं विलोक्य ते । प्रणेमुर्दण्डवत्सर्वे हर्षाश्रुप्लुतदृष्टयः ॥४॥ यथार्हं मानितास्तेन नरयानं तमादरात् । पौरा आरोहयामासू रथादींश्च मुनीनपि ॥५॥ नानाविधानि वाद्यानि वादयन्तस्त उन्मुदः । गायन्तस्तद्गुणानुच्चैः प्राविशन्नगरं नृप ! ॥६॥ आवासं तस्य महति नवीने वेश्मनि प्रभोः । समुनेः कारयामासुस्ततश्चातिथ्यमादरात् ॥७॥ यत्र नूत्नगृहे वासः पुरि तत्राभवद्धरेः । अद्यापि सा प्रतोली तु 'नवावास' इतीर्यते ॥८॥ भक्ष्यैर्भोज्यैर्बहुविधैर्मुनीन् पद्गांश्च वर्णिनः । प्रत्यहं तर्पयामासुर्भक्तास्तं नगरौकसः ॥९॥ नारायणं पुपूजुश्च**

---

હે રાજન્ ! શ્રીનારાયણમુનિ ભક્તોને આ પ્રમાણે કહીને વિરામ પામ્યા, તે સર્વે ભક્તો પણ સર્વોત્તમ આનંદ પામ્યા. (૫૫)

તે ભક્તો શ્રીનારાયણમુનિને હે સ્વામિન્ ! અમો ચાર માસ સુધી પણ આ ચાતુર્માસમાં તમોએ કહેલાં વ્રતો કરીશું : આ પ્રમાણે બોલ્યા. તે સમયે પ્રસન્ન થયેલા શ્રીનારાયણમુનિ પણ વિશનગર અને વડનગરના નિવાસી ભક્તજનોની પ્રશંસા કરતા હતા. (૫૬) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે દ્વિતીય પ્રકરણે વિશ્નગરે કાર્તિકકૃચ્છ્રાદિ વ્રતનિરૂપણનામા ત્રિચત્વારિંશોઽધ્યાયઃ (૪૩)*

## અધ્યાય : ૪૪

### શ્રીનગરમાં અતિ પ્રતાપી શ્રીહરિનાં દર્શનથી શાસ્ત્ર જાણનારા બ્રાહ્મણોએ શ્રીહરિનો આશ્રય કર્યો તે કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પછી શ્રીહરિ બંને ગામના નિવાસી ભક્તોને સુખી કરી તેમને પૂછીને શ્રાવણ માસમાં સુદી પાંચમને દિવસે તે નગરથી નીકળ્યા. (૧) શ્રીહરિ પ્રેમના અતિશયથી પોતાની પાછળ આવતા ભક્તોને પાછા વાળી માર્ગમાં આવતાં ગામો અને નગરોના નિવાસી ભક્તજનોને સુખ આપતા શ્રીનગરમાં ગયા. (૨) શ્રીનગરનાં નિવાસી ભક્તજનો પોતાના પુરમાં આવતા અતિપ્રિય શ્રીહરિને સાંભળી ગીત-વાજિંત્રોના ઘોષ સાથે વિવિધ પ્રકારનાં વાહનોની સાથે સન્મુખ ગયા. (૩)

તે ભક્તો નગરથી અર્ધો ગાઉ દૂર પ્રદેશમાં ઘોડા ઉપર બેઠેલા પોતાના પુરમાં આવતા નારાયણમુનિને જોઈ આનંદના આંસુઓ યુક્ત દૃષ્ટિ જેમની છે એવા સર્વ ભક્તો સાષ્ટાંગ પ્રણામ કરતા હતા. (૪) શ્રીહરિએ યથાયોગ્ય સત્કાર કરાયેલા પુરના ભક્તોએ આદરપૂર્વક શ્રીહરિને શિબિકામાં બેસાડ્યા અને સાધુઓને રથ વગેરે વાહનોમાં બેસાડ્યા. (૫)

હે રાજન્, નાના પ્રકારનાં વાજિંત્રો વગાડતા સતા અધિક આનંદવાળા શ્રીહરિના ચરિત્રો ઊંચા સ્વરથી ગાન કરતા ભક્તોએ શ્રીનગરમાં શ્રીહરિની સાથે પ્રવેશ કર્યો. (૬) ભક્તોએ મુનિ વગેરે સહિત શ્રીહરિનો નિવાસ અતિ ઊંચી અને પહોળી નવીન હવેલીમાં કરાવ્યો અને પછી આદરપૂર્વક આતિથ્ય સત્કાર કર્યો. (૭) તે નગરમાં જે નવા ગૃહમાં શ્રીહરિનો નિવાસ થયો તે હવેલી હાલમાં પણ **'નવા વાસ'** તરીકે શ્રીહરિના સંબંધથી કહેવાય છે. (૮)

શ્રીનગરના નિવાસી ભક્તો નાના પ્રકારના ભક્ષ્યભોજ્યાદિથી શ્રીહરિ-મુનિઓ-વર્ણિઓ અને પાર્ષદોને દરરોજ ભોજન કરાવતા હતા. (૯) અને ભક્તો શ્રીહરિને પોતપોતાના ભવનમાં લઈ જઈ ચંદન-જૂઈ વગેરે પુષ્પોના હારો,



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

नीत्वा स्वं स्वं निकेतनम् । गन्धपुष्पानर्घ्यवासोभूषणैर्द्रविणेन च ॥१०॥ महद्भिरेव सम्भारैर्जन्माष्टम्यां महोत्सवम् । भक्तानचीकरत्स्वामी भक्तिमार्गं प्रपोषयन् ॥११॥ ब्राह्मणांस्तर्पयामास तत्र स्वेष्टैः स भोजनैः । सहस्रशोऽथ तेभ्योऽदाद्दक्षिणां भूपतिर्यथा ॥१२॥ एकादश्यां सभा तत्र महत्यासीज्जनाधिप ! । निषेदुस्तत्र पुरुषा योषितश्च यथोचितम् ॥१३॥ वर्णिनश्च गृहस्थाश्च साधवश्च पदातयः । हरेरनुचराः सर्वे तत्र मर्यादयाऽऽसत ॥१४॥ नथ्थुभट्टादयः पौरा नरा गङ्गादयः स्त्रियः । भक्ताः सहस्रशो ह्येते तत्रोपविविशुः सुखम् ॥१५॥ अभक्ताः कौतुकेक्षार्थं नरा योषाः सहस्रशः । तत्रागत्याभितस्तस्थुर्हसन्तोऽकृतवन्दनाः ॥१६॥ विप्रेषु शतशस्तत्र त्वासन्वेदान्तशास्त्रिणः । नैयायिकाश्च शतशो वैयाकरणसत्तमाः ॥१७॥ मीमांसकाश्च योगज्ञाः काव्यालङ्कारवेदिनः । वैदिकास्तान्त्रिकाश्चासन्पुराणज्ञाश्च भूरिशः ॥१८॥ इत्थं सभायां ते सर्वे समेत्य पुरुषाः स्त्रियः । निषण्णाश्च स्थिताः केचिदासन्नुद्ग्रीवदृष्टयः ॥१९॥ सदोमध्यमहापीठे निषसाद हरिः स्वयम् । एकाग्रदृष्ट्या सर्वेऽपि तमेवैक्षन्त भूपते ! ॥२०॥ प्रीत्या समीक्षमाणेषु मुनयस्तेषु केचन । गृहस्थाद्याश्च कतिचित्कतिचिद्योषितोऽपि च ॥२१॥ नारायणमुनेस्तस्य कृपयैव सहस्रशः । लेभिरे तस्य धामानि सद्य एव समाधिना ॥२२॥ ते पुमांसश्च योषाश्च निर्निमेषविलोचनाः । बभूवुर्निश्चलास्तत्र काष्ठपाषाणमूर्तिवत् ॥२३॥ ये निषण्णा निषण्णास्ते स्थितास्ते स्तम्भवत्स्थिताः। भक्तास्तदानीं तत्राऽऽसन्स्वर्णचम्पकरोचिषः ॥२४॥ बहिःस्तब्धदृशः केचिदन्तःपर्यस्तदृष्टयः । आसन्समाधिनिष्ठास्ते स्वात्मलीनासुवृत्तयः ॥२५॥ तान्विलोक्य जनाः सर्वे विस्मयं प्रतिपेदिरे ।

---

અમૂલ્ય વસ્ત્રો અને અલંકારોથી અને સોના-ચાંદીના દ્રવ્યથી પૂજા કરતા હતા. (૧૦) શ્રીહરિએ ભક્તિમાર્ગનું પોષણ કરતા થકા સંવત્ ૧૮૬૬ના શ્રાવણ વદી અષ્ટમી તિથિમાં ઘણી સામગ્રીઓથી મહોત્સવ ભક્તો દ્વારા કરાવ્યો. (૧૧) શ્રીહરિએ રાજાની માફક જન્માષ્ટમીના પારણાને દિવસે હજારોહજાર બ્રાહ્મણોને પોતાનાં ઈષ્ટ ભોજનોથી તૃપ્ત કર્યા અને તેમને દક્ષિણાઓ આપી. (૧૨)

હે રાજન્ ! શ્રીનગરમાં એકાદશીને દિવસે મોટી સભા થઈ. તેમાં પુરુષો અને સ્ત્રીઓ યથાયોગ્ય બેઠાં. (૧૩) શ્રીહરિની સદા સાથે ફરનારા વર્ણિઓ-ગૃહસ્થજનો-સાધુઓ અને પાર્ષદો એ સર્વે સભામાં મર્યાદા પ્રમાણે બેઠાં. (૧૪)

પુરનાં નિવાસી જનો નથ્થુભટ્ટ વગેરે પુરુષો અને ગંગા વગેરે સ્ત્રીઓ એ સર્વે હજારોહજાર ભક્તો સભામાં સુખપૂર્વક બેઠાં. (૧૫)

તેમજ ભગવાનના ભક્ત નહિ એવા પણ હજારો પુરુષો અને સ્ત્રીઓ હાસ્ય કરતાં જેમણે પ્રણામ કર્યા નથી એવા, કુતૂહલ જોવા માટે તે સભામાં આવીને ચોતરફ બેઠાં હતાં. (૧૬)

સભામાં કૌતુક જોવા માટે આવેલા અભક્ત બ્રાહ્મણોમાં સોએસો બ્રાહ્મણો વેદાંતશાસ્ત્રીઓ હતા. સોએ સો બ્રાહ્મણો નૈયાયિકો - વ્યાકરણજ્ઞો તથા મીમાંસકો, ઘણા બ્રાહ્મણો યોગને જાણનારા, કાવ્યાલંકારોને જાણનારા તથા વૈદિકો-તાંત્રિકો અને પુરાણ જાણનારા હતા. (૧૭-૧૮)

આ પ્રમાણે સર્વે પુરુષો અને સ્ત્રીઓ સભામાં આવીને ઊંચી ડોકો અને નેત્રો જેમનાં છે એવાં કેટલાંક બેઠેલાં હતાં. કેટલાંક ઊભાં હતાં. (૧૯) હે રાજન્ ! સભાની મધ્યમાં સિંહાસનમાં બિરાજમાન થયેલા શ્રીહરિને સમગ્ર હરિભક્તો એકાગ્રદષ્ટિથી જ જોતા હતા. (૨૦) સ્નેહથી શ્રીહરિને જોતા ભક્તોમાં કેટલાક મુનિઓ, કેટલાક ગૃહસ્થો વગેરે અને કેટલીક સ્ત્રીઓ પણ, આ પ્રમાણે હજારો ભક્તો શ્રીહરિની કૃપાથી જ તત્કાળ જ સમાધિ વડે શ્રીહરિનાં ગોલોકાદિ ધામોને પામ્યા. (૨૧-૨૨)

તે સભામાં સમાધિવાળા પુરુષો અને સ્ત્રીઓ, નિર્નિમેષ દૃષ્ટિવાળા તેમજ કાષ્ઠ અને પાષાણની મૂર્તિઓની માફક ચેષ્ટારહિત થયા. (૨૩) સભામાં જે સમાધિમાં રહેલા ભક્તો, બેઠેલા હતા તે બેઠેલા જ રહ્યા અને ઊભા હતા તે થાંભલાની માફક ઊભા રહ્યા. તે સર્વે સુવર્ણ અને ચંપાના પુષ્પની માફક કાંતિવાળા હતા. (૨૪)

પોતપોતાના સ્વરૂપમાં લીન છે પ્રાણની વૃત્તિઓ જેમની એવા કેટલાક નાસિકાના અગ્રમાં નિર્નિમેષ દૃષ્ટિ વૃત્તિવાળા હતા. કેટલાક અંદર દૃષ્ટિવાળા હતા. (૨૫) સમાધિવાળાઓને જોઈ સર્વે જનો આશ્ચર્ય પામ્યા. શ્રીહરિને જાણનારા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

हरेः प्रताप एवायमित्यबुध्यन्त तद्विदः ॥२६॥ केचित्तु पौरा विप्राद्याः शास्त्रज्ञा अप्यसद्धियः । समाधिमीदृशं दृष्ट्वा कुहकं मेनिरे हि तम् ॥२७॥ स्वमतख्यापनार्थं हि छद्मजाड्यमिमे श्रिताः । इति ब्रुवन्तः केचित्तु तत्परीक्षामकुर्वत ॥२८॥ ऐक्षन्त केचिन्नाडीज्ञास्तेषां नाडीः करादिषु । केचिज्ज्वलन्तं निदधुर्वह्निं तेषां पदादिषु ॥२९॥ पश्यन्तस्ते मुहुर्नाडीरदृष्ट्वैव चिकित्सकाः । अक्षुब्धत्वं चानलेन वीक्ष्यासन् भृशविस्मिताः ॥३०॥ केचिच्छुरिकया दुष्टास्तेषामङ्गविदारणम् । कृत्वाप्यक्षुब्धतां दृष्ट्वा त्रस्ताः प्रापुः सुविस्मयम् ॥३१॥ भीताः स्वकर्मणस्तेऽथ पश्यन्तश्च परस्परम् । अपराधिनमात्मानं विदुर्योगेश्वरं च तम् ॥३२॥ नारायणमुनिं प्रष्टुं स्वाभिप्रायं ततश्च ते । प्रैरयंस्तत्पुरःसंस्थं नथ्थुभट्टं द्विजं द्विजाः ॥३३॥ सोऽपि तद्भावमाज्ञाय नत्वा नारायणं प्रभुम् । ऊचे बद्धाञ्जलिपुटः कुर्वन् निःसंशयान् द्विजान् ॥३४॥ भगवन् ! शास्त्रवेत्तारः पृच्छन्त्येते द्विजातयः । आकस्मिकसमाधीक्षाभृशविस्मितमानसाः ॥३५॥ सन्ति भूमावत्र हरे ! वेदान्तोपनिषद्गणान् । शृण्वन्तः प्रत्यहं तेषां कुर्वन्तो मननानि च ॥३६॥ अष्टाङ्गं साधयन्त्येव केचिद्योगं तथाऽनिशम् । तेषु तेषु न चैकोऽपि समाधिं प्राप्त ईक्ष्यते ॥३७॥ न च तादृक् श्रूयते वा क्वचिद्ग्रामपुरान्तरे । पुरुषो वापि नारी वा कृताभ्यासोऽप्यनेकधा ॥३८॥ अत्र त्वेते हि बहवो हीनजातिभवा अपि । समाधिनिष्ठां परमां प्राप्ता ईक्ष्यन्त ईश्वर! ॥३९॥ अनभ्यस्ताष्टाङ्गयोग-वेदान्तश्रवणादयः । अप्येते दर्शनादेव तव प्रापुः परां स्थितिम् ॥४०॥ समाधौ किं नु पश्यन्ति नरा एते च योषितः । अस्माकं महदाश्चर्यं वर्ततेऽत्र ततो वद ॥४१॥ सुव्रत उवाच – इति तद्वाक्यमाकर्ण्य प्रहस्य भगवांस्तदा । सन्दिग्धचित्तांस्तानूचे पौरान्विप्रान्कृपानिधिः ॥४२॥ कृत्वैतान् जाग्रतो यूयं सर्वान्पृच्छत भो द्विजाः! । त एव युष्मान्वक्ष्यन्ति समाधौ स्वसमीक्षितम् ॥४३॥

---

ભક્તજનો આ શ્રીહરિનો પ્રતાપ જ જાણતા હતા. (૨૬) શાસ્ત્રજ્ઞો એવા પણ-દુર્મતિવાળા કેટલાંક પુરવાસીઓ-બ્રાહ્મણો વગેરે આ પ્રકારની સમાધિ જોઈને સમાધિને કપટ માનતા હતા. (૨૭) 'આ સમાધિવાળા પોતાના મતની ખ્યાતિ કરવા કપટભાવને આશરેલા છે' આ પ્રકારે બોલતા કેટલાક કુમતિજનો સમાધિવાળાઓની પરીક્ષા કરતા હતા. (૨૮) કેટલાક વૈદ્યજનો તો સમાધિવાળાઓના હાથ વગેરે અંગોમાં નાડીઓ જોતા હતા. કેટલાંક દુષ્ટમતિવાળાં જનો સમાધિવાળાઓના હાથપગ વગેરે અંગોમાં બળતા અંગારા મૂકતા હતા. (૨૯) વૈદ્યો વારંવાર નાડીઓ જોતા સતા નાડીઓ નહિ જોઈને અત્યંત આશ્ચર્ય પામતા હતા. અગ્નિ મૂકનારા જનો અગ્નિથી ક્ષોભરહિત સમાધિવાળાં જનોને જોઈને અત્યંત આશ્ચર્ય પામ્યા. (૩૦)

કેટલાંક દુષ્ટજનો તેઓને છરીથી અંગને છેદવાથી પણ ક્ષોભ નહિ પામતા જોઈ ભય પામતા સતા અત્યંત વિસ્મય પામ્યા. (૩૧) પછી પોતાના કર્મથી ભય પામેલા, અન્યોઅન્યને જોતા  તે દુષ્ટજનો પોતાને અપરાધી જાણતા હતા. શ્રીહરિને યોગાધીશ પરમાત્મા જાણતા હતા. (૩૨) પછી દુષ્ટ બ્રાહ્મણો પોતાનો અભિપ્રાય શ્રીહરિને પૂછવા, શ્રીહરિની આગળ બેઠેલા નથુભટ્ટને પ્રેરણા કરતા હતા. (૩૩)

નથુભટ્ટ પણ કુમતિવાળા વિદ્વાન બ્રાહ્મણોને સંશયે રહિત કરતા બંને હાથ જોડી શ્રીહરિને કહેવા લાગ્યા : (૩૪) હે ભગવન્ ! સમગ્ર શાસ્ત્રજ્ઞો એકદમ થયેલી સમાધિના જોવાથી અત્યંત આશ્ચર્ય મનવાળા આ વિદ્વાન બ્રાહ્મણો મારા દ્વારા તમોને નિવેદન કરે છે : (૩૫) હે હરે ! આ પૃથ્વીમાં વેદના અંત ભાગોરૂપ ઉપનિષદ્ સમુદાયોને દરરોજ સાંભળતા અને શ્રવણ કરેલાં ઉપનિષદોનું  મનન દરરોજ કરતા પુરુષો છે. (૩૬) તે જ પ્રકારે કેટલાક પુરુષો રાત્રિદિવસ અષ્ટાંગયોગને સિદ્ધ કરે છે જ છતાં વેદાંતાદિ શ્રવણ, મનન, અભ્યાસમાં નિષ્ઠાવાળા અને અષ્ટાંગયોગમાં નિષ્ઠાવાળા પુરુષોમાં એક પણ પુરુષ સમાધિ પામેલો અમોએ જોયો નથી. (૩૭) અનેક પ્રકારે અભ્યાસવાળા પણ તેવી સમાધિને પામેલા પુરુષ અથવા સ્ત્રી કોઈ પણ ગામ અને બીજાં પુરોમાં અમોએ સાંભળ્યા નથી. (૩૮) હે ઈશ્વર ! આ સભામાં તો ત્રણ વર્ણ વિનાના શૂદ્ર જાતિના પણ આ માણસો-જેમણે અષ્ટાંગયોગનો અભ્યાસ તથા વેદાંત શ્રવણાદિ પરિશ્રમ કરેલો નથી તે પણ તમારા દર્શનથી જ આ પરમ સમાધિસ્થિતિને પામેલા છે ? (૩૯-૪૦) આ સમાધિવાળા પુરુષો અને સ્ત્રીઓ સમાધિમાં શું જુએ છે ?  આ અર્થમાં આ અમોને મોટું આશ્ચર્ય થાય છે. માટે સમાધિમાં આ જનોએ શું જોયું તે કહો. (૪૧)

**સુવ્રત મુનિ કહે છે** : હે રાજન્ ! દયાસાગર શ્રીહરિ તે સમયે નથુભટ્ટનું વાક્ય સાંભળીને હસતા સતા સંશયેયુક્ત ચિત્તવાળા પુરના વિપ્રોને કહેવા લાગ્યા : (૪૨) હે વિપ્રો ! તમો સમાધિવાળા જનોને જાગ્રત કરીને પૂછો. તે સમાધિવાળા સમાધિથી બહાર આવીને તે જનો જ સમાધિમાં તેમણે પોતે જોયેલું તમોને કહેશે. (૪૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

इत्युक्तवन्तं तं प्राहुः शास्त्रिणस्ते जगद्गुरुम् । नैतान्बोधयितुं शक्ता मृतप्रायान्वयं विभो ! ॥४४॥ अस्माभिर्दुष्टभावत्वा-द्वह्निशस्त्रादिभिर्ध्रुवम् । पीडिता अपि नैवैते जाग्रतीत्यद्भुतं महत् ॥४५॥ त्वमेवैतांस्ततः सर्वान्कुरु जागरितान् प्रभो ! । ततो वयं तान्प्रक्ष्यामः समाधौ यत्समीक्षितम् ॥४६॥ ततो नारायणमुनिस्तानैक्षत समन्ततः । तावदुत्थाय ते सर्वे तं प्रणम्यावतस्थिरे ॥४७॥ व्युत्थितांस्तानपृच्छंस्ते साश्चर्यं शास्त्रिणो द्विजाः । यूयं पश्यथ किं भक्ताः ! समाधौ ब्रूत तत्तु नः ॥४८॥ समाधौ वीक्षितो यस्तु तस्यैव स्वामिनोऽथ ते । आज्ञां गृहीत्वा विप्रांस्तानूचुः सर्वे पृथक् पृथक् ॥४९॥ केचिदाहुश्चिदाकाशे प्राकृतात्तमसः परे । राधालक्ष्मीयुतः साक्षाद्दृष्टो ब्रह्मपुरे ह्ययम् ॥५०॥ अयुतार्कमहःपुञ्जे श्वेतद्वीपेऽमुमीश्वरम् । युक्तं मुक्तैर्निरन्नाख्यैर्वासुदेवमचक्ष्महि ॥५१॥ इत्यूचुः केचन जनाः केचित्तांश्चैवमूचिरे । अनेकभूतिसञ्जुष्टे गोलोके राधिकेश्वरः ॥५२॥ कृष्णमूर्तिरसावेव रासमण्डलभूषणम् । नारायणमुनिर्दृष्टो गोपगोपीनिषेवितः ॥५३॥ केचिदूचुर्महालक्ष्म्या विष्वक्सेनादिभिः सह । महावैकुण्ठलोकेऽयं दृष्टोऽस्माभिर्हरिः स्वयम् ॥५४॥ केचिदाहुर्वयं त्वेनं सलक्ष्मीकमचक्ष्महि । विष्णुं वैकुण्ठलोके वै सेवितं पार्षदोत्तमैः ॥५५॥ क्षीराब्धौ शेषपर्यङ्के श्रीसेवितपदाम्बुजम् । योगस्वामिनमेवैनमद्राक्ष्मेत्यूचिरेऽपरे ॥५६॥ नरनारायणं ह्येनं वयं तु बदरीवने । अचक्ष्महि तपस्यन्तमित्यूचुः केचन द्विजान् ॥५७॥ हिरण्यवर्णं पुरुषं वयं तु रविमण्डले । नारायणमुनिं ह्येनमपश्याम महाद्युतिम् ॥५८॥ इत्यूचिरे केऽपि विप्रान्केचित्प्राहुर्वयं त्वमुम् । अद्राक्ष्म यज्ञपुरुषं दीप्यमानेऽग्निमण्डले ॥५९॥ एवं ये ये यं यमापुर्लोकं ते ते तदाश्रयम् । ऐश्वर्यं वैभवं चापि प्राहुस्तेभ्यः सविस्तरम् ॥६०॥

---

હે રાજન્, આ પ્રકારે કહેતાં જગત્‌ગુરુ શ્રીહરિને શાસ્ત્રી બ્રાહ્મણો કહેવા લાગ્યા : હે વિભો, અમો આ મરી ગયેલા સમાન જનોને જાગ્રત કરવા શક્તિમાન નથી. (૪૪) અમોએ દુષ્ટ અભિપ્રાયથી અગ્નિ અને શસ્ત્રાદિથી નિશ્ચે પીડા પમાડેલા છતાં સમાધિવાળા જાગ્યા નથી આ મોટું આશ્ચર્ય છે. (૪૫) હે પ્રભો ! માટે તમો જ એ સર્વે જનોને જાગ્રત કરો. પછી અમો સમાધિમાં જે જોયેલું તેઓને પૂછીશું. (૪૬) હે રાજન્, પછી શ્રીહરિ તે સર્વેને ચોતરફ જોતા હતા. જોવા માત્રથી જ સર્વે સમાધિવાળા જાગ્રત થઈને શ્રીહરિને પ્રણામ કરીને બેઠા. (૪૭) તેમને શાસ્ત્રીઓ આશ્ચર્યપૂર્વક પૂછતા હતા : 'તમોએ સમાધિમાં શું જોયું તે અમોને કહો.' (૪૮)

પછી સમાધિવાળા જનો સમાધિમાં જે જોયેલું તે શ્રીહરિની આજ્ઞા ગ્રહણ કરી તે વિદ્વાનોને ભિન્ન ભિન્ન કહેવા લાગ્યા : (૪૯) હે વિપ્રો ! પ્રકૃતિજન્ય ગાઢાન્ધકારથી પર ચિદાકાશમાં બ્રહ્મપુરમાં આ પ્રત્યક્ષ નારાયણ મુનિ, રાધા-લક્ષ્મી સહિત અમોએ જોયા : આ પ્રમાણે કેટલાક સમાધિવાળા કહેતા હતા. (૫૦) એકસાથે ઉદય પામેલા દશ હજાર સૂર્યના જેવો તેજનો સમુદાય જેમાં છે એવા શ્વેતદ્વીપમાં આ નારાયણમુનિને નિરન્ન મુક્તોએ સહિત વાસુદેવ પરમાત્મા સ્વરૂપે અમોએ જોયા : આ પ્રમાણે કેટલાક જનો કહેતા હતા. (૫૧) અનેક સંપત્તિએ યુક્ત ગોલોક ધામમાં આ નારાયણમુનિ જ રાધિકેશ્વર, રાસમંડળના ભૂષણ-ગોપો અને ગોપીઓથી સેવાયેલા-શ્રીકૃષ્ણની આકૃતિવાળા અમોએ જોયા : આ પ્રમાણે કેટલાક સમાધિવાળા વિદ્વાન બ્રાહ્મણોને કહેતા હતા. (૫૨-૫૩) મહાવૈકુંઠધામમાં આ નારાયણમુનિ મહાલક્ષ્મી-વિષ્વક્‌સેનાદિ પાર્ષદો સાથે પોતે શ્રીહરિ ભૂમાપુરુષરૂપે અમોએ જોયા : એમ કેટલાક કહેતા હતા. (૫૪)

અમો તો શ્રીહરિને વૈકુંઠલોકમાં લક્ષ્મી સહિત નંદસુનંદાદિ પાર્ષદોએ ઉપાસના કરાયેલા વિષ્ણુને જોતા હતા : આ પ્રમાણે કેટલાક કહેતા હતા. (૫૫) નારાયણમુનિને જ ક્ષીરસમુદ્રમાં શેષશય્યા પર રહેલા લક્ષ્મીએ સેવાયેલાં છે ચરણકમળ જેમનાં એવા યોગેશ્વર અમોએ જોયા : આ પ્રમાણે બીજા કહેતા હતા. (૫૬) અમો તો શ્રીહરિને જ બદરિકાશ્રમમાં તપ કરતા નરનારાયણને જ જોતા હતા : આ પ્રમાણે કેટલાક બ્રાહ્મણોને કહેતા હતા. (૫૭) અમો તો આ નારાયણ મુનિને સૂર્યના મંડળમાં મહાતેજોમૂર્તિ હિરણ્યમય પુરુષને જોતા હતા : આ પ્રમાણે કેટલાક વિદ્વાન બ્રાહ્મણોને કહેતા હતા. (૫૮) અમોએ તો આ શ્રીહરિને પ્રકાશમાન અગ્નિમંડળમાં યજ્ઞપુરુષ જોયા : આ પ્રકારે કેટલાક કહેતા હતા. (૫૯) આ પ્રકારે જે જે સમાધિવાળા જનો જે જે લોકને પામ્યા હતા તે તે લોક સંબંધી અણિમાદિ ઐશ્વર્ય અને વૈભવો પણ વિસ્તારે સહિત જેમ હોય તેમ વિદ્વાન બ્રાહ્મણોને કહેતા હતા. (૬૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तदा ते शास्त्रवेत्तारस्तथा पौराणिकादयः। यथाशास्त्रं वचस्तेषां श्रुत्वाऽऽपुर्विस्मयं परम् ।।६१।। तेऽदृष्टाश्रुतशास्त्राणां बालानां योषितामपि । यथावत्तद्वचः श्रुत्वा चिन्तयामासुरात्मनि ।।६२।। अनधीतपुराणाद्या एते प्राहुर्यथातथम् । तस्मात्समाधिरेतेषां सत्य एव न संशयः ।।६३।। अहो ईदृक्समाधिर्वै सद्यो यद्दर्शनाद्भवेत् । तस्मादन्यः प्रभुः कोऽपि नास्त्येवेति सुनिश्चितम् ।।६४।। य एतेषामनायासान्नाडीः प्राणांश्च कर्षति । स चेदखिललोकस्य कर्षेत्तन्नेति को वदेत् ।।६५।। अयमेव ततः साक्षादीश्वरो नात्र संशयः । अस्याश्रयेण कल्याणं भवेदेव न चान्यतः ।।६६।। इति निश्चित्य ते सर्वे तं प्रणम्य महाप्रभुम् । तदाश्रयं चिकीर्षन्तः स्वानि कर्माणि सस्मरुः ।।६७।। जनानां वञ्चनार्थं हि यद्यत्कर्म पुराकृतम् । स्वेनैव दम्भभक्त्यादि तत्तत्स्मृत्वाऽनुतेपिरे ।।६८।। धर्माभासेन पापानि यानि यान्यभवन् स्वतः । तानि तानि च संस्मृत्य बभूवुः साश्रुलोचनाः ।।६९।। कामक्रोधमदेर्ष्याभिर्यद्यत्पापं च लोभतः । कृतं तत्तच्च संस्मृत्य मूर्च्छिता इव तेऽभवन् ।।७०।। इत्थमत्यनुतापाग्निदह्यमानाघसञ्चयाः । हरिदर्शनमाहात्म्याद्बभूवुः शुद्धचेतसः ।।७१।। ईश्वरं तं च विज्ञाय तस्मिन्स्वीयं मनः स्वतः । ते न शक्ता धारयितुं तमेव शरणं ययुः ।।७२।। साष्टाङ्गं तं प्रणम्याथ बद्धाञ्जलिपुटा द्विजाः । ऊचुस्तव स्मो भो स्वामिन् ! पाहि नो घोरसंसृतेः ।।७३।। इत्युक्त्वा ते तमानर्चुर्नूत्नवासोविभूषणैः । चन्दनाक्षतपुष्प-स्त्रग्धूपदीपादिभिर्द्विजाः ।।७४।। नीराजनं विदधतो घनसारेण तस्य च । तालिका वादयन्तश्च जगुरित्थं त उच्चकैः ।।७५।।

---

તે સમયે મીમાંસાદિ સમગ્ર શાસ્ત્ર જાણનારા તથા પુરાણોને જાણનારા વિપ્રો તે નહિ ભણેલા એવા પણ સમાધિવાળાઓનું શાસ્ત્ર પ્રમાણે ગોલોકાદિ ધામોનું વર્ણન સાંભળી પરમ વિસ્મય પામતા હતા. (૬૧) તે વિદ્વાન બ્રાહ્મણો, જેમણે શાસ્ત્રો જોયાં નથી અને સાંભળ્યાં નથી એવાં સમાધિવાળાં બાળકો અને સ્ત્રીઓના પણ શાસ્ત્રાનુસારી પૂર્વોક્ત વચનો સાંભળી પોતાના મનમાં વિચાર કરવા લાગ્યા : (૬૨) આ નથી જાણ્યાં પુરાણાદિ શાસ્ત્રો જેમણે એવા સમાધિવાળા જનો પણ યથાર્થ જ કહે છે. માટે એમની સમાધિ સત્ય છે એમાં સંશય નથી. (૬૩)

અહો ! આવી સમાધિ જેના દર્શન માત્રથી જ થાય; તેમના વિના બીજા પરમેશ્વર કોઈ પણ નથી જ : આ પ્રમાણે નિશ્ચિત જ છે. (૬૪) જે સમાધિવાળાઓની નાડીઓ અને પ્રાણો અનાયાસથી ખેંચે છે, તે અખિલ લોકનાં નાડી અને પ્રાણો ખેંચે તો ના કોણ કહે ? કોઈ પણ કહી શકે નહીં. (૬૫) માટે આ શ્રીહરિ જ પ્રત્યક્ષ પરમેશ્વર છે એમાં સંશય નથી. આ પ્રત્યક્ષ શ્રીહરિના આશ્રયથી જ કલ્યાણ થાય. બીજાના આશ્રયથી અથવા બીજાં સાધનોથી કલ્યાણ થાય નહિ. (૬૬)

હે રાજન્ ! આ પ્રમાણે નિશ્ચય કરી સર્વ વિદ્વાન બ્રાહ્મણો મહાપ્રભુ શ્રીહરિને પ્રણામ કરી શ્રીહરિનો આશ્રય કરવા ઈચ્છતા સતા પોતાનાં દુષ્કર્મોને સ્મરણ કરતા હતા. (૬૭) ધનપ્રાપ્તિ માટે લોકોને છેતરવા માટે દંભભક્તિ વગેરે જે જે કર્મ પોતે જ કરેલાં હતાં તે તે સ્મરણ કરી તે બ્રાહ્મણો અંતઃકરણમાં પશ્ચાત્તાપ કરતા હતા. (૬૮) અસદ્ધર્મ હોવા છતાં પણ ધર્મના આભાસથી મંત્રપ્રોક્ષિત માંસ-ભક્ષણાદિ જે જે પાપો પોતાનાથી થયાં હતાં તે તે સંભારી નેત્રોમાં આંસુવાળા બ્રાહ્મણો હતા. (૬૯)

કામ, ક્રોધ, મદ, ઈર્ષ્યા અને લોભથી જે જે પાપો કરેલાં તે પાપો સંભારી તે બ્રાહ્મણો મૂર્છિત હોય ને શું ? એવા થયા. (૭૦) આ પ્રમાણે અતિશય પશ્ચાત્તાપરૂપી અગ્નિથી અતિશય બળેલા પાપસમુદાયવાળા બ્રાહ્મણો શ્રીહરિનાં દર્શન-માહાત્મ્યથી શુદ્ધ ચિત્તવાળા થયા. (૭૧)

વિદ્વાન બ્રાહ્મણોએ નારાયણ મુનિને પરમેશ્વર જાણીને પણ પોતાનું મન શ્રીહરિમાં સ્થિર કરવા પોતાના પ્રયત્નથી શક્તિમાન થયા નહિ ત્યારે શ્રીહરિનો સમાશ્રય કર્યો. (૭૨) પછી શ્રીહરિને સાષ્ટાંગ પ્રણામ કરી બંને હાથ જોડી **વિદ્વાન બ્રાહ્મણો બોલ્યા** : હે સ્વામિન્ ! અમો તમારા છીએ. ઘોર સંસારથી અમારું રક્ષણ કરો. (૭૩) હે રાજન્ ! બ્રાહ્મણો આ પ્રકારે કહીને નવીન વસ્ત્રો અને આભૂષણો અને ચંદન, અક્ષત, પુષ્પના હારો, ધૂપ, દીપ, વગેરે જેમાં છે; એવા બરફી વગેરે નૈવેદ્યોથી શ્રી નારાયણમુનિની પૂજા કરતા હતા. (૭૪) શ્રી નારાયણ મુનિની કપૂરથી આરતી કરતા બ્રાહ્મણો તાળી વગાડતા સતા ઊંચા સ્વરથી આરતીનાં પદો બોલતા હતા. (૭૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**जय देव ! २ जय मङ्गलमूर्ते ! २ नारायण! पुरुषोत्तम ! २ कृतनिजसुखपूर्ते ! ।** ध्रुवपदम् - **प्राकृततमसः पारे महसि प्रथमाने २ श्रीराधासहितस्त्वं २ ब्रह्मपुरेऽमाने । श्वेतद्वीप उदारेऽयुतरविरूचि युक्तै २ रमृते धामनि नूतो २ निवससि सितमुक्तैः ॥जय०॥७६॥ वैकुण्ठेऽपि रमाया रुचयेऽतिविशाले २ रचिते स्वेन च विष्णु २ र्वससि त्वमकाले । चातुर्मास्य उदारे मृदुतरतनुशेषे २ क्षीराब्धावपि लक्ष्म्या २ सेवितपच्छेषे ॥ जय० ॥७७॥ त्वं च हिरण्यमयरूपो रविमण्डलवर्ती २ नानायज्ञपतिस्त्वं २ ज्वलनत्रयवर्ती । नरनारायणरूपो बदरीवनधामा २ सुखयसि तपसा लोकान् २ अघचयहरनामा ॥ जय० ॥७८॥ गोलोकाधिपतिस्त्वं कृष्णः कलिहर्ता २ राधासङ्गविहारी २ मुरलीरवकर्ता । वैकुण्ठे महति त्वं हरिरसि सुखदाता २ रमया चापि महत्या २ सहितोऽखिलपाता ॥ जय० ॥७९॥ योगेश्वर ! सकलात्मा श्रितजनभयहारी २ त्वमसि प्राणभृतां वै २ निःश्रेयसकारी । तव चरणाम्बुजमेकं शरणं नः सत्यं २ मोचय मायिकबन्धात् २ दूरय दौर्मत्यम् ॥ जय० ॥८०॥ कृत्वा नीराजनं सर्वे मन्त्रपुष्पाञ्जलिं ददुः । प्रणम्य प्रार्थयामासुः पाह्यस्मान् संसृतेरिति ॥८१॥ अथ प्रसन्नो भगवांस्तानाश्वास्य सतांपतिः । अभयं प्रददौ तेभ्यस्ते चाऽऽसन् स्वस्थचेतसः ॥८२॥ तेऽथाज्ञया भगवतस्तत्रोपविविशुर्द्विजाः । प्रसन्ना निजमात्मानं धन्यमेव च मेनिरे ॥८३॥ तानाह च हरिर्यूयमद्यप्रभृति भो द्विजाः ! । सर्वे मदीया भवथ त्रासः कार्यो न संसृतेः ॥८४॥ दैवं पित्र्यं च धर्मं स्वं कुर्वन्तः कृष्णमादरात् । दृढभक्त्या सदोपाध्वमन्ते तद्धाम लप्स्यथ ॥८५॥**

હે દેવ ! હે દેવ ! જય જય ( અમારા શત્રુઓને પરાભવ પમાડવા ઉત્કર્ષ કરો.) હે મંગળમૂર્તે ! હે નારાયણ ! હે પુરુષોત્તમ ! કરી છે પોતાના ભક્તજનોની જેમણે સુખોની પૂર્તિ એવા તમો જય-જય (અમારી દુર્વાસનાનો પરાભવ કરો.) પ્રકૃતિમય ગાઢાન્ધકારથી પર રહેલા મહાતેજોમય ચિદાકાશમાં (દેશ-કાળ-વસ્તુઓથી) અપરિચ્છિન્ન બ્રહ્મપુરમાં તમો લક્ષ્મી અને રાધાએ યુક્ત નિવાસ કરો છો.અતિ મહાન શ્વેતદ્વીપમાં દશ હજાર સૂર્યોના સમાન કાંતિવાળા અમૃત નામના ધામમાં તમો સમાધિમાં પ્રવીણ નિરન્ન મુક્તોએ સ્તુતિ કરાયેલા સતા નિવાસ કરો છો. (૭૬)

લક્ષ્મીજીની પ્રીતિ માટે પોતે સરજેલા અતિ વિશાળ કાળના ભયથી રહિત વૈકુંઠ નામના ધામમાં પણ વિષ્ણુરૂપે તમો લક્ષ્મી સાથે નિવાસ કરો છો. ચાતુર્માસમાં ક્ષીરસમુદ્ર ધામમાં પણ અતિ વિશાળ અતિ કોમળ મૂર્તિવાળા પલંગ રૂપ ફણિપતિ (શેષ) ઉપર લક્ષ્મીજીએ સેવિત છે ચરણકમળ જેમનાં એવા તમો યોગનિદ્રાથી શયન કરો છો. (૭૭)

હે હરે ! તમો હિરણ્યમય પુરુષસ્વરૂપે સૂર્યમંડળના મધ્યમાં રહેનાર છો. તમો દક્ષિણાગ્નિ આહ્‌વનીય- ગાર્હપત્ય આ ત્રણ અગ્નિના મંડળમાં રહેનારા છો. બદરિકાશ્રમવાસી, પાપોના સમુદાયોને નાશ કરનાર છે નામ જેમનું એવા નરનારાયણ રૂપવાળા તમો તપથી ભરતખંડના નિવાસી પોતાના ભક્તોને સુખી કરો છો. (૭૮)

કલિના બળને નાશ કરનારા-રાધાની સાથે મળીને વિહાર કરનારા-મુરલી વગાડનાર-ગોલોક ધામના અધિપતિ કૃષ્ણ તમો છો. મહાવૈકુંઠ ધામમાં સુખ આપનારા-સમગ્ર વિશ્વનું રક્ષણ કરનારા-મહાલક્ષ્મી સહિત શ્રીહરિ ભૂમા પણ તમો છો. (૭૯)

હે યોગેશ્વર ! તમો જીવ પ્રાણીમાત્રના અંતર્યામી આત્મા છો. આશ્રિત જનોના ભય હરનારા છો. પરમ કલ્યાણ આપનારા તમો જ છો. હે હરે ! તમારું કેવળ (એકમાત્ર) ચરણકમળ અમારું સત્ય શરણ છે. માટે માયાના બંધનથી મુક્ત કરો. અમારી દુર્ગતિ દૂર કરો. (૮૦)

હે રાજન્ ! સર્વ વિદ્વાન બ્રાહ્મણો આરતીવિધિ કરી મંત્રપુષ્પાંજલિ શ્રીહરિની ઉપર સમર્પણ કરતા હતા. પછી સાષ્ટાંગ પ્રણામ કરી, અમોને સંસારથી રક્ષણ કરો : આ પ્રમાણે પ્રાર્થના કરતા હતા. (૮૧) પછી સાધુજનોના સ્વામી શ્રીહરિ પ્રસન્ન થઈ તે બ્રાહ્મણોને આશ્વાસન આપવા પૂર્વક બ્રાહ્મણોને અભયદાન આપતા હતા અને તે બ્રાહ્મણો પણ સ્વસ્થ = સુખી અંતઃકરણવાળા થયા. (૮૨) પછી તે બ્રાહ્મણો શ્રીહરિની આજ્ઞાથી સભામાં બેઠા. પ્રસન્ન મનવાળા સતા પોતાના આત્માને કૃતાર્થ માનતા હતા. (૮૩)

શ્રીહરિ બ્રાહ્મણોને કહેવા લાગ્યા, હે વિપ્રો ! આજથી આરંભીને તમો સર્વે મારા છો. માટે જન્મમરણરૂપ સંસારનો ભય રાખવો નહિ. (૮૪) દેવ સંબંધી કર્મ અને પિતૃ સંબંધી કર્મ અને વર્ણાશ્રમનો ધર્મ આચરણ કરતા તમો દૃઢ ભક્તિથી આદરપૂર્વક નિરંતર કૃષ્ણની ઉપાસના કરો. અંતે શ્રીકૃષ્ણના ગોલોકાદિ ધામને પામશો. (૮૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच - **एवमुक्ता भगवता ते द्विजाः शास्त्रवेदिनः । तमेव कृष्णं जानन्तो विनयेनेदमब्रुवन् ॥८६॥** ब्राह्मणा ऊचुः - **नारायण ! हरे ! स्वामिन्मुमुक्षुपरमाश्रय ! । नृदेहलब्धिसाफल्यमद्यैव वयमाप्नुमः॥८७॥ वेदैः शास्त्रैः पुराणैश्च य ईश्वर इतीर्यते । स एव त्वमसीत्यद्य जातोऽस्मद्धृदि निश्चयः ॥८८॥ कृतकृत्या वयं जाता विमुक्ताः कर्मपाशतः । शास्त्राण्यविद्म सर्वाणि त्वत्पराणीति चाधुना ॥८९॥ श्वेतद्वीपे च वैकुण्ठे गोलोके ब्रह्मपत्तने । महावैकुण्ठलोके च बदर्यां क्षीरसागरे ॥९०॥ मण्डले वीतिहोत्रस्य भास्करस्य च मण्डले । भिन्नं भिन्नं पुराऽविद्म वयमीश्वरमीश्वर ! ॥९१॥ सत्योऽसौ नैव सत्योऽसाविति वादोऽपि भूरिशः । विद्वद्भिः पुरुषैः साकं कृतोऽस्माभिश्च तत्कृते ॥९२॥ अधुना तु वयं स्वामिन्सर्वकारणकारणम् । समाधिनिष्ठवचनैर्विद्म त्वामेकमेव हि ॥९३॥ स्वामिनारायण! विभो ! करिष्यामो वयं सदा । तवैव कृष्णसंज्ञस्य भक्तिं नवविधामपि ॥९४॥ दैवं पित्र्यं च यत्कर्मानुष्ठेयं भवतोदितम् । पृच्छामोऽत्र तु किञ्चित्त्वां श्रोतुमर्हसि तत्प्रभो ! ॥९५॥ त्वदाश्रितानामस्माकं कृतार्थत्वादतः परम् । दैवेन वापि पित्र्येण किंनु स्यात्कर्मणा फलम् ॥९६॥ तस्माद्विहातुमिच्छामः कर्मक्लेशं वयं विभो ! । स्वर्गादिस्तुच्छलोकस्य नास्त्येवेच्छाऽस्मदन्तरे ॥९७॥ तद्युक्तं वा न युक्तं वा पृच्छामस्त्वामिति प्रभो ! । यथावदुत्तरं तस्य वक्तुमर्हत्यतो भवान् ॥९८॥** सुव्रत उवाच - **विद्वद्भिर्ब्राह्मणैरित्थं पृष्टो नारायणो नृप ! । सुप्रसन्नः प्रशंसंस्तान्प्रोवाच श्लक्ष्णया गिरा ॥९९॥** श्रीनारायणमुनिरुवाच - **यूयं धन्याः स्थ भो विप्राः ! श्रुतं हि सफलीकृतम् । पुंसां भक्तिविहीनानां किं फलं शास्त्रपेटकैः ॥१००॥ शास्त्रैर्यद्वेदितव्यं तद्भवद्भिर्विदितं किल । प्राप्तव्यमपि यत्किञ्चित्तत्प्राप्तं हीत्यवैत च ॥१०१॥**

---

**સુવ્રતમુનિ કહે છે** , હે રાજન્ ! શ્રીહરિએ આ પ્રમાણે કહેલા, શાસ્ત્ર જાણનારા બ્રાહ્મણો શ્રી નારાયણ મુનિને જ પ્રત્યક્ષ શ્રી પુરુષોત્તમ જાણતા વિનયથી બોલ્યા : (૮૬) હે નારાયણ ! હે સ્વામિન્ ! હે મુમુક્ષુ જનોના પરમ આશ્રયભૂત ! અમો મનુષ્યદેહની પ્રાપ્તિનું સફળપણું આ દિવસે જ પામેલા છીએ. (૮૭) સર્વ વેદો-શાસ્ત્રો અને પુરાણો દ્વારા જે સર્વ નિયંતા કહેવાય છે. તે જ પરમેશ્વર તમો છો : આ પ્રમાણે નિશ્ચય, અમારા મનમાં હાલમાં થયો છે. (૮૮)

અમો કર્મના પાશથી મુક્ત થયા છીએ. માટે જ કૃતાર્થ થયા છીએ. અને સમગ્ર શાસ્ત્રોને તમો પ્રધાન જેમાંછો એવાં હાલમાં અમો જાણીએ છીએ. (૮૯) શ્વેતદ્વીપ-વૈકુંઠ-ગોલોક-બ્રહ્મપુર-મહાવૈકુંઠ લોક-બદરિકાશ્રમ અને ક્ષીરસાગર તથા અગ્નિના મંડળમાં અને સૂર્યના મંડળમાં હે ઈશ્વર ! અમો તમારો નિશ્ચય થયા પહેલાં ભિન્ન ભિન્ન પરમેશ્વર જાણતા હતા. (૯૦-૯૧) આ ધામના ઈશ્વર સત્ય છે, અમુક ધામના ઈશ્વર સત્ય નથી : આ પ્રકારનો વાદ પણ ઘણા વિદ્વાન પુરુષોની સાથે અમોએ ઈશ્વરના સત્યત્વ અને અસત્યત્વના નિર્ણય માટે કરેલો છે. (૯૨) હે સ્વામિન્ ! હાલમાં તો અમો સમાધિનિષ્ઠનાં વચનોથી સર્વકારણના કારણ તમો એકને જ સર્વરૂપ ધરનારા છો એમ જાણીએ છીએ, જ. (૯૩)

હે સ્વામિનારાયણ ! હે વિભો ! કૃષ્ણ નામવાળા તમારી જ નવ પ્રકારની ભક્તિ પણ અમો નિરંતર કરીશું. (૯૪) હે પ્રભો ! દેવ સંબંધી અને પિતૃ સંબંધી જે કર્મ તમોએ કર્તવ્યપણે કહ્યું. આમાં તો તમોને થોડું કંઈક પૂછીએ છીએ તે તમો સાંભળવા યોગ્ય છો. (૯૫) તમારા આશ્રિતો અમો કૃતાર્થ થયા છીએ. માટે આથી બીજું દેવ સંબંધી અને પિતૃ સંબંધી કર્મ કરવાથી પણ શું ફળ થાય ? કંઈ પણ નહિ. (૯૬) હે વિભો ! અમો કર્મનો ક્લેશ ત્યાગ કરવા માટે ઈચ્છીએ છીએ. દેવકર્મ અને પિતૃકર્મ આ બંને કર્મોના આચરણના ફળરૂપ સ્વર્ગ વગેરે તુચ્છ લોકની અમારા હૃદયમાં ઈચ્છા નથી જ. (૯૭) હે પ્રભો! તે બંને પ્રકારનાં કર્મો, તેનો ત્યાગ કરવો તે યોગ્ય છે કે યોગ્ય નથી. આ તમોને પૂછીએ છીએ માટે તમો આ પ્રશ્નનો યથાર્થ ઉત્તર કહેવા યોગ્ય છો. (૯૮) **સુવ્રતમુનિ કહે છે,** હે રાજન્ ! વિદ્વાન વિપ્રોની વાણી સાંભળી અતિ પ્રસન્ન થયેલા શ્રીહરિ તેમની પ્રશંસા કરતા થકા સુંદર વાણીથી કહેવા લાગ્યા. (૯૯)

**શ્રીનારાયણમુનિ બોલ્યા** : હે વિપ્રો ! તમો ધન્ય છો. પોતે ભણેલું શાસ્ત્ર સફળ કર્યું. ભક્તિ રહિત પુરુષોને શાસ્ત્રના પટારાઓથી શું ફળ છે ? કંઈ પણ નથી. (૧૦૦) શાસ્ત્રોના અધ્યયનથી જે કાંઈ જાણવા યોગ્ય તે તમોએ નિશ્ચે જાણેલું છે. અને જે કંઈ પામવા યોગ્ય છે તે પણ પ્રાપ્ત થયેલું જ છે : આ પ્રકારે તમો જાણો. (૧૦૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

भवद्भिर्यः स्वधर्मस्य वैदिकस्यापि वाडवाः ! । त्यागः प्रोक्तः स तु मते विद्यते नैव नः किल ॥१०२॥ यावद्देहस्मृतिर्नृणां भवेत्तावदतन्द्रितैः । स्वस्वधर्मः पालनीयः सर्वैर्वर्णाश्रमोचितः ॥१०३॥ मच्छ्रितो नैव कर्माणि बुद्धिपूर्वं त्यजेत्सुधीः । तान्येवैनं प्रहास्यन्ति समाधिविवशं यतः ॥१०४॥ मुक्तैरपि न हेयानि धर्मकर्माणि सर्वथा । कुतो मुमुक्षुभिस्तर्हि तानि हेयानि मूढवत् ॥१०५॥ ये तु माहात्म्यमालम्ब्य भक्तेर्ज्ञानस्य वा धिया । धर्मं त्यजन्ति ते नूनं ततो भ्रष्टाः पतन्त्यधः ॥१०६॥ श्रीवासुदेवमाहात्म्यात्स्कन्दोक्तादस्य विस्तरः । भवद्भिरवगन्तव्यो धियानाकुलयाऽखिलः ॥१०७॥ सुव्रत उवाच - इत्युक्तास्ते द्विजास्तेन तथेत्यूचुः प्रणम्य तम् । एवं भगवता तत्र प्रतापः स्वस्य दर्शितः ॥१०८॥ प्रत्यहं स सभासंस्थो जनान्सद्धर्ममादिशत् । यूथशोऽनुदिनं लोकास्तस्य चाश्रयमाचरन् ॥१०९॥ आनन्दयन्भक्तजनान् धर्मं भक्तिं च पोषयन् । तत्रोवास हरी राजन्प्रबोधन्युत्सवावधि ॥११०॥ सन्तोष्य सर्वान् पुरभक्तसङ्घांस्तत्र प्रतिष्ठाप्य च धर्मसेतून् । धर्माङ्गजो गुर्जरराजधान्याः स निर्ययौ श्रीनगरान्नरेन्द्र ! ॥१११॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे श्रीनगरे भगवदतिप्रतापदर्शनाच्छास्त्रविद्विप्रकृतभगवदाश्रयनिरूपणनामा चतुश्चत्वारिंशोऽध्यायः ॥४४॥

सुव्रत उवाच - ततः स भगवानायाज्जयतल्पाभिधं पुरम् । नानातरुगणाकीर्णं जलाशयमनोरमम् ॥१॥ प्रत्युद्गतो भक्तजनैराशाजिज्जीवनादिभिः । तत्रत्यैरतिहर्षेण प्राप तच्च नराधिप ! ॥२॥ उपकण्ठे तडागस्य तत्र न्यग्रोधमण्डिते । आवासमकरोत्स्वस्य सह मुन्यादिभिर्हरिः ॥३॥

---

હે બ્રાહ્મણો ! તમોએ વેદમાં કહેલા દેવપિતૃનું કર્માદિ લક્ષણ આચારનો જે ત્યાગ કહ્યો તે ત્યાગ તો અમારા મતમાં નથી જ. (૧૦૨) મારા આશ્રિત સર્વ મનુષ્યોએ જ્યાં સુધી દેહની સ્મૃતિ હોય ત્યાં સુધી આળસે રહિત-સાવધાન થઈને પોતપોતાનો વર્ણાશ્રમધર્મ પાલન કરવો. (૧૦૩) બુદ્ધિમાન પુરુષે વર્ણાશ્રમોચિત સંધ્યાવંદનાદિ નિત્યકર્મો બુદ્ધિપૂર્વક ત્યાગ ન જ કરવાં, કારણ કે સમાધિ પરતંત્ર મારા આશ્રિત જનને કર્મો જ ત્યાગ કરે છે. (દેહની સ્મૃતિ હોય તો કર્મો કરવાં જ.) (૧૦૪) મુક્તોએ પણ પોતાના ધર્માચરણની ક્રિયાઓ સર્વ પ્રકારે ત્યાગ કરવી નહિ. તો મુમુક્ષુઓએ ધર્મકર્મો મૂર્ખની માફક કયા કારણથી ત્યાગ કરવાં ? અર્થાત્ ત્યાગ ના કરવાં. (૧૦૫)

જે પુરુષો ભક્તિ અથવા જ્ઞાનના માહાત્મ્યનું બળ લઈને બુદ્ધિપૂર્વક ધર્મનો ત્યાગ કરે છે તે પુરુષો ભક્તિ અને જ્ઞાનથી ભ્રષ્ટ થઈ નરકમાં નિશ્ચે પડે છે. (૧૦૬) હે બ્રાહ્મણો ! ધર્મનો સમગ્ર વિસ્તાર તમોએ એકાગ્રચિત્તથી સ્કંદપુરાણમાં રહેલા વાસુદેવ-માહાત્મ્યથી જાણવો. (૧૦૭)

**સુવ્રતમુનિ કહે છે** : હે રાજન્ ! નારાયણમુનિએ શ્રીનગરમાં આ પ્રમાણે કહેવાયેલા બ્રાહ્મણો શ્રીનારાયણમુનિને પ્રણામ કરી જેમ તમો કહો છો તે પ્રમાણે અમો કરીશું એમ બોલ્યા. આવી રીતે શ્રીહરિએ શ્રીનગરમાં પોતાનો પ્રતાપ બતાવ્યો. (૧૦૮) શ્રીહરિ દરરોજ સભામાં બેસી જનોને ભાગવતધર્મનો ઉપદેશ આપતા હતા. દરરોજ ભેગા થઈ ઘણા લોકો શ્રીહરિનો આશ્રય કરતા હતા. (૧૦૯) હે રાજન્, શ્રીહરિએ ભક્તજનોને આનંદ આપતા, ભક્તિ અને ધર્મનું પોષણ કરતા, શ્રીનગરમાં કારતક સુદી એકાદશીના ઉત્સવ સુધી નિવાસ કર્યો. (૧૧૦)

હે નરેન્દ્ર ! ધર્મપુત્ર શ્રીહરિ શ્રીપુરવાસી સર્વ ભક્તજનોના સંઘોને સંતોષ પમાડીને ત્યાં શ્રીનગરમાં ધર્મમર્યાદાને સ્થાપન કરી, ગુજરાતની રાજધાની તે શ્રીનગરથી નીકળ્યા. (૧૧૧) *ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે શ્રીનગરે ભગવદતિપ્રતાપદર્શનાત્શાસ્ત્રવિદ્વિપ્રકૃતભગવદાશ્રય-નિરૂપણનામા ચતુશ્ચત્વારિંશોઽધ્યાયઃ (૪૪)*

## અધ્યાય : ૪૫

### જેતલપુરમાં કૌલમતનું ખંડન કરવા માટે પૂર્વપક્ષ રૂપે કીચકશિષ્યો દ્વારા કૌલમતનું નિરૂપણ કર્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્, પછી શ્રીહરિ નાના પ્રકારનાં વૃક્ષોના સમુદાયોથી ચોતરફ વ્યાપ્ત જળાશયોથી મનોહર જેતલપુર નામના નગરમાં આવ્યા. (૧) હે નરાધિપ ! જેતલપુરના નિવાસી આશાજી, જીવન, દેવરામ વગેરે ભક્તજનો અતિ હર્ષપૂર્વક શ્રીહરિની સન્મુખ ગયા. ભક્તોએ સત્કાર કરાયેલા શ્રીહરિ જેતલપુર પધાર્યા (૨) ત્યાં વડનાં વૃક્ષોથી અલંકૃત સરોવરની સમીપમાં શ્રીનારાયણમુનિએ સંતોની સાથે પોતાનો નિવાસ કર્યો. (૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

देवरामदयारामावाशारामद्वयं तथा । मयारामोग्रचन्द्राद्यास्तमसेवन्त वाडवाः ॥४॥ आशाजित्काकुजिद्गङ्गादासो जीवनशङ्करौ । मनोहरो राजजिच्चेत्याद्या वैश्याश्च भावुकाः ॥५॥ रळ्याता तथा रक्षा रामा जवरयादयः । योषाश्च सादरं तस्य परिचर्यामकुर्वत ॥६॥ आतिथ्यं विदधुः सम्यग्भक्ताश्चास्य च पूजनम् । उवास स सुखं तत्र सुखयन्निजसंश्रितान् ॥७॥ सम्भारेणैव महता तत्र शैवं च वैष्णवम् । यज्ञं नारायणमुनिश्चकार स पृथक् पृथक् ॥८॥ तयोरुत्सवयोः कार्ये नाचिकेतं चकार सः । मुख्यमाशाजितं चापि जीवनं च जनेश्वरः ॥९॥ अश्लीलग्रामवसतिं भक्तं वेणीभयाभिधम् । वैश्यवर्यं च ते सर्वे सेवयाऽतोषयन् हरिम् ॥१०॥ विदुषो ब्राह्मणांस्तत्र सभां कृत्वा पुपूज च । तेषामेव हि सन्मानं कारयामास सर्वतः ॥११॥ सहस्रशो द्विजान् सम्यग्भोजयित्वेष्टभोजनैः । दक्षिणाभिश्च वस्त्रैश्च तोषयामास तान्प्रभुः ॥१२॥ पुष्पमय्यां वाटिकायां न्यग्रोधेऽथातिविस्तृते। निबद्धायां सुदोलायां भक्तास्तं च न्यषादयन् ॥१३॥ मुनयश्च जनाः सर्वे चातुर्वर्ण्यास्तमीश्वरम् । वृत्वाभितो निषेदुश्च योषितोऽपि सहस्रशः ॥१४॥ तत्र भक्ताः पुपूजुस्तं चारुकेसरचन्दनैः । कुङ्कुमागुरुकस्तूरीघनसारादिमिश्रितैः ॥१५॥ अखण्डैरक्षतैः श्वेतैः पुष्पैर्बहुविधैस्तथा । पुष्पगुच्छैः स्वर्णवर्णैरवतंसैश्च शेखरैः ॥१६॥ वस्त्रैर्बहुविधैः सूक्ष्मैर्मृदुस्पर्शैर्महाधनैः। हेमरत्नाद्यलङ्कारैर्मुक्ताहारैर्मनोहरैः ॥१७॥ उपहारैर्बहुविधैः स्वर्णमुद्रादिभिस्तथा । अभ्यर्च्यारात्रिकं कृत्वा भक्त्या ते तं ववन्दिरे ॥१८॥ एतस्मिन्नन्तरे कश्चित्क्षुद्रशक्तेरुपासकः । तत्र विप्रः कीचकाख्यः समायाद्धूमसंसदि ॥१९॥ सुरामदाघूर्णमाननयनैर्यतिवर्णिभिः । युक्तो मौनैः सिद्धवेषैश्चतुर्भिः स्वपुरस्कृतैः ॥२०॥ चतुर्भिः सेवकैर्युक्तः सिन्दूरतिलकाङ्कितैः । कार्ष्णायसं च वलयं दधद्बाहौ च मन्त्रितम् ॥२१॥

દેવરામ, દયારામ તથા બે આશાભાઈ નામના તથા મયારામ, ઉગ્રચંદ્ર વગેરે મુખ્ય બ્રાહ્મણો તથા આશાજી, કાકુજી, ગંગાદાસ, જીવન, શંકર, મનોહર, રાયજી વગેરે શ્રીહરિમાં પ્રેમવાળા વૈશ્ય ભક્તો શ્રીહરિની સેવા કરતા હતા. તથા રળીયાતા, રક્ષા, રામા, જવરયા વગેરે સ્ત્રીભક્તો ભગવાનની યથાધિકાર પરમ પ્રેમથી પરિચર્યા કરતી હતી. (૪-૫-૬)

દેવરામ વગેરે હરિભક્તો શ્રીહરિનો આતિથ્યસત્કાર અને ગંધપુષ્પાદિથી પૂજન યથાશાસ્ત્ર કરતા હતા. શ્રીહરિ જેતલપુરમાં પોતાના આશ્રિત જનોને સુખ આપતા સતા નિવાસ કરતા હતા. (૭) નારાયણમુનિએ જેતલપુરમાં મહાસામગ્રીથી જ શિવ સંબંધી રુદ્ર યજ્ઞ અને વિષ્ણુ યજ્ઞ જુદા જુદા કર્યા. (૮)

જનોના ઈશ્વર શ્રીહરિએ બંને ઉત્સવોમાં કામકાજ કરવામાં નારદીપુરના નાચિકેત નામના બ્રાહ્મણને અગ્રેસર કર્યા. તથા આશાજી અને જીવણ નામના વૈશ્ય ભક્તને અગ્રેસર કર્યા. (૯) અશ્લાલી ગામના નિવાસી વૈશ્યવર્ય વેણીભાઈ ભક્ત તે સર્વે યજ્ઞની સામગ્રી લાવવી વગેરે સેવાથી શ્રીહરિને પ્રસન્ન કરતા હતા. (૧૦) શ્રીહરિએ યજ્ઞમહોત્સવમાં સભા કરી પંડિત બ્રાહ્મણોની પૂજા કરી બ્રાહ્મણોનું સન્માન સર્વ પ્રકારેથી કર્યું. (૧૧) શ્રીહરિએ હજારોહજાર બ્રાહ્મણોને પોતાને ઈષ્ટભોજનોથી સારી રીતે જમાડીને દક્ષિણાઓ અને વસ્ત્રોથી સંતોષ પમાડ્યો. (૧૨)

પછી ફૂલવાડીમાં અતિવિસ્તારવાળા વડના વૃક્ષમાં બાંધેલા હીંડોળામાં ભક્તોએ શ્રીહરિને બેસાડ્યા. (૧૩) હજારો સાધુઓ, ચાર વર્ણના સર્વે જનો અને સ્ત્રીઓ પણ શ્રીહરિને ચોતરફ વીંટાઈને બેસતા હતા. (૧૪) હીંડોળામાં ભક્તોએ શ્રીહરિની કુમકુમ, અગરુચંદન, કસ્તૂરી અને કપૂર વગેરેથી મિશ્રિત સુંદર કેસરયુક્ત ચંદનથી પૂજા કરી. (૧૫) તેવી રીતે અક્ષત-(ખંડિત નહિ થયેલા) ધોળા ચોખા અને અનેક પ્રકારની પુષ્પની માળાઓ, સુવર્ણની કાંતિ જેવા પુષ્પના ગુચ્છો-સુવર્ણના જેવા વર્ણવાળા પુષ્પના અવતંસો અને તોરાઓ-નાના પ્રકારના સૂક્ષ્મ તંતુઓથી રચેલાં કોમળ સ્પર્શવાળા બહુમૂલ્યવાળાં વસ્ત્રો, સુવર્ણ અને રત્નોથી જડિત ભૂષણો અને મોતીઓના હારો તથા સોનામહોરો વગેરે નાના પ્રકારની ભેટોથી શ્રીહરિની પૂજા કરી આરતી કરી તે ભક્તો ભક્તિપૂર્વક વંદના કરતા હતા. (૧૬-૧૭-૧૮)

એવા સમયમાં ભગવાનની સભામાં તુચ્છ શક્તિનો ઉપાસક કીચક નામવાળો કોઈ બ્રાહ્મણ આવ્યો. (૧૯) સુરાના મદથી ચકળવકળ નેત્રવાળા-મૌન વ્રતવાળા-સિદ્ધોના જેવા વેષવાળા પોતાની આગળ ચાલનારા બે સંન્યાસીઓએ સહિત અને સિંદૂરના તિલકથી ચિહ્નિત ચાર સેવકોએ સહિત કાલી-ભૈરવ વગેરેના મંત્રથી મંત્રેલું લોઢાનું કડું ડાબી ભુજામાં ધારણ કરતો, સ્ત્રીના લાલ પટના કટકા (ચૂંદડીના કટકા) વડે મસ્તકે બાંધેલામાં છરી જેને છે અને મુખમાંથી નીકળતા મદ્યના ગંધવાળા વાયુથી જેણે સજ્જનોની સભા દૂષિત કરેલી છે એવો; (૨૦-૨૧-૨૨) જાંગલી ચર્મકારી વગેરે આઠ પ્રકારની



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

स्त्रीशोणपटखण्डेन बद्धोष्णीषासिपुत्रिकः । मुखनिर्यन्मद्यगन्धिवायुदूषितसज्जनः ॥२२॥ कुलस्त्रीपुष्पसंमिश्रकाश्मीरकृतचन्द्रकः श्रवोनिहितकार्पासः कृतजीरकचर्वणः॥२३॥ मार्जारास्थिचिताभस्मचतुर्मार्गरजोमलैः । लोहमाषादिभिर्युक्तां कण्ठे पोटलिकां दधत् ॥२४॥ सतैलसंयतकचश्यामोर्णासूत्रबन्धनः । दधल्लोचनयोः प्रान्ते हनूमत्तैलकज्जलम् ॥२५॥ दधत्सिन्दूरतिलकं कूर्चे शृङ्गाटकाकृति। समन्त्रमाषमुष्टिश्च दुर्गन्धिवसनोऽशुचिः ॥२६॥ सतैलसिन्दूररसालिप्तं लौहत्रिशूलकम् । बिभ्रत्कट्यां सपरशुं दुर्मन्त्रितमलाङ्कितम् ॥२७॥ भूर्जेऽष्टगन्धलिखितं कालीयन्त्रं समन्त्रकम् । कौशेयपेश्यां च दधत्सुराक्तैरक्षतैः सह ॥२८॥ व्यात्तभीषणरक्ताक्षः सिद्धंमन्योऽतिदर्पवान् । दन्दह्यमानसर्वाङ्गः क्रोधमत्सरवह्निना ॥२९॥ शाक्तमार्गमहाविघ्नं जेतुं नारायणं मुनिम् । तत्रागत्य सभामध्ये निषसादाकृतानतिः ॥३०॥ तिर्यग्दृष्ट्या सदःसंस्थान् पश्यन्नेव महामुनीन् । साशङ्कमानसोऽपश्यद्भगवन्तं पुनः पुनः ॥३१॥ पाप्मसम्भाषणे दोषं जानन्तो भगवज्जनाः । नाभाषन्त तदा केऽपि तेन साकं सभासदः ॥३२॥ शिष्यास्तस्य तदा प्रोचुरहो व्याप्तः कलिर्भुवि । नाद्रियन्ते यतः सिद्धान्साधवोऽपीदृशानिह ॥३३॥ अथवा सद्गुरुकृपां विना च ब्रह्मदर्शनम् । कुतः स्यात्साधुता लोके निर्मूला प्राणिनामिह ॥३४॥ अहो गुरुरहो भाग्यमस्माकं धरणीतले । येषां भुक्तिश्च मुक्तिश्च सुप्रापा नित्यमञ्जसा ॥३५॥ इति तेषां वचः श्रुत्वा तादृग्दुष्टप्रवर्तितम् । अधर्ममुच्छेदयितुं जातः प्राह हरिर्हसन् ॥३६॥ के यूयं कुत आयाताः किं प्रयोजनमत्र वः । उपाध्वे देवतां कां च शास्त्रं किं चास्ति वः प्रियम् ॥३७॥

---

સ્ત્રીઓના પુષ્પના રૂધિરથી મિશ્રણ કરેલા કુમકુમથી ચાંલ્લો જેણે કર્યો છે, બંને કાનમાં મૂક્યાં છે કપાસનાં પૂંમડાં જેણે એવો, મદ્યના ગંધને ગુપ્ત રાખવા માટે જીરું જેણે ચાવેલું છે એવો-બિલાડાનાં હાડકાં અને ચિત્તાની ભસ્મ, ચોકની રજ અને વિષ્ઠા-લોઢાનો ખીલો-અડદ વગેરેથી યુક્ત નીલા રંગના કટકાથી સીવેલી પોટલી કંઠમાં ધારણ કરતો, તેલે સહિત બાંધવા માટે એક કરેલા કેશોમાં શ્યામ ઊનના સૂત્રનું બંધન જેને છે એવો, બંને નેત્રોના અંતભાગમાં (જનોને વશ કરવા) હનુમાનજીના તેલનું કાજળ ધારણ કરતો, ભ્રકુટિના મધ્યમાં શીંગોડાના સમાન ત્રણ ખૂણાના આકારવાળું સિંદૂરનું તિલક ધારણ કરતો, મંત્રેલા અડદ મૂઠીમાં જેને છે; દુર્ગન્ધી વસ્ત્રોવાળો-અત્યંત અપવિત્ર તેલે સહિત સિંદૂરના રસથી લિપાયેલું તેમજ ફરશી સહિત ક્ષુદ્ર દેવના મંત્રોથી મંત્રેલી વિષ્ઠાના ચિહ્નવાળું લોઢાનું ત્રિશૂળ કેડમાં ધારણ કરતો-ભોજપત્રમાં આઠ ગંધદ્રવ્યોથી કરેલા અક્ષરોવાળું મંત્રબીજ સહિત કાલીયંત્ર મદિરાથી પલાળેલા અક્ષતોની સાથે રેશમી વસ્ત્રની કોથળીમાં ધારણ કરતો, પહોળા કરેલા ભયંકર લાલ નેત્રોવાળો-પોતાને સિદ્ધ માનનારો અતિ ગર્વથી ભરેલો-ક્રોધ અને મત્સરરૂપી અગ્નિથી અતિશય બળતાં અંગોવાળો -શાક્ત માર્ગના મહાવિઘ્નરૂપ અર્થાત્ નાશ કરનારા નારાયણ મુનિને જીતવા માટે સભાની મધ્યમાં આવી નમસ્કાર કર્યા વગર બેઠો. (૨૩ થી ૩૦) સભામાં બેઠેલા મુક્તાનંદાદિ સાધુઓને કુટિલ દષ્ટિથી જોતો કીચક આ શ્રીહરિ ભગવાન હશે કે નહિ એવી શંકાવાળો વારંવાર જોતો હતો. (૩૧)

પાપી માણસની સાથે સંભાષણ કરવામાં દોષ જાણતા સભાસદો કોઈ પણ કીચકની સાથે બોલતા નહોતા. (૩૨)

તે સમયે **કીચકના શિષ્યો બોલ્યા** : અહો ! પૃથ્વીમાં કળિયુગ વ્યાપી ગયો છે. કારણ કે સાધુઓ પણ આ સભામાં આવા સિદ્ધોને પણ આદરસત્કાર કરતા નથી; (૩૩) અથવા સદ્‌ગુરુની કૃપા વિના બ્રહ્મદર્શન ક્યાંથી થાય ? સદ્‌ગુરુની કૃપા રૂપી મૂળ વિના સાધુતા આ લોકમાં મનુષ્યોને ક્યાંથી હોય ? (૩૪) આ પૃથ્વીમાં અહો અમારા ગુરુ, અહો ! અમારાં ભાગ્ય તે જેઓને હંમેશાં અનાયાસની મુક્તિ અને ભુક્તિ સારી રીતે મળેલી છે. (૩૫)

હે રાજન્ ! આવી રીતે કીચકના શિષ્યોનું વચન સાંભળી કીચકના સમાન દુષ્ટોએ પ્રવર્તાવેલા અધર્મને નાશ કરવા માટે પ્રાદુર્ભાવ પામેલા **શ્રીહરિ હસતા સતા બોલ્યા** : (૩૬) તમો કઈ જ્ઞાતિના છો ? કયા સ્થાનથી આવ્યા છો ? તમારે સભામાં આવવાનું પ્રયોજન શું છે ? તમો ક્યા દેવની ઉપાસના કરો છો ? તમે ક્યા શાસ્ત્રને અભીષ્ટ માનો છો ? (૩૭)

एतच्छ्रुत्वा हरेर्वाक्यं कीचको निजचेतसि । व्यचिन्तयत् क्षणं तत्र तज्जयोत्सुकमानसः ॥३८॥ एनमेवेश्वरं प्राहुरहो मन्दधियो जनाः । योऽतिप्रसिद्धं लोकेषु मामप्येष न वेत्ति वै ॥३९॥ बाला अपि जना लोके विदुर्मामतिभासुरम् । तमप्येष न जानाति तन्नासौ योगवानपि ॥४०॥ अद्यैवेनं विजेष्यामि गतमीशभयं मम । चर्ममुण्डाप्रसादेन बृहत्कौलागमेन च ॥४१॥ इति सञ्चिन्त्य शिष्यान्स्वान्वक्तुं स प्रैरयद्दृशा । स्वनामादि ततस्ते च प्रोचुर्हृष्टा जगत्पतिम् ॥४२॥ कीचकशिष्या ऊचुः - महादीक्षामहापानगुरवः कुलयोगिनः । एते सन्ति महासिद्धा ब्रह्मिष्ठा यतिवर्णिनः ॥४३॥ नैते केनापि भाषन्ते दिवा सदसि मौनिनः । निशि साक्षान्महाशक्त्या वदन्ति रमयन्ति ताम् ॥४४॥ वयं च सिद्धपुरुषाः कौलागमविशारदाः । अस्माकं च नरेन्द्राणां गुरुराडेष कीचकः ॥४५॥ ऊर्ध्वाम्नायैकतरणेः सहस्त्रभगिनः प्रभोः । प्रतियामपिबाग्रण्यो गुरोः शिष्यश्चतुःपिबः ॥४६॥ प्रसादादस्य बहवो राजानो ब्रह्मदर्शनम् । प्रापुः सद्यो महानन्दं सर्वत्र समदृष्टिताम् ॥४७॥ नैतत्तुल्यः कोऽपि लोके सिद्धेन्द्र इह निश्चितम् । मकारपञ्चकाचार्यः कौलवित्कुलपावनः ॥४८॥ एनं विदन्ति सर्वेऽपि भुवि भास्करशोचिषम् । ख्यातस्त्वमीश्वरत्वेन न वेत्सीत्यद्भुतं महत् ॥४९॥ उपास्महे वयं साक्षाद्देवीं त्रिपुरसुन्दरीम् । कौलागमः प्रमाणं नः सर्वशास्त्रशिरोमणिः ॥५०॥ योगी चेन्नैव भोगी स्याद्भोगी चेन्नैव योगवित् । योगभोगात्मकं कौलं तस्मात्सर्वाधिकं मतम् ॥५१॥ शैववैष्णवबौद्धादिदर्शनान्यपि भक्तितः । भजन्ते मानवा नित्यं वृथायासफलानि हि ॥५२॥ महापापवशान्नृणां तेषु वाञ्छाऽभिजायते । तेषां हि सद्गतिर्नास्ति विना कौलनिषेवणम् ॥५३॥

---

હે રાજન્ ! આ પ્રમાણે મનુષ્યના અનુકરણથી શ્રીહરિનું વાક્ય સાંભળી કીચક શ્રીહરિને જીતવા માટે ઉત્સાહિત મનવાળો સભામાં પોતાના મનમાં ક્ષણવાર વિચાર કરવા લાગ્યો. (૩૮) અહો ! મંદ બુદ્ધિવાળા જનો, સર્વજ્ઞત્વાદિ ગુણરહિત આ સ્વામિનારાયણને ઈશ્વર કહે છે. જે સ્વામિનારાયણ લોકોમાં અતિ પ્રસિદ્ધ એવા મને પણ જાણતા નથી જ. (૩૯) લોકમાં અતિ પ્રકાશમાન જેને બાળકો પણ જાણે છે એવા મને પણ આ સ્વામી જાણતા નથી. માટે આ અષ્ટાંગ યોગના સાધનથી સંપ્રાપ્ત ઐશ્વર્યવાળા પણ નથી. (૪૦)

મારે ઈશ્વરનો ભય નાશ પામ્યો છે. ચર્મમુંડાદેવીના અનુગ્રહ અને મહાન કૌલાગમથી હાલમાં એ સ્વામીને જીતીશ. (૪૧) હે રાજન્ ! આ પ્રકારે કીચકે પોતાના મનમાં વિચાર કરી પોતાનું નામ-જાતિ-દેવતા વગેરે કહેવા માટે નેત્રની સાનથી પ્રેરણા કરી. પછી કીચકના શિષ્યો હર્ષ પામીને જગત્પતિ શ્રીહરિને કહેવા લાગ્યા : (૪૨)

**કીચકના શિષ્યો કહે છે** : હે સ્વામિન્ ! આ સંન્યાસી અને વર્ણિઓ મહાદીક્ષા અને મહાપાનના ઉપદેષ્ટાઓ કુલયોગીઓ મહાસિદ્ધો બ્રહ્મનિષ્ઠો છે. (૪૩) મૌન વ્રત ધારણ કરનારા આ વર્ણિઓ દિવસે સભામાં કોઈની સાથે પણ બોલતા નથી. રાત્રિમાં પ્રત્યક્ષ મહાકાળીની સાથે બોલે છે અને મહાશક્તિને રમાડે છે. (૪૪)

અમો પણ કૌલતંત્રમાં કહેલા રહસ્યમાં પ્રવીણ સિદ્ધ પુરુષો છીએ. અને અમારા તથા રાજાઓના પણ આ કીચક ગુરુરાજ છે. (૪૫) ઊર્ધ્વામ્નાય નામના કૌલમાર્ગના પ્રકાશક એક (અદ્વિતીય) સૂર્ય-હજાર સંખ્યાવાળી કુલ સ્ત્રીઓની યોનિનો પૂજક માટે શક્તિમાન પ્રત્યેક પહોરમાં મદ્યપાન કરનારાઓમાં અગ્રેસર એવા (પ્રસિદ્ધ) ગુરુનો શિષ્ય, પોતે રાત્રિદિવસમાં ચાર વાર મદ્યપાન કરનાર આ કીચક છે. (૪૬) આ કીચકની પ્રસન્નતાથી ઘણા રાજાઓને બ્રહ્મદર્શન, મહાઆનંદ અને સર્વત્ર સર્વ પ્રાણીઓમાં સમદષ્ટિ તત્કાળ પ્રાપ્ત થાય છે. (૪૭)

સિદ્ધોમાં શ્રેષ્ઠ, મકાર પંચકનો ઉપદેષ્ટા, કૌલતંત્રના અભિપ્રાય જાણનાર, કુળમતના આશ્રિતોને પવિત્ર કરનાર આ કીચકના સમાન કોઈ પણ આ લોકમાં નથી જ. (૪૮) સૂર્યના સમાન કાંતિવાળા આ કીચક નામના અમારા ગુરુને સર્વે જાણે છે. સર્વજ્ઞપણાથી પ્રસિદ્ધ તમો એમને જાણતા નથી. એ તો અમોને મહા આશ્ચર્ય થાય છે. (૪૯) અમો પ્રત્યક્ષ ત્રિપુરસુંદરી દેવીની ઉપાસના કરીએ છીએ. સર્વ શાસ્ત્રોમાં શિરોમણિ કૌલતંત્ર શાસ્ત્ર અમારે પ્રમાણ છે. (૫૦)

જે યોગી અષ્ટાંગ યોગનો સાધક હોય તે ગ્રામ્યભોગનો ઉપભોક્તા ન થાય. જે ભોગી હોય તે યોગી થઈ શકે નહિ. અમારો કૌલમત તો યોગ અને ભોગાત્મક બંનેની સિદ્ધિ આપનારો છે. માટે સર્વથી અધિક છે. (૫૧) પ્રયાસમાત્ર ફળવાળા શૈવ-વૈષ્ણવ અને બૌદ્ધાદિ-સાંખ્ય વગેરે મતો એટલે કે ધર્મનો બોધ આપનારા દર્શનોને પણ મનુષ્યો દરરોજ ભક્તિપૂર્વક ફોગટ જ ભજે છે. અર્થાત્ પરમાર્થ તો અમારો મત છે. (૫૨) મનુષ્યોને મહાપાપના વશપણાથી શૈવાદિ દર્શનોમાં ઈચ્છા ઉત્પન્ન થાય છે. કૌલમતના સેવન વિના તેઓની સદ્ગતિ થતી જ નથી. (૫૩)

सुव्रत उवाच – **इति तेषां वचः श्रुत्वा भगवांस्तन्मतान्तकः । पप्रच्छ तेषां सिद्धान्तं जिज्ञासुरिव युक्तिवित् ॥५४॥**
श्रीनारायणमुनिरुवाच – **अपूर्वेयं श्रुता वाणी भवतां भो चतुःपिबाः ! । सिद्धान्तं ब्रूत युष्माकं सप्रमाणं च तत्फलम् ॥५५॥**
कीचकशिष्या ऊचुः– **अस्माभिर्लोकमुखतः शाक्तद्विट् विदितः पुरा । विज्ञातोऽस्यद्य तु त्वं वै जिज्ञासुरिति निश्चितम् ॥५६॥ त्वया यत्पृच्छ्यते तत्तु रहस्यं जनसंसदि । वक्तव्यं कथमस्माभिर्वाच्यावाच्यविशारदैः ॥५७॥ उत्तरं यदि नोच्येत तर्ह्येते हि त्वदाश्रिताः। मूर्खानस्मान्विजानीयुर्गुरोश्चाल्पज्ञता भवेत् ॥५८॥ एते च सिद्धपुरुषा निर्विकल्पसमाधयः । अज्ञा भवेयुः सर्वज्ञा महापानगुरूत्तमाः ॥५९॥ अतो यथावत्सिद्धान्तं ब्रूमस्ते कौलसम्मतम् । सदःस्थानामपि भवेत्तत्र श्रद्धा तवेव यत् ॥६०॥ शास्त्रवाक्यं विना नैव शास्त्रज्ञस्य भवेत्तव । निश्चयोऽतोऽत्र कथ्यन्ते कौलस्थाः शङ्करोक्तयः ॥६१॥ ब्रह्मज्ञानं विना नैव मुक्तिः स्यात्प्राणिनां किल । ऊर्ध्वाम्नायात्ततस्तस्य ज्ञातव्यः सकलो विधिः ॥६२॥ ऊर्ध्वाम्नायप्रवेशश्च पराप्रसादचिन्तनम् । महाषोढापरिज्ञानं नाल्पस्य तपसः फलम् ॥६३॥ पेयं मद्यं पलं खाद्यं समालोक्य प्रियामुखम् । इत्येवाचरणं जाप्यं पराप्राप्यं परं पदम् ॥६४॥ आनन्दं ब्रह्मणो रूपं तच्च देहे व्यवस्थितम् । तस्याभिव्यञ्जकं मद्यं योगिभिस्तेन पीयते ॥६५॥ ब्राह्मणैस्तत् सदा पेयं क्षत्रियैस्तु रणागमे वैश्यैर्धनप्रयोगे च शूद्रैश्चान्त्येष्टिकर्मणि ॥६६॥ देवान् पितॄन् समभ्यर्च्य देवीशास्त्रोक्तवर्त्मना । गुरुं स्मरन् पिबन्मद्यं खादन्मांसं न दोषभाक् ॥६७॥ देवताभ्यः पितृभ्यश्च मधुवाताऋतायते। स्वादिष्ठया मदिष्ठया क्षीरं सर्पिर्मधूदकम् ॥६८॥ सद्यो दीक्षयतीत्याद्याः प्रमाणं श्रुतयः कुले । निवेद्य देवताभ्यो हि मद्यमांसाशनं शुभम् ॥६९॥**

હે રાજન્ ! આ પ્રકારે કીચકના શિષ્યોનું વચન સાંભળી કીચકના શિષ્યોના મતના વિનાશક, સર્વકળાના જાણનારા શ્રી નારાયણ મુનિ જિજ્ઞાસુની માફક કીચકના શિષ્યોને કૌલમતનો સિદ્ધાંત પૂછતા હતા. (૫૪) હે ચતુઃ પિબાઃ ! તમારી આ વાણી પૂર્વે નહિ સાંભળેલી એવી અપૂર્વ સાંભળી, માટે તમારો પ્રમાણે સહિત સિદ્ધાંત અને તેનું ફળ પણ કહો. (૫૫)

[જિજ્ઞાસુ પણાનું નાટક કરવા શ્રીહરિએ પુછાયેલા શ્રીહરિને જિજ્ઞાસુ જાણી] **કીચકના શિષ્યો બોલ્યા** : હે સ્વામિન્! અમોએ પહેલાં લોકોના મુખથી તમો શાક્તમતના ખંડન કરનારા જાણ્યા હતાં. આજ તો અમારા શાક્તમતના જિજ્ઞાસુ આ પ્રમાણે અમોએ નિશ્ચે જાણ્યા છે. (૫૬) તમોએ જે પૂછ્યું તે તો અતિશય ગુહ્ય છે. બોલવા યોગ્ય અને ન બોલવા યોગ્ય તેમાં નિપુણ અમોએ સભામાં કેવી રીતે કહેવાય ? (૫૭) તેમ છતાં જો તમારા પ્રશ્નનો ઉત્તર અમો ના આપીએ તો તમારા આશ્રિતો અમોને મૂર્ખ જાણે અને અમારા ગુરુ જે કીચકની અજ્ઞાનતા પ્રસિદ્ધ થાય. (૫૮) અને આ નિર્વિકલ્પ સમાધિવાળા સર્વજ્ઞ યતિ બ્રહ્મચારીઓ અને મહાપાન કરનારાઓમાં શ્રેષ્ઠ યતિવર્ણિઓ, સિદ્ધપુરુષો સર્વજ્ઞ છે તે પણ અજ્ઞાની પ્રમાણિત થાય. (૫૯) માટે કૌલમતમાં પ્રમાણભૂત સિદ્ધાંત યથાર્થ કહીએ છીએ. અમારા વચનના શ્રવણથી સભામાં બેઠેલા તમારા આ આશ્રિતોને પણ તમારી માફક અમારા સિદ્ધાંતમાં રુચિ થાય. (૬૦) શાસ્ત્ર જાણનારા તમોને શાસ્ત્રનાં વચન વિના નિશ્ચય થાય નહિ. માટે કૌલાગમમાં શંકરજીએ પાર્વતીને કહેલાં વચનો અમારા સિદ્ધાંત માટે કહીએ છીએ. (૬૧)

**કૌલાગમનો સત્શાસ્ત્ર વિરૂદ્ધ મત :-** ❋ [અહીંથી ત્રીશ શ્લોકોમાં શુકાનંદમુનિનો અભિપ્રાય (હેતુ વ્યાખ્યા) : આ શ્લોકને આરંભીને ત્રીશ શ્લોકો કૌલતંત્રના જ છે અને તેના અનુયાયી-કીચક શિષ્યોએ જ કહેલા છે. તેનું વ્યાખ્યાન(મૂળ ગ્રંથમાં યોગ્ય હોવા છતાં) કરવા જેવું નથી છતાં પણ શ્રીહરિના આશ્રિત સાંપ્રદાયિકજનો વૈદિક ધર્મમાં નિષ્ઠાવાળા હોવાથી (માત્ર કૌલમતનાં જ્ઞાન માટે) વ્યાખ્યાન કરીએ છીએ.] બ્રહ્મજ્ઞાન વિના પ્રાણીઓની મુક્તિ નિશ્ચે થાય નહિ માટે બ્રહ્મજ્ઞાનની ઉત્પત્તિનો પ્રકાર સમગ્ર ઊર્ધ્વામ્નાયથી જાણવો. (૬૨) ઊર્ધ્વામ્નાયમાં પ્રવેશ, પરા પ્રસાદનું ચિંતન અને મહાષોઢાનું પરિજ્ઞાન આ ત્રણ અલ્પતપનું ફળ નથી, પરંતુ મહાતપનું ફળ છે. પરેતિ અને મહેતિ આ બે મંત્ર છે. (૬૩) નારીનું મુખ જોઈ સુરા પીવી, માંસ ખાવું : આ પ્રકારનું આચરણ જ જપનીય છે, એ જ પરા પ્રાપ્ય છે અને પરંપદ (સર્વોત્તમ સ્થાન) છે. (૬૪) બ્રહ્મનું રૂપ આનંદ છે. તે આનંદમય બ્રહ્મ દેહમાં રહેલું છે. તે બ્રહ્મની અભિવ્યક્તિ = પ્રત્યક્ષ પ્રાપ્તિ કરાવનાર મદ્ય છે તેથી યોગીઓએ પાન કરાય છે. (૬૫) બ્રાહ્મણોએ તો તે મદ્ય જ સર્વદા પાન કરવું. ક્ષત્રિયોએ તો રણસંગ્રામ જવાના સમયમાં પાન કરવું. વૈશ્યોએ તો ધન ઉપાર્જન કરવાના સમયમાં પાન કરવું. શૂદ્રોએ તો અંત્યેષ્ટિ (ઔર્ધ્વદૈહિક કર્મ) સમયે પાન કરવું. (૬૬) દેવીશાસ્ત્રમાં કહેલા માર્ગથી દેવો તથા પિતૃઓનું પૂજન કરી દીક્ષાગુરુનું ચિંતવન કરતો થકો મદ્ય પીતો અને માંસ ખાતો પુરુષ દોષ ભજનારો થતો નથી. (૬૭) દેવતાઓ-પિત્રિઓ-મધુવાતા ઋતાયતે સ્વાદિષ્ઠયા-મદિષ્ઠયા-ક્ષીર (દૂધ)-ઘી-મધુ-જળ તે તત્કાળ દીક્ષા પમાડે છે ઈત્યાદિક - દેવતા વગેરે શ્રુતિઓ કૌલમાર્ગમાં પ્રમાણભૂત છે માટે દેવતાઓને નિવેદન કરી મદ્ય-માંસનું ભક્ષણ શુભ છે. (૬૮-૬૯)

पत्रपुष्पाङ्कुरफलमूलवल्कलधान्यजम् । रसवृक्षलताजातं मद्यं दशविधं स्मृतम् ॥७०॥ पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् । मधूत्थं सैरमारिष्टं मैरेयं नालिकेरजम् ॥७१॥ मद्यान्येकादशैतानि भुक्तिमुक्तिकराणि हि । द्वादशं तु सुरामद्यं सर्वेषामुत्तमं मतम् ॥७२॥ मद्यं मांसं च मत्स्यं च मुद्रा मैथुनमेव च । मकारपञ्चकं देवि ! देवताप्रीतिकारकम् ॥७३॥ गोनरेभाश्वमहिषवराहाजमृगोद्भवम् । महामांसाष्टकं प्रोक्तं देवताप्रीतिकारकम् ॥७४॥ कुलाकुलाष्टकं वापि निमन्त्र्याहूय पुष्पिणीम् । अभ्यङ्गेन विशुद्धाङ्गीमासने चोपवेशयेत् ॥७५॥ जाङ्गली चर्मकारी च मातङ्गी पुष्कसी तथा । श्वपची खटकी चैव कैवर्ती विश्वयोषिता ॥७६॥ कुलाष्टकमिति प्रोक्तमकुलाष्टकमुच्यते । कम्बुकी शौण्डिकी चापि शस्त्रजीवी च रञ्जकी ॥७७॥ गायकी रजकी शिल्पी कोसटी च तथाष्टकी । उक्तजात्यङ्गनाभावे चातुर्वर्ण्याङ्गनां यजेत् ॥७८॥ अन्योन्यवदनं कृत्वा पिबेत्तत्तदनुज्ञया । आगलान्तं पिबेन्मद्यं स मुक्तो नात्र संशयः ॥७९॥ पीत्वा पीत्वा पुनः पीत्वा यावत्पतति भूतले । उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते ॥८०॥ आनन्दात्तृप्यते देवी मूर्च्छया भैरवः स्वयम् । वमनात्सर्वदेवाश्च तस्मात्त्रितयमाचरेत् ॥८१॥ उच्छिष्टं भक्षयेत्स्त्रीणां ताभ्यो नैव प्रदापयेत् । योनिपूजां ततः कृत्वा यथेष्टं विहरेत्पुमान् ॥८२॥ तदारूढेषु वीरेषु कार्याकार्यं न विद्यते । इच्छैव शास्त्रसम्पत्तिरित्याज्ञा पारमेश्वरी ॥८३॥ मधुकुम्भसहस्रैश्च मांसभारशतैरपि । न तुष्यामि वरारोहे ! भगलिङ्गामृतं विना ॥८४॥ भगिनीं वा सुतां भार्यां यो दद्यात्कुलयोगिने । मधुमत्ताय देवेशि ! तस्य पुण्यं न गण्यते ॥८५॥ भ्रातृभार्यां स्नुषां वापि जननीं मदमन्थराम् । भ्रातृजां यौवनोन्मत्तां विवस्त्रां च स्वलङ्कृताम् ॥८६॥

પત્ર-પુષ્પ-અંકુર-ફળ-મૂળ-વલ્કલ અને ધાન્યથી ઉત્પન્ન થનારું, તથા રસ-વૃક્ષ અને લતાઓથી થનારું દશ પ્રકારનું મદ્ય કહેલું છે. (૭૦) ફણસના ફળથી થનારું, દ્રાક્ષથી થનારું, મહુડાંથી થનારું-ખજૂરી-તાડ-ઈક્ષુ-મધુમક્ષિકાઓ-સીરવૃક્ષ-અરીઠાં-મૈરેય-(ધાત્રી, ધાવડી અને ગોળના પાણીથી બનાવેલું) તથા નાળીયેર આ સર્વથી થયેલાં અગિયાર પ્રકારનાં મદ્યો છે. ભુક્તિ અને મુક્તિ કરનારાં છે. બારમું સુરામદ્ય બધામાં ઉત્તમ માનેલું છે. (૭૧-૭૨)

મદ્ય-માંસ-મત્સ્ય-મુદ્રા ( જે એક પ્રકારનો રોટલો) - મૈથુન આ મકાર પંચક દેવતાઓને પ્રીતિ કરનાર છે. (૭૩) બલીવર્દ - માણસ-હાથી-ઘોડો-લાલ આંખવાળો પાડો-વરાહ-બોકડો-મૃગ આ આઠને મારીને તેનાથી ઉત્પન્ન થયેલા માંસને મહામાંસ કહેવાય છે. તે સર્વ દેવતાઓને પ્રીતિ કરનારું થાય છે. (૭૪) કુલાષ્ટક અથવા અકુલાષ્ટક આ બેની અંદર રજસ્વલા સ્ત્રીને પ્રથમ આમંત્રણ આપી પછી બોલાવીને સ્નાન કરાવી શુદ્ધ અંગવાળી તેને આસન ઉપર પૂજા કરવા માટે બેસાડવી. (૭૫) જાંગલી = જંગલ (પુરુષ)ની સ્ત્રી-ચર્મકારની સ્ત્રી-માતંગ નામના ચંડાળની સ્ત્રી-ભંગીની સ્ત્રી-મચ્છી મારનારની સ્ત્રી અને વેશ્યા : આ આઠ કુલાષ્ટક કહેવાય છે. (૭૬) કમ્બુકી-શૌંડિની-શસ્ત્રજીવિની સ્ત્રી-ધોબીની સ્ત્રી-ગાયકની સ્ત્રી-રંગારાની સ્ત્રી-ચિત્રકારની સ્ત્રી તથા આઠમી કોસટી આ અકુલાષ્ટક છે. કહેલી જ્ઞાતિની સ્ત્રી ના મળે તો ચાર વર્ણની સ્ત્રીમાંથી કોઈપણ સ્ત્રીનું પૂજન કરવું. (૭૭-૭૮) એકબીજાની આજ્ઞા લઈને એકબીજાના મુખનો સંયોગ કરીને મદ્યપાન કરે તે મદ્યપાન પણ કંઠપર્યંત પાન કરે : આ પ્રમાણે પાન કરનાર મુક્ત થાય છે. તેમાં સંશય નથી. (૭૯) એક વાર મદ્યપાન કરી બીજી વાર મદ્યપાન કરી ત્રીજી વાર મદ્યપાન કરી, આ પ્રમાણે પૃથ્વીમાં પડી જાય ત્યાં સુધી પાન કરવું. ઊઠીને ફરી પાન કરવું : આ પ્રમાણે ચાર વાર પાન કરનાર; ફરીથી સંસારમાં આવતો નથી. (૮૦) મદ્ય પાનના આનંદથી મહાત્રિપુરસુંદરી તૃપ્ત થાય છે. મૂર્છાથી ભૈરવ તૃપ્ત થાય છે. વમન થવાથી સર્વ દેવતાઓ તૃપ્ત થાય છે. માટે ત્રણવાર મદ્યપાનનું આચરણ કરવું. (૮૧) સ્ત્રીઓનું ઉચ્છિષ્ટ જમે પણ સ્ત્રીઓને ક્યારેય પણ પોતાનું ઉચ્છિષ્ટ આપે નહિ. પછી સ્ત્રીની યોનિની પૂજા કરી ઈચ્છા પ્રમાણે વિહાર કરે. (૮૨) ઉપભોગ માટે સ્ત્રી ઉપર ચઢેલા પુરુષોમાં તેના ઓષ્ઠોના આસ્વાદાદિમાં કર્તવ્યાકર્તવ્ય વિચાર યોગ્ય નથી. ઈચ્છા એ જ (આ કાર્યમાં) શાસ્ત્રનાં પ્રમાણ વાક્યો છે. આ પ્રમાણે શિવે આજ્ઞા આપેલી છે. (૮૩) હે પાર્વતી ! હું યોનિ અને લિંગના સંયોગથી ઉત્પન્ન થયેલું વીર્યરૂપી અમૃત વિના મદ્યના હજારો ઘડા અને શતભાર માંસનાં નૈવેદ્યોથી પણ સંતોષ પામતો નથી. (૮૪)

હે દેવેશિ ! બહેન અથવા પુત્રી અથવા પત્નીને મદ્યપાનથી ઉન્મત થયેલા કુલયોગીને જે પુરુષ આપે તે પુરુષનું પુણ્ય ગણી શકાતું નથી. (૮૫) મદથી મંદ ગતિવાળી-યૌવનથી ઉન્મત્ત થયેલી -વસ્ત્ર વિનાની - ધારણ કરેલાં અલંકારવાળી



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**निवेद्य गुरवे नत्वा निर्विकल्पधिया स्वयम्। तालवृन्तेन देवेशि ! श्रमनाशाय वीजयेत् ॥८७॥ तयोस्तु सामरस्याद्यद्द्रव्यं प्रच्यवते कुलात् । तद्गृहीत्वालिपात्रेण साङ्गं सावरणान्विताम् ॥८८॥ महाकालान्वितां कालीं यष्ट्वा शेषं वरानने ! । साधकेभ्यस्तु तद्दत्वा शेषं पेयं समन्त्रकम् ॥८९॥ एवं यः कुरुते वीरो गुरुभक्तो दृढव्रतः । नित्ये नैमित्तिके काम्ये सोऽक्षयं मत्पदं व्रजेत् ॥९०॥ जीवन्मुक्तः स विचरेत्सर्वैश्वर्यसमन्वितः । इह लोके परे चैव सर्वत्र न निवार्यते ॥९१॥** सुव्रत उवाच – **इति दुर्वचनानि मद्यपानां स निशम्य प्रभुराप्तहास ऊचे । इतरे तु करद्वयोपरुद्धश्रुतियुग्मा नृप ! नैव शुश्रुवुर्वै ॥९२॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे जयतल्पपुरक्षुद्रशाक्तमतखण्डने पूर्वपक्षत्वेन कौलमतनिरूपणनामा पञ्चचत्वारिंशोऽध्यायः ॥४५॥

श्रीनारायणमुनिरुवाच – **यूयं हि मद्यपा ! लोके धूर्ताः स्थ पतिताधमाः । अप्रमाणमसच्छास्त्रं युष्माकं मुख्यमस्ति यत् ॥१॥ केनचिन्मद्यपेनैव पापग्रन्थे कृते हि वः । सच्छास्त्रस्य भ्रमोऽस्त्येव ततो भ्रष्टा बभूव हि ॥२॥ ब्रह्मज्ञानं सुरापानाद्भवेत्तर्हि कुतः श्रमः । पूर्वैर्महद्भिर्मुनिभिस्तपसः क्रियते वृथा ॥३॥ मद्यपानां कुलान्येव श्वपचादीनि सन्ति च । प्राप्नुवन्ति कथं नैव मुक्तिं तानि पलप्रियाः ! ॥४॥ भ्रामिताः केन यूयं वै कथं प्राप्ताः स्थ दुर्धियम् । एकवर्णं जगत्कर्तुं किं वा सृष्टाः स्वयंभुवा ॥५॥**

---

ભાઈની સ્ત્રી, પુત્રની સ્ત્રી અથવા માતા અથવા ભત્રીજીને પોતે પૂજા કરનારો સંકલ્પે રહિત બુદ્ધિથી ગુરુને નમસ્કાર કરી ઉપભોગ માટે નિવેદન કરી, હે દેવેશિ ! શ્રમની શાંતિ માટે વીંઝણાથી પવન નાખે. (૮૬-૮૭) તે બેનાં ગુહ્યાંગથી ઉત્પન્ન થયેલું જે વીર્યાત્મક રસ જે સ્રવે છે તે દ્રવ્યને સુરાના પાત્ર અથવા હાડકાના પાત્રમાં ગ્રહણ કરી અંગદેવ સહિત હે વરાનને! મહાકાળ રુદ્રે સહિત કાલિકાદેવીને પૂજી પૂજાથી બાકી રહેલું દ્રવ્ય, સાધકજનોને આપી બાકી રહેલું મંત્રે સહિત મુખ્ય પૂજકે પાન કરવું. (૮૮-૮૯) લોકની નિંદા નહિ ગણનારો-વીર, ગુરુભક્ત દૃઢ નિયમવાળો નિત્ય-નૈમિત્તિક અને કામ્ય કર્મમાં પૂર્વોક્ત પ્રમાણે કરે છે. તે પુરુષ અક્ષય (અવિનાશી) મારા સ્થાનને પામે છે. (૯૦) તે પુરુષ જીવે છે છતાં મુક્ત છે. સર્વ ઐશ્વર્યોથી સંપન્ન થઈ વિચરે છે. આ લોકમાં અને પરલોકમાં કોઈ તેને નિવારણ કરવા શક્તિમાન નથી. (૯૧)

હે રાજન્ ! આવાં મદ્યપાન કરનારા કીચકના શિષ્યોનાં ન સાંભળવા યોગ્ય દુર્વચનો સાંભળી જેમને હસવું આવ્યું છે એવા શ્રીહરિ તેમના પ્રત્યે (આગળ કહેશે તે પ્રમાણે) બોલ્યા. બીજા સભામાં બેઠેલા સાધુઓ વગેરે તો બંને હાથથી બંને કાનોમાં આંગળી નાખીને નિશ્ચે સાંભળતા નહોતા. (૯૨) *ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે જયતલ્પપુરક્ષુદ્રશાક્તમતખંડને પૂર્વપક્ષત્વેન કૌલમતનિરૂપણનામા પંચચત્વારિંશોऽધ્યાયઃ (૪૫)*

## અધ્યાય : ૪૬

### શ્રીહરિએ ક્ષુદ્ર શાક્તમતના ખંડનમાં જે પ્રકારે મકારપંચકનો ઉચ્છેદ કર્યો તે કહ્યો છે.

**શ્રી નારાયણમુનિ બોલ્યા :** હે મદ્યપો ! તમો આ મનુષ્યલોકમાં જગતને ઠગનારા અધમમાં પણ અધમ છો. કારણ કે તમોએ અપ્રમાણ = કોઈ પણ સત્શાસ્ત્રોએ પ્રમાણ નહિ કરેલું, અસત્શાસ્ત્ર કૌલાગમ પ્રમાણભૂત માનેલું છે. (૧) કોઈ મદ્યપાન કરનારા પંડિતે પોતાની બુદ્ધિની કલ્પનાથી રચેલા પાપગ્રંથમાં તમોને સત્શાસ્ત્રનો ભ્રમ થયેલો છે માટે ધર્મથી નિશ્ચે ભ્રષ્ટ થયેલા છો. (૨)

જ્યારે સુરાપાનથી બ્રહ્મજ્ઞાન થાય તો પુરાતન મહામુનિઓ તપ કરવાનો પરિશ્રમ નકામો શા માટે કરે ? અર્થાત્ પરિશ્રમ ના કરત. (૩) હે માંસપ્રિયો ! ચાંડાળ (ભંગી) વગેરે મદ્યપાન કરનારાઓના સમુદાયો પૃથ્વીમાં છે. તેમની મુક્તિ કયા કારણથી થતી નથી ? (૪) તમો કયા દુષ્ટ બુદ્ધિવાળા પુરુષે ભમાવેલા છો ? અથવા વિશ્વને બ્રાહ્મણાદિ વર્ણભેદે રહિત એક કરવા માટે બ્રહ્માએ સર્જેલા છો કે શું ? (૫)

आर्षग्रन्थस्थिताञ्श्लोकान्मद्यपाननिषेधकान् । सप्रमाणात्मसिद्धान्तख्यात्यै दूषयथ ध्रुवम् ॥६॥ गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा । यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः ॥७॥ स्वायम्भुवो मनुरिति सुरापानं निषेधति । वचनं याज्ञवल्क्यस्य श्रूयतां च तदर्थकम् ॥८॥ अज्ञानात्तु सुरां पीत्वा रेतो विण्मूत्रमेव च । पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥९॥ पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् । मधुत्थं सैरमारिष्टं मैरेयं नालिकेरजम् ॥१०॥ समानानि विजानीयान्मद्यान्येकादशैव तु । द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतम् ॥११॥ एवं पुलस्त्योऽपि मुनिर्मद्यपानं निषेधति । तत्राधमपदे पाठो युष्माभिः कृत उत्तमः ॥१२॥ ऊर्ध्वाम्नायः प्रमाणं चेद्भवतां तर्हि मद्यपाः! । श्रुतीः प्रमाणयथ किं क्षौद्रार्था मद्य आत्मनः ॥१३॥ असदेव ततः शास्त्रं यौष्माकं धूर्तकल्पितम् । सर्वशास्त्रविरुद्धत्वादप्रमाणं मतं हि वः ॥१४॥ अस्तु वर्णान्तरकथा भवद्भिर्ब्राह्मणैः कथम् । निःशङ्कं पीयते मद्यं वेदशास्त्रविगर्हितम् ॥१५॥ श्वपच्यादिमुखोच्छिष्टं पीत्वा च पतिताधमाः । दूषयध्वे कुतो यूयं ब्रह्मसूत्रेण विप्रताम् ॥१६॥ ब्रूत यूयं च विप्रस्य सुरापानविधायकम् । एकमेवापि वचनमार्षग्रन्थे भवेद्यदि ॥१७॥ अहं त्वेतन्निषेधस्य वाक्यान्यद्य सहस्रशः । ब्रूयामार्षाणि सर्वाणि सप्रमाणानि मद्यपाः ! ॥१८॥ यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवम् । तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः ॥१९॥ इत्यादीनि बहून्येव स्मृतिवाक्यानि सन्ति वै । गणितं च सुरापानं महापातकपञ्चके ॥२०॥

---

**મદ્યપાનને નિષેધ કરનારા યાજ્ઞવલ્ક્યાદિ સ્મૃતિકારોએ કહેલા શ્લોકો**ને કલ્પિત પ્રમાણવાળા પોતાના સિદ્ધાંતોની પ્રસિદ્ધિ માટે નિશ્ચે દૂષણ આપો છો. (૬) ગૌડી, (ગોળમાંથી બનાવેલી) પૈષ્ટી (ચોખા આદિકના લોટમાંથી બનાવેલી) અને માધ્વી (મહુડામાંથી બનાવેલી) આ ત્રણ પ્રકારની સુરા જાણવી. જેમ એક છે તેમ સર્વે પણ છે. માટે બ્રાહ્મણ-ક્ષત્રિય અને વૈશ્યોએ પાન કરવું નહિ. (૭) આ પ્રમાણે સ્વાયંભૂ મનુએ સુરાપાનનો નિષેધ કરેલો છે તેવા અર્થને કહેનારું, યાજ્ઞવલ્ક્ય મુનિનું પણ વચન સાંભળો. (૮) 'દ્વિજાતિ સંજ્ઞાવાળા જનો અજ્ઞાનથી સુરાનું પાન કરીને ફરીથી ઉપવીત સંસ્કારને યોગ્ય થાય છે.' (૯)

ફણસ, દ્રાક્ષ, મહુડાં, ખજૂર, તાડ, ઈક્ષુ, મધ, રાયણ, અરીઠી, મૈરેય, નાળિયેર : આ અગિયારમાંથી ઉત્પન્ન થયેલું મદ્ય એ બધાં સરખાં છે. બારમું સુરામદ્ય છે તે બધાઓમાં અધમ છે. (૧૦-૧૧) આ પ્રકારે પુલસ્ત્ય મુનિ પણ મદ્યપાનનો નિષેધ કરે છે. તેમાં 'અધમ'પદને સ્થાને તમોએ 'ઉત્તમ' એવો પાઠ કરેલો છે.(આ રીતે समानानि विजानीयात् मद्यान्येकादशैव तु । ત્યાં તમોએ मद्यान्येकादशैतानि भुक्तिमुक्तिकराणि हि એવા પાઠાંતરની કલ્પના કરી છે.) (૧૨)

હે મદ્યપો ! જો ઊર્ધ્વામ્નાય તમારો પ્રમાણ હોય તો મધ માખીઓએ કરેલા મધુ અર્થને બોધ કરનારી મધુવાતાદ્યાઃ શ્રુતિઓ મદ્યમાં, તમોને પ્રિય સુરામાં તમો શા માટે નહિ પ્રમાણને પ્રમાણ રૂપ માનો છો ? (૧૩) માટે ધૂર્તોએ કલ્પેલું તમારું કૌલતંત્ર અસત્ (મિથ્યા) જ છે. સર્વ શાસ્ત્રનો વિરોધ હોવાથી પ્રમાણરહિત જ છે. (૧૪)

બ્રાહ્મણ વિના બીજા વર્ણની કથા (એટલે કે વાત) ભલે હોય. પરંતુ તમો બ્રાહ્મણો થઈને વેદશાસ્ત્રથી નિંદિત મદ્ય, શંકાએ રહિત કેમ પાન કરો છો ? (૧૫) શ્વપચી (ભંગડી) વગેરે તમોએ કુલાષ્ટકપણે કલ્પેલી સ્ત્રીઓના મુખથી ઉચ્છિષ્ટ મદ્યપાન કરી અધમતાને પામેલા તમો યજ્ઞોપવીત ધારણ કરવાથી બ્રાહ્મણપણાને શા માટે દૂષણ પમાડો છો ? (૧૬) બ્રાહ્મણને સુરાપાન કરવાની આજ્ઞા આપનાર એક પણ વચન ઋષિપ્રણીત ગ્રંથોમાં જો હોય તો તમો કહો. (૧૭)

હે મદ્યપો ! હું તો બ્રાહ્મણને સુરાપાન અને મદ્યપાનના નિષેધના યાજ્ઞવલ્ક્યાદિ સ્મૃતિશાસ્ત્રમાં કહેલાં માટે જ પ્રમાણભૂત હજારો વાક્યો હાલમાં જ કહું છું. (૧૮) મદ્ય, માંસ, સુરાસવ તે યક્ષ -રાક્ષસો અને પિશાચોનું અન્ન છે. ઈન્દ્રાદિ દેવોનું અગ્નિના મુખમાં હોમેલાથી અવશિષ્ટ ઘૃત-દૂધપાક વગેરે અમૃત સંજ્ઞાવાળું હવિષ્યાન્ન ખાનારા બ્રાહ્મણે મદ્યાદિરૂપ યક્ષાદિ અન્ન ખાવું નહિ. (૧૯) આ પ્રકારનાં ઘણાં સ્મૃતિવાક્યો છે જ. વળી અજ્ઞાનથી કરેલું સુરાપાન તો બ્રહ્મહત્યાદિ પાંચ મહાપાપમાં ગણેલું છે. (૨૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुराम्बुघृतगोमूत्रपयसामग्निसन्निभम् । सुरापोऽन्यतमं पीत्वा मरणाच्छुद्धिमृच्छति ॥२१॥ अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव च । पुनःसंस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥२२॥ सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत् । इत्याद्यज्ञानपानेऽपि स्मर्यते तस्य निष्कृतम् ॥२३॥ पुनः पुनः प्रपिबतां युष्माकं बुद्धिपूर्वकम् । भविष्यति गतिः का वा जनान् पातयतामधः ॥२४॥ अगम्याः परयोषा हि तत्सङ्गं ये तु कुर्वते । तेषां च वेदनां तीव्रां वच्मि भागवतोदिताम् ॥२५॥ यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदभिगच्छति तावमुत्र कशया ताडयन्तस्तिग्मया सूर्म्या लोहमय्या पुरुषमालिङ्गयन्ति स्त्रियं च पुरुषरूपया सूर्म्या ॥२६॥ सुव्रत उवाच - इति वाचं भगवता प्रोक्तामाश्रुत्य ते द्विजाः । अशक्ता ह्युत्तरं दातुं तूष्णीमासन्भ्रमद्धियः ॥२७॥ हरिवाग्भिन्नमर्माथ गुरुस्तेषां रुषा ज्वलन् । तमुवाच महाकालीं पानपात्रकरां स्मरन् ॥२८॥ कीचक उवाच - अस्मन्मतेऽपि दोषोऽस्ति सुरापाने वृथा कृते । देवप्रसादमद्यादेः प्राशने क्वास्ति दूषणम् ॥२९॥ यज्ञेषु ब्राह्मणैर्मद्यं मांसं देवनिवेदितम् । यथेष्टं भक्ष्यमित्याह वेदस्तत्रास्ति किं न्वघम् ॥३०॥ या वेदविहिता हिंसा न सा हिंसेति कथ्यते । रहस्यमित्याद्यज्ञात्वा दूषयस्यत्र नः कथम् ॥३१॥ भारते च पुराणेषु बहवो ब्राह्मणा अपि । मद्यपा मांसभक्षाश्च श्रूयन्ते स्वेष्टयोषितः ॥३२॥ मार्कण्डेयपुराणे च सप्तशत्यां प्रशंसनम् । यथावन्मद्यमांसादेः कृतमस्ति न वेत्सि तत् ॥३३॥

---

અજ્ઞાનથી સુરાપાન કરનાર પુરુષ સુરા,જળ, ઘી, ગોમૂત્ર, દૂધ આ પાંચમાંથી કોઈ પણ એક અગ્નિ સમાન કરીને તેનું પાન કરી શુદ્ધિ પામે છે. (અર્થાત્ મરણથી શુદ્ધિ થાય છે.) (૨૧) દ્વિજાતિવાળા ત્રણ વર્ણો અજ્ઞાનથી વિષ્ઠા-મૂત્ર અને સુરાના સંમિશ્રણવાળી કોઈ પણ વસ્તુનું ભક્ષણ કરી ફરીથી સંસ્કારને યોગ્ય થાય છે. (૨૨) ત્રણ વર્ણનો માણસ અજ્ઞાનથી સુરાનું પાન કરી અગ્નિ સમાન સુરાપાન કરે; વગેરે સુરાપાનનું પ્રાયશ્ચિત્ત અજ્ઞાનથી પાન કરવામાં પણ સ્મૃતિવચનોથી કહેવાય છે. (૨૩)

વારંવાર બુદ્ધિપૂર્વક જ સુરા મદ્યનું પાન કરનારા એવા તમારો આશ્રય કરનાર જનોને સુરાપાનના ઉપદેશના વિધાનથી તેનું પાન કરાવીને ઘોર નરકોમાં ફેંકનારા તમારી કેવા પ્રકારની ગતિ થશે ? (૨૪) પોતે પરણ્યા વિનાની પારકી સ્ત્રીઓ શાસ્ત્રોમાં નિષેધ કરેલી, જે પુરુષો તેનો સંગ કરે છે તે પુરુષોને ભાગવતમાં કહેલી તીવ્ર વેદના કહું છું. (૨૫)

આ લોકમાં જે પુરુષ અગમ્ય પરસ્ત્રીનો સંગ કરે છે, જે સ્ત્રી પોતાના પતિથી બીજા પુરુષના પ્રત્યે સંગ કરવા જાય છે તે સ્ત્રી-પુરુષોને યમલોકમાં કોયડાથી પ્રહાર કરતા યમપુરુષો અતિ તપાયમાન લોઢાની સ્ત્રીરૂપ પ્રતિમાની સાથે પરસ્ત્રી ભોગવનાર પુરુષને આલિંગન કરાવે છે અને અતિ તપાયમાન લોઢાની પુરુષરૂપ પ્રતિમાની સાથે બીજા પુરુષનો ઉપભોગ કરનારી સ્ત્રીને આલિંગન કરાવે છે. (૨૬) હે રાજન્ ! આ પ્રકારે શ્રી નારાયણ મુનિએ કહેલી વાણી સાંભળી કીચકના શિષ્યો શ્રીહરિવચનનો ઉત્તર આપવા અસમર્થ વિભ્રાંત બુદ્ધિવાળા આ સત્ય છે કે અસત્ય છે એવી શંકા યુક્ત મનવાળા મૌન રહ્યા. (૨૭)

પછી શ્રીહરિનાં વચનોથી ભેદાયું છે મર્મસ્થળ જેમનું એવા ક્રોધથી બળતા અંગવાળો તે ચારે બ્રાહ્મણોનો ગુરુ કીચક મદ્યપાત્ર હાથમાં જેને છે એવી મહાકાળીદેવીને સંભારતો સતો શ્રીહરિ પ્રત્યે બોલ્યો : (૨૮) હે સ્વામિન્ ! અમારા મતમાં પણ દેવપ્રસાદ વિના કરેલા સુરાપાનમાં દોષ છે. દેવપ્રસાદરૂપ મદ્યપાન અને માંસાદિના ભોજનમાં દોષ કયા શાસ્ત્રમાં છે ? (૨૯) સોમયાગાદિ યજ્ઞોમાં દેવને નિવેદન કરેલું મદ્ય અને માંસ બ્રાહ્મણોએ ઈચ્છા પ્રમાણે ભક્ષણ કરવું. આ પ્રકારે વેદ કહે છે. વેદમાં કહેલા દેવ પ્રસાદાદિ મદ્ય-માંસ ભક્ષણમાં શું પાતક છે ? (૩૦) વેદમાં કહેલી હિંસા તે હિંસા નથી : આ પ્રમાણે મનુ આદિ ઋષિઓએ કહ્યું છે. આ વેદનું રહસ્ય જાણ્યા વગર આ સભામાં અમોને શા માટે દોષયુક્ત કહો છો? (૩૧) મહાભારતમાં અને પુરાણોમાં ઘણા પણ મદ્યપાન કરનારા, માંસભક્ષણ કરનારા અને પોતાને ઈચ્છિત સ્ત્રીઓ જેમને છે એવા સંભળાય છે. (૩૨) માર્કણ્ડેય પુરાણમાં સપ્તશતીમાં મદ્યમાંસાદિના ભક્ષણની પ્રશંસા યથાર્થપણે કરેલી છે. તે તમો નથી જાણતા કે શું ? (૩૩)

सुव्रत उवाच – **अप्रमाणं निजं ग्रन्थं ज्ञात्वा त्यक्त्वाऽथ वैदिकम् । छलेनाश्रित्य मार्गं तं ब्रुवन्तं हरिरूचिवान् ॥३४॥** श्रीनारायणमुनिरुवाच – **देवा हि सात्त्विकाः प्रोक्ता राजसा दैत्यदानवाः । तामसा राक्षसाद्याश्च पुराणेष्वागमेषु च ॥३५॥ पयः सर्पिश्चामृताख्यमन्नं देवप्रियं मतम् । दैत्यानां राक्षसादीनां सुरामांसाशनं प्रियम् ॥३६॥ आदिराजेन पृथुना प्रेरिता अत एव हि । स्वस्वान्नं दुदुहुः सर्वे पृथिवीं धेनुरूपिणीम् ॥३७॥ कृत्वा वत्सं सुरगणा इन्द्रं सोममदूदुहन् । हिरण्मयेन पात्रेण वीर्यमोजो बलं पयः ॥३८॥ दैतेया दानवा वत्सं प्रह्लादिमसुरर्षभम् । विधायादूदुहन् क्षीरमयःपात्रे सुरासवम् ॥३९॥ यक्षरक्षांसि भूतानि पिशाचाः पिशिताशनाः । भूतेशवत्सा दुदुहुः कपाले क्षतजासवम् ॥४०॥ इत्थं श्रीमद्भागवते पुराणे प्रतिपादितम् । नैवेद्यार्हं न देवानां मद्यं मांसं ततो मतम् ॥४१॥ राजसानां तामसानां मद्यमांसाशने रुचिः । स्वाभाविकी वर्ततेऽतो विध्यपेक्षा न वर्तते ॥४२॥ यज्ञ एव ततो हिंसां नित्यहिंसानिवृत्तये । वेदो ब्रूते नत्वभीष्टा हिंसा वेदस्य कर्हिचित् ॥४३॥ भारते च पुराणेषु प्रोक्तमादौ प्ररोचनम् । अहिंसा परमो धर्म इत्येव स्थापितं ततः ॥४४॥ मार्कण्डेयपुराणेऽपि सप्तशत्यां चतुःपिब ! । मद्यमांसाशनं कार्यं द्विजेनेति क्व विद्यते ॥४५॥ देव्याः पूजा सुरामांसै रहस्ये भवतीति चेत् । मार्कण्डेयपुराणे तद्रहस्यं नैव विद्यते ॥४६॥ सुरामांसादिपूजेयं विप्रवर्ज्या मयोदिता । इत्यर्धेन निषेधोऽस्ति रहस्येऽपि द्विजन्मनः ॥४७॥ अज्ञात्वा शास्त्रतात्पर्यं त्वादृशाः पापकर्मिणः । शिष्यैः सह व्रजन्त्यन्ते महतो निरयान् खलु ॥४८॥**

---

**સુવ્રતમુનિ કહે છે :** હે રાજન્ ! આ પ્રકારે કીચકનાં વચનને સાંભળ્યા પછી પોતાનો ગ્રંથ કૌલતંત્ર પ્રમાણવર્જિત જાણી તેનાં પ્રમાણો આપવા ત્યાગ કરી કપટથી વૈદિક માર્ગનો આશ્રય કરી બોલનારા કીચકને શ્રીહરિએ કહ્યું : (૩૪)

**શ્રીનારાયણમુનિ કહે છે :** હે કીચક ! શ્રીમદ્ ભાગવતાદિ પુરાણોમાં અને નારદ પંચરાત્રાદિ શાસ્ત્રોમાં દેવો સાત્ત્વિકો કહેલા છે. દૈત્યો અને દાનવો રાજસ કહેલા છે. રાક્ષસો વગેરે તામસ કહેલા છે. (૩૫) અમૃત નામવાળું દૂધ-ઘી દેવતાઓને પ્રીતિ કરનારું અન્ન માનેલું છે. દૈત્યો અને રાક્ષસોને સુરા અને માંસનું ભોજન પ્રિય માનેલું છે. (૩૬) માટે જ પ્રથમ નૃપતિ-આદિ રાજા પૃથુએ પ્રેરણા કરેલા સર્વે દેવ, દાનવ, મનુષ્યો વગેરે ધેનુના રૂપવાળી પૃથ્વીના પ્રત્યે પોતપોતાના અન્નનું દોહન કરતા હતા. (૩૭)

**રૂચિ પ્રમાણે પૃથ્વીનું દોહન :-** દેવતાઓએ ઈન્દ્રને વાછરડો કરી સુવર્ણ પાત્રમાં સોમ (અમૃત), વીર્ય (મનની શક્તિ) અને બળ (શરીરશક્તિ) તે જ દૂધનું દોહન કર્યું. (૩૮) અસુરો અને દાનવોએ અસુરોમાં શ્રેષ્ઠ વિરોચનને વાછરડો કરી લોઢાના પાત્રમાં ત્રણ પ્રકારની સુરા અને અગિયાર પ્રકારનું મદ્ય તે રૂપી દૂધનું દોહન કર્યું. (૩૯) માંસભક્ષણ કરનારા યક્ષો અને રાક્ષસોએ ભૂતોના ઈશ્વર શંકરને વાછરડો કરી કપાળ (ખોપરી)માં રુધિર રૂપ મદ્ય અને એ જ દૂધનું દોહન કર્યું. (૪૦)

**હિંસાની નિવૃત્તિમાં વેદોનું તાત્પર્ય :-** આ પ્રમાણે શ્રીમદ્ ભાગવત પુરાણમાં પ્રતિપાદન કરેલું છે. માટે મદ્ય અને માંસ દેવતાઓના નૈવેદ્યમાં યોગ્ય માનેલું નથી. (૪૧) રજોગુણપ્રધાન પુરુષો અને તમોગુણપ્રધાન પુરુષોમાં મદ્ય-માંસ ખાવાની રુચિ સ્વાભાવિક હોય છે. માટે વિધિવાક્યની અપેક્ષા હોતી નથી. (૪૨)

માટે નિત્ય હિંસાની નિવૃત્તિ માટે વેદ યજ્ઞમાં જ હિંસા કહે છે. વેદને હિંસા ક્યારેય પણ ઈચ્છિત નથી. (૪૩) ભારતમાં અને પુરાણમાં પ્રથમ વેદોક્ત કર્મમાં પ્રવૃત્તિ નહિ કરનારને તેની રુચિને અનુસરીને યજ્ઞાદિથી ફળ બતાવવા કહ્યું છે. પછી અહિંસા શ્રેષ્ઠ ધર્મ છે : આ પ્રમાણે જ નિર્ણય કરેલો છે. (૪૪) હે ચતુઃ પિબ ! માર્કણ્ડેય પુરાણમાં સપ્તશતીમાં પણ દ્વિજે (બ્રાહ્મણે) મદ્ય, માંસ ખાવું આ પ્રમાણે કયા શ્લોકમાં છે ? (૪૫)

**માર્કંડેયપુરાણમાં પણ સુરામાંસનો નિષેધઃ-** સુરામાંસથી દેવીની પૂજા રહસ્યવચનમાં છે એમ કહેતા હોય તો તે રહસ્ય માર્કણ્ડેય પુરાણમાં નથી જ. (૪૬) આ સુરામાંસાદિથી પૂજા વિપ્રોએ ના કરવી એમ જે મેં કહ્યું. આવા અર્ધા શ્લોકથી રહસ્યમાં પણ બ્રાહ્મણને સુરામાંસનો નિષેધ કરેલો છે. (૪૭) શાસ્ત્રનું તાત્પર્ય નહિ જાણીને તમારા જેવા સુરામાંસાદિના ખાવારૂપ પાપકર્મ કરનારાઓ અંતે પોતાના આશ્રિત શિષ્યોએ સહિત મહાનરકોમાં નિશ્ચે જાય છે. (૪૮)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुरापानं महापापं द्विजानामिति भार्गवः । उशनाः स्थापयामास मर्यादां तद्वचः शृणु ॥४९॥ यो ब्राह्मणोऽद्यप्रभृतीह कश्चिन्मोहात्सुरां पास्यति मन्दबुद्धिः । अपेतधर्मो ब्रह्महा चैव स स्यादस्मिँल्लोके गर्हितः स्यात्परे च ॥५०॥ इति शुक्रकृता लोके मर्यादा विद्यते किल । महापापं कथं न स्यात्तामुल्लङ्घयतस्तव ॥५१॥ गोचर्यामपि नारीषु मनुष्याणां पुरा मुनिः । औद्दालकिः श्वेतकेतुर्निषिषेध च तच्छृणु ॥५२॥ व्युच्चरन्त्याः पतिं नार्या अद्यप्रभृति पातकम् । भ्रूणहत्यासमं घोरं भविष्यत्यसुखावहम् ॥५३॥ भार्यां तथा व्युच्चरतः कौमारब्रह्मचारिणीम् । पतिव्रतामेतदेव भविता पातकं भुवि ॥५४॥ मांसं तु सर्वथा नैव कस्यचिज्जन्तुनोऽपि वै । भक्षणार्हं मनुष्याणामिति घण्टापथः किल ॥५५॥ यज्ञशेषस्य मांसस्य भक्षणेऽपि द्विजन्मनः । महान् दोषोऽस्ति निर्दोषं मांसं नास्त्येव कर्हिचित् ॥५६॥ यज्ञशेषादिमांसस्य भक्षणे ह्यत एव हि। निषेधो भारतेऽस्तीति तद्वाक्यमपि ते ब्रुवे ॥५७॥ यजुषा संस्कृतं मांसं निवृत्तो मांसभक्षणात् । न भक्षयेद्वृथामांसं पृष्ठमांसं च वर्जयेत् ॥५८॥ एकतः सर्वमांसानि मत्स्यमांसानि चैकतः । भवन्ति पापरूपाणि न विप्रस्तानि भक्षयेत् ॥५९॥ अयमेव हि सिद्धान्तो वेदशास्त्रप्रमापितः । असदेव मतं तस्मात्तव मांसाशिनोऽखिलम् ॥६०॥ प्राणिमात्रवधमन्तरा क्वचित्प्राप्यते न पललं पलप्रियाः ! । जीवघात इह बुद्धिपूर्वकं त्वस्ति दोष इति वो मतं न सत् ॥६१॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे जयतल्पपुरे क्षुद्रशाक्तमतखण्डने मकारपञ्चकोच्छेदननामा षट्चत्वारिंशोऽध्यायः ॥४६॥

---

બ્રાહ્મણોને સુરાપાન બ્રહ્મહત્યાદિ મહાપાપની અંદર ગણેલું છે : આ પ્રમાણે ભૃગુના પૌત્ર શુક્રાચાર્યે મર્યાદાનું સ્થાપન કર્યું છે તેમનું વાક્ય સાંભળો. (૪૯) 'આ લોકમાં આજથી આરંભીને મૂઢમતિ જે કોઈ બ્રાહ્મણ અજ્ઞાનથી સુરાનું પાન કરશે તે બ્રાહ્મણ ધર્મથી પતિત અને બ્રાહ્મણની હત્યા કરનારો થાય. આ લોક અને પરલોકમાં અતિનિંદિત થાય.' (૫૦) આ પ્રમાણે લોકમાં શુક્રે મર્યાદા નિશ્ચે કરેલી છે. તેને ઉલ્લંઘન કરનાર તમોને મહાપાપ કેમ ના થાય ? થાય જ. (૫૧) મનુષ્યોને પોતાને ઈષ્ટ સ્ત્રી માત્રના સંગના વિધાનથી અને સ્ત્રીઓને પોતાના ઈષ્ટ પુરુષ માત્રના સંગવિધાનથી પશુના સમાન આચરણપણાનો પણ પૂર્વે ઉદ્દાલકના પુત્ર શ્વેતકેતુએ નિષેધ કરેલો છે તે સાંભળો. (૫૨)

**સ્ત્રી પુરૂષોના સ્વૈચ્છિક વિહારમાં નિષેધ વચનો :-** આજથી આરંભીને પોતાના પતિ વિના બીજા પુરુષનો સંગ કરનારી સ્ત્રીઓને બાલહત્યા સમાન મહાદુઃખ પમાડનારું ઘોર પાપ થશે. (૫૩) તે જ પ્રકારે પૃથ્વીમાં કૌમાર અવસ્થાથી આરંભીને મનથી પણ બીજા પુરુષનો સંગ નહિ કરનારી પતિવ્રતા પોતાની પત્નીનો ત્યાગ કરી પરસ્ત્રીનો સંગ કરનાર પુરુષને બ્રહ્મહત્યા સમાન પાતક થશે. (૫૪)

કોઈ પણ પ્રાણી માત્રનું માંસ તો મનુષ્યોને સર્વ પ્રકારે ભક્ષણ કરવા યોગ્ય છે જ નહિ. આ પ્રકારે સર્વ શાસ્ત્રોમાં રાજમાર્ગની માફક પ્રસિદ્ધ માર્ગ નિશ્ચયપણે છે. (૫૫) યજ્ઞશેષ માંસના ભક્ષણમાં પણ બ્રાહ્મણને મહાન દોષ છે. માંસ ક્યારેય પણ નિર્દોષ છે જ નહિ. (૫૬) માટે જ, યજ્ઞશેષાદિ માંસના ભક્ષણમાં નિષેધ ભારતમાં છે. આ પ્રકારનું ભારતનું વાક્ય તમોને કહું છું : (૫૭) માંસભક્ષણથી નિવૃત્ત થયેલો પુરુષ યજુર્વેદને જાણનારા અધ્વર્યુએ મંત્રોથી પ્રોક્ષણ કરેલાં માંસનું ભક્ષણ કરે નહિ અને તેવી રીતે સંસ્કાર કર્યા વિનાના માંસનો ત્યાગ કરે તથા શ્રાદ્ધનું શેષ માંસ પણ ત્યાગ કરે. (૫૮) એક તરફ સર્વ પ્રાણી માત્રનાં માંસ અને એક તરફ મત્સ્યમાંસ એ બેને ત્રાજવામાં તોલવાથી સમાન થાય છે. એવા સર્વ માંસ તુલ્ય મત્સ્યમાંસને બ્રાહ્મણ ભક્ષણ કરે નહિ. (૫૯) આ મારો કહેલો સિદ્ધાંત વેદશાસ્ત્રોથી નિશ્ચે પ્રમાણભૂત છે. માટે માંસભક્ષણ કરનારા તમારો સિદ્ધાંત અસત્ છે. (૬૦)

હે માંસપ્રિયો ! કીચક વગેરે, પ્રાણીમાત્રના વધ વિના ક્યારેય પણ માંસ પ્રાપ્ત થતું નથી. આ લોકમાં બુદ્ધિપૂર્વક જાણીને પ્રાણીવધમાં દોષ છે. માટે તમારો મત સત્ય નથી, મિથ્યા જ છે. (૬૧)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે જયતલ્પપુરે ક્ષુદ્રશાક્તમતખણ્ડને મકારપંચકોચ્છેદનનામા ષટ્ ચત્વારિંશોઽધ્યાય : (૪૬)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच - **वाचं निजमतोच्छेत्रीं श्रुत्वैतां स हरेर्नृप ! । सर्पो यथा मन्त्ररुद्धवीर्योऽन्तर्व्याकुलोऽब्रवीत् ॥१॥** कीचक उवाच - **यदि वेदस्य तात्पर्यं हिंसादौ नैव विद्यते । हिंस्त्रयज्ञाः कथं तर्हि कृता देवर्षिभूमिपैः ॥२॥ वेदशास्त्रपुराणानि तैरधीतानि किं न वा । त्वमेव पण्डितोऽस्येकः सर्वेभ्यो दूषणप्रदः ॥३॥ अन्नं चराणामचरा ह्यपदः पादचारिणाम् । अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः ॥४॥ इति भागवतश्लोकः प्रमाणं मांसभक्षणे । परम्परागतश्चास्ति शिष्टाचारोऽपि हीदृशः ॥५॥ उशनःश्वेतकेतुभ्यां मर्यादा या प्रवर्तिता । सात्विदानींतनी ज्ञेया न त्वनादि मतं हि तत् ॥६॥ मतमाधुनिकं सुज्ञा नैव गृह्णन्ति पण्डिताः । ते तु प्राचीनमध्वानं श्रयन्ते सूक्ष्मदर्शिनः ॥७॥** सुव्रत उवाच - **सत्पण्डितायमानस्य तस्येत्थं वाचमीश्वरः । स आश्रुत्य मतं तस्य मर्दयन्नाह सद्वचः ॥८॥** श्रीनारायणमुनिरुवाच - **हिंस्त्रकर्मपरान्नाहं दूषये किन्तु वैदिकः । एवमेवास्ति सिद्धान्तः स एव कथितो मया ॥९॥ भारते मोक्षधर्मेषु भीष्मो राजा युधिष्ठिरम् । निःसंशयं तमेवाह तद्वचांसि निशामय ॥१०॥ अव्यवस्थितमर्यादैर्विमूढैर्नास्तिकैर्नरैः । संशयात्मभिरव्यक्तैर्हिंसा समनुवर्णिता ॥११॥ सर्वकर्मस्वहिंसां हि धर्मात्मा मनुरब्रवीत् । कामकाराद्विहिंसन्ति बहिर्वेद्यां पशून्नराः ॥१२॥ तस्मात्प्रमाणतः कार्यो धर्मः सूक्ष्मो विजानता। अहिंसा सर्वभूतेभ्यो धर्मेभ्यो ज्यायसी मता ॥१३॥ यदि यज्ञांश्च वृक्षांश्च यूपांश्चोद्दिश्य मानवाः । वृथामांसानि खादन्ति नैष धर्मः प्रशस्यते ॥१४॥**

---

## અધ્યાય : ૪૭

### શ્રીહરિ ક્ષુદ્ર શાક્તમતના ખંડનમાં વાદી જે કીચકને જીત્યા અને અહિંસાધર્મનું સ્થાપન કર્યું તે કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે નૃપ ! પોતાના મતને ખંડન કરનારી શ્રીહરિની આ કહેલી વાણી સાંભળી કીચક મંત્રથી હણાયેલા સામર્થ્યવાળા સર્પની માફક અંતઃકરણમાં પીડા પામતો બોલ્યો. (૧) **કીચક કહે છે** : હે સ્વામિન્, જો વેદનું હિંસાદિમાં તાત્પર્ય નથી તો દેવો ઋષિઓ અને રાજાઓએ હિંસામય યજ્ઞો કયા કારણથી કરેલ છે ? (૨) તે દેવતાઓ વેદ-શાસ્ત્રો અને પુરાણો શું ભણ્યા નથી ? સર્વ દેવતાઓ વગેરેને દોષ આપનારા તમો એક જ વેદાદિ જાણનારા છો શું ? (૩) હાલતા ચાલતા મનુષ્યોનું અન્ન ડાંગર વગેરે સ્થાવર થાય છે. પગથી ચાલનારાં પશુઓનું અન્ન પગ વિનાના તૃણ વગેરે થાય છે. હાથવાળાં વાનરો વગેરેનું અન્ન હસ્ત વિનાના ફળ-પત્ર વગેરે છે. બે પગવાળાં મનુષ્યોનું અન્ન ચાર પગવાળા બકરા વગેરે છે.(૪) આ પ્રકારે ભાગવતનો શ્લોક માંસભક્ષણમાં પ્રમાણ રૂપ છે. અને પરંપરાગત સદાચાર પણ આ પ્રકારનો છે. (૫) ઉશના અને શ્વેતકેતુએ જે મર્યાદા પ્રવર્તાવેલી તે તો હાલમાં ઉત્પન્ન થયેલી જાણવી. તે સનાતન મત નથી. (૬) સુજ્ઞ પંડિતો આધુનિક મતને ગ્રહણ કરતા નથી. કુશાગ્ર બુદ્ધિ વાળા પંડિતો પ્રાચીન માર્ગનો જ આશ્રય કરે છે. (૭)

હે રાજન્ ! આ પ્રકારે સત્ય પંડિતની માફક આચરણ કરનારી કીચકની વાણી સાંભળી પરમેશ્વર શ્રીહરિ કીચકના મતનું મર્દન કરતા સતા યથાર્થ વચન બોલ્યા. (૮) **શ્રીનારાયણ મુનિ બોલ્યા** : હે કીચક ! હું હિંસાકર્મપરાયણ પુરુષોને દૂષણ આપતો નથી પરંતુ વેદથી પ્રતિપાદિત સિદ્ધાંત હિંસાદિ નિષેધ પર જ છે. તે સિદ્ધાંત મેં કહ્યો છે. (૯) ભારતમાં મોક્ષધર્મમાં રાજર્ષિ ભીષ્મે યુધિષ્ઠિર પ્રત્યે સંશયે રહિત સિદ્ધાંત કહેલો છે, તે ભીષ્મનાં વચનો સાંભળો : (૧૦)

વેદમાં કહેલી સનાતન, અહિંસાપ્રધાન મર્યાદાને ઉલ્લંઘન કરનારા તેથી જ વિમૂઢ-વેદોના અભિપ્રાયને નહિ જાણનારા પુરુષોએ યજ્ઞમાં પશુનો વધ શ્રેષ્ઠપણે માનેલો છે. (૧૧) અહિંસાધર્મમાં રુચિવાળા સ્વાયંભૂ મનુએ જ્યોતિષ્ટોમાદિ સમગ્ર યજ્ઞક્રિયામાં અહિંસાની જ પ્રશંસા કરી છે. હિંસામાં રુચિવાળા પુરુષો તો યજ્ઞશાળાથી બહાર કરેલી વેદિકામાં અજાદિ પશુઓને પોતાની ઈચ્છા માત્રથી જ હણીને હિંસા કરે છે પણ વેદની આજ્ઞાથી કરતા નથી. (૧૨)

માટે હિંસાધર્મ તો સ્વેચ્છાપૂર્વક હોવાથી પ્રમાણોનું બળ અને અબળને જાણનારા પુરુષે અહિંસારૂપ ધર્મ આચરણ કરાયેલો છે. માટે સર્વ પ્રાણીઓની શરીર-વાણી અને મનથી દ્રોહ ન કરવા રૂપ અહિંસા સમગ્ર ધર્મોથી અતિશય શ્રેષ્ઠ વેદાદિ સમગ્ર શાસ્ત્રોએ માનેલી છે. (૧૩) મનુષ્યો સોમાદિ યજ્ઞો, વૃક્ષો અને યજ્ઞસ્તંભોને ઉદ્દેશીને મારેલાં પશુઓ વગેરેનું માંસ જો ખાય છે તો તે વૃથા છે. શાથી કે, પશુને મારવારૂપ ધર્મની મુનિઓએ પ્રશંસા કરી નથી. (૧૪)

सुरां मत्स्यान्मधु मांसमासवं कृशरौदनम् । धूर्तैः प्रवर्तितं ह्येतन्नैतद्वेदे तु कल्पितम् ॥१५॥ मानान्मोहाच्च लोभाच्च लौल्यमेतत्प्रकल्पितम् । विष्णुमेवाभिजानन्ति सर्वयज्ञेषु ब्राह्मणाः ॥१६॥ पायसैः सुमनोभिश्च तस्यापि यजनं स्मृतम् । यज्ञियाश्चैव ये वृक्षा वेदेषु परिकल्पिताः ॥१७॥ यच्चापि किञ्चित्कार्तिक्यमन्नं चोक्षैः सुसंस्कृतम् । महत्सत्त्वैः शुद्धभावैः सर्वं देवार्हमेव तत् ॥१८॥ इति भारतवाक्यानि कथितानि चतुःपिब ! । श्रीमद्भागवतस्यापि सिद्धान्तोऽस्त्ययमेव हि ॥१९॥ आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः । अग्निमुग्धा धूमतान्ताः स्वं लोकं न विदन्ति ते ॥२०॥ कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः । पशून् द्रुह्यन्ति विस्त्रब्धाः प्रेत्य खादन्ति ते च तान् ॥२१॥ न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित् । मुन्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया ॥२२॥ वाक्यैरित्यादिभिः साक्षात्पशुघातो मखेष्वपि । निषिद्धः श्रीभागवते किंपुनस्त्वन्यथा वधः ॥२३॥ सप्तर्षयो वालखिल्यास्तथैवोचुर्मरीचिपाः। अमांसभक्षणं सर्वे प्रशंसन्ति महर्षयः ॥२४॥ स्वमांसं परमांसेन यो वर्धयितुमिच्छति । स सीदत्येव नियतमित्युवाच च नारदः ॥२५॥ न भक्षयति यो मांसं न हन्यान्न च घातयेत् । स पूज्यः सर्वभूतानामित्याहाद्यो मनुर्वचः ॥२६॥ मधुमांसनिवृत्तो यः स दाता स च यज्ञकृत् । स तपस्वी च विज्ञेय इति प्राह बृहस्पतिः ॥२७॥

વળી યજ્ઞાદિને ઉદ્દેશીને સુરા-મત્સ્ય-મદ્ય-માંસ-આસવ અને કૃશરોદન = (તલ અને મગથી મિશ્રિત ભાતની ખીચડી) ખાય છે તે પણ વૃથા છે કારણ કે માંસભક્ષણાદિ રસમાં લોલુપતાવાળા જનોએ પ્રવર્તાવેલું છે. વેદમાં તો એ કહેલું નથી. (૧૫) વળી તેમણે કલ્પેલું છે તે પણ પોતાનું માન રાખવા માટે, મોહથી, વેદનો અભિપ્રાય નહિ જાણવાથી અને લોભથી-ધન પ્રાપ્ત કરવા માટે માત્ર લોલુપતાથી જ છે. બ્રાહ્મણો વૈદિક સત્પુરૂષો સર્વ યજ્ઞોમાં વિષ્ણુને જ પૂજ્યપણે માને છે. (૧૬)

તે વિષ્ણુનું જે પૂજન નૈવેદ્ય અર્પણાદિથી તે પણ દૂધપાક તેમજ ઘઉંથી નિર્માણ કરેલી પૂરીઓ-લાડુ-શીરો વગેરેથી કહેલું છે. તથા વેદોમાં હૂત દ્રવ્યપણે કહેલાં જે વૃક્ષો આંબો-નાળિયેર-સોપારી વગેરેનાં ફળોથી પૂજન કહેલું છે. (૧૭) મહાસત્ત્વ ગુણ યુક્ત માટે શુદ્ધ ભાવવાળા વિશુદ્ધ પુરુષોએ પવિત્રપણે રાંધેલું કાર્તિક માસમાં ઉત્પન્ન થયેલું, જે અન્ન ડાંગર વગેરે તે બધું તે શ્રી વિષ્ણુ પરમાત્માને અર્પણ કરવા યોગ્ય છે. (૧૮)

હે ચાર વાર મદ્યપાન કરનાર ! આ પ્રમાણે ભારતનાં વાક્યો તમોને કહ્યાં. શ્રીમદ્‌ભાગવતનો પણ આ પૂર્વે કહ્યો એ જ સિદ્ધાંત છે. (૧૯) મલિન બુદ્ધિવાળા જે પુરુષો વેદને હિંસાયજ્ઞ પરાયણ કહે છે તે પુરુષો વેદને નહિ જાણનારા, અગ્નિસાધ્ય કર્મના અભિનિવેશથી વિવેક રહિત ધૂમ માર્ગ છે અંતે જેમને એવા; વારંવાર સંસારને પામે છે. પોતાના આશ્રયરૂપ શ્રી વાસુદેવ એવા મને જાણતા નથી. (૨૦) માયિક વિષયોમાં પ્રીતિવાળા, તેને માટે દીનતા પામેલા, તૃષ્ણાથી દુઃખી થતા, પુષ્પોમાં ફળબુદ્ધિવાળા જે પુરુષો હિંસામય યજ્ઞોથી ઈચ્છિત ફળ મળશે એવા વિશ્વાસવાળા સતા અજાદિ પશુઓને યજ્ઞમાં મારે છે. તે મારેલાં પશુઓ મરીને પરલોકમાં ગયેલા તે પુરુષોને ભક્ષણ કરે છે. (૨૧)

**માંસ ત્યાગનું માહાત્મ્ય :-** ધર્મના તત્ત્વને જાણનાર પુરુષ શ્રાદ્ધમાં માંસ આપે નહિ અને ભક્ષણ કરે નહિ. જે રીતે મુનિઓને પ્રિય નીવારાદિ અન્નોથી સર્વોત્તમ પ્રીતિ પિત્રિઓને થાય તેવી પશુહિંસાથી થતી નથી. (૨૨) શ્રીમદ્‌ભાગવતમાં આ કહેલાં વાક્યો વગેરેથી દેવતા-પિતૃ-યાગને વિશે પણ સાક્ષાત્ પશુઘાત નિષેધ કરેલો છે. એમ ના હોય તો દેવ પિતૃના યજ્ઞ વિના પણ પશુહિંસાનો શા માટે નિષેધ કરવો જોઈએ ? પરંતુ નિષેધ કરેલો જ છે. (૨૩)

બ્રહ્માથી પ્રથમ ઉત્પન્ન થયેલા સપ્તર્ષિઓ મરીચિ વગેરે તથા વાલખિલ્યાદિ તે જ પ્રકારે હિંસામય યજ્ઞો ના કરવા એમ કહેતા હતા. બીજા સર્વે ઋષિઓ પણ માંસભક્ષણ ના કરવું એની જ પ્રશંસા કરે છે. (૨૪) જે પુરુષ બીજાના માંસથી પોતાનું માંસ વધારવા ઈચ્છે છે તે પુરુષ અવશ્ય જ મહાદુઃખ પામે છે. આ પ્રકારે નારદે કહ્યું છે. (૨૫)

જે પુરુષ માંસ ખાતો નથી, પોતે પશુ મારતો નથી, બીજા પાસે મરાવતો પણ નથી તે પુરુષ સર્વ પ્રાણીઓને પૂજવા યોગ્ય થાય છે. આ પ્રમાણે આદ્ય મનુ સ્વાયંભુવે વચન કહેલું છે. (૨૬) જે પુરુષ મદ્ય અને માંસથી નિવૃત્ત થયેલો પુરુષ સુવર્ણમાત્રનો આપનારો જાણવો અને સમગ્ર યજ્ઞકર્તા અને મહાતપસ્વી જાણવો : આ પ્રમાણે બૃહસ્પતિએ કહ્યું છે. (૨૭)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

मासिमास्यश्वमेधेन यो यजेत शतं समाः । सोऽमांसाशी च तुल्यौ स्तो भीष्म इत्याह धर्मजम् ॥२८॥ आदावज्ञानतो भुक्त्वा मांसं पश्चान्निवर्तते । सोऽपि तत्फलमाप्नोति पुनः खादति चेन्न तत् ॥२९॥ यो विद्वान् सर्वभूतेभ्यो भवेदभयदः सदा । स प्राणदो भवेन्नूनं विश्वास्योऽधृष्य एव च ॥३०॥ प्राणा यथात्मनोऽभीष्टास्तथा ज्ञेयाः परस्य च । नास्ति मृत्युसमं दुःखं सर्वेषामपि देहिनाम् ॥३१॥ ब्रह्मस्वरूपनिष्ठानां मुनीनां त्यागिनामपि । प्राप्ते स्ववधकाले तु जायते न प्रसन्नता ॥३२॥ अतएव वधे तेषां ब्रह्महत्याधिकः स्मृतः । धर्मशास्त्रे महान्दोषो विदेहानामपि ध्रुवम् ॥३३॥ तथाऽमराणां सर्वेषां यज्ञभागभुजामपि । वधकाले क्वचित्प्राप्ते महती भीर्हि जायते ॥३४॥ जीवहिंसापापमेव देवास्ते तर्हि जानते । पलायमानाः प्रच्छन्नं वसन्तः कन्दरादिषु ॥३५॥ तथा हिंस्रा नरा ये च तेऽप्यत्र स्ववधक्षणे । प्राप्ते त्रस्यन्ति नितरां प्रद्रवन्त इतस्ततः ॥३६॥ अतिक्रूरा अपि च ते तदानीं यान्ति रङ्कताम् । अहिंसां च प्रशंसन्ति निन्दन्तो हिंसनं मुहुः ॥३७॥ भाविस्वमृत्युवार्तायाः श्रवणेऽपि महद्भयम् । जायते हृदये पुंसां कम्पश्च विदुषामपि ॥३८॥ तदा तु हन्यमानानां पापैर्मांसार्थिभिर्बलात् । जीवानां रोगहीनानां कथं न स्याद्भयं महत् ॥३९॥ ईदृक्कर्मकृतां पुंसां क्रूराणां निर्दयात्मनाम् । कुतः सौख्यं भवेदत्र परलोके च पापिनाम् ॥४०॥ नहि मांसं तृणात्काष्ठादुपलाद्वापि जायते । हननादेव जन्तूनां जायतेऽत्राघमस्त्यतः ॥४१॥ स्वाहास्वधामृतभुजो देवाः सन्त्यार्जवप्रियाः । क्रव्यादा राक्षसा एव ततो मांसं विवर्जयेत् ॥४२॥

---

જે પુરુષ સો વર્ષ સુધી મહિને મહિને અશ્વમેધ યજ્ઞથી પૂજન કરે છે અને જે પુરુષ માંસભક્ષણનો ત્યાગ કરે છે તે બંને સમાન પુણ્યશાળી છે. આ પ્રમાણે ભીષ્મે યુધિષ્ઠિરને કહ્યું છે. (૨૮) જે પ્રથમ અજ્ઞાનથી માંસ ખાઈને પછી ભક્ષણમાં દોષ જાણ્યા પછી નિવૃત્તિ પામે છે તે પુરુષ પણ જો ફરીથી માંસ ખાતો નથી. તો માંસ ન ખાવાનું પુણ્ય પામે છે. (૨૯) જે વિદ્વાન પુરુષ હંમેશાં સમગ્ર પ્રાણીઓને અભય આપનારો થાય તે પ્રાણ આપનારો પુરુષ વિશ્વાસ યોગ્ય છે. કોઈનાથી પણ પરાભવ પામી શકે નહિ એવો નિશ્ચે થાય છે. (૩૦)

જેમ પોતાના પ્રાણો પ્રિય છે તેમ બીજાના પણ જાણવા. બધાં પ્રાણીઓને પણ મૃત્યુ સમાન બીજું કોઈ દુઃખ નથી. (૩૧) બ્રહ્મસ્વરૂપમાં નિષ્ઠાવાળા, ત્યાગીઓ-નિવૃત્તધર્મમાં નિષ્ઠાવાળા તેમજ ઋષિઓને પણ પોતાનો વધસમય પ્રાપ્ત થાય ત્યારે પ્રસન્નતા થતી નથી. (દેહથી ભિન્ન આત્મજ્ઞાનથી ભય થતો નથી. પરંતુ ચિત્તની પ્રસન્નતા થતી નથી.) (૩૨) માટે જ દેહાભિમાન રહિત મુનિઓનો વધ કરે તો ધર્મશાસ્ત્રમાં બ્રહ્મહત્યાદિથી પણ નિશ્ચે અધિક દોષ કહેલો છે. (૩૩)

તે પ્રકારે યજ્ઞભાગને ભોજન કરનારા સર્વ દેવોને પણ ક્યારેક દેવો અને અસુરોના સંગ્રામ વગેરેમાં વધકાળ પ્રાપ્ત થાય ત્યારે અતિશય ભય નિશ્ચે ઉત્પન્ન થાય છે. (૩૪) પોતાના વધસમયમાં દેવો નાસી જાય છે અને પૃથ્વીની ગુહાઓમાં ગુપ્તપણે નિવાસ કરતા થકા પ્રાણીના વધમાં પાપ જ છે એમ જાણે છે. (૩૫) તે પ્રકારે આ લોકમાં જે હિંસક મનુષ્યો છે તે પણ પોતાના વધ સમયમાં જ્યાં ત્યાં દોડતા સતા ત્રાસ પામે છે. (૩૬)

અતિક્રૂર પુરુષો હોય તે પણ પોતાના વધ સમયે દીનપણાને પામે છે, પ્રાણીહિંસાને વારંવાર નિન્દા કરે છે; અહિંસાની પ્રશંસા કરે છે. (૩૭) વિદ્વાન પુરુષોને પણ થનારાં પોતાના મૃત્યુની વાત સાંભળીને પણ અતિશય ભય અને હૃદયમાં કંપારો થાય છે. (૩૮) જ્યારે મૃત્યુની વાર્તાશ્રવણમાં પણ મહાભય થાય તો માંસાર્થી પાપીજનોએ બળાત્કારે હણાતા એવા રોગ રહિત જીવોને મોટો ભય કેમ ના થાય ? અર્થાત્ થાય જ. (૩૯)

આવું પ્રાણીવધકર્મ કરનારા ક્રૂર નિર્દય પાપીજનોને આ લોકમાં અને પરલોકમાં સુખ ક્યાંથી હોય ? ના જ હોય. (૪૦) હે કીચક ! માંસ ઘાસથી ઉત્પન્ન થતું નથી. કાષ્ટ તથા પાષાણથી પણ ઉત્પન્ન થતું નથી. પ્રાણીઓને મારવાથી માંસ ઉત્પન્ન થાય છે. માટે માંસભક્ષણમાં પાપ છે. (૪૧) દેવો 'સ્વાહા' શબ્દથી અપાયેલા અમૃત શબ્દવાચ્ય ઘૃતાદિ દ્રવ્યનું ભોજન કરનારા છે. પિતૃઓ 'સ્વધા' શબ્દથી અપાયેલા અમૃત શબ્દવાચ્ય જળાદિનું ભક્ષણ કરનારા છે. માંસભક્ષણ કરનારા તો રાક્ષસો જ છે માટે માંસનો ત્યાગ કરવો. (૪૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

अनुद्वेजयतो जीवान्न भयं क्वापि विद्यते । भूतद्रोग्धुस्त्विहामुत्र भयं नैव निवर्तते ॥४३॥ यद्यत्र खादको न स्यान्न तदा घातको भवेत् । न क्रेता नापि विक्रेता मांसस्यातो न भक्षयेत् ॥४४॥ धनेन क्रयिको हन्ति खादकश्चोपभोगतः । घातको वधबन्धाभ्यां मार्कण्डेयोऽब्रवीदिति ॥४५॥ आहर्ता चानुमन्ता च विशस्ता क्रयविक्रयी । संस्कर्ता चोपभोक्ता च खादकाः सर्व एव हि ॥४६॥ देहपुष्टिं विना कोऽपि गुणो नास्त्यामिषाशने । देहस्तु दुःखरूपोऽस्ति कृतघ्नः क्षणभङ्गुरः ॥४७॥ दोषास्तु बहवः सन्ति नृणामामिषभक्षणे । हिंसामाश्रित्य वर्तन्ते यतः पापानि सर्वशः ॥४८॥ नानाजन्मजरा-रोगमृत्युदुःखैर्निपीडिताः । संसारे परिवर्तन्ते ये जना जीवहिंसकाः ॥४९॥ कुम्भीपाकेषु पच्यन्ते ते चैवानेकयोनिगाः । नरकाधिकदुःखे च गर्भवासेऽपि चावशाः ॥५०॥ सूक्ष्मकीटवधेऽप्यस्ति दोष एव महान्नृणाम् । सन्ति प्राणाः प्रियतमाः सर्वेषामपि देहिनाम् ॥५१॥ आगच्छच्छकटारावभीतो धावन् जिजीविषुः । प्राणाः प्रेष्ठा ममेत्याह व्यासं कीटो यतः पुरा ॥५२॥ अभयं सर्वभूतेभ्यो यो ददाति दयापरः । स एव निर्भयो लोके इहामुत्राप्यसंशयम् ॥५३॥ नैनं व्यालमृगा घ्नन्ति न पिशाचा न राक्षसाः । मुच्यते भयकाले स मोक्षयेद्यो भयात्परान् ॥५४॥ मृत्युकाले महान् कम्पः पशूनामपि जायते । तस्मान्नरो दयां कुर्याद्यथात्मनि तथा परे ॥५५॥ मां स भक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम् । एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥५६॥ यज्ञार्थं पशवः सृष्टा इत्येवं श्रुतिशासनात् । यज्ञादन्यत्र ये घ्नन्ति पशूंस्ते राक्षसाः किल ॥५७॥

જીવોને ઉદ્‌વેગ નહિ કરનાર પુરુષને કોઈ પણ સ્થાનમાં ભય નથી. પ્રાણીનો દ્રોહ કરનારને આ લોકમાં અને પરલોકમાં ભય નિવૃત્ત પામતો નથી. (૪૩) આ લોકમાં જ્યારે માંસ ખાનારો ન હોય તો પ્રાણીને મારનારો તથા મરાવનારો પણ હોય નહિ. માંસને વેચાતું લેનારો હોય નહિ તો માંસને વેચનારો પણ હોય નહિ. માટે માંસ ખાવું નહિ. (૪૪) વેચનારો ધનથી (ધનપ્રાપ્તિ માટે) પ્રાણીનો ઘાત કરે છે; ખાનારો ઉપભોગથી ઘાત કરે છે. ઘાતક પોતે હણીને વેચે છે શસ્ત્રાદિથી મારવું અને બંધન વગેરેથી મારવું એ બેનાથી મારે છે. (ધનહેતુથી ઘાતક હણે છે માટે વેચનાર અને ખાનાર બંને પણ સમાન દોષ ભાગી થાય) આ પ્રમાણે માર્કણ્ડેય મુનિએ કહ્યું છે. (૪૫)

માંસ લાવનારો, અનુમતિ આપનારો, પોતે ઘાત કરનારો, વેચાતું લેનારો અને વેચાતું આપનાર, માંસ રાંધનારો, ખાનારો આ સાત પુરુષો પણ માંસ ભક્ષક છે જ. (૪૬) માંસ ભક્ષણમાં દેહની પુષ્ટિ વિના કોઈ બીજો ગુણ નથી. દેહતો દુઃખરૂપ છે. કૃતઘ્ની છે. ક્ષણમાત્રમાં વિનાશી છે. (૪૭)

માંસભક્ષણમાં ઘણા દોષો છે. કારણ કે સર્વ પાપો હિંસાનો આશ્રય કરીને રહે છે. (૪૮) જે માણસો જીવહિંસા કરનારા હોય તે નાના પ્રકારના જન્મ-જરા-રોગ-મૃત્યુઓનાં દુઃખોથી પીડા પામતા થકા સંસારમાં ભમે છે (૪૯) તે જીવહિંસક જનો કુંભીપાક નામનાં નરકોમાં રંધાય છે. ત્યાર પછી અનેક પશુ આદિક યોનિને પામેલા પરતંત્ર સતા નરકના કરતાં અધિક દુઃખવાળા ગર્ભવાસમાં પણ રંધાય છે. (૫૦)

મનુષ્યોને સૂક્ષ્મ કીડાઓના વધમાં પણ મહાન દોષ છે જ. જે માટે સર્વ દેહધારીઓને પણ પ્રાણો અત્યન્ત પ્રિય છે. (૫૧) માટે જ પૂર્વે પોતાની સમીપે આવતા ગાડાનો શબ્દ સાંભળીને ભય પામેલો ઉતાવળો ચાલતો જીવવાની ઈચ્છાવાળો કીડો ‘મારા પ્રાણો અતિપ્રિય છે’ આ પ્રમાણે વ્યાસને કહેતો હતો. આ કથા ભારતમાં દાનધર્મમાં પ્રસિદ્ધ છે. (૫૨)

દયાપરાયણ જે પુરુષ સર્વ ભૂતોને અભય આપે છે તે પુરુષ જ આ લોકમાં અને પરલોકમાં પણ ભયે રહિત છે. આ વિષયમાં સંશય નથી. (૫૩) જે પુરુષ અન્ય પ્રાણીને ભયથી મુકાવે છે એ પુરુષને સર્પો-મૃગલાંઓ-વ્યાઘ્ર વગેરે અરણ્યનાં પશુઓ મારતાં નથી. પિશાચો અને રાક્ષસો હણતા નથી. તે પુરુષ ભયની પ્રાપ્તિ થાય ત્યારે તે ભયથી મુકાય છે. (૫૪)

પશુઓને પણ મૃત્યુસમય પ્રાપ્ત થાય ત્યારે મોટો કંપારો થાય છે. માટે માણસ પોતાના દેહમાં જેમ તેમ અન્ય પ્રાણીઓ ઉપર દયા કરે. (૫૫) આ લોકમાં હું જેનું માંસ ભક્ષણ કરું છું પરલોકમાં ‘માં સ’ તે પ્રાણી મને ભક્ષણ કરશે. ધર્મબુદ્ધિવાળા મુનિઓ માંસ શબ્દનો આ અન્વર્થ કહે છે. (૫૬) પશુઓ યજ્ઞ માટે સર્જેલાં છે : આ પ્રકારે શ્રુતિનું શાસન છે. માટે યજ્ઞવિધિથી બીજા સ્થાનમાં જે પુરુષો પશુઓને હણે છે તે પુરુષો રાક્ષસો જ છે. (૫૭)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

यज्ञेषु पश्वालम्भोऽपि न साक्षाद्वेदसम्मतः । किन्त्वसात्त्विकवृत्तीनां रागाद्धिंसानिवृत्तये ॥५८॥ आदौ कृतयुगे धर्मः सत्यदानतपोजपः । आसीत्सत्त्वगुणोद्रेके सर्वेषां च हितावहः ॥५९॥ प्रवृत्तश्च ततो यज्ञो यत्र व्रीहिमयः पशुः । तेनायजन्त यज्वानः पुण्यलोकाभिकाङ्क्षिणः ॥६०॥ तमोऽनुविद्धे रजसि कालेनाथ समुच्छ्रिते । बुद्धिभेदोऽभवन्नृणां देवानां चाधिकारिणाम् ॥६१॥ हिंसालिङ्गांस्ततो मन्त्रानिन्द्रो विश्वजिदाह्वयः । स्वायम्भुवेऽन्तरे पूर्वं त्रेतायां समवर्तयत् ॥६२॥ आदौ यज्ञोऽपि तेनैव वाजिमेधाभिधो महान् । साक्षात्पश्वालम्भयुतः स्वयं कृत्वा प्रवर्तितः ॥६३॥ कथयामि कथामेतां यज्ञसम्बन्धिनीं च ते । प्रोक्ता वायुपुराणे या मात्स्ये स्कान्दे च भारते ॥६४॥ पुरा बभूव देवेन्द्र आद्ये स्वायम्भुवान्तरे । नाम्ना विश्वजिदित्युक्तो मन्त्रविद्याविशारदः ॥६५॥ त्रेतामुखे सोऽश्वमेधं यज्ञं प्रावर्तयत्प्रभुः । स्वनियम्यैर्देवगणैः सह सम्भृतसाधनः ॥६६॥ इन्द्रियाणामधिष्ठातॄन्देवान्देवास्त ईजिरे । तत्राश्वमेधे वितते समाजग्मुर्महर्षयः ॥६७॥ निषेदुस्ते सभामध्ये तत्र देवैः समर्चिताः । ददृशुर्यज्ञसम्भारानृषीन्देवान्समुत्सुकान् ॥६८॥ तत्राथ ददृशुर्बद्धान्दीनान्सङ्क्रोशतः पशून् । ततो विश्वजितं प्रोचुः सर्वेषां शृण्वतां च ते ॥६९॥ अधर्मो धर्मघाताय प्रारब्धः पशुभिस्त्वया । नायं धर्मो ह्यधर्मोऽयं न हिंसा धर्म उच्यते ॥७०॥ आगमेन भवान्सर्वं प्रकरोतु यदिच्छति । विधिदृष्टेन यज्ञेन धर्मेणावध्यसेतुना ॥७१॥ एवमुक्तः सुरेन्द्रस्तैर्ऋषिभिस्तत्त्वदर्शिभिः । नागृह्णाद्वचनं तेषां मानमोहसमन्वितः ॥७२॥ ते तु खिन्ना विवादेन तत्त्वयुक्ता महर्षयः । सन्धाय वाक्यमिन्द्रेण पप्रच्छुः खचरं वसुम् ॥७३। महाप्राज्ञ ! कथं दृष्टस्त्वया यज्ञविधिर्नृप ! । इति पृष्टो जगादैवं

---

યજ્ઞોમાં પણ પ્રત્યક્ષપણે પશુનું મારવું વેદસંમત (હજારો માતાથી પણ વત્સલતરા શ્રુતિ પ્રમાણિત) નથી જ. પરંતુ રાજસ અને તામસ સ્વભાવવાળા પુરુષોને રાગપ્રાપ્ત નિત્ય હિંસાની નિવૃત્તિ માટે જ છે. (૫૮) સત્ત્વગુણનો અતિશય જેમાં છે એવા પ્રથમ યુગમાં સમગ્ર જનોને હિત કરનારો, સત્ય-દાન-તપ અને જપ તે રહેલા છે જેમાં એવો ધર્મ હતો. (૫૯) સત્યયુગમાં, યજ્ઞમાં ચોખાના લોટનું પશુ (અજ) હતું તેવો યજ્ઞ પ્રવર્ત્યો હતો. સ્વર્ગલોકની ઈચ્છાવાળા વિધિથી યજ્ઞ કરનારા પુરુષો તેવા યજ્ઞથી યાગ કરતા હતા. (૬૦) પછી કાળે કરીને તમોગુણથી વ્યાપ્ત રજોગુણ વૃદ્ધિ પામ્યે સતે અધિકારવાળા મનુષ્યો અને દેવતાઓની બુદ્ધિમાં ભેદ થયો; અર્થાત્ અહિંસારૂપ સત્ત્વબુદ્ધિનો નાશ થયો. (૬૧) પછી પ્રથમ સ્વાયંભૂ મન્વંતરમાં, ત્રેતાયુગમાં વિશ્વજીત નામવાળા ઈન્દ્રે હિંસાના હેતુભૂત અર્થાંતરથી (કલ્પિત બીજા અર્થથી) હિંસાને જ્ઞાપન કરનારા મંત્રોની યોજના કરી. (૬૨) પ્રથમ પોતે ઈન્દ્રે જ સાક્ષાત્ પશુહિંસા યુક્ત અશ્વમેધ નામનો મહાયજ્ઞ પણ કરીને પ્રવર્તાવ્યો છે. (૬૩) હે કીચક ! યજ્ઞ સંબંધી આ કથા તમને કહું છું, જે કથા વાયુપુરાણમાં-મત્સ્યપુરાણમાં-સ્કંદપુરાણમાં અને ભારતમાં કહેલી છે. (૬૪)

પૂર્વે, પ્રથમ સ્વાયંભૂ મન્વંતરમાં નામથી વિશ્વજીત કહેલા છે એવા મંત્રવિદ્યામાં વિશારદ દેવેન્દ્ર થયા. (૬૫) પોતાની આજ્ઞામાં રહેનારા દેવગણોએ સહિત યજ્ઞનાં સાધનો જેમણે ભેગાં કર્યાં છે એવા સમર્થ વિશ્વજીત ઈન્દ્રે ત્રેતાયુગના આરંભમાં અશ્વમેધ યજ્ઞ પ્રવર્તાવ્યો. (૬૬) તે દેવો વૈરાજપુરુષની ઈન્દ્રિયોના અધિષ્ઠાતા દેવોને પૂજતા હતા. વિસ્તાર પામેલા અશ્વમેધ યજ્ઞમાં વૃદ્ધ વસિષ્ઠાદિ મુનિઓ ઈશ્વરેચ્છાથી આવ્યા. (૬૭) દેવોએ પૂજાયેલા તે મહર્ષિઓ યજ્ઞમાં સભા મધ્યે બેઠા. યજ્ઞની સામગ્રી (ઉપકરણો)ને તથા અતિ ઉત્સાહયુક્ત થકા યજ્ઞ કરાવનારા ઋષિઓને અને દેવોને જોતા હતા. (૬૮) પછી યજ્ઞમાં બાંધેલા દીન-દુઃખના શબ્દો ઉચ્ચારતા અજાદિ પશુઓને મહર્ષિઓએ જોયા. પછી સર્વ દેવતાઓ અને ઋષિઓને સાંભળતાં વિશ્વજીત ઈન્દ્રને કહ્યું : (૬૯) હે દેવેન્દ્ર ! તમોએ મારવા માટે લાવેલાં પશુઓથી સનાતન અહિંસાધર્મને હણવા માટે અધર્મ આરંભ્યો છે. જે માટે આ યજ્ઞમાં પશુ મારવારૂપ 'હિંસા' ધર્મ નથી. આ તો અધર્મ જ છે; કારણ કે 'હિંસા' ધર્મ કહેવાતો જ નથી. (૭૦) તમો જે કરવા ઈચ્છો છો તે બધું વેદે પ્રમાણ કરાયેલાં અહિંસાત્મક સત્શાસ્ત્રો દ્વારા વિધિએ સહિત બતાવેલા યજ્ઞથી અને મર્યાદાનું ઉલ્લંઘન નહિ કરાયેલાં ધર્મથી કરો. (૭૧) હે કીચક ! તત્ત્વદર્શી ઋષિઓએ આ પ્રમાણે કહેવાયેલાં છતાં માન અને મોહથી યુક્ત દેવેન્દ્રે મહર્ષિઓનું વચન ગ્રહણ કર્યું નહિ. (૭૨)

ઈન્દ્રની સાથે વિવાદ કરવાથી દીનપણાને પામેલા તત્ત્વજ્ઞાનવાળા મહર્ષિઓ તો ઈન્દ્રની સાથે વસુરાજા કહે તે સત્ય માનવું એવો ઠરાવ કરીને યદચ્છાથી ત્યાં આવેલા ઉપરિચર વસુ રાજાને પૂછતા હતા : (૭૩) હે મહાપ્રાજ્ઞ ! તમોએ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सोऽविचार्य बलाबलम् ॥७४॥ यष्टव्यं पशुभिर्मेध्यै रसौषधिफलैरपि । हिंसाप्रधानो वै यज्ञविधिर्दृष्टो हि वैदिकः ॥७५॥ इत्युक्तमात्रे स वसुः पपात धरणीतले । ऊर्ध्वचार्यपि भूचारी स एवंवचसाऽभवत् ॥७६॥ धर्माणां संशयच्छेत्ता राजा वसुरधोगतः । हिंसायाः कथनाद्यज्ञे देवानां पक्षपाततः ॥७७॥ ज्ञातुं शक्यो न वेदार्थो बुद्धिमद्भिरपि ध्रुवम् । तस्मादनिश्चयाद्वक्तुं धर्मः शक्यो न केनचित् ॥७८॥ अधिकारानुसारेण वेदो धर्मान्ब्रवीति यत् । बहुद्वारस्य धर्मस्य सूक्ष्मा दुरनुगा गतिः ॥७९। एवं विवादः सुमहानासीद्यज्ञप्रवर्तने । ऋषीणां देवतानां च पूर्वं स्वायम्भुवान्तरे ॥८०॥ ततस्ते ऋषयो दृष्ट्वा हृतं धर्मं बलेन तु । अवश्यंभाविनं दृष्ट्वा जग्मुः सर्वे यथागतम् ॥८१॥ गतेषु मुनिसङ्घेषु देवा यज्ञमकुर्वत । एवं रजस्तमोवृद्ध्या हिंसा यज्ञे प्रवर्तते ॥८२॥ यादृशं च युगं यत्र द्विजा यादृग्गुणास्तथा। तादृशं हि तदा शास्त्रं प्राधान्येन प्रवर्तते ॥८३॥ तस्मान्न हिंसा कार्येति यदुक्तमृषिभिर्वचः । प्रमाणवाक्यं तद्ध्येव गृहीतव्यं मुमुक्षुभिः ॥८४॥ अद्रोहश्चाप्यलोभश्च दमो भूतदया शमः । ब्रह्मचर्यं तपः सत्यमनुक्रोशः क्षमा धृतिः ॥८५॥ सनातनस्य धर्मस्य मूलमेतदितीरितम् । तस्मात्त्याज्यं सदा मांसमित्येषा परमा स्थितिः ॥८६॥ अहिंसादिः परो धर्मः प्राचीनो नाधुनातनः। असन्मतं ततस्त्यक्त्वा श्रीकृष्णाश्रयमाचर ॥८७॥ सुव्रत उवाच - इत्याश्रुत्य हरेर्वाचं कीचकोऽतीव विस्मितः । सर्वज्ञं तं प्रभुं मेने हृदि चासन्निजं मतम् ॥८८॥ मकारैर्यजनं देव्या अप्रमाणं तदा स तु । प्रतिपादयितुं नैव शशाक पुरतो हरेः ॥८९॥

---

યજ્ઞવિધિ કયા પ્રકારથી જોયેલો છે ? આ પ્રકારે પુછાયેલા વસુ રાજા શ્રુતિ વાક્યનો અહિંસાર્થ અને હિંસાર્થનું સમર્થપણું અસમર્થપણાનો નિશ્ચય કર્યા વગર આ પ્રમાણે બોલ્યા : (૭૪) હે મહર્ષિઓ ! પવિત્ર પશુઓથી યજ્ઞ કરવો તે યોગ્ય છે અને ઘૃતાદિ રસો અને વ્રીહિ વગેરે ઔષધિઓ અને નાળિયેર વગેરે ફળોથી પણ યજ્ઞ કરવો તે પણ યોગ્ય છે. જે માટે વેદમાં કહેલો યજ્ઞવિધિ હિંસા પ્રધાન જોયેલો છે. (૭૫)

આ પ્રમાણે કહેવા માત્રથી જ તે વસુ રાજા પૃથ્વી પર પડ્યો. આકાશમાં ફરનારો પણ તે વસુ આવા વચન માત્રથી પૃથ્વીમાં ફરનારો થયો. (૭૬) ધર્મોનો સંશય નાશ કરનાર વસુ રાજા ઈન્દ્રાદિના પક્ષપાતથી યજ્ઞમાં હિંસાના કહેવાથી આકાશથી અવની ઉપર આવ્યો. (૭૭)

જે માટે બુદ્ધિવાળાઓ પણ વેદાર્થ જાણવા માટે નિશ્ચે શક્તિમાન થયા નહિ. તે કારણથી કોઈ પુરુષે નિશ્ચય કરવા માટે અશક્ય હોવાથી ધર્મ કહેવા માટે શક્ય નથી. (૭૮) જે કારણથી વેદ અધિકાર પ્રમાણે ધર્મો કહે છે. તે હેતુથી ઘણા દ્વારવાળા ધર્મની ગતિ સૂક્ષ્મ છે માટે જ અતિ કઠિન છે. (૭૯) આ પ્રમાણે પહેલાં સ્વાયંભુવ મન્વંતરમાં ઋષિઓ અને દેવતાઓને યજ્ઞ પ્રવર્તનમાં = હિંસામય અને અહિંસામય યજ્ઞ નિમિત્તે અતિ મહાન વિવાદ થયો હતો. (૮૦)

પછી ઋષિઓએ સનાતન ધર્મને નષ્ટ બુદ્ધિવાળા દેવતાઓના બળથી હણાયેલો જોઈ અને અવશ્યંભાવિ અધર્મને જોઈને સર્વ મહર્ષિઓ જેમ આવ્યા હતા તેમ ગયા. (૮૧) મુનિઓના સંઘો ગયા ત્યાર પછી દેવો યજ્ઞ કરતા હતા : આ પ્રકારે રજોગુણ અને તમોગુણની વૃદ્ધિથી યજ્ઞમાં હિંસા પ્રવર્તે છે. (૮૨) જ્યારે જેવો યુગ તથા જેવા ગુણવાળા બ્રાહ્મણો હોય ત્યારે તે સમયે શાસ્ત્ર પણ તેવા પ્રકારનું મુખ્યપણે પ્રવર્તે છે. (૮૩) માટે હિંસા ના કરવી : આ પ્રમાણનું જે વચન ઋષિઓએ કહ્યું તે વચન જ પ્રમાણવાક્ય તરીકે નિશ્ચે ગ્રહણ કરવું જ. (૮૪)

અદ્રોહ, લોભે રહિતપણું, બાહ્યેન્દ્રિયના નિયમનરૂપી દમ, ભૂતદયા, અંતઃકરણના નિયમનરૂપ શમ, બ્રહ્મચર્ય, તપ, સત્ય, અક્રૂરપણું, ક્ષમા, ધૃતિ આ સનાતન ધર્મના મૂળ; આ અદ્રોહાદિ, અગિયાર પ્રકારનાં કહેલાં છે. માટે માંસ હંમેશાં ત્યાજ્ય છે : આ સર્વોત્તમ મર્યાદા છે. (૮૫-૮૬) અહિંસાદિ (અદ્રોહ વગેરે) પ્રાચીન સર્વોત્તમ ધર્મ છે. પરંતુ તમોએ કહ્યું તેમ આધુનિક (હાલ થયેલો) તો નથી જ. માટે અસત્ મતનો ત્યાગ કરી શ્રીકૃષ્ણનો આશ્રય કરો. (૮૭)

**સુવ્રત મુનિ કહે છે** : હે રાજન્ ! આ પ્રકારે શ્રીહરિનું વચન સાંભળી અતિ વિસ્મય પામેલો કીચક પોતાના હૃદયમાં શ્રીહરિને પરમેશ્વર માનવા લાગ્યો અને પોતાનો મત અસત્શાસ્ત્રીય હોવાથી અસત્ય માનવા લાગ્યો. (૮૮) તે સમયે કીચક તો સત્શાસ્ત્ર પ્રમાણ રહિત દેવીનું પૂર્વોક્ત પંચ મકારોથી પૂજન શ્રીહરિની આગળ પ્રતિપાદન કરવા માટે શક્તિમાન થયો નહિ. (૮૯) કીચક માન અને મદે રહિત અધર્મથી અત્યંત ભય પામીને લગારેક પોતાના માનની રક્ષા માટે શ્રીહરિને

निर्मानो निर्मदो भूत्वा भीतश्चाधर्मतो भृशम् । किञ्चित्स्वमानरक्षार्थं तं प्रणम्याब्रवीद्वचः ॥९०॥ नारायणमुने ! सत्यं त्वया यत्प्रोच्यते वचः । प्रातरानीय मद्ग्रन्थान्दर्शयिष्ये पुरातनान् ॥९१॥ किञ्चित्कार्यं साम्प्रतं मे भवतीति व्रजाम्यहम् । इत्युक्त्वा स ययौ शीघ्रं सह शिष्यादिभिस्ततः ॥९२॥ प्रावृत्य वासवा वक्त्रं म्लानं भीतः सवेपथुः । सोऽगाद्गेहं यथा सर्पो वैनतेयमुखच्युतः ॥९३॥ गतेऽथ तस्मिन्भगवान्स्वाश्रितैः सह तत्क्षणम् । सस्नौ तडागे वितते तत्संसर्गाघनुत्तये ॥९४॥ पुनः सभां समभ्येत्य प्रभुः प्राह निजाश्रितान् । देव्याः पूजा मया नैव भक्ता ! वादेऽत्र खण्डिता ॥९५॥ किन्त्वधर्मो हि तत्रस्थो मया सम्यङ्निषूदितः। नैवावज्ञा ततः कार्या देव्या धर्मावनस्थितेः ॥९६॥ सभायां विदुषो विप्रान् सद्वाक्यैरिति रञ्जयन् । धर्मस्यैवावनं चक्रे ह्रियमाणस्य दुर्जनैः ॥९७॥ प्रमाणवाक्यैः प्रबलैः शाक्तमार्गस्थितं महत् । मकारपञ्चकाख्यं स पापमेवमनीनशत् ॥९८॥ गन्धपुष्पघृतक्षीरैर्देव्याः सम्यक्प्रपूजनम् । बलिं च माषवटकैः स्थापयामास स प्रभुः ॥९९॥ एवं सद्धर्ममर्यादां तस्य स्थापयतो हरेः । मोक्षदैकादशी तत्र प्रत्यपद्यत भूमिप ! ॥१००॥ कारयामास तस्यां च कृष्णार्चनमहोत्सवम् । ग्रामान्तरेभ्य आजग्मुर्जनास्तत्र सहस्रशः ॥१०१॥ दर्भावत्यागता भक्ताः स्वपुरागमनाय तम् । प्रार्थयन्नुत्सवस्यान्ते विष्णुगुप्तादयो मुहुः ॥१०२॥ तेभ्यः प्रसन्नो भगवांस्तदैव सह तैस्ततः । निर्ययौ तत्पुरं गन्तुमारूढो जविनं हयम् ॥१०३॥ जयतल्पपुरस्थभक्तवृन्दं स निवर्त्यानुगतं वृतोऽश्ववारैः । पथि चावसथेषु भक्तिभाजां निवसन्सर्षिगणः पुरं तदायत् ॥१०४॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे जयतल्पपुरे क्षुद्रशाक्तमतखण्डनेऽहिंसाधर्मस्थापन-वादिपराजयनिरूपणनामा सप्तचत्वारिंशोऽध्यायः ॥४७॥

---

પ્રણામ કરી વચન બોલ્યો : (૯૦) હે નારાયણ મુને ! તમોએ જે કહ્યું તે સત્ય છે. પરંતુ મારા જૂના ગ્રંથો સવારે લાવીને બતાવીશ. (૯૧) હાલમાં તો મારે કંઈ કામ છે માટે હું જઉં છું. હે રાજન્ ! કીચક આ પ્રમાણે કહીને શિષ્યોની સાથે સભાથી તત્કાળ ગયો. (૯૨) તેજ વિનાના મુખને વસ્ત્રથી ઢાંકીને ભય પામેલો કાંપતો કીચક દેવ-ઈચ્છાથી ગરુડના મુખથી મુકાયેલો સર્પ જ જેમ તેમ પોતાના ભવનમાં ગયો. (૯૩)

કીચક ગયા પછી શ્રીહરિએ સમગ્ર પોતાના આશ્રિતોની સાથે કીચકના સંસર્ગનું જે પાપ તેના નિવારણ માટે અતિ વિશાળ સરોવરમાં તત્કાળ સ્નાન કર્યું. (૯૪)

શ્રીહરિ ફરી સભામાં આવી પોતાના આશ્રિત જનોને કહેવા લાગ્યા : હે ભક્તો ! આ વાદમાં મેં દેવીની પૂજાનું ખંડન કર્યું નથી. (૯૫) પરંતુ મેં તેમાં રહેલો દેવીપૂજામાં શાક્તોએ સ્થાપન કરેલો અધર્મ ખંડન કર્યો છે. માટે અસુરોનો વિનાશ કરવા અને ધર્મનું રક્ષણ કરવા માટે સ્થિતિ જેમની છે એવી દેવીનું અપમાન કરવું નહિ : (૯૬) આ પ્રમાણે સભામાં પંડિત બ્રાહ્મણોને સત્શાસ્ત્રોનાં પ્રમાણ- વાક્યોથી પ્રસન્ન કરતા શ્રીહરિએ દુર્જનોનાં વાક્યોથી નાશ પામતા ધર્મનું રક્ષણ જ કર્યું.(૯૭) શ્રીહરિએ શાક્તમાર્ગમાં રહેલ મકારપંચક નામનું મહાપાપ; આ પ્રમાણે ખંડન ન થઈ શકે તેવાં (પ્રબળ) પ્રમાણવાક્યોથી નાશ કર્યું. (૯૮) શ્રીહરિએ ચંદન, પુષ્પો, ઘી, દૂધથી દેવીનું વિધિ પ્રમાણે પૂજન અને અડદનાં વડાંથી બલિદાનનું સ્થાપન કર્યું. (૯૯)

હે રાજન્, આ પ્રમાણે સદ્ધર્મની મર્યાદાનું સ્થાપન કરતા શ્રીહરિને મોક્ષદા એકાદશી તિથિ જેતલપુરમાં પ્રાપ્ત થઈ. (૧૦૦) શ્રીહરિએ મોક્ષદા એકાદશીને દિવસે કૃષ્ણના પૂજનનો મહોત્સવ કરાવ્યો, તે મહોત્સવમાં હજારો માણસો બીજાં ગામોથી આવ્યા. (૧૦૧) ડભાણપુરથી આવેલા વિષ્ણુગુપ્તાદિ ભક્તો ઉત્સવનાં અંતમાં દ્વાદશીને દિવસે ભગવાનની પૂજા અને પારણાં આદિના અંતે શ્રીહરિને પોતાના પુરમાં આવવા માટે વારંવાર પ્રાર્થના કરતા હતા. (૧૦૨) તે ભક્તો ઉપર પ્રસન્ન થયેલા ભગવાન શ્રીહરિ તે જ વખતે મહાવેગવાળા ઘોડા ઉપર બેસીને વિષ્ણુગુપ્તાદિ ભક્તોની સાથે ડભાણપુરમાં જવા માટે જેતલપુરથી નીકળ્યા. (૧૦૩)

અસવારોથી વીંટાયેલા મુનિમંડળે સહિત શ્રીહરિ પછવાડે આવતા જેતલપુરના હરિભક્તોને પાછા વાળીને માર્ગમાં પોતાના ભક્તજનોનાં નિવાસસ્થાનોમાં નિવાસ કરતા દર્ભાવતીનગરીમાં આવ્યા. (૧૦૪) *ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે જયતલ્પપુરે શાક્તમતખંડનેઽહિંસાધર્મસ્થાપન-વાદિપરાજય-નિરૂપણનામા સપ્તચત્વારિંશોઽધ્યાયઃ (૪૭)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच - **प्रत्युद्ययुस्तमायान्तं ज्ञात्वा पौरजना नृप ! । गीतैर्वादित्रघोषैश्च नादयन्तो दिशो दश ॥१॥ अश्ववारैः परिवृतं चञ्चत्कुन्तकरैरथ । आयान्तं तं हरिं दूराद्दृष्ट्वाऽधावन्सहस्रशः ॥२॥ ततस्तं प्राप्य झटिति प्रणेमुर्दण्डवज्जनाः । आनन्दाश्रूणि मुञ्चन्तो हृष्टाः पुलकिततत्वचः ॥३॥ भगवानपि तान्भक्तान्मानयित्वा यथोचितम् । तैः स्तूयमानसत्कीर्तिः पुरमभ्याययौ ततः ॥४॥ स्वदर्शनार्थं जनतासम्मर्दः स्यान्महानिति । पुराद्बहिर्वटाधस्तात्स स्वावासमकारयत् ॥५॥ ततो मुनीन्पार्षदांश्च नानादेशागताञ्जनान् । योषितश्च यथायोग्यं भगवान्समवासयत् ॥६॥ निजानानन्दयन्भक्तान्धर्ममार्गं प्रवर्तयन् । उवास तत्र स हरिः पुपूजुस्तं च ते जनाः ॥७॥ केसरागुरुकस्तूरीमिश्रैः कुङ्कुमचन्दनैः । सुगन्धिभिः पुष्पहारैः सद्वस्त्रैश्च विभूषणैः ॥८॥ उपहारान् बहुविधान्निवेद्य पुरवासिनः । चक्रुर्नीराजनं भक्त्या कुर्वन्तो गुणकीर्तनम् ॥९॥ आतिथ्यं समुनेस्तस्य चक्रुः पौरा यथोचितम् । पुमांसश्च स्त्रियो भक्ताः परिचर्यामकुर्वत ॥१०॥ पौराणिको मयारामो गोविन्दश्च कुबेरजित् । निर्भयो भ्रातृरामश्च हरिकृष्णादयो द्विजाः ॥११॥ रघुनाथदासयुग्मं विष्णुगुप्तश्च राजजित् । प्रयागदासप्रमुखा विशः पर्यचरंश्च तम् ॥१२॥ अबला शर्करा दत्ता शिवाद्या योषितस्तथा । परिचर्यारता आसन् दृढभक्त्य आदरात् ॥१३॥ अथ तत्रागतैर्विप्रैर्विद्वद्भिः स सहस्रशः । भगवान्कारयामास विष्णुयागमहोत्सवम् ॥१४॥ कुण्डं च मण्डपं विप्रास्तत्र कृत्वा यथाविधि । दशांशहोमं कृत्वा च चक्रुः पूर्णाहुतिं ततः ॥१५॥ महद्भिरेव सम्भारैर्यज्ञ आसीत्स उत्तमः । यत्र हव्यैः सुराः सर्वे तुतुषुः पायसादिभिः ॥१६॥**

---

## અધ્યાય : ૪૮

### શ્રીભક્તિધર્મના પુત્ર શ્રીહરિએ ડભાણપુરમાં વિષ્ણુયાગ મહોત્સવ કર્યો તે કહ્યો છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! દર્ભાવતી પુરનાં નિવાસીજનો પોતાના પુરમાં આવતા શ્રીહરિને જાણી ગીતો અને વાજિંત્રના ઘોષોથી દશેય દિશાઓને શબ્દાયમાન કરતા સામા ગયા. (૧)

પછી સૂર્યનાં કિરણોથી ચળકતા ભાલાઓ જેમના હાથમાં છે એવા ઘોડેસવારોથી વીંટાયેલા આવતા શ્રીહરિને જોઈ હજારો માણસો દોડતા હતા. (૨)

પછી ભક્તજનો શ્રીહરિને તત્કાળ પામીને આનંદનાં આંસુઓ મૂકતા પ્રસન્ન થયેલા રોમાંચિત ગાત્રવાળા થકા દંડવત્ પ્રણામ કરતા હતા. (૩) પછી ભગવાન પણ તે ભક્તોને યથાયોગ્ય માન આપી ભક્તોએ સ્તુતિ કરાયેલી છે સત્કીર્તિ જેમની એવા શ્રીહરિ પુરમાં આવ્યા. (૪)

શ્રીહરિએ પોતાના દર્શન માટે જનસમુદાયનો ઘણો ભીડો થશે એમ જાણી પુરથી બહાર પશ્ચિમ દિશામાં પુરની નજીકમાં વડની નીચે પોતાનો નિવાસ કરાવ્યો. (૫) પછી ભગવાન શ્રીહરિકૃષ્ણ મુનિઓ, પાર્ષદો તથા અનેક દેશથી આવેલા ભક્તો અને સ્ત્રીઓને યથાયોગ્ય નિવાસ કરાવતા હતા. (૬) શ્રીહરિ પોતાના ભક્તોને આનંદ પમાડતા ધર્મમાર્ગમાં પ્રવર્તાવતા સતા દર્ભાવતી નગરીમાં નિવાસ કરતા હતા. તે ભક્તજનો શ્રીહરિનું પૂજન કરતા હતા. (૭) કેસર, અગરુચંદન અને કસ્તૂરીથી મિશ્રિત કુમકુમ ચંદન, સુગંધીમાન પુષ્પના હારો અને સુંદર વસ્ત્રો અને વિવિધ પ્રકારનાં અલંકારોથી શ્રીહરિનું પૂજન કરતા હતા. (૮) પુરવાસી ભક્તો ઘણા પ્રકારની ભેટ-સામગ્રીઓ શ્રીહરિની આગળ ધરીને શ્રીહરિના ગુણગાન કરતા સતા ભક્તિથી આરતી કરતા હતા. (૯) પુરવાસી ભક્તો અને સ્ત્રીઓ મુનિમંડળે સહિત શ્રીહરિનો યથાયોગ્ય આતિથ્યસત્કાર અને સેવા કરતા હતા. (૧૦) પુરાણના વક્તા મયારામ ભટ્ટ-ગોવિંદ-કુબેરજી-નરભેરામ-ભાઈરામ-હરિકૃષ્ણ વગેરે બ્રાહ્મણો શ્રીહરિની સેવા કરતા હતા. (૧૧) બે રઘુનાથ નામના વૈશ્યો-વિષ્ણુગુપ્ત-રાજજીત-પ્રયાગદાસ વગેરે વૈશ્યો શ્રીહરિની સેવા કરતા હતા. (૧૨) અબળા - શર્કરા-દત્તા તથા શિવા વગેરે દૃઢ ભક્તિવાળી સ્ત્રીઓ આદરપૂર્વક શ્રીહરિની સેવા પરાયણ હતી. (૧૩)

પછી ભગવાન શ્રીહરિ ડભાણમાં પોતાના દર્શન માટે આવેલા ઘણા પંડિત બ્રાહ્મણો દ્વારા વિષ્ણુયાગનો મહોત્સવ કરાવતા હતા. (૧૪) તે વિષ્ણુયાગમાં પ્રાણગોવિંદ વગેરે વૈદિક બ્રાહ્મણો શાસ્ત્રવિધિ પ્રમાણે કુંડ અને મંડપ કરી અને દશાંશ હોમ કરી પછી પૂર્ણાહુતિ કરતા હતા. (૧૫) વિષ્ણુયાગ ઘણી સામગ્રીઓથી અત્યુત્તમ જ થયો, જે વિષ્ણુયાગમાં સર્વ દેવતાઓ, દૂધપાક વગેરે સર્વોત્તમ અન્નાદિ હુત દ્રવ્યોથી સંતોષ પામ્યા. (૧૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

प्रचुराज्यसितैर्भोज्यैर्दक्षिणाभिश्च वाडवाः । यत्र सन्तुतुषुः सर्वे ये चान्येऽन्नार्थिनोऽपि ते ॥१७॥ पक्वान्नानां लड्डुकानां सितानां घनसर्पिषा । बभूवु राशयो यत्र गण्डशैलनिभा नृप ! ॥१८॥ दीयतां दीयतामेतद्भुज्यतां भुज्यतामिति । आसीत्सुतुमुलो घोषो विप्राणां यत्र सर्वतः ॥१९॥ तेभ्यश्च दक्षिणाः प्रादाद्विद्वद्भ्यस्तु विशेषतः । पात्रापात्रविचारज्ञो भगवान्स यथोचितम् ॥२०॥ कन्यादानान्यनेकानि कारयामास च प्रभुः । तथा द्विजकुमाराणां मौञ्जीबन्धान् यथाविधि ॥२१॥ रङ्केभ्यः पापभीरुभ्यो दुर्बलेभ्यश्च भूरिशः । धनं स दापयामास दरिद्रेभ्यश्च सर्ववित् ॥२२॥ याचकेभ्यो ह्यलङ्कारान् स्वर्णशृङ्खलकादिकान् । ददौ च सहसा प्रीतो वस्त्राणि विविधानि च ॥२३॥ भूमिदानं च गोदानमश्वदानं तथैव च । महादानानि सर्वाणि कारयामास सोऽच्युतः ॥२४॥ यथा यज्ञो महानासीद्दर्भावत्यां हरेस्तथा । न भूमौ भूपतेः कोऽपि दृश्यते श्रूयतेऽपि वा ॥२५॥ संवत्सरे विक्रमाख्ये वर्तमाने महामखम् । एतं समापयत् पौष्यां भुवि विस्मापयन्नृपान् ॥२६॥ अत्रैव साक्षाद्भगवत्समीक्षां गुरुः शतानन्दमुनिर्ममाऽऽपत् । संस्थापयामास निजान्तिके तं प्रीत्या हरिश्च क्षितिप ! स्वभक्तम् ॥२७॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे दर्भावतीपुरे विष्णुयागमहोत्सवनिरूपणनामाऽष्टचत्वारिंशोऽध्यायः ॥४८॥

सुव्रत उवाच - **एवं महाविष्णुमखं समाप्य स तोषयित्वाऽखिलभूसुरांश्च । महासभायां हरिरुच्चपीठमध्यारुहत्स्वैः परिपूज्यमानः ॥१॥**

---

હે રાજન્ ! જે યજ્ઞમાં સર્વ બ્રાહ્મણો ઘણું ઘી અને સાકર જેમાં છે એવાં જમવાનાં અન્નોથી અને દક્ષિણાઓથી સંતોષ પામ્યા અને બીજા અન્નાર્થીઓ પણ સંતોષ પામ્યા. (૧૭) હે રાજન્, જે યજ્ઞમાં પકવાનો-ઘારી, જલેબી અને ભાત વગેરે અને ઘણા ઘાટા ઘીથી ધોળા લાડુઓના નાના પર્વતોના સમાન ઢગલાઓ હતા. (૧૮) જે યજ્ઞમાં મોદક વગેરે આપો-આપો, જમો-જમો આ પ્રકારનો બ્રાહ્મણોનો મોટો ધ્વનિ ચોતરફ થતો હતો. (૧૯)

પાત્ર અને અપાત્રના વિચારને જાણનાર ભગવાન શ્રીહરિ તે બ્રાહ્મણોને યથાયોગ્ય દક્ષિણા આપતા હતા. પંડિત બ્રાહ્મણોને તો વિશેષપણે દક્ષિણાઓ આપતા હતા. (૨૦) શ્રીહરિ ઘણાં કન્યાદાનો તથા બ્રાહ્મણ બાળકોને યજ્ઞોપવીત સંસ્કાર શાસ્ત્ર વિધિ પ્રમાણે કરાવતા હતા. (૨૧)

સર્વજ્ઞ શ્રીહરિ ઘણા દીનજનો, પાપકર્મથી ભયવાળા-દુર્બળ જનો અને દરિદ્રજનોને દ્રવ્ય અપાવતા હતા. (૨૨) યાચકોની ઉપર એકદમ પ્રસન્ન થયેલા શ્રીહરિ સોનાનાં સાંકળાં વગેરે અલંકારો અને વિવિધ પ્રકારનાં વસ્ત્રો આપતા હતા. (૨૩)

અચ્યુત શ્રીહરિ ભૂમિદાન-ગોદાન-અશ્વદાન અને સર્વ મહાદાનો કરાવતા હતા. (૨૪) દર્ભાવતીમાં શ્રીહરિનો જેવો મહાન યજ્ઞ થયો તેવો પૃથ્વીમાં રાજાનો કોઈ પણ યજ્ઞ જોયેલો નથી અને સાંભળ્યો પણ નથી. (૨૫) વિક્રમ નામના સંવત્સરમાં વર્તતા સંવત્ ૧૮૬૬ના પોષ સુદી પૂર્ણિમાને દિવસે પૃથ્વીમાં રાજાઓને વિસ્મય પમાડતા શ્રીહરિ આ મહાયજ્ઞની સમાપ્તિ કરાવતા હતા. (૨૬)

હે રાજન્ ! મારા ગુરુ શતાનંદ મુનિ આ વિષ્ણુયાગના મહોત્સવમાં સાક્ષાત્ ભગવાનનાં દર્શન પામ્યા. શ્રીહરિએ પોતાના એકાંતિક ભક્ત શતાનંદ મુનિને પોતાની સમીપે અત્યંત પ્રસન્નતાપૂર્વક રાખ્યા. (૨૭)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે દર્ભાવતીપુરે વિષ્ણુયાગમહોત્સવ-નિરૂપણનામાઽષ્ટચત્વારિંશોઽધ્યાયઃ (૪૮)*

## અધ્યાય : ૪૯

### ડભાણપુરમાં શ્રીહરિએ સભામાં બ્રાહ્મણોનું અતિશય માહાત્મ્ય સ્પષ્ટપણે કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! શ્રીહરિ આ પ્રકારે મહાવિષ્ણુયજ્ઞ સમાપ્ત કરી અને યજ્ઞમાં આવેલા સમગ્ર બ્રાહ્મણોને સંતોષ પમાડી પોતાના ભક્તોએ પૂજેલા મહાસભામાં ઊંચા સિંહાસનમાં બેઠા. (૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

मर्यादया तत्र च सन्निविष्टान्भक्तानशेषान् पुरुषांश्च योषाः । विलोक्य वाचाऽमृतमिष्टया तानानन्दयन्नित्थमसौ जगाद ॥२॥ श्रीनारायणमुनिरुवाच - भक्ताः ! शृणुत कस्यापि प्रष्टव्यं यदि किञ्चन । भवेत्तर्हि स मामद्य सुखेन परिपृच्छतु ॥३॥ सुव्रत उवाच - नमस्कृत्याथ तं भक्त्या सभायां तत्र संस्थितः । सूरः पप्रच्छ नृपतिर्नागटङ्कपुराधिपः ॥४॥ सूर उवाच - श्रोतुमिच्छामि भगवन्निहामुत्र सुखावहम् । राज्ञः किं सर्वकृत्येषु श्रेष्ठं तद्वक्तुमर्हसि ॥५॥ सुव्रत उवाच - इति तेन स सम्पृष्टो निजभक्तेन भूमिप ! । ब्रह्मण्यदेवो भगवान् जगादानन्दयन्सदः ॥६॥ श्रीनारायणमुनिरुवाच - यथा पृच्छसि मां तद्वद्भीष्मं पप्रच्छ धर्मराट् । भारते दानधर्मेषु श्रुत्वा राज्ञः शिबेः कथाम् ॥७॥ तमुवाच महातेजा यत्स शन्तनुनन्दनः । भीष्मो धर्मभृतां श्रेष्ठस्तदहं कथयामि ते ॥८॥ भीष्म उवाच - एतद्राज्ञः कृत्यतममभिषिक्तस्य भारत ! । ब्राह्मणानामनुष्ठानमत्यन्तं सुखमिच्छतः ॥९॥ कर्तव्यं पार्थिवेनेह तद्विद्धि भरतर्षभ ! । श्रोत्रियान्ब्राह्मणान्वृद्धान्नित्यमेवाभिपूजयेत् ॥१०॥ पौरान् जानपदांश्चापि ब्राह्मणांस्तु बहुश्रुतान् । सान्त्वेन भोगदानेन नमस्कारैस्तथार्चयेत् ॥११॥ एतत्कृत्यतमं राज्ञो नित्यमेवोपलक्षयेत् । यथात्मानं यथा पुत्रांस्तथैतान्प्रतिपालयेत् ॥१२॥ ये चाप्येषां पूज्यतमास्तान् दृढं प्रतिपूजयेत् । तेषु शान्तेषु तद्राष्ट्रं सर्वमेव विराजते ॥१३॥ ते पूज्यास्ते नमस्कार्या मान्यास्ते पितरो यथा । तेष्वेव यात्रा लोकानां भूतानामिव वासवे ॥१४॥ अदैवं दैवतं कुर्युर्दैवतं चाप्यदैवतम् । यमिच्छेद्यः स राजा स्याद्यो नेष्टः स पराभवेत् ॥१५॥ परिवादांश्च ये

શ્રીહરિ મહાસભામાં મર્યાદાથી બેઠેલા સમગ્ર ભક્તો અને ભક્ત સ્ત્રીઓને જોઈ અમૃતની માફક મિષ્ટ વાણીથી સમગ્ર ભક્તોને આનંદ પમાડતા બોલ્યા : (૨) **શ્રીનારાયણમુનિ કહે છે** : હે ભક્તો ! મારું વચન સાંભળો. જ્યારે જે કોઈ પણ આવેલા માણસને કંઈ પણ પૂછવું હોય તો તે માણસ હાલમાં જ મને સુખેથી પૂછો. (૩)

**સુવ્રત મુનિ કહે છે** : હે રાજન્ ! પછી તે સભામાં બેઠેલા નાગડકાના સુરસિંહ રાજા શ્રીહરિને ભક્તિપૂર્વક નમસ્કાર કરી પૂછતા હતા : (૪) **સુરસિંહ રાજા કહે છે** : હે ભગવન્ ! આ લોકમાં અને પરલોકમાં સુખ પમાડનારું સર્વ કાર્યોમાં શ્રેષ્ઠ શું કાર્ય કરવું ? તે સાંભળવા ઈચ્છું છું. તમો મને કહેવા માટે યોગ્ય છો. (૫) હે રાજન્ ! આ પ્રકારે પોતાના ભક્ત સુરસિંહ રાજાએ પૂછેલા બ્રાહ્મણોને દેવની માફક માનનારા શ્રીહરિ સભાના જનોને આનંદ આપતાં બોલ્યા : (૬)

**શ્રી નારાયણ મુનિ બોલ્યા** : હે સુરસિંહ ! જે પ્રકારે તમે મને પૂછો છો તેની માફક ભારતના દાનધર્મમાં ધર્મરાજા (યુધિષ્ઠિર) શિબિ રાજાની કથા સાંભળી ભીષ્મને પૂછતા હતા. (૭) મહાપ્રતાપી ધર્મ ધારણ કરવામાં શ્રેષ્ઠ શંતનુનંદન ભીષ્મે યુધિષ્ઠિરને જે કહ્યું તે હું તમોને કહું છું. (૮)

**ભીષ્મ પિતામહે યુધિષ્ઠિરને કહેલું બ્રાહ્મણોનું માહાત્મ્ય :-** ભીષ્મ કહે છે : હે ભારત ! અત્યંત સુખ ઈચ્છતા-રાજ્યનો અભિષેક પામેલા રાજાને બ્રાહ્મણોનું સેવન અતિશયપણે કરવા યોગ્ય છે. (૯) હે ભરતર્ષભ ! આ લોકમાં રાજાએ બ્રાહ્મણોની સેવા કરવી : આ પ્રમાણે તમો જાણો. શ્રોત્રિય અને તપ-જ્ઞાનાદિથી શ્રેષ્ઠ બ્રાહ્મણોની રાજા હંમેશા પૂજા કરે. (૧૦)

ઘણાં શાસ્ત્રોનું અધ્યયન કરનાર; પોતાના પુરના નિવાસી અને પોતાના દેશના નિવાસી બ્રાહ્મણોને પણ પ્રિય ભાષણથી તથા તેમની પ્રસન્નતાપૂર્વક અન્નવસ્ત્રાદિ આપવાથી તથા નમસ્કારાદિથી રાજા સત્કાર કરે. (૧૧) દરરોજ પૂર્વે કહેલું અતિશ્રેષ્ઠ કાર્ય જ રાજાને (આ રાજા છે એમ) જણાવે છે. વળી રાજા જેમ પોતાનું પાલન કરે છે, જેમ પોતાના પુત્રોનું પાલન કરે છે તે પ્રમાણે બ્રાહ્મણોનું પરિપાલન કરે. (૧૨)

એ બ્રાહ્મણોમાં જે બ્રાહ્મણો શાસ્ત્ર અધ્યયન-તપ-જ્ઞાનાદિ ગુણોથી અતિશય પૂજા કરવા યોગ્ય હોય તેઓને અતિશય પૂજે. તેઓ શાંત (અન્નવસ્ત્રાદિથી સુખી) થયે સતે સર્વ તેનું રાજ્ય વિશેષપણે શોભે છે. (૧૩) પોતાનાં માતાપિતા જ જેમ તેમ તે બ્રાહ્મણો પૂજ્ય છે, માન કરવા યોગ્ય છે. જેમ ભૂત પ્રાણી માત્રની જીવિકા ઈન્દ્રમાં છે તેમ લોકોનું સુખી જીવન બ્રાહ્મણોમાં છે. બ્રાહ્મણો સુખી હોય તો લોકો સુખી થાય. (૧૪)

સંતોષ પામેલા બ્રાહ્મણો દેવત્વ રહિત પુરુષને દેવભાવ યુક્ત કરે છે. અસંતુષ્ટ બ્રાહ્મણો દૈવતવાળાને દેવત્વ રહિત કરે છે. (આ બંને પ્રકારથી નહૂષ રાજાની માફક જાણવું.) જે બ્રાહ્મણ જેને રાજા કરવા ઈચ્છે તે રાજા થાય. બ્રાહ્મણો રાજા કરવા ઈચ્છે નહિ તે પરાભવ પામે અર્થાત્ રાજા થાય નહિ. (આ બંને પ્રકારે વેન રાજાની માફક જાણવું.) (૧૫) હે રાજન્ !



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

कुर्युर्ब्राह्मणानामचेतसः । सत्यं ब्रवीमि ते राजन् ! विनश्येयुर्न संशयः ॥१६॥ ब्राह्मणा यं प्रशंसन्ति पुरुषः स प्रवर्धते । ब्राह्मणैर्यः पराक्रुष्टः पराभूयात् क्षणाद्धि सः ॥१७॥ परिवादो द्विजातीनां न श्रोतव्यः कथञ्चन । आसीताधोमुखस्तूष्णीं समुत्थाय व्रजेच्च वा ॥१८॥ न स जातो जनिष्यन् वा पृथिव्यामिह कश्चन । यो ब्राह्मणविरोधेन सुखं जीवितुमुत्सहेत् ॥१९॥ एते भोगैरलङ्कारैरन्यैश्चैव किमिच्छकैः । सदा पूज्या नमस्कारै रक्ष्याश्च पितृवन्नृपैः ॥२०॥ ब्राह्मणं जातिसम्पन्नं धर्मज्ञं संशितव्रतम् । वासयेत गृहे राजन्न तस्मात्परमस्ति वै ॥२१॥ ब्राह्मणेभ्यो हविर्दत्तं प्रतिगृह्णन्ति देवताः । पितरः सर्वभूतानां नैतेभ्यो विद्यते परम् ॥२२॥ आदित्यश्चन्द्रमा वायुरापो भूरम्बरं दिशः । सर्वे ब्राह्मणमाविश्य सहान्नमुपयुञ्जते ॥२३॥ न तस्याश्नन्ति पितरो यस्य विप्रा न भुञ्जते । देवाश्चाप्यस्य नाश्नन्ति पापस्य ब्राह्मणद्विषः ॥२४॥ ब्राह्मणेषु तु तुष्टेषु प्रीयन्ते पितरः सदा । तथैव देवता राजन्नात्र कार्या विचारणा ॥२५॥ ये ब्राह्मणमुखात्प्राप्तं प्रतिगृह्णन्ति वै वचः । भूमिपाला महात्मानस्ते न यान्ति पराभवम् ॥२६॥ क्षत्रियाणां प्रतपतां तेजसा च बलेन च । ब्राह्मणेष्वेव शाम्यन्ति तेजांसि च बलानि च ॥२७॥ जन्मनैव महाभागो ब्राह्मणो नाम जायते । नमस्यः सर्वभूतानामतिथिः प्रश्रृताग्रभुक् ॥२८॥ ब्राह्मणानां परिभवादसुराः सलिलेशयाः । ब्राह्मणानां प्रसादाच्च देवाः स्वर्गनिवासिनः ॥२९॥ न ब्राह्मणविरोधेन शक्या शास्तुं वसुन्धरा । ब्राह्मणा हि महात्मानो देवानामपि देवताः ॥३०॥ तान् पूजयस्व सततं दानेन परिचर्यया । यदीच्छसि महीं भोक्तुमिमां सागरमेखलाम् ॥३१॥

જે અજ્ઞાની રાજાઓ બ્રાહ્મણોની નિંદા કરે તે રાજાઓ નાશ પામે છે : આ પ્રમાણે સત્ય કહું છું, તેમાં સંશય નથી. (૧૬)

બ્રાહ્મણો જેની પ્રશંસા કરે છે તે પુરુષ વૃદ્ધિ પામે છે. બ્રાહ્મણો જેની નિન્દા કરે છે તે ક્ષણ માત્રમાં પરાભવ પામે. (૧૭) દ્વિજાતિની નિન્દા કોઈ પણ પ્રકારે સાંભળવી નહિ. નીચું મુખ રાખી મૌન બેસવું અથવા ઊભા થઈ ચાલી નીકળવું. (૧૮) જે પુરુષ વિપ્રોની સાથે દ્વેષનું આચરણ કરી સુખપૂર્વક જીવવા ઈચ્છે તે પુરુષ આ પૃથ્વીમાં કોઈ પણ ઉત્પન્ન થયો નથી અને થશે પણ નહિ. (૧૯)

રાજાઓએ આવા પ્રતાપી બ્રાહ્મણો અન્ન-વસ્ત્રાદિ અલંકારો અને અન્ય તેમને ઈચ્છિત વસ્તુઓ અને નમસ્કારોથી સદા પિતાની માફક પૂજવા અને રક્ષણ કરવા. (૨૦) હે રાજન્ ! સત્કુળમાં ઉત્પન્ન-ધર્મ જાણનાર- તીક્ષ્ણ વ્રતધારી બ્રાહ્મણને પોતાના ગૃહમાં વૃત્તિ આપીને નિવાસ કરાવે. તેવા બ્રાહ્મણથી કોઈ પણ શ્રેષ્ઠ નથી જ. (૨૧)

બ્રાહ્મણને આપેલું હવિષ્યાન્ન દેવતાઓ ગ્રહણ કરે છે અને સર્વ પ્રાણીઓના પિતૃગણો પણ પ્રતિગ્રહ કરે છે. માટે બ્રાહ્મણોથી શ્રેષ્ઠ પ્રાણી કોઈ નથી. (૨૨) સૂર્ય, ચંદ્રમા, વાયુ, જળ, પૃથ્વી, આકાશ, દિશાઓ (દિશાના અભિમાની દેવતાઓ) એ સર્વે બ્રાહ્મણમાં પ્રવેશ કરી બ્રાહ્મણની સાથે અન્ન ખાય છે. (૨૩) બ્રાહ્મણોનો દ્વેષ કરનાર માટે જ પાપ રૂપ જે પુરુષનું બ્રાહ્મણો અન્ન ખાતા નથી. દેવો પણ આ પુરુષનું અન્ન ખાતા નથી. (૨૪)

હે રાજન્ ! બ્રાહ્મણો સંતોષ પામે તો પિતૃઓ હંમેશાં પ્રસન્ન થાય છે તેવી રીતે દેવતાઓ પણ પ્રસન્ન થાય છે. આ અર્થમાં સંશય કરવો નહિ. (૨૫) અતિ ઉદાર મતિવાળા જે રાજાઓ બ્રાહ્મણોએ પોતાના હિત માટે સંભળાવેલું વચન કર્તવ્યપણે ગ્રહણ કરે છે તે રાજાઓ પરાભવ પામતા નથી. (૨૬) તેજ અને બળથી પ્રભાવવાળા ક્ષત્રિયોનાં તેજ અને બળ બ્રાહ્મણોમાં જ શાંત થાય છે. (૨૭)

બ્રાહ્મણ બ્રાહ્મણના ગૃહમાં જન્મ થવા માત્રથી જ મહાભાગ (ભાગ્યશાળી પણે પ્રસિદ્ધ) થાય છે. સમગ્રજનોને નમસ્કાર કરવા યોગ્ય થાય છે. રાંધેલા અન્નનો અગ્રભોક્તા અર્થાત્ પ્રથમ જમાડવા યોગ્ય અતિથિ થાય છે. (૨૮) અસુરો બ્રાહ્મણોનો પરાભવ (દ્રોહાચરણ) કરવાથી સમીપમાં જળવાળા પાતાળમાં રહેનારા થયા છે અને બ્રાહ્મણોના અનુગ્રહથી દેવો સ્વર્ગમાં નિવાસ કરનારા થયા છે. (૨૯) બ્રાહ્મણના વિરોધથી (રાજાઓએ પણ) વસુંધરા શાસન કરવી શક્ય નથી. મહાનુભાવ બ્રાહ્મણો દેવોના પણ દેવતા છે. અર્થાત્ દેવોએ પણ દેવવત્ પૂજ્ય છે. (૩૦) હે રાજન્, તમે જો સમુદ્રપર્યંત આ પૃથ્વી પાલન કરવા ઈચ્છતાં હો, તો બ્રાહ્મણોને દાન અને સેવાથી નિરંતર પૂજા કરો. (૩૧)

श्रीनारायणमुनिरुवाच - **इत्थं भीष्मो धर्मराजं गरीयो नृपकर्म तु । विप्रसन्मानमेवाह स च राजा तथाऽकरोत् ॥३२॥ श्रीकृष्णो द्वारिकायां च विमोच्य सरटं नृगम् । अशिक्षयत् प्रजाः सूर ! तद्वचांस्यपि मच्छृणु ॥३३॥** श्रीकृष्ण उवाच - **दुर्जरं बत ब्रह्मस्वं भुक्तमग्नेर्मनागपि । तेजीयसोऽपि किमुत राज्ञामीश्वरमानिनाम् ॥३४॥ नाहं हालाहलं मन्ये विषं यस्य प्रतिक्रिया । ब्रह्मस्वं हि विषं प्रोक्तं नास्य प्रतिविधिर्भुवि ॥३५॥ हिनस्ति विषमत्तारं वह्निरद्भिः प्रशाम्यति । कुलं समूलं दहति ब्रह्मस्वारणिपावकः ॥३६॥ ब्रह्मस्वं दुरनुज्ञातं भुक्तं हन्ति त्रिपूरुषम् । प्रसह्य तु बलाद्भुक्तं दश पूर्वान् दशापरान् ॥३७॥ राजानो राजलक्ष्म्यान्धा नात्मपातं प्रचक्षते । निरयं येऽभिमन्यन्ते ब्रह्मस्वं साधु बालिशाः ॥३८॥ गृह्णन्ति यावतः पांसून् क्रन्दतामश्रुबिन्दवः । विप्राणां हृतवृत्तीनां वदान्यानां कुटुम्बिनाम् ॥३९॥ राजानो राजकुल्याश्च तावतोऽब्दान्निरङ्कुशाः । कुम्भीपाकेषु पच्यन्ते ब्रह्मदायापहारिणः ॥४०॥ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेच्च यः । षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः ॥४१॥ न मे ब्रह्मधनं भूयाद्यद्गृध्वाऽल्पायुषो नराः । पराजिताश्च्युता राज्याद्भवन्त्युद्वेजिनोऽहयः ॥४२॥ विप्रं कृतागसमपि नैव द्रुह्यत मामकाः ! । घ्नन्तं बहु शपन्तं वा नमस्कुरुत नित्यशः ॥४३॥ यथाहं प्रणमे विप्राननुकालं समाहितः । तथा नमत यूयं च योऽन्यथा मे स दण्डभाक् ॥४४॥ ब्राह्मणार्थो ह्यपहृतो हर्तारं पातयत्यधः । अजानन्तमपि ह्येनं नृगं ब्राह्मणगौरिव ॥४५॥**

**શ્રીનારાયણ મુનિ કહે છે :** હે સુરસિંહ રાજા ! આ પ્રમાણે ભીષ્મે યુધિષ્ઠિરને વિપ્રનું સન્માન જ અતિશ્રેષ્ઠ રાજકાર્ય કહ્યું છે અને તે રાજા પણ તે પ્રમાણે જ રાજ કરતા હતા (૩૨) હે સુરનૃપતે ! શ્રીકૃષ્ણ દ્વારિકામાં કાંચીડાની યોનિને પામેલા નૃગ રાજાને મુકાવીને પ્રજાજનોને પોતાના પુત્રની માફક શિક્ષણ આપતા હતા. તે વચનો મારાથી સાંભળો. (૩૩)

**શ્રીકૃષ્ણ બોલ્યા -** ખેદની વાત છે કે બ્રાહ્મણનું ધન લગાર ભોગવેલું હોય તો પણ, અગ્નિ સમાન તેજસ્વી હોય તેને પણ દુર્જર અર્થાત્ પચી ન શકે તેવું (દુઃખદાયક) છે, તો પોતાને ઈશ્વરના અભિમાનવાળા રાજાઓને ન પચી શકે તેમાં કહેવું જ શું ? (૩૪) હું ઝેરને ઝેર માનતો નથી. શાથી ? જે ઝેરને નિવારણ કરવાનો ઉપાય છે. બ્રાહ્મણના ધનને ઝેર કહેલું છે. પૃથ્વીમાં આ વિષને નિવારણ કરવાનો ઉપાય જ નથી. (૩૫)

વળી ઝેર ખાનારને નાશ કરે છે, બીજાને નહિ; બ્રાહ્મણનું ધનરૂપી ઝેર તો કુળને નાશ કરે છે. અગ્નિ જળથી શાંત થાય છે, બ્રાહ્મણના ધનરૂપી અરણિથી ઉત્પન્ન થયેલો અગ્નિ તો મૂળ સહિત ગોત્રને નાશ કરે છે. (૩૬) યથાર્થ નહિ જાણેલું બ્રાહ્મણનું ધન ભોગવાયેલું હોય તો ત્રણ પુરુષ સુધીના કુળને નાશ કરે છે, (પોતે-પોતાનો પુત્ર અને તેનો પુત્ર.) બળાત્કારથી ભોગવેલું દશ પૂર્વના પુરુષો અને દશ થનારા પુરુષો અને પોતે એમ એકવીશ પુરુષોને નાશ કરે છે. (૩૭) રાજલક્ષ્મીના મદથી આંધળા રાજાઓ બ્રાહ્મણના ધનને સારુ (ભોગ્ય હોય તેમ જાણી) ઇચ્છે છે તે નરકને જ ઇચ્છે છે, કારણ કે અજ્ઞાની છે. મારા આત્માનો નરકપાત થયો તેમ જોતા નથી, કારણકે આંધળા છે. (૩૮)

વૃત્તિ હણાયેલા, માટે જ રડતા, દાન સ્વભાવવાળા, કુટુંબી બ્રાહ્મણોનાં અશ્રુબિંદુઓ જેટલી સંખ્યાવાળા રજઃકણોને પલાળે છે; તે અંકુશ વિનાના-માટે જ બ્રાહ્મણના ધનને હરનારા-રાજાઓ અને રાજાના કુળમાં ઉત્પન્ન થનારા બીજાઓ તેટલા વર્ષ સુધી કુંભીપાકમાં રંધાય છે. (૩૯-૪૦)

રાજાએ પોતે આપેલી તથા બીજાએ આપેલી બ્રાહ્મણની વૃત્તિને લઈ લે તે પુરુષ સાઠ હજાર વર્ષ સુધી વિષ્ઠામાં કીડો થાય છે. (૪૧) માટે મને બ્રાહ્મણના ધનને ગ્રહણ કરવાની ઈચ્છા ના થાઓ. બ્રાહ્મણધનને ઈચ્છીને મનુષ્યો અલ્પાયુષ્યવાળા થાય છે. શત્રુઓથી પરાભવ પામેલા થાય છે. રાજ્યથી ભ્રષ્ટપણાને પામે છે. પોતાના દર્શનમાત્રથી બીજાને ઉદ્વેગ કરનારા સર્પો થાય છે. (૪૨)

હે મારી પ્રજાઓ ! અપરાધ કરનાર બ્રાહ્મણનો દ્રોહ ના કરો, માર મારતા અથવા ઘણા શાપ આપતા બ્રાહ્મણને હંમેશાં નમસ્કાર કરો. (૪૩) હું સાવધાન થઈ જેમ સમય પ્રમાણે બ્રાહ્મણોને નમસ્કાર કરું છું તે પ્રમાણે તમો પણ નમસ્કાર કરો. જે કોઈ મારો (પ્રજાજન) હોવા છતાં જો એમ ના કરે તો તે મારા દંડને ભજનારો છે. (૪૪) બ્રાહ્મણનું ધન હરેલું હોય તે હરનારને નરકમાં પાડે છે. કોની માફક તો અજાણ્યે પણ નૃગરાજાને બ્રાહ્મણની ગાયે જેમ કાંચીડાની યોનિરૂપી નરકમાં પાડ્યો હતો તેમ નરકમાં પાડે. (૪૫)

श्रीनारायणमुनिरुवाच - **एवं कृष्णेन नृपते ! शिक्षिता द्वारिकौकसः । तस्याज्ञायामवर्तन्त ततः प्रापुः सुखं महत् ॥४६॥ अतस्त्वया नृपैश्चान्यैः क्षत्रियैश्च मदाश्रितैः । जनैश्च ब्राह्मणा मान्याः पूजनीया विशेषतः ॥४७॥ दुर्वेदा वा सुवेदा वा प्राकृताः संस्कृतास्तथा । ब्राह्मणा नावमन्तव्या भस्मच्छन्ना इवाग्नयः ॥४८॥ यथा श्मशाने दीप्तौजाः पावको नैव दुष्यति। एवं विद्वानविद्वान्वा ब्राह्मणो दैवतं महत् ॥४९॥ प्रचुराज्यसितोपेतैर्भक्ष्यैर्भोज्यैश्च तत्प्रियैः । तोषणीया दक्षिणाभिर्ब्राह्मणा भगवत्प्रियाः ॥५०॥ तुष्टेषु ब्राह्मणेष्वेव सन्तुष्टः कमलापतिः । भवतीति मया प्रोक्तं कर्तव्यं श्रेष्ठमेव ते ॥५१॥** सुव्रत उवाच - **इति श्रुत्वा भगवता प्रोक्तं सूरः स भूपतिः । भक्ताश्चान्येऽपि तं नत्वा तस्याज्ञां शिरसा दधुः ॥५२॥ एवमानन्दयन्भक्तान्प्रत्यहं भगवान्स तु । उवास नृपते ! मासं गौर्जरैर्बहुधार्चितः ॥५३॥ तत्र देशान्तरायाता भक्तास्तं प्रार्थयन्भृशम् । स्वस्वग्रामागमायाथ तथेत्याह स चापि तान् ॥५४॥ सुखयितुमथो नैकग्रामस्थितान् स्वसमाश्रितान्सह मुनिगणैर्दर्भावत्या हरिर्नृप ! निर्ययौ । स्वमनु च यतो दूरं भक्तान्निवार्य पुरौकसो नयनसलिलानायाद्देशं चरोत्तरसंज्ञकम् ॥५५॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे दर्भावतीपुरे महायज्ञमहोत्सवे ब्राह्मणमाहात्म्य-निरूपणनामैकोनपञ्चाशत्तमोऽध्यायः ॥४९॥

सुव्रत उवाच - **तत्र भक्ताः प्रतिग्रामं तस्याऽऽसंश्च नराः स्त्रियः । सर्वांस्तान् सुखयामास तत्तद्ग्रामगतः स च ॥१॥ ततो महीं समुत्तीर्य देशे कान्हमनामनि । भक्तग्रामेषु निवसन्भृगुक्षेत्रमवाप सः ॥२॥**

---

**શ્રીનારાયણમુનિ કહે છે :** હે સુરસિંહ રાજન્ ! આ પ્રમાણે શ્રીકૃષ્ણે શિક્ષણ આપેલી દ્વારિકાની પ્રજાઓ શ્રીકૃષ્ણની આજ્ઞામાં વર્તતી હતી. માટે મોટા સુખને પામી છે. (૪૬) માટે તમોએ તથા મારા આશ્રિત બીજા રાજાઓ તથા ક્ષત્રિયોએ અને બીજા લોકોએ પણ બ્રાહ્મણો વિશેષપણે માનવા અને પૂજવા. (૪૭)

વેદ ભણેલા ના હોય અથવા સારી રીતે ભણેલા હોય, તે પ્રકારે પ્રાકૃત ગ્રંથો અથવા સંસ્કૃત ગ્રંથો જાણતા હોય અથવા ના જાણતા હોય; એવા બ્રાહ્મણોનું ભસ્મથી ઢંકાયેલા અગ્નિની માફક અપમાન કરવું નહિ. (૪૮) જેમ સ્મશાનમાં રહેલો પણ જ્વાળાવાળો અગ્નિ દાહ શક્તિથી રહિત થતો નથી એવી રીતે વિદ્વાન અથવા અવિદ્વાન બ્રાહ્મણ મહાદૈવતવાળો-દેવની માફક પૂજ્ય છે. (૪૯) ભગવાનને પ્રિય બ્રાહ્મણોને ઘણાં ઘી અને સાકરથી યુક્ત, બ્રાહ્મણને પ્રિય ભક્ષ્ય અને ભોજ્ય વગેરે અન્નથી અને દક્ષિણાઓથી સંતોષિત કરવા. (૫૦) બ્રાહ્મણો સંતોષ પામ્યે સતે કમલાપતિ શ્રીકૃષ્ણ સંતુષ્ટ થાય છે. આ પ્રકારે મેં રાજાએ કરવા યોગ્ય શ્રેષ્ઠ કાર્ય તમોને કહ્યું. (૫૧)

**સુવ્રતમુનિ કહે છે :** હે રાજન્ ! આ પ્રમાણે શ્રીહરિએ કહેલું વચન સાંભળીને સુરસિંહ રાજા અને બીજા ભક્તજનો પણ શ્રીહરિને નમસ્કાર કરી શ્રીહરિની આજ્ઞા મસ્તકથી ધારણ કરતા હતા. (૫૨) હે નૃપતે ! શ્રીહરિ આવી રીતે દરરોજ ભક્તોને આનંદ આપતા, ગુજરાતના ભક્તજનોએ ઘણા પ્રકારે પૂજેલા એક માસ સુધી ડભાણપુરમાં નિવાસ કરતા હતા. (૫૩) પછી ડભાણપુરમાં દેશાંતરથી આવેલા ભક્તો પોતપોતાનાં ગામોમાં આવવા માટે શ્રીહરિને અત્યંત પ્રાર્થના કરતા હતા. અને શ્રીહરિ પણ તે ભક્તોને હું તમારા ગામમાં આવીશ એમ કહેતા હતા. (૫૪)

હે રાજન્ ! શ્રીહરિ અનેક ગામોમાં રહેલા પોતાના આશ્રિત ભક્તોને સુખી કરવા માટે મુનિસંઘોની સાથે દર્ભાવતીથી નીકળ્યા. પોતાની પાછળ આવતા શ્રીહરિના વિયોગજન્ય પીડાથી નેત્રોમાં આંસુવાળા દર્ભાવતી નિવાસી ભક્તજનોને પાછા વાળી ચરોત્તર સંજ્ઞાવાળા દેશમાં આવ્યા. (૫૫) *ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે દર્ભાવતીપુરે મહાયજ્ઞમહોત્સવે બ્રાહ્મણમાહાત્મ્યનિરૂપણનામૈકોનપંચાશત્તમોઽધ્યાયઃ (૪૯)*

## અધ્યાય : ૫૦

**શ્રીહરિનું સુરત શહેરમાં આગમન અને પુરવાસીજનોને શ્રીહરિના દર્શન-પૂજનનો મહોત્સવ કહ્યો છે.**

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! ચરોતર દેશમાં ગામોગામ શ્રીહરિના ભક્તો અને સ્ત્રીઓ હતાં. શ્રીહરિએ તે તે ભક્તોના ગામમાં જઈને પોતાના સમગ્ર ભક્તોને પોતાના દર્શન વગેરેથી સુખી કર્યાં. (૧) પછી શ્રીહરિ મહી નદી ઊતરીને કાનમ નામના દેશમાં નિવાસ કરતા ભરૂચ શહેરમાં આવ્યા. (૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

एकं द्वे वा दिने स्वामी दिनार्धं वापि कुत्रचित् । पक्षार्धं पक्षमेकं वा न्यवसत्कुत्रचिच्च सः ॥३॥ तत्रतत्र वसन् ग्रामे सद्धर्मं समतिष्ठिपत् । सच्छास्त्रानुसृतैर्वाक्यैरुच्चखान च तद्रिपुम् ॥४॥ कुत्रचित्तु महारुद्रं विष्णुयागं क्वचिन्नृप ! । पुरश्चर्यां च गायत्र्याः श्रीसूक्तस्य च कुत्रचित् ॥५॥ विष्णुनामसहस्रस्य श्रीनारायणवर्मणः । क्वचिच्च हरिगीतायाः पुरश्चर्यामकारयत् ॥६॥ वेदपारायणं क्वापि कुत्रचिच्छतरुद्रियम् । श्रीमद्भागवतस्याथ पुरश्चर्यामचीकरत् ॥७॥ दशमस्कन्धमात्रस्य पुरश्चर्यां च कुत्रचित् । स वासुदेवमाहात्म्यस्यापि क्वापि त्वकारयत् ॥८॥ धर्मप्रवृत्त्यै विचरन् धरायामुत्तीर्य रेवां तपतीप्रतीरे । उपागमत्सूरपुरं स राजन्स्वभक्तसम्प्रार्थित आत्मतन्त्रः ॥९॥ आयान्तमाश्रुत्य हरिं तदैव प्रत्युद्ययुर्भक्तजनाः सहर्षम् । वादित्रगीतध्वनिनादिताशा यानैर्विचित्रैः सह दर्शनीयैः ॥१०॥ आदीश्वराख्यो नृपतेरमात्यो भ्रात्रा समं पीलुसमाह्वयेन । विचित्रवाद्यैः सह राजकीयैरभ्याययौ त्यक्ततदन्यकार्यः ॥११॥ अन्येऽपि तं शास्त्रविदो द्विजेन्द्रा अभ्याययू राजसमाश्रयाश्च। पुरोपकण्ठागतमेव तं ते दृष्ट्वा प्रणेमुः सहसैव सर्वे ॥१२॥ तान्मानयित्वाथ यथोचितं स्वान् हयाधिरूढः सह तैः पुरं तत् । स प्राविशद्भूपतिवच्च पौरैर्जनैः सचित्रं परिवन्द्यमानः ॥१३॥ विशालायां वाटिकायां सौधे महति शोभने । भक्तास्तं वासयामासुर्यथार्हं तस्य चानुगान् ॥१४॥ आतिथ्यं विदधुस्तस्य सर्वे तेऽथादरेण च । अम्बाराममुखा विप्राश्चक्रुस्तत्सेवनं मुदा ॥१५॥

---

સકળ ઐશ્વર્ય સંપન્ન શ્રીહરિ કોઈ ગામમાં એક દિવસ-કોઈ ગામમાં બે દિવસ- કોઈ ઠેકાણે અર્ધો દિવસ-કોઈ ગામમાં આઠ દિવસ અથવા પંદર દિવસ રહેતા હતા. (૩)

તે તે ગામમાં શ્રીહરિ સત્શાસ્ત્રોને અનુસરનારા વચનરૂપી અમૃતોથી ભાગવત ધર્મનું સ્થાપન કરતા હતા. અને સદ્ધર્મના શત્રુરૂપ અધર્મને મૂળમાંથી ઉખેડી નાખતા હતા. (૪)

હે રાજન્ ! શ્રીહરિ કોઈ ગામમાં મહારુદ્ર - કોઈ ગામમાં વિષ્ણુયાગ - કોઈ ગામમાં ગાયત્રીનું પુરશ્ચરણ અને કોઈ ગામમાં શ્રી સૂકતનું પુરશ્ચરણ કરાવતા હતા. (૫) શ્રીહરિ કોઈ ગામમાં વિષ્ણુનામ સહસ્ર સ્તોત્રનું પુરશ્ચરણ - કોઈ ગામમાં શ્રી નારાયણ કવચનું પુરશ્ચરણ અને કોઈ ગામમાં શ્રીમદ્ ભગવદ્ગીતાનું પુરશ્ચરણ કરાવતા હતા. (૬) શ્રીહરિ કોઈ ગામમાં વેદપારાયણ, કોઈ ગામમાં શતરુદ્રી કરાવતા હતા. કોઈ ગામમાં શ્રીમદ્ ભાગવતનું પુરશ્ચરણ કરાવતા હતા. (૭) શ્રીહરિ કોઈ ગામમાં કેવળ દશમ સ્કંધનું પુરશ્ચરણ કરાવતા હતા. કોઈ ગામમાં તો વાસુદેવ માહાત્મ્યનું પુરશ્ચરણ કરાવતા હતા. (૮)

હે રાજન્ ! ધર્મની પ્રવૃત્તિ માટે પૃથ્વીમાં વિચરણ કરતા સ્વતંત્ર શ્રીહરિ પોતાના ભક્તજનોએ પોતાના સુરત શહેરમાં આવવા માટે પ્રાર્થના કરાયેલા નર્મદા નદી ઊતરી તાપી નદીને સામે કાંઠે સૂર્યનગર (સુરત) માં સંવત્ ૧૮૬૬ ના વૈશાખ સુદી બીજને દિવસે આવ્યા. (૯) સુરતના નિવાસી શ્રીહરિના ભક્તો પોતાના પુરમાં આવતા શ્રીહરિને સાંભળી તત્કાળ જ હર્ષપૂર્વક વાજિંત્રો તથા કીર્તનોના ધ્વનિઓથી શબ્દાયમાન કરી છે દિશાઓ જેમણે એવા અનેક વિવિધ વર્ણવાળા દર્શનીય - રથાદિ વાહનોની સાથે સામા ગયા (૧૦)

સુરતના અધિપતિ ઈન્દ્રસેન રાજાના અર્દેશર નામના અમાત્ય, બીજાં કાર્યો ત્યાગ કરી શ્રીહરિની સેવા પરાયણ થઈને પીલુ નામના પોતાના ભાઈની સાથે રાજાએ મોકલેલા સેનાએ સહિત રાજપુરુષો અને વિવિધ વાજિંત્રોએ સહિત શ્રીહરિની સન્મુખ ગયા. (૧૧) શાસ્ત્રજ્ઞ-રાજ્યના આશ્રયવાળા ઉત્તમ બ્રાહ્મણો તથા બીજા પણ બ્રાહ્મણો શ્રીહરિની સન્મુખ ગયા. પૂર્વે કહેલા સર્વેજનો પુરની સમીપમાં આવેલા શ્રીહરિને જોઈને જ એકદમ સાષ્ટાંગ પ્રણામ કરવા લાગ્યા. (૧૨)

પછી શ્રીહરિ પૂર્વે કહેલા પોતાની સન્મુખ આવેલા જનોનો યથાયોગ્ય સત્કાર કરી ઘોડા ઉપર બેસી પુરવાસી જનોએ આશ્ચર્યપૂર્વક નમસ્કાર કરાયેલા રાજા હોયને શું ? એમ સન્મુખ આવેલા જનોએ સહિત સુરત શહેરમાં પ્રવેશ કરતા હતા. (૧૩) ભક્તોએ વિશાળ વાડીમાં અત્યંત શોભાયુક્ત મોટા મહેલમાં શ્રીહરિનો નિવાસ કરાવ્યો. તેમજ તેમના અનુયાયી જનોને પણ યથાયોગ્ય નિવાસ કરાવ્યો. (૧૪) પછી તે સર્વે ભક્તો શ્રીહરિનો આતિથ્યસત્કાર સ્નેહપૂર્વક કરતા હતા. અંબારામ આદિ બ્રાહ્મણો હર્ષે સહિત શ્રીહરિની સેવા કરતા હતા. (૧૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**भालचन्द्रो गिरिधरो गोविन्दो यादवस्तथा । भिक्षाहारी मौक्तिकश्च लक्ष्मीचन्द्रो नरोत्तमः ॥१६॥ भगवत्प्रमुखाश्चान्ये विशस्तत्सेवने रताः । आसन्सफलयन्तः स्वं मानुषं जन्म भूपते ! ॥१७॥ महालक्ष्मीश्च जीवन्ती लाडुर्देव्यादयश्च तम् । नार्यः पर्यचरन् प्रीत्या भक्तिमत्यः पतिव्रताः ॥१८॥ हैमैर्विभूषणैर्वस्त्रैर्विविधैश्छत्रचामरैः । गन्धमाल्यादिभिर्भक्ताश्चक्रुस्ते पूजनं हरेः ॥१९॥ भक्ष्यैर्भोज्यैश्च पक्वान्नैर्विविधैर्व्यञ्जनैस्तथा । हरिं सपरिवारं ते तर्पयामासुरादरात् ॥२०॥ द्वितीयेऽ ह्यक्षयाख्यायां तृतीयायां हरिश्च तैः । अकारयत् पर्शुरामसमर्चनमहोत्सवम् ॥२१॥ तत्रत्य इन्द्रसेनाख्यो गवेन्द्रस्थापितो नृपः । सन्मानेनातिमहता मुनिभिः सहितं हरिम् ॥२२॥ प्रेषयित्वा वाहनानि दुर्गमानीय चात्मनः । चकार महतीं पूजां नूत्नवासोधनादिभिः ॥२३॥ भक्ता भगवतोऽमात्या राज्ञ आदीश्वरादयः । अपि पृथक् पृथक् स्वं स्वं गृहं निन्युस्तमादरात् ॥२४॥ प्रीत्या तेऽपि महापूजां चक्रुस्तस्य सबान्धवाः । अनर्घ्यवासोलङ्कारनानाद्रव्यार्पणादिभिः ॥२५॥ नारायणद्वेषिणो ये तत्रत्या वैष्णवादयः । ते तु तस्य प्रतापेन किञ्चित्कर्तुं न शेकिरे ॥२६॥ भगवांस्तत्र सद्धर्मं स्थापयन् पुरवासिनाम् । जहाराज्ञानतिमिरं वचोभिर्धर्मसंश्रयैः ॥२७॥ अमूल्यान्यपि वासांसि भूषणानि च सर्वशः । ब्राह्मणेभ्यो ददौ प्रीत्या धनं च विपुलं प्रभुः ॥२८॥ यत्रयत्र च हरेर्नराकृतिब्रह्मणोऽर्चनमभूद्धरातले । तत्र तत्र सकलाग्रजन्मनां दुर्विधत्वमगमद्विलीनताम् ॥२९॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे सूर्यपुरागमननिरूपणनामा पञ्चाशत्तमोऽध्यायः ॥५०॥

---

ભાલચંદ્ર - ગિરધર - ગોવિંદ - જાદવ - ભિખારીદાસ - મોતીલાલ -લક્ષ્મીચંદ અને નરોત્તમ તથા હે રાજન્ ! ભગવાન નામના ભક્ત મુખ્ય જેમાં છે એવા વૈશ્ય જાતિના હરિભક્તો પોતાના મનુષ્ય જન્મની સફળતા કરતા થકા શ્રીહરિની સેવામાં તત્પર થયા. (૧૬-૧૭) મહાલક્ષ્મી-જીવી-લાડુ અને દેવી વગેરે ભક્તિવાળી પતિવ્રતા સ્ત્રીઓ સ્નેહથી શ્રીહરિની સેવા કરતી હતી. (૧૮)

તે અંબારામ વગેરે ભક્તોએ સુવર્ણનાં વિભૂષણો અને વિવિધ પ્રકારનાં વસ્ત્રો-છત્ર ચામરથી અને ચંદન-પુષ્પના હારો આદિક જેમાં છે એવા મહા આરતી વગેરેથી શ્રી સહજાનંદ સ્વામીનું પૂજન કર્યું. (૧૯) તે ભક્તો નાના પ્રકારનાં ભક્ષ્ય - ભોજ્ય પકવાનો તથા વિવિધ પ્રકારનાં શાકોથી પરિવારે સહિત શ્રીહરિને આદરપૂર્વક તૃપ્તિ પમાડતા હતા. (૨૦)

શ્રીહરિ બીજે દિવસે અક્ષય તૃતીયાને દિવસે ભક્તો દ્વારાએ પરશુરામના જન્મદિવસ નિમિત્તે પૂજા - મહોત્સવ કરાવતા હતા. (૨૧) સુરતમાં રહેલા સાર્વભૌમ રાજાએ સ્થાપેલા ઈન્દ્રસેન નામના રાજાએ વાહનો મોકલીને મુનિઓ સહિત શ્રીહરિને અતિ સન્માનથી પોતાના ગઢમાં લાવીને નવીન વસ્ત્રો અને ધન વગેરેથી મોટી સેવા કરી. (૨૨-૨૩) ઈન્દ્રસેન રાજાના અમાત્યો, પ્રત્યક્ષ ભગવાનના ભક્તો અર્દેશર વગેરે પણ આદરપૂર્વક પોતપોતાના ભવનમાં શ્રીહરિને લઈ જતા હતા. (૨૪)

પીલુ વગેરે પોતાના બંધુવર્ગે સહિત અર્દેશર આદિ ભક્તો પણ સ્નેહથી અમૂલ્ય વસ્ત્રો અને અલંકારો - નાનાં પ્રકારના દ્રવ્યો તેમ જ ચંદન-પુષ્પના હારો વગેરેથી શ્રીહરિની મહાપૂજા કરતા હતા. (૨૫) શ્રીહરિનો દ્વેષ કરનારા સૂર્યપુરના નિવાસી વૈષ્ણવો વગેરે તે તો શ્રીહરિના પ્રતાપથી કંઈ પણ ઉપદ્રવ કરવા શક્તિમાન થયા નહિ. (૨૬) જ્ઞાનમાં સૂર્ય સમાન ભગવાન શ્રીહરિ સૂર્યપુરમાં ભાગવત ધર્મ સ્થાપન કરતા, ભાગવત ધર્મને આશ્રય કરતાં વચનો રૂપી કિરણોથી પુરવાસી જનોના અજ્ઞાનરૂપી અંધકારને નાશ કરતા હતા. (૨૭) શ્રીહરિએ અમૂલ્ય એવા પણ સર્વ વસ્ત્રો અને અલંકારો અને પુષ્કળ દ્રવ્ય (જે ભક્તોએ સમર્પણ કરેલા તે) અતિ પ્રસન્નતાપણે બ્રાહ્મણોને આપી દીધાં. (૨૮)

હે રાજન્ ! પૃથ્વીમાં જ્યાં જ્યાં નરાકૃતિ પરબ્રહ્મ શ્રીહરિનું પૂજન થતું હતું તે તે સ્થાનમાં સર્વ બ્રાહ્મણોનું દરિદ્રપણું વિલીનપણાને પામતું હતું. (૨૯) *ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે સૂર્યપુરાગમનનિરૂપણનામા પંચાશત્તમોऽધ્યાયઃ (૫૦)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच – सम्पूज्यमानोऽखिलभक्तसङ्घैर्महार्हवस्त्राभरणोपदाभिः । आनन्दयंस्तान् हरिरुच्चपीठे महासभायां निषसाद राजन् ! ॥१॥ तं चाभितस्त्यागिजना निषेदुर्यथोचितं तानभितो गृहस्थाः । आनन्दकारुण्यभृता दृशा तान् पश्यन्नुवाचाथ स नैष्ठिकेन्द्रः । ॥२॥ भो भक्तसङ्घा ! वचनं मदीयं शृण्वन्तु सर्वे स्वहितावहं यत् । यथाधिकारं निजधर्मसंस्था भजन्तु निःसंशयमेव कृष्णम् ॥३॥ स्यात्संशयः कश्चन कस्यचिच्चेत्सम्पृच्छतां मामधुना पुमान्सः । इति प्रभोस्तस्य निशम्य वाचं तं भालचन्द्रो मतिमानपृच्छत् ॥४॥ भालचन्द्र उवाच – कृष्णस्य भक्तिर्भगवन् ! जनानामशेषबन्धच्छिदिति प्रसिद्धः । वर्वर्ति घण्टापथ एव भूमौ तामेव पृच्छामि ततो भवन्तम् ॥५॥ सा कीदृशी तां दृढमाश्रिता ये ते कीदृशाः स्युश्च जना धरायाम् । प्रीतिश्च तेषामिह कीदृशी स्यात्कृष्णेऽथ कृष्णस्य च तेषु नाथ ! ॥६॥ सुव्रत उवाच – श्रुत्वेति भक्तस्य स तस्य वाचं जगद्गुरुर्भक्तपतिः प्रसन्नः । प्रोवाच तं शास्त्ररहस्यमीशो यत्सात्त्वता एव विदन्ति नान्ये ॥७॥ श्रीनारायणमुनिरुवाच – प्रश्नस्य ते वैश्यवरोत्तरं तु सुदुष्करं शास्त्रविदापि नूनम् । प्रसादहीनेन हरेरहं तद्ब्रवीमि सर्वेऽपि निशामयन्तु ॥८॥ सम्प्राप्य दीक्षामिह भक्तिधर्मयुक्ताद्गुरोर्भागवतीं नरः प्राक् । अर्चां ततः प्राप्य तदुक्तरीत्या भक्तिं विदध्यादपतन्द्रि विष्णोः ॥९॥ तदीयमाहात्म्यविबोधपूर्वं स्वभावतो वृत्तिरविच्युता या । सप्रेम तस्मिन्सकलेन्द्रियाणां सा भक्तिरुक्ता नवधाऽस्ति सापि ॥१०॥

---

## અધ્યાય : ૫૧

## સુરતમાં પોતાની એકાંતિકી ભક્તિ અને ભક્તો વગેરેનું માહાત્મ્ય શ્રીહરિએ કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! સમગ્ર ભક્તોના સંઘોએ બહુમૂલ્યવાળાં વસ્ત્રો અને આભૂષણો અને ભેટોથી પૂજાયેલા શ્રી નારાયણમુનિ સમગ્ર ભક્તોના સમુદાયોને આનંદ પમાડતા મહાસભામાં રમણીય સિંહાસન ઉપર બેઠા. (૧) સાધુઓ અને વર્ણિઓ શ્રીહરિની ચોતરફ યથાયોગ્ય બેઠા. ત્યાગીજનોની ચોતરફ ગૃહસ્થાશ્રમીઓ યથાયોગ્ય બેઠા. પછી નૈષ્ઠિક વર્ણિરાજ શ્રીહરિ આનંદ અને કરુણાથી ભરપૂર પોતાની દૃષ્ટિથી, ત્યાગી વગેરે ભક્તજનોને જોતા સતા બોલ્યા : (૨) હે ભક્તો ! તમો સર્વે પોતાનું હિત કરનારું મારું વચન સાંભળો. પોતપોતાના અધિકારને ઉલ્લંઘન કર્યા વિના પોતાના ધર્મમાં રહેલા તમો સર્વે સંશયે રહિત, શ્રીકૃષ્ણ પરમાત્માને ભજો. (૩) હે ભક્તો ! કોઈ પુરુષને કોઈ પણ સંશય હોય તો હાલમાં જ મને પૂછો. હે રાજન્, આ પ્રમાણે શ્રીહરિનું વચન સાંભળીને બુદ્ધિમાન ભાલચંદ્રે શ્રીહરિને પૂછયું : (૪)

**ભાલચંદ્ર બોલ્યા :** હે ભગવન્ ! શ્રી કૃષ્ણ ભગવાનની ભક્તિ મનુષ્યોનાં સમગ્ર બંધનને છેદનારી છે એમ પ્રસિદ્ધ રાજમાર્ગ છે માટે તે ભક્તિ વિષે જ તમોને પૂછું છું. (૫) હે નાથ ! તે ભક્તિ કેવા પ્રકારની છે ? અને પૃથ્વીમાં તે ભક્તિને દૃઢ અને અચળપણે આશ્રય કરનારા જનો કેવા પ્રકારના હોય ? અને પ્રત્યક્ષ શ્રીહરિમાં તે ભક્તજનોને કેવા પ્રકારની પ્રીતિ હોય ? અને ભક્તોમાં કૃષ્ણની કેવા પ્રકારની પ્રીતિ હોય ? (૬)

**સુવ્રત મુનિ કહે છે** : હે રાજન્, જગદ્‌ગુરુ-ભક્તપતિ પરમેશ્વર શ્રીહરિ પોતાના સેવક ભાલચંદ્રની આવી વાણી સાંભળી પ્રસન્ન થયા સતા ભાલચંદ્રને શાસ્ત્રોના સારરૂપ રહસ્ય કહેવા લાગ્યા; જે રહસ્ય ભગવાનના એકાંતિક ભક્તો જાણે છે. તે વિના બીજા જાણતા નથી. (૭)

**શ્રીનારાયણ મુનિ બોલ્યા** : હે વૈશ્યવર્ય ભાલચંદ્ર ! તમારા પ્રશ્નનો ઉત્તર તો પરમાત્માના અનુગ્રહ વિના શાસ્ત્ર જાણનારા પુરુષે પણ નિશ્ચે કરવા માટે અશક્ય છે. તેવા પ્રશ્નનો ઉત્તર હું કહું છું. સર્વે ભક્તો સાંભળો. (૮) આ લોકમાં મનુષ્ય પ્રથમ ભક્તિ અને ધર્મથી યુક્ત ગુરુથી ભાગવતી દીક્ષા પામીને તે ગુરુથી ભગવાનની પ્રતિમા પ્રાપ્ત કરીને ગુરુએ બતાવેલી સેવાની રીતિથી આલસ્યેરહિત શ્રીકૃષ્ણની ભક્તિ કરે. (૯) પ્રત્યક્ષ શ્રીકૃષ્ણનું અક્ષરથી પરપણારૂપી માહાત્મ્યના વિશેષ જ્ઞાનપૂર્વક પ્રેમ સહિત શ્રીકૃષ્ણ ભગવાનમાં સમગ્ર ઈન્દ્રિયોની સ્વાભાવિકપણે અખંડ વૃત્તિ રહે તે ભક્તિ કહેલી છે તે ભક્તિ પણ નવ પ્રકારની છે. (૧૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

विष्णोः कथायाः श्रवणं च कीर्तिस्तस्य स्मृतिश्चाङ्घ्रिनिषेवणं च । पूजाऽऽनतिर्दास्यमनेन सख्यमस्मै सवर्गात्मनिवेदनं च ॥११॥ उक्ता नवैते ननु भक्तिभेदाः स्वशक्तितस्तैर्भजनीय ईशः । नराः सकामा निजवाञ्छितार्थांस्तेनाप्नुवन्ति ह्यपरे च मुक्तिम् ॥१२॥ निष्कामभक्तिस्तु हरौ प्रवृद्धा दिनेदिने सिद्धिगणाद्वरिष्ठा। जीवस्य कोशं जरयत्यवश्यं वैश्वानरो भुक्तमिवोदरेऽन्नम् ॥१३॥ अनन्यभक्तास्तु रमापतेर्ये नेच्छन्ति कैवल्यमपीह ते तु । सेवारतास्तस्य तदर्थचेष्टास्तेनैव पूर्णाः सततं प्रसन्नाः ॥१४॥ एकक्रियास्ते तु समेत्य विष्णोर्भक्ताश्चरित्राण्यनुवर्णयन्ति । शृण्वन्ति वा वक्तरि विद्यमाने गायन्ति च क्वापि तदेकचित्ताः ॥१५॥ न याति तच्चिन्तनवर्जितः क्षणो येषां सदा तन्निहितान्तरात्मनाम् । पश्यन्ति भूमाववतारमूर्तीस्ते तस्य ताभिश्च वदन्ति सन्तः ॥१६॥ प्रभवति विभवो न भक्तचेतः क्षणमपि चालयितुं पुरन्दरीयः ॥ हरिचरणपदात्कदापि काले किमुत तदा भुवि मानवीयभोगः ॥१७॥ किमिह बहु वदामि पारमेष्ठ्यं पदमणिमादिकसिद्धिजातमाप्तम् । प्रसभमपि च तेन दीयमानाः स्पृहयति भक्तवरः क्वचिन्न मुक्तीः ॥१८॥ क्वचन यदपि नास्ति भोगतृष्णा निजचरणैकरतस्य तस्य चित्ते । तदपि च वितरत्यसौ महान्तं विभवममर्त्यसुदुर्लभं स्वधाम्नि ॥१९॥ प्रियसुतसुहृदिष्टदैवमात्मा सकलमपीह हरिर्हि यस्य पुंसः । क्वचिदपि नहि तस्य कालमायाभयमभवाय यतो नृणां वपुस्तत् ॥२०॥

---

શ્રીહરિની કથાનું શ્રવણ-કીર્તન-સ્મરણ-ચરણકમળની સેવા-પૂજન-નમસ્કાર-દાસપણું-ભગવાનની સાથે સખાભાવ-ભગવાનને પરિવારે સહિત આત્માનું નિવેદન કરવું. (હું તમારો છું એ પ્રમાણે ) (૧૧) આ શ્રવણ વગેરે ભક્તિના નવ પ્રકાર કહ્યા. તે નવ પ્રકારની ભક્તિથી પોતાની શક્તિ પ્રમાણે પરમેશ્વરને ભજવા. તેનાથી સકામ ભક્તો પોતાને ઈચ્છિત પદાર્થો પામે છે. અને નિષ્કામી ભક્તો તો મુક્તિ પામે છે. (૧૨)

અણિમાદિ સિદ્ધિગણોની પ્રાપ્તિથી પણ અતિશય શ્રેષ્ઠ પ્રતિદિન વૃદ્ધિ પામતી શ્રીહરિમાં નિષ્કામ ભક્તિ તો જીવના કોશરૂપ આવરણરૂપ માયિકભાવને જઠરાગ્નિ ઉદરમાં રહેલા અન્નને જેમ તેમ અવશ્ય નાશ કરે છે. (૧૩) આ લોકમાં જે પુરુષો શ્રીકૃષ્ણના નિષ્કામ ભક્તો હોય તે તો કેવળ અક્ષરાત્મક ભાવથી સ્થિતિને પણ ઈચ્છતા નથી તે તો ભગવાનની સેવામાં જ આસક્તિવાળા અને ભગવાનને માટે જ તેમની સર્વ ઈન્દ્રિયોનો વ્યાપાર હોય છે. અને તેનાથી કૃતાર્થ થઈને નિરંતર ભગવાનના સ્મરણથી પ્રસન્ન રહે છે. (૧૪) સર્વે ભક્તો ભગવાનપરાયણ વર્તવારૂપ એક ક્રિયાવાળા પ્રસિદ્ધ હોય છે. તે અનન્ય ભક્તો બધા ભેગા થઈ પરમાત્માનાં ચરિત્રો વર્ણન કરે છે. વક્તા હોય તો સાંભળે છે. ક્યારેક તો એક ચિત્તવાળા થઈને કીર્તનોનું ગાન કરે છે. (૧૫) સર્વકાળમાં પરમાત્મામાં જેમણે ચિત્ત જોડેલું છે, ભગવાનના ચિન્તન વિના ક્ષણ પણ જેમની જતી નથી તે નિષ્કામી સાધુપુરુષો પૃથ્વીમાં શ્રીકૃષ્ણ ભગવાનના અવતારની મૂર્તિઓ જુએ છે અને તેમની સાથે વાતો પણ કરે છે. (૧૬)

ઈન્દ્ર સંબંધી વૈભવો નિષ્કામ ભક્તનું ચિત ભગવાનના ચરણકમળથી ક્ષણવાર પણ ચલાયમાન કરવા શક્તિમાન થતા નથી. તો પૃથ્વીમાં રહેલા મનુષ્ય સંબંધી રાજ્યાદિ ભોગની સંપત્તિ ચલાયમાન ન કરે તેમાં કહેવું જ શું ? (૧૭) આ અર્થમાં વધુ હું શું કહું ? નિષ્કામ ભક્ત પ્રાપ્ત થયેલી બ્રહ્માદિ લોકની સંપત્તિ અને અણિમાદિ અષ્ટ ઐશ્વર્યોના સમૂહને ઈચ્છતો નથી, ભગવાને બળાત્કારે આપવા ઈચ્છાયેલી સાલોક્યાદિ મુક્તિઓની પણ ક્યારેય પણ સ્પૃહા કરતો નથી. (૧૮) પોતાના ચરણકમળમાં પ્રીતિવાળા નિષ્કામ ભક્તના ચિત્તમાં ક્યારેય પણ ભોગની તૃષ્ણા નથી. તો પણ ભગવાન દેવોને પણ દુર્લભ અતિશ્રેષ્ઠ પોતાના અક્ષરધામમાં રહેલા વૈભવો તે ભક્તને આપે છે. (૧૯) પતિ, પુત્ર, મિત્ર અને ઈષ્ટદેવ - આત્મા આ લોકમાં વર્તતું સમગ્ર વસ્તુમાત્ર પણ જે પુરુષને શ્રીહરિ જ હોય; (જેને શ્રીહરિ પતિવ્રતાને પતિ જ જેમ સ્નેહનું સ્થાન છે, મિત્રને સુહૃદ જેમ વિશ્વાસનું સ્થાન છે, સકામ ભક્તને જેમ ઈષ્ટદેવ અતિસ્નેહથી પૂજ્યત્વના સ્થાનરૂપ છે. પોતાનો આત્મા જેમ પોતાને પ્રીતિના સ્થાનભૂત છે ) એવા સ્નેહવાળા નિષ્કામ ભક્તને ક્યારેય પણ કાળ માયાનો ભય નથી. કારણ કે તેના દેહની સ્થિતિ પણ આશ્રય કરનારા જનોના મોક્ષ માટે થાય છે. (૨૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

स्वतनयधनधामलोकलज्जाः सुरवरधामगमैषणां च हित्वा । भगवति हि दृढानुरागमाप्तो निजहृदि यस्तमसौ स्मरत्यखण्डम् ॥२१॥ तपति दहति वाति भास्करोऽग्निर्मरुदभिवर्षति वासवश्च मृत्युः । चरति जगति यद्भयात्स विष्णुर्विपद इमं परितश्च पाति नित्यम् ॥२२॥ हृदि विधृततदीयपादशाखानखविधुमण्डलकान्तिशैत्यभाजि । तदितरसुखगर्धनोत्थतापो न भवति तस्य यथाऽग्निजोऽम्बुपुरे ॥२३॥ विधिमुखसुरचिन्तनीयपादः स्थिरचरदेहिनियामकोऽपि कृष्णः । दृढरतिरशनानिबद्धपादो हृदयमहो न विहातुमस्य शक्तः ॥२४॥ प्रियतमा न रमा न च राधिका प्रियतमो न विधिर्न च भोगिराट् । भगवतो न निजापि तनुस्तथा भुवि यथा दृढभक्तिपरो नरः ॥२५॥ साङ्ख्येन योगेन मखैस्तपोभिः संन्यासवेदव्रतभूरिदानैः प्रीत्यै हरेः प्राग्विहितैर्लभन्ते भक्तिं तदीयां नवधा प्रसिद्धाम् ॥२६॥ तस्या अपीदं परमं फलं यत् स्नेहो भवेद्गाढतरो हि कृष्णे । यावन्न स स्याद्भजतां च तावद्भक्तिर्बुधैरङ्कुरितेति बोध्यम् ॥२७॥ गाढस्नेहो यदा स्याद्भगवति सुखदे भक्तिभाजां तदानीमस्मिँल्लोके परे वा मनसि रुचिकरं तं विना स्यान्न किञ्चित् । तत्सेवाचिन्तनादावपि रसिकतया भूरिकालापयानं तेषां स्याद्वा क्षणस्तद्रहित इह लवः कल्पतामेव यायात् ॥२८॥ जाते तद्विरहे विचित्तवदसौ भक्तस्तदाकारकं विश्वं पश्यति भाषते च तरुणा स्तम्भेन कुड्येन वा । देहं क्वापि तदाकृतिं दृशि दधत्तच्चेष्टितं चेष्टते रौति क्वापि हसत्यथोन्मद इवानन्देन संनृत्यति ॥२९॥ हृदि तं त्ववलोक्य कर्हिचिच्च प्रसरत्प्रेमभराश्रुरुद्ध- कण्ठः । अननुस्मृतदेह एव तस्मिन्स

જે નિષ્કામ ભક્ત પોતાના પુત્ર, ધન,ગૃહ અને લોકલજ્જા અને બ્રહ્માદિકનાં ધામોને પામવાની ઈચ્છાનો ત્યાગ કરીને ભગવાનમાં ગાઢ અનુરાગને પામેલા હોય, એવા નિષ્કામ ભક્તને ભગવાન પોતાના હૃદયમાં અખંડ સંભારે છે. (૨૧) જે પરમાત્માના ભયથી સૂર્ય પ્રકાશે છે, અગ્નિ બાળે છે, વાયુ વાય છે, ઈન્દ્ર વરસે છે, મૃત્યુ દોડે છે તે શ્રીકૃષ્ણ નિષ્કામ ભક્તનું આપત્તિઓથી સર્વ પ્રકારે હંમેશાં રક્ષણ કરે છે. (૨૨)

ધ્યાનથી ધારણ કરાયેલા શ્રીકૃષ્ણ ભગવાનના બંને ચરણકમળની આંગળીઓમાં જે નખો એ જ (નખરૂપ) ચન્દ્રમાના સમુદાયોની કાંતિની શીતળતાને ભજનાર નિષ્કામ ભક્તના મનમાં ભગવાન વિના બીજાં સુખોની ઈચ્છાથી ઉત્પન્ન થયેલો સંતાપ જળના પ્રવાહમાં અગ્નિથી થયેલો સંતાપ જેમ તેમ થતો નથી. (૨૩) બ્રહ્મા આદિ જેઓને છે એવા દેવોએ ચિન્તનીય ચરણકમળવાળા, સ્થાવર અને જંગમ દેહધારીઓના નિયામક શ્રીકૃષ્ણ પણ દૃઢ પ્રીતિરૂપી દોરડીથી બાંધેલા છે ચરણકમળ જેમના એવા થકા આ ભક્તના મનને ત્યાગ કરવા શક્તિમાન થતા નથી, આ આશ્ચર્ય છે. (૨૪) પૃથ્વીમાં દૃઢ ભક્તિપરાયણ નિષ્કામ ભક્ત ભગવાનને જેવો અતિપ્રિય છે તેવી લક્ષ્મી અતિશય પ્રિય નથી; રાધિકા, બ્રહ્મા, સંકર્ષણ તથા પોતાનો દેહ પણ અતિશય પ્રિય નથી. (જો લક્ષ્મીજીને પણ દૃઢ ભક્તિ ના હોય તો તે પ્રિય નથી એવો અર્થ જાણવો, નહિ તો પ્રિયતમા રમા એવું વિશેષણ વ્યર્થ જાય). (૨૫)

પૂર્વજન્મમાં શ્રીકૃષ્ણની પ્રસન્નતા માટે કરેલાં આત્માપરમાત્માના વિચારરૂપ સાંખ્ય, અષ્ટાંગયોગના સાધનરૂપ યોગ, નાના પ્રકારના યજ્ઞો, નાના પ્રકારનાં તપો, સંન્યાસ, વેદાધ્યયન, વ્રતો અને ઘણાં દાનોથી શ્રીહરિની નવ પ્રકારથી પ્રસિદ્ધ એવી શ્રીકૃષ્ણ ભગવાન સંબંધી ભક્તિ આ જન્મમાં મનુષ્ય પામે છે. (૨૬)

આ નવ પ્રકારની ભક્તિથી પણ પરમાત્મામાં ગાઢ પ્રેમ થાય એ સર્વોત્તમ ફળ થાય છે. ભક્તિથી ભજનારા જનોને જ્યાં સુધી ગાઢ સ્નેહ થાય નહિ ત્યાં સુધી ભક્તિ અંકુર અવસ્થામાં છે : આ પ્રમાણે વિવેકી ભક્તોએ જાણવું. (૨૭) જ્યારે નવ પ્રકારે ભક્તિ કરનારા ભક્તજનોને સુખ આપનારા ભગવાનમાં ગાઢ સ્નેહ થાય ત્યારે ભગવાન વિના આ લોકમાં અથવા સ્વર્ગાદિ લોકમાં મનમાં રુચિ પેદા કરનાર કોઈ પણ વસ્તુ થાય નહિ. પરંતુ પરમાત્મા જ રુચિકર થાય અને બીજું દુઃખરૂપ થાય. ભગવાનની સેવા-તેમનું ચિંતન વગેરેમાં અત્યંત સ્નેહથી ઘણો કાળ નિર્ગમન પણ ભક્તોને ક્ષણ વારની માફક થાય. ભગવાનની સેવા રહિત ક્ષણ કાળ પણ કલ્પ સમાન લાગે. (૨૮)

ધ્યાનની દૃઢતાથી ક્યારેક પોતાના નેત્રની આગળ ન દેખાય ત્યારે ભક્ત ભ્રાંતની માફક સર્વ જગત પણ પરમાત્માના આકારવાળું જુએ છે. વૃક્ષ-થાંભલો અથવા ભીંતની સાથે વાતો કરે છે. ક્યારેક પોતાના શરીરને ભગવાનની આકૃતિવાળું નેત્રની આગળ ધારણ કરતો સતો ભગવાને કરેલાં ચરિત્રોની માફક આચરણ કરે છે. ક્યારેક રડે છે, ક્યારેક હસે છે, ગાંડાની માફક આનંદથી સારી રીતે નાચે છે. (૨૯) ક્યારેક પોતાના મનમાં શ્રીકૃષ્ણને જોઈને અતિશય પ્રેમને લીધે જે

विलीनो बहिरेत्यथेच्छयाऽस्य ॥३०॥ नहि केवलमीदृशाः पुमांसो भुवि भक्ताः श्रुतवेदिनो भवेयुः । अबला अपि चात्मधर्मसंस्था भगवत्स्नेहभरेण देववन्द्याः ॥३१॥ अविदः सुविदोऽपि विप्रराजोरुजशूद्रा अथ नीच जातयोऽपि । सकलाः कमलाधवस्य तुल्या इह सप्रेम भजन्ति ये जनाः स्वम् ॥३२॥ अवगम्य तदीययादृशत्वं सहसा वापि मनोऽत्र यस्य तस्मिन् । रतिमाप दृढां स मुक्तजीवः पुरुषो वास्त्वबलास्तु वापि षण्ढः ॥३३॥ हरिसंनिरतेन भक्तिदार्ढ्यं सततं सन्नरसङ्गतो हि कार्यम् । हरतीरथा दयादिरूपं ननु कृष्णात्स्वमनो यथाऽऽर्षभं तम् ॥३४॥ भजने निरतोऽप्यपक्वयोगी च्युतिमाप्नोति कुसङ्गतः कदाचित् । वितथा न भवेद्धरेस्तु भक्तिः पुनरेत्यन्यजनुष्यपीयमेनम्॥३५॥ अत एव सदैव सावधानैर्मनसो विश्वसनं विहाय कृष्णे । सुजनैः स्वरिपुं विहाय दम्भं हृदि विश्वस्य विधीयतां च भक्तिः॥३६॥ सत्यं वदेज्जितनिजेन्द्रियशीलशाली सौहार्दभाङ्नृषु भवेत्प्रणमेद्वरिष्ठान् । दीनेषु तत्सुखकरं पितृवद्वदेच्च स्निग्धो भवेत्सदृशसत्सु हरेस्तु भक्तः ॥३७॥ तत्प्रेमपात्रगुरुसत्सु तदीयबुद्धिर्विद्यार्थरूपकुलजन्ममदश्च न स्यात् । दान्तेन्द्रियो व्यसननिःस्पृहशान्तकामः पश्येत्सदा ह्यसदिदं जगदस्य भक्तः ॥३८॥ तद्भक्तश्रितदेशसेवनरतस्तत्कर्मकृत्तत्परः सम्भूय स्वयमेव वा वितनुयात्तत्पर्वयात्रोत्सवान् । पश्येद्व्योम यथा निजात्मनि बहिश्चापावृतं तं त्वसौ प्राचीनाधुनिकात्मनिष्ठगुणवत्तद्भक्तरीतीः

---

આનંદનાં આંસુઓ તેનાથી રોકાયેલા કંઠવાળો; જેને પોતાના શરીરનું અનુસંધાન નથી એવો ભક્ત ગાઢાનુરાગથી પરમાત્મામાં નિમગ્ન થઈ પછી ભગવાનની ઈચ્છાથી દેહની સ્મૃતિ પામે છે. (૩૦) પૃથ્વીમાં શ્રુતિ-શાસ્ત્રોને જાણનારા પુરુષો જ આવા ભક્તો થાય છે એવો નિયમ નથી. કારણ કે સ્ત્રીઓ પણ પોતાના ધર્મમાં દૃઢ સ્થિતિવાળી ભગવાનમાં અત્યંત સ્નેહયુક્ત; દેવોએ પણ નમસ્કાર કરવા યોગ્ય થાય છે. (૩૧)

આ લોકમાં જે જનો પોતાને પ્રેમે સહિત ભજે છે તે જનો શાસ્ત્રને ન જાણનારા હોય અથવા ઘણાં શાસ્ત્રો જાણનારા હોય, બ્રાહ્મણો-ક્ષત્રિયો અને વૈશ્યો અથવા શૂદ્ર જાતિના હોય તો પણ સર્વે પરમાત્માને અનુગ્રહ કરવામાં સરખા છે. (૩૨) ભગવાનનું સ્વરૂપ-ગુણ ઐશ્વર્યાદિ જેવું હોય તેવું માહાત્મ્ય સહિત જાણીને કે તત્કાળ નહિ જાણીને પણ આ લોકમાં જેનું મન ભગવાનમાં નિશ્ચલ પ્રીતિ પામે તે પુરુષ હોય અથવા સ્ત્રી હોય અથવા નપુંસક હોય તો પણ તે જન મુક્તભાવને પામેલો છે. (૩૩)

ભગવાનમાં અખંડ પ્રીતિપરાયણ સાધુજનના સમાગમથી ભક્તિની દૃઢતા નિરંતર નિશ્ચે કરવી. એમ ના હોય તો દયાદિ સ્વભાવવાળું પોતાનું મન ઋષભદેવના પુત્ર ભરતની માફક તે ભક્તને શ્રીકૃષ્ણથી પાડી નાખે છે. (૩૪) ભક્તિ કરવામાં પ્રેમવાળો હોય તો પણ ભક્તિની દૃઢતા થઈ ના હોય એવો ભગવાનનો ભક્તજન ક્યારેક કુસંગના યોગથી ભક્તિથી પડી જાય છે. તો પણ શ્રીકૃષ્ણની ભક્તિ તો વ્યર્થ થતી નથી. આ ભક્તિ બીજા જન્મમાં પણ ફરી એ ભક્તને પ્રાપ્ત થાય છે. (૩૫)

માટે હંમેશાં વિવેકવાળા ભક્તજનોએ પોતાના મનના વિશ્વાસનો ત્યાગ કરી પોતાના શત્રુરૂપ દંભનો ત્યાગ કરી પોતાના મનમાં સત્પુરુષના વચનમાં વિશ્વાસ લાવીને કૃષ્ણમાં પ્રીતિ કરવી. (૩૬) શ્રીહરિનો ભક્ત તો પોતાના અને પારકા દ્રોહે રહિત સત્ય વચન બોલે. પોતાના ઈંદ્રિયોને જીતવાથી શીલથી શોભાયમાન સર્વજનોમાં મૈત્રીવાળો થાય; પોતે જ્ઞાન, વૈરાગ્યાદિ ગુણથી શ્રેષ્ઠ ભગવાનના ભક્તોને નમસ્કાર કરે, ગરીબજનોમાં માતાપિતાની માફક તેમને સુખ કરનારું વચન બોલે, ગુણોથી સમાન સત્પુરુષોમાં ભાઈઓની માફક સ્નેહ રાખે. (૩૭) શ્રીકૃષ્ણનો ભક્ત ભગવાનમાં જે સ્નેહ તેના પાત્રરૂપ જે ગુરુઓ અને સંતો તેઓમાં ભગવાનની માફક પ્રીતિવાળો થાય. વિદ્યા, ધન, રૂપ, કુળમાં જન્મ તેના મદવાળો થાય નહિ; બાહ્ય અને આંતર ઈંદ્રિયોને નિયમમાં કરનારો થાય. અઢાર પ્રકારનાં વ્યસનોમાં નિઃસ્પૃહી - શાંત કામનાવાળો થાય. આ વિશ્વને નિરંતર અસત્ય જુએ. (૩૮)

ભગવાનના ભક્તોએ આશરેલા દેશોને સેવન કરવામાં પ્રીતિવાળો, ભગવાન સંબંધી જ કામ કરનારો આ ભક્ત ભગવાનના ભક્તો સાથે મળીને અથવા પોતે એકલો જ ભગવાનનાં એકાદશી આદિ પર્વો અને યાત્રા કરે અર્થાત્ ભગવાનના દિવ્ય મંદિરમાં દર્શનાર્થે જાય અને તે એકાદશી વગેરે તિથિઓમાં ભગવાનના ઉત્સવો કરે. આકાશને જેમ તેમ શ્રીકૃષ્ણ ભગવાનને પોતાના આત્મામાં તથા બહાર જુએ. પહેલાંના શુક-નારદ વગેરે અને હાલના ગોપાળાનંદ-મુક્તાનંદ

श्रयेत् ॥३९॥ स्त्रीषु स्त्रैणजने विधर्मिणि नरे पाषण्डदम्भोद्धटे शब्दार्थान्तरदर्शने विदुषि भ्रंशोद्यते धर्मतः । स्वेच्छाकल्पितधर्मिणि व्यसनिनि क्रुद्धे च लुब्धे खले कामार्ते परधर्मगामिनि हरिद्विषे न सज्जेत सः ॥४०॥ यदि रतिः सुदृढा न हरौ भवेद्गुणगणैरपरैर्निभृतैश्च किम् । यदि च सा भवतीह तदाऽपरैरनुदितैरुदितैरपि किं फलम् ॥४१॥ यदपि किञ्चन तत्प्रियकाम्यया व्रततपोनियमादि चरेन्नरः । भवति तत्खलु भक्तिविवर्धनं कृतमथेतरथाऽल्पफलं भवेत्॥४२॥ बहुजनुर्भ्रमणोत्तरलम्भितां नरतनुं समवाप्य सुरेप्सिताम् । मतिमतामिदमेव मतेः फलं विषयतो विरतिश्च हरौ रतिः ॥४३॥ इह स तु यदा भक्तो रक्तः शृणोति गृणाति वा मधुरचरितं विष्णोर्जिष्णोर्मुदा परया तदा । मनसि निभृतानन्दस्यन्दस्तदात्मक उल्लसत्पुलककुलकः स्मारं स्मारं भवत्युदिताश्रुदृक् ॥४४॥ इत्थं दिव्यनराकृतेर्भगवतः कृष्णस्य भक्तिं नरा ये कुर्वन्ति मनोरथान् सफलयत्येषां स हि प्रीतिमान् । ये तन्नृत्वकुतर्कितास्तदितरासक्ताश्च तेषु द्रुतं कामक्रोधरसादयो विदधते शार्दूलविक्रीडितम् ॥४५॥ प्रीत्यै हरेर्न सुरता मुनिता नृता वा विप्रत्वमाप्तजननत्रयमिष्ट कर्म । पूर्तं तपश्च नियमव्रतदानवृत्तं निश्छद्मभक्तिमपहाय बहुश्रुतं च ॥४६॥ अश्यते भगवताऽमलभक्त्या दत्तमम्बुफलपुष्पदलादि । भूरिहेमचयखाद्य-विशेषान्नैष पश्यति दृशाऽपि विना ताम् ॥४७॥ अद्य वा शतजनुर्भ्रमणान्ते सद्गतिर्नहि विना हरिभक्तिम् । इत्थमेव

---

વગેરે જે આત્મનિષ્ઠ અને સ્વધર્માદિ ગુણયુક્ત ભક્તો-તેમની વર્તવાની રીતોનો આશ્રય કરે. (૩૯)

સ્ત્રીઓ-સ્ત્રીલંપટ-ધર્મવર્જિત-પાખંડી-ધર્મધ્વજી-શબ્દના અર્થાંતરો કરી ધર્મથી પાડનાર વિદ્વાન-પોતાની ઈચ્છાથી કલ્પેલા ધર્મવાળો -અઢાર પ્રકારનો વ્યસની-ક્રોધી-લોભી-ખલ-કામી-પારકા ધર્મનું પાલન કરનાર - શ્રીહરિમાં દ્વેષ કરનાર આ ચૌદ પ્રકારના જનોમાં ભક્ત આસક્તિવાળો ના થાય અર્થાત્ સંગ કરે નહિ. (૪૦) જો શ્રીહરિમાં સુદૃઢ પ્રીતિ ના હોય તો ઉપાર્જન કરેલા બીજા (ભક્તિ સિવાયના) ગુણસમુદાય યોગ, યજ્ઞ, તપ, શાસ્ત્રાધ્યયન વગેરેથી શું ફળ છે? અર્થાત્ કંઈ જ નથી. અને જો ભગવાનમાં પ્રીતિ હોય તો ભક્તમાં ઉત્પન્ન થયેલા અને નહિ ઉત્પન્ન થયેલા બીજા (પૂર્વોક્ત) ગુણસમુદાયોથી પણ શું ફળ છે ? કંઈ પણ નથી. (૪૧)

જે માણસ શ્રીહરિની ઈચ્છાથી જે કંઈ પણ વ્રતો-તપો-નિયમો તથા યમોનું આચરણ કરે તે વ્રતાદિ ભક્તિની વૃદ્ધિ કરનાર નિશ્ચે થાય છે. અને એમ ના હોય તો અલ્પ ફળ આપનાર થાય છે. (૪૨) ચોરાશી લાખ યોનિઓમાં ભ્રમણ કર્યા પછી પ્રાપ્ત થયેલો દેવોએ પણ ઈચ્છેલો મનુષ્યદેહ પામીને બુદ્ધિશાળી પુરુષોનું બુદ્ધિમાનપણાનું જે વિષયોથી નિવૃત્તિ અને પરમાત્મામાં પ્રીતિ થાય એ જ ફળ છે. (૪૩)

આ લોકમાં ભગવાનમાં પ્રીતિવાળો ભક્ત તો જે સમયે જિષ્ણુ = જીતનાર શીલવાળા શ્રીકૃષ્ણના મનોજ્ઞ ચરિત્ર મહાઆનંદથી સાંભળે છે અથવા કહે છે તે સમયે પોતાના અંતઃકરણમાં અત્યંત આનંદનો પ્રવાહ નેત્રદ્વારા બહાર આવે છે. તદાત્મક અર્થાત્ પરમાત્માના સ્વરૂપમાં નિમગ્ન ચિત્તવાળો ભક્ત ખીલી ઊઠેલા રૂવાડાંના સમુદાયવાળો ભગવાનનાં ઐશ્વર્યો સંભારી સંભારીને પોતાની આંખોમાં આંસુઓવાળો થાય છે. (૪૪)

આ પ્રકારે જે પુરુષો દિવ્ય મનુષ્યાકૃતિવાળા ભગવાન શ્રીકૃષ્ણની ભક્તિ કરે છે તેવા ભક્તોમાં પ્રીતિવાળા શ્રીકૃષ્ણ ભગવાન તેવા ભક્તોના મનોરથો સંપૂર્ણપણે પૂર્ણ કરે છે. જે પુરુષો શ્રીકૃષ્ણના મનુષ્યાનુકરણમાં તર્કો કરે છે અને ભગવાન વિના બીજામાં આસક્તિવાળા હોય છે તે મનુષ્યોમાં કામ-ક્રોધ-રસ-લોભ-માનાદિ શત્રુઓ તત્કાળ સિંહની માફક ચેષ્ટા કરે છે. અર્થાત્ તેનો નાશ કરે છે. (૪૫) કપટે રહિત ભક્તિનો ત્યાગ કરી(ભક્તિ વિના) શ્રીહરિની પ્રસન્નતા પ્રાપ્ત કરવા માટે દેવપણું-સાધુપણું, નિયમો-વ્રતો-દાનો અને ઘણાં શાસ્ત્રોનું જાણપણું એ બધું શક્તિમાન થતું નથી. પરંતુ એક ભક્તિ સમર્થ છે. (૪૬)

નિર્મળ ભક્તિથી ભક્તે અર્પણ કરેલું જળ,ફળ,પુષ્પ,નાગરવેલીનું પાન, ચોખા વગેરે ભગવાન જમે છે. નિર્મળ ભક્તિ વિના ભગવાન ઘણા સુવર્ણના ઢગલાઓ અને નાના પ્રકારનાં પકવાન્નોને દૃષ્ટિથી પણ જોતા નથી. (૪૭) આ જન્મમાં



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

दृढनिश्चयवान् यस्तां करोति भुवि धन्यतरः सः ॥४८॥ योषिदीक्षणशरैरहताङ्गो घोरकोपनिशि जागरितश्च । यो न मोहदृढपाशनिबद्धो भक्तिमान्प्रियतमः स हि विष्णोः ॥४९॥ बाले योषिति दर्पणे निजजने रागे धने मादके जायन्ते सुधियोऽपि विह्वलतरा होलादिनोत्क्रीडने । अष्टस्वेषु तदङ्घ्रिचिन्तनरतं चित्तं न यस्योत्सरेत्तद्भक्त्येकरसस्य तस्य पदयोः पांशुः सुरैरिष्यते ॥५०॥ एतादृशा ये भुवि सज्जनाः स्युः श्रीकृष्णभक्ता निजधर्मनिष्ठाः । मुमुक्षुभिस्ते गुरवो विधेयाः पूज्याश्च तेष्वेव सुहृन्मतिश्च॥५१॥ अन्यत्र ये पूज्यधियस्तु तेभ्यः सुहृद्धियो वा गुरुबुद्धयश्च । तेषां पशूनां च यदन्तरं तद्द्विपाच्चतुष्पात्त्वमुदस्य नान्यत् ॥५२॥ सुव्रत उवाच - इति तस्य गिरं सुधायमानां श्रुतिकंसेन निपीय वैश्यवर्यः । मुदितः स भृशं बभूव चान्ये मुदमापुः सकलास्तदीयभक्ताः ॥५३॥ कृष्णं विष्णुं हरिं चापि धर्मसूनुं तमेव हि । जानन्तो लेभिरे तस्मिन्भक्तिदार्ढ्यं नराधिप ! ॥५४॥ भगवद्भक्तमाहात्म्यं विदन्तस्तत आदरात् । मुनींस्तान् पूजयामासुर्भगवन्तमिवाखिलान् ॥५५॥ चन्दनैरक्षतैः पौष्पैर्हारैर्वस्त्रैश्च भोजनैः । सम्पूज्य तांस्ते विधिवद्दण्डवत्प्रणमंस्ततः ॥५६॥ भगवानपि भक्तानां तदादीनां पुरौकसाम् । भक्तिं स्वस्मिंस्तथा सत्सु स्थिरां दृष्ट्वा तुतोष ह ॥५७॥ आनन्दयन्सकलभक्तजनान्नृपेत्थं प्रश्नोत्तरैः परमधर्ममयैर्मुनीशः । तत्रावसत्स पुरि सप्तदिनानि नित्यं पाषण्डमार्गमभितो निखनन्समूलम् ॥५८॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे सूर्यपुरे भगवद्भक्तिभक्तलक्षणनिरूपणनामैकपञ्चाशत्तमोऽध्यायः ॥५१॥

---

અથવા અપરિમિત યોનિના ભ્રમણ પછી ભગવાનના ધામની પ્રાપ્તિ હરિભક્તિ વિના થતી જ નથી. આ પ્રકારે જે પુરુષ દ્રઢ નિશ્ચયવાળો, શ્રીહરિની ભક્તિ કરે છે તે પુરુષ પૃથ્વીમાં અતિશય કૃતાર્થ થાય છે. (૪૮)

જે પુરુષ સ્ત્રીઓનાં કટાક્ષરૂપી બાણોથી પરાભવ પામ્યો નથી અને અતિ ભયંકર ક્રોધરૂપી રાત્રિમાં જાગતો રહેનાર, વિપરીત જ્ઞાનના દ્દઢ પાશથી બંધાયેલો નથી, તે દ્દઢ ભક્તિવાળો પુરુષ નિશ્ચે શ્રીહરિની અત્યંત પ્રીતિને પાત્ર થાય. (૪૯) **આકર્ષણ કરનાર પદાર્થો :-** બાળ, સ્ત્રી, દર્પણ, પોતાના જન, રાગ, ધન, માદક વસ્તુ, હોલિકાને દિવસે ખેલ : આ આઠમાં -બુદ્ધિશાળી જનો પણ અતિ વિભ્રાંત ચિત્તવાળા થાય છે. શ્રીહરિના ચિન્તનમાં આસક્તિવાળું જે ભક્તનું ચિત્ત બાળક વગેરે આઠમાં જતું નથી. તે શ્રીહરિની ભક્તિમાં એક રાગવાળા ભક્તના ચરણની રજને તો દેવો પણ ઈચ્છે છે. (૫૦)

પૃથ્વીમાં આવા શ્રીહરિના ભક્તો પોતાના ધર્મમાં નિષ્ઠાવાળા જે સાધુજનો હોય તેમને મુમુક્ષુઓએ ગુરુઓ કરવા. તે પૂજવા યોગ્ય છે. તે સાધુઓમાં જ મિત્રાદિ હિતબુદ્ધિ કરવી. (૫૧) જે પુરુષો તેવા સજ્જનો વિના બીજા જનોમાં પૂજ્યબુદ્ધિ - મિત્રબુદ્ધિ અને ગુરુબુદ્ધિ કરે છે તે પુરુષોમાં અને ગર્દભાદિ પશુઓમાં જે ભેદનો બોધ કરનાર વિશેષ ધર્મ તે તો બે પગ અને ચાર પગ એટલો જ છે તે વિના બીજો કોઈ ગુણ (ભેદ જણાવે તેવો) નથી. (૫૨)

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! સુધા સમાન આચરણ કરનારી વાણી, વૈશ્યશ્રેષ્ઠ ભાલચંદ્ર શ્રવણરૂપી પાત્રથી પાન કરી અત્યંત હર્ષ પામ્યા. તથા બીજા સર્વે શ્રી સ્વામિનારાયણના ભક્તો પણ આનંદ પામ્યા. (૫૩) હે રાજન્ ! કૃષ્ણ-વિષ્ણુ અને હરિને પણ ધર્મપુત્ર શ્રી નારાયણમુનિને જ જાણતા ભાલચંદ્રાદિ ભક્તો શ્રી નારાયણ મુનિમાં ભક્તિનું દ્દઢપણું પામ્યા. (૫૪)

પછી ભગવાનના ભક્તોનું માહાત્મ્ય જાણતા તે ભક્તો ભગવાનની સાથે આવેલા સમગ્ર મુક્તાનંદાદિ સાધુઓનું શ્રીહરિની માફક જ પરમ પ્રેમથી પૂજન કરતા હતા. (૫૫) ભક્તજનો ચંદન, અક્ષત, પુષ્પના હારો, વસ્ત્રો અને ભોજનોથી મુનિઓની વિધિ પ્રમાણે પૂજા કરી પછી સાષ્ટાંગ દંડવત્ પ્રણામ કરતા હતા. (૫૬) ભગવાન શ્રીહરિ પણ ભાલચંદ્ર આદિ સુરત નગરના નિવાસી ભક્તોને પોતાને વિશે તથા સત્પુરુષોમાં નિશ્ચલ ભક્તિ જોઈને અતિશય સંતોષ પામતા હતા. (૫૭)

હે રાજન્ ! મુનિપતિ શ્રીહરિ આ પ્રમાણે એકાંતિક ધર્મના જ્ઞાનમય પ્રશ્નોત્તરોથી સમગ્ર ભક્તજનોને આનંદ આપતા, પાખંડ માર્ગને ચોતરફથી મૂળે સહિત ઉખાડતા સતા સૂર્યનગરમાં સાત દિવસ રહ્યા. (૫૮) *ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે સૂર્યપુરે ભગવદ્દભક્તિ ભક્તલક્ષણ નિરૂપણનામૈકપંચાશત્તમોઽધ્યાય: (૫૧)*

सुव्रत उवाच - **एतस्मिन्नन्तरे काचिद्राज्ञी धर्मपुरेऽधवा । श्रुत्वा सद्‌भ्यो गुणांस्तस्य प्राप्ता भक्तिमतिस्थिराम् ॥१॥ भगवद्दर्शनोत्कण्ठा कुर्वती राज्यमप्यसौ ।आकृष्य सर्वतश्चित्तं तद्ध्याननिरताऽभवत् ॥२॥ कृशीकृततनुः कृच्छ्रैर्व्रतैर्भगवदाप्तये। जितेन्द्रिया सुशीला च साऽऽराध तमादरात् ॥३॥ सा मुहुः प्रैषयद्दूतान् हरये बुद्धिमत्तरान्। प्रतिजज्ञे स तेभ्यश्च तत्पुरागमनं नृप ! ॥४॥ तस्यै प्रसन्नो भगवान् सर्वेषां भाववित्प्रभुः । स्वदर्शनं दातुमैच्छन्मुनिभिः सह सत्पतिः ॥५॥ अथ स्वैरन्वितो भक्तैः प्रायाद्धर्मपुरं हरिः ।यत्रास्ति कुशलाख्या सा देवहूतिसमा गुणैः ॥६॥ आयान्तमाश्रुत्य निजेष्टदेवं राज्ञी मुदाऽमात्यजनैश्च पौरैः । साकं तमभ्यागमदीक्षणोत्का गजं पुरस्कृत्य विभूषिताङ्गम् ॥७॥ विचित्रवादित्रनिनादमुच्चैर्विधापयन्ती शिबिकाधिरूढा । पुरोपकण्ठे तमथाऽऽप्य यानात्सोत्तीर्य भक्त्या प्रणनाम हृष्टा॥८॥ पौराः प्रणामं विदधुश्च तस्मै स चापि तां तांश्च यथार्हमीशः । सम्मानयामास तयाऽर्थितोऽथो अध्यारुरोहोत्तमवारणं सः॥९॥ जयध्वनिर्भूरितर-स्तदाऽऽसीत्सहस्त्रशो भक्तजनैरुदीर्णः । सम्मिश्रितो मङ्गलवाद्यघोषैरुत्कर्णयामास ककुब्गजेन्द्रान्॥१०॥ भक्तैश्च पौरैः परिवेष्टितोऽसौ ततः पुरं प्राविशदूर्जितश्रीः ।अलङ्कृतं तोरणपूर्णकुम्भैः सम्मार्जितं चन्दनवारिसिक्तम् ॥११॥ त्यक्तान्यकार्यैः पुरयोषितौघैः सम्प्रेक्ष्यमाणः पथि यूथसंस्थैः । कृतार्थयन्स्वीयदृशा जनौघान् पुरे स रम्यं नृपसौधमाप ॥१२॥**

---

## અધ્યાય : ૫૨

### ધર્મપુરના નિવાસી ભક્તોને શ્રીહરિના દર્શનનો આનંદ અને ફરીથી દુર્ગપુરમાં આગમન કહ્યું છે.

**સુવ્રતમુનિ બોલ્યા** : હે રાજન્ ! આ અવસરમાં ધર્મપુર નામની રાજધાનીમાં વિધવા કુશળકુંવરબા રાણીએ (શ્રીહરિના નિર્દેશ અનુસાર વિચરણ કરતા થકા યદચ્છાથી ત્યાં આવેલા સત્પુરુષોથી અમાત્ય દ્વારા શ્રીહરિના ગુણો સાંભળી અતિદૃઢ ભક્તિ પ્રાપ્ત કરી હતી. (૧) શ્રીહરિનાં દર્શનની ઉત્કંઠાવાળાં રાણી પોતાનું રાજકાર્ય કરતાં હતાં તો પણ માયિક વિષયોથી પોતાનું મન ખેંચીને શ્રીહરિના ચિંતનપરાયણ રહેતાં હતાં. (૨)

શ્રીહરિની પ્રાપ્તિ માટે નાના પ્રકારના કૃચ્છ્ર વ્રતોથી શુષ્ક શરીરવાળા-જિતેન્દ્રિય-સુશીલ-સારા આચરણયુક્ત રાણી પ્રેમપૂર્વક શ્રીહરિને ભજતા હતાં. (૩) હે રાજન્ ! રાણી અતિશય બુદ્ધિમાન દૂતોને શ્રીહરિને પોતાના પુરમાં લાવવા માટે વારંવાર મોકલતી હતી. શ્રીહરિએ તે દૂતોને તેમના પુરમાં આવવા માટે 'હું તમારા પુરમાં આવીશ' એવી પ્રતિજ્ઞા કરી. (૪)

સર્વેજનોના અભિપ્રાય જાણનારા માટે જ રાણી ઉપર પ્રસન્ન થયેલા પ્રભુ સત્પુરુષોના સ્વામી શ્રીહરિ મુનિઓની સાથે રાણીને પોતાનાં દર્શન આપવા ઈચ્છતા હતા. (૫) પછી શ્રીહરિ પોતાના સંતો તથા ભક્તોની સાથે ધર્મપુર ગયા. જે ધર્મપુરમાં પોતાના સ્વધર્મ અને ભક્તિમાં પ્રીતિ વગેરે ગુણોથી દેવહૂતિ સમાન કુશળકુંવરબા નામનાં રાણી છે. (૬) તે રાણી પોતાના પુરમાં આવતા પોતાના ઈષ્ટદેવને સાંભળી શ્રીહરિનાં દર્શનમાં ઉત્સાહવાળા-નાના પ્રકારના અલંકારોથી શોભાયમાન શરીરવાળા ઉત્તમોત્તમ હાથીને આગળ કરી અમાત્યજનો અને પુરનાં જનોની સાથે હર્ષપૂર્વક શ્રીહરિની સન્મુખ ગયાં. (૭) પછી નાના પ્રકારનાં વાંજિત્રોના ધ્વનિ ઊંચેથી કરાવતાં થકા શિબિકામાં બેસીને રાણીએ પોતાના નગરની સમીપમાં શ્રીહરિને પ્રાપ્ત કરી નરયાન(મેના-પાલખી)થી ઊતરી હર્ષયુક્ત પ્રેમથી શ્રીહરિને નમસ્કાર કર્યા. (૮) પુરનાં જનો અને અમાત્ય આદિએ શ્રીહરિને નમસ્કાર કર્યા. પરમેશ્વર શ્રીહરિ પણ રાણીને તથા અમાત્યાદિ પુરજનોને યથાયોગ્ય કેમ સુખી-મજામાં છો ? વગેરે કુશળ પ્રશ્નોથી સંભાવના કરતાં હતાં. પછી રાણીએ પ્રાર્થના કરાયેલા શ્રીહરિ સુશીલ શણગારેલા હાથી ઉપર બેઠા. (૯) તે સમયે હજારો ભક્તજનોએ ઉચ્ચારણ કરાયેલો જય-જય આ પ્રકારનો ધ્વનિ માંગલિક વાદ્યોના ધ્વનિઓની સાથે મિશ્રિત થયેલો જય ધ્વનિ દશે દિશાઓમાં દિગ્ગજોનાં કર્ણ પર્યંત વ્યાપી ગયો. (૧૦)

પછી શોભાયમાન ઉત્તમ શરીરની કાંતિવાળા શ્રીહરિ પોતાના અનુયાયી ભક્તોની સાથે અને પુરનાં જનોની સાથે વીંટાયેલા, વસ્ત્ર-પલ્લવો વગેરેથી રચેલી નાના પ્રકારની ધ્વજાઓ અને દરેક ગૃહોના આગળના ભાગમાં જળથી પૂર્ણ કળશોથી શોભાયમાન વાળીને સાફ કરાયેલા, ચંદનના જળથી છંટાયેલા છે માર્ગો જેના એવા પુરમાં પ્રવેશ કરતા હતા. (૧૧) શ્રીહરિના દર્શન વિના બીજાં કાર્યો જેમણે ત્યાગ કર્યા છે એવા માર્ગમાં ટોળે મળીને રહેલા, પુરની સ્ત્રીઓના સમૂહોએ અતિપ્રેમથી જોવાયેલા શ્રીહરિ નગરમાં જનસમૂહોને પોતાના જોવાથી કૃતાર્થ કરતા થકા અતિ રમણીય રાજાના મહેલમાં આવ્યા. (૧૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

अकारयत्तस्य सहानुगस्य राज्ञी यथार्हं निलयेषु वासम् । चकार चातिथ्यमुदारचेता दासीव तं पर्यचरच्च भक्त्या ॥१३॥ महोपचारैर्विविधैरनर्घ्यैः पूजां तृतीयेऽहनि पूर्णिमायाम् । तस्याकरोत्प्रीतिभरेण हृष्टा विस्मापयन्ती जनतां जनेश ! ॥१४॥ वस्त्रैर्नृपार्हैर्विविधैर्नवीनैर्विभूषणैर्हेममयैरनेकैः । सद्रत्नमुक्ताफलहारवर्यैर्गन्धाक्षतैस्तं च पुपूज पुष्पैः ॥१५॥ भक्ष्यैश्च भोज्यैर्विविधैश्च लेह्यैस्तं तर्पयित्वा समुनिव्रजं सा । राज्यं च कोशं सगजाश्वधेनुं सर्वं स्वकीयं हरये ह्यदित्सत् ॥१६॥ तयाऽतिभक्त्या सर्वस्वं दीयमानमपि प्रभुः । नैवाग्रहीन्मुनिपतिस्तुष्टो भक्त्या तदीयया ॥१७॥ ततः सा परया भक्त्या द्रव्यपुञ्जं हरेः पुरः । कृत्वा सर्वांस्तदनुगान्वस्त्रैर्द्रव्यैः पुपूज च ॥१८॥ भक्तिमेवंविधां तस्या दृष्ट्वाऽऽपुर्विस्मयं जनाः । भक्तप्रियश्च भगवान्प्रसन्नो नितरामभूत् ॥१९॥ आत्मनिष्ठोपदेशैस्तां बोधयित्वा महामतिम् । भक्त्याप्तदृढवैराग्यां राज्ये पुनरयूयुजत् ॥२०॥ द्रव्यपुञ्जं च वस्त्राणि भूषणानि च सर्वशः । ददौ स ब्राह्मणादिभ्यः पूर्णकामो हरिस्तदा ॥२१॥ सभायां तत्र भगवान्निषण्णो हैम आसने । मर्यादयोपविष्टान्स्वान्सर्वान्भक्तानवैक्षत ॥२२॥ तूर्ष्णीं तत्र निषण्णेषु भक्तसङ्घेषु संसदि । प्रणम्य राज्ञी साऽपृच्छत्स्तुवती प्राञ्जलिः प्रभुम् ॥२३॥ राज्ञ्युवाच - नारायणाद्य भवता सफलीकृतो मे हृत्स्थश्चिरन्तनमनोरथपादपो वै । दानेन दुर्लभतरस्वकदर्शनस्य नित्यं विरिञ्चिमुखदैवतवाञ्छितस्य ॥२४॥ यैरीक्षितं न सुरमानवमङ्गलाङ्गं श्रीमद्वपुस्तव मनोहरमत्र नेत्रैः । तान्यब्जपत्ररुचिराण्यपि मानवानां मायूरबर्हगतचन्द्रकतां भजन्ति ॥२५॥ नानाविधाघनिचयप्रशमैकशीलां सद्भक्तिबोधनपटुं त्वदुदारकीर्तिम् । शृण्वन्ति यैरपि न शष्कुलिकासमानैः कर्णैस्त एव

---

રાણીએ અનુયાયીજનોએ સહિત શ્રીહરિનો નિવાસ યથાયોગ્ય સ્થાનોમાં કરાવ્યો અને ઉદાર મનથી અતિશ્રેષ્ઠ આતિથ્યસત્કાર કર્યો અને દાસીની માફક શ્રીહરિની ભક્તિપૂર્વક સેવા કરી. (૧૩) હે રાજન્ ! ત્રીજે દિવસે એટલે વૈશાખ સુદી પૂર્ણિમાને દિવસે હર્ષ પામેલા રાણી જનસમૂહને વિસ્મય પમાડતાં થકા નાના પ્રકારના અમૂલ્ય મહોપચારોથી શ્રીહરિની પૂજા અતિસ્નેહથી કરતાં હતાં. (૧૪) રાજાઓને યોગ્ય નાના પ્રકારનાં નવીન સોનેરી વસ્ત્રો-સુવર્ણના અનેક અલંકારો-ઉત્તમ રત્નોએ યુક્ત જે મોતીઓના શ્રેષ્ઠ હારો-ચંદન-અક્ષત તથા પુષ્પોની માળાઓથી રાણીએ શ્રીહરિની પૂજા કરી. (૧૫) વિવિધ પ્રકારના ભક્ષ્ય-ભોજ્ય-લેહ્ય અને ચોષ્યનાં ભોજનોથી મુનિમંડળે સહિત શ્રીહરિને સંતૃપ્ત કરી રાણીએ પોતાના હાથી-ઘોડા અને ગાયો સહિત કોશ(ધનનો ભંડાર) અને સર્વ રાજ્ય શ્રીહરિને આપવા ઈચ્છા કરી. (૧૬)

રાણીએ અતિ ભક્તિથી આપવા માંડેલું સર્વસ્વ, ત્યાગી સંત-પુરુષોના પતિ પ્રભુ શ્રીહરિએ ગ્રહણ ના કર્યું. રાણીની ભક્તિથી પ્રસન્ન થયા. (૧૭) પછી રાણીએ પરમ ભક્તિથી નારાયણ મુનિની આગળ સોના અને ચાંદીના રૂપિયાનો ઢગલો કર્યો, અને શ્રીહરિના અનુયાયી સાધુ અને વર્ણિઓ વગેરેની વસ્ત્રો અને દ્રવ્યોથી યથાયોગ્ય પૂજા કરી. (૧૮) રાણીની આવા પ્રકારની ભક્તિ જોઈને જનો વિસ્મય પામ્યા. ભક્તવત્સલ શ્રીહરિ અત્યંત પ્રસન્ન થયા. (૧૯) મહાબુદ્ધિવાળા ભક્તિથી અતિદૃઢ વૈરાગ્યવાળાં રાણીને પોતાનામાં સ્થિતિવાળા ઉપદેશોથી જનક રાજા વગેરે આત્મનિષ્ઠોના દૃષ્ટાંતથી બોધ આપી ફરીથી રાજ્યમાં પણ જોડતા હતા. (૨૦) તે સમયે પૂર્ણકામ શ્રીહરિએ રાણીએ અર્પણ કરેલો દ્રવ્યનો ઢગલો અને સમગ્ર વસ્ત્રો તથા અલંકારો બ્રાહ્મણ વગેરેને આપી દીધાં. (૨૧)

રાજદરબારમાં સભામાં સુવર્ણના ઊંચા સિંહાસનમાં બેઠેલા શ્રીહરિ મર્યાદાથી બેઠેલા પોતાના સર્વ ભક્તોને જોતા હતા. (૨૨) સભામાં પોતાના ભક્તજનોના સમુદાયો મૌન બેઠા ત્યારે રાણીએ બંને હાથ જોડી શ્રીહરિને પ્રણામ કરી પ્રથમ સ્તુતિ કરી પૂછ્યું : (૨૩) **રાણી કહે છે** : હે નારાયણ ! મારા હૃદયમાં રહેલ લાંબા સમયથી થયેલું મનોરથરૂપી વૃક્ષ, નિત્ય બ્રહ્માદિ દેવતાઓએ ઈચ્છેલું-અત્યંત દુર્લભ પોતાના દર્શનના આપવાથી અતિ દયાળુ તમોએ નિશ્ચે હાલમાં ફળવાળું કર્યું છે. (૨૪) દેવો અને મનુષ્યોના મંગળરૂપ સમગ્ર શ્રેય આપનારાં અંગોવાળું અતિ મનોજ્ઞ તમારું અતિ સુંદર શરીર આ લોકમાં જે જનોએ નેત્રોથી જોયું નથી; કમળના પત્ર સમાન સુંદર એવા તે મનુષ્યોનાં નેત્રો મયૂરનાં પીછામાં રહેલા ચાંલ્લાના ભાવને પામેલાં છે. (૨૫) અનેક પ્રકારના પાપોના સમુદાયને નાશ પમાડવાના એક સ્વભાવવાળી એકાંત ભક્તિના બોધમાં ચતુર એવી તમારી ઉદાર કીર્તિ જલેબીના સમાન આકારવાળા કાનોથી જે જનો સાંભળતા નથી તે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

ननु नागबिलत्वभाजः ॥२६॥ जिह्वा च या न तव गायति चारुगाथाः संसारसागरसमुत्तरणार्थिनावः । सा ग्राम्यगीतनिपुणापि न मानवी स्याद्भैकी मुधाऽनिशमसद्रवकारिणी हि ॥२७॥ शुश्रूषणं भगवतस्तव यैः कृतं नो नो वा सतामघकृषां दृशिमात्रतोऽपि । ते भूषिता अपि महार्घ्यविभूषणैर्हि नृणां भुजाः शबभुजा इव गर्हणीयाः ॥२८॥ त्वन्मदिराणि च सतो निकषा न यान्ति पादास्तु ये तनुभृतामपि पद्मशोभाः । ते पैतृकाननतरुत्वमिहैव यान्ति त्वत्सेवनेऽत्र निरता मनुजास्तु धन्याः ॥२९॥ सर्वज्ञ ! भगवन्स्वामिन्मयाऽद्य तव सेवनात् । प्राप्तं स्वजन्मसाफल्यं कृपयैव तव प्रभो ! ॥३०॥ धर्मसंरक्षणार्थं त्वं स्वतन्त्रः पुरुषोत्तमः । धत्से नराकृतिं भूमावधर्मस्य च शान्तये ॥३१॥ कर्ता वक्ता च धर्मस्य त्वमेवासि जगद्गुरो ! । त्वत्तः सनातनं धर्मं श्रोतुमिच्छाम्यहं ततः ॥३२॥ धर्मं साधारणं नृणां विशेषं चापि मे विभो ! । वक्तुमर्हसि धर्मात्मन्धर्ममार्गप्रवर्तकः ॥३३॥ सुव्रत उवाच - इति पृष्टः स भगवान्भक्तिमत्या तयाऽऽदरात् । प्रत्युवाच प्रसन्नस्तां तोषयन्भक्तमण्डलम् ॥३४॥ श्रीनारायणमुनिरुवाच - साधु पृष्टं त्वया नृणां हितैषिण्या महामते ! । तुभ्यं निश्छद्मभक्तायै नावाच्यं मम किञ्चन ॥३५॥ नृणां सनातना धर्मा नारदेन पुरोदिताः । धर्मराजाय तान्वच्मि श्रीमद्भागवतस्थितान् ॥३६॥ इत्युक्त्वा भगवांस्तस्यै सप्तमस्कन्धसंस्थितान् । धर्मानुवाच सकलांस्ततश्चेत्थमुवाच ताम् ॥३७॥ इति ते कथिता धर्मा मनुष्याणां सनातनाः । निःश्रेयसप्रदा युक्ता ज्ञानवैराग्यभक्तिभिः ॥३८॥ एत एव प्रयत्नेन सेवनीया मुमुक्षुभिः । अधिकारानुसारेण मनुजैर्मनुजाधिपे! ॥३९॥ इत्युक्ता सा भगवता मुदिता नितरां नृप ! । सिषेवे परया प्रीत्या स्वधर्मस्था तमेव हि ॥४०॥ इत्थं प्रश्नोत्तरैः स्वामी प्रत्यहं धर्मसंश्रयैः । आनन्दयन्स तां चान्यांस्तत्रोवास यथासुखम् ॥४१॥

---

જનોના કર્ણો સર્પોના બીલ સમાન છે. (૨૬) જે જિહ્વા સંસારરૂપી સમુદ્રને સારી રીતે તરવારૂપ પ્રયોજનવાળા જનોને નાવરૂપ તમારી સુંદર કથાઓ ગાતી નથી તે જિહ્વા ગ્રામ્યવાર્તામાં નિપુણ હોય તો પણ મનુષ્ય સંબંધી ન થાય પરંતુ દેડકાની જિહ્વાની માફક મિથ્યા રાત્રિ-દિવસ અર્થશૂન્ય શબ્દ કરનારી છે. (૨૭) જે હાથોથી પરમેશ્વર એવા તમારી સેવા કરી નથી અથવા દૃષ્ટિ માત્રથી પણ પાપ નાશ કરનારા તમારા સાધુઓની સેવા કરી નથી. તે હાથો મહામૂલ્યવાળાં આભૂષણોથી અલંકૃત કરેલા હોય તોપણ શબના હાથોની માફક નિન્દનીય છે. (૨૮) દેહધારીઓનાં જે ચરણો તમારાં મંદિરો પ્રત્યે જતાં નથી તેમ જ સત્પુરુષોની સમીપમાં જતાં નથી તે ચરણો તો કમળની માફક સુકોમળ હોય તોપણ આ લોકમાં સ્મશાનના વૃક્ષપણાને જ પામે છે. માટે આ લોકમાં જે જનો તમારી સેવામાં નિરંતર આસક્ત રહે છે તે કૃતકૃત્ય થયેલા છે. (૨૯) હે સર્વજ્ઞ ! હે ભગવન્ ! હે સ્વામિન્ ! હે પ્રભો ! હાલમાં મેં તમારી સેવા અને તમારી કૃપાથી પોતાના જન્મની સફળતા પ્રાપ્ત કરી છે. (૩૦) સ્વતંત્ર પુરુષોત્તમ તમો ધર્મરક્ષા માટે અને અધર્મની શાંતિ માટે પૃથ્વીમાં મનુષ્યાકાર ધારણ કરી વર્તો છો. (૩૧) હે જગદ્‌ગુરો ! ભાગવતધર્મના આચરણ કરનારા અને કહેનારા તમો જ છો માટે તમારાથી સનાતન ધર્મ હું સાંભળવા ઈચ્છું છું. (૩૨) હે વિભો ! હે ધર્માત્મન્ ! ધર્મમાર્ગના પ્રવર્તક તમો મનુષ્યોના સાધારણ ધર્મ અને વિશેષ ધર્મ પણ મને કહેવા માટે યોગ્ય છો. (૩૩) હે રાજન્ ! આ પ્રકારે ભક્તિવાળાં તે રાણીએ આદરપૂર્વક પુછાયેલા શ્રીહરિ પ્રસન્ન થઈને ભક્તોના મંડળને આનંદ આપતા રાણીને ઉદ્દેશી બોલ્યા : (૩૪)

**શ્રી નારાયણ મુનિ કહે છે :** હે મહામતે ! મનુષ્યોના હિતેચ્છુ તમોએ સારું પૂછયું. કપટે રહિત ભક્તિવાળાં તમોને નહિ કહેવા યોગ્ય કંઈ પણ નથી. (૩૫) હે રાણી ! મનુષ્યોના સનાતન ધર્મો પૂર્વે નારદ ઋષિએ યુધિષ્ઠિર રાજાને કહેલા છે. શ્રીમદ્ ભાગવતમાં રહેલા તે ધર્મો હું તમોને કહું છું. (૩૬) હે રાજન્ ! શ્રીહરિ આ પ્રમાણે કહીને સપ્ત સ્કંધમાં રહેલા સમગ્ર ધર્મો કુશળકુંવરરાણીને કહેતા હતા. પછી રાણીને આવી રીતે કહ્યું : (૩૭) હે રાણી! આ પ્રમાણે મનુષ્યોને કલ્યાણ આપનારા જ્ઞાન-વૈરાગ્ય અને ભક્તિએ યુક્ત સનાતન ધર્મો મેં તમોને કહ્યા. (૩૮) હે મનુષ્યાધિપે ! આ ધર્મો જ મુમુક્ષુઓએ અધિકારને અનુસરીને પ્રયત્નથી આચરણ કરવા. (૩૯)

હે નૃપ ! શ્રીહરિએ આ પ્રમાણે કહેવાયેલા અતિશય હર્ષવાળાં કુશળ રાણી પોતાના ધર્મમાં રહ્યાં થકા શ્રીહરિને જ પરમ ભક્તિથી સેવતાં હતાં. (૪૦) શ્રી નારાયણ મુનિએ, આ પ્રમાણે એકાંતિક ધર્મના આશ્રયવાળા પ્રશ્નોત્તરોથી દરરોજ રાણી અને બીજા ભક્તોને આનંદ આપતા થકા ધર્મપુરમાં સુખપૂર્વક નિવાસ કર્યો. (૪૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

उषित्वा वासरान् पञ्च ततो गन्तुमना अपि । तया भृशं प्रार्थ्यमानो मासमेकमुवास सः ॥४२॥ सम्भारेणातिमहता स्नानयात्रामहोत्सवम् । कारयामास भगवान् ज्यैष्ठ्यां तत्र तया नृप ! ॥४३॥ एवं सन्तोषयित्वा तां भक्तवश्यो जगद्गुरुः । स्मरन्नभयभूपालवरं निरगमत्ततः ॥४४॥ अनुयान्तीं साश्रुनेत्रां सपौरां कुशलां हरिः । बलात्तां संनिवर्त्यैव देवकीतीर्थमागमत्॥४५॥ तत्र तीर्थविधिं कृत्वा व्यसृजद्यूथशो मुनीन् । अज्ञमानवबोधार्थं नानादेशान्महौजसः ॥४६॥ सह स्वेन समायातान् नानादेशजनानपि । प्रेषयामास भगवान्स्वं स्वं देशं ततोऽखिलान् ॥४७॥ आत्मसेवारतैर्नित्यं वर्णिभिः साधुपत्तिभिः । सादिभिश्च समं प्रायादश्वारूढोऽर्कजानदीम् ॥४८॥ उत्तीर्य तां च रेवां च महीं साभ्रमतीं च सः। भाल्लदेशमतिक्रम्य दुर्गपत्तनमागमत् ॥४९॥ तत्र तत्र स्वभक्तानां ग्रामेषु निवसन् पथि । तान् सर्वांस्तोषयित्वैव तत्रायातः स भूपते ! ॥५०॥ आयान्तं हरिमाश्रुत्य राजा पौराश्च सत्वरम् । त्यक्तान्यकार्या धावन्तस्तं प्रत्युद्ययुरादरात् ॥५१॥ पुरोपकण्ठे एवामुमायान्तं वीक्ष्य ते मुदा । प्रणेमुः साश्रुनयनाश्चिरदर्शनविह्वलाः ॥५२॥ यथोचितं मानयित्वा तान् हरिः सह तैः पुरम् । प्रविश्य तत्र स्वावासमेत्यासन उपाविशत् ॥५३॥ जयारमादयो योषा दृष्ट्वा तं हर्षविह्वलाः । प्रणेमुः परया प्रीत्या गततद्विरहज्वराः ॥५४॥ आनन्दं परमं प्रापत्सान्वयोऽभयभूपतिः । जानन्सत्यप्रतिज्ञं तं तत्सेवानिरतोऽभवत् ॥५५॥ या या स्वसेवा हरिणा विहिता यस्य यस्य च । स स तां तां मुदाऽकार्षीत्कृतार्थं स्वं विदंस्तया ॥५६॥ रथायात्रादिने तत्र हरिः सङ्गव आगतः । मध्याह्ने तेन भूपेन महोत्सवमकारयत् ॥५७॥

---

શ્રીહરિ પાંચ દિવસ ત્યાં નિવાસ કરી ત્યાંથી ચાલવાના મનવાળા હતા તો પણ રાણીએ અત્યંત પ્રાર્થના કરાયેલા સતા એક માસ રહ્યા. (૪૨) હે રાજન્ ! શ્રીહરિએ ધર્મપુરમાં જેઠ સુદી ૧૫ પૂનમને દિવસે રાણી પાસે અતિ મહાન સામગ્રીથી કૃષ્ણને શંખોદકથી સ્નાન કરાવવાનો મહોત્સવ કરાવડાવ્યો. (૪૩) ભક્તાધીન જગદ્‌ગુરુ શ્રીહરિ આ પ્રકારે રાણીને સંતોષ પમાડીને અભય રાજાને આપેલા વરને સંભારતા સતા ધર્મપુરથી નીકળ્યા. (૪૪)

શ્રીહરિ પોતાની પાછળ આવતાં વિરહનાં આંસુ જેમનાં નેત્રોમાં છે એવા પુરજનોએ સહિત રાણીને બળપૂર્વક પાછાં વાળીને દેવકી તીર્થમાં આવ્યા. (૪૫) શ્રીહરિ દેવકી તીર્થમાં તીર્થવિધિ કરી મહા પ્રતાપ યુક્ત સાધુઓને અજ્ઞાની માણસોને પોતાના સ્વરૂપનો બોધ આપવા માટે નાના દેશો પ્રત્યે મંડળો સહિત મોકલતા હતા. (૪૬)

પછી શ્રીહરિ પોતાની સાથે આવેલા સમગ્ર નાના દેશના જનોને પણ પોતપોતાના દેશમાં મોકલતા હતા. (૪૭) દરરોજ પોતાની સેવાપરાયણ રહેતા વર્ણીઓ, સાધુઓ-પાર્ષદો અને ઘોડેસ્વારો સાથે ઘોડા પર બેસી શ્રીહરિ તાપી નદીને પામ્યા. (૪૮) શ્રીહરિ તાપી નદી ઊતરી નર્મદા-મહી અને સાભ્રમતી ઊતરી ભાલ દેશનું ઉલ્લંઘન કરી અભય રાજાની રાજધાની દુર્ગપુરીમાં આવ્યા. (૪૯) હે ભૂપતે ! શ્રીહરિ માર્ગમાં ત્યાં ત્યાં તે તે દેશોમાં પોતાના ભક્તોનાં ગામોમાં નિવાસ કરતા થકા સર્વે પોતાના ભક્તોને આનંદ પમાડીને જ દુર્ગપુરમાં આવ્યા. (૫૦)

પોતાના પુરમાં આવતા શ્રી સહજાનંદ સ્વામીને સાંભળી અભય ભૂપતિ અને પુરનાં જનો તત્કાળ બીજાં કાર્યો ત્યાગ કરી દોડતાં સતાં સ્નેહપૂર્વક શ્રીહરિની સન્મુખ ગયાં. (૫૧) અભયાદિ ભક્તો પોતાના નગરના સમીપમાં આવતા શ્રીહરિને જોઈ હર્ષથી આંસુયુક્ત નેત્રોવાળા અને લાંબા સમયના દર્શનથી વિહ્‌વળ ચિત્તવાળા થકા સાષ્ટાંગ પ્રણામ કરતા હતા. (૫૨)

શ્રીહરિ અભયાદિ પોતાના ભક્તોને યથાયોગ્ય કેમ સુખી છો ? વગેરે પ્રશ્નોથી સંભાવના કરી, તે ભક્તોની સાથે દુર્ગપુરમાં પ્રવેશ કરી ત્યાં પોતાના નિવાસસ્થાનમાં જઈને પલંગ ઉપર બેઠા. (૫૩) જયા-રમા-લલિતા વગેરે હરિભક્ત સ્ત્રીઓ શ્રીહરિને જોઈ હર્ષથી વિહ્‌વળ થયેલી, શ્રીહરિના વિયોગનો પરિતાપ જેમને નિવૃત્ત થયો છે એવી પરમ પ્રીતિથી પંચાંગ પ્રણામો કરતી હતી. (૫૪) પરિવારે સહિત અભયરાજા અતિશય આનંદ પામ્યા. શ્રીહરિને સત્યપ્રતિજ્ઞાવાળા જાણતા સતા શ્રીહરિની સેવાપરાયણ થયા. (૫૫)

શ્રી નારાયણમુનિએ જે જે ભક્તજનને જે જે પોતાની સેવા કહી તે તે ભક્તજન તે સેવાથી પોતાના આત્માને કૃતાર્થ માનતા સતા તે તે સેવા પરમ હર્ષથી કરતા હતા. (૫૬) શ્રીહરિ ગઢપુરમાં રથયાત્રાને દિવસે સંવત્ ૧૮૬૭ના અષાઢ સુદી તૃતીયાને દિવસે સંગવ સમયે આવ્યા. મધ્યાહ્‌ને અભયરાજા દ્વારા શ્રીકૃષ્ણને રથ ઉપર બેસાડી આરતી વગેરેનો મહોત્સવ કરાવતા હતા. (૫૭)

सेवकैः सहितः सोऽथ वसंस्तत्र हरिः स्वयम् । सर्वत्रान्वेषयामास गुप्ताधर्मप्रवेशनम् ।।५८।। अधर्मोत्थानमशृणोद्यत्र यत्र स ईश्वरः । तत्र तत्र स्वयं गत्वा नाशयामास तं ततः ।।५९।। क्वचित् क्वचिन्मुनींश्चापि प्रेषयित्वा तथाऽकरोत् । सर्वोपायैः सर्वकालं धर्ममेव ह्यपीपलत् ।।६०।। इत्थं धर्मधुरन्धरः स भगवान् धर्मं प्रतिष्ठापयंस्तस्मिन् दुर्गपुरे वसन्निजजनानानन्दयामास च । गत्वा ग्रामपुरान्तराण्यथ ततः कृत्वोत्सवान्भूरिशस्तत्रागत्य पुनः पुनः समवसद्भक्तैककल्पद्रुमः ।।६१।। इति ते कथितं सर्वं यत्पृष्टं भूपते ! त्वया । नारायणस्य चरितं कलिकल्मषनाशनम् ।।६२।। नारायणस्य मुनिभर्तुरिदं चरित्रं यः कीर्तयेच्च शृणुयादपि मानवोऽत्र । तौ निश्चितं निजरिपून्नृपते ! जयेतां बाह्यान्तरांश्च सुखमीप्सितमाप्नुयाताम् ।।६३।। इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे धर्मपुरस्थभक्तजनानन्दन–दुर्गपुरप्रत्यागमननिरूपणनामा द्विपञ्चाशत्तमोऽध्यायः ।।५२।।

।। द्वितीय प्रकरणं समाप्तम् ।।

---

પછી પોતાની સેવા કરનારા ભક્તજનોએ સહિત પોતે શ્રીહરિ દુર્ગપત્તનમાં નિવાસ કરતા સતા સર્વ દેશોમાં ગુપ્ત રહેલા અધર્મને ચારચક્ષુ (ગુપ્ત દૂતો) દ્વારા શોધાવતા હતા. (૫૮) સર્વનિયંતા શ્રીહરિ જે જે દેશમાં અધર્મના માર્ગની ઉત્પત્તિ સાંભળતા તે તે દેશમાં પોતે જઈને તે દેશથી અધર્મમાર્ગ નાશ કરાવતા હતા. (૫૯) શ્રીહરિ ક્યારેક ક્યારેક કોઈ કોઈ દેશમાં મુનિઓને મોકલીને પણ અધર્મમાર્ગનો વિનાશ કરતા હતા. સર્વ ઉપાયોથી નિરંતર ધર્મનું જ પાલન કરાવતા હતા. (૬૦)

આ પ્રમાણે ધર્મમાર્ગને સ્થાપનપૂર્વક બદ્ધમૂળ કરતા ધર્મધુરંધર શ્રીહરિ ગઢપુરમાં નિવાસ કરતા સતા પોતાના ભક્તજનોને આનંદ કરાવતા હતા. ભક્તજનોના એક કલ્પવૃક્ષ શ્રીહરિ દુર્ગપત્તનથી પોતાના ભક્તજનોનાં ગામોમાં અને પુરોમાં જઈ ઘણા ઉત્સવો કરી ગઢપુરમાં વારંવાર આવી નિવાસ કરતા હતા. (૬૧) હે ભૂપતે ! તમોએ નારાયણ ભગવાનનું જે ચરિત્ર પૂછ્યું, કળિના મળને નાશ કરનારું તે સર્વ શ્રીહરિનું ચરિત્ર મેં તમોને આ પ્રમાણે કહ્યું. (૬૨)

હે રાજન્, સમગ્ર મુનિઓના સ્વામી શ્રીહરિનું આ ચરિત્ર આ લોકમાં જે મનુષ્ય ગાન કરે અને સાંભળે તે બંને જણ પણ બહારના (ધનાદિ હરનારા) અને અંતકરણના કામાદિ શત્રુઓને પરાભવ પમાડે અને ઈચ્છિત સુખને પામે. (૬૩)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે દ્વિતીય પ્રકરણે ધર્મપુરસ્થભક્તજનાનન્દન - દુર્ગપુરપ્રત્યાગમનનિરૂપણનામા દ્વિપંચાશત્તમોऽધ્યાયઃ (૫૨)*

पूजिते निजजनैः सुगन्धिभिश्चन्दनैः कुसुमहारशेखरैः ।
नैकदेशगतभक्ततुष्टिदे श्रीहरौ भवतु मन्मतिः सदा ।।

**।। દ્વિતીય પ્રકરણમ્ સમાપ્તમ્ ।।**



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર